कां मुद्रां मूलमंत्रं स्वपादुकां शिष्यादन्यत्र देवेशि न वदेद्यस्य कस्यचित् पारंपर्यागमाम्नायमंत्राचारादिकं प्रिये सर्वं गुरुमु
खाल्लब्धं सफलं स्यान्नचान्यथा श्रीगुरोराश्रयसंभूतं पुस्तकं देववत् प्रिये नित्यं समर्चयेद्भक्त्या पशुहस्ते न निक्षिपेत् सदा रव
क्षयेत् कुलशास्त्राणि पार्वति पशुशास्त्राणि सर्वाणि वर्जयेत्सर्वदा रवत् स्वधर्मं संत्यजेत् तीर्थमयेत्संस्याद्द्विजोत्तमेः तथा पशु
मुखाद्धर्मान्न श्रोतव्याश्च कौलिकैः यः शृणोति कुलाचारं यथा शास्त्रं च यो वदेत् तावुभौ गच्छतः साक्षाद्योगिनीवीरमेलनं अ
श्रद्दधाना ये चात्र कुलधर्मान् कुलेश्वरि नरकान्न निवर्तन्ते यावदाभूतसंप्लवं कृत्वा पूजां यथा प्रीता मूलेन च समाहृताः सकु
त्कामगताश्चापि पंचयागगुरुयोषितः अलंघ्याः पूजनीयाः स्युर्गुरुवद्गुरुयोषितः कुलाष्टकाकुलस्वर्णाकुमारी चकृशोदरी म
नोहरी यौवनस्यामस्त्वयेदेवताधिया आमसमांसहसाकुंभमत्तेभसिद्धलिंगिने सहकारमशोकं च क्रीडालोलाकुमारिका प
कहंतेस्मशानेचसम्मूह योषितामपि नारीचक्रकवस्त्रनोहिष्ठा वदेतभक्तिमान् गुरुभक्तिसुतज्येष्ठकनिष्ठकुलदेशिकान् कुलदर्श
नशास्त्राणि कुलद्रव्याणि कौलिकान् प्ररकान्नैवकाश्चापि वाचकान्दर्शकांस्तथा शीलकान्वाधकान्योगियोगिनीसिद्धरूपकान्

१४

कन्याकुमारिकांनग्नांवोन्मत्तामपियोषितम् ननिंदेतजुगुप्सेतनहसेन्नावमानयेत् नाप्रियंनाहितंब्रूयात्कस्यापिकुलयोगिनः
कुरूपेत्यनिकृष्टेतिनवदेत्कुलयोषितां परीक्षयेन्नभक्तानांवीराणांचकृताकृतं नपश्येद्वनितांनग्नामुन्मत्तांप्रकटस्तनीं
नदिवासेवयेन्नारींतद्योनिंननिरीक्षयेत् याकाचिदंगनालोकेसामातृकुलसंभवा कुप्यंतिकुलयोगिन्योवनितानामनुक्रमा
त् शतापराधावनितांपुष्पेणापिनताडयेत् दोषान्नगणयेत्स्त्रीणांगुणानेवप्रकाशयेत् तिष्ठंतिकुलयोगिन्यःकुलवृक्षेषु
सर्वदा नत्स्वेषुनभोक्तव्यमर्कपत्रेविशेषतः नस्वपेत्कुलवृक्षाधोनचोपद्रवमाचरेत् दृष्ट्वाभक्त्यानमस्कुर्याच्छेदयेन्नकदा
चन श्लेष्मातककरंजाक्षनिंबाश्वत्थकदंबकाः बिल्वोवटोडुंबरश्चकुलवृक्षानवस्मृताः देवतागुरुशास्त्रादिसिद्धाचारविडंब
कः विद्याचौरोगुरुद्रोहीब्रह्मराक्षसतांव्रजेत् गुरुंमोहाद्वदनादत्यनिर्भर्त्स्यवीरपुरुषान् विकल्प्यकुलशास्त्राणिभवंतिब्रह्मरा
क्षसाः एकाक्षरप्रदातारंयोगुरुंनैवमन्यते श्वानयोनिशतंगत्वाचाण्डालत्वमवाप्नुयात् गुह्यंप्रकाशयेद्द्वीमात्मंत्रंनैवप्रकाश
येत् अप्रकाश्यप्रकाशाभ्यांक्षीयतेसंपदायुषी कुलधर्मसमाश्रित्यआचारंयोनपालयेत् यथेष्टाचारिणस्तस्यमहापातकि
नःप्रिये आपदोदुरितारोगाःशापविघ्नाःकुलेहाभयं योगिनीनांप्रकोपश्चस्खलिताचपदेपदे भ्रष्टमानःप्रनष्टश्रीस्तेजोहीनातिदुः
खितः निंदितःसर्वविद्विष्टोविकलःसंगवर्जितः देशाद्देशांतरंयातिकार्यहानिश्चसर्वदा तत्रापिकुलमार्गस्थाशाकिन्यः
कुलपालिका भक्षयंतिपुनस्तांसांवरोदेहमयैवतु तस्मादाचारवान्देवियोगिनांचप्रियोभवेत् सदाचारेणदेवत्वंयोगिनीवी
रमेलनं संप्राप्नुवंतितिप्रोक्तंलौकिकान्नविपर्ययात् संस्कारेणविहीनत्वात्कुरुवाकाशलेखनात् आचारलंघनाद्देविकौ
लिकःपतितोभवेत् नित्यनैमित्तिककाम्यमंत्रसंस्कारादिलोपजं प्रत्यहःपापदुःसंगंमंत्रसांकर्यसंभवं गुप्तप्रकटसंभूतंज्ञानाज्ञा
नकृतंप्रिये एवमादिषुदोषेषुपापसंगुरुलाघवं देहकालवयोवित्तसम्यक्ज्ञात्वायथाविधि प्रायश्चित्तंगुरुर्दद्यात्सर्वपाप

वि.ग्री.
द्वि
१५

विष्णुद्वेषे शिष्यापि च तथा प्रोक्तं प्रायश्चित्तं समाचरेत् अथवा सर्वपापानां गुरुनामजपः स्मृतिः ज्ञात्वा नदस्य कालुष्यं परिशुद्धं यया
ग्निना अनाचारसमालिप्तं प्रायश्चित्ताग्निना दहेत् बहुनात्र किमुक्तेन रहस्यं शृणु पार्वति वर्णाश्रमाणां सर्वेषामाचारः सङ्गतिः प्रदः
गुरुस्त्रिवासमाचारं कथयेत् कुलनायिके तत्र रहस्यानि शिष्यश्चेत् तदा पापं गुरोर्न हि मन्त्रिदोषश्च राजानं भार्यादोषः पतिर्यथा यथा
प्राप्नोत्यसंदेहः शिष्यपापं गुरुः प्रिये अथ च देवस्थाने गुरुस्थाने स्मशाने वा चतुष्पथे पादुकासनविण्मूत्रमैथुनानि विवर्जयेत् दे
वं गुरुं गुरुस्थाने नेत्रैस्तेनापि देवताः सिद्धसिद्धादि वामाश्च श्रीपूर्वं समुदीरयेत् प्रमत्तान्मत्तजां कन्यां पुष्पितां पतितस्त्रियं विदू
षकं तर्केकेशीं च कामार्तां चन निंदयेत् कन्यायोनिपशुक्रीडा दिगंबरां प्रकटस्तनीं नालोकयेत् परद्रव्यं परदारांश्च वर्जयेत् धार्म्या
गुरुविप्राग्निविद्याकोपं न शमयति नैव प्रसारयेत् पादौ न तानपि च लंघयेत् आलस्यमदसंमोहशाठ्यपैशुन्यविग्रहात् ग्रस्त्या मा
नसे मानेपरनिंदां च वर्जयेत् लिंगिनं व्रतिनं विप्रं देवं वेदांश्च संहिताः पुराणागमशास्त्राणि कथ्याश्चापि न दूषयेत् युगं मुशल
मश्मानं दामचुल्लीमुलूखलं सूर्यं मस्मार्जनीं दंडं ध्वजं वैडूर्यमायुधं कलशं चामरं छत्रं दर्पणं भूषणं तथा भोगयोग्यानि चा
न्यानि योगद्रव्याणि यानि च महास्थानेषु वस्तूनि यानि वा देवतालये दिव्यौघानि पदार्थानि भूतादिष्ठानि यानि वै लंघयेन्नात्र
नैतानि नैतानि च पदा स्पृशेत् योगिनी लोकविद्विष्टा या च स्वैरविसर्पिणी परहिंसात्मिका या च न तामवतरेत् क्वचित् प्रतिगृहेन
रक्षणीयाद्रात्मभोगाविधित्सया देवतागुरुपूजार्थं यत्नतोऽप्यर्जयेद्धनं धारयेदार्जवं सत्वं सौशील्यसमतां धृतिं शांतिं दयामनाश्चाव
दिव्यांशकिं च सर्वदा विभीतकार्ककारंजस्नुहिच्छायां न संश्रयेत् स्तंभदीपमनुष्याणामन्येषां प्राणिनां तथा नखाग्रकेशनिर्धूत
स्नानवस्त्रघटोदकं एतत्सर्वं त्यजेद्दूरं एवं स्थाने रजस्तथा न निंदेत् कारणं देवं न शास्त्रं देवनिर्मितं न गुरुं साधकं चैव लिंगच्छायां न लं
घयेत् न चालं चैन्न निर्माल्यं नदद्याच्छिव दीक्षिते न लंघयेद्गुरोराज्ञामुत्क्रांत वेदं तथा गोत्रादि वा च तस्यास्तां दासवत्परिपालयेत् अ

१५

15

सत्यमप्युभंतद्वद्कुवादंपरित्यजेत् अप्रियंचतथालस्यंकाममक्रोधौविशेषतः अप्रछन्नमुखोब्रूयाद्गुरोरग्रेकदाचन अभिमानेनकु-
र्वीतधनधान्याश्रमादिभिः गुरुदत्तमभोक्तव्यंतेनादत्तंकदाचन दत्तंप्रसादवद्ग्राह्यंलोभेनानकदाचन अहंतेदेवपूज्यांचगुरोरग्रेपरि-
त्यजेत् पादुकायोगपट्टादिगुरुचिह्नानिसादरं नलंघयेत्स्पृशेन्नैवपादाभ्यांप्रणमेत्सदा पर्यंकशयनंतद्वत्तथापादप्रसारणं अंगभंगं
चलीलांचनकुर्याद्गुरुसन्निधौ गमनागमनेकुर्यान्नात्मगमनंगुरुपादुका छायांनलंघयेत्तद्वद्गच्छंस्तुरतोगुरोः पश्चात्त्यादेननिर्गच्छे-
त्प्रणम्यचगुरोर्गृहात् गुरोरग्रेनकुर्वीतप्रभावंशिष्यसंग्रहं अहंकारंनकुर्वीतनोत्स्वाणिधारयेद्बुधः प्रगुरोःसन्निधौनैवस्वगुरुंप्रणमे-
द्बुधः नमस्कारायचोपयुक्तंगुरुदृष्टानिवारयेत् नातियोगंगुरुंदद्यात्पुस्तकदानेवभाषयेत् उपयुक्तंपरेणैवयदिवादीतितेनतु
क्षेत्रोपानहवस्त्राद्यंनोपभुंजीतकर्हिचित् असंपन्नावथापत्सुनदोषःस्तालितेसति स्वकुलेदीक्षितानांचआचार्याणांतथैवच उपयु-
क्तानदोषःस्यान्नदत्तादरितानपि मंत्रोपयुक्तमन्नाद्यंतथायन्मंत्रसंस्कृतं प्राप्तमायतनादेव्याःशिरसाप्रणतोवहेत् निक्षिपेद्भस्मितेना-
नयतेदवनौयथा ज्ञाताज्ञाताभ्यांपरित्रिशेषापथैकरुस्पृक्तके नकुर्याद्गर्वमत्रैवप्रसादेनक्रियतेचेत् नदर्पोनिवेदयेत्तत्त्वादेनप्रजाज्ञ-
पाङ्कृतीः अनिवेदितकार्यस्ययदर्थंशपथःकृतः प्रायश्चित्तंजपेद्देविसहस्रंस्वमनोस्ततः लोकोद्वेगकरीयाचयाचकर्मनिकृन्तनी
स्त्रियस्तुद्वेगकरीयाचतांगिरंनैवभाषयेत् रम्यमप्युज्ज्वलंसर्पिमनसोपिसमीप्सितं लोकविद्वेषणंवेषंनगृह्णीयात्कथंचन अज्ञोक्तासः
सदाहोतानेहिकामुष्मिकेनोचितान् आचारनावृतःशांतिंदीक्षितःसोपिगच्छति स्त्रीणांविशेषतोदद्यात्समयांश्चामलाशयः पालना-
त्समयानांतुसिद्धिःस्याद्यतेचिरात् मंत्रःसांमुख्यमायातिसमयस्यपरार्थवदा सिद्धयःसमयस्थस्यसर्वेस्युःसोत्तपश्चिमाः अयनेविषु-
वेचैवग्रहणेसूर्यचंद्रयोः अष्टम्यांपूर्णिमायांचतेषुनैनिमित्तिकोजयः नित्यात्त्रिगुणितःसोपिपूजांचैवसमाचरेत् न्यायार्जितैःसा

यैनैश्च दानहोमाद्यैर्नादिके कुर्यान्नचेद्योयानिभक्त्याकुर्वन्नपीश्वरीति· इति समयाचारः नारदपंचरात्रे· ब्राह्मणः सर्वकाल
तः कुर्यात्सर्वेष्वनुग्रहं तदभावाद्द्विजश्रेष्ठ शान्तात्माभगवन्मया भावितात्माच सर्वज्ञः शास्त्रज्ञः सत्क्रियापरः सिद्धित्रयसमा
युक्त आचार्यत्वेभिषेचितः क्षत्रविट्शूद्रजातीनां क्षत्रियोनुग्रहक्षमः क्षत्रियस्यापि च गुरोरभावादीदृशोयदि वैश्यः स्यात्तेन
कार्यः स्याद्द्वयोर्नित्यमनुग्रहः सजातीयेन शूद्रेण तादृशेन महामते अनुग्रहाभिषेकौ च कार्यौ शूद्रस्य सर्वदा वर्णोत्तमेयच
गुरौ सति वा विश्रुतापि वा स्वदेशतोन्यदेशे वा नैव कार्यं प्रभुत्वार्थिना विद्यमाने तु यः कुर्यात्तत्र तत्र विपर्ययः तस्येहामुत्र नाशः
स्यान्न स्यात्तस्मात्क्रमाचरेत् क्षत्रविट्शूद्रजातीयः प्रातिलोम्यं न दीक्षयेत् वक्राशीदीर्घसूत्री च विषयासिक्तलोलुपः हेतुवादर
तो दुष्टो वाग्वादी गुणनिंदकः अरोमा बहुरोमा च निंदितानामसेवकः कालदंतोसितोष्ठश्च दुर्गन्धिश्वासवाहकः दुष्टलक्षण
संपन्नो यद्यपि स्वयमीश्वरः बहुप्रतिग्रहासक्त आचार्यः श्रीवहोवहः ज्ञानेनैनयते· निर्वीर्यश्च पितृमंत्रं न ध्यामातामहस्य च सो
दरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च भिक्षुभश्चवनस्थोथवर्णिभिन्नश्चमहेश्वरी(?) गृहस्थो भोगमोक्षार्थी मंत्रदीक्षां न चाचरेत् स्व
क्ताग्रयः क्रियाहीना यतयो ह्यपरिग्रहाः वनस्थाः स्वात्मपाप्मेव वर्णिनो नाश्रमी यतः अतस्तेषां नाधिकारो दीक्षादाने महेश्वरि·
भैरवीतंत्रे नपस्वी सत्यवादी च गृहस्थः स्वस्थमानसः दीक्षायां न गुरुत्वेन यतीन्द्रो वानप्रस्थश्रिये(?) वृणुयाद्भोगमोक्षार्थी गृहस्थाव
र्णितं तथेति अथ गुरुशिष्यपरीक्षा· श्रीकुलार्णवे· ज्ञानेनक्रियया वापि गुरुः शिष्यं परीक्षयेत् संवत्सरं तदर्धं वा तदर्धं वापि य
त्नतः उत्तमानधमेकार्ये नीचानुत्तमकर्मणि प्राणद्रव्यप्रदानाद्यैरादेशैश्च समासमैः तत्स्मर्मस्तु च नैवीक्षे मीयामिः(?) क्रूरवेष्टितैः
प्रतापानेरुदासीनेरनेकैश्च कुष्कुः आकृष्टस्ताडितश्चापि यो विषादं न याति च गुरुः कृपां करोतीति मुदा संचिन्तयेत्सदा श्रीगुरु

स्मरणेनापि कीर्तनेन दर्शनेनापि वा वेदनेन परिचर्ययायासाक्रान्तेन प्रेषणेन च प्रिये आनन्दकम्पो रोमांच स्वरनेत्रादिविक्रिया येषां सन्ति तेऽत्र योग्या
सुदीक्षासंस्कारकर्मसु शिष्यापि लक्षणैरेतैः ऊर्ध्वानुरूपपरीक्षणं आनन्दाश्रुजपैः स्तोत्रैर्ध्यानहोमार्चनादिभिः ज्ञानोपदेशसाम
र्थ्यं मन्त्रसिद्धिमपीश्वरि बोधकत्वं च विज्ञाय शिष्याणां भूयात्तत्र चान्यथा अथ शिष्याणामधममध्यमोत्तमं च तथैव आदिमध्यावसा
नेषु योग्या भक्तिनिपाततः अधमा मध्यमाः श्रेष्ठाः शिष्यास्तदपि प्रकीर्तिताः आदौ भक्तिर्भवेद्यस्य विदीक्षायां सर्ववन्दिते पुनर्विभ्रम
भक्त्यास्ते त्वादिभक्ताः प्रकीर्तिताः दीक्षासमयसंप्राप्ताज्ञानविज्ञानवर्जिताः भक्त्याप्रध्वस्तज्ञानाज्ञाये मध्ययोग्याः प्रकीर्तिताः आदौ
भक्तिविहीना ये ज्ञाने भक्त्यान्विता न वा एते प्रभूतभक्त्यर्थं त्वधमयोग्या भवन्तीति अथ वर्णविभागेन योग्यताकालविशेषात् त
त्र प्रारभ्यते· एकादशे भवेद्योग्यो ब्राह्मणस्तु द्वादशे नृपः वैश्यो वर्षैस्त्रिभिः शूद्रश्चतुर्भिर्वत्सरैर्गुरौ. शुश्रूषुः परिग्राह्यो दीक्षाया
गन्तादिष्विति अत्र शूद्राणां मन्त्रेष्वनधिकारः श्रूयते· यथा महाकपिलपञ्चरात्रे· न वेदप्रणवेत्युक्ता मन्त्रा वेदसमुद्भवाः तस्माद्वेदः प
रो मन्त्रो वेदो नागमः स्मृतः वष्पाकर्षादिकं कर्म इष्टादृष्टफलप्रदं वेदेन साध्यते सर्वं ग्रहयज्ञादिभिः कृता न वेदेन विना यज्ञा
न वेदा यज्ञवर्जिताः तस्माद्वेदः परो मन्त्रो न मन्त्रो वेदउक्तितः न मन्त्रे चाधिकारोऽस्ति शूद्राणां नियमेपरा मन्त्राभावादमन्त्रेण भाषितं सर्व
कर्म हीति तथा शातातपसंहितायां· यावन्त्यर्णानि मन्त्राणां शूद्राय प्रतिपादयेत् तावन्त्यो ब्रह्महत्याः स्युः स्वयमाहात्म्यजायतिरिति·
उक्तविदानिषेधोऽपि श्रूयते भविष्ये· ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च चत्वारो मताः तेषां मन्त्राः प्रदेया वै न तु संकीर्णधर्मिणामिति·
ब्रह्मक्षत्रविशः शूद्राश्चत्वारो यं समुद्भवः गुरुदेवद्विजाग्न्यर्चनरताः स्त्र्यधिकारिण इति योगिनीतन्त्रवचनात् वैदिको मिश्रिको वापि वि
प्रादीनां विधीयते तान्त्रिको विष्णुभक्तस्य शूद्रस्यापि प्रकीर्तितः स्वागमोक्तेन विधिना शूद्रैश्चापि प्रयत्नतः कर्तव्यः श्रद्धया विलोस्थित
पितापतिहृदि स्त्रीणामप्यधिकारोऽस्ति विष्णोराराधनादिषु पतिप्रियरतानां च श्रुतिरेषा सनातनीति पद्मपुराणात्· पतिप्रियेति

वि.ग्री.
द्वि
२

अथवापरं। चिंतयित्वा तिमृतमर्ल्कापरमिति ज्ञेयं तथा चोक्तं च तंत्रराजे। द्विजातीनां तु संस्कारं वेदोक्तं समुदाहृतं तेषां च तंत्रत
न्त्रापि विधिया विधिमाचरेत् सा विद्या स्मरणं कुर्यात् क्रिया सर्वत्र चोदिता तेन तन्मयतासिद्धिः सर्वत्र भवति ध्रुवं अन्येषामपि वर्णा
नां विधिया समुपाचरेदिति भविष्योत्तरे। याह्मी भर्ता विमुक्ता च पुभास्वातंत्र संयुता। सा च मंत्रा एव गृह्णाति तु सभर्त्रा तदवज्ञया वि
नास्त्वधर्मं यत्किंचिद्व्रताराधनादिकं पतिशुश्रूषया तद्यस्मात्तस्मात्सैकतहर्म्यवत् कुलार्णवे विधवायाः स्वतादेशात्कन्यायाः
पितुराज्ञया। नाधिकारः स्वतो नार्या भार्याया भर्तुराज्ञया। स्त्रीशूद्राणामयं मंत्रो न मोनत्र प्रभुभावहः एतज्ज्ञात्वा महासेनाचाण्डा
लान पिदीक्षयेत् इति रुद्रयामलात् अयं प्रासादमंत्रः तथा च। शुचिव्रततमाः शूद्रा धार्मिकाः द्विजसेवकाः स्त्रियः पतिव्रता
श्चान्ये प्रतिलोमानुलोमजाः लोकाश्चाण्डालपर्यन्ताः सर्वेप्यत्राधिकारिणः स्वजातिधर्मनिरताः भक्ताः सर्वेश्वरस्य च उपदे
शमपेक्षाणां तन्त्रज्ञात्मनुसारिता न वैदिकं जपेच्छूद्रः स्त्रियश्चैव कदाचन। नमोन्तं शिवमंत्रं वा वैश्यवच्चेष्यते बुधैः याज्ञवल्क्या
पि। स्वाहाप्रणवसंयुक्तं मंत्रं शूद्रे ददद्द्विजः शूद्रो निरयगामी स्याद्विप्रः शूद्रत्वमाप्नुयात् यामले। एकद्वित्रिचतुष्पंचवर्णात्मा
लोच्य योग्यतां भक्तियुक्तानुगुणश्चाधिकमाहुर्महासंकरे प्रथमं मंत्राणां ब्रह्मक्षत्रादिभेदः कुलार्णवे। ब्राह्मणः क्षत्रियो वैश्यः
शूद्रो भवति वै मनुः अनुलोमं न देयः स्यात्प्रतिलोमं न वै क्वचित् वामकेश्वरे। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः पौरल्पजातयः
चतुर्विधास्तु मनवः क्रमाद्दुर्गासंकरे सौत्रामणीतंत्रे। मयाबीजं ब्राह्मणः स्याल्लक्ष्मीबीजं तु क्षत्रियः स्मृतः कामबीजं भवेद्वैश्यो वा
भवेच्छूद्र इति तः चतुर्बीजपरित्यक्तो मंत्रः पौरस्त्यसंज्ञकः चतुर्बीजं ब्राह्मणानां क्षत्रियाणां त्रिबीजकं बीजद्वयं तु वैश्यानां शूद्रा
णां त्वेकबीजकं कुलमूलावतारे। श्रीदेव्युवाच शाक्तशांभवसौराणां गाणेशवैष्णवेषु च ब्रह्मक्षत्रियवर्णानां शंकराणां वि
शेषतः प्रवृत्तिश्चात्र मित्राश्चामिसाधकानां हिताय च येषु येषु च ये मंत्रास्तन्मे ब्रूहि देवगणेश्वर शंकर ईश्वर उवाच उमामहेश्वरे चैव दतिगणम्

२

अघोरकं हयग्रीवंचवाराहमष्टाक्षरमतःपरं प्रणतार्यंवासुदेवंलक्ष्मीनारायणंतथा वर्णत्रयेतदातव्यंनान्यवर्णेकदाचन पा
शुपतेनारसिंहंतथाचैवसुदर्शनं वर्णद्वयेचदातव्यंनान्ययोश्चैवकर्हिचित् अग्निमंत्राश्चयेकेचित्सूर्यमंत्राश्चयेतथा तारादिहू
णिमंत्राश्चदातव्याश्चत्रिवर्णके अनुष्टुभंशक्तिमंत्रातथाविंध्यनिवासिनी नीलसारस्वतंचापिदातव्याश्च्यादिवर्णके मातंगीसु
ग्रताराच्चकालिकाश्यामलातथा छिन्नमस्ताचबालाचदातव्याःसर्ववर्णके तारादित्तुगणेशश्चहरिद्रासंज्ञकस्तथा त्रिवर्णि
केकदातव्याःकथिताःसर्वसिद्धिदः त्रिपुरायाश्चयेमंत्रायेमंत्रावटुकादयः सर्ववर्णेषुदातव्याःप्रबुद्धेणविशेषतः मायालक्ष्मीच
प्रणवंवाग्भवंचान्यबीजके एतद्बीजेनसंयुक्तंदातव्यंचादिवर्णके मायांलक्ष्मीवाग्भवंचदातव्यंत्रितयेष्वपि लक्ष्मीचवाग्भवंचैव
कथितंवैश्यवर्णके वाग्भवंचान्यबीजंचाशूद्राणांसमुदीरितं हृदादिङ्फट्कारादिश्चकराणांप्रशस्यतइति कुलप्रकाशतंत्रे
उत्पन्नामनवःसर्वेपंचाशद्वर्णभेदतः द्विविधास्तेचसंप्रोक्तामंत्रविद्याविभागतः स्त्रीमंत्रावह्निजायांताहृदयांतानपुंसकाः
शेषाःपुमांसरुक्ताःस्त्रीमंत्राश्चापिपुंनातिके नपुंसकाःस्मृतामंत्राविद्वेषेचाभिचारके पुमांसःस्युःस्मृताःसर्वेवश्योच्चाटनकर्म
सु अग्नीषोमस्वरूपाःस्युर्मनवःसर्वएवहि रेफोकारवियत्प्रायायाआग्नेयाःक्रूरकर्मणि सौम्यास्तुचन्द्रसयाप्रायाःसौम्यकर्मणिते
स्मृताः नारायणीयेपि तारांत्याग्निवियत्प्रायोमंत्रआग्नेयइष्यते शिष्टःसौम्यःप्रशस्तौतौकर्मणोःक्रूरसौम्ययोः आग्नेयमंत्रः
सौम्यःस्यात्प्रायशोंतेनमोन्वितः सौम्यमंत्रस्तथाग्नेयःफट्कारेणान्वितस्ततः पिंगलायांगतेवायौप्रबुद्धाह्याग्निरूपिणः
इडांगतेतुपवनेसुप्तंतेसोमरूपिणः पिंगलेडागतेवायौप्रबुद्धाःसर्वएवहि प्रबुद्धामनवःसर्वेसाधकानांफलंसुमे नाराय
णीयेपि सुप्तःप्रबुद्धमात्रोवामंत्रःसिद्धिंनयच्छति स्वापकालोवामवहोजागरोदक्षिणावहः आग्नेयस्यमनोःसौम्यमंत्रस्य
तद्विपर्ययः प्रबोधकालेजानीयादुभयोर्वहः स्वापकालेतुमंत्रस्यजपोनर्थफलप्रदः शिवयामले संपुटीकृत्ययोत्तेन

वि.ती.
छि.
९

लोलानाद्यान्तबिंदुकान् पुनश्च सविसर्गांस्तानन्तकारं केवलं पठेत् एवं जनोपदिष्टश्चेन्मन्त्रस्तु द्रुतसिद्धिदः इति अथ कालीमते
प्रोक्तमंत्राणां दोषसंचये तत्रतत्र विहारं च वाह्याभ्यन्तरभेदतः वक्ष्यामि तत्तत्प्रोक्तं साधकानां हिताय च तत्र प्रादवायो छिन्नादि
दुष्टमंत्रास्तपालयेत्तेन साधकं छिन्नो रुद्धः शक्तिहीनः पराङ्मुखस्तथेरितः वधिरो नेत्रहीनश्च स्तंभितः कीलितस्तथा दग्धस्त्रस्तश्च भी
तश्च मलिनश्च तिरस्कृतः भेदितश्च सुषुप्तश्च मदोन्मत्तस्तथा हृतः मूर्च्छितः हृतवीर्यश्च हीनश्च प्रध्वस्तो बालकः पुनः कुमारस्तु
वा प्रौढो वृद्धो निस्त्रिंशकस्तथा निर्वीजः सिद्धिहीनश्च मंदः कूटस्तथा पुनः निरंशः सत्वहीनश्च केकरो वीजहीनकः धूमितालिंगितौ
स्यातां मोहितश्च क्षुधार्तकः अतिदृप्तोंगहीनश्च ह्यतिक्रुद्धः समीरितः अतिक्रूरश्च सव्रीडः शान्तमानस एव च स्थानभ्रष्टश्च विक
लश्चातिवृद्धः प्रकीर्तितः निःस्नेहः पीडितश्चापि इति अथैतेषां दोषाणां लक्षणानि तत्रैव वक्ष्याम्येषां च लक्षणं मनोर्यस्यादिमध्यां
तेष्वानिलं वीजमुच्यते संयुक्तं वा वियुक्तं वा स्वराक्रान्तं त्रिधा पुनः चतुर्धा पंचधा वाथ स मंत्रश्छिन्नसंज्ञकः आदिमध्यावसानेषु भूवी
जद्वंद्वलांछिते रुद्धमंत्रः स विज्ञेयो भुक्तिमुक्तिविवर्जितः मायात्रितत्वश्रीवीजरावहीनस्तु यो मनुः शक्तिहीनस्तु कथितस्तस्य मध्यो
न विद्यते कामवीजं मुखे माया शिरस्यंकुशमेव च असौ पराङ्मुखः प्रोक्तो हकारो विंदुसंयुतः आद्यन्तमध्ये विंदुर्वा न भवेद्वधिरः
स्मृतः पंचवर्णो मनुर्यस्माद्रेफार्कैन्दुविवर्जितः नेत्रहीनः स विज्ञेयो दुःखशोकामयप्रदः आदिमध्यावसानेषु हंसः प्रासादवा
ग्भवौ हंकारो विंदुमान् जीवो वा फेत्कारोपि च तत्फले मायानमामि च पदं नास्ति यस्मिन्स कीलितः एकं मध्ये द्वयं मूर्ध्नि यस्मिन्नस्त्रपुरंद
रौ विद्येते स तु मंत्रः स्यात्स्तम्भितः सिद्धिरोधनः वह्निवायुसमायुक्तो यस्य मंत्रस्य मूर्द्धनि सप्तधा दृश्यते तेन दग्धं मन्येत मंत्रवित् अस्त्रं
द्वाभ्यां त्रिभिः षड्भिरष्टाभिर्दृश्यतेऽक्षरैः त्रस्तः सोभिहितो यस्य मुखेन प्रणवस्थितः शिवो वा शक्तिरथवा भीताख्यः स प्रकीर्तितः आ
दिमध्यावसानेषु भवेन्मार्णचतुष्टयं यस्य मंत्रस्य मलिनो मंत्रविन्नविवर्जयेत् यस्य मध्ये दकारो वा क्रोधो वा मूर्ध्नि दृश्यते अस्त्रंतिष

९

ति मंत्रस्य स तिरस्कृत ईरितः । श्रौं हृदयप्रमुखे शीर्षे वषडं संवमध्यतः । यस्मिन् सो भेदितो मंत्रस्त्याज्यः सिद्धिमुमुक्षुभिः । त्रिवर्णो हंसहीनो
यः सुप्तः समुदाहृतः । मंत्रो वाप्यथवा विद्या सप्ताधिकशताक्षरा । फट्कारपंचकादिर्यो मदोन्मत्त उदाहृतः । तद्वदंते स्थितं मध्ये यस्य
मंत्रः स मूर्छितः । विरामस्थानगो यस्य स हृतवीर्यः स कथ्यते । आदौ मध्ये तथा मूर्ध्नि चतुरस्त्रयुतो मनुः । ज्ञातव्यो हीनस्त्वेष यः स्यादष्टा
दशाक्षरः । एकोनविंशद्वर्णो वा यो मंत्रस्तारसंयुतः । हुं ले खां कुं शा वीजाप्ता स्तंभधस्तेप्रवर्त्तते । सप्तवर्णो मनुर्बालः कुमारोऽष्टाक्षरः
स्मृतः । षोडशार्णो युवा प्रोक्तश्चत्वारिंशल्लिपिर्मनुः । त्रिंशद्वर्णश्च वृद्धः षष्टिवर्णो मंत्रः शताक्षरः । चतुःशताक्षरश्चापि वृद्ध इत्यभिधीयते
नवाक्षरो ध्रुवयुतो मनुर्निस्त्रिंश ईरितः । यस्यावसाने हृदयं शिरो मंत्रस्य मध्यतः । शिखा च वर्म च नस्यातां वौषट् फट्कार एव च । शिव
शक्त्यर्णहीनो वा स निर्वीज इतीरितः । येषु स्थानेषु फट्कारः षोढा यस्मिन् प्रदृश्यते । स मंत्रः सिद्धिहीनः स्यान्मंदः पंक्त्यक्षरो मनुः । कूटए
काक्षरो मंत्रः स एवोक्तो निरंशकः । द्विवर्णः सत्वहीनः स्याच्चतुर्वर्णस्तु केकरः । षडक्षरो बीजहीनस्त्वर्द्धसप्ताक्षरो मनुः । सार्द्धद्वादशाव
र्णो वा ध्वमितः स तु निंदितः । सार्द्धबीजद्वयस्तद्वदेकविंशतिवर्णकाः । विंशत्यर्णास्त्रिंशदर्णा यस्याला लिंगतस्तु सः । द्वाविंशत्यक्षरो मंत्रो
मोहितः परिकीर्तितः । चतुर्विंशतिवर्णो यः सप्तविंशतिवर्णकः । क्षुधार्तः स तु विज्ञेयस्त्रयोविंशतिवर्णिकः । एकादशाक्षरो वापि
पंचविंशतिवर्णकः । त्रयोविंशतिवर्णो वा मंत्रो दृप्त उदाहृतः । षड्विंशत्यक्षरो मंत्रः षट्त्रिंशद्वर्णकस्तथा । त्रिंशदेकोनवर्णो वाप्यंगही
नोऽभिधीयते । अष्टविंशत्यक्षरो यश्चैकत्रिंशदथापि वा । अतिक्रूरः समादिष्टो निंदितः सर्वकर्मसु । चत्वारिंशत्समारभ्य त्रिषष्टिर्यावद
क्षरं तावत्संख्या निगदिता मंत्राः सव्रीडसंज्ञकाः । पंचषष्ट्यक्षरा ये स्युर्मंत्रास्ते शांतमानसाः । एकोनशतपर्यंतं पंचषष्ट्यक्षरादितः
ये मंत्रास्ते निगदिताः स्थानभ्रष्टाह्वयास्तु ये । त्रयोदशाक्षरा ये स्युर्मंत्राः पंचदशाक्षराः । विकलास्तेऽभिधीयंते शतं सार्द्धशतं तथा । श
तद्वयं द्विनवतिरेकहीनाथवापि वा । शतत्रयं वा यत्संख्या निःस्नेहास्ताः समीरिताः । चतुःशतात्समारभ्य यावद्वर्णसहस्रकं अतिवृ

डुः प्रयोगेषु परित्याज्यः सदा बुधैः सहस्रार्णाधिका मंत्रा दण्डकाः पीडिताक्षयाः द्विसहस्राक्षरा मंत्राः स्व एव शः सम्प्रथाकृ-
ताः ज्ञातव्या स्तोत्ररूपास्ते मंत्रा पतेय यथास्थिताः तथाविधाश्च वोद्धव्या मंत्रिभिः काम्यकर्मसु दोषानिमान विज्ञाय यो मंत्रं भज-
ते जडः सिद्धिं न ज्ञायते तस्य कल्पकोटिशतैरपीति अथ तेषां श्लोकानां वाश्रीसदाशिवमुखोद्वगतोर्थो लिख्यते तत्र सतोरिति
आदिमध्यान्तेष्विति समुच्चयः प्रतिलपकारवीजे· मायावीजमिति संप्रदायः मायावीजस्य नामानि मालिनी शिववल्लरी वा-
ताबुर्त्तिः फल्गावाणीवीजे शाक्तिश्च कुण्डलीति· शैवागमोक्तेः वायुवीजं संयुक्तं प्रतलं तत्र युक्तं वियुक्तं तदहितं मायावीजं तद्दीर्घस्वरा-
क्रांतं उक्तं चलत्तसागरे आदिमध्यावसानेषु यस्य मंत्रस्य दृश्यते चतुर्दापंचथाहै थाचैकवीरं स्वरान्वितं वायुवीजमसौ मंत्रो भेदि-
तः परिकीर्तित इति· वायुवीजं यकारः एकवीरः फः स्वराक्रांतो दीर्घस्वरयुक्तः फ्रां फ्रीं फ्रूं फ्रैं फ्रौं इति तदुदाहरणं तु अघोरेभ्योथ
फ्रां घोरेभ्यो फ्रीं घोरघोरतरेभ्यो फ्रूं सर्वतः सर्वशर्वेभ्यो फ्रैं नमस्ते रुद्ररूपेभ्यः फ्रौं इति आदिमध्यावसानेष्विति· भूवीजं लका-
रः अत्र तु स्थानत्रयेपि प्रतिस्थानेन लकारद्वयमित्युक्तं तदंतर्दर्शनादाद्यंतयोर्द्वयं मध्ये त्रयमिति ज्ञेयं तदुक्तं चलत्तसागरे द्विधाद्र्वं
त्रिधा मध्ये द्विधांते च पुनः प्रिये वह्निर्युक्तस्तु यो मंत्रः स निकृष्टः प्रकीर्तित इति वह्निर्लकारः पिंगलामते आदौ द्विधा त्रिधा मध्ये तु
तस्थाने द्विधा भवेत् इंद्रवीजमसौ मंत्रो शक्रुद्ध इत्यभिधीयत इति· मायेति मायाभुवनेश्वरीवीजं विततेवाश्रीगृहं यत्र नास्ति चेत् शा-
क्तिहीन इति ख्यातः सामर्थ्यहे तिमंत्रिणः इति पिंगलामतात्· यस्यैति मुखे आदौ यो वा सिद्धेते· चकारः समुच्चये उक्तं चलत्तसागरे·
यस्य कामकलावीजं मध्यस्थाने न विद्यते आदौ मायांकुशस्थाने विज्ञेयामौ पराङ्मुख इति पिंगलामतेपि कामवीजं न यत्र मध्ये मा-
यादौ वैति सौ कुशः पराङ्मुख इति प्रोक्तो गर्हितः सर्वकर्मसु इति· हकार इति· इंद्रः सकारः विंदुयुक्तत्वमस्यापि· आद्यंतमध्येष्विति
स्थानत्रयेपि तापेतितः उक्तं चलत्तसागरे शून्यविंदुसमायुक्तं माद्यंते चापि मध्यतः नभवेज्जीववीजं वा यस्यासौ वधिरः स्मृत इति·

अर्को हकारः इंद्रः सकारः वह्न्यर्कौ हन्तौ देवतानेत्रत्वेन मंत्राणामपि नेत्रत्वात् पिंगलामते पंचाक्षरस्तु यो मंत्रः पापकोट्यर्कवर्जितः नेत्र
स्थान इति ज्ञेयो ऽदुःखशोकभयापह इति आदीति हंसः स्वरूपं प्रासादो हौं वाग्भवः ऐं जीवः सकारः सकीदृश हकारः विद्यमान हकारं उका
र बिंदुभिर्युक्त इत्यर्थः तेनच हौं इति बीजं तथाच पिंगलामते अष्टमस्वरसंयुक्तो जीवात्पूर्वः सबिंदुकः यस्मान्नाह दृश्यते नैव किं वा पव
श्चतुष्कलः प्रासादो वाग्भवे हंसे मायायां वा यत्र दृश्यते आदिमध्यांतदेशेषु कीलितं तन्नच वर्तत इति प्रान्ताहकारः अष्टमस्वरः ओका
रस्याष्टमस्वरत्वं ह्रस्वदीर्घयोरेकत्वकथनात् यथा अकठवचकेषु एवं ऊ चतुःपंचकमिति सखिद्रिप्रांते अत्र यथा श्रुतार्थो न भवति किं
तु मध्यपको लकारः अंते लहूयं यत्र मध्यपकः फट्कारः अंते द्विविधो वा यत्र दृश्यते स संभिन्न इत्यर्थः तथाच पिंगलामते सकलमध्ये
द्विधा प्रांते शक्तिबीजं भवेद्यदि संभिन्नं तं वदंतीत्यं मंत्रमंत्रविदो बुधाः इति अन्यत्रापि द्विधा त्रिधा वा षोढा वा मंत्रो ते यत्र दृश्यते म
हास्त्रसंभिन्नो मंत्रः श्री शिवेन प्रकीर्तित इति अत्र मूलश्लोकादेव मध्येपीति ज्ञेयः वह्निरिति वह्नी रेफः वायुर्यकारः तद्युक्तं मूर्द्धनि
आदौ उक्तंच पिंगलामते आदिमध्यः सम्मभिबीजं मारुतैः पापकर्त्तारं दीपितं यत्र तं मंत्रं मायादग्धं प्रचक्षते इति अस्त्रमिति उक्तसंख्या
तावन्तावतः फट्कारो दृश्यत इत्यर्थः यस्येति शिवशक्ती आदौ शिवः हकारः शक्तिः सकारः एताद्दृशादौ यस्य मातृकाहीन इति मानोत
रं वदंति तथाच पिंगलामते शिवः शक्तिस्तथोंकारो यस्यादौ नास्ति तं मनुं वदंति मातृकाहीनं हीनसिद्धिप्रदायकमिति अदीति
स्थानत्रयेपि मिलितामकारवत ष्कं यत्र दृश्यत इत्यर्थः आदिमध्यांतदेशे च चतुर्वा यत्र दृश्यते मार्गेणमंत्रो महेशेन मलिनः सहृतीर
त इति तंत्रांतरवचनात् लतसागरेपि आदौ मध्ये च शिखरे त्रिधा यत्र तु दृश्यते मकारो मलिनं विद्यात्तं मंत्रं मंत्रवित्सदेति एत
योर्विकल्पः यस्येति क्रोधो हुं बीजं मूर्द्धनि अग्रे क्रोध दकारयोर्विकल्पः मूर्द्धनि धाम्नोऽभिसन्धयः मध्ये दकारहुंकारयोरेकं प्रांते फट्
द्वयमित्यर्थः तथाच पिंगलामते दकारं क्रोधबीजं वा यस्य मध्ये व्यवस्थितं फट्द्वयं च स्थितं प्रांते यस्यासौ सतिरस्कृत इति अन्य

वि.भै.
टि.
२०

20

त्रापि यस्य मध्ये दकारस्य स्वेकोऽयथ बीजेह्यदिस्थिते द्विधा वा ते च फट्कारः सार्धसप्ततिसंख्यक इति चकारो विकल्पार्थकः ओमिति
प्रमुखे आदौ ओंकारः शीर्षं अन्ते वषट् मध्ये अस्त्रमिति चकाराद्धृदयमित्यत्रापि संबध्यते तथा चापि पिंगलामते अस्त्रमंत्रं हृदयं मध्ये व
षट् अंते तथादितः अउमाख्यः सोमे मंत्रो भेदितः परिकीर्तित इति। अस्त्रेष्वः अउमाः ओंकारः त्रिवर्णक इति त्रिवर्ण एव हंस इति वर्णद्वया
द्वितः तथा च भैरवतंत्रे। वर्णत्रयात्मको मंत्रो यस्तु हंसविवर्जितः सप्तमः स तु विज्ञेयः सर्वसिद्धिफलप्रद इति सप्तचत्वारिंशदधिके चद
शाक्षराणि यस्य सः अष्टादशाक्षर इत्यर्थः फट्कारपंचकमादौ यस्मिन्निति उक्तं च लक्ष्मसागरे। विद्या वा यदि वा मंत्रो यः षट्पादशा
शवर्णकः पंचफट्कारपूर्वस्त्वन्मंत्रः स उच्यत इति पिंगलामतेपि विद्या वा मंत्रराजो वा यः स्यात्सप्तदशाधिकाः फट्कारपंचप
र्वश्चेदुन्मनः संप्रकीर्तित इति अत्र विशेषणद्वयविशिष्ट एव तु षष्ठः तद्वदिति। विरामे च। विरामस्थानगं मंत्रांतर्गते पंचेसु भयत्र।
उक्तं च पिंगलामते अस्त्रमंत्रो भवेद्यस्य मध्ये प्रांते च शंभुना हीनवीर्यस्तु विज्ञातः स मंत्रो नैव सिद्धिद इति आदावित्यस्थानद्वयोमि
लित्वा हृच्चतुष्टयमित्यर्थः अष्टादशाक्षरेऽप्यनुवर्तते मंत्रांतरेपि। एतादृशो मंत्रो भीत इत्युनाम्नाऽउक्तः यथा आदावंते तथा मध्ये
चतुर्हंसेन संयुते अष्टादशाक्षरे मंत्रे भीत इति भैरवोऽब्रवीदिति यस्यादिति तारः प्रणवः केचित् तारः ह्रीमिति वदंति तत्र श्रेयान्तरवि
रोधात् तथा च भैरवीतंत्रे एकोनविंशत्यर्णो यो यो मंत्रः प्रणवान्वितः महामायांकुशौ युक्तस्तु प्रथमस्त्ववदंति ह पिंगलामतेपि।
यदि मंत्रोऽष्टादशाक्षरः विंशत्येकोनवर्णो वा मायाकारांकुशान्वितः प्रथमस्तत्र सो मंत्रः शंभुदेवेन कीर्तित इति अत्र विशेषणद्व
यः सप्तवर्णा इति चत्वारिंशाल्लिपि। चत्वारिंशद्वर्णाः भैरवीतंत्रे सप्तात्तरो भवेद्बालः कुमारस्तु दशवर्णकः चत्वारिंशात्तरो वृद्धस्तु
णः षोडशाक्षर इति त्रिंशद्वर्णा इति चतुःशताक्षरः चतुरधिकशताक्षरः उक्तं च भैरवीतंत्रे। त्रिंशद्वर्णशताद्वाणिं वा चतुष्षष्ट्यक्षरः तथा।
चतुःशतानां वर्णानां वा मंत्रेऽस्मिन्नभिधीयते नवान्तर इति फटः प्रणवयुक्तो नवान्तरो निःश्रीक इत्यर्थः नवान्तरो यो निःश्रीको फटवयुक्तोऽयमः

२

मुद्रइति भैरवीतंत्रवचनात् यसेति हृदयंनमः शिरोमंत्रस्वाहाकारः एतद्द्वयमतेयस्य नास्तिशिखावषट्वर्मऊंकारः एतद्द्वयं
चवौषट्फट्कारौ वाशिवोहंकारः शुक्रमार्णः सकारः एतद्द्वयंवामध्येनास्ति सनिर्वीजइत्यर्थः तदुक्तंभैरवीतंत्रे यच्छिरोतेशि
खावर्मसमध्येनेत्रास्त्रकेऽथवा शिवशुक्रात्मकौ वर्णौ नास्मिन्यस्य सवर्णराट् निर्वीजइति संप्रोक्तः सर्वकर्मसुगर्हितइति एवमिति
मंत्रएवैकस्मिन्केस्थानद्वयस्याकृत्वादेश्चितिवक्रवचनप्रयोगः कथमितिचेत्सत्यं तंत्रांतरेनिर्वीजलक्षणवचनेआदावपित्रोष
प्रतिपादात्तरमत्वीसभिप्रायेणवक्रवचनप्रयोगः कृतोग्रंथकर्ता तथाचलक्षणसागरे निर्वीजलक्षसमाख्यातआदावोंकारवर्जि
तः एवमादिमध्यावसानेषुअत्रापिस्थानत्रयेपिमिलित्वैवफट्द्वावषट्कं त्सेयं मंदइति एकादशाक्षरः उक्तंचभैरवीतंत्रे
दशाक्षरोभवेन्मंदइति कूटइति वक्रलग्नात्मकेवीजे कूटः सवकूटसोपिएकाक्षरएवेतिज्ञेयः निरंशकःहिवर्णः सत्वहीनः ब
लवर्जितः चत्वर्णः केकरः पिंगलामतेपि ऋवहीनस्तुत्वीजैः षड्विंवाकेकरोमतइति विशेषउक्तः षडक्षरइतिनिर्वीजवर्जितः
ओंकारादिरहितः अत्राईसमाक्षरतांहैद्वादशाक्षरतावातेनयोजनयोगेनज्ञेयेसार्द्धवीजत्रयत्वेच एतेप्रमिताइत्यर्थः लक्षसाग
रे अर्द्धसमाक्षरोसंज्ञः सार्द्धद्वादशवर्णकः प्रमितः समसमाख्यातः सार्द्धवर्णत्रयोपिवेति एकविंशतीतिस्पष्टार्थः द्वाविंश
तीत्यपिस्पष्टार्थः चतुर्विंशतीतिचतुर्यातइतिस्पष्टार्थः पुनश्चतुर्विंशतीतितद्वप्रतिपादकः स्पष्टः षड्विंशत्यक्षरत्यपि त्रिंश
देकावर्णौवेति एकोनत्रिंशद्वर्णश्चाप्यंगृहीनउदाहृतइतिभैरवीतंत्रात् लक्षसागरेतु अष्टविंशाक्षरस्त्वितिचतुर्थः प्रकारोप्यु
क्तः अष्टाविंशत्यक्षरेत्यादिच चत्वारिंशत्नमिति चत्वारिंशाद्वर्णमारभ्यत्रिषष्ट्यक्षरपर्यंतामंत्राएकेकाक्षरवृद्ध्याचतुर्विंशतिवि
धानसवीजइति पंचषष्ट्यक्षराइतिस्पष्टः एकोनेतिपंचषष्ट्यक्षरः आदिर्येषांपंचषष्ट्यक्षरादीति स्थानभ्रष्टइतित्रयोदशेतिस्पष्टा
र्थः शतमितिशतद्वयादिनवतिश्चेति एकएवभेदः द्विनवत्यधिकंशतद्वयमित्यर्थः सार्द्धशतद्वयंद्विनवातिरेकहीनाएकनवत्यपि

वि.ती.
टि.
२१

कशतद्वयमित्यर्थः तेन शतद्वयमित्यर्थः तेन शतसंख्या वर्णाः सार्द्धशतवर्णाः द्विनवशतवर्णाः एकनवत्यधिकशतद्वयवर्णाः शत
त्रयवर्णाश्चेति पंच प्रकाराणि. स्नेहदोषेषु सप्तशास्त्रादिरित्यर्थः अत्र केचित् शतद्वयं त्वेकप्रकारः द्विनवतिरन्यः एकनवतिपरः इति वदं
तितदसंगतं षट्शाम्भवतन्त्रमारभ्यैकोनशतवर्णपर्यन्तानां संख्यानभ्रशास्त्रस्योक्तेः अतएव यत्संख्याकत्वोक्तं येषां मंत्राणां वर्णसंख्या शताधि
कानि स्नेहादयस्तत्वयः चतुःशतानीति सुगमः सहस्राणाविति यद्दण्डकाः स्तोत्ररूपास्ते पीडिता रूपाः ज्ञातव्याः तथेति यथा एतेम
न्त्रास्तद्दोषास्तथैव विद्याश्चापि सदोषा एव ज्ञेयाः उक्तं च भैरवीतन्त्रे. यथा मंत्रास्तथा विद्या भेदभिन्नास्ततः परं ज्ञातव्या देशिकेन्द्रैस्तु ना
नातंत्रेषु भाषिता इति. काम्यकर्मस्विति उक्तेर्निष्कामानां नैतद्दोषा मंत्रजपे बाधका इति भाति अथोक्तदोषदुष्टानां मंत्राणां तद्दोषनिरस
नोपायः स्मरणाया इत्यादि दोषदुष्टांस्तान्मंत्रानात्मनि योजयेत् योजयेदुद्धरेद्वेनावहयायोनिमुद्रयेति योनिमुद्रालक्षण
तुक्तं कुद्यामले भैरवीपटले. पश्चिमाभिमुखं लिंगं योनिस्थं परिकीर्तितं हृत्कुंडे ब्रह्मसंस्थानं स्वयंभूर्नामवाचकः इतरं चातरा
लस्थं चित्कुण्डिस्थं तथापरं महापद्मवनं यत्र योगपीठं प्रकीर्तितं कदंबगोलकेवषद्रुक्तं ते विंदुरूपिणि ब्रह्मरूपं तु तत्रैव सहस्रकमाधार
मंडलं इत्येतानि तत्वानि मंत्राणां वाचकानि तु प्राणाख्यं दैवतं तत्वं कोदण्डद्वयमध्यगं तदूर्ध्वं `` `` नाम्ना तु उद्याणं च भवेत्ततः
कामरूपं भवेच्छक्तिः शिवाख्यमकुलं प्रिये सहस्रारं महापद्मं रक्तकिंजल्कशोभितं तत्रस्थो लभते सम्यक् वर्षेन्मक्तविंदुका तत्र पाप
कयोगेन स्वाधारे योजयेन्मनः गुदमेढ्रान्तरे योनिस्तामाकुंच्य प्रवेशयेत् ब्रह्मयोनिगतं ध्यात्वा कामबंधूकसन्निभं ज्वलत्कालान
लप्रख्यं तडित्कोटिसमप्रभं तस्योर्ध्वं तु शिखा सूक्ष्मा चिद्रूपा परमा कला तया सहितमात्मानमेकीभूतं विचिंतयेत् गच्छंती ब्रह्म
मार्गेण लिंगभेदक्रमेण तु अमृतं तद्धि स्वर्गस्थं परमानंदलक्षणं भूतरक्तांशुतेजाढ्यां धाराप्रपातवर्षिणीं पीत्वा कुलामृतं दिव्यं
नरेवविशेत्कुलं पुनरेवाकुलं गच्छेन्मात्रायोगेन नान्यथा सा च प्राणसमाख्याता तंत्रेऽस्मिन्परमेश्वरि उद्धृतोऽप्याच्यते सोऽपि प्राणान्ते

21

विषतेयदा एवमभ्यतमस्तस्य ग्रहंन्यहतिनिष्प्रयात् जरामरणदुःखौघैर्मुच्यते भवबंधनात् उद्भिज्जादिषु याम्हृष्टिर संस्थायोनोप्र
वर्तते पुनः प्रलीयते तत्संकालाग्न्यान्निशिवांतका योनिमुद्रासमाभ्यासात्तव बंधःप्रकीर्तितइति अस्यार्थः तत्र गुरुःसिद्धासन
स्थोवामपार्ष्णिनागुदमेढ्रांतरं निष्पीड्य तदुपरि दक्षिणपादं गुल्फयोरन्योन्यसम्मर्दो यथाभवति तथा दक्षिणपार्ष्णिनालिंगम्
ले निष्पीड्य स्थिरकायसमुपविश्य गुदमाकुंच्यापानवायुमुत्थाप्यसमनहृद्प्राणापानयोः संघट्टं कृत्वैनपकंचित्तौ मूलाधारगतवह्नि
येकृत्वा त्रात्मकेपरमात्मनि स्वसाध्यमंत्रं ज्ञात्वा तदोषसंचितं तन्मंत्रं त्वरायैकैकशः स्वगुणमार्गेण मूलाधारादिवाधिष्ठानमणिपूर
कानाहतविशुद्धाज्ञाषट्चक्रभेदक्रमेण ब्रह्मरंध्रं प्राप्य विशुद्धानाहतमणिपूरकस्वाधिष्ठानचक्रभेदक्रमेण मूलाधारं प्रापयेदिति ततस्त
न्मंत्रस्य स्थादिन्यासपूर्वकं यथोक्तभावनया ष्टोत्तरशतसहस्रं जपेदित्यातिरितो मंत्रसंस्कारः अथवा दूक्रियारूपा मंत्रदोषनिरासाय दशवि
धसंस्काराः तत्र शारदायां मंत्राणां दशकथ्यंते संस्काराः सिद्धिदायिनः जननं जीवनं पश्चात्ताडनं बोधनं तथा अथाभिषेको विमली
करणाप्यायने पुनः तर्पणं दीपनं गुप्तिर्दशैता मंत्रसंस्क्रियाः मंत्राणां मातृकामध्यादुद्धारो जननं स्मृतं प्रणवांतरितान्कृत्वा मंत्रव
र्णान्जपेत्सुधीः एतज्जीवनमित्याहुर्मंत्रतंत्रविशारदाः भूर्जे विलिख्य मंत्राणांस्ताडयेच्चंदनांभसा प्रत्येकं वायुना मंत्री ताडनं तदु
दाहृतं विलिख्य मंत्रं तं मंत्री प्रसूनैः करवीरजैः तन्मंत्राक्षरसंख्यातैर्हन्यात्तेन बोधनं स्वतंत्रोक्तविधानेन मंत्री मंत्रार्णसंख्यया
अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशुद्धये संचिंत्य मनसा मंत्रं ज्योतिर्मंत्रेण निर्दहेत् मंत्रे मलत्रयं मंत्री विमलीकरणं त्विदं तारव्योमा
ग्निमनुयुक्दंडीज्योतिर्मनुर्मतः कुशोदकेन जप्तेन प्रत्यर्णं प्रोक्षणं मनोः तेन मंत्रेण विधिवदेतदाप्यायनं मतं मंत्रेण वारिणा मंत्रे
तर्पणं तर्पणं स्मृतं तारमायारमायोगो मनोर्दीपनमुच्यते जप्यमानस्य मंत्रस्य गोपनं त्वप्रकाशनं संस्कारा दश संप्रोक्ताः सर्वतंत्रे
षु गोपिताः यान्कृत्वा संप्रदायेन मंत्री वांछितमश्नुते इति अथाष्टश्लोकानामयमर्थः मंत्राणामिति तत्र कश्चित्कीर्पणीचेदना

वि.णे.
द्वि.
२२

22

दीपीठे कुङ्कुमादिना वक्ष्यमाणं पञ्चभौतिकचक्रं विलिख्य तत्र लिखेन् क्रमेण ककारादिकारान्तां मातृकां विलिख्य तत्र मातृ-
कां सरस्वतीमावाह्य संपूज्याष्टोत्तरशतं मातृकां जपित्वा तन्मध्यास्ताभीष्टमन्त्रस्वरव्यञ्जनबिन्दुविसर्गसंयोगात्स्वराणि पृथ-
क्पृथगुद्धृत्यैकीकृत्य तस्य यन्त्रपदेशेन ज्ञात्वा तन्मन्त्रं जनयेदिति जननं ॥ प्रणवेति ॥ प्रागुद्धृतस्य मन्त्रस्यैकैकमक्षरं प्रणवान्तरितं कृत्वा ॥
ष्टोत्तरशतं जपेत् यथा नमः शिवायेत्यत्र ओं नं ओं मं इत्यादि प्रत्यक्षरं योजयित्वा जपेदित्यर्थः ॥ इति जीवनं ॥ मन्त्रेति ॥ भूर्जपत्रे कुङ्कु-
मादिद्रव्यैस्तन्मन्त्रं विलिख्य चन्दनमिश्रितजलेन यमिति वायुबीजमुच्चरन् प्रत्यक्षरं शतशतवारं ताडयेदिति ताडनं ॥ विलिख्येति ॥ तत्र
प्राग्वत्पीठे मन्त्रं विलिख्य तन्मन्त्राक्षरसंख्यातानि करवीरपुष्पाण्यादाय रमिति वह्निबीजमुच्चरन् प्रत्यक्षरं तैः पुष्पैः शतशतवारं
हन्यादिति बोधनं ॥ स्वतन्त्रेति ॥ तत्र प्राग्वत्पीठे कुङ्कुमगोरोचनादिभिरष्टदलकमलं कृत्वा तत्कर्णिकायां कुङ्कुमादिद्रव्यैर्मालतीकलि-
काभिस्तन्मन्त्राक्षरसंख्याभिरेकया कालिकया मूलमन्त्रमभिषिञ्चामि नमः इत्यभिषेकं स्वगोपिजलेनैकैकपल्लवेनाष्टोत्तरशतवारं कु-
र्यादित्यभिषेकः ॥ सञ्चिन्त्येति ॥ तत्र स्वमूलाधारे वह्निमण्डले वक्ष्यमाणज्योतिर्मन्त्रं संचिन्त्य तत्र हृद्देशे स्वकर्तव्यमन्त्रं विभाव्य ज्योतिर्मन्त्रस्य तेज-
सा संस्कृतं तं मन्त्रमाणवकात्मकं मायीयमलत्रयं सहजागन्तुकमायीयमनसा पुनः पुनरेकैकमक्षरं निर्दह्यात् मन्त्रं विगतमलत्रयं ध्यायेदि-
ति विमलीकरणं ॥ ज्योतिर्मन्त्रमाह ॥ तारइति ॥ तारः प्रणवः व्योम हकारः अग्नी रेफः मनुरौकारः दण्डी अनुस्वारः कुशोदकेनेति ॥ तत्र
प्राग्वत्पीठादौ तन्मन्त्रं कुङ्कुमादिभिर्विलिख्य ताम्रादिपात्रे कर्पूरादिवासितं शुद्धजलमादाय लिखितमन्त्रेणाष्टोत्तरशतवारमभिमन्त्र्य
तेनैव मन्त्रेण तज्जलबिन्दुभिः कुशैः प्रत्यक्षरं सिञ्चेत् प्रोक्षयेत् इति ॥ आप्यायनं ॥ मन्त्रेणेति ॥ तत्र ताम्रादिपात्रे प्राग्वन्मन्त्रं विलिख्य पात्रान्तरे कर्पू-
रादिवासितं शुद्धजलमानीय तमेव मन्त्रं पठन् तेन मूलमन्त्रं तर्पयामि नमः इत्यष्टोत्तरशतवारं लिखितमन्त्रस्योपरि जलदानेन तर्पयेदिति
तर्पणं ॥ तारं प्रणवः मायाभुवनेश्वरी ॥ रमा श्रीबीजं ॥ योगलक्षणं तत्रादौ योगो भवेदित्यर्थः ॥ अथ मन्त्रार्थः प्रणवभुवनेश्वरीश्रीबीजान्तस्मा

यं मेवं कृत्वा अष्टोत्तरशतवारं जपेदिति दीपने॥ तदनेन श्लोकस्यार्थः स्पष्टः॥ इति दश संस्काराः॥ अथ कादिमते प्रोक्तं मंत्राणां दोषसंचयं व
क्ष्ये तत्परिहाराय साधकानां हिताय च॥ तत्र श्रीतंत्रराजे॥ मंत्रदोषांस्तु विज्ञाय गुरुः परिहरेत्क्रमात्॥ अन्यथा स गुरुः शिष्यो निहंत्येवाचिरा
द्ध्रुवं॥ तेन तत्परिहारं च शृणु देवि समाहिता॥ परिहारप्रसारं तत्त्ववेद्योगेन तत्त्वतः॥ दग्धः षट्कर्णिको मंत्रः ग्रस्तः स्यादधिके जपात्॥ गर्जित
स्त्वचिपिघ्रामः शप्तो वैरिको हताः॥ वर्ण्यालब्धुत्तरप्राया ह्यहंगवर्वेत्तरान्विताः॥ निर्जिताः कर्मवाकुल्यादसहाः सत्त्ववर्जिताः॥ अष्टाविंश
पाश्छिन्नाः स्युस्तंभिताः सानुनासिकाः॥ अकालविनियोगेन प्रबोधस्तापयाजगात्॥ मंत्राः पत्रेषु पठनाद्दग्धवर्णास्तु कीलिताः॥ रुद्धावि
सर्पिकाग्राम्याडःखवैरिसमन्विता॥ धाटीभूतास्तु शप्ता जपादेगहानास्तु संहृताः॥ अष्टांगेनोपदिष्टा ये हीनवीर्याः संहृताः॥ सदाप्रयोगात्कि
ष्ठत्वे क्लिष्टताति विलंबनात्॥ रुष्टाप्रलयनैर्जप्याद्दल्पमंत्रैः सहाविलाः॥ उपेक्षयास्सूयाजाप्याद्वेषमप्यादवमानिताः॥ पंचविंशतिरुद्दिष्टा
दोषांस्तांस्त्रामयेत्क्रमात्॥ बंधनं योनिमुद्रायां मंत्राणां बीजयोजने॥ उभयं बोधयन्शिष्यं संरक्षेत्तं कृतात्मवान्॥ गुरोर्लक्षणमेतावन्नादिसा
यं तु वेदयेत्॥ अनादिक्रमसंसिद्धमातृकाघटयोजनात्॥ तादात्म्यसिद्धिस्तां विद्धि सर्वमंत्रार्थविग्रहां॥ दग्ध इति स्पष्टोऽर्थः॥ अथवा यस्मि
न्मंत्रे आदिमध्यांतेषु कूर्चबीजषट्कं दृश्यते स मंत्रो दग्ध इत्यर्थः॥ तदुक्तं त्रिपुरार्णवे॥ आदौ कूर्चद्वयं मध्ये कूर्चबीजद्वयं तथा॥ अंते कूर्चद्व
यं यस्मिन्मंत्रराजे प्रदृश्यते॥ स तु षट्कर्णिको मंत्रो दग्ध इत्यभिधीयते॥ जपतां सिद्धिदो यः स्यात्स जपः सर्वैः सदार्घभिः॥ अत्र कर्णिकः कूर्चबीजे
तदुक्तं तत्रैव॥ हुंकारस्यैव नामानि कूर्चं माया सरस्वती॥ ज्वलनी वंतताकर्णीतटं कुलमहेश्वरीति॥ अधिके जपात्॥ ग्रस्त इति॥ यस्मिन्मं
त्रेऽधिकाक्षरयोगः कृतः स मंत्रो ग्रस्त इत्यर्थः॥ तदुक्तं त्रिपुरार्णवे॥ आदावंते च मध्ये वाप्यधिकाक्षरयोगतः॥ ग्रस्तः सोऽभिहितो मंत्रो जप
तामशुभप्रद इति॥ यद्यपि वर्षत्रयं जपित्वा लोपाशुद्धिं शुभोदयां॥ तत ऊर्ध्वं हंसं संयोज्य मंत्रादौ यैः प्रजपेद्बुधः॥ ततो वर्षत्रये जाते मध्यादाव
पि योजयेत्॥ ततो वर्षत्रये जाते शान्त्यादावपि योजयेत्॥ एवं यो भजते विद्यां फलभाग्गुरवो नरः॥ अन्यथा हंति सा विद्या साधकं नात्र संश

वि.श्री.
द्वि.
२३

23

यः इति त्रिपुरार्णवोक्तविरुद्धं तथाप्याराधेवाधिकान्नरयोगस्य निषेधत्वे बोध्यं। गर्जित इति। उपदेशस्य प्राग्ध्येयो विधिस्तंभित्
त्वा विना प्राप्तमन्त्रो गर्जित इत्यर्थः तदुक्तं त्रिपुरार्णवे मोहाद्वा लोभतो वापि विधिमुल्लङ्घ्य योजितैः दीयते यस्तु मन्त्रस्तु गर्जितो गर्
हितः सदेति शान्तव इति वैरिकोऽमृगा इति सम्बन्धोऽर्थः बाला इति वृद्धा इति। लघुतरप्राया याः बालाः गुरुतरप्राया या वृद्धाः इत्यर्थः ल
घुत्वरलक्षणं गुरुत्वरलक्षणमात्रकाप्राप्तेये निर्जिता इति। कर्मबाहुल्यान्निर्जिता इत्यर्थः तदुक्तं त्रिपुरार्णवे। स्वतन्त्रोक्तेन परि
त्यज्य स्थात्वात्प्रसिद्धितोऽपि वा स्वगुरुप्रोक्तवो वापि मन्त्रासिद्धिभ्रमादपि जपतर्पणहोमार्चामार्जनादिगुणैः पुनः कुर्वतो मन्त्रराजः
स्यान्निर्जितो गर्हितः सदा न यच्छति फलं तस्मै कल्पकोटिशतैरपि तस्मात्सर्वप्रयत्नेन स्वतन्त्रोक्तं समाचरेत्। इति प्रसह्य इति।
अनियमेन जप्तो मन्त्रो प्रसह्य इत्यर्थः तदुक्तं त्रिपुरार्णवे नियमस्य च भङ्गेन मन्त्रः स्यात्प्रसह्य सदेति। सत्त्ववर्जिता इति भस्मधारणवर्जि
ता इत्यर्थः तदुक्तं त्रिपुरार्णवे वीर्यहीनो यथा देही सर्वकर्मसु न क्षमः भस्मधारणहीनो यो तथा मन्त्रः प्रकीर्तितः। निस्त्रैंशमिति
काद्येश्वरश्चर्यादिभिर्मन्त्रः भवेत्सत्त्वगुणोपेतः सेव्यमानः पतिर्यथा सत्त्वगुणसमापन्नो मन्त्रः कल्पलतासम इति। अपर्ण
रूपा इति स्वरवर्णपल्लवरहिता इत्यर्थः तदुक्तं त्रिपुरार्णवे पल्लवाद्यैर्विलोपेन स्वरवर्णविलोपतः अपर्णत्वं समापन्नः सम
राप्तिच्छिन्नसंज्ञक इति त्रैलोक्यडामरतन्त्रे मन्त्राणां पल्लवो बाहो मन्त्राणां प्रणवः शिरः शिरःपल्लवसंयुक्तो मन्त्रः कामदुघाफलः
न्यासं विना भवेन्मूकः स्तम्भः स्यादासनं विना पल्लवेन विना मन्त्रो नग्नः सम्प्रकीर्तितः शिरोहीनो मृतः प्रोक्तो वृथा मन्त्रो गुरुं विना
हतो दृष्टायद्रत्नो यो निर्वीर्यः स्यादधिकाक्षरः अन्तराल्पेन बीजेन व्याप्तः कीलित उच्यते यस्तु नाम्ना सृष्टोऽतन्त्रः स मन्त्रः सुप्त उच्यते
ऋषिदेवताछन्दोभिः परित्यक्तो भुजङ्गमः मूकः स्तम्भो मृतो नग्नो वीर्यहीनो वृथा हतः भुजङ्गः कीलितः सुप्त इत्येते दोषा वृथाफ
लाः यत्नादपि जप्ये मन्त्रे यदि तन्न सिद्धिमिच्छति नमोऽन्तः शान्तिके पुष्टौ प्रणिपाते च कीर्तितः वशाकर्षणहोमेषु स्वाहान्तः सिद्धि

दायकः वौषट्पल्लवसंयुक्तो मंत्रः पुष्ट्यादिसाधकः ॐकारपल्लवोपेतो मारणे ब्राह्मणो विना मंत्रभंजनकार्ये च वह्निचोरभयनाश
ने वषडंतो महाकालग्रहमालाविनाशकः खण्डनोच्चाटने वैये मंत्रः फट्पल्लवान्वितः ओंकारमुखो मंत्रो वेदागमसमुद्भवो पल्ल
वो न्यागमे मंत्रैर्वैदिकैर्नास्ति पल्लव पल्लवेन विनाजप्यो मंत्रो वेदसमुद्भवः नन्वग्रः कीर्त्यते यस्मादेस्वरूपपरिधानवानिति स्तंभिता
इति अनुनासिकान्तरसहिता इत्यर्थः सानुनासिकनिरनुनासिकलक्षणं तु मातृकासूत्रमेतेषां त्रिपुरार्णवेपि· सानुनासिकव
र्णैर्न संयुक्ताः स्तंभिता मता इति अकालविनियोगेनेति· प्रसन्ना इति पूरणीयं तदुक्तं त्रिपुरार्णवे स्वापंकाले वामवहो जप्ता गरोदति
णवहः स्वापकालजपान्मंत्रो प्रवुद्धो हंति मंत्रिणमिति मंत्रा इति पद्मेषु पठनात्तज्जपनात्क्रुद्धा इति पूरणीये तदुक्तं त्रिपुरार्ण
वे· पुस्तके लिखितं दृष्ट्वा जपेद्यः साधकाधमः चत्वारि तस्य नश्यन्ति आयुः कीर्तिर्यशः श्रियः जपात्पत्रेषु मंत्रः स्यात्क्रुद्धः सन् हंति
साधकमिति यस्मिन्मंत्रे यो वर्णः कीलत्वेनाभिमतस्तं विहाय इत्यर्थः तदुक्तं योगिनीहृदये वीजं मंत्रादिमे स्यान्मंत्रमध्यं तु की
लकं· मंत्रान्ते शक्तिरुद्दिष्टा वीजकीलकशक्तयः यद्वर्णः कीलकत्वेन विहितस्तं विहाय च तत्स्वंत्तमरो वापि स्थाप्यते कीलकत्व
तः स्वमंत्रस्तत्सवर्णेन कीलितः सिद्धिरोधकृत् रुद्धा इति· संधिरहिता रुद्धा इत्यर्थः विसंधिको भवेद्रुद्धः सर्वकर्मसु गर्हित इति यो
गिनीहृदयवचनात् दुःखा इति वैरिवर्णसमन्विता दुःखिता दुःखिता इत्यर्थः तदुक्तं त्रिपुरार्णवे· दुःखितास्ते समुद्दिष्टा वै
रिवर्णैश्च संयुता इति खंडीभूता· अंशजपात्खंडीभूता इत्यर्थः तदुक्तं त्रिपुरार्णवे. खण्डिता वर्णलोपेनेति· अंगहीना इति· अंगरहि
ताःकवचादिरहिता इत्यर्थः तथाच योगिनीहृदये· अंगन्यासकवचस्तोत्रपाठैर्विना मनुः अंगहीनः समाख्यातः सिद्धिं नैव प्रयच्छ
ति अपक्वैरिति अपक्वैर्नोपदिष्टा हीनवीर्या इत्यर्थः तथाच द्वितीयेनाभिषेकेण पूर्णत्वं यातिनो मनुः अपक्वो हीनवीर्यः स्या
त्सर्वकर्मवहिष्कृतः इति योगिनीतंत्रवचनात् सदाप्रयोगादिति सर्वदाकाम्यप्रयोगान्मंत्रस्य कुंठता भवतीत्यर्थः तदुक्तं त्रिपुरा

र्णवे प्रयुज्यते यदा मंत्रा न तु गच्छंति विना तैः ते मंत्राः कुंठतां यांति तस्माच्छ्रेति समाचरेदिति अत्र यांतीति स्वयुतसाविश्रीजपस
हितायुतमूलमंत्रजपः तद्विधिं प्रयोगपटले वक्ष्यामः क्लिष्टेनेति दीर्घोच्चारस्य प्लुतत्वेनोच्चारणेन ह्रस्वस्य दीर्घत्वेनोच्चारणे
न च मंत्रस्य क्लेशो भवतीत्यर्थः तथा च तंत्रांतरे एकमात्रो लघुर्ह्रस्वो द्विमात्रो दीर्घ उच्यते त्रिमात्रस्तु प्लुतो ज्ञेय इत्येतत्स्वरलक्षणं
ह्रस्वत्वेन वदीर्घस्य दीर्घत्वेन प्लुतस्य च प्लुतत्वेन च दीर्घस्य ह्रस्वस्य दीर्घत्वेन तथा पुनः उच्चारणेन यन्मंत्रः क्लिष्टो भवति नान्यथा यो
मंत्रः क्लिष्टतां प्राप्तः स मंत्रः सिद्धिरोधकृत् इति रुष्ट इति फलजनकजपात् रुष्टो भवतीत्यर्थः तदुक्तं त्रिपुरार्णवे मातं विना ज
पेन्मंत्रान् लस्यैर्गृह्यते जपः मंत्रोपि तष्टतां याति सिद्धिं नैव प्रयच्छतीति अन्यमंत्रैरिति अन्यदेवतामंत्रैः सह मूलमंत्रजपादित्य
र्थः तदुक्तं योगिनीहृदये मंत्रांतरेण न गृह्णीयात् उद्दिष्टदेवतांतरं प्रयोजनांतरे चैव वर्जयेत् स्थापनांतरे तदा मंत्रो भवेन्नूनं निःप्र
कामद्र्च्छाफलः चतुर्भिः संयुतो मंत्रो भवेन्मालिनसंज्ञकः इति उपेक्षेति उपेक्षा देवतागुरुमंत्राणां तन्मेषु अवज्ञा आतुरता वै
षम्यं मंत्रग्रहणानंतरमदृष्टवशात् किंचिद्दुःखे चेत्प्राप्ते तेन दाःय मंत्रः किमर्थं गृहीत इति मनसि चिंतया यज्जपः क्रियते स एव वैषम्यो
जप इत्यर्थः तदुक्तं त्रिपुरार्णवे मंत्रे गुरौ देवतायामुपेक्षा क्रियते यदि अवज्ञया वा वैषम्यान्मंत्रः स्याद्वमानितः इति वेधनमिति
योनिमुद्राबंधनेन सर्वे दोषा गच्छंतीत्यर्थः तन्मा गुरूक्तमुभयमनसाधारणं बाह्यसंस्कारविशेषः अन्नादीति मातृकाग्रंथयोज
नेप्रत्यर्णस्य अथ मंत्रमेलनप्रकारः तदुक्तं तंत्रराजे नित्यानां त्रैपुराणां च नावेस्यात्स्वशकुादयः तथाप्युच्यते किंचिदाभिचारा
दिसिद्धये अश्विन्यादिषु ऋक्षेषु विंदुसर्गांत्यवर्णान्त चत्वारो योजयेदाद्यान्विंदुसर्गौ तु सर्वतो तेन मंत्रादिवर्णेन नामन्याद्यक्षरेण
च गणयेत्पृष्टवाप्यष्टमे द्वादशेतु वा रिपोर्मंत्राद्यवर्णः स्यात्तेन तस्य हितं भवेत् राशिष्वप्येषु ऋक्षेषु सप्तपंचतृतीयगैः साधना
माषि विज्ञेयमशुकाद्यमनुग्रहे यतस्तत्त्वविज्ञानरहितास्तेन चोदितामिति नित्यानामिति यावंतो नित्यामंत्राः यावंतो हि प

णमंत्रान्तेषामंशकादयमंत्रमेलनप्रकारानावेक्षणीयाऽइत्यर्थः तथापीति आभिचारादीति अयमर्थः नित्यनैमित्तिकेनावे
क्षणीयाः काम्यैः वेक्षणीयाऽइत्यर्थः अश्विन्यादिलिखेति कृत्तेषु राशिचक्रेषु विंदुसर्गान्तवर्जिते कृत्वा चत्वारिंशत्वास्थितवा
णान्विलिखेत् अश्विन्यादिषु नक्षत्रचक्रेषु विंदुसर्गौ सवर्गौ कृत्वा त्रीणि त्रीण्येव तद्वर्णानि लिखेदित्यर्थः तदुक्तं मातृकार्णवे.
प्राक्प्रत्यग्दक्षिणोदक्च चतुःसूत्राणि पातयेत् एकैककोणदेशेषु चतुःसूत्राणि पातयेत् तेन खण्डादि जायन्ते त्रपिसंख्या
तिनास्य यथा तेषु पूर्वादितो लेख्यं प्रादक्षिण्यक्रमेण तु विंदुसर्गौ शकारं च हित्वा वर्णचतुष्टयं तथाष्टचत्वारिंशतानावर्णा
नां परमेश्वरि तेन क्रमेण मेषादीन् राशींश्चैव प्रकल्पयेत् जायते राशिचक्रं हि साधकोत्र विचारयेत् इति तत्तच्चक्रमपि तत्रै
व रविखंडात्मकं चक्रं प्राग्वत्क्रविधिना लिखेत् तेषु खण्डेषु पूर्वादिन्यसेद्वर्णांस्त्रिशः क्रमात् देवी मधुमती नाम्नी षट्त्रिंशाद्व
र्णात्मिका तथैव विंदुयुक्ता च सर्गयुक्ता तथैव च खण्डे खण्डे च जायन्ते वर्णा नव नव क्रमात् सप्तविंशति कृत्ताणां मध्ये
त्र्यंशानां त्रिषु एकस्यैकस्य राशेस्तु नवांशक प्रभेदतः विचारयेन्महाचक्रे साधकोत्र समं तके योगिनीहृदये षट्त्रिंशद्व्यंज
नाकाराः प्रोक्ता मधुमती च सा पंचाशद्वर्णनिष्पन्ना मालिनी कादिका मते कालीमते तु पंचाशद्वर्णमय्येव ते उभे तन्त्रमते तथा
प्रोक्तं तन्त्रदायैस्त्वेश्वरीति तेनेति द्वादशखण्डात्मके चक्रे राशिमये मत्तमये च प्रादक्षिण्यक्रमेण गणयेत् तदा षष्ठे वा ऽष्टमे द्वा
दशे तु वा मंत्रादितो नामाद्यक्षरं यस्मिन् खण्डे तिष्ठति तत्पर्यंतं प्रथवा नामाद्यक्षरमारभ्य मंत्राद्यक्षरपर्यंतं गणयेत् तदा षष्ठे
वाष्टमे द्वादशे तु वा मंत्रादितो नामाद्यक्षरं मंत्राद्यक्षरं वा भवति स मंत्रो रिपो राहितं भवतीत्यर्थः आभिचारेषु प्रशस्तइत्यर्थः
सिद्धारिचक्रमाह प्राक्प्रत्यग्दक्षिणोदक्च सूत्रपंचकयोगतः कोष्ठानि षोडशा त्रासु तेषु वर्णान् क्रमाल्लिखेत् चतुश्चतुर्विभागे
न कल्पयेन्नाति वैक्रमात् प्रथमं प्रथमे तावत् द्वितीयं प्रथमे तथा द्वितीयमन्यतश्चान्यत् तथान्यदपि कल्पयेत् ततः कोष्ठेषु वि

लिखेन्मंत्रं चममच्चं एवं चतुष्कोष्ठवृत्तांतावधि समालिखेत् स्वनामाद्यक्षरं यत्र कोष्ठे संदृश्यते ततः सिद्धादीनां गणयेद्या
वन्मंत्राद्यक्षरदर्शने सिद्धसिद्धो जपात्सिद्धो द्विगुणात्सिद्धसाध्यकः सिद्धसुसिद्धैः संप्राप्ता सिद्धारिर्हन्ति गोत्रजं सिद्धसिद्धोऽति
संक्लेशात्साध्यसाध्योऽतिदुःखकृत् साध्यसुसिद्धो भजनात्सिद्धो भवति शाकरि साध्यारिः कन्यकां हन्ति तन्मंत्रं परिवर्जयेत्
सुसिद्धसिद्धो ध्ययनात्फलदायी द्विधापितेन सुसिद्धसिद्धो जाप्यमात्रैः सिद्धये स्यादितोऽन्यथा सुसिद्धे तु सुसिद्धस्तु पूर्वजन्मकृत
श्रमः तस्मात्सर्वसिद्धीनां साधने योजनेमंत्रं अभिचारेदिपारेवयदि स्वात्मविपर्यये सुसिद्धारिर्विशेषेण स्वकुलं नाशयेत्तु
वे अरिसिद्धः सुतं हन्यादरिसाध्यस्तु योषितं अरेःसुसिद्धो मंत्रस्तु कुलोत्सादनकृद्भवेत् अर्यरिः स्वात्महा मंत्रः संप्राप्ते वसुनि
श्चयः स्पष्टार्थः ऋणधनशोधनप्रकारमाह श्रीतंत्रराजे नामाद्यक्षरमारभ्य यावन्मंत्रादिवर्णकं त्रिधा कृत्वा स्वैरभिंद्यातद
न्यद्विपरीतकं हत्वाधिको ऋणी ज्ञेयो ऋणी चेन्मंत्र उत्तमः स्वयं ऋणी चेत्तन्मंत्रं संत्यजेत्सर्वं ऋणी यतः इति अत्र पंचाशद्वर्णात्म
मातृकायां नामाद्यक्षरमारभ्यैत्यादि विचारणीयं. षट्त्रिंशत्तत्त्वजनेष्वथवा पूर्णमंडलरूपमातृकायां वा तत्क्रमं विशेषेणैव म
धुमत्यां महादेव्यां ऋणशोधो विधीयते कालीमते तु मालिन्यां मंत्राक्षराद्य प्रशस्यते इति. अत्र मधुमती षट्त्रिंशत्तत्त्वजना
त्मिका महामधुमती पूर्णमंडलवर्णरूपा. मालिनी पंचाशद्वर्णरूपा. तथा च. कथं ऋणित्वमंत्राणां साधकानां च मे
वद पूर्वजन्मकृताभ्यासे पापादस्य फलान्विकृत पापे नष्टे फलावाप्तिः कालेदेहे तयार्हणी मंत्रः संप्राप्तिमात्रेण प्राक्तनैः सिद्ध
ये भवेत् सिद्धमंत्रांकुरोऽलब्धमंत्रीयः सिद्धिभम्बरः लक्ष्मी महादनात्स्वमंत्रभोगमवाप्नुयात् समंत्रस्य ऋणी ज्ञेयो भजनेन तस्य पूर्व
णं तस्मादृणविशुद्धिस्तु कार्या सर्वैस्तु सर्वतः इति अथ कालीमते मंत्रमेलनप्रकारः तत्रादौ नक्षत्रचक्रं. श्रीरुद्रयामले ग
णलाभोपकारायप्रारभ्यादिरेखाःकृत्वा गोपालानकुटीप्राप्या फलाविमृदितालिपिः अथैतच्चक्रवचनाप्रकारः तत्रादौ

णोन्नरायतास्युतस्योरेखाप्राक्प्रत्यगायतास्य दशरेखासु विलिखेत्सप्तविंशतिकोष्ठानि कृत्तिकादिनवदादिनवपादिपंच॰
पायष्ठौ॰ एतत्संज्ञवर्णांकसंख्याप्रकारेणसर्वोर्ध्वपंक्तौः प्रथमकोष्ठमारभ्यपंक्तिपंक्तिक्रमेणनक्षत्राणिविलिखेत्तथैवास्मि
न्नादिनक्षत्राणिविलिख्यविचारयेत् तत्रयस्मिन्कोष्ठेसाधकनामाद्यक्षरंतिष्ठतितत्प्रथमकवर्णस्थंविज्ञायतत्रयन्नक्षत्रमा
यातितत्साधकस्यजन्मनक्षत्रंपरिकल्प्यतदारभ्ययस्मिन्कोष्ठेमंत्राद्यक्षरंतिष्ठतितावत्पर्यन्तंगणयित्वातन्नक्षत्रंमंत्रनक्षत्रं
विज्ञायसाधकनक्षत्रमारभ्यमंत्रनक्षत्रपर्यन्तं नामाद्यक्षरमारभ्ययावन्मंत्राद्यमक्षरं जन्मसंपद्विपत्क्षेमप्रत्यरिसाधकको
वधः मैत्रपरममैत्रंचजन्मादौत्रिगुणःपुनः इतिकुलार्णवोक्तप्रकारेणजन्मादिनवकंपर्यायेणचविज्ञायफलानिर्दि
शेत् तत्रकुलार्णवे तनुधनस्तारयामृत्युर्यद्युनाप्राप्तस्तृतीयया मृत्युःपंचमताराया सप्तमोच्यातकोमतः द्विचतुःषष्ठन
वमगतास्ताराःशुभामताः इतितारफलंज्ञात्वामंत्रंदद्याद्विशालधीः अथनक्षत्राणांगणभेदः कुलमूलवतारे॰ अश्वि
नीमृगशीर्षंचतथापुष्यपुनर्वसू हस्तस्वातिरनूराधारेवतीविष्णुदेवतं भरणीरोहिणीचैवआर्द्राप्पूर्वोत्तरातथा पूर्वाषा
ढोत्तराषाढापूर्वाभाद्रोत्तरान्त्यजः कृत्तिकाह्यश्लेषाचित्राविशाखाज्येष्ठकातथा मूलंधनिष्ठाशतभिषाचरैतेगणाःप्रिये॰
विष्णुःश्रवणनक्षत्रंदैवतंदेवगणःअत्रविसर्गलोपश्छान्दसः रुद्रयामले॰ स्वगणेचोत्तमाप्रीतिर्मध्यमादेवमानुषी अधमा
राक्षसात्दैवैरस्तुमानवराक्षसैः अथराशिचक्रं तत्रश्रीकुलार्णवे॰ बालेगौरंवृषेणांशस्वामीशोभीतिराशिषु क्रमेणाभे
तितावर्णाःकन्यायांशादयःस्मृताः अथराशिकेतत्स्वप्रायुक्तपव चक्रंतुप्राक्प्रत्यगायतंरेखाद्वयंदक्षिणोत्तरायतंरेखाद्वयं
मध्येचतुरस्रंयथाभवतितथाविलिख्यबहिश्चतुःकोणेषुएकैकांरेखांकृत्वाद्वादशखण्डानिनिष्पाद्यतेषुखण्डेषुप्रागादि
प्रादक्षिण्येनवर्णान्विलिख्यकन्यायांतुशषसहलक्षेतिविलिखेत् ततःतेषुप्रागादिषुद्वादशखण्डेषुपकारादिद्वादशका

वि॰र्णा॰
द्वि॰
२९

26

त्विलिखेत्तेषु मेषादिद्वादशराशीन्परिकल्प्य विचारयेत् नामाद्यक्षरमारभ्य यावन्मंत्रादिवर्णकं लग्नो धनभ्रातृबंधुपुत्रशत्रुक
लत्रकाः मरणं धर्मकर्मायव्ययान्द्वादश राशयः अथ तेषां फलानि रत्नसागरे एको वाप्यथ पंचमो धनवमो राशेस्तु सद्धाथवा रा
शिः स्याद्दशमोपि द्वितीयसहितः षष्ठो भवेत्सेवकः रुद्राग्निस्वरसंख्यया यदि मतो मंत्रो भवेत्पोषकः सस्याद्द्वादशकोष्टकः स्मृतिमि
तो मंत्रः स्वनोघातकः इति अथ राशीनां वर्णभेदः स्युः कर्कटो वृश्चिकमीनराशिविप्रान्नृपाः सिंहधनुश्च मेषः तुलाघटज्जो मो मि
थुनश्च वैश्याः कन्यावृषोजौ मकरश्च शूद्रः अथ पंचभौतिकचक्रं तत्र दक्षिणामूर्तिसंहितायां अ उ ऋ ओ ग ङ वर्णा दवलालश्च पार्थि
वा ऋ ॠ औ घ झ ट वर्णाः प्रथमवामलनीरजाः इ ई ऐ ख छ ठ वर्णास्यफराः क्षश्च वाह्निकाः अ आ ए क च ट वर्णास्तपयाः षस्तु वायुजाः
ऌ ॡ अं ङ ञ ण न वर्णा नमश्च हस्तु नाभसाः श्रीकुलार्णवे महीसलिलयोर्मैत्री अनिलानिलयोरपि सामान्यमग्निभूम्योस्तु स
लिलानिलयोस्तथा एवं वैपरीत्येन मित्रं सर्वमचापरं परस्परविरुद्धानां मंत्राणां यत्र संगतिः वर्जयेत्तादृशं मंत्रं नाशकृत्तं
कुलेश्वरीति अथ सिद्धसाध्यादिशोधनप्रकारः तत्रादौ द्वादशारचक्रं तत्र कुलमूलावतारे द्वादशारे तथा चक्रे कूटखंडविव
र्जितान् प्रादिह्यंतान् लिखेद्वर्णान्मूर्द्धतो यावदीश्वरि अंकानेकादिमान्वत्तालिखित्वर्वादितः क्रमात् सिद्धः साध्यस्सुसिद्धोरिश्च
तर्वर्गाः स्फुटो भवेत् एतेषां फलानि कुलमूलावतारे॰ द्वादशारे तथा चक्रे कूटखंडविवर्जितान् प्रादिह्यंतान् लिखेद्धीमान्स्व
श्यादिष्टद्वादशोपि वा इति ज्ञात्वा वरारोहे मंत्रं दद्याद्धि शालधीः तेषां फलानि सिद्धादिचक्रोक्तानि ज्ञेयानि॰ ॥ इति श्रीविद्यार्ण
वे द्वितीयश्वासः २ ॥ अथ षोडशारचक्रं॰ तत्र कुलमूलावतारे चतुरस्रं भुवं भित्त्वा कोष्ठानां षोडशालिखेत् अकारादिक्षका
ंतां मातृकां सपि विन्यसेत् ईशानकोणदारभ्य वायव्यांतं लिखेत्सुधीः प्रादक्षिण्यक्रमेणैवेति॰ तल्लेखनप्रकारमाह लक्ष्मीकु
लार्णवे एकत्रिरुद्रनवनेत्रयुगार्क पंक्तिषट्सप्तषोडशचतुर्दशपंचकेषु कोष्ठे लिखेन्मुनितिथीषु तथा वशिष्टवर्णान्क्रमात्प्रशान्त॰

२९

मितान्क्रमशोंविकायाइति सिद्धः सिद्ध्यतिकालेन साध्यः सिध्यतिवानवा सुसिद्धस्तत्क्षणादेवअरिर्मूलं निकृंतति॰ भैरवीतंत्रे॰
दुष्टार्णराशिभूताद्वितिप्रचुरमंत्रकं सम्यक्कार्यस्तंयत्नाद्वर्जयेन्मतिमान्नरः सिद्धसाध्यादियोगेषु मंत्रदाने विशेषतः असिद्धमा
मगृह्णीयात्सुसुषुप्तोयेनजागृयात् आदौसिद्धस्तथांतेच सर्वसिद्धिफलप्रदं आदावंते भवेत्साध्यः कृच्छ्रसाध्यउदाहृतः आदा
वंतेसुसिद्धस्तुक्षिप्रमेवप्रसिध्यति आदावंतेरिपुर्यस्तु साधकंसनिकृंतयेत् आदौसिद्धोंत्यसाध्योयोद्विगुणेनससिध्यति आदौसा
ध्यःसुसिद्धोंत्यःप्रोक्तमार्गेणसिध्यति सुसिद्धादिस्तुसाध्यांतश्चतद्गुणमपेक्षते आद्यांतयोर्यदासिद्धोमध्येसाध्यःप्रजायते॰
आद्यांतयोर्यदासाध्योमध्येसिद्धःप्रजायते तावुभौसाध्यसिद्धौहिजपाधिक्येनसिध्यतः आदौसिद्धेनसंयुक्तःसुसिद्धेनतथांततः
अरिणादेवसिद्धोनसाधकस्यनसंशयः सिद्धांतरितसाध्यस्तुसुसिद्धांतरितोथवा श्रींह्रींसिध्यतिमंत्रोवैयत्नात्कोंकंमंत्रविन्नमैः
सिद्धेनांतरितःशत्रुःसुसिद्धेनापिचेद्भवेत् नासौरिपुर्भवेन्मंत्रःकिंतुकृच्छ्रेणसिध्यति साध्येनांतरितःसिद्धःसुसिद्धोपित
थायदि सिद्ध्यत्यतीवकष्टेनसाधकस्यनचान्यथा रिपुणांतरितंसिद्धंसुसिद्धंचतथात्यजेत् ऋषिणादूषितोमंत्रोनैवग्रा
ह्यःकथंचन अल्पदोषावऋणगुणामंत्रादेयाविचक्षणैः सिद्धादिकोष्टकंज्ञात्वाततःसिद्धिःप्रजायते एकाक्षरेतथाकूटेत्रिपुरे
मंत्रनायके श्रीदत्तेस्वप्नदत्तेचसिद्धादीन्नैवशोधयेत् नृसिंहार्कवराहाणांप्रासादप्रणवस्यच सपिंडाक्षरमंत्राणांसिद्धादीन्नै
वशोधयेत् पाशाद्यंगत्र्यक्षरंमंत्रंत्रैपुरंचंडनायकं सौरमृत्युंजयंशक्तिप्रणंभवंविनतासुतं सौरमंत्रास्तुयेपिस्युर्वैष्णवानारसिंह
काः सिद्धसाध्यसुसिद्धारिविचारपरिवर्जिताः प्रणवेश्वक्षरंमायाव्योममाप्यषडक्षरं मालामंत्रेषुसर्वेषुसिद्धादीन्नैवशोधयेत्
रत्नसागरे॰ हंसस्याष्टाक्षरस्यापितथापंचाक्षरस्यच एकद्व्यादिबीजस्यसिद्धादीन्नैवशोधयेत् नृसिंहार्कवराहाणांकालि
कासिद्धकालिका भुवनामलाचतथाचंडीसिद्धादिपरिवर्जनं रुद्रयामले स्वप्नोरमंत्रेदेवशिमालामंत्रस्यपार्वति नपुंसकस्यापि

वि.ए.
व.त.
२२

27

सिद्धादीन्नैव शोधयेत् कुलमूलावतारे स्वप्नोपदिष्टमंत्रस्य न विधिर्नैव च क्रिया उद्दिष्टदेवतां ध्यात्वा जपेत्कुंभकं भवेत् अगस्त्य
संहितायां राममंत्रेषु सर्वेषु स्मृतेष्वेतु निर्णयाव तारकत्वान्मंत्रराजे सिद्धादीन्नैव शोधयेच्च वैष्णवास्तु जेनाश्च गोपालो वैष्णवाश्च ये
सिद्धसाध्यसुसिद्धारि विचारपरिवर्जिता व्योमव्यापी षडर्णश्च मातृकाहरवल्लभा वक्रतुण्डैकया मंत्राः पंचसाधारणा मता अथ
षड्दलचक्रं तत्र कुलमूलावतारे षट्दले पद्ममालिख्य प्रागादिषु दलेषु च अकारादिवर्णानेकैकं लिखेन्निःखण्डकूटका
न् स्वनामाद्यक्षरं यत्र तदारभ्य विचारयेत् प्रथमे सम्पदुद्दिष्टा द्वितीये संपदं तथा तृतीये तु मृतिर्विद्याच्चतुर्थे वपुविग्रहः पंचमे
संशये विद्यात्षष्ठे सर्वविनाशनं अथ ऋणधनचक्रं तत्र कुलमूलावतारे नेत्रर्तुनेत्ररविपंचदशाष्टवेदवह्न्यायुधाष्टनवभिर्गु
णितान्स्वसाध्यान् दिग्भूगिरिश्रुतिगजाक्षिमुनीषु वेदषड्वह्निभिश्च गुणितान् अथ साधकानां नामा॰ ॰ लादकठवाऊजभ
कषेणंतानाभयोरधिकशेषमृणं धनं स्यात् तथैतच्चनिर्माणप्रकारः तत्र दक्षिणोत्तरायताः सप्तरेखाः प्राक्प्रत्यगायताः द्वा
दश रेखाश्च विलिख्य षट्षष्टिकोष्ठानि कृत्वा तत्र सर्वोपरितनैकादशकोष्ठात्मकप्रथमपंक्तौ स्वरमादि दक्षिणांतं प्रथमकोष्ठे
१४ द्वितीये २ तृतीये २ चतुर्थे ९ पंचमे १५ षष्ठे ६ सप्तमे ४ अष्टमे ३ नवमे ५ दशमे ८ एकादशे ९ इत्येकादश भेदानेन
कानालिख्य तदधो द्वितीयपंक्तौ स्ववामादि दक्षिणांतं अ इ उ ऋ लृ ए ऐ ओ औ अं अः इत्येकादश स्वरानेकादशकोष्ठेषु विलि
ख्य तदधः पंक्तौ ककारादि टकारांतान् तदधः पंक्तौ ठकारादि फकारांतान् तदधः पंक्तौ बकारादि हकारांतान्वर्णान्विलिख्य
तदधः पंक्तौ ९ १० ४ ८ ३ २ ५ ४ ६ ३ इत्येकादश विधानं कानेकादशसु कोष्ठेषु विलिख्य साधकचक्रं निर्माय विचार
येत् तत्र सेष्टमंत्रस्य वर्णान्स्वरव्यंजनबिंदुविसर्गान्स्पष्टं कृत्वा सर्वोपरितनपंक्तौ केनयस्थापयस्य वर्णाः स्य योयोः कंस्ततं वर्णोतेन तेनां २२

केनगणयित्वा संज्ञातं संख्या समुदायमष्टभिराहृत्यावशिष्टमंके पृथक् संस्थाप्य शिष्यनामाद्यक्षराणि च तथैव स्वरव्यंजनवि
डविसर्गैः पृथक्कृत्य सर्वाभ्यः पंक्तिसंख्याकेषु यस्य यस्यांकस्य योयोंकस्तं तं तेन तेनांकेन गणयित्वा संज्ञातांकसमुदायमष्टभि
राहृत्यावशिष्टसंख्यांकं पृथक् संस्थाप्य मंत्रसाधकयोरवशिष्टांकमध्ये योंकस्तदधिकसंख्यांकः सऋणीज्ञेयः मंत्रस्तु ऋणी तदा
समे त्वग्राह्यः यस्य मंत्रस्य साधकोऽऋणी भवति स मंत्रस्त्याज्य इति श्रीविद्यामपिकृत्य मातृकानिरूपणं अथ वर्णजगद्धात्री मा
तृकामंत्रविग्रहा सोऽकर्षार्थे हि मंत्राणां न्यासे पूजा जपस्य च उद्धारे साधकानां च विश्रेषात्कालिकामते तारस्य पंचभेदेभ्यः
पंचाशद्वर्णगाः कलाः निवृत्तिश्च प्रतिष्ठा च विद्या शांतिरनंतरं इंधिका दीपिका चैव रेचिका मोचिका परा सूक्ष्मा सूक्ष्मामृता ज्ञाना
मृता चाप्यायिनी तथा व्यापिनी व्योमरूपाः स्युरनंताः स्वरजाः कलाः सृष्टिर्ऋद्धिः स्मृतिर्मेधा कांतिर्लक्ष्मीर्द्युतिः स्थिरा स्थितिसि
द्धिरिति प्रोक्ताः क्रमाच्च वर्गगाः ततश्चापि जरा चैव पालिनी शांतिरेव च ऐश्वर्या च रतिश्चैव कामिका वरदा तथा ह्लादिनी प्रीति
दीर्घं च क्रमात्स्युष्टतवर्गजाः तीक्ष्णा रौद्री भया निद्रा तंद्रा क्षुत्क्रोधिनी क्रिया उत्कारी मृत्युरेताः स्युः क्रमाच्च पयवर्गजाः षवर्गाश्च
कला प्रोक्ताः पीता श्वेतारुणासिता अनंता च तथा प्रोक्ताः पंचाशद्वर्णसंभवा अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः शशि
नी चंद्रिका ज्योत्स्ना कांतिः श्रीः प्रीतिरंगदा पूर्णा पूर्णामृतास्ताः कामदायिन्यः स्वरजाः कलाः तपनी तापिनी धूम्रा भ्रामरी विज्वालिनी रुचिः
सुषुम्णा भोगदा विश्वा बोधिनी धारिणी क्षमा काभाद्या वसुदाः सौराष्ठडांता द्वादशेरिता धूम्रार्चिरूष्मा ज्वलिनी विस्फुलिंगि
नी सुश्रीः सुरूपा कपिला हव्यकव्यवहा अपि यादीनां दशवर्णानां कनाथ मे प्रदा इमाः सोमसूर्याग्निरूपिण्यः साधकानां फलप्रदाः
श्रीकंठानंतसूक्ष्मो च त्रिमूर्तिरमरेश्वरः अर्घीशो भारभूतिश्चातिथीशः स्थाणुको हरः झिंटीशो भौतिकः सद्योजातश्चानुग्रहेश्वरः
अक्रूरश्च महासेनः षोडश स्वरमूर्तयः पश्चात्क्रोधीशचंडीशौ पंचांतकशिवोत्तमाः अथैकरुद्रकूर्मैकनेत्राख्य चतुराननाः अजेशा

सर्वेशो मेषेशस्तथा लांगलिदारुकौ अर्द्धनारीश्वरश्चोमाकांतश्चाषाढदण्डिनौ स्वरत्रमीनमेषाख्यलोहितास्तु शिखीतथा छग
लंडद्विरण्डेशौ समहाकालपालिनौ भुजंगेशः पिनाकीशः खड्गीशः स्यादकस्तथा श्वेतभृग्वीशलकुलीशिवासंवर्तकः स्मृ
तः पूर्णोदरी स्यात् द्विरजा शाल्मलीतदनंतरं लोलाक्षी वर्तुलाक्षी च दीर्घघोणा ततः परं सुदीर्घमुखी गोमुखी दीर्घजिह्वा त
तःपरं कुंडोदर्यूर्ध्वकेशी च तथा विकृतमुख्यपि ज्वालामुखी ततश्चोल्कामुखी च श्रीमुखी तथा विद्यामुखी च कथिताः
रुद्राणां स्वरशक्तयः महाकाली सरस्वत्यौ सर्वसिद्धिस्ततः परं गौरी त्रैलोक्यविद्या स्यान्मंत्रशक्तिस्ततः परं आत्मशक्ति
र्भूतमाता ततो लंबोदरी तथा द्राविणी नागरी भूयः खेचरी चापि मंजरी रूपिणी वीरिणी पश्चात्काकोदर्यपि पूतना स्याद्भद्र
काली योगिन्यौ शंखिनी गर्जिनी तथा कालरात्रिश्च कुर्दिन्यां कपर्दिन्यपि वज्रिका जया च सुमुखी चैव रेवती माधवी तथा वा
रुणी वायवी चैव तथा रक्षोविदारिणी ततश्च सहजा लक्ष्मी व्यापिनी च ततः परं महामाया च कथिताः क्रमात्क्षरुद्रशक्तयः अत्र
रुद्राः स्मृता रक्ताः पूर्णशूलकपालकाः शक्तयो रुद्रपीठस्थाः सिंदूरारुणविग्रहाः रक्तोत्पलकपालाभ्यामलंकृतकरांबुजाः के
केशवो नारायणो माधवो गोविंद विष्णुः मधुसूदनसंज्ञोन्यः स्यात्त्रिविक्रमवामनौ श्रीधरश्च हृषीकेशः पद्मनाभस्ततः परं दा
मोदरो वासुदेवः संकर्षण इतीरितः प्रद्युम्नश्चानिरुद्धश्च क्रमात्स्युः स्वरमूर्तयः पश्चाच्चक्री गदी शार्ङ्गी खड्गी शंखी हली पुनः
मुसली शूलपाशी अंकुशी च ततः परं मुकुंदो नंदनो नंदी नरो नरकजिद्धरिः कृष्णः सत्यः सात्वतश्च शौरिः शूरो जनार्दनः
भूधरो विश्वमूर्तिश्च वैकुंठः पुरुषोत्तमः बली बलानुजो बालो वृषघ्नो वृषभस्ततः हंसो वराहो विमलो नृसिंहो मूर्तयो हरेः की
र्तिः कांतिस्तथा तुष्टिपुष्टिश्च धृतिस्ततः शांतिः क्रिया दया मेधा हर्षा श्रद्धा ततः परं लज्जा लक्ष्मी सरस्वत्यौ प्रीतिरतिरिमाः क्र
मात् जया दुर्गा प्रभा सत्या चण्डा वाणी विलासिनी विजया विरजा विश्वा विनदा सुनदा स्मृतिः ऋद्धिः समृद्धिः शुद्धिश्च भुक्तिर्बु

धृतिर्मतिः क्षमा रमोमा लक्ष्मीर्दिनौल्कि त्रावसुदा वसुधा परा परायणा च सूक्ष्मा च संध्या प्रज्ञा परा निशा अमोघा विद्युता चेतिका
हीनाम्मूर्तयो हरेः केशवाद्यास्तु मे पूर्णमाः शंखचक्रलसत्कराः शान्तपत्रप्रियांकेषु निषण्णाः सुस्मिताननाः विद्युद्दामसमा
नागपः पंकजाभयवाहवः रविः प्रभाकरो भास्वान्द्युमणिः पूषणो भगः आदित्यो र्क्को वेदमूर्तिः कर्मसाक्षी दिवाकरः मित्रोर्यम
मो भास्करश्चिमस्तुहा दशशतात्मा विभाकरः सहस्रांशुर्मार्तण्डस्तेजस्त्रैतेसूरः सूर्यो विभावसुः अहस्करो रुणाग्रजो भास्वान्सप्ताश्वरंगमः ह
रिदश्वो ग्रहाधीशो मार्तण्डो भानुरव्ययः विकर्तनः सहस्रांशुर्मिहिरो मित्र माठरो कर्मसाक्षी जगन्नेत्रस्तरणिः पद्मिनीप्रियः
चण्डांशुः पिंगलो दण्डो गभस्ती चूर्णिरंशुमान् प्रद्योतनो जगच्चक्षुस्तपनो लोकबांधवः हेमसत्त्वोपहंता च त्रयीमूर्तिस्त्रिमूर्त
यः विद्याश्रीपुष्टयः प्रज्ञा सिनीवाली कुहूस्तथा रुद्रवीर्या प्रभा नंदा स्पर्षा वृद्धिदा शुभा कालरात्रिर्महारात्रिर्भद्रकाली कपा
लिनी विकृतिर्दण्डमुण्डिन्यो सेन्दुखण्डा शिखंडिनी निशुंभशुंभमथनी महिषासुरमर्दिनी इंद्राणी चैव रुद्राणी शंकरार्द्धशरीरिणी
नारी नारायणी चैव त्रिशूलिन्यपि पालिनी अंबिका ह्लादिनी चैव सम्भूतिर्वृद्धिरेव च पिंगलाक्षी विशालाक्षी मायासत्त्वं तथैव च श्रद्धा
स्वाहा स्वधाभिज्ञा देवकी कमलासना त्रिलोकधात्री सावित्री गायत्री त्रिदशेश्वरी सुरूपा बहुरूपा च पंचाशच्छक्तयो रवेः काम
कामदः कांतश्च कांतिमान्कामगस्तथा कामचारश्च कामी च कामुकः कामवर्द्धनः वामो रामश्च रमणो रतिनाथो रतिप्रियः रात्रि
नाथो रमाकांतो रममाणो निशाचरः नंदको नंदनो नंदी ततो नंदयिता ततः पंचबाणो रतिसखः पुष्पधन्वा महाधनुः भ्रामणो
भ्रमणश्चैव भ्रममाणो भ्रमस्तथा भ्रांतो भ्रामकभृंगोच भ्रांतचारो भ्रमावहः मोहनो मोहको मोहो मोहवर्द्धन एव च मदनो मन्मथ
श्चैव मातंगो भृंगनायकः गायकश्चैव गीती च नर्तकः खेलकस्ततः उन्मत्तो मत्तकश्चैव विलासी लोभवर्द्धनः कामस्य मूर्तयः प्रो
क्ता अष्टकाराद्यर्णसंचये रतिः प्रीतिश्च नन्दनु कामिनी मोहिनी ततः कमला च विलासिन्यो ततः कल्पलता तथा श्यामा च विस्मि

वि॰ग॰
व॰र॰
२९

29

नाचैव विस्मिता तदनंतरं विशालाक्षी लेलिहाना ततश्चैव दिगंबरा वामा च कुब्जिका कांता नित्या कल्पा च भोगिनी कामदा चैव त
त्पश्चात्प्रोच्यते च सुलोचना सुलापिनी मर्द्दिनी च ततश्च कलहप्रिया वराही सुमुखी चैव नलिनी जटिनी तथा पालिनी
च शिवा सुगुप्ता ततश्चैव रमा भ्रमाः लोला च चंचला चैव दीर्घजिह्वा रतिप्रिया लोलाक्षी भगिनी चैव पाटला मदना तथा
माला च हसिनी चैव ततः स्याद्विश्वतोमुखी जगदानंदिनी चैव रमणी कांतिरेव च ततः स्याच्च कलंकघ्नी वृकोदर्यपि सा तथा
मेचघ्णामा तथा लोभवर्द्धना शक्तयस्तथा ततः कामात्स्मरेन्मूर्तीर्दाडिमीकुसुमोपमान् वामांकशक्तिसहितान् पुष्पबाणेक्षु
कार्मुकान् शक्तयः कुंकुमनिभाः सर्वाभरणभूषिताः नीलोत्पलकराध्येयास्त्रैलोक्याकर्षणक्षमा अथ त्रिपुरामातृका कामि
नी मोहिनी चैव मदना उन्मादिनी ततः द्राविणी खेचरी चैव चंडिका च कलावती क्लेदिनी शिवदूती च ततश्च सुभगा भगा वि
घेशी च महालक्ष्मी कौलिनी च सुरेश्वरी स्वराणां शक्तयः प्रोक्तास्ततश्च कुलमालिनी व्यापिनी च भगा चैव वामी पूर्णी तदनंतरं
वषट्कारी पिंगला च भगासर्पिणी ततः परं सुंदरी च ततो नीलपताका त्रिपुरा ततः सिद्धेश्वरी हिमोच्चा च रत्नमालिन्यतः परं मंग
ला भगमाला च निस्मा रौद्री ततः परं व्योमेश्वरी अंबिका चाप्यट्टहासा ततः परं आप्यायनी च वज्रेशी क्षोभिणी शांभवी ततः स्तंभि
नी चाप्यनामा च रक्ता शुक्लापराजिता संवर्तका च विमला अघोराघोररूपयायुता विद्यादिभैरवी च सर्वाकर्षिणिका तथा एताः पंच
दशाद्याख्याताः पंचशद्वर्णविग्रहा विघ्नेश्वरो विघ्नराजो विनायकशिवोत्तमौ विघ्नकृद्विघ्नहर्ता च विघ्नराट् गणनायकः एकदंतो द्वि
दंतश्च गजवक्त्रो निरंजनः कपर्द्दी दीर्घविक्रमश्च शंकुकर्णो वृषध्वजः गणनाथो गजेंद्रश्च सूर्यकर्णस्त्रिलोचनः लंबोदरमहानादौ चतु
र्मूर्तिः सदाशिवः आमोदो दुर्मुखश्चैव सुमुखश्च प्रमोदकः एकपादो द्विजिह्वश्च शूरो वीरश्च षण्मुखः वरदो वामदेवश्च वक्रतुंडो द्वि
रंडकः सेनानीर्ग्रामणीर्मत्तो विमत्तो मत्तवाहनः जटी मुंडी च खड्गी च वरेण्यो वृषकेतनः भक्तप्रियो मेघनादो गणपश्च गणेश्वरः प

२९

तेपंचाशदक्षराख्यातामूर्तयोगणपस्य तु श्रीर्ह्रीस्तुष्टिश्चशांतिश्चपुष्टिश्चैवसरस्वती रतिर्मेधाचकांतिश्चकामिनीमोहिनीजटा ती
व्राचज्वालिनीनंदासुरमाकामरूपिणी उग्राचजयिनीसत्याविघ्नेशीचस्वरूपिणी कामदाचततःप्रोक्तातथाचमदविह्वला विक
चतनोधूम्राभूतिर्भूमिःसतीरमा ततश्चमीनुषीचैवततश्चमकरध्वजा विकर्णाभ्रुकुटीलज्जादीर्घघोणाचैवधनुर्द्धरा ततश्चयामिनीरा
त्रिचंद्रिकाचशशिप्रभा लोलाचचंचलादीर्घीचतथाऋद्धिश्चदुर्भगा सुभगाचशिवादुर्गाकालिकालकजिह्विका विघ्नहारिणि
काचैवशक्तयःस्युर्गणेशितुः अथयोगिनीमातृका अमृताकर्षिणीशानीततश्चामोर्द्धकेशिनी ऋद्धिदाचतथाऋक्षपाल्का
कापालकृषिकातथा एकपादातथैस्थूर्ध्वाश्वाकाराचौषधात्मिका अंबिकाचान्तरात्माचस्वराणांशक्तयःक्रमात् कालरात्रि
श्चवेतालीतारागायत्रीतदनंतरं होराधारिणिकाचैवतथोड्डाणात्मिकातथा चामुण्डाचैवछायाचजयाजंकारिणीतथा ज्वालि
त्मिकाटंकहस्तातततङ्कारिणीतथा डामरीचैवढंकारीणंकारीतामसीततः स्थानदेवीचदाक्षायण्यथयथाद्रीचनंदिका पा
वंतीचैवफट्कारीवेपिनीभद्रकालिका महामायायशस्विनीघोररमालंबोष्ठिकातथा वरदाप्रकाशिनीखड्गातथाचैवसरस्वती ततोहे
मवतीचैवततःप्रोक्तात्क्षमावती अथपीठमातृका कामरूपंचकाशीकंनेपालंपौंड्रवर्द्धनं पुरस्थिरंकान्यकुब्जंपूर्णगिर्यर्बुदेत
तः आम्रातकेश्वरंचैवएकाम्रंतदनंतरं त्रिस्रोतःकामकोटंचकैलासंभृगुपट्टणं केदारंचंद्रनगरंश्रीपुरंओंकारकंततः जालेधरंमा
लवंचकुलांतदेविकोटकं गोकर्णमरुतेशंचअट्टहासंततःपरं विरजंराजगेहंचमहापथमतःपरं कोल्लामेलापुरंचैवकोलेश्व
रमतःपरं जयंतिकाचोज्जयनीचारित्रंक्षीरकंततः हस्तिनापुरमुड्डीशंप्रयागंतदनंतरं षष्ठीशमायानगरंजलेश्वरमतःपरं मल
यंचमहापीठंश्रीशैलंमेरुपीठकं ततोगिरिवरंचैवमहेंद्रवामनंततः हिरण्यकंमहालक्ष्मीपुरमुड्याणमेवच छायाछत्रमहापी
ठंपंचाशद्गणाःस्मृताः अथकामाकर्षिण्यादिमातृका कामाकर्षिणिकाचैवबुद्ध्याकर्षिणिकातथा अहंकाराकर्षिणीचशब्दा

वि॰ र॰
व॰ र॰
३१

30

कर्षिणिकाततः स्पर्शाकर्षिणिकाचैवरूपाकर्षिणिकातथा आत्माकर्षिणिकाचैवाऽमृताकर्षिणिकातथा शरीराक
र्षिणीचैवषोडशस्वरगाक्रमात् सर्वसंक्षोभिणीशक्तिः सर्वविद्राविणीततः सर्वाकर्षिणिकाचैवसर्वाह्लादिनिकाततः सर्व
सम्मोहिनीसर्वस्तम्भिनीसर्वजृम्भिनी ततःसर्ववशंकारीसर्वरंजिनिकातथा सर्वोन्मादनकारीचततःसर्वार्थसाधिनी सर्वसंप
त्तिपूराचसर्वमंत्रमयीतथा सर्वद्वंद्वक्षयंकारीसर्वसिद्धिप्रदाततः सर्वसंपत्प्रदाचैवसर्वप्रियकरीततः सर्वमंगलकारीचसर्व
कामप्रदाततः सर्वदुःखविमोचिन्यासंप्रोक्तातदनंतरं सर्वमृत्युप्रशमनीसर्वविघ्ननिवारिणी सर्वांगसुंदरीचैवसर्वसौभा
ग्यदस्तथा सर्वज्ञासर्वशक्तिश्चसर्वैश्वर्यफलप्रदा सर्वज्ञानमयीचैवसर्वव्याधिविनाशिनी सर्वाधारस्वरूपाचसर्वपापह
रातथा सर्वानंदमयीचैवसर्वरक्षास्वरूपिणी ततःसंप्रोच्यतेचैवसर्वेप्सितफलप्रदा अथत्रिशक्तिमातृकाप्रस्तारनामद्वये
प्रपंचरूपाश्रीह्रींपरूपामायाह्विरूपिणी कमलागिरिरूपाचततोवैविष्णुवल्लभा ततःपत्तनरूपाचततोवैपद्मधारिणी पीठरू
पासमुद्रादितनयाक्षेत्ररूपिणी लोकमातावनरूपाततःकमलवासिनी ततश्चाश्रमरूपाचइंदिराचततःपरं गुहारूपाततो
माचनदीरूपारमाततः तथाचतटरूपाचपद्मोद्भिज्जस्वरूपिणी नारायणप्रियाचैवततःस्वेदजरूपिणी सिद्धलक्ष्मीस्तथाप्रोक्ता
ततश्चाण्डजरूपिणी जरायुजस्वरूपाचमहालक्ष्मीस्ततःपरं ततश्चलवरूपाथत्रुटिरूपाह्युमातथा कलारूपाचंडिकाचका
ष्ठारूपावराङ्गिका निमेषरूपाचशिवाश्वासरूपाततःपरं अपर्णाचघटिकारूपाह्यंबिकाचततःपरं मुहूर्तरूपाचसतीततःप्रहर
रूपिणी ईश्वरीदीनरूपाचशांभवीचततःपरं संध्यारूपातथेशानी रात्रिरूपाचपार्वती तिथिरूपामंगलाचवाररूपाततःपरं दाक्षा
यणीचनक्षत्ररूपाहैमवतीततः योगरूपामहामायाततःकरणरूपिणी महेश्वरीपक्षरूपामृडानीमासरूपिणी रुद्राणीशिशिरू
पाचशर्वाणीऋतुरूपिणी परमेश्वर्ययनरूपाकालीवत्सररूपिणी कात्यायनीयुगादिस्वरूपागौरीतथैवच ततःप्रलयरूपाचभ

३१

वानीतदनंतरं पंचभूतस्वरूपाचब्राह्मीचतदनंतरं तथाचपंचतन्मात्रारूपावागीश्वरीततः कर्मेंद्रियस्वरूपाचवारुणीचैवततःपरं ।
ज्ञानेंद्रियस्वरूपाचसावित्रीप्राणरूपिणी सरस्वतीचतत्पश्चाद्गुणत्रयस्वरूपिणी गायत्रीततःकरणरूपावाक्प्रदाचततःपरं अवस्थात्रयरूप
चशारदाचततःपरं सप्तधातुस्वरूपाचभारतीतदनंतरं दोषत्रयस्वरूपाचततोविद्यात्मिकातथा प्रपंचमातृकाख्याताःसर्वसिद्धिप्रदा
स्सता इतिप्रपंचमातृका अथकालीमातृका कालीकपालिनीकुल्लाकुरुकुल्लाविरोधिनी विप्रचित्तातथोग्रोग्रप्रभादीप्तातथैवच
नीलाघनावलाकाचमात्राःमुद्रामितातथा ब्राह्मीतथैवसंप्रोक्ताःषोडशस्वरशक्तयः नारायणीचमाहेश्वरीचामुंडाचततःपरं कौमा
रीचतथैवोक्तापंचमीचापराजिता वाराहीनारसिंहीचभैरवीतदनंतरं महाघोराभैरवीचप्रोक्तासासिंहभैरवी तथाधूम्राभैरवीचसं
प्रोक्ताभीमभैरवी उन्मत्तभैरवीचैववशीकरणभैरवी मोहनाघोरभैरवीचऐंद्र्याग्नेयीततःपरं याम्याचराक्षसीचैववारुणीवायवी
तथा कौवेरीचतथैशानीब्रह्माणीवैष्णवीतथा वज्रिणीशक्तिनीचैवदांडिनीखड्गिनीतथा पाशिन्यंकुशिनीचैवगादिनीशू
लिनीतथा मालिनीचक्रिणीचैवप्रोक्ताव्यंजनशक्तयः अथनानामातृकात्रिषष्ठलक्षणा कुलेशीकुलनंदाचवागीशीभैरवी
तथा उमाश्रीःशांतिकाचंडाधूम्राकालीकपालिनी धूम्राकालीद्रालिनी वाग्वादिनीचनकुलीभद्रकालीशशिप्रभा प्रत्यं
गिराभिद्धलक्ष्मीरमृतेशीचचंडिका खेचरीभूचरीसिद्धाकामाक्षाहिंगुलावशा जयाथविजयाचाथजिमानित्यापराजिता विला
सिनीतथाघोराचित्रामुग्धापनेश्वरी सोमेश्वरीमहाचंडाविद्याहंसीविनायका वेदगर्भातथाभीमाउग्रावैद्याचसत्कृतिः उग्रेश्व
रीचंद्रगर्भाज्योत्स्नासत्यायशोवती कुलिकाकामिनीकाम्याज्ञानवत्यथडाकिनी राकिनीलाकिनीचाथकाकिनीशाकिनीस
पि हाकिनीचचतुःषष्टिशक्तयःसिद्धिदायका इतिनानामातृका अथषोडशीमातृका कामेशीभगमालाचनित्यक्लिन्नाततःप
रं भेरुण्डावह्निवासिन्योवज्रेश्वरीतदनंतरं शिवादूतीत्वरिताचततःकुलसुंदरी नित्यानीलपताकाचविजयासर्वमंगला ज्वालामा

लिनि चित्रे च महात्रिपुरसुंदरी षोडशीमातृकायाश्च संप्रोक्ताः स्वरशक्तयः ग्रसिनी प्रियवादिन्यो करालीचकपालिनी शिवाघोषा
चदंष्ट्राचवीरेश्माचाकप्रदातथा दीपनीचजयंतिन्यापावनीलेविनीतथा संहारिणीकपालीचएतनामोदिकातथा परशक्तिस्त
थावाचरुद्राशक्तिस्ततःपरं महाकालीचसंप्रोक्ताव्यंजनानांचशक्तयः इतिषोडशीमातृका प्रथ्रभुवनेशीतमातृका जयाच
विजयाचैवअजिताचापराजिता नित्याविलासिनीदोग्ध्रीअघोरामंगलातथा डाकिनीराकिनीचैवलाकिनीकाकिनीतथा शा
किनीहाकिनीचैवयाकिनीस्वरशक्तयः मंगलाचमहाकालीकुण्डलीकुलसुंदरी कपालीकमलावामाचामुंडामेरुवासिनी भुव
नेशीसरस्वत्योकपिलाकुलमालिनी विनायकाजयानंदामहालक्ष्मीचभैरवी ब्रह्माणीचतथाज्वालावलीलिंगप्रभातथा मुंडि
नीचमहावेगाउग्रवावैसवीशिवा महामायात्वचक्रांगीएकपादामहेश्वरी कौबेरीमण्डलीचैववाराहीचजलेश्वरी कामाक्षाकाम
मध्यस्थाव्यंजनानांतुशक्तयः इतिभुवनेशीमातृका प्रथभैरवीमातृका त्रिपुराविपुरेशीचतथात्रिपुरसुंदरी त्रिपुरावासि
नीचत्रिपुराश्रीस्ततःपरं त्रिपुरामालिनीचैवत्रिपुरासिद्धाततःपरं त्रिपुरांबाततश्चैवमहात्रिपुरभैरवी ब्राह्मीमाहेश्वरीचैवकौमा
रीवैस्नवीतथा वाराहीचतथेंद्राणीचामुण्डामहाशक्तयः विशालाचविशालाक्षीनिर्मलामलवर्जिताः कालीचकालकल्पाच
कालरात्रिर्निशाचरी मुक्तकेशीमुक्तकेशीधीराचैवमहाभयाः जयदामानिनीमायाप्रचण्डाविंडमालिनी विरूपाचविरूपाक्षीरव
क्तांगीविश्वरूपिणी रौद्रीमायाचप्रेतास्त्रीफेत्कारीभयनादिनी धूम्राक्षीयोगिनीघोराविश्वरूपाभयंकरी भैरवीभीषणायाचचंल
वोघ्रीचमहाबलाः व्यंजनानांविशेषेणसंप्रोक्ताःशक्तयःक्रमात् इतिभैरवीमातृका लक्ष्मीलज्जाशिवामायावाणीब्राह्मीचवै
स्नवी रौद्रेश्वरीजयापद्मावालिनीडाकिनीतथा करालीविकलाचघोराचस्वरशक्तयः वालीचखड्गिनीचण्डाभैरवीपिंगला
तथा इंद्राणीचैवफट्कारीहारिणीयोगिनीतथा प्रकाशनीवज्रिणीचसितापीतारमातथा दिगंबरीमहाघोरामुक्तकेशीविदाम्रया

चामुण्डा छिन्नमस्ता च भीमा हुङ्कारिणी सिता पद्मानना पद्मगर्भा पुष्पिणी चाट्टहासिनी विजया मङ्गला कीर्तिर्मालिनी तारि
णी तथा महोदरी मुण्डमाला च नागयज्ञोपवीतिनी भञ्जनानां च संप्रोक्ताः सिद्धयः सर्वकामदाः इति छिन्नमस्तामातृकाः अथ धू
मावतीमातृकाः धूमावती धूम्रनेत्रा च धूम्रमेदी मर्कटी तथा घोररूपा चलेवोष्ठी श्यामा श्यामसमुखी शिवा काकध्वजा कोटराक्षी धूम्रा धूमाध
कारिणी मुक्तकेशी महाघोरा तथा लम्बपयोधरा स्वरगणाः शक्तयः प्रोक्ताः सर्वसिद्धिप्रदायका कोटरा कोटराक्षी च ऊर्ध्वकेशी दिग
म्बरी तमिस्रा तामसी चोग्रा विवर्णा मलिनाम्बरा लम्बस्तनी च विरलद्विजा दीर्घा कृशोदरी विधवा सूर्पहस्ता च रूक्षा रूक्षशिरोधरा
चलहस्ता चञ्चलाक्षी जटिला कुटिलेक्षणा क्षुधातृषापिपासार्ता नित्यं रौद्रा भयानका उत्कारी क्रोधिनी मृत्युः क्रिया रिपुमर्दिनी
सत्वरा काकजङ्घा च श्मशानालयवासिनी महाकाली च गदिता सिद्धा भञ्जनशक्तयः इति धूमावतीमातृका अथ बगलामातृका ब
गला स्तम्भिनी चैव जृम्भिनी मोहिनी तथा वश्या चलाचला चैव दुर्धरा कल्मषा तथा धीरा च कल्पना कालकर्षिणी भ्रामका
तथा ततश्च मन्दगमना भोगिनी योगिनी तथा एतास्तु सिद्धिदायिन्यः षोडश स्वरमूर्तयः भगा वा भगमाला च भगवाहा भगो
दरी भगिनी भगजिह्वा च भगस्था भगसर्पिणी भगलीला भगाक्षी च शिवा भगनिपातिनी जया च विजया धात्री अपराजिता चापराजि
ता जृम्भिनी स्तम्भिनी चैव मोहिनी चाकर्षिणी सुमा रम्भिनी जृम्भिणी चैव कालिनी वशिनी तथा रम्भा माहेश्वरी चैव मङ्गला रूपिणी
तथा पीता पीताम्बरा भव्या सुरूपा वक्रभाषिणी एतास्तु शक्तयः प्रोक्ता भञ्जनानां तु सिद्धिदाः इति बगलामातृका अथ मातङ्गीमा
तृका वामा ज्येष्ठा च रौद्री च शान्तिः श्रद्धा तथैव च वागीश्वरी क्रिया लक्ष्मीः सृष्टिश्चैव तु मोहिनी प्रथमा भाविनी विद्युल्लता विच्छ
क्तिरेव च ततश्च सुन्दरानन्दा नागबुद्धिस्तथैव च एताः संसिद्धिदायिन्यः षोडश स्वरशक्तयः सरस्वती रतिः प्रीतिः कीर्तिः कान्तिस्तथैव च
पुष्टिस्तुष्टिरमा चैव मन्मथा मकरध्वजा मदना पुष्पचापा च द्राविणी शोषिणी तथा बन्धिनी मोहिनी वश्या ततश्चाकर्षिणी तथा ह

वि.त्री.
व.ल.
३२

लेखागगनारक्ता महोच्छुष्मा करालिका अनंगकुसुमा तंगमेखला च ततः परं अनंगमदना चैव अनंगमदनातुरा अनंगमदनानं
गवेगानंगादिक्रमभवा अनंगभुवनपाला चानंगादिशक्तिरेखिका मनोभवा च मातंगी कामा मांजनशक्तयः इति मातंगीमातृका
अथ लक्ष्मीमातृका प्रकृतिर्विकृतिर्विद्या सर्वभूतादिभावना श्रद्धा विभूतिः सुरभिर्वीकाद्या प्रणवात्मिका पद्मालया शचीप
द्मा शुद्धिः स्वाहा स्वधा तथा धन्या चैव वचसं प्रोक्ताः षोडश सर्वशक्तयः हिरण्या च तथा लक्ष्मीर्नित्यपुष्टा विभावरी अदितिश्चदिति
श्चैव दीप्ता च वसुधा तथा वरुणा धर्मनिलया पद्माक्षी भूतधारिणी पद्मप्रभा वेदमाता पद्महस्ता ततः परं पद्मोद्भवा पद्ममुखी पद्म
सुंदरिका तथा पद्मनाभप्रिया पद्मगोपिनी पद्मिनी रमा पद्ममालाधरा पद्मा सुप्रसन्ना प्रिया तथा कांतिप्रभा च कमला अनघा हरि
वल्लभा अमोघा अमृता दिव्याः शोकाद्यंजनशक्तयः इति लक्ष्मीमातृका अथ कामेश्वरीमातृका कामेश्वरी महामाया वागीशी ब्र
ह्मसंज्ञिता अक्षरा च त्रिमात्रा च त्रिपदा त्रिगुणात्मिका सुरसिद्धगणाध्यक्षा गणमात्रा गणेश्वरी चण्डिका चण्डमुण्डा च चामुंडी
दंष्ट्रिणी प्रदा स्वराणां शक्तयः प्रोक्ताः सर्वसिद्धिप्रदायकाः विश्वंभरा विश्वयोनिर्विश्वमाता वसुप्रदा स्वाहा स्वधा तपेष्ठा ऋषीणा
यज्ञी गोगणखगा वेदमाता वरिष्ठा च सुप्रभा सिद्धवाहिनी आदित्यहृदया चंद्रा चंद्रभा वानुमंडला ज्योत्स्ना हिरण्मयी भव्या भव
दुःखभयापहा शिवतत्त्वा शिवा शांता शांतिदा शांतरूपिणी सौभाग्यदा शुभा गौरी उमा हैमवती प्रिया दक्षा च व्यंजनानां तु गादि
ताः शक्तयः क्रमात् इति कामेश्वरीमातृका अथ भगमालिनीमातृका भगमाली भगा भाग्या भगिनी च भगोदरी गुह्या दाक्षा
यणी कमा दक्षयज्ञविनाशिनी जया च विजया चैव अजिता चापराजिता रुद्री माले लिहाना च करालाः स्वरशक्तयः आकाश
निलया ब्राह्मी बाला च ब्रह्मचारिणी ब्रह्मास्या सुरता प्रज्ञा सावित्री ब्रह्मपूजिता प्रज्ञा माता परा बुद्धिर्विश्वमाता च शाश्वती मे
धीका सायनी दुर्गा दुर्गसंतारिणी परा मूलप्रकृतिरीशाना पुंप्रदा नेश्वरेश्वरी आप्यायनी पावनी च पवित्रा मंगलायना ज्योतिष्म

३२

तीसंहारिणी सृष्टिस्थितिसंतकारिणी अघोराघोररूपा च व्यंजनानां च शक्तयः इति भगमालामातृका अथ नित्यक्लिन्नामातृका ।
नित्यक्लिन्ना नित्यमदद्रवा मा विश्वरूपिणी योगेश्वरी योगगम्या योगमातानवस्थिरा धन्या धनेश्वरी धन्या रत्नदा पशुवाहिनी कू
ष्माण्डी दारुणी चंडी स्ववर्णा शक्तयः क्रमात् घोराघोरचरूपा च मातृकामाधवीदृशा एकानन्ता विश्वमूर्तिर्विश्वा विश्वेश्वरी प्रभवा
शर्वाद्यमादिभूतात्मा भूतादा भूतिवर्द्धिनी भूतेश्वरप्रिया भूतिर्भूतमाला च यौवनी वैदेही पूजिता सीता मायावी भववाहिनी सत्व
स्था सत्वनिलया सत्वासत्वचिकीर्षणा विश्वस्था विश्वनिलया श्रीफला श्रीनिकेतना श्रीः शशांकवदनेदा व्यंजनानां च शक्तयः इति
नित्यक्लिन्नामातृका अथ भेरुण्डामातृका भेरुण्डा भैरवी सा ह्रीं नन्ता ध्यानेन तसंभवा त्रिगुणी चोषिणी चोषा लक्ष्मी पद्मा पद्ममालया
धर्मा दया धर्मबुद्धिर्धर्मा धर्मपुटद्वया ज्येष्ठा यमस्य भगिनी चैला कौशेयवासिनी भ्रमणा भ्रामिणी भ्राम्या भ्रमा त्राता नापहारिणी मा
हेन्द्री वारुणी सौम्या कौवेरी हंसवाहिनी वायवी नैरृती प्राणी लोकपालैकरक्षिणी मोहिनी मोहजननी स्मृतिहृन्तान्तवाधिनी
यक्षाणां जननी यक्षी सिद्धिर्वैश्रवणालया मेधा श्रद्धा धृतिः शक्ता सर्वदेवनमस्कृता आशा वाञ्छा तितिक्षा इच्छा तथा भूतानुवर्तिनी शा
क्तयः कथिता ह्येकपंचाशद्वर्णगाः क्रमात् इति भेरुण्डामातृका अथ वह्निवासिनीमातृका वह्निवासिनिका वह्निनिलया
वह्निरूपिणी यज्ञविद्या महाविद्या ब्रह्मविद्या गुहालया भूतेश्वरी ब्रह्मदात्री विमला कनकप्रभा विरूपाक्षा विशालाक्षी हिर
ण्याक्षी शतानना अक्षावका मला विद्या सिद्धविद्याधराधिपा देवमाता दितिः पुण्या दनुः कद्रुः सुवर्णिका अपां निधिर्महावेगा
महोर्मिर्वरुणालया इष्टा तुष्टिकरी छाया समगा रुचिरा परा ऋग्यजुःसामनिलया वेदोत्पत्तिः स्तुतिप्रिया प्रद्युम्नदयितासा
ह्वी सुरभिः सौभाग्यसिद्धिदा सर्वकामप्रदा भद्रा सुभद्रा सर्वमंगला यामिनी यमिनी माह्वी मधुकैटभवर्द्धिनी वाणप्रहारिणी वा
णेशा काव्यंजनशक्तयः इति वह्निविलासिनीमातृका अथ वज्रेश्वरीमातृका महावज्रेश्वरी नित्या विविध्या चारुहासिनी उषा

वि.ग.
व.र.
३२
33

निरुद्धपत्नी च रेवती रैवतात्मजा हलायुधप्रिया माया योगा कुला गोकुलालया कृष्णानुजा कृष्णरजानंदसंदोहहिता सुता कंसविद्रा
विणी कुहा सिद्धचारणसेविता गोष्ठी रोगा च घृतवती भद्रा गोपजनप्रिया शाकंभरी सिद्धविद्या हृद्या सिद्धिकरी क्रिया दावाग्नि
विश्वरूपा च विश्वेशी दितिसंभवा प्राधा स्कंनिलया हार्दशालावगाहिनी सूक्ष्मा सूक्ष्मतरा स्थूला सप्रपंचानिमया निष्प्रपंचा
क्रियातीता क्रियारूपा फलप्रदा प्राणाख्या मंत्रमाता च सोमसूर्यामृतप्रदा छन्दःख्याता च विरूपा परमानंददायिनी निरानं
दा स्मृताश्चैकपंचाशच्छक्तयः क्रमात् इति वज्रेश्वरीमातृका अथ शिवाहूतीमातृका शिवाहूती सुनंदा चानंदिनी विषयाग्निनी
पाताल खण्डमध्यस्था ह्यलेखा वनखेचरी कलासप्रदर्शी शुद्धा पूर्णाचंद्रनिभानना आत्मज्योतिस्त्वयंज्योतिरग्निज्योतिरनाहता
प्राणशक्तिः क्रियाशक्तिरिच्छाशक्तिः सुखावहा ज्ञानशक्तिः सदानंदा वेदिनी महिमा प्रभो ऋग्यजुर्यज्ञायज्ञसाम्नी सामस्वरविनो
दिनी गीतिः सामस्तुतिः स्तोतकृत्कृतिः सामवेदिनी अथर्वणी शिक्षा लक्षणा निग्रहानुग्रहात्मिका पुराणी शिल्पिजननी इतिहासावबोधिनी
वेदिका यज्ञजननी महावेदिः सदक्षिणा आन्वीक्षकी त्रयी वार्ता गौरवत्वाग दिताः क्रमात् शक्तयश्चैकपंचाशत्सर्वकामप्रदायका इति
शिवहूतीमातृका अथ त्वरितामातृका त्वरिता तोतला धात्री किराती कृषिवाणिज्ये सर्वेश्वरी ध्रुवा सर्वा सर्वज्ञानसमुद्भवा त्रिमात्री
त्रिपुरा सर्वीकारमेयात ततः परं ब्रह्माणी शांतिकरका संप्रोक्ताः स्वरशक्तयः कौमारी विश्वजननी शूलहस्ता महेश्वरी किंकरीशक्ति
हस्ता च दक्षयज्ञविनाशिनी वरायुधा शंखचक्रा वैष्णवी व्यक्तिरूपिणी वराहमूर्तिर्वाराही इन्द्रसिंहासिंहविक्रमा सहस्राक्षा सुराध्या
च सर्वपापापहा शिवा शिवहूती घोरस्वा चात्रुविपाशासिधारिणी विकराली महाकाली कापाली पापहारिणी महालक्ष्मी महाकु
लिर्यागिनी नीवृंदवंदिनी षट्चक्री चक्रनिलया चक्रगा योनिरूपिणी गदिताः शक्तयस्त्वेताः व्यंजनानां च शक्तयः इति त्वरितामा ३२
तृका अथ कुलसुंदरीमातृका वामा माभैरवी शांता त्रिपुरा त्रिपुरेश्वरी अहिंसा तिमिरघ्नी च भास्वरा सूर्यमंडला वरायुधाव

गोरोहा वरेण्या विश्ववल्लभा प्रकृतिर्निरंतरा वेद्या सिद्धिः सर्वार्थसाधिनी पंचपंचात्मिका गुह्या गोनिवासा च गोधना सांख्ययोगो
द्भवा शान्तिर्मात्रा काष्ठा कलात्मिका पीयूषा वाजिजिका च रसाधारा शरंमदा विद्युल्लता त्रिशिरा सिंहाली एकपिंगा किरातसदा कपा
ली वेद्या वेताली भूतसेचननमस्कृता स्पृष्टास्पृष्टपदाभावा विभावा देशभाषिणी सर्वारंभा निरारंभा आरंभाभाववर्हिनी भारती भास्व
रा चैव प्रोक्ता व्यंजनशक्तयः इति बालसुंदरीमातृका अथ नित्यामातृका नित्या च भैरवी सत्त्वा प्रचण्डा सन्नतिप्रदा प्रिया प्लुता च
मुक्ता च रक्तांगी रक्तलोचना खट्वांगधारिणी शंखांका कालाकालवर्हिणी हिमज्ञाननयना वृत्ता संप्रोक्ताः स्वरशक्तयः भूतनाथा
भूतभाव्या तु वृत्तजनसंमदा गुणोपात्तवपुर्गोधा पुण्यपापविवेकिनी दिग्वासा क्षौमवसना एकवस्त्रा जटाधरा कपालमालिनी
घंटाधरा चैव धनुर्द्धरा टंकहस्ता चला ब्राह्मी हाकिनी शाकिनी रमा ब्रह्मांडपालितसुरवा विश्वमाया चतुर्भुजा अष्टादशभुजा भीमा
विचित्रा चित्ररूपिणी पद्मासना पद्मवहा स्फुरत्कांतिप्रभावहा मौतिनी मौलिनी मास्या मानदा मानवर्द्धिनी जगत्प्रिया विश्व
गर्भा मंगला मंगलप्रिया भूतिर्भूतिकरी भाग्या भोगींद्रशायना मिता तमवासीकरी क्षुत्या आर्य्या वेशा विवर्द्धनी अघौघशोषणी
आवीकृता नाना शक्तयस्त्विमाः एकपंचाशदर्णानां सर्वसिद्धिप्रदायकाः इति नित्या नित्यामातृका अथ नीलपताकामातृका अ
थ नीलपताका च नीला माया जगत्प्रिया सहस्रवक्त्रा पद्माक्षी पद्मिनाक्षी रत्नोत्तमा दिव्यकुमा दिव्यभोगा दिव्यमालानुलेपिनी सु
ज्ञाछुवसना सौम्या सर्वहेतुकृत् सोमार्चिता स्वराणां शक्तयस्त्वेताः साधकाभीष्टदायकाः सर्वैश्वर्यगुणोपेता प्रणवाद्या अग्रसंभवा
व्यंजना व्यंजकी व्यक्ता सर्ववर्णानुवर्तिनी जगन्माता भयकरी भूतधात्री खड्गलेभा कामधानी दण्डकी दंष्ट्रा खड्गमुद्गरपाणिनी शास्त्रा
स्वदर्शिनी बीजा विबीजा बीजिनी परा वाचस्पतिःप्रिया दीक्षा परीक्षा शिवसंभवा राजसी तामसी सत्त्वा सत्त्वाद्रिका विमोहिनी अतीता
नागतत्त्वा नावर्तमाना पदेशिनी आत्मोपदेशिनी संवित्सत्त्वगा धाधरा धरा प्रकृतिर्विकृतिर्गंगा धूर्जटि विकृतानना योगिप्रिया योगरा

वि॰
गी॰ व॰
र॰
३४
34

ध्यायोगिध्येयापरापरा वैखरीत्रिपदी हंस्त्रिरूपाकादिशक्तयः इतिनीलपताकामातृका अथविजयामातृका विजयाजयदा
जैत्री अजितावामलोचना प्रतिष्ठारक्षिता माता जिनामायाकुलोद्भवा कृष्णाग्रीवायवीजामाताम खण्डा त्रिलोचना स्वराणां शक्तयस्त्वे
ताः कामाकामेश्वरी रमा कामाकामप्रियाकामाकामचारविहारिणी तद्रूपा निरालम्बा निरुजा रुजनाशिनी विशल्यकरणी श्रेष्ठा
मृतसंजीवनीपरा संधिनीचक्रनमिताचंडेश्वरा सुवर्णिका रत्नमाला त्रिलोकस्था शरण्या कयवर्चाकिता तारारीतातारयंती भूरीभूति
प्रभास्वरा देवज्ञा भूतिमुद्रा च मंत्रकारस्वरूपिणी ज्योतिर्ज्ञाना ग्रहगतिः सर्वप्राणिभृतावरा कादीनां शक्तयः प्रोक्ताः साधकाभीष्टसिद्धि
दा इतिविजयामातृका अथसर्वमंगलामातृका सर्वमंगलिका भव्या मंगला मंगलप्रभा कांतिः श्रीप्रीतिरचला ज्योत्स्ना चैव विला
सिनी वरदा वागीशा व्याघ्राचारवीवास्तुदेवता अनंतशक्तिः संप्रोक्ताः स्वराणां शक्तयः क्रमात् कामिका शक्तिरतुला सर्वज्ञा ज्ञानदा
यिनी युक्तिः सुयुक्तिरान्वीक्षी ऋतिर्वोधा महालसा ब्रह्मविद्या प्रभावेण महायैश्वा प्रवाहिनी ध्यानाध्येया ध्यानगम्या योगिनी योगसिद्धिदा
अतरान्तरसंताना ब्रह्मविद्या शिवप्रदा पंचब्रह्मात्मिका रुद्राविद्यावेद्यस्वरूपिणी पंचतत्वात्मिका विद्या त्रिपुरा बीजतत्वगा सर्ववीजा
त्मिका सिद्धिर्ज्ञानोपायिगामिनी कल्पांतदहनज्वालासहतिर्व्यालभूषणा कादीनां शक्तयस्त्वेता साधकाभीष्टदायका इतिसर्वमं
गलामातृका अथज्वालामालिनीमातृका ज्वालिनी च महाज्वाला ज्वालामाला महोज्वला द्विभुजा सौम्यवदना ज्ञानपुस्तकधारि
णी कपर्दिनी कृताभ्यासा ब्रह्माणी ब्रह्मवेदिनी आत्मज्ञानामृतानंदानंदिनी रोमहर्षिणी स्वराणां शक्तयस्त्वेताः कांतिः कालीद्युति
मंति विषच्छा विश्वगर्भा आधारी सर्वभावनी कात्यनी कालयाता च कुटिला चानिमेषिका नाडी मुहूर्ता होमा विश्रुद्धा कालविभेदिनी सो
मसूर्याग्निमध्यस्था मायातीता सुनिर्मला केशवा निष्कला शुद्धा व्यापिनी व्योमविग्रहा स्वच्छंदभैरवी व्योमा व्योमातीता परे स्थिता
स्तुतिः स्तव्या उतिः प्रज्ञा प्रजा हा प्रजकप्रिया कादीनां व्यंजनानां च संप्रोक्ताः शक्तयस्त्विमाः इतिज्वालामालिनीमातृका अथविचित्रामा ३४

त्रिका विचित्रा चित्रवसना विचित्रिणी चित्रभूषणा अनुलोमापसंधिश्च मध्यमानामिकात्मिकाः तेजोवती पद्मगर्भा मदेश्वरी च तृणाव
लिः विदुषी मौलिनी अक्षा सुकेशी स्वरशक्तयः सोमपा सोमसंकाशा वेताली तालसंज्ञिका सोमप्रिया सोमवती मंत्ररूपा नायजिक्रिया
स्तणाली अनुक्रदा स्तुक्ति विंध्याद्रिशिखरस्थिता गद्दिनी चक्रिणी विंवाद्यक्षा चारुहासिनी वाग्भवा चारुजा रक्तास्यप्रसादा रक्तलोच
ना कौशिकी कंधरा घोणा कर्कशी कामलोचना कामोत्सवा कामचारा अकामा पूजिता परा तत्वावलोका मुक्तजिह्वा स्त्री सात्का दिशा
क्तयः इति विचित्रामातृका अथ दुर्गामातृका दुर्गा च कौशिकी चोग्रचण्डा माहेश्वरी शिवा विश्वबीजा गहा स्थितिसंहारकारि
णी योगनिद्रा भगवती देवी स्वाहा स्वधा तथा स्वस्तिरा इति देवी कोः स्वराणां शक्तयः क्रमात् कालामाया रमा ज्येष्ठा लक्ष्मी पुष्टिः स्थि
तिर्गति रतिः प्रीतिः धृतिः नीतिः विभूतिः भूतिः इत्यत्तिः क्षितिः शांतिः स्तुतिः कांतिः शांतिः क्रांतिर्महाद्युतिः क्षुत्पिपासा स्पृहा लज्जा निद्रा श्र
द्धा विद्यात्मिका गिरिजा भारती लक्ष्मीः शची संज्ञा विभावरी कादीनां शक्तयः प्रोक्ताः सर्वसिद्धिप्रदायकाः इति दुर्गामातृका अथ
सरस्वतीमातृका सरस्वती मंत्रशक्तिर्वेदमाता जगन्मयी मानसी हंसगा हंसी सरागा हेमकारिणी अजया निजया प्रीतिर्लोमसा
लोमहारिणी विज्ञानदेहा संभूता स्वराणां शक्तयः क्रमात् कामदा कामिनी कांता परमेष्ठीनि भोत्तमा अप्यानुवंभा श्रेयस्का दया
सानुकंपिनी चतुःस्तना पंचयज्ञा सुरर्षिः सुरपूजिता विश्वासजीविनी विद्या कामधेनुः स्वकामदा अविद्या उद्दिता कांता कपिला
मलवर्जिता सुशीला जीववत्सा च शीलवत्सा सुवत्सला नंदिनी जयदा जेया दुर्जया दुःखहारिणी स्वस्तिदा स्वस्तिकृत् स्वस्ति स्वरू
पा स्वस्तिदक्षिणा शक्तयः सुप्रवर्णाश्च व्यंजनानां शुभप्रदाः इति सरस्वतीमातृका अथ वाराही मातृका वाराही भद्रिणी भद्रा वा
ताली कीलवक्त्रका जंभनी स्तंभिनी विश्वा जंभिनी मोहिनी शुभा हंसिनी वापिनी शक्तिरमा माया स्वरशक्तयः खड्गिनी शूलिनी घो
रा शंखिनी गदिनी तथा चक्रिणी वज्रिणी चैव पाशिनी अंकुशिनी शिवा चापिनी भवबंधघ्नी जयदा जयदायिनी महाघोरा महाभीमा

वि॰ भैरवीचाट्टहासिनी पद्मिनीवाराहिनीचोग्रामुसलिन्यपराजिता जयप्रदाजयामैत्री त्रिपुराभयवर्ज्जि अभयामानिनीयोगीकि
र्त्री॰व॰ टिनीदंष्ट्रिणीरमा अन्त्याकादिवर्णानां शक्तयः सिद्धिदायका इतिवाराहीमातृका अथत्रिमूर्त्तिमातृका केशवोनारायणो
ट॰ माधवगोविंदविष्णवः मधुसूदनसंज्ञोन्यः स्यात्त्रिविक्रमवामनौ श्रीधरश्चहृषीकेशः पद्मनाभस्तथैवच दामोदरोवासुदेवः संक
३५ र्षणइतिस्मृतः प्रद्युम्नश्चानिरुद्धश्च स्वराणांमूर्तयःक्रमात् ततस्यात्तरशक्तिश्च आघाचैवह्रदापुनः ईशानोयोर्ध्वनयनाऋद्धिः
स्याद्रूपिणीतथा लुप्ताचलोनदोषाचततश्चैवकलापिका कारिणीपावतीचैवकन्यास्यादंजनप्रभा अक्षिरमायरीचैवस्वरा
35 णांशक्तयःक्रमात् भवःशर्वश्चरुद्रश्चततःपशुपतिस्तथा उग्रश्चैवमहादेवोभीमएषानएवच ततस्तत्पुरुषोघोरःसद्योजातस्त
तःपरं वामदेवस्तुविज्ञेयःकृष्णादीनांचमूर्तयः करभद्राश्चवगलागतिमादिफलप्रदा घोरपादांपकिनाम्ना ततश्चंद्रार्द्धधारिणी
छंदोमयीजगत्स्थानाकृतिर्ज्ञानप्रदातथा टंकच्छत्रधराचैवततश्चकृतिडामरी कभादीनांचवर्णानांप्रोक्ताद्वादशशक्तयः
ब्रह्मा‥ पतिर्वेधाःपरमेष्ठीपितामहः विधाताचविरिंचिश्चस्रष्टाचचतुराननः हिरण्योविज्ञेयोयादीनांदशमूर्तयः यन्त्रिणीवं
ज्रिनीलक्ष्मी‥ ‥ शशिधारिणी घटाधारालयासर्वनायिकाहसितानना ललिवक्त्रमाचैवयादीनांदशशक्तयः त्रिमूर्तिमातृ
काप्रोक्तासर्वसिद्धिप्रदामता इतित्रिमूर्तिमातृका अथकमलामातृका स्वराणामेव॰ श्रद्धाप्रीतीरतिश्चैवधृतिःकांतिर्मनोरमा
मनोहराततश्चैवप्रोक्तास्यान्मनोरथा मदनोन्मादिनीपश्चान्मोहिनीशंखिनीतथा शोषिणीचवशंकारीशिंजिनीसुभगाततः
कामसेनाःकलाःप्रोक्ताःस्वराणांषोडशोद्भवा इतिकामकलामातृका अथसोमकला एषांचेत्सासुमनसारतिःप्रीतिर्धृतिस्त
था ऋद्धिःसौम्यामरीचिश्चपरतत्त्वंअंशुमालिनी शशिनीवांगिराछायाततःसंपूर्णमंडला तुष्टामृताख्याःकथिताःकलाश्च
स्वराविधेः इतिसोमकलाः अथापराजितामातृका प्रत्यंगिरासिंहमुखीनथाज्वालामुखीपिवा वैष्णवीनारसिंहीचविमा

शांकरीपरा अर्द्धमात्रा भगवती शूलिनी शुंभमर्दिनी शार्ङ्गकधारिणी चैव भीषिका च कपालिनी स्वराणां शक्तयः प्रोक्ता अथ
तमूलकपालका उग्रा वीरा महाज्वाला डाकिनी विश्वरूपिणी सुमा च ज्वलिनी लक्ष्मी सुस्मिता सर्वतोमुखी वरेण्या नीलास
ख्या खातीता च ततः परे नृमुण्डमाला सिंही च हंसी भामा च खण्डिनी गान्धारिणी भयदा चैव द्राविणी मृत्युरूपिणी सुकारी सु
सुहारिणी सुव्रता च नतिप्रिया मालिनी प्राणरूपा च हंसिनी च शिखण्डिनी कुण्डिनी नादभिद्रूपा च कादीनां शक्तयः क्रमात् इति प्र
संगिरा मातृका अथ भवानीमातृका भवान्यनन्ता शर्वी च किरणी करुणाकरा एकमात्रा द्विमात्रा च त्रिमात्रा चापराजया अर्द्ध
मात्रा परा सूक्ष्मा षट्पदा च मनस्विनी निष्कला शक्तयः प्रोक्ताः स्वराणां च सुधर्मदा स्वच्छन्दानन्दसंदोहा ओमाकारानिरूपिता राद्य
पद्यात्मिका चैव सर्वालंकारसंयुता साधुवंशपदन्यासा सर्वोक्तिघटनावली षट्तर्ककर्कशाकारा सर्वतर्कविवर्जिता आदिस
वर्णा वर्णा च तामसीपररूपिणी ब्रह्माणी ब्रह्मसन्ताना वेदवाग्वादिनीश्वरी पुराणन्यायमीमांसाधर्मशास्त्रागमाश्रिता वेदावेद
वती सर्वाहंसविद्याधिदेवता विश्वेश्वरी जगद्धात्री विनिर्माणकारिणी वैदिका वेदरूपा च कालिका कालरूपिणी नारायणी महादे
वी सर्वसत्त्वप्रवर्तिका हिरण्यगर्भरूपा च कादीनां शक्तयः क्रमात् इति डोगामातृका अथ खेचरीमातृका खेचरीशक्तिरतुलाव्यो
मा वाव्योमरूपिणी व्योमस्था व्योमरूपा च व्योमातीता जगन्मयी शांभवी शंभुवनिता शावणार्तिप्रभेदिनी जगन्माता जगद्धात्री
परविद्या सुमंगला स्वराणां शक्तयस्त्वेता भवबन्धविमोचका परापरायणा भव्या मालिनी मदविह्वला विद्यासूत्ताप्रभासंध्याज
गन्माता जगत्क्रिया निशा च बीजया माया ऽमेध्या मोहविवर्द्धिनी मोदिनी रंजिनी वश्या वशमातृस्वरूपिणी वेदविद्या महाविद्या
यज्ञविद्या यमान्तकी सावित्री सुखदा भोग्या भोगिनी दृढिनी रमा विशालदा विशालाक्षी ह्लादिनी चानुमानगा कादीनां शक्त
यः प्रोक्ताः साधकेष्टफलप्रदा इति खेचरीमातृका अथ चामुण्डामातृका चामुण्डा चण्डिका चण्डा चण्डमुण्डविनाशिनी नारायणी

वि.
ए़ि.व.
र.
३६
36

भद्रकाली विजया विश्वमातृका अजिता भार्गवी सौम्या दुर्गा दुर्गार्तिनाशिनी आप्यायनी चंडघंटा मायोक्ताः स्वरशक्तयः कमला
खड्गिनी चैव वागादिनी चंडिकापरा चर्चिकाद्या त्रिगुणी जंघा संकारीज पद्मानतः टंकहस्ता वटंकारी डामरी ढक्किका शिवा नमोपहेत्री
स्थानेशी दयानूपाथनप्रदा नवामराच फट्कारी वंदिनी भयवर्जिता महामायाचयोगेशी शीरंकिणी लवकेशिनी वरदा शाकि
नी षण्डा सर्वेशी हालिनी तथा ललिता च तथा तामोदरी स्यात्कादिशक्तयः केवलां मातृकां न्यस्य चंडाभक्तो भवेयदि चामुण्डाशक्ति
सहितां मातृकां विन्यसेद्बुधः इति चामुण्डामातृका अथ परामातृका परापरायणासूक्ष्मा विद्यादात्रायणी जया विजयामा
नदा दत्ता योगिनी मानदा रतिः कौमारी पार्वती दुर्गा मानिनी स्वरशक्तयः कलावती च करुणा कामिनी कांतिदायिनी ख्याती ताखे
चरी गम्या गारुडी च नगार्जिनी चारुहासा च चपला जगद्धात्री जरा रमा विश्वाद्या विश्वमयी विशालाक्षी विशोकिनी वरदा वा
रुकी बाला परमेष्ठी नुतारुतिः भास्वरा भावगम्या ध्याभानुमंडलवर्तिनी फट्कारी लासिनी नारा हादिगी हव्यवाहिनी क्लादिनी
क्लेदिनी क्लिन्ना गादिताः कादिशक्तयः इति परामातृका अथ कुरुकुल्लामातृका कुरुकुल्ला कुरंगाक्षी विषहंत्री विषापहा विश्वे
श्वरी विशालाक्षी गारुडी गजगामिनी विनता विश्वजननी विश्वाख्या विश्वमातृका राजसी तामसी सत्वा रणत्कांची विभूषणा स्वा
णाशक्तयस्वेताधनधर्मसुखप्रदाः कल्याणी कमला कांता सौपर्णी तार्क्ष्यशाकिनी नागहंत्री नागमाता नागिनी नगजाप्रिया नलि
नीनंदिनी भव्या सदा पुष्पवती शिवा मदद्रवा मदवती मादिनी मन्मथालया मोहिनी सुरजप्रीता मुनिमानसवासिनी पोतस्था पुरजि
त्कांता पोतशक्तिः पुरप्रिया दिग्वरादितिः सौम्या दिनेशी दीनवत्सला दयावती दमप्रीता भावरुणी लोकधारिणी कादीनां शक्तयः श्रो
क्ता साधकेष्टफलप्रदा इति कुरुकुल्लामातृका अथ पंचदशीमातृका सुंदरी सुभगा भव्या महामाया मनोन्मनी त्रिपुरा वाशिनी चा
ला महात्रिपुरदेवता महाकामकला श्रेष्ठा नीला नीलसरस्वती विश्वेशी विजया सौम्या सप्रोक्ताः स्वरशक्तयः कालिनी कुलमध्यस्था कु

३६

लांतकनिवासिनी सर्वविघ्नेश्वरी चैव सर्वमंत्रेश्वरी तथा सर्ववागीश्वरी सिद्धा सर्वसिद्धेश्वरी जया सर्ववीरेश्वरी वीरा सर्वपीठेश्वरी शि
वा भैरवी भावनातीता भावगम्या महेश्वरी महाविद्या महाजैत्री महात्रिपुरसुंदरी कालीकात्यायनी दुर्गा वैसवी विश्ववल्लभा यो
गिनी योगमार्गस्था षट्चक्रपुरवासिनी विमला विश्वनिलया विश्वाख्या विश्वविग्रहा शशिनी शारदा चैव चंद्रमंडलमध्यगा कादी
नां शक्तयस्त्वेताः संप्रोक्ताः सिद्धिदायिकाः इति सुंदरीमातृका अथ मालिन्यादिनादिमातृका मालिनी नादिनी चैव ग्रसिनी
प्रियदर्शिनी निवृत्तिः सुप्रतिष्ठा च विद्या शांतिस्ततः परं चामुण्डा गुह्यशक्तिश्च वज्रिणी च करालिनी कपालिनी शिवा चैव ज्ञान
शक्तिः क्रिया तथा स्वराणां शक्तयस्त्वेता ज्ञानमोक्षफलप्रदाः गायत्री ब्राह्मी च सावित्री देहिनी मुण्डमालिनी फट्कारी च वषट्कारी
स्वधा स्वाहा हुंकृतिप्रिया वामा ज्येष्ठा च रौद्री च ब्रह्माणी ब्रह्मवादिनी जया वेदमयी दुर्गा जयंती रक्तदंतिका जगज्जैत्री च चैतन्य
मयी विश्वप्रबोधिनी क्षमा शांतिर्दया निद्रा रुद्रशक्तिः परायणाः ॐकारी खेचरी माया विश्वयोनिस्त्रयीमयी संसारभयह
त्री च संप्रोक्ताः कादिशक्तयः स्मृताख्या मातृकास्त्वेता ऊर्ध्वाम्नायादुदीरिताः इति मालिन्यादिमातृका अथ पंचभूतमातृ
का तत्र शारदायां वाय्वग्निभूजलाकाशाः पंचाशल्लिपयः क्रमात् पंच ह्रस्वाः पंच दीर्घा बिंद्वंतास्संधिसंभवाः पंचशः कादयः षत्त
लसंज्ञास्ताः समन्विता तत्र राजे प्राणाग्नीलांबरात्मानः पंक्तयः पंच कीर्तिता मायाशक्त्यभिधः सर्गः पंचभूतात्मकः प्रभुः तस्मात्त
स्याद्विन्यासो नैकदेशः शिवात्मनः वायोर्मरुत्स्वरः प्राणो वायुर्नादो रयो जवी व्याप्तस्पर्शश्वासनामानि वायोर्नामसृतां क्रमात् ॥ अग्निर्व
ह्निः शुचिस्तेजः प्रभादावोद्युतिः शिखी दाहोग्रामसृष्टनामानि वर्णानां तेजसामपि धरा क्ष्मा भूः स्थिरा ज्या कुंभी क्षमा भूमी रसा कुला ना
मान्येतानि वर्णानां भौमानां सुक्रमेणवैः जलं वारि वनं वाः कं पाथस्तोयं रसो बृहत् नामान्येतानि वर्णानामाप्यानां सुयथाक्रम विभुः
खं सुषिरं च व्योम सूक्ष्मं गगनं भो वियत् हंसश्च नामान्येतानि क्रमेण व्योमरूपिणां इति भूतमातृका अथ भूतलिपिमातृका तत्र सिद्ध

वि॰
र्णव॰
त॰
३२

37

सारस्वते अथ वक्ष्ये महामंत्रान् सारस्वतान् सकामदान् तेषामादौ भूतलिप्याख्यो मनुः संप्रोच्यते प्रिये सारस्वते महामंत्रो गोपितश्चाखिलै
र्लभः विलोमः सकाशाद्यं लब्ध्वा मुनयो वांछितं फलं लेभिरे सकलं देवि किं बहूक्तेन सर्वदा ऋ स्वरान्तां पंचमं वर्गाद्या आदितः परिकीर्तितः द्वि
तीयः कथितो देवि शिवाद्याश्च स्वरास्वराः खंवायुवह्न्यंबुधरात् तृतीयः संप्रकीर्तितः वर्गोत्ताद्यात्तृतीयात्यात्तृतीयेः क्रमादमी पंचवर्गा
ते ततश्चांतभृगुभिर्नवमो मतः नववर्णात्मको मंत्रो द्विचत्वारिंशदक्षरः वर्गाण्यमादिमो वर्गः श्रीकंठाद्यैः स्वरान्विताः वर्गास्ततो वातसं
युक्ताः क्रमेण कथिता अमी खंवायुवह्न्यंबुधरा वर्गा वर्णमता क्रमात् वर्गो द्वितीयो भूहीनो वायुभूवियतो तिमः नवानामपि वर्गा
णां देवताः कथिताः क्रमात् विरिंचिविष्णुरुद्राख्या आश्विनेयौ प्रजापतिः लोकपालाः सक्रियादि शक्तयः परिकीर्तिताः इति भूतलि
पिमातृकाः अथ त्रिषष्टिस्वरमातृका मातृकार्णवे त्रिषष्टिश्चचतुःषष्टिर्वा वर्णाः शंभुमते मता प्राकृते संस्कृते वापि स्वयं प्रोक्ताः स्वयंभु
वा स्वरा विंशतिरेकंच स्पर्शानां पंचविंशतिः यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः अनुस्वारो विसर्गश्च कःपौ वापि पराश्रयो
दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च इति त्रिषष्टिस्वरमातृका अथ शांभवीमातृका ऊर्द्धाम्नायदीक्षितैर्न्यासः कर्तव्यः शांभवीता
मसी माया महामाया पीवोत्तमा ऊर्द्धकेशी विरूपाक्षी खेचरी शिववल्लभा कृशोदरी चलोलाक्षी विस्तु माया महोदरी लंबोष्ठी व्योमरू
पा च वि सर्वशक्तयः कांतिः श्रद्धा रतिः प्रीतिश्चैव प्राणरूपिणी मृचि दीप्तिश्च भुवना द्युतिः श्रीः परमा रमा राजसी ग्रसिनी चण्डा रा
त्रसी च विशारदा वाग्वादिनी जया भीमा शिवा शंकरवल्लभा संध्या प्रज्ञा प्रभा ज्योत्स्ना विनदा विश्वरूपिणी अणिमा लाघवा पंच
वक्त्रा ग्रासिनी भगिनीमतिः व्यापिनी च स्मृताः कादिवर्णानां शक्तयः क्रमात् शांभवीमातृका प्रोक्ता सर्वाभीष्टफलप्रदा एतां विन्यस्य चा
दौ तु ततोऽपि क्रमं न्यसेत् इति शांभवीमातृका अथ कालरात्रिमातृका कालरात्रिर्महारात्रिः कटुका सुभगा शिवा मोहिनी मो
हरा त्रिश्च विद्या कटुकपत्रिका अथर्वणस्य डहितभंजिनी विश्वमोहिनी मोहना स्त्री मोहरूपा सौभाग्या मोहवर्द्धिनी स्वराणां शक्त

पञ्चैताः साधकाभीष्टहेतवः कामिनी कमनशीला द्राविणी क्षोभिणी परा मदनोन्मादिनी चैव मन्मथा च मनोन्मनी मनस्विनी म
नोवासिन्यरुणा मदनोत्सवा मादिनी मदसन्ताना मञ्जुवाणी मनोहरा मनोरमा प्रिया कान्ता मञ्जुघोषा मदप्रिया कामवर्द्धिनिका
चैव दारुणा रमना प्रिया दंडिनी विस्मनटिनी नलिनी विश्वमालिनी हावा भावा भावगम्या भावातीता विनोदिनी पंचबाणपरो
त्साहा कादीनां शक्तयः स्मृताः इति कालरात्रिमातृका श्रीविद्यामधिकृत्य मातृका ॥ इति श्रीविद्यार्णवे तृतीयाश्वासः ३ ॥ ॥
अथ कालीमते त्रैपुरे रश्मिक्रमः त्रिपुरामधिकृत्य मातृकावैभवं वक्ष्ये सर्वतन्त्रेषु गोपितं यं ज्ञात्वा संप्रदायेन साधको गतसंशयः
मन्त्रोद्धारं स्वयं कुर्यात् मातृकारश्मिबोधनात् प्रथमं मातृकारश्मिक्रमो ज्ञेयः सदा बुधैः रश्मिक्रममविज्ञाय मन्त्रोद्धारं करोति
यः ग्रंथकारे स्थितं वस्तु द्रष्टुमन्वेषयत्स्वयं तस्मात्सर्वप्रयत्नेन गुरुतः शास्त्रतोऽपि वा सम्यक् ज्ञात्वा विधानेन साधको गतसंश
यः मन्त्रस्वरूपं जानीयान्मन्त्रवीर्य्यस्य सिद्धये अनायासेन सिद्धिः स्यान्मन्त्रवीर्य्यप्रबोधनात् मन्त्रवीर्य्यमविज्ञाय यो मन्त्रं भजते नरः क
ल्पकोटिसहस्रेषु मन्त्रसिद्धिर्न जायते वर्णानां रश्मयो ज्ञेया यास्ता मत्स्वरूपा न संशयः तेषां ताः एतद्रूपाः सुषुम्णाधिकृतोऽपि वा गु
णसप्तसहस्राणि द्युम्णानि द्विगुणीकृता तेषां सा हि विद्या प्रोक्ता वाह्याभ्यन्तरयोगतः सूर्य्यचन्द्रविभेदेन क्रूरसौम्यप्रभेदतः पिंगले
डाविभेदेन येषां सा स्वरूपिणः मूलाधारे नाभिपद्मे स्वाधिष्ठाने ह्यनाहते विशुद्धे चाज्ञके वा मध्ये षट्चक्रेषु व्यवस्थिताः प्रतिच
क्रं त्रिसाहस्रं षट्शताधिकमेव च मूलाधारे स्थितेः स्थाने स्वाधिष्ठाने तु तेजसः मणिपूरमयाः स्थाने वायोः स्थानमनाहते विशुद्धे
नभसः स्थानमाज्ञाचक्रे तु मानसं मूलाधारमहापद्मं चतुर्दलसमन्वितं वादिसान्तचतुर्वर्णैर्दलमध्ये तु संयुतं एकैकस्य दलस्य
स्वरश्मीनां नवशतान्यपि पार्थिवा रश्मयस्तेषु चतुर्दश चतुर्दश प्रत्यन्तरं तु विज्ञेया वादिसान्ते यथाक्रमं मणिपूरे दशदले डादि
फान्तसमन्विते तत्राप्यरश्मयो ज्ञेया द्विपंचाशद्विभागशः स्वाधिष्ठाने रसदले बादिलान्तान्विते ह्याषष्टिरश्मयो ज्ञेया द्विस

वि॰
टी॰व
च॰
३८

प्रतिविभागशः आज्ञाचक्रे तु द्विदले हक्षाभ्यां संयुते परे मानसाख्यमयो ज्ञेया प्रस्वराः षडिय यथाक्रमं षडाधारेषु संभूय त्रिंशते षट्त्रि
शन्मयः एकैकस्य स्वर्णस्वरश्मयो ये समाश्रिताः तेषु रश्मिषु संप्रोक्ताः षट्त्रिंशत्पार्थिवादयः संकीर्णरश्मयश्चेति तेषां नामानि
चक्षुवे चतुर्दलात्मिकाधारषट्पंचाशद्दलेषु च पृथ्व्यादिपार्थिवान्तेया मयूखाः शुभदायकाः सुंदरी त्रिपुरायाश्च सुंदरस्त्रिपुरादिकः
ततो हृदयदेवी च देवो हृदयादिकः शिरोदेवी शिरोदेवः शिखादेवी ततः परं शिखादिदेवः कवचदेवी कवचदेवकः नेत्रदेवी
नेत्रदेवोऽस्त्रदेव्यस्त्रादिदेवकः कामेश्वरश्च कामेश्वरी ततश्च भगमालिनी भगमालिस्ततो नित्यक्लिन्ना नित्यादिक्लिन्नकः भेरुंडापि
च भेरुण्डो वह्निवासिन्यतः परं .... वज्रेश्वरी वज्रेश्वरस्तथा शिवादूती शिवादूतस्त्वरितात्वरितस्ततः कुलादिसुंदरी चै
व ततश्च कुलसुंदरः नित्यानित्यस्ततो नीलपताकानदंतरं नीलादिकपताकश्च विजयाविजयस्ततः सर्वमंगलनाम्नी च सर्वमंग
लनामकः ज्वालामालिनिका चैव ज्वालामाली ततः परं चित्रा च चित्रः कथितो महानित्या ततः परं महानित्यस्ततश्चैव परमेश्वरी ततः
परं परमेश्वस्तु मित्रेशमयी मित्रेशसंज्ञकः ततस्तु षष्ठीशमयी तथा षष्ठीशसंज्ञकः उड्डीशमय्यथोड्डीशमयश्चापि ततः परं चर्या
नाथमयी चैव चर्यानाथमयस्तथा मयूखाः पार्थिवाः प्रोक्ताः साधकाभीष्टदायका नाभिस्थाने द्विपंचाशद्दले दशदलात्मके
तत्राप्यरश्मयो ज्ञेया द्विपंचाशक्रमेण वै लोपामुद्रामयी चैव लोपामुद्रामयस्तथा तथागस्त्यमयी चैव तथागस्त्यमयस्ततः का
लतापनशक्त्यादिमयी कालादितापनः मयः षट्सु विज्ञेयो धर्माचार्यमयी ततः धर्माचार्यमयो मुक्तकेश्वरादिमयी ततः मुक्तके
श्वरनामादिमयो दीपकलादिकः नाथमय्यपि दीनादिकलानाथस्ततः परं विष्णुदेवमयी चैव विष्णुदेवमयस्ततः प्रभाकरादितो
देवमयस्तेजोमयी ततः तेजोदेवमयश्चैव मनोदेवमयी तथा मनोदेवमयश्चैव कल्याणपदपूर्वकं देवमय्यपि कल्याणदेवादिमयक
स्तथा रत्नदेवमयी चैव रत्नदेवमयस्ततः वासुदेवमयश्चैव वासुदेवमयस्तथा रामानंदमयश्चैव रामानंदमयस्तथा अणिमासिद्धि

३८

णिमासिद्धश्च लघिमादिका सिद्धश्च लघिमासिद्धो महिमासिद्धिरप्यथ महिमासिद्धइत्वर्वईशित्वादिस्ततःपरं सिद्धिरीशित्वसि
द्धःस्याद्वशित्वादिस्ततःपरं सिद्धिर्वशित्वसिद्धःस्यात्प्राकाम्यादिस्ततःपरं सिद्धिःप्राकाम्यसिद्धःस्याद्भुक्तिसिद्धिस्ततःपरं भुक्तिसिद्ध
स्ततोपीच्छासिद्धिरिच्छादिसिद्धकः प्राप्तिसिद्धिःप्राप्तिसिद्धःसर्वकामादिसिद्धिकाः सर्वकामादिसिद्धश्च ब्राह्मीब्रह्ममतःपरं माहे
श्वरीचमाहेश्वराज्ञेयोचैजलखसमयः द्वाबहिर्दलकेपद्मेस्वाधिष्ठानेरसात्मके एवादिदलमारभ्यज्ञेयास्तेजसखसमयः कौमारीचकुमा
रश्चैववैष्णवी विष्णुरेवच वाराहीचवराहश्च माहेन्द्रीचमहेन्द्रकः चामुण्डाचैवचामुण्डोमहालक्ष्मीततःपरं महालक्ष्म्यस्ततश्चैवसर्वसं
क्षोभिणीततः सर्वसंक्षोभणश्चैवसर्वादिकमहाङ्कुशाः तथामहाङ्कुशश्चैवखेचरीसर्वखेचरः सर्वबीजासर्वबीजःसर्वयोनिस्ततः
परं सर्वयोनिस्त्रिखण्डाचत्रिखण्डस्तदनन्तरं त्रैलोक्यमोहनादिश्चचक्रस्वामिनिकाततः तथैवचक्रस्वामीचप्रकटायोगिनीतथा त
तःप्रकटयोगीचकामाकर्षिणिकाततः बुद्ध्याकर्षणकश्चैवाहंकाराकर्षिणीतथा अहंकाराकर्षणश्चशब्दाकर्षणिकाततः स्पर्शा
कर्षणकश्चैवरूपाकर्षिणिकाततः रूपाकर्षणकश्चैवरसाकर्षिणिकाततः रसाकर्षणकश्चैवगन्धाकर्षणिकाततः गन्धाकर्षणक
श्चैवचित्ताकर्षणिकाततः बीजाकर्षणकश्चैवततश्चानाहतेतथा चतुष्कन्नरपंचाशद्दलेरविदलात्मके वायव्यखसमयोज्ञेयाःपूर्व
पत्रादितःक्रमात् आत्माकर्षिणिकाचैवआत्माकर्षणिकस्ततः अमृताकर्षिणीशक्तिरमृताकर्षणस्ततः शरीराकर्षणीचैवश
रीराकर्षणस्ततः सर्वाशापरिपूरकादिचक्रस्वामिन्यतःपरं तथैवचचक्रस्वामीत्रिगुप्तयोगिन्यतःपरं गुप्तयोगीततश्चैवानंगादिकुसु
माततः अनंगकुसुमोनंगमेखलानंगमेखलः अनंगमदनानंगमदनोनंगाशहृतः मदनातुरानंगमदनातुरएवच अनंग
रेखानंगादिरेखोनंगादिवेगिनी अनंगवेगोनंगाङ्कुशानंगाङ्कुशएवच अनंगमालिनीनानंगादिमालीततःपरं तथैवचचक्रस्वामी
त्रिगुप्तादितरयोगिनी तथैवयोगीसर्वादिसंक्षोभिणपथततःपरं सर्वसंक्षोभणश्चैवसर्वविद्राविणीततः सर्वविद्रावणश्चैवसर्वाक

षिणिकाततः सर्वाकर्षणकश्चैवसर्वाह्लादनिकाततः सर्वाह्लादनकश्चैवसर्वसम्मोहिनीततः सर्वसम्मोहनःसर्वस्तंभिनीचत
ततःपरं सर्वस्तंभनकश्चैवसर्वविद्रावकरीततः सर्वविद्रावकःसर्वरंजनीसर्वरंजनः सर्वोन्मादिनिकासर्वोन्मादनश्चततःपरं सर्वार्थसा
धिनीचैवततःसर्वार्थसाधनः सर्वसंपत्तिपूरिणीसर्वसंपत्तिपूरणा हासप्रतिदलेकंठेषोडशाब्दकात्मके नाभसारधमयोज्ञेयाः
सर्वादिदलतःक्रमात् सर्वमंत्रमयीचैवसर्वमंत्रमयस्ततः सर्वद्वंद्वक्षयकरीसर्वद्वंद्वक्षयंकरः सर्वसौभाग्यदापादिकचक्रस्वामिनी
ततः तथैवचक्रस्वामीतिसंप्रदायादियोगिनी संप्रदायादियोगीचसर्वसिद्धिप्रदातथा सर्वसिद्धिप्रदश्चैवसर्वसंपत्प्रदाततः सर्वसं
पत्प्रदश्चैवसर्वप्रियकरीततः सर्वप्रियकरश्चैवसर्वमंगलकारिणी सर्वमंगलकारश्चसर्वकामप्रदाततः सर्वकामप्रदश्चैवसर्वदुःख
विमोचिनी तथैवमोचनसर्वमृत्युप्रशमनीततः सर्वमृत्युप्रशमनःसर्वविघ्ननिवारिणी तथानिवारणश्चैवततःसर्वांगसुंदरी स
र्वांगसुंदरश्चैवसर्वसौभाग्यदायिनी तथैवदायकश्चैवततःसर्वार्थदायकः चक्रस्वामिनिकाचैवतथास्वामीकुलादिका उत्तीर्ण
योगिनीचैवतथायोगीततःपरं सर्वज्ञाचाथसर्वज्ञःसर्वशक्तिस्ततःपरं सर्वशक्तस्ततश्चैवसर्वैश्वर्यप्रदाततः सर्वैश्वर्यप्रदश्चै
वसर्वज्ञानमयीततः सर्वज्ञानमयश्चैवसर्वव्याधिविनाशिनी सर्वव्याधिविनाशश्चसर्वाधारस्वरूपिणी सर्वाधारस्वरूपश्चसर्वपा
पहराततः सर्वपापहरश्चैवसर्वानंदमयीतथा सर्वानंदमयश्चैवसर्वरक्षास्वरूपिणी सर्वरक्षास्वरूपश्चसर्वेप्सितफलप्रदा तथा
फलप्रदःसर्वरक्षाकरस्ततःपरं चक्रस्वामिनिकाचैवतथास्वामीततःपरं निगर्भयोगिनीचैवतथायोगीततःपरं वशिनीचवशी
चैवततःकामेश्वरीततः कामेश्वरोमोदिनीचमोदीचविमलाततः विमलश्चारुणाचैवारुणश्चजयिनीजयी सर्वेश्वरीचसर्वेशः
कौलिनीकौलिकस्ततः आज्ञाचक्रेद्विपत्रात्मचतुःषष्टिदलेऽब्जके मानसाष्टमयोज्ञेयाःसर्वरोगहरादितः चक्रस्वामिनिकाचैवत
थास्वामीततःपरं रहस्ययोगिनीचैवतथायोगीचवाणिनी वाणीचचापिनीचापीपाशिनीपाशिकस्ततः अंकुशिन्यंकुशीचैवम

हाकालेश्वरीततः महाकालेश्वरश्चैवमहावज्रेश्वरीततः महावज्रेश्वरश्चैवततश्चैवभगमालिनी भगमालीतथैवात्रमहात्रिपुरसुं
दरी तथैवसुंदरःसर्वसिद्धिप्रदस्ततःपरं चक्रस्वामिन्यथतथामहासीचाप्यतिपूर्विका रहस्ययोगिनीचैवतथायोगीततःपरं
श्रीमहारकसंज्ञाचश्रीमहारकसंज्ञकः सर्वानंदमयादिश्चचक्रस्वामिस्ततःपरं तथैवचक्रस्वामीतिपरापररहस्यतः योगिनी
चतथायोगीत्रिपुरात्रिपुरस्ततः त्रिपुरादिःसुंदरीचतथात्रिपुरसुंदरः त्रिपुरादिवासिनीचतथात्रिपुरवासिकः त्रिपुराश्रीस्तथा
श्रीश्चततस्त्रिपुरमालिनी ततस्त्रिपुरसिद्धाचतथासिद्धस्ततःपरं त्रिपुरांवातथैवांवामहात्रिपुरसुंदरी तथैवभैरवश्चाद्यमहा
मायेश्वरीततः तथामाहेश्वरश्चैवमहाराज्ञीततःपरं महाराजोमहाशक्तिर्महाशक्तस्ततःपरं महागुप्तामहागुप्तोमहाज्ञप्तात
तःपरं महाज्ञप्तोमहादिश्चमहानंदामहादिकः महानंदस्तथैवात्रमहास्पंदाततःपरं महामहास्पंदइतितथैवानुमहाशया
महामहाशयश्चैवविज्ञेयारश्मयोत्रच श्रीरोहणाक्रमःप्रोक्तस्त्ववरोहक्रमंब्रुवे लोपापंचदशार्णानांमिथुनानिततःपरं नवात्मे
श्वरवर्णानांषोडशस्वरयोगतः चत्वारिचत्वारिंशच्चशतंतेषांतुयुग्मकं पंचब्रह्मत्रिमूर्तीनांज्योतिषांचकलाचये मिथुनानि
चत्वारिंशत्यकलानांमिथुनानिवै नवात्मेश्वरवर्णान्त्यकलेतरकलापुनः षष्ठ्युत्तरंगुणेशतंविज्ञेयायत्रसेश्विषु नवात्मेश्वरमंत्रोत्थ
मिथुनानिशमागमे तथासप्तसतीविंशत्युत्तराचततःपरं सषट्त्रिंशत्सप्तशतंसहस्राणिचविंशति कलानिसाश्चविज्ञेयामूल
संख्यासमीरिता षट्शतोत्तरयुक्तानिसहस्राण्येकविंशतिः स्वासरूपासमाख्याताररश्मयोत्रकुलागमे सूर्याचंद्राग्निसोज्ञेयोमूलाका
द्विगुणीकृतात् संकीर्णारश्मयोज्ञेयामूलाकार्द्धिर्हीनतः मूलाधारादयस्त्राच्चसहस्रदलकेषुच सहस्ररश्मयोभांतितथैव
ब्रह्मरंध्रके संधिषट्कं पञ्चैवचविंशद्विंशतिसंख्यया ऊनविंशतिसाहस्रंचत्वारिंशच्चतःशतं सहजासमयोज्ञेयाःसंकीर्णाद्विसहस्र
शतंषष्टिःसमाख्याताविज्ञेयास्तेषुभागशः वर्णानांक्रमशोज्ञेयाःपार्थिवाश्चैवपाथसाः तेजसाश्चानिलाश्चैवनाभसामानसास्त्वे

स्व

वि॰
शि॰ व॰
च॰
ष॰
40

था अवर्णस्य त्रयं सार्द्धं सपादत्रयमेव च अष्टमांशविहीनं स्याच्चतुष्टयमतः परं अष्टमांशविहीनं स्यात्सार्द्धत्रयमतः परं सार्द्धवेदं वे
दसंख्यैरश्मयः क्रमतः स्मृता इकारादिस्वराणां च क्रम एष उदाहृतः एकैकस्य स्वरस्यैव सार्द्धद्वाविंशतिः क्रमः सदलाष्टिकवर्ण
स्य पादन्यूनं तु पंचकं पंचकं सार्द्धवेदं च षट् सपादं च पंचकं खवर्णस्याप्ययं ज्ञेयः क्रमः पंचांतकस्य तु भूतं सपादवेदं च पंचकं सार्द्ध
वारिधिः षट्कं सपादन्यूनं स्यादेषा घान्तरकस्य तु सार्द्धाब्धिश्च सपादाब्धिः सार्द्धपंचकमेव च सार्द्धाम्भोधी रसाश्चैव सपादं पंचकं ततः ङ
कारस्य चकारस्य छकारस्याप्ययं क्रमः जकारस्य च पंचैव सपादं वेदमेव च पंचकं सार्द्धवेदं च षट्कं भूतं सपादकं झकारस्य तु तिथिसा
र्द्धं सपादं त्वब्धिरेव च पंचकं सार्द्धवेदं च षट्कं पादविहीनकं षट्कं ञार्णस्य तु तथा ठठयोश्च जकारवत् डार्णस्य पादहीनं स्यात्षट्कं पंचस
पादकाः सार्द्धषट्कं पंचकं च सप्तकं सार्द्धषट्ककं ढणतानामयं ज्ञेयः क्रमो देशिकसत्तमैः थार्णस्य सार्द्धभूतं स्यात्सपादं भूतमेव च
रसाश्च पादहीनं स्यात्षट्कं सप्तकमेव च सार्द्धषट्कं तथा ज्ञेया दधनानां च देशिकैः पार्णस्य सार्द्धभूतं स्यात्पंचकं षट्कमेव च सार्द्धभूतग
जाः षट्कं फकारस्याप्ययं क्रमः बार्णस्य दशकं सार्द्धैकजा दशकमेव च नवकं रविसंख्याकं सार्द्धं पंक्तिर्यथाक्रमं भार्णस्य नवकं सा
र्द्धं नवकं पंक्तिरेव च नवकं रविसंख्याकं सार्द्धं पंक्तिः क्रमेण वै मार्णस्य नवकं सार्द्धं गजाश्चैकादशापि वा नवकं रविसंख्याकं सार्द्धं पंक्ति
क्रमेण च यार्णस्य नवकं सार्द्धं गजाः पंक्तिस्तथैव च नवकं रविसंख्याकं सार्द्धैकादशकं ततः रार्णस्य नवकं सार्द्धं गजा एकादश स्ततः
नवकं रविसंख्याकं सार्द्धं पंक्तिर्यथाक्रमं लार्णस्य दशकं सार्द्धं गजा दशकमेव च नवकं रविसंख्याकं सार्द्धं पंक्तिस्तथैव च वार्णस्य मनु
संख्याकं विश्वेदेवास्तथैव च सदलं तिथिसंख्याकं सदलं विश्वमेव च अष्टादशाः षोडशाश्च शाषसानामयं क्रमः हार्णस्याष्टाविंश
तिश्च षड्विंशतिरतः परं एकविंशत्सप्तविंशः षड्विंशानंतरं त्रिविंशच्च क्रमो ज्ञेयः क्षकारस्याप्ययं क्रमः ततः संकीर्णरश्मीनां सह
जानामशेषतः ज्ञानेन वर्णाहं दस्य तात्त्वैभवमुत्तमं शाक्ततेत्र न संदेहः संप्रत्येन चान्यथा ककाराद्यक्षवर्णानां त्रिंशत्त्रिंशत्तथैव च

८०

डकारादि दशार्णानां षड्विंशात्कमईरितः वकारादि दशार्णानां षष्टिसंख्या समीरिता वादीनां वेदवर्णानां नवत्येव समुदाहृता दल
योश्च शतं प्रोक्तं सशीत्युत्तरमेव च अकारादिस्वराणां च प्रत्येकं च शतद्वयं पंचविंशतिरुद्दिष्टा मयूखा मूलतः क्रमात् सार्द्धद्वावि
शतिर्ज्ञेयाः संकीर्णास्तु पृथक्पृथक् द्विशतं सार्द्धयुग्मं च सहजा रश्मयः पृथक् कादिठान्तार्कवर्णानां मूलभूतास्तु रश्मयः शत
त्रयं तु प्रत्येकं ज्ञातव्यं देशिकोत्तमैः त्रिशात्रिंशात्क्रमेणैव संकीर्णा रश्मयः स्मृताः द्विशतं सप्ततिश्चैव सहजास्तु पृथक्पृथक् डादी
नां दशवर्णानां त्रिशतं षष्टिरेव च मूलभूतास्तु संकीर्णा षट्त्रिंशच्च पृथक्पृथक् सहजा द्विशतं षष्टिश्चतुरुत्तरमेव च ठादीनां व
सवर्णानां मूलभूता द्विरश्मयः शतषट्कं तु संकीर्णा विज्ञेयाः षष्टिसंख्यया निजा पंचशतं चत्वारिंशच्च क्रमतः पृथक् वादीनां वे
दवर्णानां नवशत्याः पृथक्पृथक् मूलभूता शतो ज्ञेयाः संकीर्णा नवतिः पृथक् निजा द्विगुणत्राणपष्ठोशतानि च ततः परं द्वतयो
रष्टशतं सहस्रं मूलरश्मयः अशीत्युत्तरतो ज्ञेयाः शतसंकीर्णरश्मयः सहस्रं षट्शतं विंशत्सहजा रश्मयः क्रमात् सर्वेषां पार्थि
वा ज्ञेयाः सषट्त्रिंशच्छतत्रयं आप्यास्सद्वादश ज्ञेया द्विशतं देशिकोत्तमैः द्विसप्तत्युत्तरमेवं स्युस्त्रिशतं तेजसा पुनः सचतुर्विंशतिर्ज्ञे
याः त्रिशतं वायुरश्मयः चतुःशतं द्वात्रिंशद्रश्मयो नामसामतो त्रिशतं चाप्यशीतिश्च चत्वारो मानसाः स्मृताः एवं रश्मिक्रमं ज्ञा
त्वा साक्षात्परशिवो भवेत् नातः परतरं लोके मंत्रवीर्यप्रकाशकं गुह्याद्गुह्यतरं चैव न देयं यस्य कस्यचित् दत्ते चासिद्धिहानिः स्या
दित्याज्ञा परमेश्वरी स्तंभने पार्थिवप्राया विज्ञेया मनवोत्र व आप्यप्रायाश्च मनवः प्रशस्ताः स्युः शान्तिकर्मणि तेजसास्तु वियत्रा
याः कर्मणेवप्रणकेपि च उच्चाटके तु वायव्याः प्रशस्ता मनवोत्र व मंत्रास्तु मानसप्राया मुक्तिदाना प्रसंशयः प्रबुद्धा कुंडलीशक्तिमंत्रा
र्थां प्रयांति च ज्ञात्वा सम्यग्विधानेन गुरुतः शास्त्रतोपि वा आरोहणक्रमेणैवाप्यवरोहक्रमेण च रश्मिन्यासे कृते चैव मंत्राः सिद्ध्यन्ति
तत्क्षणात् रश्मिन्यासं विना यस्तु मंत्रवीर्यप्रयत्नवान् सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि कालीमते समुद्दिष्टा रश्मयः सिद्धिदाय

वि॰
लि॰ त॰
च॰
५८

काः ॥ इति कालीमते श्री विद्यारश्मयः ॥ वर्ष्ठैकादिते सम्यक् रश्मयश्चक्रषट्ककेः पार्थिवास्तत्र हीनाश्च समस्तस्वरान्विताः पंच
त्रिंशत्समुद्दिष्टा दीर्घयुक्तास्तु सप्ततिः तेषु नः स्युर्हतो बिंदुसर्गाभ्यां दशपंचच शतत्रयं समुद्दिष्टाः पार्थिवाः प्लुतयुक्स्वराः उदात्तास्त्वात्र
दात्ताश्च स्वरितास्तिथिसंख्यका तेषु नः स्युर्हतो बिंदुसर्गाभ्यां समुदाहृताः पंचचत्वारिंशदिति त्रिशतेषष्ठिसंख्यकाः मूलाधा
रे मही स्थाने वित्ते याद्देशिकोत्तमैः संकीर्णा रश्मयः ख्याता नामाणि हरे जलाश्रये स्वाधिष्ठाने ऽनलावासे ऽनाहते निलमंदिरे विशु
द्ध्याममनिलयेतथा प्रोक्ताश्च रश्मयः आज्ञाचक्रे मनः स्थाने कष्टकाद्यपवर्गह क्षस्वदीर्घस्वरैर्युक्ताः पंचोत्तरमतः परं चत्वारिं
शत्समाख्याता स्तेषु नः सानुनासिकाः ततस्तेनत्रुनाशाश्चतथा नवतिसंख्यका तेषु नः स्युर्हतो बिंदुसर्गाभ्यामुभयात्मनः ष
ष्ठ्युत्तरं त्रिशतकं सम्यक् ख्याताः स्युरंशवः स्वराणां भागशः प्रोक्ताः पार्थिवाद्याश्च षड्विधाः एकैकस्य वर्णस्य सार्द्धद्वाविंशतिः
पृथक् लादीनां रवि वर्णानां पार्थिवाद्याश्च षड्विधाः एकैकस्य वर्णस्य त्रिंशत्त्रिंशत्पृथक् पृथक् गादीनां दशवर्णानां पार्थिवाद्याश्च
रश्मयः एकैकस्य वर्णस्य षट्त्रिंशत्क्रमशः इति वादीनां रसवर्णानां पार्थिवाद्याः क्रमात् एकैकस्य वर्णस्य षष्टिषष्टिह
दाहृताः वादीनां वेदवर्णानां पार्थिवाद्याश्च षड्विधाः एकैकस्य नवतिर्नवतिः प्रोक्ता रूपतः दहयोः पार्थिवाद्याश्च षड्विधा रश्मयः क्र
मात् अशीत्युत्तरंतो ज्ञेयाः शतमेकैकवर्णके एवं सहस्रद्वितयं शतं षष्टिश्च रश्मयः चक्रत्वके विज्जृंभन्ते संकीर्णा रश्मयः पृथक्
निखिला रश्मयो ज्ञेयाः संकीर्णा द्वादशैव हि सहस्राणि च षष्ठ्यर्द्धं नवशतान्युत्तराणि वै मेयषट्के ऽप्यर्द्धे चचत्वारिंशच्च षट्शत
मष्टौ सहस्राण्येवं हि संकीर्णा रश्मयो विके षष्ट्युत्तरं शतं त्रिंश्चाष्टसहस्रमपास्य च त्रिचत्वारिंशदेवात्र सहस्राणि शतद्वयं रश्मयो
मूलमंत्रात्मिसमुद्दिष्टा ह्यशेषतः निजांशभागशो ज्ञेयाः संकीर्णाः प्रागुदीरिता अर्द्धेन्दुरूपस्य रूपाच्चार्द्धेन्दोर्नादस्वरूपिणः तेजांतरे
कंठदेशे स्वराणां च भूतवर्णत्रिके त्रिके ततश्चतोंशा वा ज्ञेया शतत्रयविभागतः अन्येषां पंचपंचैव बिंदुर्गाः स्युर्मानसाः शतत्रयं समु

५८

द्विशाश्चान्येषां तु चतुर्दश कादिषु निलवर्णानां पंचोत्तरशतक्रमः अन्येषां पंच पंचैव नवानां वायुरश्मयः आग्नेयादीनां त्रयाणां च
पंचोत्तरशतांशवः अन्येषां पंच पंचैव नवानामग्निरश्मयः धरार्णयोरेकशती पंचविंशतिरुत्तरा अन्येषां रुद्रवर्णानां पार्थिवांशा
दशाक्रमात् जलार्णयोरेकशती पंचविंशतिरुत्तरा अन्येषां रुद्रवर्णानां क्रमाद्दश जलांशवः आकाशार्णद्वयस्यापि शतं वै
पंचविंशति एकैकस्य तु विज्ञेया अन्येषां दश वै दश ञादिय॰ तदष्टार्णेषु तत्तद्भूतार्णयोः पृथक् तत्तद्भूतांशवो ज्ञेयाः सार्द्धं श
तमिति स्फुटं अन्येषां वसुवर्णानां सार्द्धं द्वादशरश्मयः वादिलांतार्णषट्के तु धरावर्णद्वये पृथक् धरांशवस्तु विज्ञेयाः सप्तो
त्तरशतं तथा अन्येषां पंक्तिसंख्याका विज्ञेया वीरवंदिते तत्तद्भूतांशवो भादि तत्तद्भूतार्णकेषु च देशिकेंद्रैः स्तु विज्ञेया एकैकस्य
शतत्रयं अन्येषां तु त्रिवर्णानां प्रत्येकं विंशतिक्रमः वार्णादिवेदवर्णानां जलयोर्जलरश्मयः सार्द्धशतं तु विज्ञेया अन्येषां विंश
तिक्रमः द्वितीयस्य शतं सार्द्धमन्येषां सप्ततिक्रमः नाभसांशास्त्र विज्ञेयास्तृतीयस्य तथैव च वायव्याः क्रमतो ज्ञेया हकारस्य श
तत्रयं त्वार्णस्य षष्टिसंख्या सांत्राभसांत्रात्रसप्तयः अग्न्यंशवः स्तकारस्य विज्ञेया चैव शतत्रयं हार्णस्य षष्टिसंख्यास्यादन्येत
त्वानसंशयः एवं रश्मिक्रमः प्रोक्तः साधकानां हिताय च गोपनीयः प्रयत्नेन स्वयोनिरिव पार्वति नाशिष्याय प्रदातव्यं नाभ
क्ताय कदाचन दत्ते च सिद्धिहानिः स्यादित्याज्ञा पारमेश्वरी गुरुतः शास्त्रतो ज्ञात्वा साधकस्त्वं परशिवो भवेत् स्वराः षोडश विख्याताः
स्पर्शास्ते पंचविंशतिः व्यापकादश संप्रोक्ताः सोमसूर्याग्निरूपिणः अग्नित्रयात्मकाश्चैव महाकालादिरूपिणः धामत्रयात्मका
श्चैव ब्रह्मादिमध्यांतरूपिणः मूर्तित्रयात्मकाः सृष्टिस्थितिसंहारकारिणः धामत्रयात्मिकाश्चैव भूर्भुवःस्वःस्वरूपिणः एतेषां वै भवं
भ्राणामभयं शूलं कपालीं तर्जनीं तथा वामदक्षे च विभ्राणां विकीर्णतेत्रयां त्विता विचित्राभरणां रौद्रीं ध्यात्वैवं संजपेन्मंत्रं ग्रह
बीजानि चोच्चार्य गायत्र्येषा समीरिता वाग्भीश्वरी विद्महे च कामकूटं ततो ध्यात्वा रेत् कामेश्वरी धीमहीति शक्तिकूटं ततः परं तन्नः
शक्तिपदः प्रोक्ता माहरे च प्रचोदयात् बीजपंचकमुच्चार्य गायत्र्येषा समीरिता मूलविद्यां ततो जप्त्वा गुह्यातीति निवेदयेत् इ
ति संध्याविधाने संक्षेपसंध्यानन्तरं सायंप्रातर्मध्याह्ने देवीं ध्यात्वा मंत्रं जपेत् इति संध्यात्रयमात्रपूपके तथा कुलार्णवे
संध्यालोपो न कर्तव्यः शांभो राज्ञैवमेव हि दीक्षितः संध्यया हीनो न दीक्षाफलमश्नुते नकुर्यान्यदि तां संध्यां पतिनादपि या जपेत्
अन्यसंध्यासमे काले सोऽत्रकंठकिविद्यया कृत्वा षडंगमंत्रेण ध्यायेन्तो मोत्रकंठकं षड्वक्त्रां द्वादशभुजां त्रिनेत्रां परमेश्वरीं गलाद्
हूं प्रेतवर्णां पीतां गलन्नलादथ कर्णादिपादपर्यंतं नीलाभां च ततः स्मरेत् छिन्नस्वर्षाक्षकां गीसर्वशृंगारवर्जितां सर्वाभरणरत्नप्रभा
भिश्रमंडितां भिस्रहस्तिका मोचिनी सर्वपापानां रत्नसिंहासनेस्थिता तदूर्ध्वप्रेतपद्मं च तदूर्ध्वप्रेतकेसरं तत्र हंसस्थितां दे
वीं त्रिखंडां गुहामण्डितां रत्नमुकुटोज्वलां दिंग्मासततां नादपूरितां हसहक्लां महादेवीं दूतिकोद्दयगामिनीं महासमयमार्गा
यनित्यानिष्कलगामिनीं पंचप्रणवमुच्चार्य वाग्भवं परडक्षरं कर्मच्छेदनकारीति प्रोच्चार्य वरदे तथा विच्चे मायापदं चोच्चार्य लोकप्र
पदमुदरेत् तूपतिचपदं प्रोक्तं मा सहस्रपरिवर्तिनी मातृगणपदं चाहरहस्त्व प्रणवपंचकं लुप्तसंध्यामहापापनिष्कृत्यर्थमिमंजपे

वि॰
ल॰ व॰
पं॰
५६
56

त् दशवारं ततो जप्त्वा मूलमंत्रं यथाविधि स्वयं ज्योतिर्मयं भूत्वा मूलविद्यां हृदि स्मरन् पूजार्थं जलमादाय यागमण्डपमावि
शेत् ज्ञानार्णवे सर्वशृङ्गारवेषाढ्यः कर्पूरघुसृणादिभिः महामृगमदोद्दामलिप्ताङ्गः ॐ ऊ मारुणः नवरत्नविशेषाभाढ्योऽर
क्तोऽवरविराजितः तांबूलरागवदनो मादनानंदमानसः यागमंदिरमागत्य लाक्षारससुविचित्रिते अनेकधूपवर्त्तुलधूपसंभा
रपूरिते गोमयेच सलिलैश्चारुपुष्पविराजिते इति गणमूर्तिसंहितायां अथ यागगृहं यादलंकारविभूषिते अनेकचित्रस्तंभ
गंभूमौ गोमयचर्चिते उपरिष्टालसत्सुवर्णवितानेऽधूपधूपिते दीपमालावलीरम्यविकीर्णकुसुमोज्ज्वले इति यागमंडपं
तारं वज्रं क्रोधं के ॐ फट् स्वाहा हामंत्रेण देशिकः जलेनासनमभ्युक्ष्य तदुपर्युपविश्य च तारं मायाविष्णुहेतिसर्वपापानि चोच्चरे
त् क्षमयाशेषं ततो विकल्पमयते तिच यद्गमित्यिच मंत्रेण हस्तौ पादौ च क्षालयेत् ॐ ह्रीं स्वाहेति मंत्रेण त्रिराचम्याङ्गोगेततः
उपविश्य ततः सौरपूजां कुर्याद्यथाविधिः ज्ञानार्णवे प्राङ्मुखः प्राङ्गणे ह्येवं यजन्मार्तण्डभैरवं शंभुनिर्णये चतुरस्त्रं यथा नो सि
ध्येत् सौरपूजेयमीरिता नहि चार्घ्यविदा दिसपूजां कर्तुं सुखावहने प्राङ्मुखः प्रत्यगासीनः समस्त्रियपमहीतले सामान्यार्घं च वा
मस्यात्प्रणवमच चोच्चरेत् मंडलोच्चारणं कुर्यादिति सामान्यार्घ्यमते भूमौ मंगुलिं चवेदस्त्रेण च षडङ्गं चोद्घृतेषिकं विलिख्य तस्मिन्नाधार
पात्रमस्त्रविशोधिते संस्थाप्य पयसा पूर्याधारपात्रजलेषु च वह्न्यर्कसोमबीजैस्तु तथा चात्मविभाविते संवर्त्तिप्यापघषट्दीर्घैर्दि
तीयप्रणवात्मके अंगैर्तमस्ववि धाय्येव शंखं संस्थाप्य देशिकः वरूच्छासकराग्रेण परतः सौरमंडले वक्ष्यमाणेन मंत्रेण कस्तूरीचंदनादि
भिः ऐं ह्रीं श्रीं हस्ख्फ्रें ह्सौः चंडरूपाग्निगर्भस्फुरस्फुरधर्मार्थकाममोक्षलाभकृत् ऊं कं महाखेचरी मुद्रां प्रकटय प्रकटय शंभवाज्ञ
या चतुरस्त्रयान्ताः सिद्धिः सामर्थ्यादि दद दद किचकिचिकि किलिकिलि फ्रें मंडलब्रह्माण्डमंडलहस्तं महाचण्डशावेमहफ्रें ५ अनेन मंत्रेण
भाग्यहृन्नाष्टदलपद्मकं मंडले चतुरस्त्रकं कृत्वा संस्थाप्य चाग्रतः सामान्यं वह्निशेषाख्यं मण्डले विलिखेद्बुधः इत्येवं सौरार्घ्यपूजार्थम

एडुले चतुरस्रकं कृत्वाधारं तु संस्थाप्य पूजयेद् हृन्नाम्ना ५ ऐं पात्रासनाय नमः ऐं तत्रास्त्रेणा क्षालितं पात्रं धूपितं स्थापयेत् बुधः ५
ह्लीं ५ इति मंत्रेण वार्द्धौ तु पूजयेत् क्षुद्रवारिणा ह्रौं बीजेन त्रिधा ह्रीं दीर्घस्वरसंभेदितेन च अष्टपञ्चाशन्निर्दिष्टरक्तपुष्पैः समर्च्चयेत् अस्त्रेणार
क्ष्यात्मकस्य हस्तात्मानमभिधारयेत् अथार्घ्यपात्रमध्ये तु ध्यात्वा प्रेतस्वरूपिणं अनंतमर्च्चयेत्तत्र शयाने मंत्रनाम्नुना ५ ग्रं अनंताय नमः ग्रं ५
तल्पीकृतनवं यं देहे हृच्छ्रीकृतफणात्रयं फणीनामीश्वरं स्वैतं ध्यात्वा संपूजयेत्ततः अग्नीषोमात्मकरवायषोढास्त्रिक्रमतो यजेत् हंहः फ्रें प्रवे
धनाथाय फ्रें हंहः ५।५ यं रंलं त्रिमूर्त्तये ५।५ यं अप्यापयं ५।५ हं परमसूत्रवायहं ५ हं देहस्याकाशमध्ये स्फ्रीं बीजे रक्तसन्निभं हृहता
ग्राहि निःसार्य तं तं प्रेतात्मकासनं आवाह्य तद्बीजमयं ध्यायेन्मार्तण्डभैरवं ध्यानं रक्तवर्णं स्थूलदेहं षट्चक्रमूर्द्धके शिके भुजद्वादश
संयुक्तं सर्पास्थिरत्नचर्च्चितं क्रोधिनं चोर्द्ध्वलिंगं च ज्वलद्रश्मिसमाकुलं व्याघ्रचर्मपरीधानं मुण्डमालाविभूषितं ॐकारप्रसंचेतं सहरं तं
महाशने त्रिशूलासिचक्रखड्गसृणीवरदपाणिने तर्जनीशंखगदाचापपाशाभयकरालिने आवाहनादिमुद्राश्च संदर्श्य प्रपूज्य साधकः
न्यासादिकमतश्चांगं कृत्वा मार्त्तण्डभैरवे ततः पुष्पांजलिं सार्घ्यं समंत्रं च निवेदयेत् ५ फ्रों हंसौः श्रीकुलमार्त्तण्डभैरवाय फ्रों हंसौः ५ पश्चा
त्संप्रोक्ष्य चात्मानं जपेन्मंत्रमिमं पुनः पुष्पांजलिं क्षिपेत्सम्यक्त्वा विघ्नसर्वसाक्षिणे ५ हंसौः ह्सौः ह्सौः फट् खफ्रें भां फट् खफ्रें भां फट् हंसौः
ह्सौः हसौः ५ इति पुष्पांजलिमंत्रः मुद्रेषु मूलतर्जन्योर्विधाय काहरिणीमपि कृत्वांजलिप्रदर्शनं तु षट्कोणे द्वादलेषु च मध्ये च मूलतर्जन्यो
दर्थानं च चंडरोचिषं नवशक्तीर्यजेत्तत्र भैरवानपि पूजयेत् ५ जूं ज्वालायै जूं ५।५ ह्रं मिश्रीषणायै ह्रं ५।५ हूं फट् चण्डालिन्यै हूं फट् ५ सौः
सौः भीषण्यै सौः ५।५ ऐं गारसिंह्यै ऐं ५ क्लीं कमलादेव्यै क्लीं ५ फ्रें मार्त्तण्डाय फ्रें ५ फ्रें कपालिन्यै फ्रें ५।५ सौः कौलिन्यै सौः ५ अथ
भैरवमंत्राः ५ फ्रें चण्डाय फ्रें ५ पवं विश्वेशाय महादेवाय महाकालाय गभस्तीशाय चाण्डीशाय तेजस्याय मार्त्तण्डाय मुद्राश्च खेचरी वह्ना
लयांगं भोगमंगकं न्यासादिकं विधायैव हर्षाद्रक्तप्रसूनकैः संपूज्य धूपदीपादिनैवेद्यानान्तदं मंत्रकं यथाशक्ति जपित्वा तु अर्घ्यमंत्रेण तज्ज

वि॰
णी॰ब॰
पं॰
५७
57

पं सेवेत्क्रमशश्चैवमेवं च विद्यादिस्य हृदं तु जे दहदहकहकहात्मानं तत्तदा समुद्धरेत् विधायार्घ्यं च नैवेद्यं तेजोऽर्घ्यं च तथा बहिः वामभा
गे लिखित्वा तु चतुरस्रं तु मंडले तस्मिन्साधारपात्रे तु पञ्चमार्तंडभैरवं अभ्यर्च्य च विधानेन तन्मंत्रैर्गणदेशिकः ५ ह्रां ह्रीं सः
पञ्चमार्तंडभैरवाय ५ समर्प्य तेजोऽस्य निर्माल्यं सर्वं तस्मै निवेदयेत् इति सौरपूजा । अथ मंडपपूजा प्रादौ मंडपध्याने अमृ
ताब्धौ मणिद्वीपे चिंतयेन्नंदनं वनं चंपकाशोकपुन्नागपाटलैरुपशोभितं लवंगमालतीबिल्वदेवदारुवनैस्तरुभिः मंदार
पारिजाताद्यैः कल्पवृक्षैः सुपुष्पितैः चंदनैः कर्णिकारैश्च मालतीगुल्मवंजुलैः दाडिमीलकुचाकोलैः पूगैः जंबवकैरपि सर्वर्तु
कुसुमोपेतैर्लसद्भिरुपशोभितं मंदमारुतसंभिन्नकुसुमामोदितदिक्सुखे तस्य मध्ये परंज्योतिः सद्रूपो मेरुपर्वतः तस्य मध्ये स
दाफुल्लैः कुमुदोत्पलपंकजैः सौगंधिकैश्च कल्हारैर्नवैः कुवलयैरपि हंससारसकारंडभ्रमरैश्चक्रनामभिः अन्यैः कलकलारा
वैर्विहंगैरुपशोभितं महामरसितन्मध्ये पुलिने नितिमनोहरे परितः पारिजाताद्यैर्महाकल्पतरून्स्मरेत् नीपोपवनमध्यस्थं नाना
पुष्पसुपुष्पितं नानारत्नफलाकीर्णं छायाश्रितजगत्त्रयं उद्भूतरत्नछायाभिररुणीकृतभूतले उद्यद्दिनकरेंडभ्रामुद्भासितदि
गंतरे ऋतुभिः सेवितं षड्भिरनिशं प्रीतिवर्द्धनं परामृताख्यमधुभिः सिंचेन्मंडपं शुभः तस्याधस्तान्महावेदीं माणिक्यकविनिर्मितां
वज्रप्राकारसदीप्ताष्टयोजनविस्तृतां तन्मध्ये चिंतयेद्दीप्तं मण्डपं मणिकुट्टिमं उद्यदादित्यसंकाशं भास्वत्स्फाटिकभूतले चतुर्द्वार
समायुक्तं हेमप्राकारशोभितं रत्नोत्पलाभसंशोभिकपालाष्टकशोभितं नवरत्नसमाक्रांतं तुंगगोपुरतोरणं हेमदंडसमालंबिध्व
जावलिपरिष्कृतं नवरत्नसमावद्धस्तंभराजिविजृंभितं सहस्रदीपसंयुक्तं दीपमंडलराजितं तन्महाटकसंक्लृप्तं वातायनमनोहरं
नानावर्णांशुकावद्धसुवर्णशतकोटिभिः किंकिणीमालिकायुक्तपताकाभिरलंकृतं हेमकुंभावलीरम्यं नानाचित्रविचित्रितं जा
तरूपमयैरत्नस्तूचितैरतिविस्तृतैः माणिक्यरत्नवैडूर्यसुवर्णमालावलीयुतैः अंतरांतरसंवद्धैरत्नैर्हेमिमनोहरैः विचित्रैश्चित्रवर्णैश्च

५७

वितानैरुपशोभितं सर्वरत्नसमायुक्तं हेमकुंभिसमुज्ज्वलं केतकीमालतीजातीचंपकोत्पलकेसरैः मल्लिकातुलसीयूथीनंद्याव
र्तकदंबकैः पंचरंगैस्सुकुसुमैरलंकृतमहीतलं रत्नसोपानसंयुक्तभूमिकाभिरुपस्कृतं चंद्रकाश्मीरकस्तूरीमृगनाभिसमालकैः
चंदनागरुकस्तूरैरादीपितदिगंतरं पुष्पमालावलीरम्यमुक्ताश्रेणिविराजितं कर्पूरदीपमास्वंतमाणिक्यदीपमंडितं कल्पवृ
क्षतलप्रांतमतत्त्वरत्नवेदिकां रत्नसिंहासनेनाढ्यं श्रीमच्छ्रीचक्रमंडितं इंद्रादिदेवतावृंदैर्ब्रह्मविष्णुशिवादिभिः अनेकयोगिनीवृंदै
रन्यदेवतकैरपि सेव्यमानपादाब्जयुगमयातत्स्वरूपया महात्रिपुरसुंदर्याधिष्ठितं सर्वकामदं सुधासंदोहकल्लोललोलितं मोक्षकामदं
अनेकरूपबहुलं मंडपं चिंतयेत्सुधीः तन्मंडपमध्यमासीनां ध्यायन्नाकुलचेतसं भैरवोहमिति ज्ञात्वा सर्वज्ञादिगुणान्वितः इति श्रीमंड
पध्याने अथ द्वारपूजा। तत्र स्वर्णप्राकारस्य पूर्वद्वारेणांतः प्रविश्य प्रादक्षिण्येन मंडपमंडपस्य पश्चिमद्वारेण मणिमंडपांतः प्रविश्य
साधकः देवीमितिक्रमस्तेनैव क्रमेण द्वारपूजनमित्यतो यागमंडपस्य प्राकारसंभवे तद्वारान्सदक्षं भवे यागमंडपस्य पश्चिमद्वारे मंड
पासंभवे गोमयोपलिप्तायां यागभूमेः पश्चिमभागे रक्तांविलिप्त्वा सामान्यार्घ्यं विधायैव कल्पयित्वा क्रमेण पूजयेत् तत्र कोटियोजनविस्ती
र्णसुधार्णवचतुष्पातगतं कोटियोजनविस्तीर्णं महाद्भुतं नवरत्नमयद्वीपं सहस्रादित्यतेजसं तन्मध्यवर्तीयोशे मदनोन्मादनैर्नाना
पुष्पलताकुलैः कदंबकाननगर्भकैर्नंदनोद्याने तन्मध्यवर्तीयांशे कोटिसूर्यप्रतीकाशोज्ज्वलस्वर्णप्राकारवेष्टिते नानासुरभिशालि
तोरणद्वारेन नानारत्नविमंडितं परितः सेव्यमानेंद्रादिगणसमाकुले श्रीमंडपं ध्यात्वा सामान्यार्घोदकेनाभ्युक्ष्य पुष्पतोयाभ्यां क्रमे
ण पूजयेत् ५ सुधार्णवायनमः ५ नवरत्नमयद्वीपायनमः ५ नंदनोद्यानायनमः ५ स्वर्णप्राकारायनमः तद्वारस्य दक्षिणेत
रशाखयोरूर्ध्वं च पूजयेत् ५ गांगणेशपादुकां पूजयामि ५ क्षां क्षेत्रपालपादुकां पूजयामि ५ ह्रां द्वारश्रीपादुकां ९९.९ देहे
हलीयां । दक्षिणपादपुरःसरमंतः प्रविश्याभ्यंतरे यागगृहदिक्षु इंद्रादिदिक्पालान्पूजयेत् ततः पश्चिमभागे तिरस्करिणीं पूजयेत्

वृत्तत्रिकोणचतुरस्रमंडलेविधाय तत्रनीलंतुरंगमधिरूढ्यस्वप्रभाभासमानानीलांशुकाभरणमाल्यविभूषणाढ्या निशा
पटेनभुवनानितिरोदधानाखड्गायुधाभगवतीपरिपातुचास्मान्॰ इतिध्यात्वा ष ऐंनमोभगवतिमाहेश्वरिपशुजनमनश्चक्षुस्ति
रस्करणंकुरुस्वाहेतिगंधाक्षतकुसुमैःप्रजयेत् ततः ष कदंबवनायनमः श्रीरत्नमंडपायनमः इतिसंप्रज्य॰ तस्यद्वारदेव
ताःप्रजयेत् सौःअस्त्रायफट्इत्यनेनपश्चिमद्वारमभ्युक्ष्यतोर्ध्वशाखायां ष महालक्ष्मीपा॰वामे ष ह्सौःसरस्वतीपा॰मध्ये ष ॐगंगाश्रीपा॰ ष
ह्रांद्वारश्रीपा॰ दक्षवामशाखयोः ष शंखनिधिवसुधाराभ्यांनमः ष पद्मनिधिवसुमतीभ्यांनमः ऊर्ध्वेदक्षे ष विघ्नेशपा॰वामे
क्षेत्रेशपादुकां॰ तदूर्ध्वेचदक्षे ष गंगंगणपा॰ ष वामेयांयमुनायपा॰ ष तदूर्ध्वेदक्षे ष धांधात्रेनमःवामे ष विंविधात्रेनमः अधोदेहल्यां
देहलीपा॰ ष वांवरुणपा॰इतिपश्चिमद्वारप्रजा॰ ततउत्तरद्वारंगत्वा तदूर्ध्वशाखायां ष वंवटुकनाथपा॰ ष ह्रांद्वारश्रीपा॰ ततःपूर्वव
च्छंखनिधिवसुधारादिदेहल्यंतंसंप्रज्य॰देहल्यग्रतः ष कुंकुवेरपा॰इतिउत्तरद्वारप्रजा॰ ततःपूर्वद्वारंगत्वा तदूर्ध्वशाखायां ष ह्सौःदक्षि
णे ३ विंविघ्ननाथपा॰ ततस्तस्माद्वामतःक्षेत्रपालस्यदक्षिणेवामाग्रेषुमहालक्ष्मीसरस्वतीद्वारश्रियःप्रजयित्वाशंखपद्ममिथुनार
भ्यदेहल्यंतंप्राग्वत्प्रजयित्वा॰देहल्यग्रतः ष लांइंद्रनाथपा॰इतिपूर्वद्वारप्रजा ततोदक्षिणद्वारंगत्वाभ्युक्ष्य तदूर्ध्वशाखायां ष ग्लौं
गणनाथपा॰ ३ ह्रांद्वारश्रीपा॰ दक्षवामशाखयोः कामदेववसंतमिथुनेप्रथमंप्रजयेत् तदूर्ध्वंशंखपद्ममिथुनादिदेहल्यंतंसंप्रज्य॰
देहल्यग्रतः ष यांयमनाथपा॰ इतिदक्षिणद्वारप्रजा॰ ततःपुनःपश्चिमद्वारंगत्वावामपादपुरःसरंतन्नोरणेनतःप्रविश्यमणिमंडपा
भिमुखस्यामंचस्यदेवताःप्रजयेत् ष रंरत्नसोपानायनमः३इतिरत्नसोपानंप्रजयित्वा तदूर्ध्वेमंचस्यदेवताध्यात्वाप्रजयेत् पश्चिमद्वा
रस्यपुरतोदक्षे ष सांसरस्वतीपा॰वामे ष मांमहालक्ष्मीपा॰ तयोर्मध्येउपर्यधोग्रेषुगौर्यादयोमानवौघांताःप्रज्याः ष गांगौरीपा॰
ष लौंलोकधात्रीपा ष वांवागीश्वरीपा॰ दिव्यौघश्री ष मानवौघश्री॰ततःपुनरुत्तरद्वारेप्राग्वन्मायाङ्गौरीगौर्यादिमानवौघांतंप्रजये

ष

त् ततः पूर्वद्वारि प्राग्वद्रुद्रकालीश्रस्ती गौर्यादिमानवैद्यांतं ततो दक्षिणद्वारि स्वाहाशुभंकरीदेव्यौ गौर्यादिमानवौद्यांतं तत्पूजये
त् ततः पुनः पश्चिमद्वारं गत्वा पालितवज्रविंशद्येः परमैश्वर्यप्रेणामितं प्रपद्ये श्रीमहाभैरवाज्ञां मंदिरं महत् इति ध्यात्वा ४ पश्चिम
द्वाराय त्वमण्डपाय नमः इति मंडपं संपूज्य तालत्रयपूर्वकं द्वारमुद्घाट्य सिद्धार्थाक्षितकुसुमानि नाराचास्त्रयोगेण प्रोक्ष्य संपूज्य तद्ये
भूता ये भूता भुवि संस्थिताः ये भूता विघ्नकर्तारस्तेन श्यंतु शिवाज्ञया ॥ अस्त्राय फडिति तेन मंडपांतः प्रक्षिप्य तस्मान्निर्गच्छंतो विघ्न
संघातान् वामांगसंकोचेन मार्गं दत्वा त्रिविधविघ्नाननुत्सारयेत् देहल्यामेव मङ्गलविधौ वाग्स्त्रमंत्रेवामनसाज्जपन् वामपार्श्विं चात्र
येणभौमान् तालत्रयेणांतरिक्षगान् दिव्यदृष्ट्यावलोकनेन च दिव्यान् विघ्नानुत्सार्य ॐ पारवण्डकारिणो भूता भूमौ ये चांतरिक्ष
गाः दिविलोके स्थिता ये च तेन श्यंतु शिवाज्ञया इति पठित्वा वामपादपुरःसरं देहलीं लंघयन् मण्डपांतः ततो मौनी हृदि देवी परामृश
न् अवहिमानसो योगी यागभूमिं यथाविशेत् इति द्वारपूजा अत्र प्रतिद्वारं गमनासंभवे पश्चिमद्वार एव स्थित्वा तत्तद्द्वाराणि कल्पयि
त्वा पूजयेत् पश्चिमद्वारमेवेति केचित् अथ द्वारदेवताध्यानानि पद्मद्वयवराभीतिभास्वत्पाणिचतुष्टया पद्मवर्णांभजेत्सम्यक्पद्माक्षी
पद्मवासिनी १ अक्षस्रक्पुस्तकधराशरणीचंद्रसमद्युतिः विद्याविद्यामयी देवी भारती भासतां मयि शंखचक्रांकितकरा कुमारी कुटि
लालका मयूरवाहना देवी दुर्गा दुर्गार्तिहेतवे ३ तप्तकार्तस्वराभासा दिव्यरत्नविभूषिता द्वारश्रीः स्वर्णपद्मस्था वराभयकराम्बुजा ४ मु
क्तामाणिक्यसंकाशौ किंचित्स्मितमुखाम्बुजौ अन्योन्यालिंगनपरौ शंखपंकजधारिणौ ५ विशालदंतवर्षाभ्यां शुंडाग्राभ्यां मूर्द्धिलां
छितौ शंखासनसमासीनौ विश्वसंकल्पकल्पकौ ६ तुंदिलं कंबुकनिधिं वसुधारां च्युतस्तनी वामतः पंकजनिधिं प्रियया सहितं यजेत् ७
सिंहराभो भुजाश्लिष्टो रक्तपद्मात्पलालितौ निःसरद्रत्नवर्षाभ्यां पद्माभ्यां मूर्द्धिलांछितौ ८ पद्मासनसमासीनौ विश्वसंकल्पकल्पकौ
तुंदिलं पंकजनिधिं पत्नीवसुमतीमपि ९ पलाशपाटलच्छायं रमणीयं रतिप्रियं पुष्पदंतं चापपुष्पेषुमंतं वंदे मनोभवं १० प्रपद्ये प्रीतिद

ध्यितं पूर्णेन्दुसदृशप्रभं वसंतं नंदनोद्याने वसंतं संततोत्सवे ११ पाशांकुशारुणांभोजपाणिं पाटलतनुं दिले वीरं विघ्नेश्वरं वंदे गजवक्त्रं त्रिलो
चनं १२ कपालशूले बिभ्राणं कपालं कृष्णविग्रहं नीलग्रीवं समर्चामि देवेशं त्तनविद्विषं १३ वराभयकरां सौम्यां सोमकोटिसमप्रभां
भृंगिं गंगां महादेव्याः पादोदकतरंगिणीं १४ वामपादाद्विसंभूतां परदेव्यास्तरंगिणीं वराभयकरां वंदे कालिंदीं कालविग्रहां १५ भक्तोद्देज
गतां वंदे शुभ्रां खचक्रगदांबुजं बिभ्राणं गरुडारूढं धातारं कृष्णविग्रहं १६ शंकररक्ताम् विंदुश्च वराभयकमंडलुं हंसारूढं विधातारं वंदे ह
स्तकमलवितं १७ सिंहारूढां श्यामलांगीं खड्गखेटकधारिणीं श्वेतस्याहं हेलीं वंदे पश्चिमास्यां स्वरूपिणीं १८ पाशाभयकरं वंदे
पूर्णेन्दुसदृशच्छवि वरुणं मकरारूढं द्वारेश्री पादेदैवतं १९ इति पश्चिमद्वारे कारकलितकपालः कुण्डली दंडपाणिस्तरुणति
मिरनीलव्यालयज्ञोपवीती क्रतुसमयसपर्याविघ्नविच्छेदहेतुर्जयति वटुकनाथः सिद्धिदः साधकानां २० धूम्रवर्णो गदाह
स्तः कुवेरो नरवाहनः सोम्यद्वाराधिपः पायात्परदेव्या धनेश्वरः २१ व्यालमग्रजटाधरं त्रिनयनं नीलांजनाद्रिप्रभं दोर्दंडाभयदा
कपालमरुणस्रग्वस्त्रगंधोज्वलं घंटाघुर्घुरमेखलाद्भुतनिमिलद्धुंकारभीमं विभुं वंदे हंसकसर्प्यकुण्डलधरं तं क्षेत्रपालं सदा २२
सितो राजास्यः परशुं दंतपाशं त्रिशूलकं भुजैश्चतुर्भिर्बिभ्राणं मूलकोपरि संस्थितः २३ एवं द्वाराधिपः शक्रः परदेव्याः सुपीतकः
वज्रहस्तः सहस्राक्षः पायादैरावतध्वजः २४ गणेशं श्यामवर्णं च चतुर्वाहुं दिगंबरं वामदक्षोर्ध्वबाहुभ्यां पाशांकुशधरं तथा २५ द
क्षिणाधः करेणैव मधुपूर्णकपालकं दधानं वामहस्तेन देव्या मदनमंदिरं २६ स्पृशन्तं मांगमं ध्यायाद्रक्तायादत्तपाणिना आत्मयोनौ
स्वलिंगं पश्चिमेवामेन पाणिना २७ दयतां खड्गयोनिं जिह्वन्ध्यात्वा प्रपूजयेत् नीलांजनचयप्रख्यं यमं महिषवाहनं दंडमंडितदोर्दं
डं च वद्धाराधिपं स्मरेत् अथ मंत्रस्य देवताध्यानं अक्षस्रक्पुस्तकाभीतिर्दधानो वाक्प्रभिर्वरैः त्रिलोचनो स्मरेद्देवीं सर्वशुक्लां सरस्व
तीं पद्मद्वयवराभीतिर्भास्वत्पाणिचतुष्टया निर्दग्धहेमगौरांगी महालक्ष्मीस्त्रिलोचना पाशांकुशवराभीतीर्बिभ्रती मरुणप्रभां

त्रिनेत्रां मातरं वंदे गौरीं रक्तांबुजोज्ज्वलां नागोत्पलवराभीतीर्बिभ्रतीं कांचनप्रभां मातरं दिव्यरत्नांगीं लोकधात्रीं नमाम्यहं श्वेतां
श्वेतांबरां श्वेतभूषणां स्रग्विलेपनां पद्मद्वयवरादर्शकरां वाग्गीश्वरीं भजे वरांकुशपाशमभीतिशूले करैर्दधानां भवभावमूले
द्युतिं चैनां प्रभदेहकांतिं मायां त्रिनेत्रामनिशं स्मरामि शंखचक्रधनुर्बाणान्धारयंतीं त्रिलोचनां दूर्वादलनिभां वंदे दुर्गां दुर्गार्तिहारि
णीं करालखेटकखड्गं त्रिशूलं बिभ्रतीं करैः भिन्नांजनचयप्रख्यां भद्रकालीं नमाम्यहं ॥४९॥ शक्तिस्वस्तिकमुद्राभीहस्तां चंद्रसमप्रभां
त्रिनेत्रां संस्मरेद्देवीं स्वस्तिं स्वस्तिकरीं परां शालिकल्पलताशार्ङ्ग॰बाणपाणिचतुष्टया ज्वलत्कांचनवर्णाभा सुभं कुर्यात्सुभंकरी ५.
इति ध्यानानि ततो मण्डलमध्ये ब्राह्मणे नमः गृहेशाय नमः नैरृत्यां वास्तुपुरुषाय नमः इति संपूज्य॰ ॐ रक्ष रक्ष हुं फट् स्वाहा॰ इति भू
मिमभ्युक्ष्य ॐ पवित्रवज्रभूमे रक्ष रक्ष हुं फट् स्वाहा इति भूमिमभिमंत्र्य॰ आः सुरेखे वज्ररेखे हुं फट् स्वाहा इति भूमौ विलिख्य तदुपरि स्था
पनमास्तीर्य ब्रह्मविष्णुरुद्रेश्वरसदाशिवानेवादिचतुर्दिक्षु मध्ये च संपूज्य तदुपरि त्रिकोणं संविन्य कोणत्रयमध्ये च कामरूपपूर्ण
गिरिजालंधरोड्यानपीठानि संपूज्य ४ ह्रीं आधारशक्तिकमलासनाय नमः इति मंत्रेणासनं संपूज्य तस्मिन्नासने सुखोपोपविश्य पापवासा
त्कामंडले ध्यात्वा तदुपर्युपविश्य भूमिं प्रार्थयेत ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं च धारय मां देवि पवित्रं कुरु चासनं
मां च पूतं कुरु धरे नतोस्मि त्वां सुरेश्वरि॰ ॐ पृथिव्या मेरुपृष्ठ ऋषिः सुतलं छंदः कूर्मो देवता आसने विनियोगः ॐ प्रणवस्य परब्रह्मऋ
षिर्गायत्री छंदः परमात्मा देवता प्राणायामे विनियोगः ततः प्राणायामत्रयं कृत्वा शिरसि दीपनाथाय नमः दक्षभुजे गं गणपतये नमः
गणानां त्वा॰ वामे दुं दुर्गायै नमः ॐ जातवेदसे॰ दक्षजानुनि क्षं क्षेत्रपालाय नमः ॐ क्षेत्रस्य पतिना वयं वामजानुनि सं सरस्वत्यै नमः ॐ
प्रणो देवी सरस्वती ततः श्रीगुरुभ्यो नमः परमगुरुभ्यो नमः परमेष्ठिगुरुभ्यो नमः इति नमस्कृत्य ततः पार्ष्णिघातकरास्फोटसहितं दिवित
वङ्कैः पातालभूनभोलीनान्विघ्नानुत्सारयेद्बुधः इति विघ्नानुत्सार्य॰ उग्रपाशुपतास्त्रेण वामहस्ततलं हित्वा गाणेशं वंसमारभ्य संस्पृशेत्

वि· ली·व· पं· ६०

60

दक्षपाणिना प्रसृज्य दक्षिणं पार्ष्णिं सकृद्देवो क्रमार्गतः इतिकरशुद्धिं विधाय दिग्बंधं कुर्य्यात् तद्यथा लं इंद्राय नमः इंद्रदि
ग्बंधकेन वज्रास्त्रेण मस्तकाय स्वाहा ॐ सुदर्शनाय विद्महे महाज्वालाय धीमहि· तन्नश्चक्रं प्रचोदयात् उग्रवीरं महाविष्णुं ज्वलंतं स
र्वतोमुखं नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहं एवं दशदिग्बंधनं कृत्वा· वह्निप्राकाराय नमः सहस्रारं हुं फट् सुदर्शनाग्नि
प्राकाराय नमः श्रौं क्लीं स्फुर २ ज्वल २ ज्वल ततततनु नू प्रचट प्रचट प्रचट कह कह· वम वम बंध बंध घातय घातय हुं फट्· घोराग्निप्राका
राय नमः इति जलेनाग्निप्राकारद्वयं कुर्य्यात् त्रिरग्निवेष्टं कृत्वा गणेशं पंचमी ततः दुर्गां विघ्नं च क्षेत्रभं मध्ये वं च सुदर्शनं एताः
समयविधायश्च यजपद्मस्वरूपिणी तये एवं रक्षां पूरं कृत्वा भूतशुद्धिमथाचरेत् एते मंत्रा उद्धारपटले चोद्धृत्याः तदंतरे· स्थापये
द्दक्षिणे भागे पूजाद्रव्याणि देशिकः सुवासितोदकसंपूर्णं सव्ये कुंभं सुशोभनं प्रक्षालनाय करयोः पश्चात्पात्रं निवेशयेत् घृतप्रज्वा
लितान्दीपान्स्थापयेत्परितः शुभान् दर्पणं चामरं छत्रं तालवृंतं मनोहरं कुलचूडामणिं· नानाविधानि पुष्पाणि गंधानि विविधानि
च कर्पूरजातिपुष्पादिवासितं पटवासितं तांबूलं देवद्रव्याणि धूपदीपादिकं च यत् सर्वालंकारभूषादि वस्त्रादीनि कुलेश्वरि मूल
मंत्रजप्ततोयैः संप्रोक्ष्य स्थापयेत्ततः सर्वं स्वदक्षिणे स्थाप्यं वामे वार्घ्यं निवेशयेत् पश्चिमे देवतायास्तु कुलद्रव्याणि धारयेत् नैवे·
ॐ पुष्पकेतुराजार्हते सर्वगताय सम्यक्संबुद्धाय ॐ पुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्पसंभवे पुष्पचयावकीर्णे हुं फट् स्वाहा· इ
ति मंत्रेण पुष्पादिशोधनं श्रौं रक्ष रक्ष हूं फट् स्वाहा· इति मंत्रेण हृदि हस्तं दत्वा आत्मरक्षां कुर्य्यात् ततः प्राणायामत्रयं
कृत्वा भूतशुद्धिं कुर्य्यात् शरीराकारभूतानां भूतानां यद्विशोधनं अव्ययब्रह्मसंपर्काद्भूतशुद्धिरियं मता सुषुम्णावर्त्मनात्मानं
परमात्मनि योजयेत् योगयुक्तेन विधिना चिन्मंत्रेण समाहितः चिन्मंत्रेण परमात्ममंत्रेणानयः श्रौं क्लीं हंसः सोहं स्वाहा इति मंत्रे
ण स्वैकमूलाधारादिषट्चक्राणि विचिंत्य हृदयचक्रस्थितं जीवात्मानं मनसा सह सुषुम्णावर्त्मना कुलकुण्डलिनीं जीवात्मनाम

हंसंब्रह्मपरमशिवेलीनंविचिंतयेत् ततःपादादिजानुपर्यंतंपृथिवीस्थानंपीतवर्णंचतुरस्राकारंब्रह्मदैवत्यंनिवृत्तिकलात्म
कंतन्मध्येलंवीजंपंचोद्धातप्रयोगेणतेजसिलेसंलापयामि जान्वादिलिंगपर्यंतंजलस्थानंशुक्लवर्णंपद्मलांछितार्धचंद्राका
रंविष्णुदैवत्यंप्रतिष्ठाकलात्मकंतन्मध्येवंवीजंसचतुरुद्धातप्रयोगेणतेजसिसंलापयामि लिंगादिनाभिपर्यंतंतेजःस्थानंरक्तव
र्णंत्रिकोणाकारंरुद्रदैवत्यंविद्याकलात्मकंतन्मध्येरंवीजंत्रिरुद्धातप्रयोगेणवायौसंलापयामि॰ नाभ्यादिहृदयपर्यंतंवा
युस्थानंधूम्रवर्णंषट्कोणाकारंषड्बिंदुलांछितंईश्वरदैवत्यंशांतिकलात्मकंतन्मध्येयंवीजंद्विरुद्धातप्रयोगेणाकाशेसंलाप
यामि॰ हृदयादिकंठपर्यंतमाकाशस्थानंस्वच्छवर्णंवृत्ताकारंषड्बिंदुलांछितंईश्वरदैवत्यंशांतिकलात्मकंतन्मध्येहंवीजंएकोद्धात
प्रयोगेणहंकारेसंलापयामि॰ कंठादिभ्रूमध्यपर्यंतेऽहंकारस्थानंत्रिवर्णंदंडाकारंसदाशिवदैवत्यंसर्वकलात्मकंतन्मध्ये
हंसः वीजंसर्वोद्धातप्रयोगेणपुरुषेसंलापयामि॰ भालादिसीमंतपर्यंतंप्रकृतिस्थानंबालार्कवर्णंयोन्याकारंआनंदशिवदैव
त्यंकलास्वरूपंतन्मध्येहंवीजंअघोद्धातप्रयोगेणपुरुषेसंलापयामि सीमंतादिब्रह्मरंध्रपर्यंतंपुरुषस्थानंउहीमवर्णंलिंगाका
रंचैतन्यदैवत्यंनिष्कलंतन्मध्येनादांतंवीजंपरविंदुस्वरूपंनिरुद्धातप्रयोगेणचिच्छक्तौसंलापयामि ब्रह्मरंध्रेचिच्छक्तिस्थाने
कर्पूरवर्णंसहस्रारंआनंददैवत्यंनिराकारस्वरूपंतन्मध्येश्रींवीजंसंहारध्यानप्रयोगेणपरब्रह्मशिवात्मकेचिदानंदघनेचिंतया
मि॰ इतिविभाव्यॐपृथिव्यप्तेजोवाय्वाकाशगंधरसरूपस्पर्शशब्दघ्राणरसनाचक्षुस्त्वक्श्रोत्रपादोपस्थपायुपाणिवाग्गमनानं
दविसर्गादानवचनाहंकारमनोबुद्धिचित्तविकल्पसंकल्पाध्यवसायनिश्चयजीवात्मपरमात्माभिधसमस्ततत्त्वात्मकंप्रपंचस्वरूपे
स्थूलसूक्ष्मशरीरद्वयंसंहारक्रमेणपृथिवीमप्सुअप्स्तेजसितेजोवायौवायुमाकाशेआकाशमहंकारेअहंकारंमहतिमहांतम
व्यक्तौप्रकृतिंपुरुषेपुरुषंपरमशिवेयोजयामिस्वाहा इदंस्थूलशरीरंशोधयामिस्वाहा॰ इतिसस्थानानिस्थूलकारणानिसकार्या

णि सकारणानि सदैवतानि सांगोपांगानि स्थूलानि सूक्ष्माणि णि च तत्त्वानि च स्वस्वकारणेषु संहारक्रमेण लीनानि कृत्वा सहस्र
दलकमलपरमशिवे बीजभावेन लीनानि चिंतयेत् परमशिवं च चिद्घनात्मकमानंदघनं विनिवेश्य निर्मलधिया निश्चलसर्वें
द्रियो योगी योगफलं प्रयाति स ततं निस्पंदितो निष्क्रियः एवंक्रमेण सच्चिदानंदमयः स्वरूपे तिष्ठेत् इति संहारक्रमः अथ पापपु
रुषचिंतनं वामकुक्षिगतं पापपुरुषं कज्जलप्रभं॰ ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयं सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं
तत्संसर्गिपदद्वंद्वम् अंगप्रत्यंगपातकं उपपातकरोमाणं रक्तश्मश्रुविलोचनं खड्गचर्मधरं क्रूरं पापमेवं विचिंतयेत् इति ध्यात्वा यं
पापपुरुषं शोषय २ शोषयामि स्वाहा॰ यंबीजं धूम्रवर्णं षोडशवारं जपन् वामनासया वायुमापूर्य॰ तदेव चतुःषष्टिवारं जपन् कुंभ
कयोगेन हृदयाद्रुद्रेन षट्कोणादागतेन महावायुना पापपुरुषं शुष्कं विचिंत्य तदेव बीजं द्वात्रिंशद्वारं जपन् दक्षिणनासया वायुं रे
चयेत् रं शुष्कपापशरीरं दह २ दहयामि स्वाहा॰ रंबीजं रक्तवर्णं षोडशवारं जपन् पिंगलया वायुमापूर्य तदेव चतुःषष्टिवारं ज
पन् कुंभकयोगेन नाभेरुदितेन त्रिकोणादागतेन महता वह्निना पापपुरुषं दग्धं विचिंत्य तदेव द्वात्रिंशद्वारं जपन् इडया वायुं रे
चयेत्॰ ठं॰ चंद्रमंडले प्रेरय २ प्रेरयामि स्वाहा॰ ठ इति चंद्रबीजं शुक्लवर्णं १६ जपन् इडया वायुमापूर्य ६४ वारं जपन् कुंभकयोगेन
सहस्रारमध्ये मूर्तेरुच्चैरुदितं विषाह्लादकं चंद्रबीजं विचिंत्य ३२ वारं जपन् पिंगलया रेचयेत्॰ वं परमामृतं वर्षय २ वर्षयामि स्वाहा॰
वं इति वरुणबीजं शुक्लवर्णं १६ वारं जपन् पिंगलया वायुमापूर्य ६४ वारं जपन् कुंभकयोगेन तस्माच्चंद्रबिंबान्मातृकामयीमहावृ
ष्टिमुत्पाद्य तत्र स्नपनादिकमाह्लादितं विचिंत्य ३२ वारं जपन् इडया वायुं रेचयेत्॰ लं शरीरमुत्पादय २ उत्पादयामि स्वाहा॰
लमिति पृथिवीबीजं पीतवर्णं १६ वारं जपन् इडया वायुमापूर्य ६४ जपन् कुंभकयोगेन ॐ परमात्मजीवात्मचित्तबुद्धिमनोहंका
र निःश्वासप्रश्वासमयसंकल्पविकल्पवचनादानविसर्गानंदगमनवाक्पाणिपायूपस्थपादश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणशब्दस्पर्शरूप

रसगंधाकाशवायुतेजोजलपृथिव्यात्मकसमस्ततत्वात्मकं प्रपंचरूपं स्थूलसूक्ष्मशरीरद्वयं संहारक्रमेण पृथ्व्यप्भूतानां पर
मशिवचिच्छक्तिभ्यां निक्षिपति प्रयोगेण पुरुषं पुरुषात् अघोरात्मेति प्रयोगेण प्रकृतिं प्रकृतेरहंत्वेति प्रयोगेण महांतं महतः
सर्वोत्पत्ति प्रयोगेणाकाशमाकाशाद्विरूत्मेति प्रयोगेण वायुं वायोस्त्रिकत्मेति प्रयोगेण तेजस्तेजसश्चतुरात्मेति प्रयोगेण जले
जलात्पंचात्मेति प्रयोगेण पृथिवीं पृथिव्याः षडुत्मेति प्रयोगेनोत्पादयामि स्वाहा इति सस्थानानि सान्द्राणि सकारणानि स
कार्याणि सदेवतानि सांगोपांगानि स्थूलानि सूक्ष्माणि च सर्वाणि तत्वानि संहारक्रमेण परमशिवचिच्छक्तिसकाशात् स्वस्वका
रणेभ्य उत्पादितानि कृत्वा पादादिकृतयोचतुरस्रादागत महत्या पृथिव्या उपष्टभ्य देवतापूजायोग्यं पवनपूर्णं शरीरमुत्पादितं विचिं
त्य तत्वानि स्वनिजनिजस्थानेषु स्थितानि कृत्वा तदेवलं वीजं हाविंशहावं जपन् पिंगलया वायुमापूर्य १६ वारं जपन् इडया वायुं रे
चयेत् इति षट् प्राणायामा भवंति आत्मानं हृदयांभोजात् आनयेत्परमात्मनः मनुना हंसदेवस्य कुर्यात् न्यासादिकं ततः ओं हंसः
सोहं स्ववरावत शिवपदाज्जीवपदेन सुषुम्णावर्त्मना मूलशृंगाटं सुषुम्ल सोलस ज्वल ज्वल प्रज्वल प्रज्वल ओं हंसः सोहं इति कुं
डलिनीरूपधारिणीं चिच्छक्तिं जीवात्मना सह सृष्टियोगेन स्थानात्स्वदेवतैः सह सुषुम्णांतरवर्तिनि चित्राख्यनाडी मध्यमार्गेण
षट्चक्रभेदक्रमेण ब्रह्मरंध्रेनो मूलाधारमानीय स्थापयेत् मूलाधाराज्जीवात्मानं हृदि संस्थितं चिंतयेत् इति भूतशुद्धिः प्राणप्र
णप्रतिष्ठा· ओं अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मा विष्णुरुद्रा ऋषयः ऋग्यजुः सामानि छंदांसि चैतन्यरूपा प्राणशक्तिर्देवता
आं बीजं ह्रीं शक्तिः क्रौं कीलकं प्राणस्थापने विनियोगः इति यथास्थाने विन्यस्य ओं कं खं गं घं ङं ओं आं आकाशवायुतेजोजल
पृथिव्यात्मने अंगुष्ठाभ्यां नमः इं चं छं जं झं ञं ईं शब्दस्पर्शरूपरसगंधात्मने तर्जनीभ्यां नमः उं टं ठं डं ढं णं ऊं श्रोत्रत्वक्चक्षुर्जि
ह्वाघ्राणात्मने मध्यमाभ्यां नमः एं तं थं दं धं नं ऐं वाक्पाणिपादपायूपस्थात्मने अनामिकाभ्यां नमः ओं पं फं बं भं मं औं व

चनादानविसर्गानंदगमनात्मने कनिष्ठिकाभ्यां नमः अं यं रं लं वं शं षं सं हं ळं क्षं अः चित्तबुद्धिमनोहंकारात्मने करतलकरपृष्ठा
भ्यां नमः एभिरेव ज्ञातियुक्तैः षडंगानि· आं नमः नाभेश्चरणपर्यंतं ह्रीं नमः हृदयान्नाभिपर्यंतं· क्रौं नमः मूर्द्धादिहृदयपर्यंतं· यं त्वगा
त्मने नमः रं असृगात्मने नमः लं मांसात्मने नमः वं मेदआत्मने नमः शं अस्थ्यात्मने नमः षं मज्जात्मने नमः सं शुक्रात्मने नमः हं प्राणा
त्मने नमः ळं जीवात्मने नमः क्षं परमात्मने नमः एवं विन्यस्य प्राणशक्तिं ध्यायेत् रक्ताब्धिपोतारुणपद्मसंस्थां पाशांकुशौ विभ्र
शरासबाणान् शूलं कपालं दधतीं कराब्जैः रक्तां त्रिनेत्रां प्रणमामि देवीं इति ध्यात्वा ॐ आं ह्रीं क्रौं श्रीं स्रां स्रीं ह्रीं क्रौं यं रं लं वं शं षं सं हों
सों हं हंसः श्रीमन्महात्रिपुरसुंदर्याः प्राणा इह प्राणाः १ जीव इह स्थितः २ सर्वेंद्रियाणि ३ वाङ्मनश्चक्षुःश्रोत्रघ्राणप्रा
णा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा· इति ज्ञानमुद्रयादिहृत्स्थं दत्वा वाक्यं पठेत् क्रों ह्रों हंसः इति सर्वानंदमयदेहं हृदि चिंतयेत्·
प्रधानदेवतात्मकमात्मानं चिंतयेत् इति प्राणप्रतिष्ठा· इति श्रीविद्यार्णवे पंचमः श्वासः ५ अथ मातृकादिन्यासाः ॥
ततो देहस्य सन्नाहं सम्यक्न्यासं समाचरेत् अंतर्बहिष्ठा च कलायुता च श्रीकंठविन्यासादिसमन्विता च लज्जा रमा कामपृथक्क
मेद्दाः प्रपंचयागो दश मातृकाः स्युः गुदात्तु द्व्यंगुलादूर्ध्वं सुषुम्णामूलमध्यगं वादिवेदार्णलसितं पंकजं कनकप्रभं तस्या
विद्युल्लताकारतेजोरूपा मणीयसी कुलकुंडलिनीं मूर्ध्नि नयेत् षट्चक्रभेदतः द्वादशांतेंदुमध्यस्थ एकैकं मातृकांबुजे नवनी
तनिभं ध्यात्वा तु तत्कुंडलिनीत्विषा· तेजोजलेन विभिः सार्द्धं मातृकान्यासं समाचरेत् ततः अकारादिषट्स्वरान् करतलतत्पृष्ठ
तद्धाम्नि क्रमेण विन्यस्यावशिष्टदशस्वरान्दशस्वंगुलीषु विन्यस्याद्यादि तं तन्मातृकामुच्चरन् करसंपुटीकुर्यात् यथा· अकौ
हेमाभे च पंच कूर्परे करयोस्तले तत्पृष्ठे च तदग्रे च करसंपुटिकृद्दाहृता इति मातृकाकरसंपुटिः अथांतर्मातृकान्यासः तत्र सौः
ऐं क्लीं सौः कुंभकं· आपूरकं रेचकं· इति क्रमेण प्राणायामत्रयं कृत्वा· अस्याः अंतर्मातृकायाः ब्रह्मा ऋषिः गायत्री छंदः श्रीमातृ

कामसरस्वती देवता हलो बीजानि स्वराः शक्तयः ज्ञाता व्यक्तिः कीलकं मम शरीरशुद्ध्यर्थं न्यासे विनियोगः इति विन्यस्य । अं
कं खं गं घं ङं । आं हृदयाय नमः इत्यादिना षडङ्गानि विन्यस्य ध्यायेत् तथा संहितायां अथ वक्ष्ये महेशानि मातृकोलो
कमान्तरं प्रकाशादि हकारान्तवर्णावयवदेवता ऋषिर्ब्रह्मास्य मंत्रस्य गायत्रं छन्द उच्यते मातृका देवता देवि हलो बीजानि
शक्तयः स्वरास्तु परमेशानि ज्ञाता व्यक्तिस्तु कीलकं अनिर्वाच्या हलो वर्णाः शक्त्या व्यक्ता भवन्ति हि शक्त्या विना शिवे सूक्ष्मे
नाम धाम न विद्यते अस्वरूपा हलो वर्णाः शक्त्याः सन्नाः पराङ्मुखाः स्फुरन्त्यास्ते दोच्चार्य्याः सम्मुखाः व्यक्तवर्णकाः ऋॠऌॡ
परित्यज्य षड्ह्रस्वस्वरमध्यगाः वर्णाः षट्चक्रमेणैव सममः क्रोधसंयुतः एतेनेति लिप्यदेवेशि षडङ्गानि प्रविन्यसेत् कलाप
त्रांबुजे कंठस्वरान्सम्यक्तु विन्यसेत् हृद्यर्कपत्रे तद्वर्णान्नाभौ दशदले न्यसेत् दशवर्णान् लिंगमध्ये षट्दले षट्तथैव सवी चतुर्द
ले तथाधारे चतुर्वर्णांस्तेषां न्यसेत् भ्रूमध्ये द्विदले हक्षौ तु अन्तेन मातृकां न्यसेत् तेजोनतेः आधारे लिंगनाभौ हृदयसरसिजे तालु
मूले न ललाटे द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्द्धे चतुष्के वासान्ते बालमध्ये डफकठसहिते कंठदेशे स्वराणां हंक्षतत
त्त्वार्थयुक्तं सकलदलगतं वर्णरूपं नमामि इति ध्यात्वा न्यसेद्विद्वान्तमातृकाः अथ बहिर्मातृकाः ऋष्यादिन्यासं प्रागुक्तवद्वि
न्यस्य ध्यायेत् ध्यायेद्वर्णस्वरूपाभ्यां स्ववक्त्राक्रमेण हि कचवर्गकरां रम्यां टतवर्गपदाम्बुजां पवर्गचारुपार्श्वांगलसत्का
तोदरीं परां यशवर्गांगसद्भगां पीनोन्नतघनस्तनीं नीतं वेणीं च गहनां शुकाकारां ललामसमध्यमां शुक्लमाल्यगलां गांगीशु
क्लांशुकसुशोभितां चित्रालिखितसत्याङ्गीं समग्रवरदायिनीं इति ध्यात्वा । ब्रह्मरंध्रे तथा वक्त्रवृत्ते नयनद्वये स्फटिका
सापुटद्वंद्वगंडोष्ठद्वयकेषु च दंतयुग्मे च मूर्द्धास्ये हृदये षोडशाविन्यसेत् दोःपत्संधिषु साग्रेषु पार्श्वयुग्मे न्यसेत्क्रमात् ए
ष्टनाभिहृदये चैव जठरे विन्यसेदथ त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः प्राणजीवौ च परमो यकारादिषु संस्थिताः

वि.
नि.त.
ष.
६३

63

क्रमेण देवदेवेशि न्यस्तव्यां पतदात्मकाः हृदोर्मूले भुजस्यास्य तथा परगले न्यसेत् कक्षहृये हृदारभ्य पाणिपादयुगे तथा
जठराननयोर्न्यस्येदित्येनमात्रुपिणी अनेन न्यासयोगेन मन्त्री वर्णस्वरूपवान् इतिवह्निर्मातृका अथ सृष्टिमातृका के-
वलां मातृकां न्यस्य ब्रह्मचारी भवेद्यदि विसर्गसहितां ताञ्च सृष्टिसंज्ञां न्यसेद्बुधः इति सृष्टिमातृका अथ स्थितिमातृका
केवलां मातृकां न्यस्य गृहस्थः साधको यदि विसर्गबिन्दुसहितां मकाराद्यां स्थितिं न्यसेत् ध्यानं तु सिन्दूरकान्तिमभिताभ-
रणां त्रिनेत्रां विद्यात्रमूर्तमृगयोनवदन्धयानां पार्श्वस्थितां भगवतीमपि काञ्चनाभां ध्यायेत्कराब्जधृतपुस्तकवर्णमालां
इति ध्यात्वा ॐ नमः इत्यादि बिन्दुविसर्गसहितान् ठकारावसानान् वर्णान् तत्तत्स्थानेषु न्यसेदिति स्थितिमातृका अथ संहार-
मातृका केवलां मातृकां न्यस्य वानप्रस्थोऽथवा यतिः बिन्दुयुक्तां विलोमेन संहारमातृकां न्यसेत् ध्यानं तु अक्षस्रजं ह-
रिणपोतमुदग्रटंकं विद्याकरैरविरतं दधतीं त्रिनेत्रां अर्धेन्दुमौलिमरुणामरविन्दवासां वर्णेश्वरीं प्रणमत स्तनभारनम्रां
इति ध्यात्वा क्षं नमः इत्यादि बिन्दुसहितान् विलोमतस्तान् वर्णान् तत्स्थानेषु न्यसेदिति संहारमातृका अथ कलामातृका के-
वलां मातृकां न्यस्य तारभक्तो भवेद्यदि प्रणवांशकलायुक्तां मातृकां विन्यसेत्सुधीः प्रजापतिऋषिः प्रोक्तो गायत्रं छन्द ईरितं
कलासरस्वती देवी देवता परिकीर्तिता ॐ बीजं नमः शक्तिः कीलकं तु कलाः स्मृताः प्रणवहृदयमध्येष्वपि षडैर्हीं च सु स्वरैः
षडङ्गानि प्रविन्यस्य ध्यायेद्देवीं परां शिवां हस्तैः पद्मं रथाङ्गं गुणमथ हरिणं पुस्तकं वर्णमालां टंकं शुभ्रं कपालं दरममृतल-
सद्धेमकुम्भं वहन्तीं मुक्ताविद्युत्पयोदस्फटिकनवजपाबन्धुरैः पञ्चवक्त्रैस्त्र्यक्षैर्वक्षोजनम्रा सकलशशिनिभा भारदात्मानमामि
इति ध्यात्वा ॐ अं निवृत्तिकलायै नमः इत्यादि मातृकास्थानेषु न्यसेदिति कलामातृका अथ श्रीकण्ठादिमातृका केवलां
मातृकां न्यस्य शिवभक्तो भवेद्यदि श्रीकण्ठादिशक्तियुक्तां मातृकां विन्यसेत्सुधीः ऋषिस्तु दक्षिणामूर्तिश्छन्दो गायत्रमी-

६३

रितं अर्द्धनारीश्वरो देवो देवता परिकीर्तिता ह्सौं बीजं नमः शक्तिः शिवशक्तिस्तु कीलकं षड्दीर्घयुक्तबीजेन षडंगानि प्रविन्यसे
त् बंधूककांचननिभं रुचिराक्षमालां पाशांकुशौ च वरदं निजबाहुदंडैः बिभ्राणमिंदुशकलाभरणं त्रिनेत्रमर्द्धांबिकेशमनि
शं वपुराश्रयामः इति ध्यात्वा ह्सौः अं श्रीकंठेशाय पूर्णोदर्यै नमः इत्यादि न्यसेदिति श्रीकंठादिमातृका अथ केशवादिमातृका
न्यासः केवलां मातृकां न्यस्य विष्णुभक्तो भवेद्यदि केशवादिशक्तियुक्तां मातृकां विन्यसेद्बुधः प्रजापतिर्ऋषिः प्रोक्तो गायत्रं छं
द ईरितं अर्द्धलक्ष्मीहरिः साक्षाद्देवता परिकीर्तिताः कामबीजं तु बीजं स्यान्नमः शक्तिरुदाहृता विश्वलक्ष्मीकीलकं तु विनियो
गस्तु पूर्ववत् षड्दीर्घकामराजेन षडंगानि प्रविन्यसेत् हस्तैर्बिभ्रत्सरसिजगदाशंखचक्राणि विद्यापद्मादर्शौ कनककलशं मे
घविद्युद्विलासं वामोत्संगस्तनमविरलाकल्पमाश्लेषलोभाद्देवीं भून्नेव पुरवतु वः पुंडरीकाक्षलक्ष्म्याः इति ध्यात्वा क्लीं श्रीं अं
केशवाय कीर्त्यै नमः इत्यादि न्यसेदिति केशवमातृका अथ शक्तिमातृकान्यासः केवलां मातृकां न्यस्य भुवनेशीं भवेद्यदि भुव
नेशीबीजसंपूर्वां मातृकां विन्यसेत्सुधीः ऋषिः शक्तिः समुद्दिष्टो गायत्रं छंद ईरितं भुवनेशी मातृकाख्या देवता देववंदिता क्लीं बी
जं तु नमः शक्तिर्मूलप्रकृतिकीलकं मायाषड्दीर्घकेनैव षडंगानि समाचरेत् उद्यत्कोटिदिवाकरप्रतिभटां तुंगोरुपीनस्तनी
मूर्द्धा ह्रीं इंदुकिरीटहाररशना मंजीरसंशोभिता बिभ्राणा करपंकजैर्जपवटीपाशांकुशौ पुस्तकं दिव्या ह्रीं जगदीश्वरी त्रिनयना
पद्मानिषण्णास्तु वः इति ध्यात्वा क्लीं अं नमः इत्यादि न्यसेदिति भुवनेश्वरीमातृका अथ लक्ष्मीमातृका केवलां मातृकां न्यस्य
लक्ष्मीपूजारतो यदि लक्ष्मीबीजसमायुक्तां मातृकां विन्यसेत्सुधीः ऋषिर्भृगुस्तु गायत्रं छंदो लक्ष्मीस्तु मातृका देवता श्रीं नमो
बीजं शक्तिः प्रकृतिकीलकं षड्दीर्घलक्ष्मीबीजेन षडंगानि प्रविन्यसेत् विद्युद्दामसमप्रभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैः शुंडा
दंडसमुद्धृतामृतघटैरासिच्यमानां श्रियं बिभ्राणां करपंकजैर्जपवटीं पद्मद्वयं पुस्तकं भास्वद्रत्नसमुज्ज्वलांशुचनतां ध्याये

वि॰
रा॰त॰
ष॰
६४

64

जगत्स्वामिनी॰ इति ध्यात्वा श्रीं ॐ नमः इत्यादिन्यसेदिति लक्ष्मीमातृका॰ अथ कामेश्वरीमातृका॰ केवलांमातृकांन्यस्य
कामेश्वरीएजकोयदि कामबीजेन संयुक्तां मातृकां विन्यसेत्सुधीः ऋषिः संमोहनः प्रोक्तो गायत्रं देवतास्मृताः कामेश्वरी च क्लीं
बीजं नमः शक्तिस्तु कीलकं षट्दीर्घ कामबीजेन षडंगानि प्रकल्पयेत् बालार्ककोटिरुचिरां स्फटिकाक्षमालां कोदंडमि
क्षुजनितं स्मरपंचबाणान् विद्यां च हस्तकमलैर्दधतीं त्रिनेत्रां ध्यायेत्समस्तजननीं नवचंद्रचूडां इति ध्यात्वा क्लीं ॐ नमः इत्या
दिन्यसेदिति कामबीजमातृका अथ संमोहनीमातृका॰ केवलां मातृकां न्यस्य त्रिपुराणायकोयदि शक्तिश्रीकामसंयुक्तां
मातृकां विन्यसेत्सुधीः ऋषिः संमोहनः प्रोक्तो देवता मनोः सम्मोहनी च क्लीं बीजं ह्रीं शक्तिः श्रीं च कीलकं बीजद्वयविहीनाद्
ह्रां षडंगानि समाचरेत् ध्यायेयमन्त्रचलयेत्त्वं शमतासः पाशान्पद्मद्वयाकुशपाशान्नवपुस्तकं च श्राविभ्रतीं निजक
रैररुणांकुचार्तांसिम्मोहिनीं त्रिनयनां तरुणेन्दुचूडां ह्रीं श्रीं क्लीं ॐ नमः इत्यादिन्यसेदिति सम्मोहिनीमातृका प्रपंचयागलग्ना
गेव प्रपंचितः इति दशविध मातृका एते सामान्यतः प्रोक्ताः सर्वत्र दशमातृकाः इत्युक्तत्वात् दुर्वासोवाक्यं न्यासं हत्वा गणे
शग्रहभगणमहायोगिनीशक्तिपीठैः षड्भिः श्रीमातृकार्णैः सहितवज्रकलेरष्टवाग्देवताभिः सश्रीकंठादियुग्मैर्विमलनिज
तनोकेशवाद्यैस्तुतत्वैः षड्भिः शाड्भिर्यराद्यैर्भगवति भवती यः स्मरेत्सत्वमेवेति सचवर्णमातृका कलामातृका मूर्तिमातृका प्रपं
चयागमातृकान्यासाख्यः संग्रहस्तु न्नविधः तत्रवर्णमातृकान्यासो दशविधः श्रीविद्यांगभूतः तथा चोक्तं शुद्धं विंदुयुतं विस
र्गसहितं स्वलेपयासंयुतं बालासंपुटितं तु तथा च परयाश्रीविद्यपालंकृतं श्रारोहादवरोहतस्त्रुतेन्यासं सदातं हंसयोर्योजना
नाति सठाव सर्वजगतां सृष्टिस्थितिध्वंसकृदिति अथ बालासंपुटितमातृकान्यासः ऋषिस्तु दक्षिणामूर्तिः पंक्तिश्छंदउदाहृ
तं तथा वर्णमयी बाला देवता परिकीर्तिता वाग्भवं बीजमाख्यातं तार्तीयं शक्तिरुच्यते कामबीजं कीलकं स्यात्क्लीं विद्यांगत

६४

याप्युनः न्यासेच विनियोगः स्याह्वालाबीजत्रयेणैव द्विरावृत्त्याक्रमेणैव षडंगन्यासमाचरेत् अरुणाशोरवरकुंडलोगादमणिग्रै
वेयहारोर्मिकाविद्योतन्हलयादिककणकटीसूत्रास्फुरन्नूपुरा माणिक्याद्यर्खवेधुरमनभरामि देः कलाविभ्रंती पाशांकुशपु
स्तकाक्षवलयंदधानोर्ध्वबाहादितः पूर्णेन्दुप्रतिमप्रसन्नवदनानेत्रत्रयोद्भासिता मिंदुत्वी रवलत्तुंगाग्रविलसन्मात्यानुलेपांचरा पु
ष्पाशालिपिञ्छभिता विलज्जगह्वा देवतादेवतां मूलाधारसमुद्भूतां भगवतीं वर्णात्मजे चिंतयेत् ऐं पं क्लीं श्रीं यं ह्रीं सौं ग्रं सोः क्लीं
ऐं इत्यादिन्यसेदिति बालासंपुटितमातृकान्यासः अथ परासंपुटितमातृकान्यासः ऋषिर्ब्रह्मासमुद्दिष्टो गायत्रं छंद ईरितं परास
रस्वती देवी मातृकादेवतास्मृता षह्रीं ह्रीं परयाचैव षडंगानि समाचरेत् अकलंकशशांकाभा त्र्यक्षा चंद्रकलावती मुद्रापुस्तल
सद्बाहुः प्रणमामि परांकलां ध सौः अं सौः इत्यादिन्यसेदिति परामातृका अथ श्रीविद्यामातृकान्यासः ऋषिस्तु दक्षिणामूर्ति
श्छंदः पंक्तिरुदाहृता देवता मातृकारूपा महात्रिपुरसुंदरी कूटत्रयं द्विरावृत्त्या षडंगानि समाचरेत् आरक्ताभां त्रिनेत्रां मणिमुकु
टवतीं रत्नताटंकरम्यां हस्ताम्भोजैः सपाशांकुशमदनधनुःसायकैर्विस्फुरंतीं आपीनोत्तुंगवक्षोरुहतटविलुठत्तारहारोज्ज्वलांगी
ध्यायेदंभोरुहस्थामरुणनिवसनामीश्वरीमाश्रयामि ध कलं अं नमः शिरसीत्यादिन्यसेदिति श्रीविद्यामातृका अथ हंसमातृ
का ऋषिस्तु दक्षिणामूर्तिश्छंदो गायत्रमुच्यते हंसगौरी महादेवी मातृकादेवतास्मृता हंसा षह्रीं युक्तेन षडंगन्यासमाचरेत् उ
द्यद्भानुस्फुरिततडिदाकारमर्धांबिकेशं पाशाभीतीवरदपरशुं संदधानं कराब्जैः दिव्याकल्पैर्नवमणिमयैः शोभितं विश्वमूलं सौम्या
ग्नेयं वपुरवतु वश्चंद्रचूडं त्रिनेत्रं ध हंसः अं नमः शिरसीत्यादिन्यसेदिति हंसमातृका अथ परमहंसमातृका ऋषिः परमहंसः स्याद्धि
राट्छंद उदाहृतं चिन्मयी देवता प्रोक्ता परमात्मस्वरूपिणी प्रणवद्वयमध्यस्थवर्णैः कुर्यात्षडंगकं श्रीमत्परात्ममममृतं भित्तवर्ण
रूपं मानेः गम्यपदवीपरिवीयमानां विद्यानसद्धकलशं दधतीं च मुद्रां ध्यायेत्समस्तजननीं विशदां त्रिनेत्रां ध सोहं हंस नमः अ

वि॰
ए॰ व॰
षे॰
६५

65

दिविलोमेनततत्स्थानेषुन्यसेदिमरमहंसमातृका॰ अथकलान्यासः सतुपंचविधः तारोन्यकला॰ कामकला॰ सोमकला॰ त्रि
मूर्त्तिकला॰ अष्टत्रिंशत्कलाचेति तारोन्यकलान्यासस्तुप्रागेवोक्तः विशेषस्तु॰ ताराद्यवर्णसंयुक्तान्यस्तव्यास्तानभोन्विता स्थाने
ष्वेतेष्वथपुनर्मातृकायाकलान्यसेत् तारस्यपंचभेदेभ्यः पंचाशद्वर्णगाःकलाः स्वरकलान्यासोनन्तरं सदाशिवेनसंजातानादादि
ताःस्मितत्विषः अंतस्सकृत्सककराःकपालाध्यकरांबुजाः इतिध्येयाः कचवर्गकलान्यासोनन्तरं अकाराद्ब्रह्मणोजाताःस्मृताःसप्रवाभा
करप्रभाः करांबुजस्थताद्दस्वकांकज्ञाभयकुंडिकाः इतिध्येयाः टतवर्गकलान्यासोनन्तरं उकाराद्विष्णुतोजाताःस्मृतास्तमालदलसन्नि
भा अभीतिवरचक्रेष्टवाहचःपरिकीर्तिताः इतिध्येयाः पयवर्गकलान्यासोनन्तरं ईश्वरेणादिनाविंदोर्जपाकुसुमसन्निभाः उ
ग्रहंतेभयंशूलकपालंवाकुभिर्वरं इतिध्येयाः षवर्गकलान्यासोनन्तरं ईश्वरेणादिनाविंदोर्जपाकुसुमसन्निभा अभयंहरिणं
टंकंदधानावाकुभिर्वरं इतिध्येयाः इतिविशेषः मरुचस्तुपाशमादनप्रकरणेवक्ष्यामः अथजोतिरष्टत्रिंशत्कलान्यासः ॐ
अंगुष्ठमात्रायैनमःशिरसि॰ इत्यादिस्वरकलाःक्रमेणाविन्यसेत् ततोदक्षहस्तसंध्यग्रेषु ॐ कंभंतापिन्यैनमइत्यादिं॰ लंज्वालि
न्यैनमइत्यंतंविन्यस्यावामहस्तसंध्यग्रेषु ॐ वंधंधूम्रैनमइत्यादिक्रमेणवोधिन्यैनमइत्यंतंविन्यस्यदक्षपादसंध्यग्रेषु ॐ टंडंथा
रिण्यैनमइत्यादि ॐ लंज्वालिन्यैनमइत्यंतंविन्यसेत् ततोवामपादसंध्यग्रेषु ॐ वंज्वालिन्यैनमइत्यादि ॐ हंकपिलायैनमः
इत्यंतंविन्यस्यावशिष्टकलाहृदयमस्तकव्यापकेचकुर्यादिमाष्टत्रिंशज्ज्ञेजाःकलान्यासः अथपकलान्यासःप्रयोगवसेते पतदनन्तरं
प्रपंचयागः इतिश्रीमदाचार्यमतेसततुप्राग्नुक्तरीत्याङ्गविततव्यः तस्यफलं॰ एवंवर्णमयंदोषसकृत्वादिमतन्तुर्नरः प्रजपेत्स
कलान्मंत्रान्ततःसिद्धिमवाप्नुयात् प्रपंचयागस्यविधेर्विधानाद्भवेत्समंत्रीकृतकृत्यएव सर्वेस्फुरंतःप्रभवंतिमंत्राःसदास्यया
गीतिनिगद्यतेसः एतस्यहोमस्यनकोटिभागनतेनतुल्यःक्रतुमग्निहोत्रं एवंविधानतःखलुपत्रतत्रशरीरपातेपिभवेद्धिमुक्तिः

६५

तथा च प्रपंचसारे॰ गुरुरूपापि सविंदुकमन्त्यकलाद्यक्रोशावाद्यन्तयान्त्रीकंठादियुतमत्र शक्तिकमलामारैस्तथैकैकशः न्यासोऽ
दशाधारथड्क्षि॰ गदिताः सर्वब्रह्मयागातिकाः सर्वसाधकसिद्धिसाधनविधौ संकल्पकल्पद्रुमाः प्रपंचयागस्तु विशेषतोऽपि पत प्रपंच
संसारविशेषपावकः पंचनित्यं भजतामयत्नतः परस्य चार्थस्य निवेदकः सदा न्यस्य मंत्री यथान्यायं देहे विघ्नसमानतरं जपे
न्मंत्रान्मजेद्देवानन्यजेद्दग्निमनन्यधीः देवो भूत्वा यजेद्देवान्नादेवो देवमर्चयेत् एवमाह श्रुतिः साक्षाद्देनोऽग्रविनमसेतुयः योऽसा
सकवचकृतोऽस्मेमंत्रं जपति तेन प्रिये विघ्नाः दृष्ट्वा पलायंते सिंहं दृष्ट्वा यथा गजाः अकृत्वा न्यासजातं यो मूढात्मा प्रजपेत्तवं वा
ध्याने सर्वविघ्नैस्स बाध्यते व्याघ्रैर्मृगशिशुर्यथा इति सर्वमातृकान्यासः अथ षट्त्रिंशत्तत्त्वन्यासः ॥ पृथिवीतत्त्वव्यापिकायै श्रीमहावि
पुरसुंदर्यै नमः पादयोः एवं लेखप्रतत्त्व लिंगे विलोमक्रमेण तेजो हृदि॰ वायुर्मुखे॰ आकाशं शिरसि॰ गंधः पादयोः रसो लिंगे॰
रूपं हृदि॰ स्पर्शो मुखे॰ शब्दः शिरसि॰ उपस्थो लिंगे॰ पायुः पायौ॰ पादः पादयोः पाणिः पाण्योः वाक् मुखे॰ घ्राणो घ्राणयोः जिह्वा
जिह्वायां चक्षुः चक्षुषोः त्वक् सर्वांगे॰ श्रोत्रं श्रोत्रयोः मनो हृदि अहंकारो हृदि॰ बुद्धिर्हृदि॰ प्रकृतिः सर्वगात्रे रागो हृदि॰ शुद्धाशु
द्धविद्या हृदि॰ कला हृदि॰ नियतिः सर्वगात्रे॰ कालतत्त्वं सर्वगात्रे॰ माया हृदि॰ विद्या हृदि॰ ईश्वरो हृदि॰ सदाशिवो ग्रीवायां॰ शक्तिर्मू
लाधारे॰ शिवः सहस्रारे॰ इति षट्त्रिंशत्तत्त्वन्यासः अथ प्राणायामः इति कृतो यिकृतो भवति ध्रुवं परमदैवतमंत्रजपादिषु पव
नसंयमनेन मुनाचरेद्य मिहजन्म समस्तमहुमिष्कृतिः इति वचनात् प्राणायामं विधायैव योगपीठं न्यसेत्ततो इति वचनाच्च मूल
विद्यया प्राणायामत्रयं कृत्वा योगपीठन्यासं कुर्यात् तत्र प्राणायामविधिरुच्यते तत्र प्राणेनाशारीरादपि द्वादशांगुलाधिका
तो आयामः आगमनमायामः संकुचितभावः शरीरसाम्य शरीरान्न्यूनभावापादने वेति प्राणायामशब्दार्थः अतएव पवनसंयमन
मित्युक्तं त्रिशतासारसमुच्चये अथ देशरीरस्वकीयांगुलीभिर्द्वयैः यस्य वत्संगुलायामसमुक्तं दिनमांगुलीभिः शरीरात्समीरो

वि·
ए·व·
ष·
६६

66

यिकः प्राणसंज्ञो मनो योगविद्भिः इति प्राणवायुं सदाभ्यसेतो यो नरो नूनं भावेन यत्नेन संगतात् समस्तं शरीरेण वा भूतलेस्मिन्नस्य
ज्ञेयो वृथैव कृतमो योगवित्त्व· इति स च पूरकादयं गत्रयात्मकः तथा च· अंगत्रयात्मकः प्रोक्तः पूरककुंभकरेचकैरिति तत्र कुंभकरूप
वप्राणायामशब्दो मुख्यः इतरयोस्तदुपकारकत्वात् ज्ञानार्णवे· कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणं प्राणायामः स विज्ञे
यस्तर्जनीमध्यमे विनेति स पुनर्द्विविधः सहितः केवलश्च· तत्र सहितोपि द्विविधः रेचकादिक्रमः पूरकादिक्रमश्चेति त
त्र रेचकादिक्रममाह योगशास्त्रे· प्राणायामो द्विधा प्रोक्तो रेचपूरककुंभकैः सहितः केवलश्चेति कुंभको द्विविधो मतः विरेच्य
पूरकः कार्यः शनैः सहितकुंभकैः यावत्केवलसिद्धिः स्यात्तावत्सहितमभ्यसेत् तत्क्रममाह प्रपंचसारे रेचकपूरककुं
भकभेदात्त्रिविधः प्रभंजनायामः मुंचेद्दक्षिणयानिलमेतत्त्रयं द्वामयामथ्यमया· संस्थापयेच्च नाड्यास्तेषां प्रोक्तानि रेचका
दीनि· षोडश द्विगुणचतुःषष्टिकमात्राणि तानि च क्रमशः प्राकृतिनाड्यास्सव्यदक्षिणयेत्यादिभिः संबंधः तथा च इडा वामे ततो
मध्ये सुषुम्णा पिंगला परे द्विगुणश्चेति षोडशानां द्विगुणत्वपर्थः अथ पूरकादिक्रममाह समुच्चये प्रीतांसुमार्गेण शनैः
समीरमापूरयेत्तादरमादरेण विकारमात्राभिरपेततंद्रः कालाग्निमूलार्पितचित्तवृत्तिः ततो धारयेन्मारुतं पीवचेताश्च
तः षष्टिमात्रासमापूरितं तं· वहिर्भास्वता रेचयेन्मंदमेनं तदष्टाभिरंतर्निरुद्धं द्रुताभिः तथा कामेस्थरे· पूरके कुंभके चैव रे
चके च विचिंतयेत् मूलाधारे लयं कृत्वा पीत्वा वायुं शनैः शनैः यथेष्टं पूजयेद्देहं तत्त्वज्ञो विजितेंद्रियः ततस्तु स्तंभयेद्वायुं
प्रकाशं तत मानसः कुंभके चिंतयेद्विद्वान्विधायामुक्तिकारिणम् तदानु रेचयेद्वायुं राज्यते यत्स्वभावतः देहान्निःसारयेन्मंत्री
स्वदेहस्थं तमोगुणं वामेन पूरयेद्वायुं दक्षिणेनातिरेचयेत् माहेंद्रेण समेनैव मंत्री कुंभकमभ्यसेत् सदा कुंभकयोगेन ल
भते सिद्धिरुत्तमा अभ्यासी कारयेन्मात्रां यथेष्टं तत्त्वदर्शिता यथाशक्त्या पिबेद्वायुं यथाशक्त्या च कुंभयेत् स्वभावं च

त्यजेत्तद्वायुस्ततः सिद्धिः प्रजायते ॥ इति ॥ तत्रास्यां विद्यायां पूरकादिक्रम एव नित्यातंत्रोक्त्या रेचकादिक्रमस्तुसाधारणतयाप्राप्तः
क्रमस्त्वनुसारेणअपंचसाराद्यैर्वैस्तवादिसामान्यतयाप्रोक्तत्वात् तथाचश्रुतिः प्राणायामास्त्रयः प्रोक्ता रेचपूरककुंभका इति
सूत्रसाधितप्राणानांरेचकादिक्रमइति कश्चित् उभयथापिसामान्यत्वे तंत्रांतरेणपूरकादिक्रमोपिसामान्यतयावैस्तवादौयुज्य
ते तस्मादस्मिन्नपिप्रकरणेसामान्यत्वेनोभयोःप्राप्तौ ॥ विशेषत्वेनपूरकादिक्रमस्यैवमुख्यत्वमाह महेश्वरः पूरकंकुंभकंचे
त्यादि ॥ तत्रवायोरादानकालेपूरकनामाप्राणायामः धारणकालेकुंभकनामा ॥ त्यागकालेरेचकनामा ॥ तदुक्तं वाह्यादापू
रणंवायोरुदरेपूरकोह्ययं संपूर्णकुंभवद्वायोर्धारणंकुंभकोमतः वहिर्यद्रेचनंवायोरुदराद्रेचकःस्मृतः तथाच ॥ दक्षिणाम्
र्तिः मूलमंत्रेणादौवैशिवाभेनापूर्यचोदरं कुंभकेनविशालहृत्स्यादक्षिणेनचरेचयेदिति ॥ तत्रक्रममाह ॥ मूलाधारइत्यादिलयमिति
मनसोलयमित्यर्थः तेनैववायोरपिलयस्यभावितत्वात् तत्रादौ ॥ मूलाधारेमनःकृत्वावायुमापूर्यमूलतः नाडीचक्रांतरंनी
त्वासर्वांगानिचवारयेत् यथेष्टमितिसहजगतागतशीलंवायुंयथाशक्त्यामाकर्षयेदित्यर्थः प्रकाशेपरमात्मनिगादितेलीनेमा
नसेयस्यसः प्रकाशमानगतसः तेनस्वप्रकाशेसच्चिदानंदपरमात्मस्वरूपःसन्कुंभयेदित्यर्थः प्रयोगत्रयात्मकेप्राणायामेक्वापि
विद्याध्यानंभवति नवेत्यतआह ॥ कुंभकेचिंतयेदित्यादि ॥ विद्यामोक्षोपयोगिज्ञानेविद्यातासाचश्रीविद्येत्यतआह मुक्तिकरीषु
भ्रामिति ॥ तेनकुंभककालेब्रह्मरंध्रांतंमूलविद्यांविभावयेदित्युक्तं श्रीविद्यायाःसूक्ष्मध्यानेऊर्ध्वादितितुसगर्भपक्षेपूरकादि
षुप्रत्येकमशक्तौकेवलकुंभकेवेतिध्येयं रेचकप्रकारमाह तदेत्यादिगाम्यंतेवहिर्वितिशेषःस्वभावतः नत्वन्यनाधिकत्वात् अ
सध्यात्वयुक्ताभ्यासाद्दोषापत्तेः तथाचोक्तं गोरक्षसंहितायां युक्तंयुक्तंपिवेद्वायुंयुक्तंयुक्तंचधारयेत् युक्तंयुक्तंत्यजेदेवमेवंसि
द्धिमवाप्नुयात् यथासिंहोगजोव्याघ्रोभवेद्वश्यःशनैःशनैः तथैवहिनिषेवितोवायुरन्यथाहंतिसाधकं प्राणायामेनयुक्तेनसर्वं

रोगक्षयोभवेत् अयुक्ताभ्यासयोगेन सर्वरोगक्षयोभवेत् हिक्काश्वासश्च कासश्च शिरःकर्णाक्षिवेदनाः भवंति विविधा रो
गाः प्राणायामव्यतिक्रमात् ततः शास्त्रोक्तमार्गेण प्राणायामाभ्यासमाचरेदिति देहान्निःसारयेदिति रेचकयोगवायुना सह हृदे
हृत्स्थस्तमोगुणो बहिर्निःसृत इति भावयेदित्यर्थः अथ षट्कारेर्नाडीनियममाह वामेनेत्यादि एकप्राणायामे प्रथमे हि
यादिग्रसेत्तद्दक्षिणेनैव पूरयेत् तदुक्तं येनैव संत्यजेत्तेन पूरयेद्धारयेत्ततः रेचयेच्च ततोन्येन शनैरेव पुनःपुनः योगशास्त्रे
प्रयासेनेह दृढे योगी वशी हितमिताशनः गुरूपदिष्टमार्गेण प्राणायामान्समभ्यसेत् चले वाते चले चित्ते निश्चले दृढंवध
ने योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत् यावद्वायुः स्थितो देहे तावज्जीवितमुच्यते मरणं तस्य निष्क्रांतिस्ततो वायुं निरोध
येत् मलाकुलासु नाडीषु मारुतो नैव मध्यगः कथं स्यादुन्मनीभावः कार्यसिद्धिः कथं भवेत् शुद्धिमेति यदा सर्वं नाडीचक्रम
लाकुलं तदैव जायते योगी प्राणसंग्रहणक्षमः प्राणायामं ततः कुर्यान्नित्यं सात्विकया धिया यथा सुषुम्नानाडीस्था म
लाः शोषं प्रयांति च बद्धपद्मासनो योगी प्राणं चंद्रेण पूरयेत् धारयित्वा यथाशक्ति पुनः सूर्येण रेचयेत् प्राणं सूर्येण चा
कृष्य पूरयेदुदरं शनैः विधिवत्कुंभकं कृत्वा पुनश्चंद्रेण रेचयेत् येन त्यजेत्तेन पीत्वा धारयेदतिरोधतः रेचयेच्च ततोन्येन शनैरे
व न वेगतः प्राणं चेदिडया पिबेन्नियमितं भूयोन्यया रेचयेत्पीत्वा पिंगलया समीरणमथो बद्ध्वा त्यजेद्वामया सूर्याचंद्रमसोरनेन
विधिनाभ्यासं सदा तन्वतां शुद्धा नाडिगणा भवंति यमिनां मासत्रयादूर्ध्वतः इति तथाविपुवासारे विपरीतमतो विदधीत पुनः
पुनरप्यथ तद्विपरीतमिति अमुना विधिना स्वमनाः सततं मरुतो विदधीत स संयमनं अथ कुंभकफलमाह सहेत्यादि केव
लकुंभकयोगेनेत्यर्थः सुसाधिते वायौ मात्रासंख्यानमुक्तं प्रथमाभ्यासे तत्राप्ययं कामचारमाह अभ्यासेत्यादि अभ्यासी प्र
थमाभ्यासी तत्त्वदर्शिनां मात्राययेष्टं यथेच्छं कारयेदित्यर्थः एतदेव स्पष्टयति यथाशक्त्येत्यादि तथा च सति प्रथमाभ्यासीय

थोक्तसंख्यमात्रायामस्तमपि कुर्यात् मध्यमाभ्यासे यथोक्तसंख्यामेव । उत्तमाभ्यासी ततोधिकसंख्यामपि कुर्यादिति यथोक्तप
दत्तासंख्या अथ मात्रालक्षणमाह नारदः कालेन यावता स्वीयो हस्तः स्वजानुमण्डले पर्येति मात्रा सा तु तुल्या स्वर्येकस्याः समा त्रया ।
तथा फेत्कारीतन्त्रे । जानुं प्रदक्षिणीकृत्य न द्रुतं न विलम्बितं क्रियते चाङ्गुलीस्फोटः सा मात्रा परिकीर्तितेति अपि च कात्यायनीतन्
त्रे मध्यमलाघावद्ययमेन गुरुत्वेन च पीड्यते मात्रा सा प्रोच्यते सद्भिर्योगेऽभीष्टं प्रयच्छति वस्तुतस्तु तत्र तत्र प्रणवोच्चारणमेव मात्रा तथा
च गौतमीये । रेचयेद्दक्षिणे वायुं पूरयेद्वामतस्ततः द्वात्रिंशद्भ्यासे मन्त्रे प्राणायामः स उच्यते ततः एककाले न तत्र कुम्भकेऽभ्यसे
दित्यर्थः एतच्च रेचकादिपक्षे अत एव कुम्भक एव जपादिकं नेतरयोः दक्षिणामूर्तिकल्पे । प्राणापानौ समौ कृत्वा ततो विधा
य च कुम्भकं स्वसंकल्पे समासीनो मां ध्यायेद्यतमानसः अगस्त्यसंहितायां यावच्छक्यं नियम्यासून् मनसैव जपेन्मनुं शनैर्मुञ्च
मुञ्च ध्यायन्स्वोक्तविधिना सुधीः अस्त्रनियम्य कुम्भकं कृत्वा रामं ध्यायन् यावच्छक्यं मन्त्रं जपेदिति संक्षेपः एतेन यत्र विशे
षो नोक्तस्तत्र यथाशक्ति मन्त्रं जपेदिति वेदितव्यम् तथैव दीपिकाकृद्दृष्टं न्यायेन सर्वत्रैवायं प्रकारः अत एव श्रीविद्यायां वामकेश्वरतन्त्रे ।
कुम्भके चिन्तयेद्दिव्यां विद्यां मुक्तिश्रियं शुभामित्युक्तमिति वदन्ति वस्तुतस्तु सगर्भके प्राणायामे केवलकुम्भके कुम्भक एव सहि
तकुम्भके शक्तावगत्र ये यत् शक्तौ कुम्भकेत्वादय् एपकं जपध्यानमिति तु तेषां वचनानि निर्गलितार्थः सच मूलया वा लय्या वा तद
शक्तौ प्रणवेन कार्यः तदुक्तं फेत्कारीये प्राणायामत्रयं कुर्यान्मूलेन प्रणवेन चेति निषिद्धप्रणवोच्चारणप्रणवस्था
ने सार्धत्रिमात्रिकेऽङ्गोंकारोऽत्रेयः कालिकापुराणे चतुर्दशस्वरो यस्तु सार्धत्रिमात्रसंज्ञकः नादबिन्दुसमायुक्तः स्मृतांश
सेतुरुच्यते इति । अत्र तत्साधितप्राणानाम् एककादौ त्रिपुरासारोक्ते वसंख्याजपादौ । तत्रराजेतदन्यथा । यदुक्तं तन्त्रराजे । एवं
सुसाधिते पश्चाद्द्वात्रिंशन्मात्रया हरेत् धारयेच्च चतुःषष्ट्या रेचयेत्तत्त्रयीयतः इति तन्त्रीकादिमते । तदेतयोर्मतयोर्विकल्पः

वि॰
र्गी॰व॰
ष॰
६८

68

तत्राशक्तौ मात्रामात्रपटले फेत्कारीतंत्रोक्ता कार्या तद्यथा॰ तथाहाविंशन्मात्राभिः पूरकं क्रियते बुधैः तस्माद्द्विगुणमात्राभिः कुं
भकः क्रियते सदा तस्माद्द्विगुणमात्राभिः रेचकः क्रियते तथा प्राणायामत्रयं त्वेवमेकैकं त्रितयात्मकमिति अत्राप्यशक्तौ सम
मात्रयोक्ता कार्या॰ प्राणायामत्रयं कुर्यात्स्मरन्विप्रो हृदा शुचिरिति तद्वचनं तत्सद्भावे आख्याते दक्षिणनाड्या॰ एकवारं म
लशुद्ध्यर्थं वायुमापूर्य चतुर्वारं कुंभकं कृत्वा वामनाड्या द्विवारं रेचयेदिति प्राणायामत्रयं कुर्यादिमथ्ये इति अत्र दक्षिणेन पू
रणं पुंसो वामेनाङ्गनाया युग्मे एकादौ वा मस्यैवोक्तत्वात् अथवा तन्मतमेवेदमिति वयं न विद्मः तत्राप्यशक्तौ ज्ञानार्णवदक्षिण
मूर्तिश्रुतं मुक्तस्य कुंभकेन विनापूर्यमस्यैव ग्रहणमिति संक्षेपः इति सहितकुंभकः अथ केवलकुंभकः योगशास्त्रे॰ रेचकं
पूरकं मुक्त्वा सुखं यद्वायुधारणं प्राणायामोयमित्युक्तः सवै केवलकुंभकः केवले कुंभके सिद्धे रेचपूरकवर्जिते न तस्य दुर्ल
भं किंचित्त्रिषुलोकेषु विद्यते शक्तः केवलकुंभेन यथेष्टं वायुधारणे राजयोगपदं चैव लभते नात्र संशयः हठं विना राजयोगो
राजयोगं विना हठः न सिध्यति ततो युग्ममानिष्पत्तेः समभ्यसेत् कुंभितप्राणरेचांते कुर्याच्चित्तं निराश्रयं एवमभ्यासयोगेन रा
जयोगपदं व्रजेत् कुंभकात्कुंडलीबोधः कुंडलीबोधतो भवेत् अनर्गला सुषुम्णा च हठसिद्धिश्च जायते हः सूर्यः ठश्चंद्रस्ता
भ्यां सूर्यचंद्राभ्यां दक्षिणवामाभ्यां पिंगलेडाभ्यां प्राणवायोर्मेलापादो योगो हठयोग इत्यर्थः सच प्राणायामो राजयो
गः सच सुषुम्णामार्गेण षट्चक्रभेदक्रमेण शिवशक्तिसामरस्यलक्षणमाह तत्र राजः कंपं च पुलकानंदौ वैमल्यं स्थैर्यमेला
घवाः तद्वत्क्रांतिप्रकाशौ च योगसिद्धस्य लक्षणं इति केवलकुंभकः स उक्तः प्राणायामः सगर्भो विगर्भश्चेति द्विविधः स्या
त् उक्तं च रुद्रयामले॰ सगर्भश्च विगर्भश्च प्राणायामो द्विधा मतः इति तथा च योगिनीतंत्रे॰ अयं प्राणायामः सकलधरि
तध्वंसनकरो विगर्भः प्रोक्तो सौ शतगुणफलो गर्भकलितः जपध्यानापेतः सगुनिगदितो गर्भरहितः सगर्भस्तद्युक्तो मुनिपरि

दृष्टैर्योगानिश्चैरिति सपुनस्त्रिविधः उत्तमाधममध्यमभेदात् तथाच तंत्रराजे· प्राणायामस्त्रिधाप्रोक्तउत्तमाधममध्यतः लाघवो
भूतलत्यागउत्तमे विहितकृतिः संवेगात्स्वेदसंवृद्धिरधमेमध्यमेतथा संवेगात्कंपनंप्रोक्तमभ्यासात्कालसंयुतान् तेषूत्तमगुणा
भूपुरभ्यासात्कालयोगतः तस्मात्सम्यभ्यसेत्प्रातः सायंच नियमेनवै· तथात्रिपुरसारे· शुचिः प्राणायामान्सुगणवसहेतान्षो
डशवर्णीप्रभाते सायंच प्रतिदिवसमेवं वितनुते द्विजोयस्तं भ्रूणप्रहरणकृतोद्दोभिकलितं पुनंत्येते मासादिह दुरितनूलौ
घदहनाः त्रायेत्समीषड्भिर्पीहमासैर्जन्मांतरोपार्जितपापपुंजात् संवत्सराद्ब्रह्मपदं तदेकं प्रकाशयत्येव यदच्युताख्यं योगशा
स्त्रेतु· प्रातर्मध्यंदिने सायमर्द्धरात्रे च कुंभकान् शनैरशीतिपर्यंतं चतुर्वारं समभ्यसेत् कनीयसा भवेत्स्वेदः कंपो भवति मध्यमे
उत्तिष्ठत्युत्तमे प्राणो रोधे पद्मासनो मुहुः जलेन श्रमजातेन गात्रमर्दनमाचरेत् दृढता लघुता चैव तेन गात्रस्य जायते अ
भ्यासकाले प्रथमे शस्तं क्षीराज्यभोजनं ततोभ्यासे दृढे जाते न तादृङ्नियमग्रहः तत्र क्रमः विहितपद्मासनः सन्निमीलितन
युगलो मूलाधारार्पितचित्तश्चित्तहृत्रिमूलमंत्रादिकमुच्चरन् इडयावामनाड्याषोडशमात्रया वायुमापूर्य मूलाधारं प्रापय्याग
ष्टकनिष्ठानामाभिर्नासापुटौ विधृत्य चतुःषष्टिमात्रया तं वायुं स्तंभयित्वा द्वात्रिंशन्मात्रया पिंगलया दक्षिणनाड्या शनैः शनैस्तं
वायुं रेचयेदित्येकः प्राणायामः पुनस्तं पिंगलया वायुं शनैः शनैः समाकृष्य तथैवेडया रेचयेदित्यन्यः एवं वैपरीत्येन विंशतिवारं
षोडशद्वादशषट्त्रिवाद्विवीयथाशक्ति कुर्यात् ततः सिद्धिमवाप्नुयादिति शारदातिलके मात्रावृद्धिक्रमेणैव सम्यग्द्वादशषो
डशेतिसंक्षेपः अत्र सर्वत्र प्राणायामैनैव सर्वेषां कर्माधिकारः अकरणे निंदाश्रवणात् अगस्त्यसंहितायां· प्राणायामैर्विनायद्य
त्कृतं कर्म निरर्थकं अतो यत्नेन कर्तव्याः प्राणायामाः शुभार्थिभिरिति अत एवावश्यकोयं मंत्रशुद्धिविवरणज्ञायामिति· इति प्राणा
यामविधिर्मतद्वयसाधारणः अथ योगपीठन्यासः तत्रांसद्वयोरुद्वयकल्पितपादचतुष्टयं मुखनाभिपार्श्वद्वयमध्योपकः·

वि.
ष्णु.व.
प.
६९
69

ल्पितगात्रचतुष्टयं योगपीठं निजदेहं ध्यात्वा न्यसेत् मूलाधारे महाकालाय रक्तवर्णाय मण्डूकाय नमः तदुपरि स्वाधिष्ठानपर्यंते ष
पंचदशवक्त्रदशभुजरक्तकमलवर्णावामदक्षिणपार्श्वाय कालाग्निरुद्राय नमः तदुपरि नाभिपर्यंते वंशुक विशेषे मूलप्रकृत्यै नमः
तदुपरि हृत्पर्यंते शरच्चंद्रप्रभायै पंकजहस्ताय धारिण्यै आधारशक्त्यै नमः तदुपरि हृदय एव ष कूर्माय ष अनंताय ष वराहाय
पृथिव्यै ष अमृतार्णवाय ष समस्तमातृकामुद्रात्मकनवखंडविराजिताय नवरत्नमयद्वीपाय नमः तत्रैव नवखंडेषु ईशानादिम
ध्यांते ष अं ९ पुष्परागरत्नाय नमः ष कं ५ नीलरत्नाय ष चं ५ वैडूर्यरत्नाय ष टं ५ विद्रुमरत्नाय ष तं ५ मौक्तिकरत्नाय
ष पं ५ मरकतरत्नाय ष यं ष वज्ररत्नाय ष शं ष गोमेदरत्नाय ष लं ष पद्मरागरत्नाय नमः तत्रैव स्वर्णपर्वताय नमः तदुपरि ष
नंदनोद्यानाय नमः तन्मध्ये ष कल्पकोद्यानाय नमः ष वसंतादिऋतुभ्यः पश्चिमे ष इंद्रियाश्वेभ्यः पूर्वे ष इंद्रियार्थगजेभ्यो नमः ष
विचित्ररत्नभूमिकायै तत्र पश्चिमादिमध्यांते लोमेन ष कालचक्रेश्वरीश्रीपा. ष मुद्राचक्रेश्वरी.श्री ष मातृकाचक्रेश्वरीश्री. र
त्नचक्रेश्वरीश्री. दशचक्रेश्वरी. श्री. गुरुचक्रेश्वरीश्री ष तत्त्वचक्रेश्वरीश्री. ष ग्रहचक्रेश्वरीश्री ष मूर्त्तिचक्रेश्वरीश्री ष करुणा
तोयपरिधये ष माणिक्यमण्डपाय. तस्य नैरृत्यादिकोणेषु मध्ये च ष देशरूपिणी शक्ति. कालरूपिणी शक्तिश्री. आकाशरू
पिणी शक्तिश्री ष शब्दरूपिणी शक्तिश्री. मध्ये समस्तयोगिनीरूपिणी शक्तिश्री. तन्मध्ये समस्तगुप्तप्रकटयोगिनीचक्ररूपिणी श
क्तिश्री. तत्तन्मध्ये ष कल्पतरुभ्यो. तेषामधस्तात् ३ रत्नवेदिकायै नमः तदुपरि ष श्वेतच्छत्राय. तस्याधः ष रत्नसिंहासना
य नमः इत्येतत्सर्वं मानसपंकजे विन्यस्य यथायथं तत्तत्स्थानान्यध्यवस्य रत्नसिंहासनत्वेनात्मदेहं ध्यायेत् तत्र सिंहासनदेवता न्य
सेत् दक्षांसे ष रक्तवर्णाय वृषभरूपाय धर्माय. वामांसे ष श्यामवर्णाय सिंहरूपाय ज्ञानाय. वामोरौ ष पीतवर्णाय भूताकाराय
वैराग्याय. दक्षोरौ ष इंद्रनीलप्रभाय गजरूपायैश्वर्याय. एते सिंहासनपादरूपिणः. मुखे ष अधर्माय. वामपार्श्वे. ष अज्ञानाय.

नाभौः ष वैराग्याय दक्षपार्श्वे ष अनैश्वर्याय ष विद्यायै। तदुपरि ष आनंदकंदाय ष संविन्नालाय ष प्रकृतिमयपत्रेभ्यः ष वि
कारमयकेसरेभ्यः ष पंचाशद्वर्णबीजाढ्यसर्वतत्वरूपायै कर्णिकायै। तस्यां ष अं सूर्यमंडलाय ष उं सोममंडलाय ष मं वह्नि
मंडलाय ष सं सत्वाय ष रं रजसे ष तं तमसे ष आं आत्मने ष अं अंतरात्मने ष पं परमात्मने ष ह्रीं ज्ञानात्मने। तदुपरि सर्वादि
क्षु मध्ये च ष ज्ञानतत्वात्मने ष मायातत्वात्मने कलातत्वात्मने ष विद्यातत्वात्मने ष परतत्वात्मने ष ततः केसरेषु पूर्वाद्यष्ट
दिक्षु मध्ये च श्रीचक्राधारपीठस्य नवशक्तीः समेत् ष हूलर्यैवाश्री ष स्वदर्यैवाश्री ष सुमुख्यैवाश्री ष विरूपेचाश्री ष विमलावा
श्री ष अनर्घ्यैवाश्री ष वदर्यैवाश्री ष उरेदर्यैवाश्री ष मध्ये कर्णिकायां ष पुष्पमदिन्यैवाश्री ष वराभयधारिण्यै रक्तवर्णाय्यै
याः तदुपरि ष क्लीं सर्वशक्तिकमलासनाय नमः इति सिंहासनमंत्रं विन्यस्य श्रीचक्रं ध्यात्वा मूले समस्तप्रकटगुप्ततरसंप्रदायकुलको
लनिगर्भरहस्यपरंपररहस्यातिरहस्ययोगिनीसिद्धचक्रपादुकाभ्यो नमः इति व्यापकेन विन्यस्य हृदि त्रिकोणं विभाव्य। तन्मध्ये ष मू
ले ह्रैं क्लीं भगवति ब्लूं नित्याकामेश्वरि स्त्रीं सर्वसत्ववशंकरि सां त्रिपुरभैरवि पैं विच्चे क्लीं श्रीमहात्रिपुरसुंदर्यैवाश्री। इति विन्यस्य प्रणवा
दिनमोंतं मूलविद्यां विन्यस्य श्रीचक्रं पुरत्रयात्मकं ध्यात्वा तत्रोद्धारणक्रमेण ष वाग्भवकूटमुच्चार्य चतुरस्रषोडशदलात्मने शरीरात्मका
य प्रथमपुराय नमः इति व्यापकं न्यसेत् ष ततः कामराजकूटं चतुर्दशारद्विदशारात्मने भुवनात्मकाय द्वितीयपुराय नमः इत्यपि
व्यापकं ष शक्तिकूटमुच्चार्य अष्टारत्रिकोणविंदुचक्रात्मने प्राणात्मकाय तृतीयपुराय नमः इति व्यापकं विन्यस्य ष इच्छाशक्ति
ज्ञानशक्तिक्रियाशक्त्यादिसमस्तत्रितयात्मने श्रीचक्रस्य पुरत्रयाय नमः इत्यपि व्यापकं ततो हृदयत्रिकोणस्याग्रादिकोणत्रयम
पि पुरत्रयात्मकं वाग्भवादिपुरत्रयात्मकं च ध्यात्वा तत्र प्रणवादिनमोंतं वाग्भवादिकूटत्रयं न्यसेत् ततो नादविंदुकलाज्येष्ठारौद्रीवा
माविषघ्नीदूतरीसर्वानंदाभ्यः श्रीचक्रस्य त्रैलोक्यमोहनादिनवचक्रशक्तिभ्यो नमः इत्यनेन व्यापकं कुर्यात् ततो हृदयकेसरेषु का

त्रि॰
पू॰प॰
७८
७
70

मेश्वरीपीठस्यनवशक्तीर्यजेत् ॥ ष मोहिन्यैनमः इतिविन्यस्यत्रिकोणमध्ये ष बालांमूलपंचदशींचोच्चार्यत्रिकोणरक्तवर्णोड्डियाणपी
ठश्रीत्रिकोणाग्रे ष बालामूलयोर्वाग्भवद्वयमुच्चार्यचतुरस्रंपीतवर्णकामरूपपीठश्री॰ दक्षकोणे ष कामराजद्वयंप्रोच्चंद्रनिभंस्व
नवर्णजालंधरपीठश्रीवामकोणे ष शक्तिबीजद्वयंषट्कृविंदुलांछितंदृत्वप्रवर्णपूर्णगिरिपीठश्री॰ इतिपीठचतुष्टयंविन्यस्य॰
पुनर्वह्निवेश्याग्नेयादिकोणेषु ३ लांह्रांब्रह्मणेपृथिव्यधिपतयेनमोब्रह्मप्रेतासनश्री॰ ष वांह्रींविष्णवेऽपामधिपतयेनमोविष्णु
प्रेतासनश्री॰ ष रंह्रूंरुद्रायतेजोधिपतयेनमोरुद्रप्रेतासनश्री॰ ष यांह्रैंईश्वरायवाय्वधिपतयेनमईश्वरप्रेतासनश्री॰मध्ये ष
ह्सौंविद्यधिपतयेपंचवक्त्रायसदाशिवायप्रेतपद्मासनायनमः सदाशिवमहाप्रेतपद्मासनश्री॰ इतिपंचप्रेतासनंन्यस्यतदुपरि
रक्तपद्मकर्णिकायांचतुरस्रगर्भितषट्कोणपीठेषडासनानिविन्यसेत् ष ऐंऐंसौःत्रिपुरायार्णवासनायनमः पैंक्लींसौःत्रि
पुरेश्वरीपोतांबुजासनायनमः ह्रींक्लींसौःत्रिपुरसुंदरीदेव्यात्मासनायनमः हैंहक्लींह्सौःत्रिपुरवासिनीसर्वचक्रासनायनमः
ष ह्सैंह्स्क्लींह्सौंत्रिपुराश्रीसर्वमंत्रासनायनमः ष ह्रींक्लींब्लैंत्रिपुरमालिनीसाध्यसिद्धासनायनमः इतिन्यस्यमध्येचतुरस्रे
चतुःपीठचतुरासनंन्यसेत् पेपूर्णतः ष वाग्भवद्वयमुच्चार्यअग्निचक्रेकामगिर्यालयेमित्रीशनाथात्मकेऽव्यक्ताशक्त्यात्म
करुद्रात्मशक्तिकामेश्वरीदेवी ह्रींक्लींसौःत्रिपुरसुंदरीदेव्यात्मासनायनमः वायव्यकोणे ष कामराजद्वयंसूर्यचक्रेजालंधर
पीठेषष्ठीशनाथात्मकेस्वप्नदशाधिष्ठायकेज्ञानशक्त्यात्मविष्ण्वात्मकशक्तिश्रीवज्रेश्वरीदेवी हैंह्क्लींह्सौःत्रिपुरवासिनीसर्वच
क्रासनायनमः नैरृत्ये ष शक्तिद्वयमुच्चार्यसोमचक्रेपूर्णगिरिपीठेउड्डीशनाथात्मकेसुषुप्तिदशाधिष्ठायकेक्रियाशक्त्यात्म
कब्रह्मात्मशक्तिश्रीभगमालिनीदेवी ह्सैंह्स्क्लींह्सौःत्रिपुराश्रीसर्वमंत्रासनायनमः आग्नेये ष समस्तद्वयमुच्चार्यब्रह्मचक्रेम
होड्याणपीठेश्रीचर्यानाथात्मकेसर्वावस्थातीतदशाधिष्ठायकेपरब्रह्मशक्त्यात्मकश्रीत्रिपुरसुंदरीदेवी ह्रींक्लींह्सूंत्रिपुरमालि॰

७

त्रिशक्त्यासिंहासनाय नमः मध्ये ५ ऐं ह्रीं सौः क ए ई श्रीमहात्रिपुरसुंदरीसर्वमंत्रासनाय नमः इति विन्यस्य ५ ॐ ए ई शिवशक्ति
सदाशिवेश्वरशुद्धविद्यामायाकालनियतिकलाशुद्धविद्यारागपुरुषप्रकृतिबुद्ध्यहंकारमनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पा
णिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवायुवह्निसलिलपृथिव्यात्मने श्रीमहात्रिपुरसुंदर्यै योगपीठाय नमः इति व्यापकं कु
र्यात् ततो मूलमुद्राख्य श्रीमन्महात्रिपुरसुंदरीश्री॰ इति षट्त्रिंशतत्त्वात्मिके देहमये महायोगपीठे निजेष्टदेवतां हृदि न्यसेत् इति
देहमये पीठे चिंतयेत्परदेवतामिति योगपीठन्यासः अथ मंत्रन्यासः शारदायां संहारसृष्टिमार्गेण मातृकान्यस्तविग्रहः मंत्रन्यासं
ततः कुर्याद्देवताभावसिद्धये ततइति मंत्रन्यासानंतरमित्यर्थः मंत्रन्यास उपास्यमंत्रस्य वर्णन्यासः वैशंपायनसंहितायां ततउपा
स्यमंत्रस्य न्यासान् षडंगादिकांश्चरेत् यस्य मंत्रस्य ये न्यासाः कर्तव्याः सिद्धिमिच्छता जपतर्पणहोमार्थाः सिद्धमंत्रकृता अपि अंगन्या
सादिभिर्हीना न ददास्यंति फलान्यमी न्यासानशेषानस्मतः स्वदेहे त्रैलोक्यमेतद्वशमेति पुंसः पापानि सद्यः प्रशमं प्रयांति त्रसं
त्रिरक्तोसि संपन्नगानि आदावृष्यादिविन्यस्य करांगन्यसनं ततः ततो मंत्राक्षरन्यासः पदन्यासस्ततः परं ततस्तत्कल्पविशेषो
क्तान्न्यासानन्यान्समाचरेत् ततो मंत्रपुटैर्वर्णैर्मातृकायाः सबिंदुकैः विन्यसेन्मंत्रविन्मंत्रकृशास्त्रदृष्टेन वर्त्मना अथ षोढाक
रन्यासस्ततो मुद्राः प्रदर्शयेत् इति क्रमः अन्यत्रापि श्रीविद्यामधिकृत्य अंतःशुद्धा च सृष्टिस्थितिविलयमयी तारकाभिः कलाभिः
श्रीकंठाद्यैश्च विघ्नप्रमुदिततनुभिः शक्तिलक्ष्मीमनोज्ञैः बीजैर्ग्रहैः समस्तैः कलितलिपिवराचात्मया गच्छमोनी षोढाका
मश्च षोढा नवविधभवना मंत्रगुप्तैर्व्वमंत्राः सप्तनवस्थां विद्यायां त्रिविधषोढा श्रीचक्रकरशुद्ध्यादिभेदात् तत्र षोढा द्विविधः
पूर्वोत्तरभेदात् तत्र पूर्वषोढान्यासः सर्वाम्नायविषयः उत्तरषोढान्यासः ऊर्द्ध्वाम्नायविषयः श्रीचक्रन्यासस्त्रिविधः संहार
सृष्टिस्थितिभेदात् करशुद्ध्यादिन्यासस्त्ववांतरः श्रीकंठादिरतिकामादिन्यासादीनामपि तत्रैवांतर्भावात् तत्र षोढान्या

वि॰
ल॰ व॰
ष॰
७१

71

मः संहारश्रीचक्रन्यासः स्थितिश्रीचक्रन्यासः करशुद्ध्यादिन्यासश्चेति जपकाले स्थितिचक्रन्यासस्य करशुद्ध्यादावन्तर्भावात् पूजा
काले संहारचक्रन्यासस्योपलक्षणत्वेन तदन्तर्भावाच्चतुर्विधो न्यासस्तदवसरे संक्षेपाद्यावश्यकत्वमिति योगिनीहृदयमते योगिनीहृद
ये। एवं चतुर्विधो न्यासः कर्तव्यो वीरवंदिते षोढान्यासो गणेशाद्यश्च मूलदेव्यादिकः प्रिये करशुद्ध्यादिकश्चैव साधकेनाशु सिद्धये।
प्रातःकाले यथावा पूजासमये होमकर्मणि जपकाले यथा तेषां विनियोगः पृथक् पृथक् पूजाकाले समस्तान् वा कल्पा साधकसत्तमः
तत्रादौ पूर्वोषोढान्यासः योगिनीहृदये न्यासान्निवर्तये द्विविधो षोढान्यासपूर्वकः स्मरे गणेशैः प्रथमो न्यासो द्वितीयश्च ग्रहैर्मतः त
तृतीयस्तु नक्षत्रैश्चतुर्थो योगिनीभिश्च तुर्यकः राशिभिः पंचमो न्यासः षष्ठः पीठैर्निगद्यते षोढान्यासस्त्वयं प्रोक्तः सर्वत्रैवापराजितः
एवं यो न्यस्तगात्रस्तु स पूज्यः सर्वयोगिभिः नास्त्यस्य पूज्यो लोकेषु पितृमातृगुरुर्जनः स एव पूज्यः सर्वेषां स स्वयं परमेश्वरः
षोढान्यासविहीनं ये प्रणमेदेष पार्वति सोऽचिरान्मृत्युमाप्नोति नरकं च प्रपद्यते ज्ञानार्णवे। षोढान्यासस्ततः कुर्याद्येन ब्रह्मा
द्रूपकः विग्रहस्तद्रूपो वर्णान्माशिवः साक्षान्न संशयः गणेशः प्रथमो न्यासः सर्वविघ्नविनाशकः तरुणादित्यसंकाशा
न्गजवक्त्रांस्त्रिलोचनान् पाशांकुशवराभीतिकरान् शक्तिसमन्वितान् एतांस्तु विन्यसेद्देवि मातृकान्यासवत् प्रिये अत्र प
श्रीविघ्नेश्वराभ्यां नमः इत्यस्य विघ्नेश्वराय श्रियै नमः इत्यपरे विघ्नेश्वरश्रीभ्यां नमः इति केचित् गणेशाः शक्तयश्च मातृका
स्थाने वेदितव्याः इति गणेशन्यासः ज्ञानार्णवे। ग्रहन्यासं ततो न्यस्येदादितः रक्तं श्वेतं तथा रक्तं श्यामं पीतं च पाण्डुरं धूम्रकृष्णं कृष्णध
म्रं धूम्रकृष्णं विचिन्तयेत् रविमुख्यान् कामरूपान् सर्वाभरणभूषितान् स्वरैरर्कं हृदादिन्यस्य यवर्गेण शशी ततः भ्रूमध्ये तु कवर्गेण भौ
मं नेत्रद्वये न्यसेत् टवर्गेण बुधं हृदि तवर्गेण बृहस्पतिं हृदयोपरि देवेशि चवर्गेण भृगुं गले पवर्गेण शनिं नाभौ राहुं चक्रे शवर्गतः ७१
लत्वाभ्यां पादयोः केतुं न्यसेद्देववरानने सूर्यस्य रोहिणीकान्तेवसोमस्य श्वेतामन्तास्तथा मंगलो चामयाश्च काशेव बुधस्य ज्ञानरूपया गुरवे

शाखिनीयुक्तःशांकरीसहितोभृगुः शनिःशाकिसमायुक्तोराहुःकुलासमन्वितः सुप्रयासहितःकेतुःशाक्तयोःवांतिकाःस्मृताः
इतिग्रहन्यासयोगः अथनक्षत्रन्यासः अथनक्षत्रदेवस्यन्यासंकुर्यात्स्वरप्रदं ज्वलत्कालाग्निसंकाशासर्वाभरणभूषिता नाति
पाणिपाशिनीःसर्वावरदाभयपाणयः युग्मायुग्मंतथायुग्मंयुग्मंयुग्मेमनरोहिणी एकमेकंतथाहंहमेकंपुष्यातमुच्यते लला
टेलोचनेपक्ष्माहामदक्षिणकर्णयोः नासाद्वयेचदेवेशितथाकंठेन्यसेत्क्रमात् पुष्यान्तेचप्रविन्यसेत्स्वराभ्यांचैवसर्पकं दक्ष
स्कंधेचडाभ्यांचमघांस्कंधेद्वितीयके चपूर्वफाल्गुनीदक्षेकूर्परेढजसंस्थिते उत्तराफाल्गुनीवामेकूर्परेविन्यसेत्प्रिये ट
वर्गेणयुतांचित्रांवामेतमणिबंधके उकारेणयुतांस्वातींदक्षहस्तेचविन्यसेत् दामयुक्तांविशाखांचवामहस्तेप्रविन्यसेत् तद
धस्ताज्ज्येष्ठांचनाभौन्यसेत्पार्वति धकारेणयुतांज्येष्ठांन्यसेद्दक्षकटौप्रिये नयफसंयुतांमूलंन्यसेद्वामकटौप्रिये पूर्वाषा
ढांबकारेणदक्षोरौविन्यसेत्ततः भकारेणोत्तराषाढांवामोरौतदनंतरं मकारयुतांश्रवणांदक्षजानुनिविन्यसेत् यराति
तांधनिष्ठांचवामजानुनिविन्यसेत् लकारेणयुतांदेविशतभिषांन्यसेत्प्रिये दक्षजंघाग्रतापश्चात्पूर्वभाद्रपदांततः व
शवर्णात्मिकांन्यसेद्वामजंघाग्रतःक्रमात् षसहस्थांउत्तराभाद्रपदांदक्षिणपादके ळकारेणतथाविद्धिविसर्गाभ्यांचरेव
तीं वामपादतलेन्यस्ययोगिनीन्यासमारभेत् ध्यानमाह ज्वलदित्यादिपूर्ववत् इतिनक्षत्रन्यासः अथयोगिनीन्यासः
तत्रादौ विशुद्धौषोडशपत्रेडाकिनींभावयेत्सुधीः त्वगात्मदेवतांकंठेसर्वकामार्थसिद्धये रक्तांरक्तत्रिनेत्रांपशुजन
भयकृत्खड्गखट्वांगहस्तांवामेखेटंदधानांचषकमपिसुधापूरितंचैववज्री ग्रस्तग्रासप्रदंष्ट्रामरिकुलमथनीपायसा
न्नप्रसक्तांकंठस्थानेस्मरतांपुनःपरिवृतांवपुषीभावयेड्डाकिनींतां डांडींडुंडैंडौंडःमलतिवरेलिच [illegible]डाकिनिपदंग्रा
हकामारक्षाहितयवदेत् सर्वसत्त्ववशंकरींकाकारिदेवितःपरं आमुक्षेहितयंप्रोक्ताउमामहेजातवैवच [illegible]हंयंवाम

वि·
ता·व·
ष·
७२

वेचघोरेदेवितत:परं मायाबीजंभृगु:संगीपरमेतिततःपरं घोरेहंघोरत्नपेचपहेह्रीतिनमःपदं चामुंडेडरलांतेचकलहैंश्रीमहा
त्रिच श्रवंदरिदेवीतिविच्चेतवरदंपदं स्वराल्विशुद्धपीठस्थविशुद्धांतेतडाकिनी विशुद्धनाथदेवश्रीपादुकांएजयामिच श्रुग
ह्यानामिकाभ्यांचकणिकायामिमन्यसेत् ततःषोडशपत्रेषुस्वीयत्नस्वर्वकाः अमृतादिकशक्तीस्तुविन्यसेन्नायथाक्रमं
अमृताकर्षिणीइाणीश्रासुमाचाई्वकेशिनी नृह्यिदाचततोनूपाल्हकाराचततःपरं त्वषांचेकपदाचैत्वष्यात्मिकांकारिणी
ततः ततोषधात्मिकोचैवांबिकाचाप्यत्नरात्मिका अमृतादिकशक्तीनांडाकिनीसहशंवपु: तत्सम्मानायुधादीनिन्यासपूज
नचिंतने अनाहतेद्वादशारेराकिनीरक्तधातुगां ध्यायेत्नत्कणिकामध्येसाधकःसर्वसिद्धये श्यामांमूलाब्जहस्तांडमरुकस
हितांतीत्नाचक्रंवहंतीम्यासांरक्तत्रिनेत्रांभ्रुकुटिवलिलसदृष्टदंष्ट्राप्रभाभिः दीप्तांतांदेवदेवीहृदयकमलगांरक्तधात्वेकना
थांश्रुद्धांनेषुप्रसक्तांमधुमदमुदितांभावयेद्राकिनींतां ततदंतरतत्स्थानत्द्धांतुपदयोजनात् एवंवन्मंत्रमुच्चार्यकर्णि
कायांन्यसेद्बुधः परितत्कालरात्र्यादिशक्तीस्तद्वर्णस्वर्वकाः न्यसेद्द्वादशपत्रेषुस्वीदिषुयथाक्रमं कालरात्रिस्त्नखानीता
गायत्रीचततःपरं घंटाधारिणिकाचैवततोड्याणात्मिकापुनः चामुण्डाचजयाकंकारिणीशार्णात्मिकापुनः टंकहस्ता
चटंकारिण्येताःस्वीदिविन्यसेत् कालरात्र्यादिशक्तीनांराकिनीसहशंवपुः तत्समानायुधादीनिन्यासपूजनचिंतने
मणिपूरेदशदलेलाकिनींमांसधातुगां ध्यायेत्नत्कणिकामध्येसाधकःसर्वसिद्धये हस्तांदेवीत्रिवक्त्रांत्रिनयनसहितां
दंष्ट्रिणींश्रुग्रवपांवज्रंशक्तिंचदण्डाभयवरदवरान्दत्नवामेदधानां ध्यात्वानाभिस्थपद्मेदशदलविलसत्कर्णिकेलाकिनी
तांमांसस्थांगौडभक्तांमधुरहृदयवतींचिंतयेत्साधकेंद्रः यंत्रप्रागवत्नविन्यस्यडामर्यादीन्नविन्यसेत् डामरीढक्कारिणीचण
कारिण्यथतामसी स्थाणुदेवीचदाक्षायण्यथपार्वतीतथैवच नंदाचपार्वतीफट्कारिण्येताःदशयतगः डामर्यादिकशक्तीनां

७२

लाकिनीसदृशंवपुः तत्समानायुधादीन्विन्यासएजनचिंतने स्वाधिष्ठाने रसदले काकिनीं भावयेत्सुधीः मेदोधातुस्थदेवे
शीपरिवारसमन्वितां स्वाधिष्ठानाख्यपद्मे रसदललसिते वेदवक्त्रां त्रिनेत्रां पीतांभोधारयंतीं त्रिशिखगुणकपालाभयान्या
न्गर्वाम् मेदोधातुप्रविष्टाममलिमदमुदितां बंधिन्यादिविष्टां दध्यन्नेसक्तचित्तामभिमतफलदां काकिनीं भावयेत्तां बंधनी
भद्रकालीचमहामायायशस्विनी रमा तथाचलंबोष्ठी षट्दले पूर्ववन्न्यसेत् बंधिन्यादिकशक्तीनां काकिनीसदृशं वपुः तत्स
मानायुधादीन्विन्यासएजनचिंतने मूलाधारे वेददले शाकिनीमस्थिधातुकां परिवारयुतां देवीं कर्णिकायां तु भावयेत् देवी
ज्योतिःस्वरूपां त्रिनयनविलसत्पंचवक्त्रां सुदंष्ट्रां हस्ताम्भोजेषु चापं स्फटिकमपि दधतीं पुस्तकं ज्ञानमुद्रां मूलाधारस्थपद्मे निवि
लपशुजनोन्मादिनीमस्थिसंस्थां सुरासवे प्रीतियुक्तामधुमदमुदितां चिंतयेत्तां प्रसन्नां वरदाशाभिनी चंडा चतुर्थी स्यात्सरस्वती
चतुर्दलेषु पूर्वादिन्यसेदेतास्तु साधकः वरदादिकशक्तीनां शाकिनीसदृशं वपुः तत्समानायुधादीन्विन्यासएजनचिंतने
आज्ञाख्ये द्विदलेपद्मे यामज्जाधातुदेवता ध्यात्वा तां कर्णिकामध्ये तन्मंत्रं तत्र विन्यसेत् भ्रूमध्ये बिंदुपद्मे द्विदलसुललिते शु
क्लवर्णां त्रिवक्त्रां बिभ्राणां ज्ञानमुद्रां डमरुकसहितां मल्लमालां कपाले षड्वक्त्रां मज्जसंस्थां त्रिनयनलसितां हंसवत्यादियुक्तां हा
रिद्रानेत्रप्रशस्तां सकलसुरनुतां हाकिनीं भावयेत्तां हंसवत्येत्समावत्येनमस्तापि विन्यसेत् दलद्वये क्रमाद्देवि तन्न दक्षपूर्व
के हंसवत्यादिशक्तीस्तु हाकिनीसदृशं वपुः तत्समानायुधादीन्विन्यासएजनचिंतने ब्रह्मरंध्रे सहस्रारे कर्णिकायां तु याकि
नीं तां शुक्रधातुगां देवीं ध्यायेत्सावरणां शुभां ब्रह्मरंध्रस्थपद्मे सकलदलयुते याकिनीं भैरवींतां पादिन्याद्यासमस्तायु
धकलितकरां सर्ववर्णां समाधौ प्राद्रीनां सर्ववक्त्रां सकलसुखकरीं सर्वधातुस्वरूपां सर्वान्नेसक्तचित्तां परशिवरसिकां भावयेत्सर्व
रूपां तन्मंत्रं सर्ववर्णस्थमादितोऽमृतादिकाः अमृतादिकशक्तीनां याकिनीसदृशं वपुः तत्समानायुधादीन्विन्यासएजनचिंतने।

वि॰
ग॰व॰
ष॰
७३

इति योगिनीन्यासः अथ राशिन्यासः प्राणानायम्य मूलेन राशीनां ध्यानमाचरेत् रक्तं मेषं तं हृदि हूणीं पीतं चित्रं सितं स्मरेत् पि
शंगपिंगलाकटुकर्कटोऽरुणः शमलान् अकारादिचतुष्केन विन्यसेत्स्वरं दिते मेषदातिणपुल्के ततो द्वे द्वे न वै वृषे यमेजुगजि
वेदे दस्तु मिथुने वृषणे ततः ह्लाभ्यां कर्कटं कुऊ लौ ह्लाभ्यां स्कंधे चासिंहके अनुस्वारविसर्गाभ्यां शवर्गेण च कन्यकां दक्षिणेन
शिरोभागे विन्यसेद्धीरं वं दिते तथा वामशिरोभागे कवर्गेण तुलां भृते ववर्गेण तथा स्कंधे वृश्चिकं विन्यसेत्प्रिये टवर्गेण
तथा कुक्षौ धन्विनं विन्यसेत्प्रिये पवर्गेण तथा कुंभं वामं जानुनि विन्यसेत् यवर्गेण क्षकारेण मीनं गुल्फे तु वामके॰ तथा॰
प्राणापानोदानव्यानसमानाः पंच वायवः मेषाद्या राशयो ज्ञेयाः पंच सिंहावसानकाः तथा नागश्च कूर्मश्च कृकलो देवदत्त
कः धनंजय इति प्रोक्ताः कन्याद्याः पंच राशयः जीवात्मपरमात्मानौ कुंभमीनौ प्रकीर्तितौ समस्तव्याप्तं त्रिभिः सिद्धेन तदाधारं विराश
यः इति राशिन्यासः अथ पीठन्यासः अथ पीठानि विधिना न्यसेत्सर्वमयानि हि सितासितारुणश्यामहरितपीतान्यनुक्रमात् पु
नः क्रमाद्देवि पंचाशत्स्थानसंचये पीठानि संस्मरेद्विद्वान्सर्वकामार्थसिद्धये कामरूपं महापीठमित्यादि पीठमातृकोक्तक्रमा
त्वोढव्यमिति पीठ इति षोढान्यासः समाप्तः अथ कामरतिन्यासः केवलां मातृकां न्यस्य कामभक्तो भवेद्यदि कामशक्तिस
मायुक्तां मातृकां विन्यसेत्सुधीः संमोहनऋषिश्चैव जगती छंद उच्यते श्रीकामशक्तयो देवि देवताः परिकीर्तिताः क्लींबीजं
च तमः शक्तिर्मातृका कीलकं स्मृतं षड्दीर्घकामबीजेन षडंगानि प्रविन्यसेत् अथ कामवरारोहे दाडिमीकुसुमप्रभाः वामांग
शक्तिसहिताः पुष्पबाणेक्षुकार्मुकाः शक्तयः कुंकुमनिभाः सर्वाभरणभूषिताः नीलोत्पलकराध्येयाः त्रैलोक्याकर्षणक्ष
माः इति ध्यात्वा ध अं कामाय रत्यै नमः इत्यादि कामरतिमातृकोक्तक्रमेण सेदिति कामरतिमातृकान्यासः अथ श्रीचक्रन्यासः ७३
तत्क्रमेणं तरे एवं षोढापरा कृत्वा कामरत्यादिकं न्यसेत् ततः श्रीचक्रविन्यासः कर्तव्यः शिवतामये श्रीमत्त्रिपुरसुंदर्याश्च

न्यासं शृणु प्रिये यत्र कस्यचिद्दाख्यातं तनुशुद्धिकरं परं श्रीरुद्रयामले शरीरं चिंतयेद्देवि निजं श्रीचक्ररूपकं त्वगाद्याकारवति
मुक्तं ज्वलत्कालाग्निसमप्रभमिति ऋष्यादिको देवतान्निसत्यान्यासं समाचरेत् अनुलोमविलोमस्थकालयास्यात्षडंगकं द्वाद
शांते चिदाकाशे शिवशक्त्यात्मकं गुरुं परं तेजोमयं ध्यायेत् भोगमोक्षफलप्रदं आनंदमानंदकरं प्रसन्नं ज्ञानस्वरूपं शिवभा
वयुक्तं योगींद्रमाद्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि वामजानौ गणेशानं वामांसे क्षेत्रपालकं योगिनीं दक्षिणे जा
नौ स्कंधे वटुकभैरवं न्यसेद्दक्षपदाग्रे च शंकरं वायुकृतानले दक्षजानौ पदं पश्चाद्दक्षपार्श्वे न्यसेद्बुधः दक्षांसे निऋतिं पश्चाद्वामांसे
वरुणं ततः वामपार्श्वे समीरं च वामजानौ धनाधिपं ईशानं वामपादाग्रे ब्रह्माणं ब्रह्मरंध्रतः अनंतं विन्यसेन्मंत्री मूलाधारस
माहितः चतुरस्रादिरेखाद्येन मध्यमादितो न्यसेत् इच्छामध्यपादाग्रांसिकपादाग्रांगुलीषु च वामपादांगुलिस्फिकाग्रप
ग्रे वा सकूटके मचूलीतलपृष्ठेषु व्यापकत्वेन सुंदरी सिद्धीस्तदंतरालस्था व्यापकत्वेन विन्यसेत् चतुरस्रमध्यरेखायैन मध्यम
पिंडलभे विन्यस्य तस्याः स्थानेषु ब्राह्म्याद्याणिमाद्यास्तथाष्टसु इति श्रीरुद्रयामले॰ कैलासशिखरासीनं शिवं पप्रच्छ पार्वती श्री
चक्रन्यासकवचं ब्रूहि मे देव शंकर शंकर उवाच साधु पृष्टं त्वया देवि लोकानां हितकाम्यया श्रीचक्रन्यासकवचं प्रस्फुटं कथया
मि ते शरीरं चिंतयेद्देवि निजं श्रीचक्ररूपकं त्वगाद्याकाररश्मिसंयुक्तं ज्वलत्कालाग्निसमप्रभं द्वादशांते चिदाकाशे शिवशक्त्यात्म
कं गुरुं परं तेजोमयं ध्यायेद्भोगमोक्षफलप्रदं गणेशो जानु मे पातु वामांसे क्षेत्रनायकः योगिन्यो दक्षिणे जानु स्कंधे वटुकभैर
वः दक्षपादाग्रमीशो मे पात्वग्निर्दक्षजानुके दक्षपार्श्वे यमः पातु दक्षांसे निऋतिर्मम वरुणः पातु वामांसे वामपार्श्वे समीरणः वा
मजानु धनाध्यक्षो वामपादाग्रमीश्वरः ब्रह्मरंध्रे विधिः पातु मूलाधारमनंतकः चतुरस्रादिरेखाद्येन मध्यमाद्यनुक्रमात् व्यापक
त्वेन विन्यसेत्सकलसमांजलिमीश्वरि सिद्धिवाहनमारूढा वराभयकरांबुजाः पद्मरागप्रतीकाशाः प्रसीदंत्वणिमादयः दक्षांस

वि॰
सौ॰व॰
ष॰
७४
74

इष्टमणिमावदङ्गोलचिमावतु दक्षस्फिचं तु महिमाई शितं च चरणग्रकं वशित्वं वामपादे व्याप्त्याकाम्यं स्फिच केतरे इच्छासि
द्धिवराङ्गं तु वामे भुक्तिसिद्धिका रससिद्धिः शिरो मे व्याप्तिः इष्टं तु मोक्षदा चक्रराजमध्येरेखायेन मः स्यादिः अनुक्रमात् व्या
पकत्वेन विन्यस्येत् कुसुमाञ्जलिसीमध्वरि मुद्रादेव्यः प्रसीदन्तु वराभयकरांबुजा भक्तानुग्रहसंधानदेवता मादहेन वे पादांगुष्ठ
द्वयं मुद्राः सर्वसंक्षोभिणी मम सर्वविद्राविणी मुद्रा पार्श्वे स्तनु दक्षिणे आकर्षिणी मूर्ध्नि देशे वामपार्श्वे वशंकरी उन्मादिनी वा
मजानु दक्षजानु महांकुशाः सव्यांसे खेचरी पातु वामांसे बीजमुद्रिका त्रिखंडा हृद्देशांते त्वयोन्यग्रगुष्ठहृदये पदे इत्यन्यथं त्रिपुरा
पातु सिद्धिमुद्राः समान्विताः सर्वेषामस्त्रकं डें ते षोडश शायवे नमः व्यापकत्वेन विन्यस्येत् कुसुमांजलिमीस्वरि कलादेव्यः प्रसी
दंतु पाशांकुशकरोद्यताः रक्तांगो रक्तवसनाः सर्वाभरणभूषिता कामाकर्षिणिकापातु कर्णे हृष्टे तु दक्षिणे बुद्ध्याकर्षिणि
कानित्या रक्त का दक्षिणांसकं अहंकाराकर्षिणी मे कूर्परं पातु दक्षिणे दक्षिणपाणि पृष्ठे मे शब्दाकर्षिणिकावतु स्पर्शाक
र्षिणिका पायाद्दक्षिणे तु तले मम रूपाकर्षिणिका जानु रसाकर्षीत गुल्फकं गंधाकर्षिणिका स्वले दक्षपादतलं मम वामपाद
तले देवी चित्ताकर्षिणिकावतु पादापृष्ठं वामगुल्फे धैर्याकर्षिणिकाविणि स्मृत्याकर्षिणिकाजानु वामो रुं नामकर्षिणि बी
जाकर्षिणिका पातु करपृष्ठमदक्षिणे कूर्परं पातु मे सव्यमात्माकर्षिणिकाविणी अमृताकर्षिणी वामे शरीराकर्षिणी श्रुतिः
सिद्धिमुद्रान्विता पावह्न्यमं च त्रिपुरेश्वरी सर्वसंक्षोभणी नेते च वक्त्रायनमः स्यपि व्यापकत्वेन विन्यस्येत् कुसुमांजलिमीश्वरी अ
नंगकुसुमादेव्यः प्रसन्नारक्तकंचुकाः वेणीकृतलसत्केशाः पुष्पकार्मुकपाणयः अनंगकुसुमा पातु दक्षशंखे सदा मम अनं
गमेखला देवी त्रायतां दक्षजानुकं अनंगमदना शक्तिर्दक्षपार्श्वे सदा मम गुह्यमध्यांतरं से व्यादनंगमदनातुरा अनंगरेखा वा
मांगं दक्षता गुल्फमंतरं अनंगवेगिनी पायाद्रूपांते सदा मम समानंगांकुशा जानु देशं भक्तवामकं अनंगमालिनी शंखं वामे रक्ष

७४

तुमेनितंबौ सुंदरी सिद्धिमुद्राभ्यांपातुमेहृदयांतरं सर्वसौभाग्यदंडे॰ तंचक्रायतनमइत्यपि व्यापकत्वेनविन्यसेत्कुसुमांजलिमी
स्पति शक्तिदेव्यः प्रसीदंतुवामकार्मुकपाणयः सर्वाभरणसंपन्नाः वैदूर्यमणिशोचिषः सर्वसंक्षोभिणीपातुतदूर्ध्वंद्राविणीमम
दक्षिणंपालयेद्वाणंसर्वाकर्षणिकामदा सर्वाल्हादकरी दक्षमंसांतंपातुमेसदा सर्वसंमोहिनीशक्तिःपार्श्वांतंपातुदक्षिणं सर्व
संस्तंभिनीरक्षेद्दक्षमूर्वंतुपृष्ठके जंघांतंजृंभिनीरक्षेद्वामेसर्ववशंकरी रंजिनीवामपर्वंतपृष्ठंपालयतान्मम पार्श्वांतंसर्वमध्यान्मे
सर्वोन्मादनकारिणी सर्वार्थसाधिनीपायाद्दक्षांसांतंदक्षिणेतरं वामंपातुकपोलंमेसर्वसंपत्प्रपूरणी सर्वमंत्रमयीभालेवाममभाग
ममावतु पालयेद्वाणकूपंमेसर्वद्वंद्वक्षयंकरी त्रिपुरावासिनीसिद्धिमुद्राभ्यांपातुहृन्मम सर्वार्थसाधकेडे॰ तंचक्रायतनमइत्यपि
व्यापकत्वेनविन्यसेत्कुसुमांजलिमीस्पति दशदेव्यःप्रसीदंतुसर्वसिद्धिप्रदायकाः ॐदंमंदारहाराभावराभयकरांबुजाः सर्वसि
द्धिप्रदामेव्याद्दक्षिणेत्तरणकोणकं पालयेन्नासिकामूलंसर्वसंपत्प्रदामम नित्यंरक्षतुवामांसेकोणंसर्वप्रियंकरी रक्षेत्कक्षि
णकोणंमेसर्वमंगलकारिणी नैऋत्यवरुतिवायव्येसर्वकामप्रदावतु वामजान्वंतरंपातुसर्वदुःखविमोचनी सर्वमृत्युप्रशम
नीदक्षिणंजानुकांतरं सदापायात्पानेमेसर्वविघ्ननिवारिणी सर्वांगसुंदरीदेवीरक्ततान्कृतिनैर्ऋतं आग्नेयंपालयेत्क
टिंसर्वसौभाग्यदायिनी हृन्मध्यंत्रिपुराश्रीर्मेसिद्धिमुद्रान्विताऽवतु सर्वरक्षाकरेडे॰ तंचक्रायतनमइत्यपि व्यापकत्वेनविन्यसेत्कु
सुमांजलिमीस्पति ओंतर्दशारवासिन्यः प्रसीदंतुममानिशं देव्यःस्फटिकसंकाशाःपुस्तकाक्षालिवाहवः सर्वज्ञासर्वशक्ति
प्रदक्षिणघ्राणरक्षिणी सर्वैश्वर्यप्रदाज्ञानमयीचस्तनचुबुकौ सीवनीमनिशंपातुसर्वव्याधिविनाशिनी वामंमेवृषणंपा
तुसर्वाधारस्वरूपिणी सर्वपापहरानंदमयीचस्तनवस्त्रकूपणी वामनासापुटंपातुसर्वरक्षास्वरूपिणी अग्रदेशंनासिकायाःसर्वे
प्सितफलप्रदा हृन्मध्यंसिद्धिमुद्राभ्यांपातुत्रिपुरमालिनी सर्वरोगहराख्याचक्रायतनमइत्यपि व्यापकत्वेनविन्यसेत्कुसुमांज

वि· ल·व· ष· ७५

75

ल्लिमीश्वरि वाग्देव्यानः प्रसीदन्तु सिंहरकनकांबरः पुस्तकान्तालि विलसद्वरदाभीतिबाहवः दक्षिणां चिबुके स्यां शांवशिनी पातु
सर्वदा कंठं कामेश्वरी देव्ये हृदयं पातु मोदिनी विमला दक्षिणं नाभेस्तद्वामं रुणावतु हृद्धामे जयिनी पातु कंठं सर्वेश्वरी तथा
कौलिनी चिबुकं सिद्धा त्रिपुरा हृदयाम्बुजे सर्वसिद्धिप्रदो तत्र चक्रायतनमस्त्यपि व्यापकत्वेन विम्बेषु क्रमशो जालिमीश्वरि
कामकामेश्वरी वाणचापपाशांकुशाः क्रमात् पवितो हृदि कोणस्य चतुरस्रं ममावतु महामोक्षप्रदा योनिं हृदयं परिराजिता
कामेश्वर्यादिकं पातु नित्याषोडशकं मम कामप्रदा रुद्रशक्तिः कामरूपनिवासिनी अग्रकोणं महायोनेः पातु कामेश्वरी म
म पश्चाद्वैस्नवीशक्तिर्जालंधरकृतमंदिरा दक्षकोणान्तरं योनेः पायान्मे वैस्नवी सदा अर्थदा वैस्नवी शक्तिः पूर्णशैलकृताल
या वामकोणान्तरं पातु सुभगा भगमालिनी त्रिपुरांबा योनिमध्यं सिद्धिमुद्रा ममावतु उड्यानपीठनिलया परब्रह्मस्वरूपिणी
पंचश्रीकोशकल्पद्रुकामधुग्रत्नदैवतैः मंडिता सनसंख्यानां सर्वदर्शनवंदिताः स्तुता षडंगदेवीभिस्स्तुता समयपूजिता
महासौभाग्यजननी महामोक्षप्रदायिनी हृदि देशं तु पातु महात्रिपुरसुंदरी सैव चक्रेश्वरी देवी सिद्धिमुद्रासमन्विता श्री
पादमस्तके देवी पातु त्रिपुरभैरवी एतन्मे कवचं भद्रे रहस्यं सर्वकामदं तुरीयविद्यामुच्चार्य परब्रह्मस्वरूपिणी श्रीमहात्रिपु
रसूक्ष्मा सूक्ष्मवर्जितशक्तिपरवैंदवचक्रवासिनि प्रभात्मिकाभासाश्रीपादुकां पूजयामि तर्पयामि नमः तथैव तु चक्रेश्वरीः पूजयेत् कप
ईलक्ष्रौं हसकलह्रीं सकलह्रीं त्रिपुरसूक्ष्मा सूक्ष्मविवर्जितपरवैंदवचक्रवासिनि प्रभात्मिकाभासाश्रीपादुकां पूजयामि नमः इति वि
न्यस्य समुद्रां प्रदर्शयेत् यन्त्रकस्य विदारव्याततद्यपकटीकृते यद्दृष्ट्वा विम्बसिद्धे देहे साधकस्थिरमानसः विमुच्य मानुषं भावं स्व
यः शिवतां व्रजेत् त्रिकालं भावयेद्यस्तु तस्य सर्वांगसंगतं ग्रामस्ते योगिनीवृन्दस्फुरद्रूपः प्रकाशते भूतप्रेतपिशाचाद्यैः क्वापि
न नैव प्राकाते सिद्धवद्विचरेल्लोके तापत्रयविवर्जितः यत्र योगी स्मरेद्देवं तत्र स्याद्दारभ्य सर्वतः पराणीतेव ततो याति यावद्वादशयोज

७५

ने इति श्रीरुद्रयामले श्रीचक्रन्यासकवचं इति संहारश्रीचक्रन्यासः अथ सृष्टिचक्रन्यासः सच मूलदेव्याद्यणिमान्तः तत्क्रम
माह योगिनीहृदये मूलदेव्यादिकं न्यासमणिमान्तं पुनर्न्यसेत् शिरसि त्रिकोणे एवीदिका मेघ्यादिकं न्यसेत् बाणनेत्रभुवो चा
पौ कर्णौ पाशद्वये पुनः सृष्टिहृदये च नासाग्रदक्षिणे च विन्यसेत् मुण्डमालाक्रमेणैव न्यसेद्वाग्देवताष्टकं वेदांगानि च कर्णि
मस्तकानि वदनने नेत्रमूले त्वपांगे च कर्णे एवं नेतरे तथा चूलिकापाश्वनिम्नार्द्धशेषार्द्धकर्णे षट्के कर्णमूले त्वपांगे च तत्
स्य मूले च विन्यसेत् हृदये मनुकोणस्थाः शक्तयोपि च पूर्ववत् नाभौ त्वष्टदले तत्र वंशो वामे च पार्श्वयो उदरे सव्यपार्श्वे च न्यसेद्दा
दिच तु षष्ठं वंशा वामान्तरालादि न्यसेद् न्यच तु षष्ठं स्वाधिष्ठाने न्यसेत्तस्य पूर्वोद्दलावसानकं मूलाधारे न्यसेन्मुद्रादशकं साथ
कोनमः पुनः सव्ये च वंशे च वामे चैवान्तरालके ऊर्द्ध्वादौ दशमुद्रा सुऊर्द्ध्वादौ वर्जिते पुनः ब्रह्माण्याद्यष्टकं दक्षजंघाश्मसहस्र पूर्ववत्
वामजंघां समारभ्य वामान्तिकमतोपि वा सिद्धाष्टकं न्यसेच्छेषं हृदये पादतले न्यसेत् कारणानन्तरं न्यासं दीपाद्दीपमिवोदिते प
देविन्यसेद्वेशि स्वाभेदेन विचिन्तयेदिति समष्टिरूपेण महाचक्रस्य संहारक्रमन्यासमुक्त्वा सृष्टिक्रमेणाह मूलदेव्यादिकमिति.
एवं चेत् क्रियते तदा न्यासः सृष्टिक्रमेण भवतीति तं पुनर्न्यसेदित्यर्थः तत्प्रकारमाह शिरइत्यादि शिरसि कल्पितत्रिकोणः शिरसि त्रि
कोणः तस्मिन् कामेश्वर्यादिकं बीजदेवित्रयं न्यसेदित्यर्थः केन क्रमेणेत्यत आह एवीदीति एवं स्याच्च मस्तकाद्यभागात्स्तनादि
यथा स्यात् तेन ललाटाभिमुखाग्रस्त्रिकोणः कल्पनीय इत्यायाति सच श्रीचक्रनिर्माणक्रमेण यथायोगपविन्यासरेखाभव
ति तथा ह्यारभ्य ईते कल्पनीय इति भावः तथा च सति शिरोपेत्तया पूर्वाग्रत्रिकोणजातामिति पश्चिमकोणे आग्नेयकोणे ईशा
नकोणे इति वामभविष्यति. तत्रादयोः एवीदीति प्रादक्षिण्येनेत्यर्थः अग्रेस्य प्रदक्षिणमित्यर्थः तेन पश्चिमादप्रदक्षिणमिति तत्र
राजमतमायाति. तेन सह योगिनीहृदयस्यैकवाक्यतयैवमेव न्यासः कार्य इति कश्चित् वस्तुतः एकवाक्यता यावर्वमतद्वये

वि॰
ग॰वृ॰
ष॰
७६

न्न्यासः कार्य इति कश्चित् वस्तुतस्त्वयं पक्षः समीचीनः एवं चतुःशास्त्राणामर्थग्राहकत्वादस्येति संक्षेपः आयुधन्यासे स्थानविशे-
षमाह बाणानित्यादि बाणाः पंचबाणाः शराश्चेति द्विविधाः नेत्रे नेत्रद्वयस्वरूपा इत्यर्थः नेत्रे इति द्विवचनं तेन दक्षनेत्रे कामेश्वर-
बाणाः वामनेत्रे कामेश्वरीबाणाः एवं दक्षभ्रूः कामेश्वरचापः वामभ्रूः कामेश्वरीचापः दक्षकर्णः कामेश्वरपाशः वामकर्णः का-
मेश्वरीपाशः दक्षनासापुटाग्रे कामेश्वरांकुशः वामनासापुटाग्रे कामेश्वर्यंकुशः इति न तत्रैव तान्न्यसेदित्यत आह दक्षिणाद्य-
मित्यादि अत्र यद्यपि त्रिकोणाष्टारयोर्मध्यमायुधस्थानमिति एवं वदतापि तत्रैव न्यास उपपद्यते तथापि सृष्टिक्रमे स्वमूर्तीनां सा-
न्निध्यात्तत्रैवायुधानां न्यासो युक्त इतीश्वराज्ञा एवं षोडशनित्यानामपि स्वस्वमूर्तिनित्यत्वात्सृष्टिक्रमे तस्या नानामपि तत्सान्निध्यात्तत्रैवन्या-
सो न्यासो युक्त इति व्यवस्था मन्तव्या श्रीविद्यान्यासस्थानस्य सृष्टितः स्वस्थानपर्यन्तगुरुपंक्तयो न्यस्तव्यस्तक्रमतया स्थितिनित्या ततः षो-
डशनित्यामण्डलमिति क्रमः सृष्टिक्रमन्यासे अन्यत्र तु एतत्क्रमक्रम एवेति ज्ञातव्यम् श्रीविद्यावर्णरूपे तु एषु तेषु वः क्रमात्
तिथिनित्यास्ततो देवि मातृकास्वरसंयुताः मातृकावन्न्यसेद्देहे सर्वसौभाग्यदायिनी अः स्वरे परमेशानि श्रीविद्याविश्वमा-
तृका स्वरवाह्निन्यसेन्निमां नीरजायतलोचने अयं न्यासः सृष्टिः श्रीचक्रन्यासान्तर्गतः स्वतोपीति मन्तव्यः अष्टाष्टारन्यासक्रम-
माह मुण्डमालेति मुण्डो मस्तकः मुण्डमाला मुण्डमाला तस्याः क्रमेण परिपाट्येत्यर्थः तेन ललाटोर्द्ध्वकोणादितः एवं
दिशा दक्षिणेन शिरो नवयोनिचक्रीस्थाष्टकोणेषु मालाक्रमेण वाग्देवताष्टकं न्यसेदिति भावः ननु बिन्दुचक्रन्यासं कथं कुर्या-
दित्यत आह वैन्दवादीनीति वैन्दवस्थानं दमयं महाबिन्दुचक्रं तद्देवतादिर्येषां तानि यथा चक्राणि त्रिकोणादीनि वैन्दवादीनि कृत्वा
न्यस्तव्यानीति संबन्धः आदौ बिन्दुचक्रं न्यस्य पश्चात् त्रिकोणादीनि न्यसेदिति भावः नहि बिन्दुचक्रन्यासः कथं प्रथमं न्यस्त इति चे-
त् न तस्माद्विन्दुकत्वात्त्रिकोणस्य त्रिकोणमध्ये हि बिन्दुचक्रं तेन विना कथं तदुपपद्यते तेनायं कलितार्थः परिपाटीविशेषः प्र-

७६

76

पश्चिमे शिरसि त्रिकोणं विचिंत्य तन्मध्ये सर्वानंदमयचक्राय नमः इति व्यापकं कृत्वा तद्बिंदुत्वेन विचिंत्य तत्र यथाविधि मूलदेवीं न्यसे
त् ततस्त्रिकोणे द्वौ न्यासः अतः शिरसि त्रिकोण इति सिद्धविभक्तिनिर्देशः केचित्तु तदग्रमेव प्रथमं बिंदुचक्रं विभाव्य विन्यस्य त
द्बाह्यतस्त्रिकोणचक्रं विभाव्य विन्यसेदिति क्रममाहुः स च तेषां योगिनीहृदयसम्मत इति चिंत्यं अथान्तर्दशारचक्रस्य न्यासस्थानमा
ह नेत्रमूल इत्यादि नेत्रस्य दक्षिणनेत्रस्य मूले पूर्वं कंठे नासिकोपकंठ इति यावत् तस्यैवापांगे अंचलकर्णोपकंठ इति यावत् क
र्णस्य दक्षिणस्य पूर्वोत्तरे पूर्वे मध्ये उत्तरे पृष्ठे चूलिकायां पूर्वाडायां निम्नार्धे पश्चार्धे शेषार्धे पूर्वार्धे शिरः पृष्ठाग्रभागयोरित्यर्थः
इति काश्चित् चूलिकायां निम्नार्धे चूलिकायाः प्रथमस्याधस्तिमस्य लघाटासीवनितस्यार्धे शेषार्धे वामार्धे तेन स्कंधसीवन्यादल
वामभागयोरित्यर्थ इति काश्चित् अत्र प्रथमभंगापमंगा इति दिक् कर्णपृष्ठे वामकर्णपृष्ठे कर्णमूले वामकमध्ये अपांगे वाम
नेत्रापांगे तस्य वामनेत्रमूले पूर्वं कंठे चेति दशास्तु स्थानेषु चक्रक्रमेण न्यसेत् सर्वज्ञाद्या दशशक्तीरिति शेषः अथ बहिर्दशार
न्यासमाह सर्वसिद्धादिकामित्यादि कंठे विशुद्धचक्रे अकारादिविसर्गान्तषोडशदले सर्वसिद्धादिकं देवीदशकं पूर्वदलादिप्रा
दक्षिण्येन न्यसेदित्यर्थः पद्मस्यार्हं शुद्धत्वभावनापूर्वकमिति भावः तदा कंठकूपपद्मपूर्वदलमतप्रवान्तः कंठवेष्टनरूपपद्मा
यं न्यासः बहिः कंठवेष्टनत्वेन न्यसेत् अथ चतुर्दशारन्यासमाह हृदय इत्यादि अनाहतचक्रे कंठात् द्वादशदले मनुकोणस्या
न्तर्दशारस्थानस्य सर्वसंक्षोभिण्यादि चतुर्दशशक्तयोऽपि पूर्वस्य पूर्वदलादिप्रादक्षिण्येन न्यस्तव्या इत्यर्थः अथाष्टदलन्यासमाह
नाभावित्यादि भिन्नप्रक्रमे अष्टदलपद्मे नाभौ न्यसेत् ततः पुनर्बाह्यावेष्टनेन पूर्ववदन्तर्वेष्टनेत्यर्थः अतो न्यासस्थानविशेषमष्टद
लात्मकमाह वंशपृष्ठे पीठत्रयवस्त्रमेरुदंड इत्यर्थः तेन पृष्ठे पश्चिमदले वामपार्श्वे उत्तरदले उत्तरे पूर्वदले दक्षपार्श्वे दक्षिणद
ले इति दिग्दलचतुष्टये अनंगकुसुमादिचतुष्टयं पश्चिमादप्रदक्षिणं विन्यसेदित्यर्थः द्विदलमाह वंशेति वामो वामपार्श्वः

वेशश्च वामश्चेति वेशवामौ तयोरंतरालं वेशवामांतरालं वेशवामपार्श्वांतरालमित्यर्थः तेन वायव्यदलं ज्ञातं तदेवादिर्यत्र मम
न क्रियायां तत्र थ्येति क्रियाविशेषणं· तेन वेशवामांतरालादि यथा स्यात्तथाऽन्यदने गरेखादिचतुष्टयं न्यसेदित्यर्थः आदिपदेन
वामपार्श्वादक्षांतराले· उत्तरदक्षवामपार्श्वेतिराले उत्तरदक्षपार्श्वेतिरालं दक्षपार्श्वे वेशांतरालमिति क्रमेण वायव्येशानाग्नेयने
ऋत्य विदिग्दलचतुष्टयं ज्ञातमित्यष्टदले षेवन्यासः अथ षोडशदलचक्रन्यासमाह स्वाधिष्ठानमिति स्वाधिष्ठाने लिंगम्
ले षड्दले न्यस्यात्मनो देहस्य पूर्वदलादारभ्याग्नेयदलपर्यंतं कामाकर्षिण्यादि पंचशक्तीर्विन्यस्य षष्ठे दले शरीराकर्षिणीं षोड
शी शक्तिं न्यसेदिति लिंगावेष्टनत्वेन न्यासक्रमः अथ त्रैलोक्यमोहनचक्रस्यांतश्चतुरस्ररेखायान्यासमाह मूलाधारइतीत्या
दि मूलाधारे चतुर्दले तत्र प्रकारमाह पुर इत्यादि पुरः पूर्वे देहस्येति शेषः न्यसेदिति चानुवर्तते· मध्ये दक्षिणे सव्ये स्यात् दक्षवामयोरि
त्यभिधानात् वेशः पृष्ठं वेशवामे वा दलेषु तद्दलचतुष्टये सर्वसंक्षोभिण्यादिमुद्राचतुष्टयं प्रादक्षिण्येन विन्यस्यांतरालके आग्ने
ये नैर्ऋत्य वायव्येशान इति दलसंधि चतुष्टये उन्मादादिमुद्राचतुष्टयं च विन्यस्योर्ध्वमिंद्रेशानयोर्मध्ये नैर्ऋतिवरुणयोर्मध्ये
धः तयोर्यथाक्रमं खेचरीयोनिमुद्रे न्यसेदिति दशमुद्राश्चेति अथ मध्यमचतुरस्ररेखायान्यासमाह ऊर्ध्वाधोवर्जितं पुनरि
त्यादि पूर्ववन्मूलाधारस्य पूर्वादिदक्षिणेन चतुर्दिक्षु चतसृ मातृः विन्यस्याग्नेयादिचतुरंतराले वामादिचतस्रो मातृर्न्यसेदित्यर्थः
अत एवोर्ध्वाधोवर्जितमिति मातृणामष्टत्वात् अथ बाह्यचतुरस्ररेखान्यासमाह वामजंघामित्यादि वामादिक्रमतः प्रादक्षि
ण्येनेत्यर्थः तेन पूर्वादिदिग्दलेषु चतुष्टयं न्यस्याग्नेयादिविदिग्दलेषु चतुष्टयमिति सिद्ध्यष्टकं न्यसेत् ततो वसिष्ठसिद्धिद्वयं
पादतले चेति न्यसेदित्यर्थः स्थितिवमस्य प्रतिपादयन्नाह कारणात्सर्वानंदमयादित्यर्थः एवमिति स्वाभेदेन ध्यानं कुर्यादित्य
र्थः भ्रूमध्ये हृदये नाभौ स्वाधिष्ठाने ततः परं मूलाधारे तथैवोरुयुगले जानुनोरपि जंघयोः पादयोश्चैवं क्रमाद्धिंसादिकेष्व

रीः विन्यसेत्साधकश्रेष्ठस्त्रिपुरांताः समाहिताः ततस्तद्व्यापकं कुर्यात्ततश्चक्रार्पणं गुना॰ इति षष्ठिश्रीचक्रन्यासनिरूपणं॰
अथ षष्ठितिश्रीचक्रन्यासो निरूप्यते योगिनीहृदये॰ ततस्तु करशुद्ध्यादिन्यासं कुर्याद्विचक्षणः मूर्द्धि गुह्ये च हृदये नेत्रत्रित
यश्रवच श्रोत्रयोर्युगले द्विविश्रु विचभुजयोः पुनः पृष्ठे जानोश्च नाभौ च विद्यान्यासं विधाय वै इति मूर्द्धादिषु विद्यान्यासं विधाय कर
शुद्ध्यादि विद्यान्यासं कुर्यादित्यर्थः तत्रायं यथारंभावाचक्रचक्रेश्वरीणामपि न्यासो मंतव्यः प्रथमं चक्रेश्वरी विद्यादिन्यासं कुर्या
दित्यर्थः तेनास्थितित्वमायाति तथा च॰ सृष्टिः स्यात्त्रिवयोन्यादि षष्ठ्यंतं संहृतिः पुनः षष्ठ्यादिनवयोन्यंतमिति शास्त्रस्य निश्च
य॰ इति तत्रैवोक्तत्वात् तथा करशुद्धिकरीत्याद्या द्वितीया चात्मरक्षिका॰ आत्मासनगतोद्देवी तृतीया तदनंतरं चक्रासनगता
पश्चात्सर्वमंत्रासनस्थिता साध्यसिद्धासना षष्ठी माया लक्ष्मीमयी परा मूर्तिविद्या च सा देवी सप्तमी परिकीर्तिता अष्टम्यावाह
नीविद्या नवमी भैरवी परा मूलविद्या तथाख्याता त्रैलोक्यवशकारिणी एवं नवप्रकाराः स्युः पूजाकाले प्रयत्नतः एताः क्रम
णन्यस्तव्याः साधकेन कुलेश्वरि॰ पादाग्रजंघाजानूरुगुदलिंगाग्रके पुच आधारे विन्यसेन्मूर्तिं स्यामावाहनीं न्यसेत् मूलेन व्या
पकं न्यासः कर्तव्यः परमेश्वरि अकुलादिषु पूर्वोक्तस्थानेषु परिचिंतयेत् चक्रेश्वरीसमायुक्तं नवचक्रेश्वरोदित आसां नामा
नि वक्ष्यामि यथानुक्रमयोगतः तत्राद्या त्रिपुरा देवी द्वितीया त्रिपुरेश्वरी तृतीया च तथा प्रोक्ता देवि त्रिपुरसुंदरी चतुर्थी च महा
देवी देवी त्रिपुरवासिनी पंचमी त्रिपुराश्रीः स्यात्षष्ठी त्रिपुरमालिनी सप्तमी त्रिपुरासिद्धिरष्टमी त्रिपुरांबिका नवमी तु महादेवी
महात्रिपुरसुंदरी पूजयेत्तु क्रमादेता नवचक्रेश्वरादिते एवं नवप्रकारा या पूजाकाले तु पार्वति पूकाकारहसादिशक्तिरजना
मरकारिणीति तत्र प्रथममकुलादिकं ध्यात्वा त्रैलोक्यमोहनादिकं नवमं त्रोच्चारेण मनसा ध्यायेत्तद्वह्निनवाह्वांतस्थे
नविन्यसेत तत्र त्रैलोक्यमोहनादौ तत्रैव नवचक्रेश्वरीन्यसेत् ततस्तच्चक्रेश्वरीयुक्तं तत्तच्चक्रं पुनर्ध्यायेत् इत्यतउक्तं चक्रेश

वि॰
सौ.व.
ष॰
७८
78

रीरमाधुक्तमितिचक्रेस्वर्ग्याधिष्ठितमित्यर्थः तद्यथा अकुलेविषुसंज्ञेसुषुम्नामूलमार्गस्थसहस्रदलकमलेत्रिपुरसुंदर्य्याधि
ष्ठितेसर्वसंक्षोभकंचक्रंनाभौदशदलकमलेत्रिपुरवासिन्यधिष्ठितेसर्वसौभाग्यदायकंचक्रं अनाहतेद्वादशदलेत्रिपुराश्र्यधि
ष्ठितंसर्वार्थसाधकंचक्रं विशुद्धौषोडशदलेत्रिपुरमालिन्यधिष्ठितेसर्वरक्षाकरंचक्रंलंबिकाग्रेष्टदलकमलेत्रिपुरासिद्धाधिष्ठि
तेसर्वरोगहरंचक्रं भ्रुवोरंतरेद्विदलकमलेत्रिपुरांबाधिष्ठितंसर्वसिद्धिप्रदायकंचक्रं इंदौललाटेबिंदौमहात्रिपुरसुंदर्य्य
धिष्ठितंसर्वानंदकरंचक्रंभावयेदिति तथाचयोगिनीहृदये अकुलेविषुसंज्ञेचशाक्तेवह्न्यौतथापुनः नाभावनाहतेशु
द्धौलंबिकाग्रेभ्रुवोंतरे इंदौइति कुलंमूलाधारादयःषट्लपद्मंनामतस्मादेकांगुलादयः पद्ममष्टदलेपद्मतस्मादेकांगु
लादयः शेषाणसहस्रदलपंकजमितिक्रमः कुलादन्यदकुलंसुषुम्नामूलस्थंअकसहस्रदलकमलंतस्मिन्नित्यर्थः ननुष
ट्दलस्यैवअकुलत्वात्अन्यत्वेनाष्टदलस्याप्यकुलत्वमितितत्रकथंनस्यादित्यतआह विषुसंज्ञेचेति विषुसंज्ञएवाकुलेन्यासः
नत्वकुलमात्रेइत्यर्थः विषुसंज्ञेव्यापकनाम्निसहस्रदलइतियावत् यतस्तत्रक्षिप्तासुषुम्नातदंतर्भूतविंशत्पंकजानि
व्याप्नोतीति अतोनाष्टदलकमलरूपमकुलेगृह्यतइत्यर्थः शाक्तेवह्नाविति वह्नौशाक्तेइतिव्यत्ययेनान्वयः वह्नेश्चमातुरा
धात् तत्रत्रिपादेशाक्तमहेश्वरस्यस्वतंत्रेच्छत्वात् तथाचवह्निमूलाधारः वह्निमंडलाधारत्वात् शाक्तिःस्थलेबोधानंदहृदुस्थि
तत्वात् शाक्तंस्वाधिष्ठानमित्यर्थः नाभौमणिपूरके अनाहतेहृदयपंकजे विशुद्धौकंठपद्मेलंबिकाग्रेकंठोर्ध्वेतालुमूले
ष्टदलकमलेभ्रुवोरंतरेआज्ञाख्येद्विदलकमले इंदौललाटेबिंदौबिंदावित्यर्थः दीपाकारेअर्धमात्रंचललाटेध्यात्वामिथ्यतइति स्वय
मुक्तत्वात् अर्धमात्रामितिह्रस्वस्योच्चारणकालेमात्रेत्युच्यते मात्रायाअर्धमुच्चारणकालेयस्यतदर्धमात्रंललाटेभ्रुवोरूर्ध्वपरि
भागेहृत्वंचतैलाकारेबिंदुरेवेंदुरित्युच्यतइत्यर्थः तेनबिंदोरूपमुच्चारणकालः स्थानंचोक्तंदीपाकारोर्धमोच्चारणकालोहृत्वम

७८

त्रिवेणी विंदुरित्यर्थः अथः सहस्राराद्दीनां प्रपंचमाह स्वच्छंदसंग्रहे अथश्चोर्द्धे सुषुम्णायाः सहस्रदलसंयुते रक्ते श्वेते च साहस्र
दलस्य शक्तिभिर्युते ऊर्द्धाधोमुखमीशानि कर्णिकाकेसरान्विते शक्तिरूपे महादेवि कुलाकुलमयं शुभे पंचकद्वयमीशा
नि स्थितं शाम्भवमव्ययं तयोर्मध्ये सुषुम्णांतः स्थित दशाधारपंकजे शक्तिरूपं शिवाकारं शशीगणः सन्निजालयं तेषां रूपक्रमं वे
वक्ष्याम्यहं सेः शृणु नाम्बृणु गुदमेढ्रान्तरे देवि पंचांगुलसमुच्छ्रिते गुदमेकांगुलं मध्ये द्व्यंगुलविस्तारणे तस्य मूले महायोनिस्त्रिको
णाकाररूपिणी सुषुम्णायोनिमध्यस्था तस्या मूले महेश्वरी अथः पद्मं सहस्रारं कर्णिकाकेसरान्वितं तेजसा रक्तवद्दीप्तं तद्दल
स्थितशक्तिभिः प्रतिकिंजल्कसंस्थाभिः शक्तिभिः सहतां प्रिये कालिकामध्यतो देवि कुलदेवी च संस्थिता तस्याधोर्द्धे सुषुम्णा
यां मध्ये त्वेकांगुलोपरि पद्ममष्टदलैर्युक्तमष्टग्रंथिसमन्वितं रक्तं स्वकर्णिकोपेतं रक्तकिंजल्कशोभितं ग्रंथ्यग्रस्थाविश्रृंगाच ब्र
ह्माण्याद्यष्टभैरवैः अष्टपत्रस्थितग्रंथिस्थितवर्णादिशक्तिभिः तदन्यशक्तिभिश्चैव संगताभिः समावृते तन्मध्ये कोलशक्त्या च
सेवितं संस्मरेत्ततः एकांगुलप्रमाणोर्द्धे षट्दलं कुलपंकजं आधारपंकजं पीतं चतुःपत्रं सुकेसरं अधोमुखं च तन्मध्ये कुण्डली पर
मेश्वरी स्वयंभूमध्यगा चिन्त्या वरदादिभिरावृता पार्थिवं पंकजं ह्येतत्तस्याधः पंकजं परं तेजसं परमेशानि तन्मध्यस्थितशक्तयः
तिः कलाः परमेशानि विद्युत्पुंजनिभाः स्मरेत् तदूर्द्धे कर्णिकामध्ये वह्निविंदुं तदूर्द्ध्वगं पूर्णपीठं च तस्योर्द्धे शाकिनी संस्थिता शिवे
आधारपंकजस्योर्द्धे सार्द्धद्व्यंगुलकोपरि तैजसं साष्टपत्रं च पीतकर्णिकयाकुलं हृल्लेखा कर्णिकामध्ये स्थिता नेत्रादिसेविता प
तस्मात् द्व्यंगुलादूर्द्धे स्वाधिष्ठानं षडस्रकं आप्यं च वेपिनी शक्तिर्देवीभिः शक्तिभिर्वृता काकिनीमपि चिंत्याय नाभावष्टांगुलोपरि
तन्मध्ये मणिपूरं च दशपत्रसुशोभनं लाकिनीमध्यगं तच्च डामर्याद्यादिभिरावृते चतुर्दशांगुलादूर्द्धे मणिपूराख्यपंकजात् पंक
जं राकिनीमध्यं द्वादशारं समावृते तत्र कालरात्र्यादिशक्तिभिश्च समावृते मध्यस्थासनस्थं विविंदुनादाङ्गणाख्यपीठकं तस्मादे

79

कोणंगुलाहृद्ध्वे विशुद्धे षोडशारके मध्यगा डाकिनी बाह्यपत्रेषु परमेश्वरी अमृताद्या स्वरांता स्यात् शुद्धं विश्वं तदर्चितः कंठोर्ध्वे परमेशा
निलं विकाचतुरंगुले तस्मादष्टदले पद्मे नासिकादिभिरावृते आज्ञाधारे द्विपत्राब्जे दत्तद्विदलसंयुते हंसवती क्षमा पार्श्वद्वयोर्मध्ये तु
हाकिनी ततो ललाटगेहष्टे विंद्वावरणमूर्ध्वतः सूर्यकोटिप्रतीकाशमतिदीप्तं महद्गुणं तन्मध्ये दशकोटीनां संख्या योजनपंक
जे तत्कर्णिकासमासीनः शांत्यतीतेश्वरः प्रभुः पंचवक्त्रो दशभुजो विद्युत्पुंजनिभाकृतिः निवृत्तिश्च प्रतिष्ठा च विद्या शांतिर
नुक्रमात् परितश्चाधिस्थिताश्चैताः शांत्यतीतस्य सुंदरि वामभागे समासीना शांत्यतीता मनोन्मनी पंचवक्त्रधराः सर्वा दशबाहु
विभूषणाः विंदुतत्त्वसमाख्याते कोट्यर्बुदशते वृतामिति इति स्थितिश्रीचक्रन्यासनिरूपणं ॥ इति श्रीविद्यार्णवे षष्ठश्वासः ८
अथ स्थितिश्रीचक्रन्यासस्तु विद्याचक्रेश्वरीसंगत्रयात्मक इति सिद्धांतः तत्र प्रथमे संप्रदायात्करशुद्धिं विद्याकरशुद्धिं विद्या
यात्मरक्षां विद्यात्मरक्षां कृत्वा देवीं स्वाभेदेन विभावयेत् तथा श्रीतंत्रराजे. अरुणां करुणातरंगिताक्षीं धृतपाशांकुशपुष्प
बाणचापां अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीं इति विभाव्य श्रीचक्रन्यासमारभेत् तत्र विद्यान्यासस्तु
आदौ कूटत्रयभेदेन व्यस्ताव्यस्तमूलविद्यां न्यसेत् यथाक्रमेण मूर्ध्नि गुह्ये च हृदये नेत्रयोर्दक्षवामयोः श्रोत्रयोर्भुजयोः पृष्ठ
जान्वोर्नाभौ च विन्यसेत् इति कूटन्यासः अथ तत्त्वन्यासः अथ समस्तविद्यान्यासः स्थानेष्वेव दशसु मूर्द्धादिषु विचक्षणः मूल
विद्यां च व्यापकं न्यसेत् त्रितारादि यथाक्रमं इति विद्यान्यासः अथ नवचक्रेश्वरीन्यासः पादयोर्जंघयोर्जान्वोरूर्वोश्च गुदपार्श्वयोः लिं
चोर्ध्वं जानु चाधारे स्वाधिष्ठाने च नाभिके अनाहते विशुद्धौ च न्यासोऽयं परिकीर्तितः इति नवचक्रेश्वरीविद्यान्यासः अथ नवचक्रन्यासः
तत्राद्या स्युस्त्वाद्या त्रिपुरा त्रिपुरेश्वरी सुंदरी त्रिपुराद्या च तथा त्रिपुरवासिनी त्रिपुराश्रीः पंचमी स्यात् षष्ठी त्रिपुरमालिनी सप्तमी ७५
त्रिपुरा सिद्धा त्रिपुरांबाष्टमी भवेत् नवमी तु महादेवी महात्रिपुरसुंदरी नवचक्रेषु विन्यसेदिति न्यासः प्रकीर्तितः इति चक्रेश्वरी.

न्यासः इति स्थितिश्रीचक्रन्यासोद्धारः अथ स्वाषडंगन्यासः तारत्रयं ततो वाला नमस्त्रिपुरसुंदरि मारत्तयुगले प्रोक्ताः षडंगानि
विन्यसेत् इतिरत्नाषडंगं वालावीजत्रयेणैव द्विरावृत्त्याषडंगकं कुर्यात्स्वात्मनः पश्चाद्वीजषडंगन्यास ईरितः कूटत्रयद्विरावृत्त्याष
डंगानि समाचरेत् विद्यापंचदशीलक्षडंगन्यास ईरितः पंचमैकैककैकैस्तु पंचवीजैः षडंगकं श्रीविद्याषोडशार्णायाः षडंगोय
मुदाहृतः सर्वतत्त्वानि तत्त्वानि तथैवाद्या द्विवोधिनी स्वतंत्रा च ततो नित्या लुप्ता शक्तिस्ततः परं अनंतशक्तिरेतास्तु वालावी
जैकपूर्विकाः षडंगयुवतीन्यासः प्रोक्तः सर्वार्थसिद्धये एकैकेकूटमादौ श्रीमहात्रिपुरसुंदरी सर्वज्ञताशक्तिधाम्ने इत्यादिः
प्रयोगवदीरितः षडंगयुवतीन्यासो मूलविद्याप्रदीपकः इति मूलषडंगयुवतीन्यासः मायाषट्कदीर्घैकाद्यादेः प्रकारांतरमिष्यते
अथ षडंगयुवतीनां ध्यानं कुंदेंदुनीलासितपीतरक्तप्रभा वराभीतिकराः प्रगल्भाः लावण्यलीलाः खिलयौवनाढ्याः श्रीदे
वदेव्यान्तनवायुवत्यः इति ध्याने अथ श्रीविद्यार्णन्यासः ज्ञानार्णवे अथ वक्ष्ये महेशानि श्रीविद्यान्याससमुत्तमं संपूर्णां वि
तयेद्धियां ब्रह्मरंध्रे अरुणप्रभां स्ववत्तुयाषोडशार्णां महासौभाग्यदां स्मरेत् वामांसदेशे सौभाग्यदां गुलीं भ्रामयेत्ततः त्रिपुरां
कार्ग्रहामुख्यां पादमूले प्रविन्यसेत् पुनः संहरणीयादेर्विगलेऽष्टौ विन्यसेत्ततः पुनः संहरणीयादेर्व्यापकत्वेन विन्यसेत् व्यापको
तयोनिमुख्यं न्यस्वेत् तिस्राभिर्वेधयेच्च श्रीविद्यार्णत्रयमाद्येन्यासः सौभाग्यवर्द्धनः ब्रह्मरंध्रे न्यसेद्देवि मणिवेधे न्यसेत्ततः लला
टे नामिकां कुर्यान्नासो डशार्णैस्मरवृत्तयः सम्मोहनाख्यो देवेशि न्यासोयं त्रैलोक्यकारकः त्रैलोक्यमरुणं ध्यायन् श्रीविद्यां मनसि
स्मरन् पादयोर्जंघयोर्जान्वोः कट्योरंघ्रिपृष्ठके नाभौ च पार्श्वयोः स्त्रीवक्षनयोरंसयोस्तथा कर्णयोर्ब्रह्मरंध्रे च वदने चैव पार्वति
ततः कर्णप्रदेशांतकरे चैतदनुक्रमात् संहारोयं महान्यासो वीजैः षोडशभिः क्रमात् श्रीविद्यायाः षोडशार्णन्यासे विन्यसेद्योम

वि॰
णिव॰
स॰
८॰

वेत् सृष्ट्यर्थं विमर्शसंहृद्विमातृकां सर्ववृत्तिप्रियेश्वइति अथ षोडशार्णायाः बहुभेदाद्येन भेदेन योऽहीत्वितनस्तस्य वर्णानेवान्यसेत् ।
अत्र ग्रामिन्न्येथेश्रीतंत्रराजविहित अर्चाक्रमस्मृतत्र पंचदशार्णाः श्रीभगवता शंभुना उद्धारः कृतः तस्मात्सर्वे पंचदशार्णामेवोद्धारः क्रि-
यते एजात्पत्तस्या अग्रे विशेषतः लिख्यते अस्याः श्रीविद्यायाः मुख्याम्नायः ऋग्वेदेति तथा॰ चत्वारदंकारं सत्वतिमेवोद्धारः
ऋग्वेदे प्रसिद्धः अथर्ववेदोपनिषदि उद्धृतोऽस्याः मूलमन्त्रः तदनुसारता नागमति॰ अथ षोडशार्णामुद्धारक्रमः प्रदर्श्यते॰ तत्र श्री
ज्ञानार्णवे श्रीदेव्युवाच त्रिपुरा विविधा देव भवता प्रकटीकृता विविधेति यदुक्तं त्वप्रकटीकुरु शंकर ईश्वर उवाच परंब्रह्मस्व
रूपे च नादबिन्दुकलान्विते शिवशक्तिमयं तत्त्वं कथयामि तवानघे आप्यतिष्ठति वै विश्वं सशिवः परमेश्वरि एवं गुणोऽस्तु कथि
ता शिवशक्त्युत्तमा तां शृणु अकारादि सकारान्ता मातृका शक्तिरव्यया हकारः परमेशानि केवलः शिव उच्यते आद्येनान्तरभावे
न तदाहं सकलार्थदः उच्यते मातृकार्णेस्तु सर्वमहीश्वरः हकारः परमेशानि शून्यरूपः सदाव्ययः सकारः शक्तिरूपत्वात्पर
वाचीच सर्गवान् उत्पत्तेकारणं यस्माच्छक्तिरित्यभिधीयते आत्मानं दर्शयेद्योगः सोऽहं शब्देन सुन्दरि बिन्दुत्रयसमायोगान्म
हात्रिपुरसुंदरी नादरूपेण सा देवी हकारार्द्धस्वरूपिणी हकारः परमेशानि शिवरूपी यतस्तदा तस्माद्योगं महाशक्तिर्हकारा
र्द्धस्वरूपिणी अतएव महाविद्या महात्रिपुरसुंदरी नित्येति कथ्यते देवि चित्कलापरदेवता श्रीगुरोः कृपया भद्रे संप्रदायकु
लान्विता॰ प्रातःकृत्याय देवेशि गुरुं संस्मृत्य स्वनामभिः संध्यास्नानादिकं देवि विद्यायमन्त्रवित्तमः सर्वशृंगारवेषाढ्यः कर्पूराद्यु
ह्रणादिभिः मल्लस्रगमदोद्दामलिप्तांगः कुंकुमारुणः रत्नविभूषाढ्यो रक्ताम्बरविराजितः तांबूलरागवदनो मादनानंद
मानसः यागमंडपमासाद्य लाक्षाचित्रविचित्रिते अनेकपुष्पकुसुमलेपप्रकरशोभिते मनोहरे सुदीपस्थे सम्यगासने चोपविश्य सः

८॰

मंत्रोद्धारं प्रकुर्वीत सर्वकामार्थसिद्धये आद्यं वाग्भवमुच्चार्य कामबीजं द्वितीयकं कुमार्यास्तु तृतीयं तु त्रिपुरा परमेश्वरि कल्पद्रु
द्रिकरी विद्या प्रथमा परमेश्वरि ऐं क्लीं सौः इति। कुमारी तु द्वितीया सा त्रिपुरेशी महेश्वरि। ऐं क्लीं सौः इति। त्रिपुरेश्यादिसंतप्त्या भुवने
शी परित्यजेत् ह्रीं क्लीं सौः इति। अनया चासनं विद्या त्रिपुरेश्याः षडंगकं त्रिपुरेशी महेशानि त्रिबीजा तु स्थिता सदा चक्रासनगता
विद्धि देवि त्रिपुरवासिनी हैं ह्क्लीं ह्सौः इति। त्रिपुरेशि महेशानि वाग्भवे कामराजके शिवचंद्रसमायुक्ता तार्तीये शिवरूपिणी
सर्वमंत्रासनगता त्रिपुराश्रीरियं प्रिये ह्सैं ह्सक्लीं ह्सौः इति आत्मासनगता या तु हित्वा तार्तीयमद्रिजे वृत्तेनात्मकमारोप्य
साध्यसिद्धासनस्थिता ह्रीं क्लीं ब्लें इति। संपत्प्रदा भैरवी या तन्नत्वा तार्तीयबीजके बिंदुं हित्वा तत्र सर्गं निक्षिपेत्सुरसुंदरि ह्सैं ह
सकलरीं ह्सौः ईश्वर उवाच इति। मूलविद्यां शृणु प्रौढि सकलागमसेविता सर्वदर्शनवंद्यां च चित्कलामयये शिवे भूमिश्च
न्द्रः शिवो माया शक्तिः कृष्णार्द्ध मादनं अर्धचंद्रश्च बिंदुश्च नवार्णो मेरुरुच्यते लसहेई प्रकबिंदुनाद इति। महात्रिपुरसुंदर्या
मंत्रो मेरुरुद्भवा लकारात्पृथिवी देवि सशैलवनकानना। पंचाशत्पीठसंपन्ना सर्वतीर्थमयी परा सकाराच्चंद्रतारादिग्रहराशि
स्वरूपिणी हकाराद्व्योमसंयोगाद्व्योममण्डलसंस्थिता ईकाराद्विश्वमूर्तिर्या महातुर्यात्मिका प्रिये एकाराद्वैष्णवी शक्तिर्वि
श्वपालनतत्परा रकारात्तेजसा युक्ता परंज्योतिस्वरूपिणी ककारात्कामदा काममूर्तिणी स्फुरदव्यया अर्धचंद्रेण देवेशि वि
श्वयोनिर्विलीविता बिंदुना शिवरूपेण शून्यरूपेण सादिनी अनया सह सर्वत्र व्याप्तिनिश्चलता लता एवं परब्रह्मरूपमेरु
णा तेन सुव्रते एवं च नवभिर्वर्णैर्जायते त्रिपुरा मनुः अन्यथा नैव निष्पत्तिर्नास्ति श्रीत्रिपुरा मने। श्रीचक्रमपि देवेशि मेरुरूपं न
संशयः लकारः पृथिवीबीजं तेन चोर्वीतदुच्यते सकारश्चंद्रमा भद्रे कला षोडशकात्मकं तस्मात्षोडशपत्रं तु हकारः शिव उच्यते
अष्टमूर्तिः सदा भद्रे तस्मादष्टदलं भवेत् ईकारस्तु महामाया भुवनानि चतुर्दश पालयंती परा तस्माच्च कोणं च भवेत्प्रिये शक्ति

वि·
शैव·
म·
८९

रेकादशस्थाने स्थितास्ते जगत्त्रये विश्वयोनिरिति ख्याता सा त्रिंशोर्दशरूपकाः सकारात् परमेशानि चक्रं व्याप्य विजृम्भिते देश
कोणपरा तस्माद् ख्याता राज्ञे पाति द्वयः कलादशान्वितो वह्निर्दशकोणप्रवर्तकः ककारात् मादने देवि शिवे चाष्टस्वरूपके योनिर
स्य तदा चक्रे वसुयोन्याकृतिर्भवेत् अर्द्धमात्रगुणास्ते तु भेदरूपायतस्ततः त्रिकोणरूपा योनिस्तु बिन्दुना भैरवी भवेत् कामेश्वरस्य
रूपं तद्धि स्थाधारस्वरूपिणी श्रीचक्रं तु वरारोहे श्रीविद्यार्णवसंभवमिति तन्त्रान्तरे मनुश्चन्द्रः कुबेरश्च लोपामुद्रा च कामराट् अ
गस्त्यो नन्दी सूर्यश्च विष्णुः स्कन्दः शिवस्तथा दुर्वासाश्च महादेव्या द्वादशोपासकाः स्मृताः शक्रश्च सोमनी चैव तथा च वरुणस्त
था धर्मराजो नलो नागराजो वायुर्वैश्रवणस्तथा ईशानश्च वृतिश्चैव तथा नारायणस्तथा ब्रह्मा जीवो महादेव्या ह्येते दश उपासकाः
पंचविंशतिसंख्याको पासकानां महेश्वरि उपास्यमन्त्रभेदांस्ते प्रवक्ष्यामि समासतः· इति ज्ञानार्णवे शृणु देवि प्रवक्ष्यामि वी
जं कामेश्वरीमते सकलाभुवनेशानि कामेश्वरी बीजमुत्तमं सकलह्रीं इति अनेन सकला विद्याः कथयामि विशेषतः शाक्त्यागस्त
ख्यावर्णाये कलमध्ये स्वलोचने वाग्भवं पंचवर्णाख्यं कएईलह्रीं इति· कामराजमथोच्यते मादने शिवचन्द्राख्यं शिवान्तसीनलोचने·
कामराजमिदं भद्रे षड्वर्णं सर्वमोहनं हसकहलह्रीं इति शक्तिबीजं वरारोहे चन्द्राख्यं सर्वसिद्धिदं चतुरात्मस्वरूपं तु अक्षरात्रिंशपरा अ
त्र शक्तिकूटं गुह्यं तु कामेश्वरी बीजरूपमित्यर्थः सर्वतीर्थमयी देवि सर्वतीर्थस्वरूपिणी सर्वसाक्षिमयी नित्या सर्वयोनिमयी परा स
र्वज्ञानमयी संवित् सर्वप्रज्ञानरूपिणी सर्वदेवमयी साक्षात् सर्वसौभाग्यसुन्दरी एतामुपास्य देवेशि कामः सर्वसुगंदरः इयं कामरा
जोपासिता श्रीविद्या· तथा· देव्युवाच एतस्या देवदेवेश भेदान् कथय सुन्दर केन केनोपासिते यं विशदीकुरु सुन्दर· तत्त्वतः ईश्वर उवा
च शृणु देवि प्रवक्ष्यामि लोपामुद्राभिधां परां कामराजाख्यविद्यायाः शक्तिं तर्ष्यं च सुन्दरि हित्वा मुखे वशिवेंदुभ्यां लोपामुद्रा प्रकाशिता

कामराजविद्याया वाग्भवे एकारं ईकारं हित्वा आदौ हकारं च सकारं च दद्यात् अन्यत्समानं· तथा अगस्त्योपासिता विद्या त्रैलोक्यक्षोभकारि·

णी एषा विद्या कामराजप्रपूजिता वन संशयः हसकलह्रीं सकहलह्रीं सकलह्रीं इति लोपामुद्रोपासिता श्रीविद्या अनयोर्भेदमग्रे वक्ष्या
मः विद्याद्वयमिदं भद्रे दुर्लभं भुवनत्रये कामराजाख्यविद्यायां वाग्भवेन वरानने विद्योद्धारं प्रवक्ष्यामि शाक्तिमादनमध्यगं शिवं कुर्या
द्वाग्भवे तु शिवाद्यं कामराजकं चंद्राद्यं तु तृतीयं स्याद्द्वितीयं प्रतु प्रजिता कहएईलह्रीं हकएईलह्रीं सकएईलह्रीं ॥ इति मनूपा
सिता श्रीविद्या· महाद्यं वाग्भवं देवि चंद्राद्यं शिवमध्यगं मादने कामबीजं तु शाक्तिबीजं हसाननं चंद्राराधितं विद्येयं भोगमोक्षफलप्र
दा सहकएईलह्रीं हसकएईलह्रीं इति चंद्रोपासिता श्रीविद्या· तथा कामराजाख्यविद्या स्यान्नीयं स्यादुपार्वति शक्तिबीजं सहाद्यं स्या
द्विद्यागस्त्यप्रपूजितेति कएईलह्रीं हसकलह्रीं सहसकलह्रीं इति अगस्त्येनोपासिता श्रीविद्या तथा· लोपामुद्राप्रभावप्रभावेण
स्यात्तद्धस्त्रस्वरूपिणी तिद्वयं विद्या लोपामुद्रयाप्युपासितेत्यर्थः एतेनेयं द्वितीयलोपामुद्रोपासिता श्रीविद्येति तथा कामराजाख्य
विद्यायां वाग्भवे मादने तज्ज चंद्रेनेन्द्रे च संयोज्य कामराजे ततः परं हित्वा चंद्रमुखे कुर्याद्विद्येयं नंदिप्रपूजितेति सएईलह्रीं सहकहल
ह्रीं इति नंद्युपासिता श्रीविद्या तथा कामराजाख्यविद्यायां हित्वा भूमिं तृतीयके शक्तिबीजे स्थितां देवि चंद्रार्धः कुरु तत्र च इंद्राग्रा
थिता विद्येयं भुक्तिमुक्तिफलप्रदा इति कएईलह्रीं हसकहलह्रीं सकलह्रीं इतीन्द्रोपासिता श्रीविद्या· तथा लोपामुद्राख्यविद्यायां द्वि
तीयायां महेश्वरि कामराजे भृगुं हित्वा तार्तीयं शक्रगः शिवः एषा विद्या वरारोहे द्विपुरुषप्रपूजितेति· कएईलह्रीं ककसहलह्रीं
इति सूर्योपासिता श्रीविद्या तथा शृणु देवि प्रवक्ष्यामि चतुःकूटां च षण्कारीं लोपामुद्रां द्वितीयां तु विलिख्य महासुंदरि पुनर्वि
लिख्य तामेव चतुर्थे पंचमे स्थितां हित्वा तु भुवनेशानीमेकोच्चारणवोच्चरेत् चतुःकूटा महाविद्या शंकरेण प्रपूजितेति कएई
लह्रीं हसकहलह्रीं सहसकलह्रीं कएईल हसकहल सहसकलह्रीं इति शिवोपासिता श्रीविद्या तथा लोपामुद्रां पुनर्देवि वि
लिखेन्नदंतरं नेदिके स्वर विद्या च षट्कूटा वै सर्वार्थ भवेत् इति कएईलह्रीं हसकहलह्रीं सहसकलह्रीं सएईलह्रीं सहकहलह्रीं स

वि॰
लि॰
स॰
८२

कलह्रीं इति षट्कूटा विस्तृणा सिता श्रीविद्या कामराजाख्यविद्यायास्त्रिकूटेषु वदनेन याष्टिता भुवनेशानी दिव्या कुरु महेश्वरी॰
बिंदुहीना नादहीना बिंदुवीसर्गवर्जिता भवेत् दुर्वासमा पुरादेवि निष्कला सवर्जिता परेति कएईलह्रीं ह्रीं हसकहलह्रीं ह्रीं सकलह्रीं
ह्रीं इति दुर्वासोपासिता श्रीविद्या॰ इति द्वादशभेदाः अन्यास्तु योदशविद्या प्रोक्ता इह विद्यामः अथ षोडशार्णविद्याया उद्धारक्रम
माह ज्ञानार्णवे चतुर्विधप्रकारेणामृणु देवेशि कथ्यते त्वमनोहारिणी यस्मात्कथ्यते भुवि दुर्लभा चंद्राग्निवारुणांतं च शक्रादिमा हि
तेष्टथक् वामात्तबिंदुनादाढ्यं विषमात्कलान्वितं विद्याद्वोयाजयेद्दिवि सा त्वाजाग्रत्स्वरूपिणी उत्पत्तिर्जागरो बोधो व्याप्तिर्मन
नस्तथा कलाचतुष्टयं जाग्रदवस्थायां व्यवस्थितं जाग्रत्स्वगुणाः प्रोक्ता केवलं शक्तिरूपिणी त्रिकूटा सकलाभेदे पंचकूटा
भवंति हि वैसर्वी वसुकूटा स्यात् षट्कूटा शंकरी भवेत् अस्यार्थः चंद्राग्नि हकारः वारुणांतं शकारः शक्रादिः रेफः वामाक्षी ईका
रः बिंदुनादाभ्यां ह्रीं श्रीं इति बीजद्वयं सिद्धं प्रोक्ता श्रीविद्या मायाबीजादिका चेत् उत्पत्तिरूपा भवति कूटादिषु मायाबीजदानेन जा
गररूपा भवति कूटादिषु श्रीबीजदानेन बोधरूपा भवति इति भेदा जाग्रत्स्वरूपाः तदुक्तं स्वच्छंदविग्रहे लज्जाबीजादिका विद्याः
प्रोक्ता उत्पत्तिरूपकाः लज्जाबीजादिकूटस्तु प्रोक्ता जागररूपकाः एवं श्रीबीजयोगेन बोधव्याप्तिरूपकाः जाग्रत्स्वरूपा श्रीवि
द्या चतुर्द्धा सा प्रकीर्तिताः इति॰ तदा भेदास्तु सकलाश्चतुःकूटा भवंति हि वैसर्वी सप्तकूटा स्यात् पंचकूटा तु शंकरी स्वप्नरूपा महा
विद्याः प्रोक्ता बीजद्वयादिकाः मायालक्ष्म्यादिकाश्चैता अभिलाषस्वरूपकाः बीजद्वयादिकूटेषु उन्मनरूपाः प्रकीर्तिता रमामाया
यादिकाश्चैता रूपिण्यः कूटयोजिताः स्मृतिरूपाश्च कथिता तथा भेदा महेश्वरि पंचकूटा भवंत्येते सप्तकूटा तु वैसर्वी षट्कू
टा शंकरी प्रोक्ता स्वप्नावस्थाः समीरिताः वेदादिबीजयुगलयोगगस्त्वर्गा समीरिताः सुषुप्तिरूपा जायंते सुषुप्तिः शिवरूपिणी
मरणं विस्मृतिर्मूर्छा निद्रा च तमसा वृताः सुषुप्तेस्तु कलास्तेयाश्चतस्रः परमेश्वरि तारमायादिकाश्चैव मायातारादिकास्तथा

ताम्ललक्ष्म्यादिकाश्चैव रमातारादिकास्तथा स्वस्वभिन्नभेदाश्चत्वारः कालात्रूपामहेश्वरि अत्र तारमायारमादिकाः मायातारमा
दिका तारमामायादिकाः रमातारमायादिकाश्चेत्यर्थः एवंक्रमेण द्वादशविधविद्यानां तु चतुश्चत्वारिंशत्त्रयशतभेदा भवंति ज्ञा
नार्णवे वेदादिमादितादौ विशिष्टशक्तिमयी सदा तदा भेदास्तु सकलाः षट्कूटाः परमेश्वरि वैष्णवी नवकूटा स्यात्सप्तकूटा तु शांक
री अस्याः स्मरणमात्रेण जगदानंदितं भवेत् भेदत्रयं तु कथितं महाविद्यां शृणु प्रिये यस्या विज्ञानमात्रेण ब्रह्मसाक्षात्त्वसंशयः
स्वप्नस्याद्दौ जागरांते स्फुरंत्या मात्रलक्षणा अवस्थाशेषतां प्राप्ता तुर्यातु परमेश्वरि भावाभावविनिर्मुक्ता गुणातीता निगद्यते वै
रागं च समुत्सृज्य तं समाधिं विमले मनः सदसद्वस्तुनिर्वाणस्तुरीयायाः कला इमाः आद्यबीजद्वयं भद्रे विपरीतक्रमेण तु विलिख्य
परमेशानि ततोन्यानि समुद्धरेत् अंते मुखवरारोहे कुमारी विघ्नीश्वरि एभिस्तु पंचसंख्याकैर्बीजैः संपुटितं यजेत् षट्कूटा पर
मेशानि विद्येयं षोडशाक्षरी त्रिकूटाः सकला भद्रे षोडशार्णा भवंति हि वैष्णव्या कोणविंशार्णा शैवी सप्तदशाक्षरीति अस्या
र्थः आद्यबीजद्वयं मायारमात्मकं तस्य विपरीतक्रमः आदौ रमा पश्चान्मायेत्यर्थः अतः मध्ये स्थितं कामबीजं मुखे आदौ यस्याः
कुमार्याः एतैः पंचसंख्याकैर्बीजैः षट्कूटा नवकूटा वा सप्तकूटा संपुटीकृता गायत्र्यपि रमाबीजसमुद्भूतमायाबीजं नियोजयेत्
कामबीजं समालिख्य वाग्बीजं तदनंतरं चतुर्दशस्वरोपेतं चंद्रबिंदुयुगान्वितं प्रणवं भुवनेशानीं रमां चैव महेश्वरि अष्टैतत्परमेशा
नि ततः पंचदशाक्षरी मुक्तमात्र परमेशानि सर्वबीजं बीजपंचकं आलिख्य संपुटं कुर्यात् द्विशेषं षट्कूटकं तथा च योगिनीतंत्रे
श्रीबीजं मायास्मरयोनिशक्तितारं च माया कमला स्याद्विद्या शक्त्यादिबीजेष्वविलोमतः सा श्रीषोडशी पंचाशिवप्रदिष्टा तथा रु
द्रयामले श्रीमायामदनो वाग्वाणीपरा तारं शिवप्रिया हरिप्रिया त्रिकूटा सापरा वाणी मनोभव मायालक्ष्मीमहाविद्या श्रीविद्या षोडशा
क्षरी दक्षिणामूर्तौ च द्वितीयस्यादियुग्मं तु विपरीतं विचिंतयेत् धीः बालां चांते मुखे कृत्वा विलिखेत्तदनंतरं तारं मायां ततो लक्ष्मी तथा

वि॰
शिव॰
र॰
८३

83

कूटत्रयेलिखेत् कलयासंपुटंकुर्य्याद्रमाख्यांपरमेश्वरि कलयाएवंज्ञात्वापंचकलयारमाख्यांप्रणवादिषट्कूटां॰ उषाख्यामिति
पाठेऽप्ययमेवार्थः रमाख्यांपरमेश्वरीं ह्रीमितिचतेनउक्तरदलेक्लींपंसौः श्रीह्रीमितिवदंति॰ तत्रसंपुटशब्दार्थापरिज्ञानात् नव
रत्नेश्वरे मंत्रमादौवदेत्तंदसाध्यमेस्तामनंतरं विपरीतंपुनश्चांतेमंत्रंतत्संपुटंस्मृतं॰इति तथाश्रीक्रमे श्रीमायामदनोयोनिः
परैतानिमवेत्क्रमात् वेदादिभुवनेशानीश्रीवीजंचत्रिकूटकं षट्कूटासंपुटंकुर्य्यादाद्यैःपंचभिरक्षरैः मायातंत्रे लक्ष्मीः
परामदनोयोनियुताचशक्तिस्ताःपराचकमलाप्यथमूलविद्या॰ शक्त्यादिभिश्चविपरीततयाप्रदिष्टं श्रीमंत्रराजपुटितंपर
देवतायाः एतेतानुलोमतःपंचवीजैःसंपुटमितिमतंहेयं क्रमेणचमाययातारःपरालक्ष्मीःकुमारिका विद्याव्यस्ताबालाश्री
परातथा व्यस्ताविपरीतातत्र्यैतिव्यस्तत्वमर्थः कुमारिकाचात्रभुवनेश्वरी अथकुमारिकानंतरंतारादित्रिवीजसंपुटत्वेकवा
क्यतावलात् श्रीपराचेतिपाठेनकेवलेबालाव्यस्ताश्रीपराचेतिविद्यायाषोडशवीजानास्वरूपकथनेवातेनश्रीमायातंरमाया
बालात्रिकूटंव्यस्ताबालारमामायेतिमतंचहेयं कुलार्णवे श्रीवीजंशक्तिवीजंचकामवीजंचवाग्भवं बालांतःसंस्थितंवीजंप्रण
वेचततःपरं शक्तिवीजंरमाचैवविद्याचपरमेश्वरि लोपावाकामराजेवात्रिकूटामथवापरां विलोमपुनरायानिपंचवीजानिसुंद
रि विपरीतक्रमेणैवविन्यसेत्षोडशीपरा यामलेच लक्ष्मीपरामदनवाग्भवशक्तिवीजंतारंचभूतिकमलेकथिताचविद्या कूटत्र
यंचविपरीततयानियुक्तश्रीषोडशाक्षरमिहागमतःप्रसिद्धं त्रिकूटेकामादिबालायाःचकारादूमामायेच निवेशे सांतेतच्छिव
एवंसप्तमयुतेसकलांतमस्तान्विते देवीदक्षिणवाक्शक्रनयनेकामेकलालांछिते दंतानेनेहंपुरंखसजीवदशानेशेषमेवेतान्वि
तेवीजंपंचकमित्ययमेवमुदितंसर्वार्थसिद्धिप्रदे वेदाद्यंत्रिगुणंरमामथवदेत्कामेनसंसेवितालोपामुद्रेवपंचकमथोसर्वंवि
लोमक्रमैः एषाश्रीपरमापरात्परतमासर्वार्थसिद्धिप्रदासाक्षात्त्रतासमस्तजगतांतापत्रयन्निभ्रताशिवा सेयंश्रीत्रयस्यरूपात्मक

८३

लगुणमयी निर्गुणा निष्प्रपंचा माहात्म्या कामदुघा स्मरमुनिनिवहैर्वन्दिता नंदरूपेति ज्ञानार्णवे चक्रकोटिसहस्रैस्तु जिह्वाकोटिश
तैरपि वर्णितुं नैव शक्येहं श्रीविद्याषोडशाक्षरी वैखरीवाच्यभावत्वाद् शक्त्यागुणवर्णने यतो निर्द्वन्द्ववस्तुपरा तत्रैव कारणं सको
भूता हि परापश्यंतीमध्यमामध्यमा भवत् ब्रह्मविद्यास्वरूपा हि भुक्तिमुक्तिफलप्रदा एकोच्चारणदेवेशि वाजपेयसकोटयः अश्वमे
धसहस्राणि प्रादक्षिण्यं भुवस्तथा काश्यपादितीर्थयात्राः स्नाः सार्द्धकोटित्रयान्विताः तुलां नार्हन्ति देवेशि नात्र कार्या विचारणा।
एकोच्चारेण गिरिजे किं पुनर्ब्रह्मकेवले षोडशार्णमहाविद्यानप्रकाश्या कदाचन गोपितव्या त्वया भद्रे स्वयोनिरिव पार्वति षो
डशीयं स्तुगोप्या हि स्नेहाद्देवि प्रकाशिता अपि प्रियतमे देयं स्वतदादिकं राज्यं देयं शिरो देयं न देया षोडशाक्षरी सिद्धयामले
कामो माया रमा बालास्त्रिकूटा हृल्लेखा भगा कूर्चा कालीकामकलाकूर्चः सर्वादौ प्रणवः प्रिये श्रीमहाषोडशीयं च यया व्याप्ता भुवनत्रये
ज्ञानेन मस्त्सु हाविद्या सर्वाम्नायैर्नमस्कृता समलत्तमहाविद्यास्तत्राद्दौ कथिताः प्रिये तासां सारतमा भूता यया याविद्याः स्मृतापि
ताः वृक्षनाकिमिहोक्तेन तासां सारात्तु षोडशी प्रकाशिता महादेवि यापृष्टा मे पुनः पुनः ॐ ह्रीं क्लीं ऐं श्रीं पैं ह्रीं सौः कएईलह्रीं हस
कलह्रीं सकलह्रीं सौः ऐं क्लीं ह्रीं श्रीं क्रूं इति॰ रुद्रयामले लोपामुद्रायाः शिवकूटान्ते हसबीजयुता यदि तदासप्तदशी विद्या साक्षा
ज्ञानस्वरूपिणी हसकह्रीं हसकलह्रीं सकलह्रीं हूं इति॰ लोपायाः शक्तिकूटान्ते हसबीजयुता यदि तदासप्तदशी विद्या साक्षा
ज्ञानस्वरूपिणी हसकलह्रीं हसकहलह्रीं सकलह्रीं हंसः इति लोपामुद्रावाग्भवे तु एव अन्ते शिवयोजनात् सकारं कामराजादौ
लोपायास्तु षोडशाक्षरी अनया सदृशी विद्या न विद्यार्णवगोचरे हसकलह्रीं हसकहलह्रीं सकलह्रीं इति॰ हसकलह्रीं सहसकल
ह्रीं सकलह्रीं इति षोडशीद्वयं तत्रैव विद्याराज्ञीवाग्भवे तु कान्ते चेन्नान्ते योजनात् षोडशार्णमहाविद्या चतुर्द्वैसे कामयीशुभा
सहसकलह्रीं हसकहलह्रीं सकलह्रीं इति लोपामुद्रावाग्भवे शक्त्यन्ते शिवबीजं नियोजयेत् तथैव शक्तिबीजं तु लोपासमर्द

वि.
रहि.
स.
८४

शान्तरी अस्याः स्मरणमात्रेण शिवो भवति नान्यथा अणिमाद्यष्टसिद्धीशः साक्षात्कुसुमशरं दरः हसकलह्रीं हसकलह्रीं सकलह्रीं
इति लोपासमदशी अथ वक्ष्ये विद्यान्तराणि वाग्भवाद्ये नियोजयेत् मादनं कामबीजाद्ये तार्तीयाद्ये महेश्वरि भुवः सर्गान्वितो देवि म
नुनायसमन्वितः अष्टादशाक्षरी ह्येषा श्रीविद्या भुवि दुर्लभा श्रीगुरोः कृपयाद्दे वि नित्यसिद्धिप्रदायिनी नवलक्षं जपित्वा तु लो
पामुद्रां महेश्वरि अष्टादशाक्षरी विद्या पञ्चाशद्भाववरानने अन्यथा शापमाप्नोति कुलं तस्य विनश्यति सर्वकल्याणदा विद्या सर्व
विघ्नविनाशिनी सर्वसौभाग्यदा देवी सर्वमंगलकारिणी अनया सदृशी विद्या त्रैलोक्ये चातिदुर्लभा ऐं हसकलह्रीं क्लीं हसक
हलह्रीं सौः सकलह्रीं इति लोपाष्टादशाक्षरी कामराजाख्यविद्यायाः वाग्भवाद्ये तु वाग्भवं भुवनेशीं कामराजं श्रीबीजं शक्तिम
वतः एषाष्टादशी प्रोक्ता सर्वसिद्धिप्रदायिका भोगमोक्षप्रदा साक्षात् पुरुषार्थप्रदायिका अनया सदृशी विद्या न नवा पि व
गोचरे नास्ति नास्ति पुनर्नास्ति सत्यं सत्यं वदाम्यहं ऐं कएईलह्रीं ह्रीं हसकहलह्रीं श्रीं सकलह्रीं इति · कामराजाष्टादशाक्षरी ·
प्रणवं एवमुद्धृत्य ततो वै कुलसुन्दरि कामाक्षरं शक्तिवर्णं पुरंदरहरौ ततः भुवनेशीं समुद्धृत्य विलोमां बालिकां ततः प्रणवं
सविसर्गं च पुनश्च कुलसुन्दरि लोपां वाग्भवमुद्धृत्य विलोमां बालिकां ततः प्रणवं सविसर्गं तु ततो वै कुलसुन्दरि शक्तिकूटम
ध्यभागे हकारं योजयेच्छिवे विलोमां बालिकां तत्र ब्रह्माणं सविसर्गकं इयं श्रीपरमा विद्या कैवल्यमोक्षदायिनी अस्या लक्ष
जपेनैव किं न सिध्यति भूतले अस्याः स्मरणमात्रेण शिवो भवति नान्यथा ओं ऐं क्लीं सौः कएलह्रीं सौः क्लीं ऐं ओं ऐं क्लीं सौः ऐं
क्लीं ओं इति परमा विद्या · श्रीक्रमे ताविद्याः शृणु देवेशि काममिंदु समन्विते नादबिन्दुकलाभेदात् तुरीयस्वरसंयुते महाश्री
सुन्दरी विद्या महात्रिपुरसुन्दरी ककारेण समुत्पन्नं कामकैवल्यदायकं लकारे सकलैश्वर्यमीकारे सर्वसौख्यदं एवं बीजत्रयं देवि
विद्यानां सारसंग्रहं वाग्भवं कामराजं च शक्तिं तेन नियोजयेत् प्रकारेण कथिता ब्रह्मविद्यैव केवलं कलई इति ब्रह्मविद्या ·

८४

कामराजलोपामुद्रयोर्विशेषमाह॥ कुलोड्डीशे श्रीपरा वाग्भवान्मेस्वर्द्देश्वरी तावमन्मथैः आद्यभूतैर्विद्यमानाः सुन्दरीषड्विधास्स्मृ
ता अनयोराद्येमायाश्रीकामबीजं तथा विविधाष्टाक्षरी तथाच काममायारमाः सर्वे मायालक्ष्मीः स्मरस्तथा रमामायातथाका
मोवह्निचेंद्राक्षरीतथा स्मरयोनिलक्ष्मीविन्नयमिति भगवदाचार्येण प्रतिपादितं शक्तिमायाश्रीकामबीजं तु श्रीकामे मायाबी
जं तथा कंदिः कामशक्तिं विपर्ययक्रमात् ज्ञानवेदोप्यस्मर्गाकेन लांछितं परमेश्वरि एतद्वाग्भवकूटं च सर्वत्र कामराजकं तथैव श
क्तिबीजं तु सुन्दर्येषा प्रकीर्तिता सुन्दरी सिद्धिदा विद्या त्रैलोक्यवशकारिणी अत्रापि सर्वत्र ह्रींबीजसंयोगः मायाइकारः क्षितिप्रकारः
पुनः प्रकारमाह एतद्युगनतो मायाब्रह्माणकाहरोप्रिना वामनेत्रेण संयुक्तानाद बिन्दुविभूषितः एतद्वाग्भवमुद्दिष्टं सर्वत्र कामशक्ति
कं भगप्रकारः अत्रापि सर्वत्र ह्रींबीजसंयोगः अत्र विशेषः वह्निबीजं यदादद्यात्रिकूटे देववल्लभे प्रथमे सुन्दरी देवी द्वितीये यत्र सुन्दरी
शक्तिकूटे महेशानी अनंतसुन्दरी मता पश्चात् षोडशार्णविद्या मूलभेदेन दर्शिता त्रिकूटांते हंसबीजं बिन्दुसर्गविभूषिते एषा श्रीप्रा
णसंयुक्ता दारिद्र्यदुःखनाशिनी शक्तिलोपात् शक्तिमहेशः कामश्चैर्द्वबीजं ततः परं महामाया ततः पश्चात् नवलेहाप्रकीर्ति
ते सर्वत्र कामशक्त्याख्या वर्णैर्निःकीलितात्मको इति शक्रामहाविद्या पश्चिमाम्नाययोजिता शक्तिः सकारः सर्वत्र कामराज
विद्यावत् अत्रापि सर्वत्र ह्रींबीजसंयोगः शिवबीजं शक्तिसोमं मादनं च पुरंदरं व्योम वह्निसमायुक्तं तुरीयस्वरबिंदुकं सर्वत्र काम
राजं तु शक्तिबीजं समुद्धरेत् शक्तिमादनप्राणस्थ हरोवक्रीडमानयया बिन्दुनादसमाक्रान्तः कथितः कामदो मनुः एषा विद्या
महेशानि कथिते कादशाक्षरी अतिह्यासिद्धिदा देवी महात्रिपुरसुन्दरी मादनं पंचवक्त्रं च लोहितापद योगिनी पुरंदरो महामाया
वाग्भवं बीजमुत्तमं सर्वत्र कामशक्त्याख्या मुद्रे देविसुन्दरि लोहितः सकारः कामास्त्रकारः सर्वत्र कामराजविद्यावत् विसर्गी
प्राक्सतो हांतः कालेशः पृथिवी ततः भुवनेशी ततः पश्चाद्वाग्भवं कथितं त्वयि कामराजशक्तिकूटं सर्वत्र कथितं प्रिये विसर्गीशः

वि.
र्णव.
म.
८५

85

अकारयुक्तो हकारः कालेशो मकारः शक्तिः स्वयंभूः शंभुश्च शक्रश्च भुवनेश्वरी शिवो मादन हईं च महामाया ततः परं कामः
शिवस्ततो ब्रह्मा ईं च भुवनेश्वरी पश्चात्परमा विद्या भक्तानां स्वभगोदया त्रिकूटां तेहं सबीजं तदा समृद्धश्रीभवेत् वाग्बीजं वि
ज्यामाया ब्रह्मा शक्रस्तु पार्वती मान्मथं शिवशक्ती च मादनो हरईंद्रकः महामाया ततः पश्चाच्छक्तिमंतु ससर्गिकः चंद्रः प्रजा
पतिः शक्रो महामाया ततः परं अष्टादशाक्षरी विद्या महात्रिपुरसुंदरी सर्वो तेहं ससंयुक्ता विद्याक्षरी तदा भवेत् श्रीदेव्युवाच भा
षास्व सृष्टिः स्थितिः संहारस्त्रिराक्षाः पंचसुंदरी कथयस्व प्रभो देव यदि ते रोचते मयि ईश्वर उवाच शिवो मादनईंद्रश्च शक्तिश्च भुवने
श्वरी ब्रह्मा शिवेंद्र शक्तिश्च चंद्रश्च परमेश्वरी शक्तिः कामश्च ईंद्रश्च महामाया ततः परा इयं सृष्टिः शिवेंद्रौ कामशक्ती च महामा
या ततः परा कामश्चेंद्रो महेशश्च ईंद्रः शक्तिश्च पार्वती ब्रह्मा महेश्वरः शक्तिः शक्रस्तु भुवनेश्वरी स्थितिरेषा शिवेंद्र कामशक्ती
च तत्परा भुवनेश्वरी शिवशक्ती मादनेंद्रो शिववक्त्रौ तु मायया शिवः शिवश्च कलहा वह्निमायेंदुभूषिता पश्चात्संहृतिः श
क्रो ब्रह्मा इंदुबीजं महामाया ततः परा वाग्भवं कथितं चैतत्कामराजं ततः शृणु शक्तिः शिवो मादनेंद्रो तत्परा परमेश्वरी शिवः श
क्तिश्च सोमश्च सूर्यो ब्रह्मा महेश्वरी सूर्यो हकारः पश्चात् निगदिता देव्युवाच स्वप्नावतीं मधुमतीं कथयस्व मयि प्रभो इदानीं श्रो
तुमिच्छामि यदि चास्ति कृपा मयि ईश्वर उवाच शिवो मादनशक्रश्च शक्तिश्च भुवनेश्वरी महेशो ब्रह्महंसश्च चंद्रोपि भुवनेश्वरी
महेशः शक्तिकामश्च परं देवी विद्यते यथा अग्निमायाकलायुक्तं नादबिंदुविभूषितं हंसो हकारः माया कला ईकारः पश्चात्स्वप्नाव
ती ख्याता कला पंचदशी यथा ब्रह्मा महेशईंद्रश्च शक्तिश्च भुवनेश्वरी ब्रह्मा वियन्मरुच्चक्रं तत्परा भुवनेश्वरी मादनं सोम चंद्रौ
च शक्रश्च भुवनेश्वरी पश्चान्मधुमती ख्याता सर्वशास्त्रेषु गोपिता वामकेश्वर विधेर्वा त्रिकूटक्रमपाठिता सौभाग्यप्रायया त्रिकूटे
न पंचमं पंचकूटके त्रिपुरायां महाविद्या कूटैकादश निर्मिता साराल्सारतरा विद्या कथिते कादशाक्षरी अथ पंचमी कामवि

सुयुतं देवि शक्तिमाहेंद्रमेव च महामायां ततः पश्चाद्भवं वीजमुद्धरेत् विसर्गकारः शक्तिरेकारः मायाईकारः वियच्चंद्रस्ततःप
श्चात्कलीनकुलिवह्निश्च मायास्वरेण संयुक्तं नादविंदुकलान्वितं प्रथमं कामराजस्य कूटं परमदुर्लभं इंद्रवीजं ततः पश्चान्महामा
यां समुद्धरेत् इति द्वितीयं इति प्रथमती शिववीजं तथा कामं इंद्रं देवीति योजयेत् महामायां ततः पश्चाच्छक्तिकूटं समुद्धरेत् वा
ग्भवं प्रथमं देवि शक्तिकूटं च पंचमं मध्यकूटत्रयं देवि कामराजं मनोहरं कथितां पंचमीविद्यां त्रैलोक्यस्तंभगोदया देवी सका
रं ईश्वर उवाच शृणु देवि महाभोग शक्तिकूटं सुदुर्लभं वाग्भवं प्रथमं कूटं कामराजं त्रिकूटकं शक्तिकूटं प्रवक्ष्यामि तव स्नेहाद्धि शै
षतः जीवप्राणौ महादेवि मानंदतदनंतरं इंद्रवीजं ततः पश्चाद्भुवनेशी च पंचमं इति वा शक्तिकूटं जीवः सकारः प्राणो हकारः प्रथ
वादेव देवेशि सौभाग्यायाश्च भाग्भवं कूटत्रयं कामराजं शक्तिवीजं च पूर्ववत् एषा शक्त्या महादेवि पंचमी परमेश्वरि अस्यार्थस्तु
प्रस्य वाग्भवकूटं हित्वा सौभाग्यायाः प्रथमकूटं वाग्भवकूटभेदेन यामलेऽपि विद्या पंचमी विद्या पंच पंचदशी परा मध्ये षड्वर्णं चे
वशक्तिश्च चतुर्वर्णा षडिति कामराजे विद्या मध्यकूटं शक्तिकूटमिति कामराजस्य शक्तिकूटमित्यर्थः एषा च तत्र हि वाग्भवकू
टभेदात् एतेन द्वादशधा भवति तथा एतयोः षष्ठ्या चतुर्दशा व्यवस्थितयोः कामराजस्य तृतीयं कूटं तत्रैव कामवीजं महेशानि शैववी
जं ततः परं तदधश्चंद्रवीजं तु पृथ्वीवीजं ततो लिखेत् तदंते च महामायाकूटं परमदुर्लभं एषा हि वेदवदष्टधाश्चान्या चतुर्दशी तेन ष
ड्विंशद्रूपिणी एतासां चैव विद्यानां प्राणं शृणु वरानने रमामायाहंसवीजं वाग्भवाद्येति योजयेत् शक्त्यंते तु महादेवि हंसमायां र
मां तथा एभिर्युक्तेन देवेशि विद्याजपनमाचरेत् जयश्च सर्वगामेव दीपिस्यात पादर्शनात् एतासामिति श्रीपूर्वोक्तश्रीक्रमे वि
द्यानां पंचम्यां विशेषो यथा रमां मायां हंसवीजं वाग्भवाद्ये नियोजयेत् शक्त्यंते तु महेशानि हंसमायां रमां तथा कामराजत्रये देवि
ककारं शक्रसंयुतं मायाविंदुस्वरयुतं सूर्यकोटिसमप्रभं प्रथमं कामकूटस्य चाद्ये नियोजयेदिदं वांतं वह्निसमायुक्तं वामनेत्रेण

वि॰
टी॰ व॰
म॰
८६

86

भूषिते नादबिंदुसमायुक्तं त्रिपुरेयोबीजमुदाहृतं द्वितीयं कामराजं तु जपेदुत्कारणसुंदरि गगनेवह्निसंयुक्तं वामनेत्रसमन्विते नादबिं
दुसमायुक्तं मायाबीजं प्रकीर्तितं ज्वलदग्निनिभं बीजं शुद्धहाटकगंजनं कुलाकुलमयेमध्ये ध्येयं सा तां महेश्वरि मधुमतीं जपेद्वा
पि सर्वकामफलप्रदा अथ दीपिनी नार्यं लक्ष्मीं च वाग्बीजं मान्मथं भुवनेश्वरीं पतञ्जप्त्वा ततः पश्चाद्वाग्भवाख्यं समुद्धरेत् प्रणवं भुव
नेशा रमां कामं च वाग्भवं कामराजं ततो जप्त्वा त्रैलोक्यक्षोभकारकं ओंकारं चैव वाग्बीजं रमां मन्मथमायया स्वप्नावतीमहादेवि प्र
जयेच्च समाहितः प्रणवं चाथ रं कामं रमां च भुवनेश्वरीं मधुमतीं ततो जप्त्वा मायया श्रीं हूं वं बीजकं पश्चाद्दीपिनीविद्याश्च जपाद्धारणात्
पिणी जपनियमस्तु जपेदादौ जपेत्स्वप्नावतीमवारमनुक्रमात् कामराजादिविद्यानां दीपनीं चैव कारयेत् वाग्भवे कामराजे तु श
क्तिकूटे महेश्वरि तत्क्रमः वाग्भवशक्तिकूटयोर्दीपनी पंचमी वोद्धव्या कामराजकूटे पुनः प्रणवं भुवनेशानीं रमां कामं च वाग्भ
वं दीपनीमिति सर्वत्र कूटेष्वयं संबंधः सौभाग्यादिविद्यामपि कूटत्रययोगिनीहृदये स्वरव्यंजनभेदेन सप्तत्रिंशद्भेदिनी सप्त
त्रिंशत्सभेदेन षट्त्रिंशत्तत्त्वरूपिणी तत्त्वातीतस्वभावा च विशेषाभावतः सदा श्रीकंठदशकं तद्वदष्टकस्य हि वाचकं प्राणभूतः
स्थितो देवि तद्वदेकादशः परः सौभाग्यादिविद्यायाः प्रथमकूटे अकारचतुष्टयं हकारश्चेति पंचस्वराः षड्व्यंजनानि द्वितीयकूटे
स्वरव्यंजनभेदेन पंचदश तृतीयकूटेप्येवं तेन मिलित्वा त्रयस्त्रिंशदक्षराणि कूटत्रये बिंदुत्रयं नादस्त्वेक इति मिलित्वा सप्तत्रिं
शत्वेन विहाय तत्त्वरूपिणी नादयुक्ता चेत् तत्त्वातीता प्रतिसत्त्वा च सदा च तत्त्वातीतस्वभावा अथ श्रीविद्याया भेदानामुद्धारः का
मराजस्य विद्याया वाग्भवं तु विलिख्य च शिवकामहरे हंसाश्च भुवनेशीं ततः परं लोपा वाग्भवकूटे तु उन्मनी सकलेश्वरी कप
र्दिलक्लीं हकहलह्रीं हसकलह्रीं इयमुन्मनी श्रीविद्या कामराजस्य विद्याया वाग्भवं तु विलिख्य च उन्मन्या कामराजं तु चरेद्धंसो
तुमादनं भूमिश्च भुवनेशानी वर्णेन समन्विता भूमिश्चलः कपर्दिलक्लीं हकहलह्रीं सहकलह्रीं इयं वह्नोणापामिता श्रीवि

८६

याशक्तिमादनयोर्मध्ये चंद्रस्थभुवनेश्वरी शिवयोर्मादनं मायाताती यं वरुणस्य च धर्मराजोपासितेयं भोगमोक्षफलप्रदा कएक
लह्रीं हकहलह्रीं सहकलह्रीं इयं धर्मराजोपासिता श्रीविद्या॰ चंद्रो मादनयोर्मध्ये इंद्रस्थभुवनेश्वरी शिवचंद्रेंद्रमदनाभूमिस्थभुव
नेश्वरी वह्निनोपासिता विद्या भोगमोक्षफलप्रदा कसकलह्रीं हसलकलह्रीं सकरलह्रीं इयं वरुणोपासिता श्रीविद्या लोपा
वाग्भवसंयुक्ताख्यातस्यावै कामराजकं सकलावह्निभूमिस्थभुवनेशीसमुद्भवेत् नागराजोपासितेयं धर्मकामार्थमोक्षदा ह
हसकलह्रीं हसकहलह्रीं सकलरलह्रीं इयं वायूपासिता श्रीविद्या मादनेशक्तितुर्यौ च वह्नीशे भुवनेश्वरी शिवमादनभूमि
स्थरहला भुवनेश्वरी चंद्रानलौ मादनेंद्र वह्निस्थभुवनेश्वरी वायूपासितविद्येयं चतुर्वर्गफलप्रदा कएईलह्रीं हकलवहलह्रीं सव
कलरह्रीं इयं वायूपासिता श्रीविद्या॰ मादनेशक्तितुर्यौ च वह्नीशे भुवनेश्वरी शिवमादनसूर्येंद्रवह्नयो भुवनेश्वरी चंद्रसूर्यौ
कलावह्निर्भुवनेशीसमुद्भवेत् बुधोपासितविद्येयं भोगमोक्षफलप्रदा कएईरलह्रीं हकहलरह्रीं सहकलरह्रीं इयं बुधोपासिता
श्रीविद्या॰ मादनेच शिवेंद्रौ च भुवनेशी मतः परं शिवमादनभूमिस्थ शिवेंद्रानलास्तथा मायाचकामराजस्य शक्तिकूटं समुद्भवे
त् ईशानोपासिता विद्याह्यणिमाद्यष्टसिद्धिदा कहलह्रीं हकलहलरह्रीं सकलह्रीं इयं वसुपासिता श्रीविद्या॰ कामराजाख्यविद्या
यामनुलोमानुलोमगा नारायणोपासितेयं महत्कृच्छ्राद्भुवि दुर्लभा कएईलह्रीं हसकहलह्रीं सकलह्रीं सकलह्रीं हसकहलह्रीं कए
ईलह्रीं इयं नारायणोपासिता श्रीविद्या॰ कामराजाख्यविद्यायां वाग्भवं तु समुद्धरेत् शिवमादनसूर्येंद्रवह्निस्थभुवनेश्वरी लो
पायावाग्भवे चैव ब्रह्मणो यमुनासिता कएईलह्रीं हकहसरह्रीं हसकलह्रीं इयं ब्रह्मोपासिता श्रीविद्या॰ लोपावाग्भवसंयुक्ता
ब्रह्माण्णा कामराजकं लोपावाग्भवकूटं तु जीवेनाराधिता विद्य हसकलह्रीं हकहसरह्रीं हसकलह्रीं इयं जीवोपासिता श्री
विद्या॰ जायत्वरूपा मायादिपवरस्मृदितान तु मायाश्रीबीजएवां तु सभावस्यास्वरूपिणी तारमायासमादिः स्यात्साद्भुतपिनः

वि·
शी·व·
मू
८०

87

स्वरूपिणी श्रीमहाषोडशार्णा वैखरीया संप्रकीर्तिता वैराग्यं च मुमुक्षुत्वं समाधिर्विमलं मनः सदसद्वस्तुनिर्धारस्तुरीयायाः कलाः
मः वैराग्यरूपा तारादिषोडशी परिकीर्तिता मायातुषोडशार्णा तु मुमुक्षुत्वस्वरूपिणी कामादिषोडशार्णा स्यात्सा समाधिस्व
रूपिणी रमादिषोडशी चित्तवैमल्यस्वरूपिणी सदसद्वस्तुनिर्धारस्वरूपा वाग्भवादिका पंचधा षोडशार्णा तु दुर्लभा भुवनत्रये
परादिषोडशा विद्या तुर्य्यातीता प्रकीर्तिता भेदाः एवं विकारीत्या च तत्त्वज्ञैस्ते च कोविदैः शुद्धाशुद्धविभेदेन हि विद्याः परिकीर्ति
ता उभयात्मकभेदाश्च शबलाश्च तथैव च अनुलोमाश्च या विद्याः शुद्धाः स्युः प्रतिलोमका अशुद्धा इति विज्ञेया उभयात्मा नयव च
शुद्धाशुद्धाश्च शबला व्यस्तन्यस्ताकुलक्रमात् एवं च तत्त्वविद्या विद्या विज्ञेया देशिकोत्तमैः अशेषेण महाविद्याभेदास्ते कथिताः शिवे
इति श्रीविद्याया भेदनिरूपणं अथ पंचसिंहासनविद्या· तत्र प्रथमं पूर्वसिंहासनविद्या तत्राप्याद्यावला· स्नानादीवे ईश्वर उवाच
त्रिपुरा त्रिविधा देवि बाला तु प्रथमा स्मृता यया विज्ञातया देवि साक्षात्स्वरगुरुप्रभः स्वर्ध्यस्वरसमायुक्तं विंदुनादकलात्मकं स्वां
ते पृथिवी स्वं तत्तुर्यस्वरसमन्वितं विंदुनादकलाक्रांतसर्गी वाग्भृगुरव्ययः शक्रास्वरसमोपेता विद्येयं त्र्यक्षरी मता गंगातरंगक
लोलवाग्गुंभपददायिनी महासौभाग्यजननी महासारस्वतप्रदेति पंक्तीसोः इति· न्यासः· ऋषिरस्य महेशानि दक्षिणामू
र्तिरव्ययः मसेच्छिरसि पंक्त्याख्यं जिह्वा दौसु वि प्रिये देवता हृदये बाला त्रिपुरा परमेश्वरी बीजं तु वाग्भवं शक्तिः स्यात्तृतीयं कील
कं ततः कामराजं महेशानि हृदोर्न्यास उदाहृतः नाभ्यादिपादपर्य्यंतं गलादावधिचापरं मूर्द्धादिगलपर्य्यंतं त्र्यक्षरं विन्यसेत्क्रमा
त् वामपाणितले चैकं दक्षपाणितले तथा उभयोः संपुटे विद्यात्रिबीजं विन्यसेत्प्रिये पंचबाणाः क्रमेणैव कराङ्गुलिषु विन्यसेत्
अंगुष्ठादिकनिष्ठांतं क्रमेण परमेश्वरि ध्यानद्वयं समालिख्य वाक्सिद्ध्यर्थं क्रमेण तु शुक्लवर्णेन नेत्रेण वामेन परिमंडितं कामद्वय
मिदं प्रोक्तं मादनं भूमिसंस्थितं चतुर्थस्वरविंद्वाढ्यं नादरूपं वरानने फांतं शक्रेण संयुक्तं वामकर्णविभूषितं विंदुनादसमायुक्तं

८०

सर्गो वांत्युं इमाः प्रिये. इति· द्रां द्रीं क्लीं ब्लूं सः इति· पंचबाणमहेशानि नामानि शृणु पार्वति क्षोभणो द्रावणो देवि तथाकर्षणसंज्ञकः व
शीकरणोन्मादौ क्रमेणैव नामानि परमेश्वरि कामास्तत्रैव विज्ञेयास्तेषां बीजानि संशृणु परा बीजं मध्यबाणं वाग्भवं परमेश्वरि कामास्तत्रै
व विज्ञेयास्तेषां बीजं तु क्रमात्प्रिये पंचकामाः क्रमाद्देवि नामानि शृणु वल्लभे इति· क्लीं ज्लीं ऐं ब्लूं स्त्रीं इति· काम मन्मथ कंदर्प्प मकर
ध्वजसंज्ञका मीनकेतुर्महेशानि पंचमः परिकीर्तितः एतान्विन्यस्य देवेशि करन्यासं ततः परं मूलविद्याक्षरैर्न्यासं सर्वांगुलितले
ष्वपि षडंगं क्रमयोगेषु मातृकां विन्यसेत्ततः अत्र षडंगन्यासोत्तरं मातृकाषडंगं अंते मातृकान्यासं कुर्य्यादित्यर्थः तथा· एवं ध्या
त्वा न्यसेन्मन्मथाद्यान्न्यासं सर्वेश्वरि कुर्वीत देहसन्नाहं त्रिभिर्बीजैः क्रमात्प्रिये करयोर्विन्यसेदादौ मणिबंधे तलेग्रके दक्षे वामे च
विन्यस्य करकूर्प्परपाणिषु पुनर्दक्षे च वामे च पादयोश्च तथा न्यसेत् नादांते हृदये लिंगे न्यसेद्देवि ततः परं एतेष्वंगेषु देवेशि संहारक्रम
तो न्यसेत् विद्याक्षरैः क्रमेणैव जानीहि परमेश्वरि ततो न्यसेन्महेशानि नवयोन्यंकितं विधिं कर्णयोश्चिबुके देवि शंखयोर्मुखमण्डले
नेत्रयोर्नासिकायां च बाहुसेमहृदि प्रिये तथा कूर्प्परयोः कुक्षौ जान्वोर्जंघयोश्च विन्यसेत् पादयोर्देवि गुह्ये च पार्श्वे हृत्स्तनद्वये कंठे च
नवयोन्याख्यं न्यसेद्बीजत्रयात्मकं षडंगमाचरेद्देवि हित्वा हृन्याक्रमेण तु त्रिखंडीकदशकं त्रिविं सव्ययाशैलसंभवे अंगुलीनां तु
नैर्देवि बाणान्कामांश्च विन्यसेत् ललाटगलहृन्नाभिमूलाधारेणवै क्रमात् मूलेन व्यापकं कृत्वा प्राणायामं समाचरेत् इति· अत्र
प्राणायामत्रयं कृत्वा ऋष्यादिषडंगन्यासान्विधाय ध्यायेत् ध्यायेद्देवीं महेशानि कदंबवनमध्यगां रत्नमण्डपमध्ये तु महाकल्पवनांत
रे मुक्तातपत्रच्छायायां रत्नसिंहासने स्थितां अनर्घ्यरत्नघटितमुकुटां रत्नकुण्डलां हारग्रैवेयसद्रत्नचित्रितां कंकणोज्ज्वलां पुस्त
कं चाभयं वामे दक्षिणे चाक्षमालिकां वरदानरतां दिव्यां महासारस्वतप्रदां इति बाला अथ संपत्प्रदा भैरवी ईश्वर उवाच यथा
श्रीत्रिपुराबाला तथा त्रिपुरभैरवी संपत्प्रदा नाम तस्याः शृणु निर्मलमानसे शिवचंद्रौ वह्निसंस्थौ वाग्भवं तदनंतरं कामबी

वि॰
शि॰
सु॰
८८

जंतथादेविशिववक्त्रंसमन्वितंततः हृल्लीबीजंतवक्त्राद्येनतृतीयंशृणुसुंदरि शक्तिबीजेमहेशानिशिववज्रौनियोजयेत् कुमार्या
स्त्रिपुरेशानिहित्वासर्गंतवैवंदवे त्रिपुराभैरवीदेवीमहासंपत्प्रदाप्रिये॰ ह्सैं ह्सकलरीं ह्सौः इति॰ अनयासदृशीविद्यात्रिषुलोकेषुदु
र्लभा मूलमंत्रद्विरावृत्त्याषडंगन्यासईरितः ध्यानं उद्यद्भानुसहस्रकांतिमरुणक्षौमांशिरोमालिकां रक्तालिप्तपयोधरांजपवटीं
विद्यामभीतिंवरं हस्ताब्जैर्दधतींत्रिनेत्रविलसद्वक्त्रारविंदश्रियं देवींबद्धहिमांशुरत्नमुकुटांवंदेसमंदस्मितां इतिसंपत्प्रदा
भैरवी अथचैतन्यभैरवी शृणुदेविप्रवक्ष्यामिप्रेतसिंहासनस्थितां वाग्भवंबीजमुच्चार्यजीवप्राणसमन्वितं सकलाभुवने
शानीद्वितीयंबीजमुद्धृतं जीवप्राणंवह्निसंस्थंशक्रस्वरविभूषितं त्रिमार्गंपंचमहादेविविद्यात्रैलोक्यमातृका त्रैलोक्यमोहि
नीदेविपरब्रह्मचिदात्मिका चैतन्यभैरवीनामेति ह्सैंसकलह्रीं ह्सौः इतिसकारादिरिति अस्याऋष्यादिकंप्राग्वत् ध्यानं
उद्यद्भानुसहस्राभांनानालंकारभूषितां मुकुटोल्लसच्चंद्रलेखांरत्नावलान्वितां पाशांकुशवरांनिस्मांवामहस्तेकपालिनीं
वरदाभयशोभाढ्यांपीनोन्नतघटस्तनीं एवंध्यात्वायजेद्देवींप्रेतसिंहासनस्थितां इतिचैतन्यभैरवी इतिद्वितीयचैतन्यभैरवी॰
एतस्याएवविद्यायाबीजद्वयमुदाहृतं तदंतेपरमेशानिनित्यक्लिन्नेमदद्रवे एतस्याएवतार्तीयंरुद्रार्णांपरमेश्वरि ह्सैंसकलह्रीं
नित्यक्लिन्नेमदद्रवेह्सौः इति॰ अस्याऋष्यादिकंप्राग्वत् ध्यानं चैतन्यभैरवींध्यायेत्पाशांकुशकपालिनीं रक्तांमुंडस्रजंपंचप्रे
तसिंहासनसंस्थितां इतिद्वितीयाचैतन्यभैरवी अथकामेश्वरीभैरवी शिवचंद्रौमादनोन्मत्तंवह्निसमन्वितं शक्तिभिन्नंबिंदुना
दकलाढ्यंवाग्भवंप्रिये संपत्प्रदायिभैरव्याः कामबीजंतथैवहि सदाशिवस्यबीजंतुमहासिंहासनस्यच ह्सखफ्रैं ह्सकलह्रीं ह्सौः
ऋष्यादिकंपूर्ववत् ध्यानमस्याःप्रवक्ष्यामित्रिपुराभैरवीकृतं उद्यत्सूर्यसहस्राभांचंद्रचूडांत्रिलोचनां नानालंकारसुभगांस
वैरितिकृंतनं चतुर्भिरस्त्रजालिकलितांरक्तवाससं त्रिशूलंडमरुंखड्गंतथाखेटकमेवच पिनाकंचशरान्देविपाशांकुशाय

गंकमात् पुस्तकेंचाक्षमालांच शिवसिंहासनास्थितां इतिकामेश्वरीभैरवी इतिश्वेतसिंहासनदेवताः अदक्षिणसिंहासनदेव
ताः तत्रादावघोरभैरवी॰ अघोरविद्यारूपंतन्महापापनिकृन्तनं अघोरेवाग्भवेपश्चाद्ह्रीं रेतभुवनेश्वरी सर्वतःशर्वशर्वेभ्योघोरघो
रतरेभ्यो नमस्तेस्तुरुद्ररूपेभ्योदेवाबीजयुगलिखित् विद्याद्भिश्चविभिर्वर्णैर्विधेयंकथितात्रिये अघोरे ·· ·· ·· ·· तुः
सर्वेभ्यःशर्वेभ्योघोरघोरतरेभ्यो नमस्तेस्तुरुद्ररूपेभ्यः ह्रीं सौः अस्याऋष्यादिषडंगन्यासध्यानानिपूर्ववत् इत्यघोरभैरवी अथमहाभै
रवी ईश्वरउवाच शिवचंद्रौवह्निसंस्थो वाग्भवेनसमन्वितो नादबिंदुसमायुक्तं प्रथमंबीजमुद्धृतं लोपामुद्रावाग्भवंकूटं द्वितीयंबी
जमुद्धृतं शिवचंद्रौवह्निसंस्थो मनुस्वरसमन्वितो तृतीयंबीजमाख्यातं बिंदुनादकलान्वितं ह्सैं हसकलह्रीं ह्सौः इति॰ एवंवस
र्मेशानिऋष्यादिन्यासमेवच मध्यकूटेनषट्दीर्घयुक्तेनांगानिकल्पयेत् आताम्रार्कसहस्राभांलसच्चंद्रजटास्फुरत् किरीटरत्नवि
लसच्चित्रविचित्रमौक्तिका स्फुरद्रुधिरपंकाढ्यांमुंडमालाविराजितां नयनत्रयशोभाढ्यांपूर्णेन्दुवदनान्वितां मुक्ताहारलता
राजत्पीनोन्नतघनस्तनीं रक्ताम्बरपरीधानांयौवनोन्मत्तरूपिणीं पुस्तकंचाभयंवामेदक्षिणेचाक्षमालिकां वरदानरतांनित्यांम
हापद्मासनास्थितां इतिमहाभैरवी अथललिताभैरवी मायाबीजंसमुद्धृत्यकामराजंततोद्धरेत् प्रेतबीजंसमुद्धृत्यविधेयंबाल
रीभवेत् ह्रीं क्लीं ह्सौः इति॰ एवंकृत्वापदमुन्याद्यायैर्नांगक्रियामता उद्यत्सूर्यसहस्राभांमाणिक्यमुकुटोज्वलां रत्नकुण्ड
लमुद्रालिपट्टकांगदभूषणां रत्नमंजीरसुभगांरक्तवस्त्रानुलेपनां पाशांकुशौपुस्तकोचदधतीमक्षकालिकां बाल्यलीला
परांदेवीकुमारीरूपधारिणीं सर्वांगसुंदरींध्यायेत्सर्वसंपत्तिहेतवे इतिललिताभैरवी अथकामेश्वरीभैरवी कामेश्वरीभैरवी
स्यात्कामराजेनसुंदरी क्लीं ऋषिरस्याःकामदेवोगायत्रीछंदउच्यते॰ कामेश्वरीदेवतास्याह्रींबीजेनांगक्रियामता जपाकुसुमसं
काशांधनुर्बाणधरांस्मरेत् नानालंकारसुभगांमोहयंतींजगत्त्रयं इतिकामेश्वरीभैरवी अथरक्तनेत्राभैरवी॰ चंद्रवाग्भवसं

वि॰
शैव॰
म॰
८९

89

शुक्रं बीजं प्रथममीरितं सकालाद्वह्निमायाभ्यां द्वितीयं बीजमीरितं मालायाश्चैव तार्तीयं तत्तीयं बीजमुद्धृतं सैं स क ल रीं सौः इति क्रमा
द्याप्वक्रूष्यादिरस्याश्च परमेश्वरि षट्दीर्घचंद्रबीजेन षडंगन्यासमीरितः उद्यत्सूर्यसहस्राभां माणिक्यमुकुटोज्ज्वलां रत्नकुण्डलमु
क्तालिपदकांगदभूषणां रत्नमंजीरसद्भागां रक्तवस्त्रानुलेपनां पाशांकुशौ पुस्तकं च दधानां चाक्षमालिकां उन्मत्तयौवनप्रौढां
पीनोन्नतघनस्तनीं नितंबिनीं त्रमममध्यां प्रसन्नरक्तलोचनां इति दक्षिणसिंहासनदेवताः अथ पश्चिमसिंहासनदेवताः अथ
षट्कूटाभैरवी शिवचंद्रौ मादनं च भृगुमिवह्निस्तु डामरं वाक्शान्तिमनुभिर्युक्तं बीजत्रयमुदाहृतं हसकलरडैं हसकलरडीं
हसकलरडौः इति ऋष्यादीन्पूर्ववन्न्यस्य हित्वा ह्न्यास षडंगकं बालसूर्यप्रभां देवीं जपाकुसुमसन्निभां मुण्डमालावलीरम्यां बा
लसूर्यसमांशुकां स्वर्णकलशाकारपीनोन्नतघनस्तनीं पाशांकुशौ पुस्तकं च तथा च जपमालिकां दधतीं भैरवीं ध्यायेत्त्रैत
सिंहासनस्थितां इति षट्कूटाभैरवी अथ नित्याभैरवी षट्कूटाभैरवीदेवी प्रतिलोमतया भवेत् नित्या च भैरवी प्रोक्ता चतु
र्वर्गफलप्रदा डरलसकहैं डरलकसहीं डरलकसहौं इति पूर्वोक्तापञ्चन्यासाद्याध्यानमस्यावदामिते पंचमुण्डसमासीनां मुण्डमा
लाविभूषितां आताम्रांकां शुकाभासां रत्नभूषणभूषितां पाशांकुशाभयवरान्दधतीं भावयेच्छिवां इति नित्याभैरवी अथ
मृतसंजीविनी मायां हंसः पदं चोक्त्वा संजीवनि ततः परं जं जीवं प्राणपदं ग्रंथिं कुरुयुक्तं ततः स्वाहांता कथिता विद्यामृतसंजी
विनीपरा ह्रीं हंसः संजीवनि जं जीवं प्राणग्रंथिं कुरु कुरु स्वाहा ऋषिः शुक्रः समाख्यातो गायत्रं छंद ईरितं मृतसंजीविनी देवी दे
वतापरिकीर्तिता मायाबीजं तु बीजं स्यात्स्वाहा शक्तिरुदाहृता हंसस्तु कीलकं प्रोक्तं मृतसंजीविनी परा षट्चतुर्दिंगकेनैव ष
डंगानि समाचरेत् दक्षिणामूर्तिसंहितायां ईश्वर उवाच देवि पश्चिमवक्त्रेण मया या याभिप्रजप्यते विद्या चतुष्टयं साक्षाद्दस्तानां
दविग्रहे महासिंहासनगतं ततः संजीवनीं शृणु शक्तिबीजं समालिख्य शिवचंद्रौ समालिखेत् अनुस्वारविसर्गाभ्यां मण्डितो क्रम

८९

नःप्रिये संजीवनिवज्रं जीवं प्राणोग्रंथिस्थमालिखेत् ऊरुषाद्दृग्विशः सौः सौर्वद्विजायान्वितो मनुः विंशार्णोऽयमिति ह्रौं हंसः संजीव
नि जूं हंसः ऊरुऊरुऊरु सौः सौः स्वाहा ऋषिः शुक्रः समाख्यातो गायत्रं छंद उच्यते संजीवनी देवतास्याः शक्तिः स्यादि बीजकं चतु
र्थं कीलनं पंचपंचकं चतुरेव हि त्रिकं च क्रमतो देवि षडंगानि प्रविन्यसेत् कर्पूराभा ह्री रत्नमुक्ताभूषणैर्भूषिता परा ज्ञानमुद्रामृत
मालोद्यंतीं चिंतयेत्परां इति मृतसंजीवनी अथ मृत्युंजयपरा अथ वक्ष्ये महेशानि मृत्युंजयपरां परां वद वद वाग्वादिनीति वाग्भवं
निलिपेत्प्रिये हंसकं वाग्भवं देवि क्लिन्ने क्लेदिनि चालिखेत् महामोहं ततः ऊरु हं हं शिवचंद्रकलानलां वामाक्षि बिंदुनादाढ्यं कोलारवी
जं ततो वदेत् मोहं तत् ऊरुयुग्मं हंसश्च ऊरुस्वरविसर्गवित् इयं संजीविनी देवीति वद वद वाग्वादिनि ह्सैं क्लिन्ने क्लेदिनि महामोहे ऊ
रु २ ह्स्ह्रीं ग्रीं मोहं ऊरु ऊरु ह्सौः इति ऋषिरस्याः शिवः प्रिये गायत्रं छंद आख्यातं देवतेयं तु भैरवी आदिकूटं भवेद्बीजं मध्यकूटं तु
कीलकं अंत्यकूटं भवेच्छक्तिः साध्यासाध्यविनाशिनी नववर्णक्रमाद्वर्णैस्तु षडंगानि प्रविन्यसेत् ध्यात्वा चावाहयेद्देवीं कदंबवन
मध्यमां पुस्तकं वामहस्तेन दक्षिणे ज्ञानमालिकां बिभ्रतीं कुंदधवलां कुमारीं चिंतयेत्परां इति मृत्युंजयपरा अथ वज्रप्रस्तारिणी
ईश्वर उवाच परां क्लिन्ने वाग्भवं च ततः क्रोधात्मकं मतं ततो नित्यमदद्रवे मायां च समालिखेत् वज्रेशी रविवर्णोऽयं ह्रीं क्लिन्ने ऐं क्रौं नित्यम
दद्रवे ह्रीं ऋषिर्ब्रह्मास्य मन्मनोः छंदो विराड्वज्रेशी देवता परिकीर्तिता पंचमं च चतुर्थं च बीजशक्ती क्रमेण तु तृतीयं कीलकं दे
व्यास्तेनांगानि प्रविन्यसेत् आद्यंतबीजं संत्यज्य द्विकं चैव चतूरूपकं द्विकं द्विकं त्रिकं चैव षडंगानि प्रकल्पयेत् ध्यात्वावाचाहयेद्देवीं कदं
बवनमध्यगां रक्तां चंद्रकलाचारुमुकुटां वरभूषणां महानागरूपगर्भां च लोचनत्रयशोभितां शोणिताब्धितरंगोत्थमहापद्मोप
रिस्थितां दाडिमं सायकांश्चैव पाशं चैव सृणिं तथा चापं कपालं दधतीं शोणमाल्यानुलेपनां स्मरेद्रक्तनवां देवीमुपचारैः समर्चयेत्
इति वज्रप्रस्तारिणी इति पश्चिमसिंहासनदेवताः अथोत्तरसिंहासनदेवताः तत्रादौ भुवनेश्वरी भैरवी लोपावाग्भवमुच्चार्यप्रे

वि॰
ग्री॰ व॰
म॰
९०

तद्बीजं समुद्धरेत्॰ रेफं शिवाद्यो नितः त्रिपाभुवनेशीभैरवी॰ हसैं ह्रूं सकलह्रीं हसौः इति कुमार्याः पवरूप्याद्याग्र्याद्येनांगक्रिया
मता जपाकुसुमसंकाशा दाडिमीकुसुमप्रभा चंद्रलेखाजटाजूटा त्रिनेत्रा रक्तवाससं नानालंकारसुभगा पीनोन्नतघनस्तनी प्रेता
सनसमासीना मुण्डमालाविभूषिता पाशांकुशाचराभीतीधारयंती शिवां प्रिये इति भुवनेशीभैरवी अथ कमलेश्वरीभैरवी भुव
नेश्वरीवच्चेद्ध्यायाकमलेशी तथा भवेत् सहैं सहकलह्रीं सहौः इति॰ अन्यत्सर्वं भुवनेशीभैरवीवत् इति कमलेशीभैरवी अथ सिद्ध
कालेशभैरवी॰ हस्त्रैं हसीं च हसौ च सिद्धकालेशभैरवी कुमार्याः पवरूप्याद्याध्यानमस्या वदामि ते प्रातःप्राक्कसहस्रांशुभां त्रिनेत्रां
चंद्रखंडमुखीं चंद्रखण्डस्फुरद्रत्नमुकुटां त्रामम्भयागां नितंबिनी स्फुरद्रत्नवसनांरक्तभूषणां उन्मत्तयौवनश्रेष्ठापीनोन्नतघ
नस्तनीं असृक्पंकाम्बुमुण्डस्रक्कमण्डितांगी सुभूषणां पुस्तकं चाभयं वामे दक्षिणे चाक्षमालिकां वरं च दधती ध्यायेन्मेतसिं
हासनस्थिता इति सिद्धकालेशभैरवी अथ डामरभैरवी॰ ईश्वर उवाच उत्तरासनदेवेशि मया याभिप्रजल्पते महासिंहासनग
ताभैरवीडामरेश्वरी श्रीकंठभैरवीदेव्याः कामकूटेपराशिवा हित्वा चरेत्तदा विद्या महासिंहासनेश्वरी हसैं हक्लीं हसौः इति॰ इ
वीक्ष्या पवरूप्याद्याध्यानमस्या वदामि ते बंधूककुसुमाभासां पंचमुण्डाधिवासिनीं स्फुरच्चंद्रकलारत्नमुकुटां मुण्डमालिनीं त्रिने
त्रां रक्तवसनां पीनोन्नतघटस्तनी पुस्तकं चाक्षमालां च वरदं चाभयं क्रमात् दधतीं संस्मरेन्नित्यमुत्तराम्नायमानितां इति डाम
रभैरवी अथ कामिनीभैरवी॰ संपत्प्रदायाभैरव्यावाक्क्रीमत्कामसमुद्धरेत् कामिनीभैरवी चेयं भयविध्वंसिनी शिवा हसैं हसक्लीं हसौः
एवीक्ष्या पवरूप्याद्याः ध्यानमस्या वदामि ते प्रातःप्राक्कायुताभासां रत्नभूषणभूषितां पाशांकुशाभयवरान्धारयंती शवासनां मु
ण्डमालावलीरम्यां चिंतयेद्वै रवीपरां इति कामिनीभैरवी इत्युत्तरसिंहासनदेवताः अथोर्ध्वसिंहासनदेवताः तत्रादौ प्रथमं सुंदरी
ईश्वर उवाच अथेशानेन वक्त्रेण मया याभिप्रजल्पते विद्यानां पंचकं देवि त्रिषु लोकेषु दुर्लभं तामेवं शिवसंयुक्तां वामावेन मध्यमं

९०

ए हकलांतेमहेशानि शिववीजं तु संलिखेत् रेफवामाक्षि विंदिंदु चाटितं तत्तृतीयकं हसानुग्रहसर्गाढ्यं विद्येकासुंदरीप्रिये
हैं हकलह्रहस्क्लीं हसौः इति प्रथमसुंदरी अथ द्वितीयसुंदरी अहसादयेज्जपेन्मंत्री शक्तिरूपमनुत्तरैः अंतेसमयोमाद्येक्षिविंदुनादकलान्वि
के इयं द्वितीया देवेशि सुंदरी परिकीर्तिता अहसैं अहसीं अहसौः अथ द्वितीयसुंदरी अथ तृतीयसुंदरी केवले वाग्भवे देवि वाग्भवे
मध्यमं स्मृणु हसपहस्त्वाद्यवाग्भवे नचयोजयेत् हृत्रयं कलह्रह्लेत्वां शक्तिकूटं स्मृणु प्रिये चन्द्रक्षं शिववीजानां रेफानुग्रहसर्ग
वान् एवं तृतीया देवेशि सुंदरी चतुरक्षरा ऐंहसकफ्लैं हहहकजफ्लीं हहहहौः इति तृतीयसुंदरी अथ चतुर्थसुंदरी कलांते शिवयु
ग्मं तु न याजीवत्रयं शिवे पश्चात्पिंडितं कुर्यात्कूटमेतद्विधारयेत् वाग्भवे कामराजे च शक्तिवीजे च संलिखेत् चतुर्थी सुंदरी ख्या
ता भोगमोक्षप्रदायिनी कलहहसमसहकैं कलहहसमसहक्रौः अथ चतुर्थसुंदरी अथ पंचमसुंदरी जीवः शिवयुग्जीवः स्ना
न्तकारः शिवेडमत् एतदाद्यं चमध्यं च हयुक्तस्मात्तेडमत् अंतेतुहसलक्षें तु हे हौं काशविभूषितं त्रिपुरेशी मनोरेखा पंचमी सुं
दरी भवेत् सहहसलक्षहसैं हेंसहहसलक्षहंसीं हसलक्षसहसहौः इति पंचमसुंदरी संपत्प्रदा भैरवी च ध्यायेत्संचकमुत्तमं कृष्णा
दिरज्ञा विज्ञेया त्रिपुरेशी वनान्यथा श्लक्ष्णसिंहासनविद्या इति पंचसिंहासनविद्यानिरूपणं अथ पंचपंचिकागणं तत्रादौ पंच
लक्ष्म्यः तत्रादौ श्रीविद्यालक्ष्मी षोडशार्णा महाविद्या समुद्धार्य विधानवत् महालक्ष्मीश्वरी हृद्दं मण्डिताऽसनसंस्थिता सर्वसौभा
ग्यजननी षोडशाक्षरया मिच इति श्रीविद्यालक्ष्मी अथैकाक्षरलक्ष्मीः वर्णं तत्र्वं क्षिसंयदीर्घनेत्रविभूषितं विंदुनादसमायु
क्तं लक्ष्मीमंत्रउदाहृतः श्रीं ऋषिर्भृगुर्निवृच्छंदः तत्र देवता श्री देवता प्रिये शक्तेर्यवीजशक्ती च कीलकं रेफ उच्यते षड्दीर्घयुग्मवीजे
न षडंगानि समाचरेत् ध्यायेत्ततः प्रियं रम्यां सर्वदेवनमस्कृतां तप्तकांचनसंकाशां दिव्यरत्नविभूषितां प्रासिच्यमाना मम(?) रते स्वर्णकारत्न
द्वैरपि पद्माभ्या मभयवरेमनसुरुरूकरपि प्रिये रत्नौघवद्दमुकुटां मुक्ताहारोपागरागिणीं पद्माक्षीं पद्मनाभेन हृदि संस्मरेद्बुधः

वि॰
ल॰ व॰
स॰
९२

एवंध्यानजपेद्देवीपद्मयुग्मधरांसदा वरदाभयशोभाढ्यांचतुर्वर्कांस्त्रिलोचनां इतिलक्ष्मीः अथमहालक्ष्मीः प्रणवंपूर्वमुद्धृत्यश्रीहरीमा
त्मकमततः श्रीपुटेचाथकमलेकमलाथप्रसीदच लयेमध्यगतांभूमिरुद्रसंख्यानेत्रयोजयेत् प्रसीदपूर्वबीजानिसंपुटत्वेनयोजयेत्
महालक्ष्मीहृदंतेनएवंपंचविंशतिवर्णवान् ॐश्रींह्रींश्रींकमलेकमलालयेप्रसीदप्रसीदश्रींह्रींश्रींॐमहालक्ष्म्यैनमः दक्षप्रजापति
श्चास्यऋषिश्छंदस्तस्यैवच गायत्रीदेवतालक्ष्मीरुदंयंपरिकीर्तितं द्वितीयंचतृतीयंचबीजशक्तिक्रमेणतु प्रणवःकीलकंदेवितत्तेनांगा
निप्रविन्यसेत् अंगानिपूर्ववद्देविन्यसेन्मंत्रीसमाहितः रक्तांभोजायस्त्रपात्रंचपद्मयुग्मंचहेमजं प्रग्रत्नावलीराजदारदर्शंदधतीपरां
चतुर्भुजांस्फुरद्रत्ननूपुरांमुकुटोज्वलां ग्रैवेयांगदहाराढ्यांकंकणरत्नकुंडलां पद्मासनसमासीनांहूतीभिर्मण्डितांसदा शुक्लां
गरागवसनांमहादिव्यांगनातनां एवंध्यात्वायजेद्देवीमिति॰ इतिमहालक्ष्मीः अथत्रिशक्तिलक्ष्मी॰ श्रींबीजंचपराबीजंकामबीजं
समालिखेत् इयंत्रिशक्तिर्देवेशिविष्णुलोकेषुदुर्लभं श्रींह्रींक्लींऋषिब्रह्मास्यगायत्रीछंदोपिकथितंप्रिये त्रिशक्तिर्देवतागानिदि
रग्ह्न्मायजेत्प्रिये [?] ध्यानंसर्वसमृद्धिदं नवहेमसमुद्भूतरत्नकुट्टिममण्डपे महाकल्पवनान्तस्थेरत्नसिंहास
नेवरे कमलासनशोभाढ्यांरत्नमंजीरकुंडलां स्फुरद्रत्नसन्मौलिंरत्नकुंडलमंडितां अनर्घ्यरत्नघटितनानामण्डितभूषितां द
धतींपद्मयुगलेपाशांकुशधनुःशरान् षड्भुजाभिंदुवदनांहूतीभिःपरिवारितां चारुचामररुहस्ताभारस्यादर्शसुपाणिभिः तांबूल
स्त्रणिपात्रीभिर्भूषापेटीसुपाणिभिः नम्रकांतस्वराभासामिति इतित्रिशक्तिलक्ष्मी अथसर्वसाम्राज्यलक्ष्मीः अथवेक्ष्यमहेप्रानि
सर्वसाम्राज्यदेवताः यस्याआराधनेविष्णुरभूल्लक्ष्मीपतिःस्वयं चेदेशमादनरमेणवह्निदीर्घोतिमण्डितं विंदुक्रूरेश्वरीयुक्तंविधेयंवै
स्त्रवीप्रिये श्रीबीजसंपुटंकुर्यात्सर्वसाम्राज्यदायिनी श्रींसकलह्रींश्रीं॰ ऋषिर्हरिस्तथाछंदोगायत्रीचास्यसम्मतः देवतामाहनी
लक्ष्मीर्महासाम्राज्यदायिनी बीजंकूटंसमाख्यातंशक्तिःश्रींबीजमुच्यते षड्दीर्घैःस्वरैर्भिन्नाषडंगानिप्रविन्यसेत् अतसीपुष्पसं॰

काशांशरत्नभूषणाभूषितां शंखचक्रगदापद्मशार्ङ्गबाणधरां करैः षड्भिः कराभ्यां देवेशि वरदाभयशोभितां एवमष्टभुजां ध्यात्वेति
इति सर्वसाम्राज्यलक्ष्मीः इति पंचलक्ष्म्यः अथ पंचकोशविद्या तत्र श्रीविद्याकोशेश्वरी ॐ ऐं ह्रीं श्रीं मूलमहाकोशेश्वरीहृन्मण्डि
तमम्बुजसंस्थिता सर्वसौभाग्यजननी पादुकां पूजयामि इति श्रीविद्याकोशेश्वरी अथ श्रीकोशविद्यानां च तल्लक्षणं शृणु पार्वति यस्य विज्ञा
नमात्रेण पुनर्जन्म न विद्यते श्रीविद्या च परंज्योतिः परं निष्कलदेवता अजपा मातृका चैव पंचकोशाः प्रकीर्तिताः प्रणवं पूर्वमुच्चार्य प
रा हंसः पदं लिखेत् नमः सोहं शिरो देवि विसर्गान्तं यमीरितं ॐ ह्रीं हंसः सोहं स्वाहा ऋषिर्ब्रह्मास्य मंत्रस्य गायत्रं छंद उच्यते परंज्योति
र्मयी साक्षाद्देवता परिकीर्तिता प्रणवं चास्य हं बीजं शक्तिः शेषं तु कीलकं स्वाहान्तं हृदयं सोहं शिरो हंसः शिखा भवेत् मायया कवचं ता
रबीजेन नयनत्रयं मूलमंत्रेण देवेशि समग्रेणास्त्रकं भवेत् ध्यानं प्रपंचयागकरणे प्रपंचितमिति परंज्योतिः कोशेश्वरी अथ परं नि
ष्कलदेवता कोशेश्वरी अथ वक्ष्ये महेशानि परं निष्कलदेवतां यस्याः स्मरणमात्रेण चिदानंदायते तनुः अनुग्रहादि देवेशि बिंदुनादक
लात्मकः परं निष्कलदेवीयं परंब्रह्मस्वरूपिणी ॐ शुक्लाम्बरधरीयानाशुक्लमाल्यानुलेपना ज्ञानमुद्रांकिता योगिपतिवृन्देन सेवि
ता ध्येयेति शेषः ऋषिर्ब्रह्मास्य गायत्रं मनोश्छंदः क्रमाद्भवेत् ब्रह्मैव देवता बीजं शक्तिश्च अक्रमेण तु मकारः कीलकं मोक्षफलदा
ज्ञानदायिनी स्वरं हंसमध्येतु विस्रात्मकाचतुष्टयं ऋॠऌॡच देवेशि षडंगानि प्रविन्यसेत् इति परं निष्कलदेवता अथाज
पा कोशेश्वरी अजपा यं वदे देवि कथयामि तवानघे यस्य विज्ञानमात्रेण परं ब्रह्मैव देशिकः हंसः पदं परेशानि प्रत्यहं जपते नरः मो
हबद्धो न जानाति मोक्षस्तस्य न विद्यते श्रीगुरोः कृपया देवि ज्ञायते जप्यते तदा उच्छ्वासनिश्वासतया तदा बंधक्षयो भवेत् उच्छ्वासे चैव नि
श्वासे हंस इत्यक्षरद्वयं तस्मात्प्राणस्तु हंसाख्य आत्माकारेण संस्थितः षट्श्वासैस्तु भवेत्प्राणः षट्प्राणा नाडिका मता षष्टिनाड्या अहो
रात्रं जपसंख्या जपा मनोः एकविंशतिसाहस्रं षट्शताधिकमीश्वरी जीवात्मने क्रमेणैव तथा च परमात्मने षट्शतानि सहस्राणि

92

षडेवचतथापुनः षट्सहस्राणिचपुनःसहस्रेचसहस्रकं पुनःसहस्रंगुरवेक्रमेणात्तुनिवेदयेत् जपंनिवेदयित्वातुमहेशानत्रभवे
प्रिये सहजेपरमेशानिन्यासंकुरुविचक्षणे ऋषिरिहसोऽव्यक्तएवंगायत्रंछंदउच्यते देवतापरमादिस्तुहंसोहंवीजमुच्यते सशक्तिः
कीलकंसोहंप्रणवस्तत्वमेवहि नभस्थानेनतथाचैतावर्णास्तुपरमेश्वरि उदात्तःस्वरउत्येवंमनोरस्यप्रकीर्तितं मोक्षार्थेविनियोगःस्यादेवं
जानीहिपार्वति ततःषडंगविन्यासंकुर्याद्देहस्यशुद्धये सूर्यसोमेतथाद्देविनिरंजनमतःपरं निराभासंचतुर्थंतस्वाहांतान्क्रमतोन्य
सेत् कवचांतान्नविन्यस्यततोऽनुपदंस्मरेत् ततःसूक्ष्मचतुर्वर्णान्तुक्त्वाडेंतंप्रचोदयात् स्वाहांतेनैवनयनमव्यक्तपदपूर्वकः प्रबोधात्मा
चतुर्थ्यान्तंजायातोहंनिगद्यते अस्यहंसस्यदेवेशिनिगमागमपक्षकौ अग्नीषोमावथोवापिपक्षौतारःशिरोभवेत् विंदुत्रयंशिखा
नेत्रंमुखेनादःप्रकीर्तितः शिवशक्तिपदद्वंद्वंकालाग्निःपार्श्वयुग्मकं अयंपरमहंसस्तुसर्वव्यापीप्रकाशवान् सूर्यकोटिप्रतीकाशः
स्वप्रकाशेनभासते संहाररूपीहंसोयंविवेकंदर्शयत्यपि अजपानामगायत्रीत्रिषुलोकेषुदुर्लभेति इत्यजपाकोशेश्वरीमा
तृकाप्राणेवप्रपंचिता इतिपंचकोशदेवताः अथपंचकल्पलताः अथवक्ष्येमहेशानिविद्याकल्पलताप्रिये यांसांविज्ञानमात्रेण
पलायंतेमहापदः श्रीविद्यापारिजातेशीपंचकामेश्वरीतथा पंचवाणेश्वरीदेवीकुमारीपंचकीर्तिताः ॐऐंक्लींश्रीमः महाकल्पलते
श्वरीदेवमातृकासनसंस्थितासर्वसौभाग्यजननीपादुकांपूजयामि इतिश्रीविद्याकल्पलतेश्वरी अथपारिजातेश्वरी सपसदा
पाभैरव्यावाग्भवंवीजमालिखेत् तारेणपरयादेविसंपुटीकृत्यमंत्रवित् स्वस्वस्पेहृदंतोयंरुद्राणीमनुरीरितः ॐक्लींह्स्नैंक्लींॐस
रस्वत्यैनमः ऋषिःस्याद्दक्षिणामूर्तिर्गायत्रंछंदईरितं पारिजातेश्वरीवाणीदेवतापरिकीर्तिता तृतीयंचद्वितीयंचवीजशक्तीचतत्त
त्क कीलकंपरमेशानिमहासारस्वतप्रदा षड्दीर्घस्वरसंभिन्नवीजेनांगानिविन्यसेत् हंसारूढोल्लसत्तुकाधवलांशुभ्रवाससं शु
चिस्मितांचंद्रमौलिंचत्रयुक्ताविभूषणां विद्यावीणाहस्ताक्षमालांचविभ्रती इतिपारिजातेश्वरी अथपंचवाणेश्वरी अथव

ऽस्महेशानिपंचबाणेश्वरीं शिवां त्रिपुरेशानमंत्रमध्ये प्रणामोकामहेश्वरि ध्यानैः सम्मैर्नियंगानिबाणैः पंचभिराचरेत् उद्यद्दिवाकरा
भासां नानालंकारभूषितां वेदध्वजकुसुमाकारारक्तवस्त्रानुरागिणीं इक्षुकोदंडपुष्पेषुविराजितभुजद्वयां इतिपंचबाणेश्वरी अथ
पंचकामेश्वरी अथवक्ष्ये पंचकामनायिकां विश्वमातरं एवोक्तपंचकामैस्तु पंचकामेश्वरीभवेत् ऋषिः संमोहनोनामगायत्रं छंद उच्य
ते देवतेयं कामराजबीजशक्तीतु कीलकं अंगमेतैर्न्यसेन्मंत्री ध्यानैस्त्र्यंबकसमस्तकैः अंगानि सर्ववक्ता माबाणन्यासहृदये भवेत् रक्तां
रक्तांडकूलांगलेपनां रक्तभूषणां पाशांकुशौ पञ्चबाणान् पुस्तकं चाक्षमालिकां वराभीती च दधतीं त्रैलोक्यवशकारिणीं इतिपं
चकामेश्वरी अथवक्ष्ये महेशानि कुमारीं विश्वमातरं कामेश्वरीभगवतीं त्रैलोक्याकर्षणोत्तमा वाग्भवं त्रिपुरेशान्या हित्वा तत्र ति
येत्तुर्यौ कामशक्तिहृद्यान्तस्तु विधेयं श्रीत्रयी भवेत् क्लींपिंडोः त्रिपुरी प्रीतिचहृष्यादिबीजशक्तीक्रमेण तु आद्यं तेकीलकं सर्वसं
ह्लादनकरी भवेत् द्विरावृत्त्या षडंगानि तथा उद्यत्सूर्यसहस्राभां माणिक्यवरभूषणां स्फुरद्रक्तांडकूलाढ्यां नानालंकारभूषि
तां इक्षुकोदंडबाणांश्च पुस्तकं चाक्षमालिकां दधतीं चिंतयेन्नित्यं सर्वराजवशंकरी इतिपंचकविद्या अथपंचकामदुघा
क्रौं हंसः संजीवनि जूं जीवं प्राणग्रंथिस्थं कुरु कुरु नमः स्वाहा ऋष्यादिन्यासध्यानानि प्रागेवोक्तानीति अमृतपीठेश्वरी अथवक्ष्यासः
ऐं ब्लूं श्रौं जूं सः अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहा ऋषिश्छंदोन्यासादि प्राग्वत् अमृतार्ण
वमध्योद्यत्सर्वतर्पितचराचरां भवानि भवशांत्यै त्वां भावये अमृतेश्वरी इत्येवं सदा यजेत् अथ ज्ञानेश्वरी शिवाग्निवामनयनबिंदु
नादकलात्मकं श्रीकामयुगलेशांत्काहृदंते भगवत्यपि माहेश्वरि चतुर्वर्णं अन्नपूर्णे तथा लिखेत् चतुर्वर्णं वह्निजायान्तोऽयो
मनुरीरितः द्विदशार्णो महेशानीति क्लीं श्रीं ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा अयं मंत्रः प्रणवादि ऋषिर्ब्रह्मा समंत्रस्तु
लिकच्छंदो विधीयते अन्नपूर्णेश्वरी देवी देवता परिकीर्तिता बीजशक्तिकीलकं च हृल्लेखादिकमुच्यते षड्दीर्घमायया कुर्यान्न्यासं

वि॰
घा॰
म
९३

गानि महेश्वरि उद्यत्सूर्यसमाभासां विचित्रवसनोज्वलां चंद्रचूडामन्नदाननिरतां रत्नभूषितां स्वर्णकलशाकारस्तनभारनतां
परां कृत्ताण्डवसानेत्रां द्विभुजां परमेश्वरीं वरदाभयशोभाढ्यामन्नदाननिरतां सदा इत्यन्नपूर्णेश्वरी इति पंचकामदुघाविद्या अथ पं
चरत्नविद्या तत्रादौ श्रीविद्यारत्नेश्वरी ४ मूल॰ महारत्नेश्वरीहृदमण्डितासनसंस्थिता सर्वसौभाग्यजननी श्रीविद्यारत्नेश्वरी श्रीपा
दुकां पूजयामि॰ श्रीविद्यारत्नेश्वरी॰ अथ सिद्धलक्ष्मीरत्नेश्वरी ॐ ऐं ह्रीं श्रीं फ्रें फें ख्फ्रें ऐं श्रीं महाचण्डतेजःसंकर्षिणि कालमंथाने ह्रीं सः
स्वाहा ख्फ्रें ह्रीं श्रीं सर्वसिद्धियोगिनि हसख्फ्रें ह्रीं श्रीं सर्वसिद्धिमात्रे ह्रीं श्रीं नित्योदितायै सकलकुलचक्रनायिकायै भगवत्यै चण्डक
पालिन्यै ह्रां ह्रीं हूं ख्फ्रें ह्रीं हूं हस्ख्फ्रें क्रों क्लीं सः ख्फ वपरे परमहंसि निर्वाणमार्गदे देवि विषमोपप्लवप्रशमनि सकलदुरितारिष्टक्लेश
दमनि सर्वापदांभोधितारिणि सकलशत्रुप्रमथिनि देवि आगच्छ २ हस २ वल २ नरकृधिरं वसा भक्षिणि मम शत्रून् मर्दय मर्दय खाहि २ त्रि
शूलेन भिंधि २ छिंधि २ खड्गेन ताडय २ छेदय २ यावत्कवल ह्रीं हसक्षमलवरयूं सहक्षमलवरचीं मम सकलमनोरथान्साधय २ परम
कारुणिके देवि भगवति महाभैरवरूपधारिणि त्रिदशवरनमिते महामंत्रमातः प्रणतजनवत्सले देवि महाकालनाशिनि प्रसादं मद
नातुरं कुरु २ सुरासुरकन्यका ह्रीं श्रीं क्रौं फट् ठः ठः हसख्फ्रें महारत्नेश्वरी हृदेत्यादि॰ श्रीसिद्धमहालक्ष्मीश्री॰ इति सिद्धलक्ष्मीः अथ
मातंगी॰ अथातः संप्रवक्ष्यामि मातंगीरत्नदेवता वाग्भवं कामराजं च सर्गी वाग्भृगुकृत्तम अनुग्रहेण संयुक्तः पुनरात्यपदं लिखेत्
श्रीबीजं तारकं चैव नमो भगवतीति च मातंगेश्वरि सर्वांते मनोहारि जनादिकं सर्वराजवशं चांते करि सर्वमुखांतकं रंजनीति ततः
सर्वस्त्रीशब्दं च ततो वदेत् पुरुषांते वशं चोक्ता कर्षंते सर्वदुष्टतः मृगांते वशमालिख्य करि शब्दं ततो वदेत् पश्चात्त्रियं कामबीजं वाग्भ
वं च समालिखेत् सप्तति अक्षरयो वर्णा मातंगी विग्रहाः प्रिये ऐं क्लीं सौः ऐं ह्रीं श्रीं नमो भगवति मातंगेश्वरि सर्वमनोहारि जनि सर्वराजवश
करि सर्वमुखरंजिनि सर्वस्त्रीपुरुषवशंकरि सर्वदुष्टमृगवशंकरि सर्वलोकवशंकरि ह्रीं श्रीं क्लीं ऐं इयमनंगाविद्या नातःपरतरो मोक्षार्थी

९३

93

सिद्धिदा॰ ऋषिर्मतंगो भगवान् गायत्री छंद उच्यते देवता नादमूर्त्तिस्तु मातंगी परमेश्वरि कामबीजं वाग्भवं च बीजं शक्तीं च कीलकं
तार्त्तीयं देवदेवेशि षडंगान्यथ विन्यसेत् आद्यबीजत्रयीणैव द्विरावृत्त्या षडंगकं अंभोजार्च्चितदत्तांघ्रिद्वंद्वां मां ध्यायेन्मतंगिनी लस
द्वीणालसन्नादश्लाघ्यांदोलितकुंडला दंतपंक्तिप्रभारम्यां शिवां सर्वांगसुंदरी कदंबपुष्पमालाढ्यां वीणावादनतत्परा श्यामांगी
शंखवलया ध्यायेत्सर्वार्थसिद्धये इति मातंगीरत्नेश्वरी अथ भुवनेश्वरीरत्नेश्वरी मातृप्रागेव प्रपंचिता अथ वाराही पंचमीरत्न
देवेशी कथयामि शृणु प्रिये यस्याः स्मरणमात्रेण पवनोयं स्थिरो भवेत् वाग्भवं बीजमुच्चार्य ग्लात्रयं हभिंडभिः नादेन भूषितं बीजं पा
र्थिवं चोच्चरेत्ततः पुनराद्यं नमो नो तेच भगवती उच्चमालिखेत् वार्तालियुग्मं वाराहि पुनरेतद्द्वयं लिखेत् वाराहमुखि च द्वंद्वं संधिहीनं ततः
परं अंधे चांधिनि स्यान्माणिह्रदयेन नमो भवेत्प्रिये रुंधे रुंधिनि नमो ह्यस्तु जंभे जंभिनि स्यात्तथा मोहे मोहिनि तच्चापि स्तंभे स्तंभिनि स्यात्ततः प
दं दुष्टानां सर्वदुष्टप्रदुष्ट च सार्वेतानं च सर्वेषां सर्ववागिति चित्ततः चक्षुर्मुखगतिप्रोक्ता जिह्वास्तंभं कुरु द्वयं शीघ्रं वश्यं
कुरु द्वंद्वं वाग्भवं पार्थिवं पुनः ठकारस्य चतुष्कांते कवचास्त्राग्निवल्लभा चतुर्दशोत्तरशतं मंत्रवर्णा भवंति हि ऐं ग्लौं ऐं नमो भगवति
वार्तालि वाराहि वाराहि वाराहमुखि वाराहमुखि अंधे अंधिनि नमः रुंधे रुंधिनि नमः जंभे जंभिनि नमः स्तंभे स्तंभिनि नमः सर्वदुष्ट
दुष्टानां सर्वेषां सर्ववाक्चित्तचक्षुर्मुखगतिजिह्वास्तंभं कुरु कुरु शीघ्रं वश्यं कुरु कुरु ऐं ग्लौं ठठठठ हुं फट् स्वाहा चतुश्चत्वारिंशतिभिः
पदैर्मंत्रस्तु कीर्तितः मातृकान्यसेहृत्क्रंपदानि दश मंत्रवित् दोःपत्संधिषु साग्रेषु न्यसेद्विंशतिसंख्यकान् पदानि सर्वविन्यस्य
पार्श्वयोरेकमुत्तमं ततः षडंगविन्यासं कुर्याद्देहविशुद्धये वार्तालीत्यस्तु पदद्वंद्वं हृदयं च ततः परं वाराहियुगलं देवि शिरोमंत्र उदा
हृतः वाराहमुखियुग्मं तु शिखा सम्यगुदाहृतं ततः कवचं ततः समवैणैर्नेत्रं ततः क्रमात् प्रस्फुरदरुणसंकाशपद्मांतर्गतवासिनी॰

वि॰
र्णव.
स॰
९४

इंद्रनीलमहातेजःप्रकाशां विश्वमातरं कंठे च मुंडमालाढ्यां नवरत्नविभूषितां अनर्घ्यरत्नघटितमुकुटश्रीविराजितां कौशेयार्द्धोरुकां
चारुप्रवालमणिभूषणां हलेन मुशलेनापि वरदेनाभयेन च विराजितचतुर्बाहुं कपिलाक्षीं सुमध्यमां नितंबिनीमुत्पलाभां क
ठोरघनसत्कुचां लोलाननामिति इति वाराहीरत्नेश्वरी इति पंचपंचिकागणः अथ षोडशनित्याविवरणं अथ वक्ष्ये महेशा
नि नित्याविवरणं महत् कामेश्वरी महाभेदाः बहवः संति पार्वति तत्र कामेश्वरी नित्या कथ्यते भुवि दुर्लभा त्रिपुरेशी समुद्धार्यता
र्णते ह्यस्पदं ततः कामेश्वरीपदं चोक्त्वानिच्छाकामफलप्रदे सर्वसत्ववशं प्रोक्त्वा करि सर्वजगत्पदं क्षोभांते तु करे हूं हूं वाणांश्च
त्रिपुरेश्वरीं विपरीतां समालिख्य विद्याषड्विंशदक्षरा ऐं क्लीं सौः ॐ नमः कामेश्वरी इच्छाकामफलप्रदे सर्वसत्ववशंकरि सर्वजग
त्पदं क्षोभांते तु करे हूं हूं वाणांश्च त्रिपुरेश्वरी विपरीतां समालिख्य विद्याषड्विंशदक्षरा ऐं क्लीं सौः ॐ नमः कामेश्वरी इच्छाकाम
फलप्रदे सर्वसत्ववशंकरि सर्वजगत्क्षोभकरे हूं हूं द्रां द्रीं क्लीं ब्लूं सः सौः क्लीं ऐं॰ अस्या भागत्रयेणैव ह्विराहृत्या षडंगकं कामेश्वरीव
दृष्ट्यादिध्यानयंत्रार्चनादिकं इति कामेश्वरीनित्या॰ अथ वक्ष्ये महेशानि विद्यां श्रीभगमालिनीं वाग्भवं भगशब्दांते भुगे वाग्भवमे
व च भगिनि अंते वाग्भवं च भगोदरि च वाग्भवं भगाक्लिन्ने वाग्भवं च वाग्भवादौ भगावहे भगगुह्ये वाग्भवं च भगयोनि च वाग्भवं भगिनि
ते पातनीति वाग्भवं भवसर्पं च पदे वाग्भवमालिख्य ततो भगवशंकरि वाग्भवं भगरूपे तत्र भगिन्ये च वाग्भव भगाक्लिन्ने वाग्भवं च
भगं स्वांते समालिखेत् रूपे सर्वभगानीति मे ह्यानयन वाग्भवं भगाक्लिन्नद्रवे चांते भगाक्लेदय वा लिखेत् भगांद्रावय चालिख्य भगा
मोचे भगोति च विच्चे भगं क्षोभयेति सर्वसत्वान्भगेश्वरि वाग्भवं च भगात्व च वाग्भवं भगजे लिखेत् वाग्भवं च भगाक्लिं च वाग्भवं भग
मालिखेत् वाग्भवं च भगं चैव वाग्भवं भगमालिखेत् भगाक्लिन्ने च सर्वाणि भगान्यथ च मे लिखेत् वाग्भवं च भगाक्लिं च वाग्भवं भगाहे

94

लिखेत् भगक्लिन्ने च सर्वाणि भगान्यथ च मालिखेत् वशमाचयचालिख्य भगपंचकमष्टमं भगान्तरे भगान्तेऽथ हरोमात्मकमालिखेत्
भगान्ते पंचमे कामं ततो वै भगमालिनी ङे.तामुद्धार्याथ विधेयं त्रैलोक्यवशकारिणी चतुराधिकविंशत्याक्षिशतेन च मण्डिता वर्णानां
भगमालेयं नित्या सफलसिद्धिदा मंत्रोद्धारस्तगमः ऋषिरस्यास्तु सुभगो गायत्रं छंद उच्यते देवतेयं तु बीजं तु हर ह्लेमात्मके प्रिये·
शक्तिः स्त्रीबीजकं क्लूं तु कीलकं परमेश्वरि षड्दीर्घस्वरभेदेन न्यसेदंगानि देशिकः कामनाभ्येतयाथवा तन्न्यासं कुर्यात्तु पूर्ववत् कदंबव
नमध्यस्थामुघनच्छसमद्युतिं नानाभरणसंपन्नां त्रैलोक्याकर्षणक्षमां पाशांकुशौ पुस्तकं च तेनासी लीगतलेखिनी वरदं चाभयं
चैव दधतीं विश्वमातरं इति भगमालिनी अथ नित्यक्लिन्ना· भुवनेशीस··· र्यं नित्यक्लिन्ने मदद्रवे वह्निजायाच विधेयं स्फुद्रव
णि महोत्कटा ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा· एकेन च तथा द्वाभ्यां द्वाभ्यां द्वाभ्यां क्रमात्प्रिये द्वाभ्यां द्वाभ्यां षडंगानि विन्यसेद्देशिको
नमः रक्तां रक्तांगवसनां चंद्रचूडां त्रिलोचनां विहहक्रां महाचूर्णलोचनां रत्नभूषितां पाशांकुशौ कपालं च महाभीतिहरं त
था दधतीं संस्मरेन्नित्यां पद्मासनविराजितां इति नित्यक्लिन्ना अथ भेरुण्डा· अथ वक्ष्ये महेशानि भेरुण्डां परमेश्वरी भेदाकारस
मुद्धार्याक्रुशांभांते च वेष्टयेत् ध्रुंसहीनं च वर्गान्तं चतुर्थं रेफमण्डितं अनुग्रहेन्दुविंद्वाढ्यं तारस्वाहोदरस्थितः मनुर्दशार्णो देवे
शि महाविषहरो भवेत् क्रौं भ्रः क्रों त्रें छ्रों ज्रों क्रौं श्रों स्वाहा· ऋषिरस्य महाविष्णुर्गायत्रं छंद उच्यते देवतेयं मया शक्तिस्तनी यं बीजमुच्य
ते वह्निजाया च शक्तिः स्यात्कीलकं सृणि वै च षट्दीर्घस्वरभेदेन बीजेनैव षडंगकं चंद्रकोटिप्रतीकाशां स्रवंतीमभ्रतद्रवैः नीलकं
ठां त्रिनेत्रां च नानाभरणभूषितां इंद्रनीलस्फुरत्कांतिं शिखिवाहनशोभितां पाशांकुशौ कपालं च छुरिकां वरदाभये बिभ्रतीं हे
मसंवद्धगरुडोद्गारभूषितां इति भेरुण्डा नित्या· अथ वह्निवासिनी नित्या· शृणु देवि प्रवक्ष्यामि नित्यां वै वह्निवासिनीं पंचविलिख
तं ह्रें ते वासिन्यै नमः इत्यपि अष्टार्णोयं महेशानि पुरुषार्थप्रदो मनुः ॐ वह्निवासिन्यै नमः ऋषिरस्य वसिष्ठः स्यात् गायत्री छंद उच्यते·

वि· घार्ण· म· ९५

95

आद्यंतेबीजशक्तीचकीलकंमध्यपवच देविषड्दीर्घयोगेणवह्निराहृद्यांगकंन्यसेत् ध्यायेत्तांचसुवर्णाभांनानालंकारभूषितां पाशांकुशौ
स्वस्तिकंचशक्तिंचवरदाभये दधतीरत्नमुकुटांत्रैलोक्यतिमिरापहां इतिवह्निवासिनीनित्या· अथमहाविद्येश्वरीनित्या· अथवक्ष्ये
महादेविमहाविद्येश्वरींपरां नित्यक्लिन्नांसमालिख्यमुखेनारसमालिखेत् हृल्लेखांतकरीमातेचद्बीजंविसर्गवत् चतुर्दशा
क्षरीविद्या· ॐह्रींक्रौंसः नित्यक्लिन्नेमदद्रवेस्वाहा ऋषिर्ब्रह्मानिगद्यते· गायत्रंछंदआख्यातंदेवतापरमेश्वरी आद्यंतेबीजशक्ती
हृल्लेखाकीलकंभवेत् चतुष्केणाचयुग्मेनयुग्मेनयुगलेनच युगलेनचयुग्मेनन्यसेदंगानिदेशिके जपाकुसुमसंकाशांरक्ता
शुकविराजितां माणिक्यभूषणानित्यांनानाभूषाविभूषितां पाशांकुशौकपालस्थमद्यपानविघूर्णितां अभयंदधतींध्यायेदि
ति इतिमहाविद्येश्वरीनित्या· अथशिवदूतीनित्या· अथदूतीप्रवक्ष्यामित्रैलोक्याकर्षणोत्तमां भुवनेशींसमुच्चार्यशिवदूत्यैनमोलि
खेत् सप्तार्णांशिवदूतींयंत्रैलोक्यस्वामिनीप्रिये ह्रींशिवदूत्यैनमः ऋषिरुद्रस्तुगायत्रीछंदोस्यादेवताशिवा आद्यंतेबीचशक्तीचमध्ये
कीलकमुच्यते विद्याभागत्रयेणैववह्निराहृद्यांगकंन्यसेत् हर्वांनिभांत्रिनेत्रांचमहासिंहसमासनां शंखारिबाणचापांश्चशूलिपाशौ
वराभये दधतींचिंतयेन्नित्यामिति· इतिशिवदूतीनित्या· अथत्वरितानित्या अथवक्ष्येमहेशानित्वरितांसिद्धिदायिनीं तारंपरांतेक
वचंविचुलेत्तः समालिखेत् ह्रींहूंमानकमुच्चार्यखेचरांमस्तकेलिखेत् त्वरितारविवर्णेयंभोगमोक्षफलप्रदा ॐह्रींहूंखचेछक्षः
स्त्रींहूंक्षेंह्रींफट्· ऋषिरीशोविराट्छन्दोदेवदेयंचपार्वती कवचंस्त्रीशक्तिबीजेकीलकंचप्रकीर्तितं चक्षुर्युगंहृत्क्लिरसस्तेन्छु
गमशिखोनतः स्त्रींयुगंचकवचंस्त्रींहूंमांतयुगंतथा हूंक्षेनेत्राणिविन्यसेत्फडस्त्रंप्रकीर्तितं श्यामांगीरक्तसर्वांगीचरणांबुज
शोभितां गुंजाहारांगल्पाहीद्रकेयूरांरत्नभूषणां द्विजनागस्फुरत्कर्णाभूषामन्नाहरणोद्यतां नीलकंचितयम्मिलवनपुष्पकपिला
गंनीकरौतीशिखिपत्राख्यानिकेतनविराजितां स्फुरत्सिंहासनेप्रोढांस्मरेद्भयविनाशिनीं इतित्वरितानित्या अथकुलसुंदरी अथ

९५

वक्ष्ये महेशानि विद्यां श्रीकुलसुंदरीं बालाख्या त्रिपुरेशानी सर्वसिंहासने स्थिता ब्रह्मविष्णुमहेशाद्यैः पूज्या सा कुलसुंदरी इति
कुलसुंदरी अथ नित्यानित्या· अथ वक्ष्ये परां नित्यां पुरुषार्थप्रदायिनीं त्रिपुरेशीं समुच्चार्य नित्याख्यो भैरवी तथा ऊंकारचित
यां वाग्भवं विद्येयं वानवान्तरी ऐं क्लीं सौः हसकलरडीं हसकलरडौः ऊं ऊं ऊं ड्रां ड्रीं क्लीं ब्लूं सः अम्ब त्रिपुरेशी वत् इति नित्या· अथ नी
लपताका अथ वक्ष्ये महेशानि विद्यां नीलपताकिनीं तारं हृत्पद्ममाभाष्य कामेश्वरिपदं ततः कामांकुशे पदे चोक्त्वा ततः काम
पताकिके भगवत्यथ नीलाते पताके च भगांतिके वह्निहृन्मंत्रमालिख्य तेनोक्ते तिचमे लिखेत् परमीने तथा गुह्ये क्रींकारचित
यं लिखेत् मदने मदनांते च देहे त्रैलोक्यमालिखेत् आवेशय तथा लेख्यं कवचाद्यग्निवल्लभा षष्ठ्यर्णा परमेशानि देवी नील
पताकिनी ॐ नमः कामेश्वरि कामांकुशे कामपताकिके भगवति नीलपताके भगवति नमोस्तु ते परमगुह्ये क्रीं क्रीं क्रीं मदने मद
नदेहे त्रैलोक्यमावेशय हूं फट् स्वाहा रक्तांबरक्तांशुकपीठस्थानामा रत्नविभूषिता इंद्रनीलस्फुरन्नीलपताका कमले स्थिता का
मग्रैवेयसलग्नस्रग्णी च वरदाभये दधती परमेशानी त्रैलोक्याकर्षणक्षमा इति नीलपताकानित्या· अथ विजयानित्या अथ व
क्ष्ये परां विद्यां जयदां विजयां सदा शिवश्चंद्रस्वर्णांताग्निरुद्रस्वरविभूषिते बिंदुनादकलाक्रांतं विजयायै नमो लिखेत् हसख
फ्रें विजयायै नमः ऋषिरस्याः शिवश्छंदो गायत्रं देवता स्वयं बीजं हृन्मध्यवर्णास्तु बीजशक्ती तु कीलकं षट्दीर्घस्वरसंभिन्न बी
जेनैव षडंगकं एकवक्त्रा दशभुजा सर्पयज्ञोपवीतिनी दंष्ट्राकरालवदना नरमालाविभूषिता अस्थिचर्मावशेषाङ्गा वह्निकूट
समप्रभा व्याघ्रांबरा महाप्रेतपद्मशवासनविराजिता रणे स्मरणमात्रेण भक्तेभ्यो विजयप्रदा मूलं सप्पंचपङ्क्त्यामिस्तर्णेघटाष्टानि
हयं पाशमग्निमभीतिं च दधानां जयदां सदा इति विजयानित्या अथ सर्वमंगला· अथ वक्ष्ये महेशानि नित्यां वै सर्वमंगलां जीवं प्रा
णं तारपंचं सर्वांते मंगलापदं ङेंतं हृदयमालिख्य नवार्णा सर्वमंगला स्वौं सर्वमंगलायै नमः ऋषिश्छंदो महेशानि गायत्रं छं

वि॰
णि॰
सु॰
९८

960

दउच्यते विद्याभागत्रयेणैव हि ताहृत्वाषडंगकं शुभ्रपद्मासनेरम्यांचंद्रकुंदसमद्युतिं सुप्रसन्नांशशिमुखींनानारत्नविभूषितां
अनंतमुक्ताभरणांस्रवंतीममृतद्रवं वरदाभयशोभाढ्यांस्मरेत्सौभाग्यवर्द्धनीं इतिसर्वमंगला अथज्वालामालिनी ज्वा
लामालांप्रवक्ष्यामिपुरुषार्थप्रदांसदा ॐकारबीजमुच्चार्यनमोभगवतीतिच ज्वालामालिनिदेवेशिसर्वभूतांतसंलिखेत् हार
कारिकेजातवेदसीतिज्वलेतिच ज्वलयुग्मंप्रज्वलेतियुगंहूमात्मकंत्रिधा वह्निद्वियाचकवचमस्त्रंचापिसमालिखेत् चत्वारिंश
द्वर्णारूपावसर्णांश्चक्रमाद्वदेत् ॐनमोभगवतिज्वालामालिनिदेविसर्वभूतसंहारकारिकेजातवेदसिज्वलनिज्वल २ प्रज्वल २
ॐॐॐररंरंफट्॰ रेफाह्वबीजशक्तीवकीलकंकवचंप्रिये रविसंख्यप्रणवैरंगुष्ठवेदेंगानिविन्यसेत् हंदहशः परमेशानिवह्निव
र्णानिवेष्टये उद्यद्विद्युल्लतांकांतिस्वर्णाभरणभूषितां महासिंहासनेपीठेज्वालामालाकरालिनी असिशंखचक्रखेटत्रिशूलड
मरुतथा पानपात्रंचवरदंदधतीसंस्मरेद्यजेत् इतिज्वालामालिनीनित्या॰ अथविचित्रानित्या॰ अथवक्ष्येमहादेविविचित्रांविश्व
मातरं यस्याःस्मरणमात्रेणपलायंतेमहापदः चक्रानुग्रहविंद्विंडभूषितंमंत्रमालिखेत् चैकौं॰ ऋषिर्ब्रह्मास्यमंत्रस्यगायत्रीछं
दउच्यते विचित्रादेवताबीजंककारःकीलकंचतत् तारराजस्तुशक्तिःस्यात्पुरुषार्थप्रदायिनी षट्दीर्घस्वरभेदेनन्यसेदंगानिदेशि
कः शुभ्रांगीज्ञानदानित्यंविचित्रवसनासदा विचित्रतिलकानित्यंविचित्रकुंकुमोज्वला वरदाभयशोभाढ्यानानारत्नधराकवि
त् इतिविचित्रानित्या इतिषोडशीनित्याः ५०॰ इतिविद्यार्णवेसप्तमाश्वासः ७ अथायतनविद्या ब्राह्मंचवैष्णवंसौरंवौद्धंशैवं
चदर्शनं एवंचदक्षिणपश्चादुदगूर्द्ध्वक्रमेणच आयतनानिपंचस्युःशेषशाक्तंततःस्मृतः तत्रप्रथमंब्राह्मदर्शनेब्रह्मगायत्रीपूर्वाय
तनविद्या अथोवदामिगायत्रींतत्वरूपांत्रयीमयीं ययाप्रकाशतेब्रह्मसच्चिदानंदलक्षणं प्रणवाद्याव्याहृतयःसप्तसुस्तमद
दिका चतुर्विंशत्यक्षरात्मागायत्रीशिरसासह सर्ववेदोद्धृतःसारोमंत्रोयंसमुदाहृतः इतिब्राह्मदर्शनं अथवैष्णवदर्शनदक्षि

९८

णायतनविद्या॰ ॐअस्यश्रीनारायणमंत्रस्यसाध्यनारायणऋषिर्गायत्रीछंदः श्रीमहाविष्णुर्देवता ओंबीजंनमःशक्तिःनारायणे
तिकीलकंश्रीविद्यांगत्वेनविनियोगः ॐक्रुद्धोल्काय महोल्काय वीरोल्काय॰ द्युल्काय॰ चण्डोल्काय॰ इतिषडंगन्यासः ध्यानम्
उद्यत्कोटिदिवाकराभमनिशंशंखंगदांपंकजंचक्रंबिभ्रतमिंदिरावसुमतीसंशोभिपार्श्वद्वयं कोटीरांगदहारकुंडलधरंपीतांबरंकौ
स्तुभोद्दीप्तंविश्वधरंस्ववक्षसिलसच्छ्रीवत्सचिह्नंभजे॰ ॐनमोनारायणाय इतिवैष्णवदर्शनदक्षिणायतनविद्या अथसौरदर्श
नपश्चिमायतनविद्या ॐअस्यश्रीसूर्यमंत्रस्यदेवभागऋषिर्गायत्रीछंदः श्रीआदित्योदेवता ह्रांबीजंआदित्यःशक्तिःघृणिःकील
कं श्रीविद्यांगत्वेनविनियोगः ॐसत्यतेजोज्वालामालिनेहुंफट्स्वाहा ब्रह्मतेजोज्वालामालिनेहुंफट्स्वाहा विष्णुतेजोज्वा
लामालिनेहुंफट्स्वाहा रुद्रतेजोज्वालामालिनेहुंफट्स्वाहा सर्वतेजोज्वालामालिनेहुंफट्स्वाहा इतिषडंगमंत्राः रक्ता
ब्जयुग्माभयदानहस्तंकेयूरहारांगदकुंडलाढ्यं माणिक्यमौलिंदिननाथमीडेबंधूककांतिंविलसत्त्रिनेत्रं ॐघृणिःसूर्य
आदित्यः इतिसौरदर्शनपश्चिमायतनविद्या अथबौद्धदर्शनोत्तरायतनविद्या॰ अस्यश्रीबुद्धमंत्रस्यबुद्धऋषिः त्रिष्टुप्छंदः
श्रीबुद्धोदेवता ओंबीजंस्वाहाशक्तिःक्लींकीलकंश्रीविद्यांगत्वेनविनियोगः ॐक्लीं नारायण तारयस्वाहा ॐक्लींनारायणतारय
स्वाहा इतिषडंगन्यासः धूराधुराणानसुरान्विजेतुंसंभावयंतीवरचिह्नवेषं चकारयःशास्त्रममोघकल्पंतंमोघकल्पंप्रणमा
मिबुद्धं ॐक्लींनारायणतारयस्वाहा इतिबौद्धदर्शनोत्तरायतनविद्या अथशैवदर्शनोर्ध्वायतनविद्या॰ अथश्रीशिवमंत्रस्यवामदे
वऋषिःपंक्तिश्छंदःपरमशिवोदेवता ओंबीजं नमःशक्तिःशिवायकीलकं॰श्रीविद्यांगत्वेनविनियोगः सर्वज्ञाय॰ नित्यतृप्ताय॰
अनादिबोधाय॰ स्वतंत्राय॰ नित्यमलुप्तशक्तये॰ नित्यमनंतशक्तये॰ इतिषडंगन्यासः नमोस्तुस्थाणुभूतायज्योतिर्लिंगामृतात्म
ने चतुर्मूर्तिवपुःच्छायाभासितांगायशंभवे इतिशैवदर्शनोर्ध्वायतनविद्या॰ अथशाक्तदर्शनविद्यातत्प्रधानविधेव केचि

वि॰
शिव॰
ग्रं॰
९८

97

भुवनेश्वरीं वदंति तद्विधानं प्रागेवोक्तं इत्यायतनविद्याः अथ समयविद्या ऐं क्लीं सौः ओं नमः कामेश्वरि इच्छाकामफलप्रदे
सर्वसत्ववशंकरि सर्वजगत्क्षोभकरि हूं हूं द्रां द्रीं क्लीं ब्लूं सः सौः क्लीं ऐं फाप ऐं क्लीं सर्वकामार्थसाधिनि वज्रेश्वरि वज्रपदे वज्रपंजर
मध्यगते फ्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे फ्रों वज्रनित्यायै नमः ततो भगमालिनी विद्या ५२ क्लीं भगवति ब्लूं नित्यकामेश्वरि क्लीं
सर्वसत्ववशंकरि सः त्रिपुरभैरवि ऐं क्लिन्ने क्लीं महात्रिपुरसुंदर्यै नमः ४ इति चतुःसमयविद्या॰ अथाम्नायविद्यान्यासः एवं द
क्षिणपश्चिमैः रुद्रपूर्वक्रमेण च पंचवक्त्रैः शिवप्रोक्ताः पंचचाम्नायदेवताः पंचसिंहासनप्रोक्ताः सर्वकामफलप्रदाः तत्रादौ पू
र्वाम्नाया विद्या उन्मनी॰ ओं अस्य श्री उन्मनी मंत्रस्य दक्षिणामूर्तिऋषिः पंक्तिश्छंदः श्री उन्मनी देवता फ्रां बीजं कल फ्रीं शक्तिः स्फ्रों
षोडशार मेखलात्रय भूपुर त्रयाणां शिवचक्राणां द्विरेखासंगमस्थानत्वाभावेपि वाचनकी मर्मसंज्ञा यथोक्तं च दृष्टानवि यायामत्व
त्वहिदशाराष्टकोणेषु त्रिचतुष्टयं अष्टविंशतिमर्माणि चतुर्विंशतिसंधयश्च इति रुद्रयामले एषा योनामसुसाद्याः सर्वे चक्रसमाश्र
याः सेवमानाश्च क्रविद्यादेवगंधर्वसेविता अग्नीषोमात्मकं चक्रमग्नीषोममयं जगत् अग्नावंतर्विभो भानुमग्नीषोममयं स्मृतं त्रि

वि॰
ली॰ व॰
ग्र॰
१११

111

एवं मातृकाचक्रं सोमसूर्यानलात्मकं त्रिकोणं बैंदवं सोम्यमष्टकोणं च मिश्रकं चतुर्दशारं वह्न्यस्त्रं चतुरस्रं च भानुमत् एतत्
साद्यादि द्वादशावसवोष्टौ मरुद्गणाः येये समृद्धा लोकेस्मिन् त्रिपुरचक्रसेविका पुरत्रयं च चक्रस्य सोमसूर्यानलात्मकं महालक्ष्म्याद
रं चक्रं न चैवास्ति तया शिवः गौरी प्रति महेश्वरेण साधु साधु महाभागे पृष्टं त्रैलोक्यसुन्दरि गुह्याद्गुह्यतमं ज्ञानं न कुत्रापि प्रकाशि
तं कलाविद्याः पराशक्तिः श्रीचक्राकाररूपिणी तन्मध्ये बैंदवं स्थानं तत्रास्ते परमेश्वरी सदाशिवेन संएका सर्वसत्वानि गासंती
चक्रे त्रिपुरसुंदर्या ब्रह्माण्डाकारमीश्वरि पंचभूतात्मकं चैव तन्मात्रात्मकमेव च इंद्रियात्मकमेवं च मनस्तत्वात्मकं तथा माया
दि तत्त्वरूपं च तत्त्वातीतं च बैंदवं बैंदवे जगदुत्पत्तिस्थितिसंहारकारिणी सदाशिवेन संएकानन्तवाती नाम महेश्वरी ज्योतिरूपा वराका
राय स्पदे हाद्रवा शिवे॰ किरणाश्च सहस्रं च वह्निः सहस्रं च लक्षकं कोटिरर्बुदमेतेषां परासंख्या न विद्यते तमेव वानुप्रविश्य प्रभा
ति लोकं चराचरं यस्मादेव्या महेशानि भासा सर्वं विभासते यद्भावाद्रहितं किंचिन्न च यच्च प्रकाशते तस्माच्छ्रीशिवशक्त्या च वि
रूपायास्थितिं विना अंधमापद्यते नूनं जगदेतच्चराचरं तेषामनंतकोटीनां मसृत्वोनां महेश्वरी मध्ये षष्ट्युत्तरं तेमे त्रिश
तं किरणाः शिवे॰ ब्रह्माण्डं विश्वुवानास्ते सोमसूर्यानलात्मना अग्नेरष्टोत्तरशतं षोडशोत्तरकं रवेः षट्त्रिंशदुत्तरशतं चंद्र
स्य किरणाः शिवे ब्रह्माण्डं भासयंतस्ते पिण्डाण्डमयि शंकरि दिवा सूर्यस्तथा रात्रौ सोमो वा वह्निसंध्ययोः प्रकाशयंतः
कालं तेन स्मात्कालात्मकास्त्रयः षष्ट्युत्तरं च त्रिशतं दिनान्येव तु हायनः हायनाम्मा महादेवः प्रजापतिरिति श्रुतः प्रजापतिर्लो
ककर्तामरीचिप्रमुखान्मुनीन् सृजेत्पते लोकपालास्ते सर्वे लोकवल्लकाः संहारश्च हरायणं उत्पत्तिर्भवनिर्मिता रक्षा तु सृष्टसं
लग्ना सृष्टिस्थितिलये शिवः नियुक्तः परमेशान्या जगदेव प्रवर्तते॰ इति तमेवानुप्रविश्यैतस्मादिना तमेव भान्तमनुभाति॰
सर्वं यस्य भासा सर्वमिदं विभातीति श्रुत्यर्थ उक्तः इति श्रीविद्यार्णवे ऽष्टमश्वासः ८ अथ मेरुप्रस्तारो नित्यादानान्त्यस्वर॰

१११

मेरुयंत्रे सृष्टिक्रमेण पूजनं तु प्रमाणमुक्तं तत्रायमर्थः यथा घ्राणिमाद्यं तत्पूजा सृष्टिपूजा तत्र मध्यादिषोडशनित्यादीनामर्थः स्थि
तपवर्ग सृष्टिचक्रे षोडशनित्यानां तादात्म्यं तथा संहारचक्रे मातृकानां तादात्म्यं स्थितिचक्रे वशिन्यादीनां तादात्म्यमिति भावः एवं
श्रीचक्रराजस्तु त्रिसमष्टिविषयाद्युर्घ्यं दद्यात् अथ वा लोहरत्नादिनिर्मितं वा श्रीपर्णादिसंभवे पीठे गुरुतः संस्थाप्य पु
ष्पं दद्यात् समष्टिं दद्यात् प्रणवतारत्रयपूर्वकं मूलमंत्रमुच्चार्य समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरह
स्यातिरहस्ययोगिनीयुतं श्रीचक्रपादुकां पूजयामि इति प्रोक्तं श्रीचक्रोद्धारस्तु भयमतस्साधारणः परं तु कादिमते च तत्र
सृष्टिं पश्चिमद्वारं हृदयमुक्तमिति विशेषः भैरवयामले लोपामुद्रेपासके तु प्रोक्तं श्रीचक्रमध्यतः बिन्दुमध्ये प्रेतबीजादि
लिखेत्परमेश्वरि तद्बाह्ये त्र्यस्रत्रिकोणं तु पूर्वदक्षिणसौम्यके द्वारत्रयं प्रकर्तव्यं यथा द्वाराणि भूपुरे मन्त्रवित् बाह्यतस्त्वष्टद
लाग्रेषु महेश्वरि ग्रंथयस्तु प्रकर्तव्यास्त्रिशूलाष्टकमेव च ग्रंथयः प्रणवाभ्यां च संपुटत्वेन योजिताः पूर्वादिग्रंथिषु तथा
पूजयेद्भैरवान् तदग्रे तु दशप्रोक्तान्वटुकान्पूजयेत्क्रमात् त्रिशूलेषु महादेवि पूजयेदष्टभैरवी एतत्त्रये तु देवेशि भूर्भुवःस्व
निवासकाः योगिनीः पूजयेत्तासां मंत्रस्तु परमेश्वरि पातालवासिनीभ्यस्तु योगिनीभ्यो नमो नमः भूलोकवासिनीभ्यस्तु यो
गिनीभ्यो नमो नमः भूर्लोकनिवासाभ्यो योगिनीभ्यो नमः इति तत्त्रये पूजामिति विशेषः अत्र सृष्टिस्थितिसंहारभेदेन
श्रीचक्रभेदा बहवः संति ते मे दाश्रग्रे वक्ष्यंते इति तु संक्षेपः अथ पात्रासादनपद्धतिर्लिख्यते तत्र ध्यानमासनसपूजां तेस्वर्ण
दिपट्टे ओंकारादिना पूजायंत्रं विलिख्य स्वगुरुतः संस्थाप्याभ्यर्च्य पात्रासादनं कुर्यात् अत्र पूजा या पात्राणप्रतीव प्रशस्तानि तदु
क्तं रुद्रयामले विना पात्रेण यः कुर्यात्प्रतिष्ठायास्तिका क्रिया विफला जायते सर्वा वाहनादि यथा तथा बलिहीने तु उभितं
गंधहीने तु भाग्यता धूपहीने तथा ह्यहं गोवस्त्रहीने पवनस्य छत्रहीने हरेच्छत्रं वितानेन मरको भवेत् वितानं विमानं तेन हीने

वि॰
शिव॰
ग्र॰
११२

वेदीहीने तु नाशः स्यान्नगरस्य पुरस्य च कलशैर्वर्धनाशश्च भवेद्वै ह्यतिरिक्तके कलशे हीने रत्नं तु वर्ज्यते तोरणानामभा
वे हस्मान्नानीमवापवान् दक्षिणारहिते सर्वं व्यर्थं स्यान्नात्र संशयः मंत्रविद्याविहीनस्तु संपूर्णमपि नश्यति पात्रमंत्र
समायुक्तं सर्वदोषापहं भवेदिति अन्यत्रापि एकपात्रेन कर्तव्यं यदि साक्षान्महेश्वरः मंत्राः पराङ्मुखा यान्ति शाप
दश्च पदे पदे इहलोके दरिद्रः स्यात्परत्र नरकं व्रजेत् आधारेण विना भ्रंशो न च तृप्यन्ति देवताः इति तंत्रांतरवचनाच्चात्र ता
वत्पात्र तदाधार तत्प्रमाणान्नशोधनादिविचारः प्रदर्श्यते तानि पात्राणि तंत्रराजे त्रिलोहकाचमृत्पात्रे त्वेकस्मिन्न
चकल्पनमिति॰ त्रिलोहाः स्वर्णरजतताम्राणि भैरवीतंत्रे पात्रं काञ्चनकाचरूप्यजनिसमुक्ताकलापोद्भवं वि
श्वामित्रभवं च कामफलदं हैमं प्रिये स्फाटिकं तारं प्रीतिदमिष्टसिद्धिजनकं श्रीनालिकेरोद्भवं कापालं स्फुटमंत्रसि
द्धिजनकं मुक्तिप्रदं मौक्तिकमिति कुलार्णवे॰ हेमरौप्यशिलाताम्रकपालालाबुमृन्मयं नालिकेरं च शंखं च मुक्ताशुक्ति
समुत्थितं शृणुह्दकृतैरम्यपात्रं संलोहितं शुभं भैरवयामले॰ तारपात्रं वरारोहे विज्ञेयं चोत्तमोत्तमं नालिकेरोद्भवं
देवि विज्ञेयं चोत्तमध्यमं काचपात्रं तु सुश्रोणि ज्ञेयं चोत्तमकन्यसं मध्यमोत्तमकं हैमं तारं मध्यममध्यमं ताम्रपात्रादि
कं चैव प्रोक्तं मध्यमकन्यसं कन्यसोत्तमकं वैल्वं ब्रह्महृद्वनमेव च कन्यसे मध्यमं प्रोक्तं मृन्मयं कन्यसाधममिति॰
महाहारकतंत्रे शृणु देवि प्रवक्ष्यामि नारिकेरविधिं शुभं भृगावे निर्मितं पात्रं विश्वामित्रेण धीमता विश्वामित्रकपात्रं तु सर्व
पात्रोत्तमोत्तमं तस्मिन्संपूजयेद्देवि सिद्धयोऽष्टौ भवंति हि तस्य दर्शनमात्रेण चैकविंशतिकं कुलं इह दरिद्रसंदेहो गृहस्था
भवति प्रिये ब्रह्महत्यादिपापानि तथा विश्वासघातकं दृष्ट्वा पात्रं नारिकेलं सर्वपापं प्रणश्यति कन्याकोटिप्रदानानि
तथा हेमशतानि च यो ददाति महेशानि राहुग्रस्ते दिवाकरे तत्फलं कोटिगुणितं नारिकेलार्घ्यदानतः अलाभे तस्य पात्रस्य चा

112

न्यपात्रेस्तु पूजयेत् हस्त्यार्घपात्रं देवेशि व्रह्मद्यादेवतागणाः स्वयंतिसर्वयोगिन्यः प्रीताः सिद्धिं ददंतिच देवीपुराणे हेमराजत
पात्राणि काष्ठमृच्छैलजानिच रत्नादीनिच पात्राणि शुभरेखांकितानिच अर्घ्यनैवेद्यपूजार्थं वलिदाने प्रकल्पयेत् शिवरह
स्ये हेमपात्रेण सर्वाणीईहितानि भवंत्यपि अर्घ्यं दत्वातु रौप्येणआप्नुराज्यमनुत्तमं ताम्रपात्रेण सौभाग्यं पद्मेंशस्त्वयं सं भ
वे सर्वलाभेनतु माहेयं स्वहस्तस्तुटितं यदि आसनं चार्घ्यपात्रं च भग्नमासादयेत्ततः सर्वत्र स्वर्णवत्ताम्रमर्घ्यपात्रेनतोधिकं
पात्राधारास्तथाकार्याः पात्राण्येवात्रमानिच वलिहोमक्रियार्थं हि विनापात्रं न सिध्यति षड्विंशदंगुलं पात्रमुत्तमं परिकीर्तितं
मध्यमं तु त्रिभागोनं कनिष्ठं द्वादशांगुलं वस्त्रांगुलविहीनं तत्तत्पात्रं कामयेत्क्वचित् नाभिविवरतः पाणिमृण्डरीकाह्मनीनिच
शाखवनीलोत्पलाभानि पात्राणि परिकल्पयेत् देवीयामले वश्याकर्षणकर्माणि हेमपात्रेस्तु रेश्वरि शांतिके पौष्टिके चैवरा
जतं कारयेत्प्रिये लोहपात्रेस्तु मंत्रेय मारणोच्चाटने तथा स्तंभकार्येषु सर्वेषु विशेषेण तु मन्मयं मंत्राणौषधिचूर्णेष्वघटितं पा
त्रमुत्तमं तत्पात्रेण वरारोहे देवतां यस्तु तर्पयेत् षण्मासाभ्यंतरे तस्य मंत्रसिद्धिः प्रजायते तथा मंत्राणि नक्षत्रहृद्दोषस्य पात्रमु
त्तमं तेनोत्तमेन पात्रेण तर्पयेत्परदेवतां तथैव मंत्रसिद्धिः स्यात्तात्र कार्या विचारणात् (षण्मासाभ्यंतरे तस्य मंत्रसिद्धिः प्रजा
यते तथा मंत्रा) पतत्पात्रं हयं देवि नवक्तव्यं कदाचन मंत्रदंष्ट्रो निसंभूतपात्रं चैवोत्तमोत्तमं परसिद्ध्याक्रांतकरं तत्पात्रेण वतस्य
णं परामिचारशमनं स्वमंत्राणां च सिद्धिदं अन्तशेषधियंतत्त्रयोनियोनि महेश्वरि पात्राणि श्रीगुरुमुखाज्ज्ञात्वार्च्यं नवियोदिये
त् सर्वकार्येषु कर्तव्यं वैश्वामित्रं च सत्व्रते काष्ठपात्रं विजानीयान्मंत्राराधनकर्मणि कुलार्णवे आदौ क्रमं तथा शांवश्री
पात्रं शक्तिपात्रकं गुरुपात्रं भोगपात्रं वलिपात्रमनुक्रमात् स्ववामाग्रात्तथास्थाप्यमित्येतत्पात्रपंचकं अरावीरं तथा गुरुयो
गिनीपात्रमेवच आत्मनो गणनाथस्य वटुकक्षेत्रपालयोः प्रोक्षणीसहितानि सम्यग्नव पात्राणि सुव्रते स्थापयेत्सहतोदेवाह्नी

वि॰
ए॰ व
११३

113

पात्रचतुष्टयं पात्राण्यष्टादशैतानि देव्याः प्रीतिकराणि च सामान्यार्घ्यविशेषार्घ्यौ आत्मश्रीचक्रमध्यतः आद्यपंक्तेरधः स्था
प्यो विधिवत्परमेश्वरि सामान्यार्घ्यलक्षणं भविष्यपुराणे रक्तबिल्वाक्षतैः पुष्पैर्दधिदूर्वाकुशैस्तिलैः सामान्यः सर्वदेवानाम
र्घोयं परिकीर्तितः रक्तमंत्रकुंकुमैः श्रीमत्त्रिपुरसुंदर्याः शांभवः सामान्यकं भवेत् अन्यासामपि देवानां सामान्यं चान्यदी
श्वरि अर्घ्यादिपंचपात्राणि तदधः स्थापयेद्बुधः अर्घ्यपात्रं तु वायव्ये नैर्ऋत्यां पाद्यपात्रकं आग्नेय्यां स्नानकलशमीशाने चा
मनीयकं मध्ये तु मधुपर्कः स्यादितेन त्वार्घ्यलक्षणं आपः क्षीरं कुशाग्राणि अक्षता दधि तंडुलाः सहासिद्धार्थका
दूर्वाकुंकुमं रोचना निशा अर्घ्योयं देवदेवानां सुहादशांगउदाहृतः सिद्धार्थं कुंकुमं दूर्वा लोष्टलामज्जकशाशी अमू
नि चाष्टद्रव्याणि पाद्यस्य प्रवदंति षट् मधुपर्कं घृतं तोयं दधि प्रोक्तं मनीषिभिः दध्यभावे पयः कार्यं मध्वभावे तथा गुडः गुड
प्रतिनिधिर्नीरं जलं तत्र समाचरेत् आद्यं गंधसमालोड्य स्नानीयं साधु साधयेत् पयो दधि घृतं नानां च शर्करादोद्या
स्नपया पृथक्पात्राणि पंच स्युरेकं पंचामृतस्य च षट्पात्राणि विशिष्टानि पुनराचमनीयकं सप्तमं कोष्णतोयस्य चाष्ट
मं नवमं तथा उद्वर्तनस्य देवेशि दशमं मधुपायसं एतानि दशपात्राणि सौरे शैवे च वैष्णवे गाणपत्ये च सर्वाणि तु
पपात्राणि शाक्तके अर्घ्यादिपंचपात्राणि त्रिधा संस्थापयेद्बुधः पुनराचमनीयस्य पात्रद्वयमुदाहृतं पंचायतननष्ट
जायां पंच पाद्यादिपंचकं विशेषावरणं देवि विशेषार्घ्येण तर्पयेत् सामान्यावरणं देवि सामान्यार्घ्येण सुंदरि श्रीपात्र
स्थामृतेनैव देवीनां पूजनं भवेत् शक्तिनां शक्तिपात्रेण गुरूणां गुरुपात्रतः योगिनीनां च बटुः षष्ठिनवावरणयोगिनीः
योगिनीपात्रतोयेन तर्पयेत्कुलनायके अन्यानि भोगवस्तूनि भोगपात्रेण साधयेत् भैरवस्य च पात्रेण भैरवांस्तर्पयेद्बु
धः वटुकस्य च पात्रेण वटुकं तर्पयेत्ततः बलिपात्रेण देवेशि बल्युत्सर्जनमाचरेत् वाराही कुरुकुल्लादि बलिदेवीश्च तर्पयेत्

अत्राद्यादिपदेन नवदुर्गाबलिः पंचभूतबलिं चैवं सर्वभूतबलिं तथा राजराजेश्वरस्यापि बलिं तेनैव कारयेत् वीराणां वीरपा
त्रेण तर्पणं समुदाहृतं गुरुपात्रामृतेनैव तर्पयेत्कुलयोगिनीः भोगांगभोगपात्रेण लयांगं चांगपात्रतः ऊर्ध्वाम्नायक्रमे
चैव श्रीविद्याहृदयार्चनं विशेषार्घ्येण देवेशि तर्पयेद्भक्तिभावतः अन्तर्यागे आत्मपूजां चांतर्हवनमेव च आत्मपात्रस्य तो
येन कुर्याद्देशिकसत्तमः तृतीयाग्नि प्रयोक्तव्यं तृतीयपात्रचतुष्टयं कुलसद्भावभावाय शक्तिपात्राणि संदृशि पंच वा षट्
सप्ताष्ट नव वा स्थापयेद्बुधः रचितं तु स्फटिकं दिव्यमानहीनमसुंदरं अपवित्रं करस्पृष्टं पशुस्पृष्टं विवर्जयेत् सदाशुद्धा
स्तेनोयेन प्रक्षाल्य स्थापयेद्बुधः न कुर्यात्पात्रसंकर्षं द्रव्याणां च विशेषतः ऊर्ध्वाम्नायगुरून्देवि विशेषार्घ्येण तर्पयेत्
रश्मिचक्रं च देवेशि नान्यपात्रेण तर्पयेत् अन्यस्य गुरुवर्गस्य गुरुपात्रेण तर्पणं पात्रं यत्र भवेत्तत्र प्रोक्तरूपैः समाचरेत्
समष्टिव्यष्टियजनं शांभवेनोयेन वै भवेत् क्षेत्राधिपस्य पात्रेण क्षेत्रपालबलिर्भवेत् गणनाथस्य पात्रेण गणनाथबलिर्भवेत्
मध्यदेशबलिं देवि श्रीपात्रेण विसर्जयेत् श्रीविद्यायां महेशानि पूजायां च विशेषतः बल्याधाराणि पात्राणि ह्येवं देवि समासतः
श्रीगुरोर्बलिपात्रेण वाराह्या बलिपात्रकं त्रीणि वै कुरुकुल्लायाः वटुकादेश्चतुष्टयं पंच वै पंचभूतानां मेकं भूतबलेस्ततः राज
राजेश्वरस्यैकमेकं देव्यास्ततः परं एकं तु नवदुर्गायाः धूपदीपात्रसंयुतं इत्यष्टादशपात्राणि सर्वविघ्नहराणि च पात्रपंचकमाख्या
तं सिद्धद्रव्यस्य शोधने पूजाद्रव्यस्य रचने द्रव्यार्थं चैकपात्रकं कस्तूरिकागुरुस्तथा कर्कुणगोलोम्यजाभालगुडैः सपटीरपंकैः
युक्तैः स्वयंभुकुसुमैर्नेति योगिनीतंत्रवचनात् अन्यानि भोग्यवस्तूनां गंधादीनां विशेषतः मनोहराणि पात्राणि स्थापयेत्सृज
येदपि मार्जनस्यार्घ्यदाने तु हृहृदयं महेश्वरि एकं प्रस्थजलग्राहि एकं तर्पणपात्रकं द्वारादिपूजने शस्तमेकं सामान्यपात्रकं
तदेवरविपूजायां सामान्यार्घं भवेत्प्रिये पिधानोद्धरणीयुक्तं कलशानां चतुष्टयं उकूलवस्त्रसंवीतं हृद्दाधारसंयुतं ग्रहो

वि॰
पा॰
११४

दकामृतंदीरंसमषामरनश्रितं स्ववामाग्रान्ततः स्थाप्यदेवाद्दक्षिणभागत शुद्धोदकलशंलदालांन्नमन्त्रस्यग्रगाणे दध्यक्षत
समन्वितः पंचरत्नसमायुक्तंपंचभंगदलान्वितं पंचभंगदलानि चूताश्वत्थवटप्लक्षोदुंबराणांचपल्लवा स्थापयेदव्र
णकुंभवरुणंतत्रविन्यसेत् गंगाद्याः सरितः सर्वाः समुद्राश्चसरांसिच गजाश्वरथ्यावल्मीकसंगमाह्रदगोकुलात्
मृदमानीयराजेंद्रसर्वौषधिसमन्वितान् स्नानार्थंविन्यसेत्तत्रयजमानस्यधर्मवित् सर्वेसमुद्राः सरितः सरांसिचनदा
नदाः आयान्तुयजमानस्यदुरितक्षयकारकाः इतिरुद्रयामले श्रीकामस्तन्यसेत्तस्मिन्कुंदेशाहृतिकरंशुभं कांचनं
हुतगोधूमान् दूर्वारोचनयासह एतानिपंचद्रव्याणिसर्वेषुकलशेषुच विद्याधार्घादिपात्रेषुश्रीपात्रेषुविशेषतः
दद्याच्छ्रीकीर्तिमारोग्यपुत्रायुर्जयसिद्धये इतिदेवीपुराणे॰ अग्निर्ब्रह्माभवानीचगजवक्त्रोमहोरगः स्कंदाभानुर्मा
तरगणोदिक्पालाश्चनवग्रहाः एतान्वदेशुप्रत्येकं पूजयित्वायथाविधि इति गौतमीये हैमंरूप्यंतथाताम्रमार्त्तिकं
वास्तवशक्तितः षट्त्रिंशदंगुलंकुंभंविस्तारोत्रनिशामलितं षोडशांगुलमादर्शावापितेनास्तंनन्तकारयेत् अर्घ्यस्यपात्राणिपा
त्राणिपादस्यापितद्वयंभवेत् तथैवाचमनीयानिपात्राणिचविभागशः इतिभैरवतंत्रे योवाह्मागाद्यमसार्घ्यंदेवाम्
न्निर्निवेदयेत् दशवर्षसहस्राणिस्वर्गलोकेमहीयते आपः क्षीरंकुशाग्राणिदधिसर्पिः सतण्डुलाः तिलाः सि
द्धार्थकाश्चैवअष्टांगार्घ्यः प्रकीर्तितः दारवेणार्घ्यपात्रेणदत्वार्घ्यंविधिवन्नरः देवेभ्यःतदामृद्धाराजअग्निहोमफलंलभेत्
ताम्रपात्रार्घ्यदानेनपुण्डरीकफलंलभेत् रौप्यपात्रेणदत्वावैविस्तुयागफलंलभेत् अर्घ्यंदत्वाततोरौप्येणआप्नुराजसूयस्फ
लंलभेत् दत्वासौवर्णपात्रेणलभेदिहस्तनभर्गकं हेमपात्रेणसर्वाणिईप्सितानिलभेन्नुने भैरवयामले पात्रद्वयंतत्रनि
मल्पवासिन्याः शिवादिक्रियते पंचायतनपूजायांदशपंचचवैदिशेत् इतिभैरवीतंत्रे काश्यादिवलिदानेनानवपात्रा

114

११४

णि स्थापयेत् बलिपात्रेण पंच स्रुक् रुधिरस्यैकपात्रकं अपरं मांसखण्डानां मत्स्यकाधारमेव च पक्वं पत्रस्य मांसस्येति रुद्रया
मले अर्घ्यादिपंचपात्राणि कुमारीपूजने पृथक् स्थापनीयानि यत्नेन यदीच्छेत्सिद्धिमात्मनः इति वाराहीतंत्रे । दंपतीयजन
चैव सर्वास्त्रियाः प्रपूजनः योगिनीनां समाचीर्यां पंचाशन्मिथुनार्चने यजने कालनित्यायाः तद्देवतपूजने गुरुमण्डलपूजा
यां दिनेशानां तथैव च वारेशार्थनक्षत्रदेवतार्चनयोस्तथा प्रवरोषधिपूजायां जपमालाप्रपूजने पुस्तकस्य च पूजायां अ
ग्निपूजाविधौ तथा अर्घ्यादिपंचपात्राणि स्थाप्यानि पृथक्पृथक् कुण्डप्रकाशे होमे तु दशपात्राणि आज्यस्थालीद्वयं त
था चरुस्थालीद्वयं चैव प्रणीताप्रोक्षणी तथा स्रुक्स्रुवौ पूर्णपात्रं च होमद्रव्यस्य चापरं मुख्यान्येतानि पात्राणि इति ना
रदीये देवाग्रतः स्ववामाग्रे त्रिकोणं चंद्रलाभसा वृत्तेन वेष्टितं बाह्ये चतुरस्रेण चैव हि विरच्य मुद्रया मत्स्यरूपया साधकोऽभवि
सारसंग्रहे त्रिकोणं वृत्तसंवीतं चतुरस्रेण वेष्टितं गंधलिप्तं स्ववामाग्रे विदध्यान्मत्स्यमुद्रया संपूज्य गंधपुष्पैर्वा अर्घमण्डलायतन्
मोण्डना अंगानि चतुरस्रस्य कोणेषु पूजयेत्तथा दिक्षु चास्त्रं समभ्यर्च्य शंखाधारं प्रविन्यसेत् मूलेन क्षालितं शंखाधार
संस्थापयामि च कालसंविद्विकं तद्वज्जं गोशं समनुस्मरेत् वह्निं तेमण्डलायेति तथा धर्मप्रदेति च दशकलात्मने प्रोक्ता
नमो गंधादिभिर्यजेत् वह्नेर्दशकलास्तत्र प्रादक्षिण्येन पूजयेत् कलार्णवे आधारेण विना भद्रे न चलत्यति मातरः तस्मा
द्विधिवदाधारं कल्पयेत्कुलनायके आधारत्रिपदं प्राक्तः षष्ठं देवाच तत्षट् अथवा वह्निलाकारं कुर्यादेहविमनोहरमिति
एतानि सामान्यवचनानि विशेषस्तु प्रागेवाभिहितः रुद्रयामले धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिंगिनी सुश्री
सुरूपा कपिला हव्यकव्यवहे तथा वह्निस्थैताः कला ज्ञेया दशधर्मप्रदा मताः सारसंग्रहे अस्त्रेण क्षालितं शंखं तत्र
तत्र संस्थाप्य पूजयेत् पारवमानं तत्प्रादेशं चतुरंगलमुच्छ्रितं अर्घपात्रमिति प्रोक्तास्थापयामीति मंत्रतः अर्कमर्घ

वि
या.ए.
११५

115

प्रदायेतिवदेत्तद्द्वादशात्मपि कलात्मने पदं प्रोक्ता अर्घ्यपात्राय हृन्मनुः अनेन शंखमभ्यर्च्य कलाः सूर्यस्य पूजयेत् यामले त
पिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः सुषुम्णा भोगदा विश्वा बोधिनी धारिणी क्षमा एता द्वादश संपूज्या रवेरर्घ्यप्रदाः क
लाः सारसंग्रहे ततः सुधामये तस्मिन् मूलान्ते मातृकां पठन् विलोमां पूजयेत्तस्मिन् पूजको मनुना अमुना अर्घ्यपात्रं पूरयामी
त्युक्त्वा संपूरयेत्ततः शारदातिलके बिंदुस्तत्सुधामयैः तोयैः सुगंधिपुष्पाद्यैः पूजयेत्तं यथाविधि बिंदुर्भूमध्य तत्तच्च
द्रमण्डलस्य विद्यमानत्वात् सारसंग्रहे कर्णचंद्रौ बिंदुयुक्तौ कामप्रदपदं ततः षोडशात्मकलाशब्दमात्मनेनमइत्य
थः गंधपुष्पैः समभ्यर्च्य कलाः षोडश कं यजेत् कर्णः उकारः चंद्रः सकारः बिंदुरनुस्वारः तेन उंस यामले अमृता मा
नदा पूषा तुष्टिः पुष्टिरतिर्धृतिः शशिनी चंद्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरंगदा पूर्णा पूर्णामृता कामदायिन्यः स्वरगाः क
लाः सोममण्डलमध्यस्था इति सारसंग्रहे प्राग्वत्तीर्थसमावाह्य मूलमंत्रेण तच्च संयोज्य नेत्रमंत्रेण पुष्पं न्यस्य शिखया ए
ना प्रदर्श्य गालिनी मुद्रां मुद्रया धेनुसंज्ञया अमृतीकृत्य विधिवत् सुधाबीजेन साधकः ध्यात्वेष्टदेवतां तत्र सकलीकृतदेश
कः अंगन्यासेन चास्त्रेण कलयेद्दिशो दश तेन मंत्रेण संवीक्ष्य मुद्रया शंखमुद्रया अवष्टभ्य तद्द्वीपमुद्रया योनिरूपया गं
धपुष्पादिभिस्तत्र पूजयेदिष्टदेवतां षडंगानि च संपूज्य मंत्रयेन्मूलमंत्रतः अष्टकृत्वस्ततश्चार्घ्यं छादयेन्मत्स्यमुद्रया नारदी
ये वीक्षणं नेत्रमंत्रेण नेचेन्मूलेन मंत्रवित् मूलेनेति पंचांगपरं तत्र नेत्रमंत्राभावात् अत्रापि सर्वत्र तत्तदंगमंत्राणामेवोपपा
दनरूढया दिपदैरिति अंगरूपः कवचेनावगुंठनेति ततस्तु इयतिशेषः सारसंग्रहे तच्छंखस्थजलं किंचित्कुंभतोये विनि
क्षिपेत् इति शारदातिलके अर्घस्थानं ततः कार्यं पाद्यमाचमनीयकं मधुपर्कं च संस्थाप्य त्रिकोणेषु यथाक्रमं एकैकपात्रं
मंत्रेण स्वष्टकृत्वोभिमंत्रयेत् उत्तरतंत्रे तदाधारकास्यपात्रेण एकमेव तु भवेन्नवा स्वतंत्रं वाराहपुराणे परमं यत्परं सामम

पुष्पं तत्र उच्यते तदाप्यते यदानेन मधुपर्कः सदा स्मृतः शारदायां दक्षिणे प्रोक्षणीपात्रमाधायाद्भिः प्रपूरयेत् किंचिदर्घ्याद्
संगृह्य प्रोक्षणं भस्मिनि निक्षिपेत् नारदपंचरात्रे पुनराचमनीयार्थं पात्रं संस्थापयेत्ततः इति प्रपंचसारे गंधपुष्पाक्षतयव
कुशाग्रतिलशर्षपाः दूर्वा चेति क्रमादर्घ्यद्रव्याष्टकमुदीरितमिति अक्षतास्तण्डुलाः नारदपंचरात्रे विस्तरेणोक्तः
सिद्धार्थकास्तिला दूर्वाः सयवास्तिलतण्डुलाः तोयक्षीरहुतोपेतमिदमर्घ्यमुदाहृतमिति सिद्धार्थाः शर्षपा दूर्वा
पत्रत्रयान्विताः पत्रत्रयान्विता दूर्वा प्रशस्तार्घ्यकर्मणीति सोमशंभुवचनात् प्रपंचसारे पाद्यं श्यामाकदूर्वा
ब्जविष्णुक्रान्ताभिरुच्यते जातीलवंगकक्कोलैर्मतमाचमनीयकं जातीजातीफले तथाचमनपात्रेपि दद्याज्जाती
फलं मुने इत्यगस्त्यसंहितावचनात् जातीफलादीनि चूर्णितानि देयानि चूर्णयित्वा यथाम्नायं दद्यादाचम
नीयकमिति फत्कारिणीतन्त्रवचनात् लिंगपुराणे कुशाग्राण्यक्षतांश्चैव यवव्रीहितिलानि च आज्यसिद्धार्थपु
ष्पाणि भर्जितं चार्घ्यपात्रके कुशपुष्पयवव्रीहिवक्रमूलतमालकं दापयेत्प्रोक्षणीपात्रे भासितं प्रणवेन च उशी
रं चंदनं चैव पाद्ये चैव प्रकल्पयेत् जातीकक्कोलकर्पूरवक्रमूलतमालकं चूर्णयित्वा यथान्यायं दद्यादाचमनीयकं
वक्रमूलं दूर्वा सहस्रपरमा देवि शतमूला शतांकुरा सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी शतसहस्रवक्रत्वचाच
त कृत्वा प्रपंचसारे मुद्राभिरद्भिर्विहितं पुनराचमनीयकं मुद्राविस्तरेणोक्ता दिनदेयमित्यवगम्यते अर्घ्यादिद्रव्यालाभे तु
शौनक पुष्पाभावे पुष्पादि तत्र भावनया क्षिपेत् इति मंत्रतत्त्वप्रकाशे द्रव्याभावे प्रदातव्याः क्षालितास्तण्डुलाः शुभाः भ
सितं तु शिवरत्नायामेव आद्याचारेण तु कल्पास्तन्त्रमाणवचनानि च तत्प्रयोगे प्रदर्श्यन्ते पात्रासादनप्रयोगः तत्रा
दौ मुद्राधारककलशस्थापनं अत्र कालीमते प्रथमतः शंखस्थापनं कृत्वानन्तरं कलशस्थापनविधिं च कुलार्णवे ॥

शंखस्य वामभागे तु कलशस्थापनं भवेत् मण्डलेस्थापयेत्कुंभं सौवर्णं राजतं तथा ताम्रं भूमिमयं वापि यद्वा लोहजवर्जितमि
ति कालिमतेन आदौ कुंभं तथा शंखमित्यादिरीत्या विधेयं इदं तु दीक्षायां वैपरीत्यं बोध्यं अत्र यथा गुरूपदेशः कार्य इति स्व
वामभागे त्रिकोणषट्कोणषट्कोणवृत्तचतुरस्रमण्डलं विरच्य पाशुपतास्त्रेण तन्मण्डलं प्रोक्ष्य ओं ह्रीं आधारशक्तये न
म इति त्रिकोणे ओं अग्निमण्डलाय इति षट्कोणे ओं सूर्यमण्डलाय इति वृत्ते ओं सर्वतोव्यापकमण्डलाय इति चतुरस्रे
इति कोणे कामरूपपीठाय इति त्रिकोणे पूर्णगिरिपीठाय इति षट्कोणे ओं जालन्धरपीठाय इति वृत्ते ओं उड्डियाणपीठाय इ
ति चतुरस्रे इति संपूज्य षट्कोणे मूलविद्यायाः कूटत्रयं मध्ये संपूर्णां मूलविद्यां पुनर्व्यस्तसमस्तकूटैर्मण्डलं चतुष्ट
यं सर्वं सर्वमेव पूजयेत् ततः पाशुपतास्त्रेण स्वर्णादिनिर्मितमाधारं प्रक्षाल्य मण्डलोपरि संस्थाप्य ओं ऐं ह्रीं श्रीं मं धर्म
प्रद दशकलात्मने वह्निमण्डलाय श्रीपरमदेवतायाः कलाधाराय इति तदुपरि संपूज्य तत्र वह्नेर्दशकलाः प्रदक्षिणाकारेण पू
जयेत् ४ यं धूम्रार्चिषे नमः ४ रं ऊष्मायै नमः ४ लं ज्वलिन्यै नमः ४ वं ज्वालिन्यै ४ शं विस्फुलिंगिन्यै ४ षं सुश्रियै ४ सं सुरू
पायै ४ हं कपिलायै ४ लं हव्यवहायै ४ क्षं कव्यवहायै ४ इति संपूज्य अभयेष्टकरा रक्ता ओं अग्न्याधर्मदाः कलाः इति रीत्या
ध्यात्वा वह्नेः कला इहागच्छतागच्छतेति क्रमेणावाह्य वह्निकलानां प्राणा इह प्राणा इत्यादिमुख्यपदस्थानयोजितप्राणप्र
तिष्ठाविद्यया तासां प्राणप्रतिष्ठां विधाय तदुपरि हेमादिनिर्मितं सुलक्षणं रक्तवस्त्रग्रीवं रक्तचंदनचर्चितं पाशुपतास्त्रेण
प्रक्षालितं कलशं संस्थाप्य तत्र ४ अं अर्थप्रद द्वादशकलात्मने सूर्यमण्डलाय श्रीपरदेवतायाः कलशाय नमः इति सं
पूज्य सूर्यस्य द्वादशकलाः प्रदक्षिणाकारेण पूजयेत् ४ कं भं तपिन्यै ४ खं बं तापिन्यै ४ गं भं धूम्रायै ४ घं पं मरीच्यै ४ ङं नं ज्वालि
न्यै ४ चं धं रुच्यै ४ छं दं सुषुम्णायै ४ जं थं भोगदायै ४ झं तं विश्वायै ४ ञं णं बोधिन्यै ४ टं ढं धारिण्यै ४ ठं डं क्षमायै ४ इति संपूज्य

अभयेष्टवराः पीताः सौराश्चार्थकलाः प्रदाः इति रीत्या ध्यात्वा प्राग्वत्तासां प्राणप्रतिष्ठां विधाय तन्मध्ये विलोममातृकासहितां मूलविद्या
मुच्चरन् शुद्धोदकमापूर्य ४ ॐ कामप्रदषोडशकलात्मने सोममण्डलाय श्रीपरदेवतायाः कलशामृताय इति संपूज्य सोमस्य षोड
शकलाः हन्ताकारेण पूजयेत् ४ अं अमृतायै ४ आं मानदायै ४ इं पूषायै ४ ईं तुष्ट्यै ४ उं पुष्ट्यै ४ ऊं रत्यै ४ ऋं धृत्यै ४ ॠं शशिन्यै ४
ऌं चन्द्रिकायै ४ ॡं कान्त्यै ४ एं ज्योत्स्नायै ४ ऐं श्रियै ४ ओं प्रीत्यै ४ औं अङ्गदायै ४ अं पूर्णायै ४ अः पूर्णामृतायै ४ इति संपूज्य अभयेष्टकराः
श्वेताः सौम्याः कामप्रदाः कलाः इति क्रमेण ध्यात्वा प्राग्वत्तासां प्राणप्रतिष्ठां विधाय तन्मध्ये दविंहृद्दन्तागजाश्वरथ्यावल्मीक
संगमह्रदगोकुलात् मृदः काञ्चनगोमूत्रगोमयमहद्वीरोचनसर्वौषधीः संस्थाप्य ४ अग्नये ४ ब्रह्मणे ४ भवान्यै ४ गजवक्त्राय ४
महोरगाय ४ स्कन्दाय ४ भानवे ४ मातृगणेभ्यो ४ दिक्पालेभ्यो ४ नवग्रहेभ्यो नमः इति तज्जलेन संपूज्य तन्मध्ये गन्धाष्टकं निक्षिप्य
तत्र ४ वं वरुणाय नमः ४ इति वरुणं पञ्चोपचारैराराध्य सर्वे समुद्राः सरितः सरांसि च नदा ह्रदाः आयान्तु यजमानस्य दुरितक्षयकारकाः
इति कौशेयकुशामुद्रया तीर्थान्याकृष्य गङ्गे च यमुने चैव गोदावरि सरस्वति नर्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिं कुरु इत्यावाह्यावाहना
दिपरमीकरणान्ता मुद्राः प्रदर्श्य मूलमन्त्रेण वीक्ष्य अस्त्रेण प्रोक्ष्य तेनैव कुशैस्त्रिः संताड्य कवचेनावगुण्ठ्य वमिति धेनुमुद्रयामृ
तीकृत्य तन्मुखे पञ्चपल्लवान्निक्षिप्य कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्थिताः
कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः
इति ध्यात्वा तदुपरि उद्धरिणीसहितं पिधानपात्रं संस्थाप्य सूक्ष्मवस्त्रेणाच्छादयेत् इति शुद्धोदककलशस्थापनविधिः अथ वर्द्धनी
कलशस्थापनविधिस्तु शुद्धोदककलशस्थापनवदेव बोध्यः ततो होतृपात्रं च तत्र स्थापयन् गृहीत्वा कुलगेहे गत्वा तत्र हर्मीयं
तेन विधिवदाचार्यस्तत्र कुण्डगोलाभ्यां नैकस्मिन्पात्रे कृत्वा तदानीयस्तां स्थापयित्वा मन्त्रैर्वाद्यादिध्वनिं च स्थापयन् गृही

कल्लगेहे गत्वा तत्र तृतीयजनं विधिवदाचार्यं तत्र स्नात्र कृणउ गोलाख्यं गोप्यैनेकस्मिन् पात्रे कृत्वा तदानीय स्वाग्रे स्थापयित्वा पयित्वा तत्
त्रैवाद्यादि चतुष्टयमपि स्थापयेत् पथकाद्व चतुष्टये संस्थाप्य पंचपात्रस्य द्रव्यं पंचकस्य संस्कारं कुर्यात् तद्यथा तत्रादौ आद्यसं
स्कारः एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवं कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहं १ सूर्यमंडलसंभूते वरुणालयसंभवे
अमाबीजमये देवि शुक्रशापाद्विमुच्यतां वेदानां प्रणवो बीजं ब्रह्मानंदमयं यदि तेन सत्येन ते देवि ब्रह्महत्या व्यपोहतु २ ॐ वां
वीं वूं वैं वौं वः ब्रह्मशापविमोचितायै सुधादेव्यै नमः इति तदुपरि दशधा जपेत् ४ ॐ ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः ब्रह्मशापविमोचय
अमृतं स्रावय स्वाहा इति दशधा जपेत् ततो मूलविद्यां तदुपरि अष्टधा जपेत् इति आद्यशुद्धिः अथ द्वितीयशोधनं ४ ॐ प्रतद्विष्णुस्तव
ते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा ॐ तत्पुरुषाय विद्महे महादेवा
य धीमहि तन्नो रुद्रः प्रचोदयात् इति तदुपरि दशधा प्रजप्य मूलविद्यामपि दशधा जपेदिति द्वितीयशोधनं अथ तृतीयशोधनं
ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् इति तदुपरि दशधा जपेदिति द्वितीयशोधनं अ
थ चतुर्थशोधनं हृष्टं हंसमंडलाकारं चंद्रबिंबनिभं शुभं चारु कं च मनोहारि शर्कराद्यैश्च शरितं पूजाकाले देवतायां मुद्रैषा परिकी
र्त्तिता तच्छोधनं तु ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसः समिंधते विष्णोर्य
त्परमं पदं इति तदुपरि दशधा प्रजप्य मूलविद्यामपि दशधा जपेत् इति चतुर्थशोधनं अथ पंचमशोधनं अमृते अमृतोद्भवे अमृ
तवर्षिणि शुक्रशापं प्रमोचय प्रमोचय अमृतं स्रावय स्रावय अमृतं कुरु कुरु स्वाहा इति तदुपरि दशधा प्रजप्य मूलविद्यामपि द
शधा जपेत् इति पंचमशुद्धिः एवं सामान्यतः द्रव्याणि संशोध्य ब्रह्मादिपात्रेषु निक्षिप्य विशिष्य द्वितीयवारं शोधयेत् ततो देवीसू
ज्ञोते आत्मसमर्पणसमये तृतीयवारं शोधयित्वा आत्मसमर्पणं कुर्यात् तच्च श्रीगुरुमुखादवगंतव्यं तदुक्तं कुलार्णवे आस

वंपल्लवं मन्त्रमुद्रागोलोन्यमेवच एतानि पंचदूष्याणि त्रिधा संशोधयेत्ततः मुद्रां तिनान्यथा देवि निवेद्यं प्रयाति चेत् त्रिप्र
कारशोधनं न चेत् उक्तं स्कंतिस्मृतिपुराणादौ· उक्तमेतत्पंचदूष्यसंसर्गात्प्रयुक्तदोषं प्रयाति प्राप्नोतीत्यर्थः स्वयंभूशोधनं गो
लस्य शोधनवर्जयेत् अथ समयशोधनं कुलार्णवे संविदासवयोर्मध्ये संविदेव गरीयसी संविद्प्रयोगः कर्तव्यः पूजादौ साध
कोत्तमैः कर्तव्या च महापूजा करणीयास्तु निश्चितैः अयं प्रयोगः कुलीनैः सर्वत्र पूजादौ कर्तव्यः अन्यत्रापि आनंदेन विना
प्रसन्ना न चलंति देवताः इति साच ब्राह्मणी तत्क्रिया वैष्णवी मुद्रा इति च तत्त्रिधा शुक्लरक्तपीतकुसुमभेदैः नासामूढयस्तु
संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे भैरवाणां च तृप्त्यर्थं पवित्रा भव सर्वदा ॐ ब्राह्म्यै नमः स्वाहा इति तदुपरि दशधा प्रज
प्य मूलमंत्रमष्टधा जपेदिति ब्राह्मीशुद्धिः सिद्धिमूलक्रियेदेवि मूलबोधप्रबोधिनि राजपुत्रवशंकारि शत्रुकंठविमूलिनि·
क्षत्रियायै नमः स्वाहा इति दशधा प्रजप्य मूलमष्टधा जपेत् इति क्षत्रियाशुद्धिः अत्तानेयनदीपाग्रे ज्ञानाग्रे ज्ञानरूपिणि·
आनंददायाकृतिं सत्वा ससस्कृत्तानप्रपद्के मे ह्रीं वैश्यायै नमः इति दशधा प्रजप्य मूलमष्टधा जपेदिति वैश्याशुद्धिः नमस्या
मि नमस्यामि योगमार्गप्रदर्शिनि त्रिलोक्या विजये मातः समाधिफलदा भव श्रीं शूद्रायै नमः इति दशधा प्रजप्य मूलमष्टधा ज
पेदिति शूद्राशुद्धिः अथ सामान्यतः सर्वासां शोधनप्रकारस्तन्मूलेन वीक्ष्यास्त्रेण प्रोक्षणेनैव कुशाहर्वादिनास्त्रिः संताड्य कवचेना
वगुंठ्य वमित्यमृतीकृत्य ध ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतमाकर्षय कर्षय सिद्धिं देहि स्वाहा इति तदुपरि दशधा प्रजप्य मूल
मष्टधा जपेत् तदुपरि आवाहनादि दश मुद्राः प्रदर्श्य मुद्रोदककलशस्थापनवत् कलशस्थापनं विधाय विजयामुं तेनार्घ्यं च
द्रकलापूजनादिकं सर्वं मुद्रोदकस्थापनवद्देव विधाय दिग्बंधच्छोटिकातालत्रयपूर्वकं पार्ष्णिघातकरास्फोटनसमुद्रं विनव
कैः पातालभूतभोलीनान् विघ्नान्निरस्य मूलमंत्रेण समधाव्रलरंध्रेन पद्धिया सहस्रदलकमलकर्णिकामध्यवर्तिनं श्रीगुरुं

संकेतमुद्रया श्रीगुरुपादुकां विद्यान्ते श्रीगुरुपादुकां तर्पयामीति त्रिधा संतर्प्य मूलान्ते श्रीपरदेवतां तर्पयामीति तत्त्वमुद्रया मूल
देवीं त्रिधा तर्पयित्वा ॥ मूलं ऐं वद वद वाग्वादिनि मम जिह्वाग्रे स्थिरीभव सर्वसत्त्ववशंकरि स्वाहा इति मंत्रमुच्चरन् कलशात्पा
त्रेण गृहीतं विजयामृतं स्वयं प्राश्य कलशोपरि उद्धरणीयुक्तपात्रेणाच्छाद्य तत्सर्वं सत्त्ववस्त्रेण साधयेदिति विजयाकलश
स्थापनविधिः ॥ अथानुकल्पद्रव्याणि कुलार्णवे आद्याभावे तु वटकं जले संयोज्य प्रजयेत् सत्कं वटकं वापि संशुष्कं च विवर्ज
णः गुडमिश्रेण तक्रेण तेन वा मधुभाजिना सौवीरेणाथ वा कुर्याद्दक्षकर्म न लोपयेत् द्वितीयाभावे लशुनमार्द्रकं नागरं तु
वेति॰ वीरमन्त्रे॰ लवणार्द्रकपिण्याकगोधूममाषपंचकं लशुनं च महेशानि द्वितीयाप्रतिनिधौ स्मृतं तृतीयादेरभावे तु यो
जयेदेतदेव हि॰ चतुर्थ्याद्यनुकल्पस्तु नास्ति॰ पंचमाद्यनुकल्पस्तु अपराजितापुष्पं च समानीय चंदनादिना अपराजितापुष्पमा
पूर्य्य हृदयादिकुमंत्रं संयोज्य भयं शिवशक्तिसमायोगं तत्र परिचिन्तयित्वा कुलद्रव्याणि विभाव्य तदुपरि यथाशक्त्या निज
विद्यां जपित्वा तत्कुसुमं हृदयं विशेषार्घ्यमध्ये निक्षिपेत् अन्यान्यपि क्षीरादीन्यनुकल्पद्रव्याणि यथाधिकारमवधेयानि अथ का
लीमततरीत्या सामान्यार्घ्यस्थापनं तत्र स्ववामाग्रे त्रिकोणवृत्तचतुरस्रमण्डलं चंदनादिना यथासंभवद्रव्येण रजोभिर्जलेन वा
विरच्य पाशुपतास्त्रेण तन्मण्डलं संप्रोक्ष्य॰ ह्रीं आधारशक्तये नमः इति त्रिकोणमध्ये पूर्वकोणत्रये ह्रीं चतुरस्रे च ओं अग्निमण्ड
मण्डलाय नमः ओं शर्णि मेरुलाय नमः ओं सर्वतो व्यापकमंडलाय नमः इति मंडलं संपूज्य पाशुपतास्त्रेण स्वर्णादिनिर्मितमा
धारं प्रक्षाल्य मण्डलोपरि संस्थाप्य॰ ओं धर्मप्रदशकलात्मने वह्निमण्डलाय श्रीपरदेवतायाः शंखाधाराय नमः इति शंखाधारं
संपूज्य वह्निरूपमाधारं विचिन्त्य पुनः पाशुपतास्त्रेण शंखं प्रक्षाल्य आधारोपरि संस्थाप्य॰ ओं अर्थप्रद द्वादशकलात्मने सूर्यमण्ड
लाय श्रीपरदेवतायाः शंखपात्राय नमः इति शंखं संपूज्य सूर्यरूपं शंखं संपूज्य सूर्यरूपं शंखं संचिन्त्य विलोममातृकां मूल

ततस्तन्नित्याविद्यासहितामुच्चरन् शुद्धतोयेन त्रिभागं शंखं प्रपूरयेत् भागमेकं विशेषस्य पूरणार्थमवशेषयेत् ततः कृतं का
मषट्षोडशकलात्मने सोममण्डलाय श्रीपरदेवतायाः शंखामृताय नमः इति जलमध्ये संपूज्य तज्जले चंद्ररूपं विचिंत्य
सांगं षडङ्गाद्यनयवकुशाग्रतिलमिश्रेण शार्षपदधिहरिद्रादीनि प्रक्षिप्य जले विन्यस्य गंगे च यमुने चेति तीर्थान्यावाह्यावाहनादि
दशमुद्राः प्रदर्श्य पंचोपचारैस्तानि संपूज्य वषडिति गालिनीमुद्रां प्रदर्श्य दक्षांगुष्ठं जले निक्षिप्य मत्स्यमुद्रया प्राच्छाद्य
जलं स्पृशन्मूलविद्यामष्टधा प्रजप्य नाराचमुद्रया पाशुपतास्त्रेण संरक्ष्य वमिति धेनुमुद्रयामृतीकृत्य पं इति योनि
मुद्रां प्रदर्श्य श्रीं इति शंखमुद्रां फडिति चक्रमुद्रां क्लीं इति परमीकरणमुद्रां च प्रदर्श्य तज्जलं तेजोमयं विचिंतयेत् इति शंख
स्थापनं अथ काद्रिमतानुसारेण प्रधानकलशसामान्यविशेषपात्राणां स्थापनप्रकारमत्र लिखिष्यामि श्रीपात्रस्थापन
मपि वक्ष्यामि शंखादिपात्राणां स्थापनं तु सामान्यपात्रवदेव विशेषस्तु विशेषार्घ्यं विंदुं दत्वा तन्मंत्रेण दशधा प्रजपेत्
शक्तिपात्रं बालया गुरुपात्रं गुरुपादुकाविद्यया भोगपात्रं समष्टिविद्यया सर्वेषां बलिपात्राणां श्रीमंत्रेणात्तदेवतामंत्रैः
योगपात्रं षडंगयुवतीमंत्रैः वीरपात्रं कामराजेन गुरुपात्रं वाग्भवेन योगिनीपात्रं नवचक्रेश्वरीविद्याभिः सकृत्सकृत् आ
त्मपात्रमष्टाक्षरेण प्रोक्षणीपात्रं मूलषडंगमंत्रैः हंतीपात्रचतुष्टयं बालयैवाभिमंत्रयेत् तदुक्तं श्रीज्ञानार्णवे शक्तिपात्रं
वाग्भवेन दशधा प्रजपेत्सुधीः करेणाक्षाध्यदेशेन कुमारी त्रिपुरेश्वरी तथैव गुरुपात्रं च पादुकाविद्यया शिवे समष्टिवि
द्यया देवि भोगपात्रेऽपि मंत्रणं मनुभिर्बलिदेवीनां तत्पात्राणां सुरेश्वरि षडंगयुवतेमंत्रैर्योगपात्रं सकृत्सकृत् वीरपात्रं म
हादेवि कामराजेन सुव्रते गुरुपात्रं तु ऐंलाबीजेन परमेश्वरि नवचक्रेश्वरीभिश्च योगिनीपात्रमंबिके आत्माष्टाक्षरम
न्त्रेण चात्मपात्रं महेश्वरि विद्याषडंगमंत्रैश्च प्रोक्षणीपात्रमद्रिजे कुमार्यैवं महेशानि हंतीपात्रचतुष्टयमिति इत्यादिप्रमाणव

वचनानि तत्तन्मंत्रोक्तानि बोध्यानि । तथैवार्घ्यादि पंचपात्राणामपि तत्तद्देवतात्मकमंत्रैरभिमंत्रणं बोध्यं । यत्तु ग्रंथे षडंगमूला
भ्यां संसाध्य विधिवद्यजेत्यादिक्रमस्तत्संक्षेपपूजायां तेषु । सकृन्मस्तु प्राग्वन्मण्डलं विलिख्य तत्रासनं दत्ते । संपूज्य तत्रासनादालि
नमाधारं संस्थाप्य तं वह्निरूपं विचिन्त्य तदुपरि ग्रहदत्तालिनमस्यादि संस्थाप्य पात्रं सूर्यरूपं विचिंत्य संपूज्य विधाक्रमेण निक्षिप्य
सहितं विलोममातृका पूजामुच्चरन् जलेनापूर्य तज्जलं चंद्ररूपं संपूज्य तस्मिन् प्राग्वत्पात्रे पंचकेष्ट्यथ कृशोधितं द्रव्यं पंच
कैः क्रमेण निक्षिप्य षडंगमंत्रैरीशधाः श्रीशास्त्र वायवमध्येदितित्यादिक्रमेण दत्ते । संपूज्य श्रीविद्यायां तार्तीयकूटमन्यत्र
तत्तद्देवतामंत्रं दशधा प्रजप्य तज्जलं तेजोरूपं विचिंतयेदिति संक्षेपतः पात्रासादनं विधातार्तीयकूटेन मूलदेव्याः षडंगकैः
दशधा जपपूजाभ्यामर्घ्यं संसाध्य पूजयेदिति कादिमतवचनात् वस्तुतस्तु श्रयमापत्कल्पः मुख्यपूजायामापत्कल्पो
गर्हितः तन्मुख्यकल्प एवमाधीयात् कुमारीपूजने स्त्र्यादि पंचपात्राणामभिमंत्रणं वालयैव मालापूजाविधौ तु प्रासा
देन भूतशैवधिपूजने पंचभूतमंत्रैः पंचायतनपूजायामपि तत्तन्मंत्रैरेव पंचाशन्मिथुनपूजायां च मातृकया । धातृदैवत
पूजायां भैरव्या कालनित्यायजने तन्नित्याविद्यया पुस्तकपूजायां तु प्रासादेनैव अग्निपूजायां तन्मंत्रेणैव दंपतीसुवा
सिनीयोगिनीनां यजनादिषु वालयैवाभिमंत्रणं कुर्यात् उद्धरणीपिधानान्यपि पात्रपूजनात् प्रागेव क्षालनं तेनैवाभिमंत्रणं तेन
घपात्रादिभोग्यवस्तूनां पात्राणि तत्तद्देवतामूलमंत्रे उक्तानि तत्तन्मंत्रेण क्षालनं तेनैवाभिमंत्रणं च इदं सर्वं गुरुतन्त्रशास्त्रतः
श्वेतां वा पूजायां योजनीयमिति नारदैवस्वामिनात रोषधिचूर्णाच्च लितमंत्रन दत्त्वं न दत्तोऽस्यता हशोषास्त्वन्यपात्राणां संस्कारः प्रा
गुक्तसंक्षेपकल्परीत्यैव ज्ञेयः नेषु संस्कारस्य बाहुल्यप्रयोजनाभावात् सिद्धद्रव्याणां संस्कारः प्रतिदिनं विधेयः अन्यदिनसंस्कृतद्रव्यम
न्यदिनपूजायां गर्हितं स्वयंभूकुसुमस्यान्तसंस्कृतस्य पुनरन्यदिने संस्कारो नास्ति तदुक्तं कुलार्णवे । स्वयंभूकुसुमं सम्यक् शोधयि

वानदैशिकः निक्षिपेत्तेन तज्जायां देव्याः संमेलनेन च तेनभीनामहादेवीसर्वसिद्धिं ददातिच अन्यातिसिद्धद्रव्याणिप्रत्यहंप्रो
षयेद्बुधः एकस्मिन्दिवसे शुद्धमन्यास्मिन्नाह्नि न भवेत् इतिपतेन सिद्धद्रव्याणि स्वयंभूकुसुमरहितानि प्रत्यहं तज्जायां नवीना
न्येवप्रशस्तानीत्यर्थः अथयंत्रलिखनद्रव्यसंशोधनं तत्रकस्तूरीअगरुकर्पूरकुंकुमगोलाद्रव्यकेसरकुंकुमचंदनस्वयंभूकु
सुमात्मकाष्टद्रव्याण्येकस्मिन्पात्रे संस्थाप्यानेनाघोरीदीपनीविद्याभ्यासमष्टोत्तरमभिमंत्रयेत् तदुक्तं भैरवीतंत्रेः कस्तूरीघुसृ
णकर्पूरगोलोत्पंजागलेशुरं मलयोत्थमहादेवि स्वयंभूकुसुमं तथा सर्वमेकत्र संयोज्य दीपिन्यामन्तविद्यया पृथक्पृथक्
समवारं हसं दत्वाभिमंत्रयेत् तेन शुद्धं भवेद्द्रव्यं तेन द्रव्येणैव लिखेत् इति अत्रगोलोत्थं स्वयंभूकुसुमं च प्राग्व्याख्यातं तेन
शोधितमेव ग्राह्यं अथ कादिमतरीत्याकलशादिस्थापनं तत्र स्ववामाग्रे वक्ष्यमाणविशेषार्घमण्डलवन्मण्डलं विरच्य तत्
त्रैवसंप्रजप्य तत्र वक्ष्यमाणविधिना क्षालितमाधारं संस्थाप्य तत्रैव संपूज्य स्ववर्णादिरचितं कलशं धूपवासितं हूं हूं ब्रह्माण्ड
चषकाय स्वाहा इतिवामकरेण प्रक्षालितं पंसंदीपितज्वालामालिनि ह्रीं इति संदीपनीविद्यया योनिमुद्रया दीपितं कवचे
नावगुण्ठितं ॐ नमः क्लीं नमः ह्लूं नमः हूं नमः सः नमः इति विन्यस्य पंचमंत्रं ॐ श्रीमहात्रिपुरसुंदर्या महाकलशं स्था
पयामीति तत्र कलशं संस्थाप्य तत्र वक्ष्यमाणविशेषार्घ्यपात्रवत्स्वर्णकलां तं संपूज्य तत्र वक्ष्यमाणविधिनैव कर्पूरादि
सुवासितं पर्युषितपरिस्रुतपयस्समापूर्य तत्राज्ञादिकं निक्षिप्य तन्मध्ये विशेषार्घ्यवक्ष्यमाणविधिना सोमकलां तं संपू
ज्य । तच्चतत्रस्वं परितः ॐ २ हसें पार्थिकदेवताभ्यो फट् स्वाहा नमः ॐ २ हसखफ्रें ग्रामचाण्डालिनी फट् स्वाहा नमः ॐ २ ह
सखफ्रें क्रोधचाण्डालिनी फट् स्वाहा नमः ॐ हसखफ्रें दृष्टिचा ॐ २ हसखफ्रें स्पर्शचा ॐ हसखफ्रें स्पृष्टिचाण्डा ॐ २ हसख
फ्रें यटचा ॐ २ हसखफ्रें तपनवधचा ॐ हसखफ्रें निर्दीवचा ॐ हसखफ्रें सर्वजनस्पृष्टस्पर्शदोषचा ॐ २ हसखफ्रें पञ्चपा

वा॰ इतिस्वाग्रादिम्राददिलेपनस्रजयोदिमेवंदशादोषान्निरस्य॰ ॐकांकींकूंकैंकौंकः विकारशोषिणि अस्य विकारान् हन हन स्वा
हा इति हेतुमध्ये संस्रजस्वादिष्टादिभिः पूर्वमरतिभिः पंचभिरायतः विस्नुयोनिं त्रयेणैव त्रिभिस्त्वादित्रयेण च इममइति च हाभ्यां
ताभ्यां देव्यकुयात्तथा॰ श्रोणामेकेति चैकेन शुक्रशापं विमोचयेत् इति श्रीकुलार्णववचनात् उक्तपंचदशमंत्रैः सकृत् सकृदभि
मंत्रयेत् मंत्रास्तु ऋग्वेदे यथा स्वादिष्ठया मदिष्ठया पवस्व सोम धारया इंद्राय पातवे सुतः २ रक्षोहा विश्वचर्षणिरभियोनि
मयोहतं द्रुणा सधस्थमासदत् २ वरिवोधातमो भव मंहिष्ठो वृत्रहंतमः पर्षि राधो मघोनां ३ अभ्यर्ष महानां देवानां वीतिम
धसा अभि वाजमुत श्रवः ४ त्वामच्छा चरामसि तदिदर्थं दिवे दिवे इंदो त्वे न आशसः ५ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि
पिंशतु॰ आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते १ गर्भं देहि सिनीवालि गर्भं देहि सरस्वति गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ
हिरण्मयी अरणी यं निर्मंथतो अश्विना तं ते गर्भं हवामहे दशमे मासि सूतवे ३ त्रिभिष्ट्वं देव सवितर्वर्षिष्ठैः सोम धामभिः
अग्ने दक्षैः पुनीहि नः पुनंतु मा देवजनाः पुनंतु वसवो धिया विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा २ प्रप्यायस्व प्रस्यंद
स्व सोम विश्वेभिरंशुभिः देवेभ्य उत्तमं हविः ३ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या असिक्न्या मरुद्वृधे वितस्तया
र्जीकीये शृणुह्या सुषोमया सिता सिते सरिते यत्र संगते तत्राप्लुतासो दिवमुत्पतंति॰ ये वै तन्वं विसृजंति धीरास्ते जनासो अमृतत्वं भ
जंते नामं दसानाम नु षोडशेणआथर्वं रपि महावीरं वचसामे कृतं तीर्थं सप्रयाणां प्रभस्यती तारण्युपथेष्ठा मपद्मित्ति दत्तं १ श्रो
णामेकमुदकं गामजामुमांसमेकविंशति सूनयाभृतं आनिस्तुचः कृशदेवाको अपा भरत् किं स्विन्मुचेभ्यः पितरा उपावतः इत्यभि
मंत्र्य ॐकांकींकूंकैंकौंकः अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतस्वरूपिणि अमृतं स्रावय २ शुक्रशापात्सुधां मो
चय मोचय मोचिकायै नमः ॐ २ जूंसः स्वाहा इति विद्यया अष्टवारं अभिमंत्र्य ॐ सिद्धायै नमः ॐ २ रक्तायै नमः ॐ २ शुक्लायै नमः

ओं ३ उत्पलायै नमः इति स्वतरस्वस्य चतुर्दिक्षु प्रादक्षिण्येन स्थाप्यादिनः संपूज्य मध्य त्रिकोणं विशेषार्घ्यं वक्ष्यमाणन्यायं विभाव्य ओं
हसक्षमलवरयूं आनंदभैरवाय वौषट् आनंदभैरवश्रीपादुकां पूजयामि तर्पयामि नमः एवं सर्वत्र ओं ४ सुरानंदभैरवा
य वौषट् ओं ४ असुरानंदभैरव्यै वषट् सुरानंदभैरवीम्प्रीः ओं अमृतानंदभै · ओं ४ अमृतानंदभैरव्यै वषट् ओं ४ तरुणानं
दभैरवाय ओं तरुणानंदभैरव्यै · ओं ४ उन्मत्तानंदभैरवाय ओं ४ उन्मत्तानंदभैरव्यै · ओं ४ ज्ञानानंदभैरवाय · ओं ज्ञानानंदभै
रव्यैः ओं ४ मुक्तानंदभैरवाये ओं ४ मुक्तानंदभैरव्यै ४ ओं परमानंदभैरवाये ओं परमानंदभैरव्यै ओं ४ कालभैरवाय · ओं का
लभैरव्यै · इति भैरवनवकं मध्ये दिक्षु च संपूज्य संतर्प्य मूलविद्यया वीक्षणमुद्रया · संवीक्ष्यास्त्रमंत्रेण प्रोक्ष्यास्त्रमंत्रेण कु
शास्त्रैः संताड्य कवचमंत्रेणाभ्युक्ष्याग्नेय वामनासापुटेन प्रविष्टं लरं भगवान्तरस्थ विद्वदमंडलमध्यगतपरमामृतवारि
यो मिलित्वा तन्मयेन राजदंतविवरामेत्र मार्गेण विनिर्गतं तज्जलं विभाव्य संरोधनमुद्रया संरुध्य कवचमंत्रेणावगुंठनमु
द्रया वगुंठ्य वमिति धेनुमुद्रया अमृतीकृत्य परमीकरणमुद्रया परमीकृत्य तत्र देवीं ध्यात्वा गंधपुष्पादिभिः संपूज्य मूलवि
द्यया अष्टवारमभिमंत्र्य ओं नमो भगवति माहेश्वरि वारुणि जलमूर्तये ऊर्ध्वविंदुगामिनि महालक्ष्मीश्वरि परमधाम्नि पर
मकाशान्तासते सोमसूर्याग्निभक्षिणि आगच्छागच्छ विश स्वभोगदं ह्स्क्ष्म्लहृं स्हक्ष्ल स्वाहा इति तत्कलशं हि वामांगुष्ठाना
मिकाभ्यां धृतद्वितीयाखण्डेनादायोर्ध्वमुत्क्षिपेत् ततः कलशाच्चंदनपात्रांतरेणाच्छाद्योद्धरणपात्रमादाय वामकरे निधाय
ओं ऐं अमोघायै ओं सत्यायै · ओं ऐं आनंदायै · ओं श्रीं ... नमः इति चतुष्टयं वामकरस्थपात्रे संपूज्य कुंभस्याच्छादनपात्रस्योपरि स्था
पयेदिति कलशस्थापनं विधाय ततः कलशदक्षिणभागे गंधोदकेन चतुरस्रं हृत्त्रिकोणात्मकं मण्डलं चंदनादिलि
मभूमौ वहन्वामनासाकरोर्ध्व पृष्ठाभ्यां करांभ्यां त्रितारमुच्चरन् निर्माय प्रणवत्रितारादिनमोंतया मूलविद्यया त्रिकोणमध्ये

वि॰व॰
र्णि॰
१२१

संपूज्य तत्र वर्तमानप्रकारेण सूर्यस्य द्वादशकलाः संपूज्य गंधादिसुवासितमुद्धृतोयेन प्रणवत्रितारमूलविद्यांते विलो
ममातृकामुच्चरन् तत्पात्रमुच्चरन् तत्पात्रमापूर्य अन्तनीयहृदं ॐ २ सोममण्डलात्मीर्थमावाह्य कलशास्तत विंदुं दत्वा तत्र
मूलेन गंधपुष्पादिकं निक्षिप्य प्राग्वत् षडंगमंत्रेण संपूज्य हंसःस्वमन्त्रवरं संसहृत्तमलवरयीं इति निवात्मकमिथुनमंत्रेण
त्रिरभिमंत्र्य ह्रौं वरुणाय ह्रीं वारुण्यै देव्यै नमः इति वरुणमिथुनमंत्रेण च त्रिभिरभिमंत्र्य मूलेनाष्टधाभिमंत्र्य धेनुयोनिमु
द्रे प्रदर्शयेदिति सामान्यार्घं विधाय तत्समीपे सामान्यार्घ्यजलेन च यत्तकर्दमादिगंधद्रव्यमिश्रितेन भूमिं विलिप्य तत्र वह्निको
णार्द्धवृत्तहस्ताभ्यां चतुरस्रवृत्तषट्कोणत्रिकोणात्मकं मण्डलं विधाय तन्मण्डले शंखमुद्रास्य दितवामकरेणावष्टभ्य तन्म
ध्य त्रिकोणमध्ये सविंदुत्र्यस्रस्वरूपां कामकलां विलिख्य ऐं ह्रीं श्रीं श्रीपरदेवताया विशेषाधारमण्डलाय नमः इतिम
ण्डलं संपूज्य ४ नमोंतमूलेन त्रिकोणाग्रकोणे ४ प्रथमकूटं नमः वामे ४ द्वितीयं नमः दक्षिणे ४ तृतीयं नमः इति त्रिको
णं प्रादक्षिण्येन संपूज्य षट्कोणकोणेषु प्रादक्षिण्येन स्वाग्रमारभ्य मूलकूटत्रयस्य द्विरावृत्त्या पूजयित्वा चतुरस्रे प्राग्वत् षडं
गानि संपूज्य चतुरस्रे स्वाग्रादि चतुर्दिक्षु मध्ये च प्रादक्षिण्येन ४ स्रूं गगनरत्नाय नमः ४ स्र्लूं स्वर्गरत्नाय नमः ४ म्रूं मर्त्य
रत्नाय नमः स्रूं पातालरत्नाय नमः म्लूं नागरत्नाय नमः इति पंचरत्नानि संपूज्य पुनः षट्कोणेषु स्वाग्रादि प्रादक्षिण्येन न्या
सोक्तषडंगमंत्रानि संपूज्य चतुरस्रवृत्तषट्कोणत्रिकोणेषु ४ कामरूपपीठाय नमः ४ जालंधरपीठाय नमः ४ पूर्णगि
रिपीठाय नमः ४ उड्याणपीठाय नमः इति पीठचतुष्टयं संपूज्य शांभवदीक्षावांच्छेत चतुरस्रे स्वाग्रादि चतुर्दिक्षु मध्ये च पंच
प्रणववृत्तिभिः प्रणवपंचकैः पूजयेत् तद्यथा ऐं क्लीं श्रीं हसखफ्रें ह्सौः ऐं ह्सौः हसखफ्रें श्रीं क्लीं ऐं नमः एवं ५ क्लीं ५ नमः ५
श्रीं ५ नमः ५ हसखफ्रें ५ नमः ह्सौः ५ नमः इति संपूजयेत् तत्र मूलसर्वशक्तिमयीं श्रीपरदेवतायाः पीठचतुष्टयात्मकाधमण्ड

लायनमः इति समस्तमण्डलं संपूज्य तत्र मूलेन प्रक्षालितमाधारं गृहीत्वा ओं श्रीपरदेवताया विशेषार्घ्याधारं स्थापया
मीति मंडलोपरि संस्थाप्य ॥ प्रथमकूटमुच्चार्य ॥ मं वह्निमण्डलाय धर्मप्रद दशकलात्मने श्रीपरदेवताया विशेषार्घ्य
पात्राधाराय नमः इत्याधारं संपूज्य तदुपरि धूम्रादि दशकलाः इहागच्छत आगच्छत इति वह्नेर्दशकलाः समावाह्य तासां प्रा
णप्रतिष्ठां कुर्यात् तत्र सर्वासां प्राणप्रतिष्ठामंत्रेण मम पदस्थाने धूम्रार्चिरादीनामिति पदं निक्षिप्य प्राणप्रतिष्ठामं
त्राधारं स्पृशन् पठेदिति प्राणप्रतिष्ठां धारय ॥ यं धूम्रार्चिषे नमः ॥ रं ऊष्मायै ॥ लं ज्वलिन्यै ॥ वं ज्वालिन्यै ॥ शं विस्फु
लिङ्गिन्यै ॥ षं सुश्रियै ॥ हं कपिलायै ॥ लं हव्यवाहायै ॥ क्षं कव्यवाहायै इति संपूज्य सुवर्णादिरचितपात्रमस्त्रेण प्रक्षाल्य ॥ श्री
परदेवताया विशेषार्घ्यपात्रं संस्थापयामीति तत्र संस्थाप्य ॥ द्वितीयकूटमुच्चार्य अं सूर्यमण्डलायार्थप्रद द्वादशकला
त्मने श्रीपरदेवताया विशेषार्घ्यपात्राय नमः इति पात्रमध्ये संपूज्य सूर्यमण्डलं विभाव्य पूर्ववत्तां च रक्तां तं संपूज्य तत्रै
व पूर्वप्रणवैरभ्यर्च्य तत्र सूर्यस्य द्वादश कलाः प्राग्वत्समावाह्य प्राग्वत्तन्नाममनुरस्य तासां प्राणप्रतिष्ठां विधाय हृन्म
कारेण प्रादक्षिण्येन ताः पूजयेत् तद्यथा ॥ कं भं तपिन्यै नमः ॥ खं बं तापिन्यै नमः ॥ गं फं धूम्रायै नमः ॥ घं पं मरीच्यै न
मः ॥ ङं नं ज्वालिन्यै नमः ॥ चं धं रुच्यै ॥ छं दं सुषुम्णायै ॥ जं थं भोगदायै ॥ झं तं विश्वायै ॥ ञं णं बोधिन्यै ॥ टं ढं धारिण्यै ॥ ४
ठं डं क्षमायै इति संपूज्य कलशस्थं जलमुद्धरणपात्रेण हृत्पूलविद्यां तौ चेलोममातृकामुच्चरन् तत्पात्रमापूर्य तत्रा
त्रादिकं निक्षिप्य पंचमितं गुह्यानामिकाभ्यां पुष्पेण तत्पात्रस्थजलमालोड्य तन्मुखं निरस्य क्लीमिति चंदनागुरुकर्पूररोच
रक्तकुंकुमरोचनाजटामांसीशिलारसात्मकगंधाष्टकपंकलोलितं चंदनादिपंकलोलितं वा पुष्पं निक्षिप्य सौरिति गा
लिनीमुद्रया निरीक्ष्य ॥ तृतीयकूटं उं सोममण्डलाय कामप्रद षोडशकलात्मने श्रीपरदेवताया विशेषार्घ्यामृताय नमः ॥

इति पात्रस्य जलमध्ये संपूज्य तत्र शर्वोक्तं मण्डलं विभाव्य शर्ववन्तं चरन्तं तं संपूज्य श्रीं भवदीत्तायुक्तं सत्वेन मध्ये च पंचप्रणवैः
पूजयेत् ततस्तत्र सोमस्य षोडश कलाः प्राग्वत्समावाह्य प्राग्वन्नामपुरस्सरं तां प्राणप्रतिष्ठां विधाय हृन्नाकारेण स्वा
ग्रादि प्रादक्षिण्येन ताः पूजयेत् तद्यथा ४ अं अमृतायै ४ आं मानदायै ४ इं पूषायै ४ ईं तुष्ट्यै ४ उं पुष्ट्यै ४ ऊं रत्यै ४ ऋं
धृत्यै ४ ॠं शशिन्यै ४ लृं चंद्रिकायै ४ ॡं कान्त्यै ४ एं ज्योत्स्नायै ४ ऐं श्रियै ४ ओं प्रीत्यै ४ औं अंगदायै ४ अं पूर्णायै ४
अः पूर्णामृतायै इति संपूज्य पूजितमण्डलमध्ये त्रिकोणमकथादि त्रिरेखं विभाव्य तत्कोणत्रये मूलविद्यायाः कूट
त्रयं मध्ये अस्य विदो कामकलां तत्पार्श्वयोः सविंदू हदौ तत्पृष्ठे लकारं तत्पार्श्वयोः हंसः वर्णान् विभाव्य पुष्पाक्षतैः गर्हि
तां योनिमुद्रां बध्वा गुरूपदिष्टप्रकारेण मूलाधारकुण्डलिनीमुत्थाप्य षट्चक्रभेदक्रमेण सुषुम्णावर्त्मना ब्रह्मरंध्रस्थ
विच्चंद्रमण्डलं संभूतमशेषरसं सम्भृतं आपतितं महापात्रे पीयूषरसमावहेत् ऐं ह्लीं ह्रौं जूं सः अमृते अमृतोद्भवे अमृते
श्वरि अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहा इति तस्मिन्नर्घामृते पुष्पाक्षतप्रक्षेपेण तदमृतधारां संयोज्य वमिति धे
नुमुद्रां प्रदर्श्य ऐं क्लीं हंसः सोऽहं स्वाहा इत्यष्टाक्षरमंत्रेण त्रिरभिमंत्र्य पुनरुच्चार्य आत्मशक्तिश्रीपादुकां पूजयामीति ज
लमध्ये संपूज्य पुनः प्रणवेन त्रिरभिमंत्र्य पुनः मुच्चार्य मातृकासरस्वती श्री॰ इति जलमध्ये संपूज्य मूलतार्तीयखण्डेन
त्रिधाभिमंत्र्य पुनस्तार्तीयकूटमुच्चार्य त्रिपुरामृतेश्वरी श्री॰ इति जलमध्ये संपूज्य हसक्षमलवरयूं सहक्षमलवरयीं इत्या
नंदभैरवमिथुनविद्याभ्यां त्रिरभ्यमंत्र्य ४ हसक्षमलवरयूं आनंदभैरवाय वौषट् आनंदभैरवश्रीपादुकां पूजयामि तर्पया
मि नमः इति त्रिः संपूज्य संतर्प्य सहक्षमलवरयीं सुधादेव्यै वषट् सुधादेवी श्री॰ इति संपूज्य संतर्प्य ह्रीं वरुणाय नमः स्त्रीं वा
रुणीदेव्यै नमः इति वरुणमिथुनविद्याभ्यां त्रिरभिमंत्र्य ४ पुनः पृथगुच्चार्य वरुण श्री॰ वारुणीदेवी श्री॰ इति संपूज्य

संतर्प्य ततो बालया वर्तमाना षोडशानित्यामंत्रैश्च सकृत्सकृदभिमंत्र्य तद्वन्नित्याविद्यया तिथिनित्याविद्यया च पृथक्
पृथक् त्रिभिरभिमंत्र्य पराप्रासादपरामंत्राभ्यां मूर्द्धान्यायदीक्षितश्चेत् ह्सौः स्हौः इति मंत्राभ्यां त्रिभिरभिमंत्र्य ततश्चरणादि
दीक्षितश्चेच्चरणकुलयोगिनीविद्याभ्यां त्रिस्त्रिरभिमंत्र्य ततः सौरित्यनुत्तरपराविद्यया ईक्षितश्चेत्तया त्रिरभिमंत्र्य पूर्णा
भिषिक्तश्चेत्कामकलाविद्यया त्रिरभिमंत्र्य षडन्वयशांभवतादीक्षायुक्तश्चेत्तद्विद्याभिस्त्रिभिरभिमंत्र्य ततो वर्तमा
णयां च भौतिकमंत्रैस्त्रिस्त्रिरभिमंत्र्य सृष्ट्यादिदशकला जलमध्ये समावाह्य प्राग्वन्न्यासपुरःसरं तासां प्राणप्रतिष्ठां वि
धाय वामदेव ऋषिर्जगती छंदः सूर्यो देवता ॐ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरस
दृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् इत्यनयर्चा सकृदभिमंत्र्य पुनरुद्धार्थं ब्रह्मणे नमः इति जलमध्ये सं
पूज्य कं सृष्ट्यै नमः इत्यादि प्राज्ञकलामातृकान्यासोक्तप्रकारेण कचवर्गकलाः संपूज्य । ततः टतवर्गास्य जरादिदशक
लाः समावाह्य प्राग्वन्न्यासं प्राणप्रतिष्ठां विधाय प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः यस्योरुषु त्रिषु विक्रम
णेष्वधिक्षियंति भुवनानि विश्वा इत्यनयर्चा सकृदभिमंत्र्य पुनरुद्धार्थं विष्णवे नमः इति संपूज्य टं जरायै नमः इत्यादिना
संपूज्य पुनः पयवर्गास्य कलास्तीक्ष्णाद्याः समावाह्य प्राग्वन्न्यासं प्राणप्रतिष्ठां विधाय त्र्यंबकमंत्रस्य वसिष्ठ ऋषिरनुष्टुप् छं
दः त्र्यंबकरुद्रो देवता ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् इत्यभिमंत्र्य पुनरुद्धा
र्घरुद्राय नमः इति संपूज्य पं तीक्ष्णायै नमः इत्यादिभिः संपूज्य पुनः षकारादि हकारांतपंचवर्णास्य पीतादि पंचकलाः समा
वाह्य प्राग्वन्न्यासं प्राणप्रतिष्ठां विधाय विष्णुर्योनिं कल्पयत्विति मंत्रस्य त्वष्टा गर्भकर्ता ऋषिः अनुष्टुप् छंदः श्रीविष्णुर्देवता सदा
शिवपूजार्थे विनियोगः ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते इत्यभिमंत्र्य

पुनरुच्चार्य सदाशिवाय नमः इति जलमध्ये संपूज्य अग्निहुतये नमः इत्यादिना संपूज्य मातृकयाद्विरभिमंत्र्य पुनरुच्चार्य मातृ
कासरस्वती श्रीं इति संपूज्य ऐं अमृतेश्वरीं करमानंदकरे परस्वधात्मनि। स्वच्छंदस्फुरणामत्र निधेह्यकुलरूपिणी। इत्यनेन त्रि
रभिमंत्र्य ह्रीं अकुलस्थामृताकारे सिद्धिज्ञानकरे परे अमृतत्वं निधेह्यस्मिन्वस्तुनि क्लिन्नरूपिणी इति त्रिभिरुभिर्मंत्रैः सौः ता
द्रूप्येण करसत्वेदत्वार्थं तत्वार्थं तत्स्वरूपिणि भूत्वा परामृताकारे मयि चित्स्फुरणं कुरु इति च त्रिरभिमंत्र्य ऐं प्लूं श्रौं जूं सः
अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय २ स्वाहा। इत्यमृतेश्वरीविद्यया च तत्र वीरमभिमंत्र्य पुनस्तामु
च्चार्य अमृतेश्वरि श्री। इति सकृत्संपूज्य ततः ऐं वद वद वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदिनि क्लेदय २ महाक्षोभं कुरु २ क्लीं सौः
मोक्षं कुरु २ सौः ह्सौः इति दीपनीविद्यया पंचवारमभिमंत्र्य तत्र तत्र मूलविद्यया रक्षां योजयित्वा तन्मध्ये चतुरस्रं पश्चि
धारं विचिंत्य तद्बाह्यपार्श्वयोः कुलः वटुकनाथ तद्वत् मां वा श्री। इति दक्षिणवामयोः संपूज्य तदंतः प्राग्वत्प्रकाशनानि स
पूज्य तन्मध्यप्रविधिस्थस्य बिंदुमध्ये कामकलायां वक्ष्यमाणप्रकारेण देवीमावाह्य ध्यात्वा षडंगन्यासयोगेन सकलीकृ
त्य गंधादिभिः संपूज्य वक्ष्यमाणविधिना देव्यंगे लयांगं संपूज्य तिथिनित्याः षोडशनित्या गुरुपंक्तित्रयं षडंगयुवतीश्च सं
पूज्य वक्ष्यमाणसमष्टियोगिनीमंत्रेण त्रिःसकृद्वा पुष्पांजलिं दत्वा धूपदीपौ निवेद्य योनिधेनुमुद्रायोनित्रिशिखापद्मसंक्षो
भद्राविणाकर्षवश्योन्मादमहांकुशखेचरीबीजयोनिमंत्रेण त्रिःसकृद्वा पुष्पांजलिं दत्वा पाशांकुशधनुर्बाणाख्या अष्टा
दशमुद्राः प्रदर्श्य नमस्कारमुद्रया प्रणमेत्। अत्र एतावत्कर्तुमशक्तश्चेत् अभिमंत्रेण पूजनयोरन्यतरत्कुर्यात्। अत्रा
प्यशक्तश्चेत् आत्माष्टोत्तरपूजां तेन कृत्वा आनंदभैरवमिथुनं तेन संपूज्य से तर्पणस्य स्थापादिकलापूजामारभ्य शेषं प्राग्व
त्समापयेत्। इति विशेषार्घस्थापनविधिः तत्रस्तनमुरतस्तेनैव विधिना श्रीपात्रात्स्वं पात्रांतरे स्थापयेत्। तेन मूलदेवमति

ङ्गावरणदेवतास्तर्प्पयेत् पूजासमर्प्पणादिकं मूलदेव्यास्तर्प्पणं च विशेषार्घ्येणैव तत्रानंगकुसुमादिपर्य्यन्तमा
वरणत्रयपूजासमर्प्पणमर्घ्यदानं च सामान्यार्घजलेनैव कुर्य्यात् इति श्रीपात्रस्थापनविधिः ततस्तदनुक्रमेणैव तत्
द्यः पंक्त्याकारेण पाद्याचमनीयमधुपर्कार्थं पात्रत्रयं शुद्धजलेनापूर्य्य तत्तृतीयं मधुपर्कद्रव्येण पूर्य्य तेषु विशेषार्घ्यज
ले किंचित्किंचिद्दत्त्वा मूलविद्यया पृथक्पृथक् अष्टवारमभिमंत्रयेत् मधुपर्कं तु कांस्यपात्रे प्रशस्तं ताम्रपात्रवर्ज्जमस्य
द्वापात्रांतरेणाच्छादितं कुर्य्यात् गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वाः सामान्यार्घे निक्षिपेत् पाद्यपात्रे श्यामा
कतण्डुलदूर्वाकमलापराजिताः पुष्पश्रीरोचनाद्यष्टाष्टकं निक्षिपेत् आचमनीयपात्रे जातीफललवंगकक्कोल
चूर्णानि निक्षिपेत् उक्तद्रव्याभावे तत्तद्द्रव्यभावनया तण्डुलानि क्षिपेत् मधुपर्कपात्रे दधिमधुघृतानि निक्षिप्य विशेषार्घ्यबिं
दुना संस्कुर्य्यात् दध्याद्यलाभे जलेनैव तद्भावनया पूरयेत् ततः स्वदक्षिणाग्रे पाद्यादिपात्रविधानेनैव पुनराचमनीयपात्रं
मपि स्थापयेत् अत्राप्यशक्तौ पाद्यादित्रयमेकस्मिन्नेव पात्रे दद्यात् ततः स्वगुरुमुखादवगतविनियोगविधौ पात्रचतुष्ट
सामान्यार्घविधिना प्रोक्षणीपात्रात्पुरतः स्थापयेत् तेषां नामादिगुरुपात्रं शक्तिपात्रं वटुकपात्रमात्मपात्रं चेति गुरुपादु
काविद्यया शक्तिपात्रं वटुकपात्रं तन्मंत्रेणात्मपात्रमात्माष्टाक्षरमंत्रेण चेति तत्तन्मन्त्रमष्टधाभिमंत्रयेत् ततः प्रोक्ष
णीपात्रोदकेन पार्श्वतो गृहीतेन ऐं ऐं क्लीं श्रीं ऐं प्रथमकूटमुच्चार्य्य आत्मतत्त्वात्मने नमः ४ क्लीं द्वितीयविद्यातत्त्वात्मने
नमः ४ सौः तृतीयं शिवतत्त्वात्मने नमः ४ ऐं क्लीं सौः समस्तमूलमुच्चार्य्य सर्वतत्त्वात्मने नमः इति स्वात्मानं प्रोक्ष्य
न्मूलेन यागभूमिं यागोपकरणानि च श्रीचक्रं च प्रोक्ष्य सर्ववस्तुषु धेनुमुद्रां प्रदर्शयेत् इति अर्घपात्रादिस्थापनविधिः

अत्र श्रीपात्रस्थापनाशक्तो विशेषार्घ्येणैव श्रीचक्रपूजादिकं कुर्यात् अथ संक्षेपतः पात्रासादनप्रयोगः तत्र स्ववामभागे चंदनादिना
त्रिकोणषट्कोणवृत्तचतुरस्रात्मकं मण्डलं विलिख्य तत्र पीठचक्ररूपात्मक श्रीपरदेवतायाः कलशाधारायनमः इति संपूज्य
तदुपरि आग्नेयादि प्रादक्षिण्येन प्राग्वद्धूम्रार्चिरादि दशकलाः संपूज्य तत्रास्त्रप्रक्षालितं सुधूपितं कलशं संस्थाप्य अं वसुप्रदद्वाद
शकलात्मने सूर्यमण्डलाय श्रीपरदेवतायाः कलशपात्रायनमः इति संपूज्य कलशोपरि प्रादक्षिण्येन तपिन्यादि द्वादशकलाः सं
पूज्य तस्मिन् त्रयिकारभेदेन विहितं द्रीराज्यमद्यासवाद्यन्यतमं गंधपुष्पयुक्तं पात्रे पुष्पाक्षतयुक्तं तद्द्रव्यं मूलविद्यासहितविलोमानुलोममातृ
कामुच्चरन्नापूर्य तत्र षडंगं युवतीगुरुपंक्तित्रयषोडशनित्यातिथिनित्यारत्नेश्वरीः संपूज्य उं सं कामप्रदषोडशकलात्मने सो
ममण्डलाय श्रीपरदेवतायाः कलशामृतायनमः इति च संपूज्य प्रागादि प्रादक्षिण्येन अमृतादि षोडशकलाः संपूज्य तं
दमृतं परब्रह्ममयं संचिन्त्य उद्धरणीसहितपिधानं पात्रेणाच्छाद्य सूक्ष्मवस्त्रेण समाच्छादयेदिति कलशस्थापनविधिः
अन्यानि पात्राणि एतद्रीत्या तत्तन्मंत्रैः स्थापयेत् इति संक्षेपः ॥ ॥ इति श्रीविद्यार्णवे नवमाश्वासः ९ ॥
अथात्मपूजा तत्र स्वपुरतस्त्रिकोणमण्डले साधारं पात्रं संस्थाप्य कलशोदकेनापूर्य विशेषार्घ्यबिंदुं दत्वा स्वदेहं च
दनादिरलंकृत्यात्मानमिष्टदेवतारूपं ध्यायन् गुरुगणपतिपरदेवताः प्रणम्य मूलाधारादि ब्रह्मरंध्रपर्यंतं प्राग्व
त्कुण्डलिनीं ध्यात्वा तद्रूपिणीं मूलविद्यां परिभाव्य तत्तेजसा परिणतं स्वेष्टदेवतारूपं स्वदेहं भा
वयन् आत्मपूजां कुर्यात् प्राणक्रियोगपीठन्यासरीत्या स्वदेहं योगपीठत्वेन विभाव्य हृत्कमलकर्णिकायां श्रीच
क्राधिरूढां श्रीपरदेवतां विभाव्य वक्ष्यमाणक्रमेण षोडशोपचारैराराध्य पुष्पांजलिपंचकं स्वदेहे समर्प्य धूपदीपोति

वेद्यान्तर्हवनं कुर्यात् तत्र मूलाधारे च संज्ञं एवं विभाव्य तन्मध्ये कालाग्निमेव कामाग्निं वासनारूपेन्धनप्रज्वलितं प्राणादि
पञ्चवायुभिः संधुक्षितं कुण्डलिनीरूपपरदेवताधिष्ठितं चिदग्निमण्डलं विभाव्य प्रणवत्रितारादिमूलविद्यान्ते धर्माधर्महवि
र्दीप्ते आत्माग्नौ मनसा स्रुचा· सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं इदं जुहोमि स्वाहा· इति पुण्यपापक्रमात् हुत्वा संकल्प
विकल्पधर्मात्मकं हविः समस्तं समाहृत्य हुत्वा ततः प्रणवत्रितारादिमूलविद्यान्ते प्रकाशामर्शहस्ताभ्यामवलम्ब्योन्मनी
स्रुचा· धर्माधर्मकलास्नेहं पूर्णं वह्नौ जुहोम्यहं अथ पूर्णं जुहोमि स्वाहेति पूर्णाहुतिं दत्वा निरस्तनिखिलप्रपञ्चो निष्कलस्व·
स्वरूपसाधकः क्षणं तिष्ठेत् ततो देवीरूपमात्मानं ध्यात्वा श्रीगुरुपादुकां प्रणम्य शिरस्यन्तः पूर्णं ध्यात्वा तद्विद्यां यथा
शक्ति जपित्वा समर्प्य प्राणायाम[illegible]करषडङ्गन्यासं कृत्वा मूलविद्यामष्टोत्तरशतवारं जपित्वा जपं समर्प्य स्तुत्वा प्रणमेदित्यालस्य
ना आद्यशक्तिशोधनं तत्र कर्मभावचक्रमध्ये· अदीक्षितकुलस्त्री[illegible]विहितानि· प्रजायते· बलाद्वा यत्नतो वापि अभिषेकं स
माचरेत् आदौ बालां समुच्चार्य त्रिपुरायै समुच्चरेत् नमः शब्दं समुच्चार्य स्मोद्धा शक्तिं ततो वदेत् पवित्रं कुरु शब्दान्ते मम शक्तिं
कुरु प्रिये वह्निजायां समुच्चार्य शुद्धिमेवः स्मरेत्पुरि तस्याः कर्णे भवेद्बुद्ध्या मायाबीजं समुच्चरेत् इति शक्तिशोधनं ततः शोधित
द्रव्यं तत्रार्घ्ये निक्षिपेत् तथाह श्रीचक्रक्रमे· सर्वशोधितद्रव्यं तु गृहीत्वैव च संक्षिपेत् स्वतन्त्रे· अर्चयेद्द्रव्यमर्घ्यपात्रेति: क्षिप्यमयतः स
धीः कुण्डगोलोद्भवं द्रव्यं स्वयंभूकुसुमं तथा अर्घ्यं दत्वा महेशानि सर्वसिद्धीश्वरो भवेत् स्वयम्भ्वाद्यर्घ्यदानेन योगिनीनां
भवेत्प्रिये महायोगी भवेद्देवि पीठप्रत्तालितेनालैः भैरवतन्त्रे· पञ्चमात्परं नास्ति शाक्तानां स्वर्गमोक्षयोः केवलैः
पञ्चमैर्वापि सिद्धो भवति साधकः इति· तथा· पूजयेद्यथावत् क्रमध्येमण्डकमध्यतः कालाग्निरुद्रमाधारशक्तिं कूर्म
मनन्तरं वाराहं पृथ्वीकंदं सनालं केसराणि च पद्मचक्रकर्णिकां चैव मण्डलं च समर्चयेत् धर्मं वैराग्यमैश्वर्यं ज्ञानं

मज्ञानमेवच॰ अनेनस्वर्णमयेवैराग्यमथर्ममपिपूजयेत् ज्ञानविद्यात्मकंचैवमात्मनश्चापिपूजयेत् गंधपुष्पाक्षतादीनिदत्वातत्रनि
धापयेत् तदोपरिकुलंस्थाप्यपूजानुष्ठानमेवच॰ पूजयेच्चततस्तस्मिन्पंचकामान्समाहितः ओंकारादिनमोंतेश्चकुसुमैर्गंधसं
युतैः अर्चयित्वाचतान्दिव्यान्पूजयेत्कुलनायकं वाग्भवंकामराजंचह्रींबीजंकामराजकं ब्लूमात्मकंततोदत्वाआधारशक्तिमुद्ग
रेत् श्रीपादुकांततोदत्वापूजयामिपदंततः अनेनमनुनातस्याललाटेतुमनोहरं त्रिकोणंतत्रसंलिख्यसिंहराघवरानने॰
उत्तरतंत्रे॰ तस्यामूर्द्धित्रिकोणंचमंत्रमालिख्यसाधकः महाप्रेतासनेमध्येबालांचपूजयेत्ततः ह्सौः सदाशिवमहाप्रेतप
द्मासनायनमः इतिपूजयेत् कुलार्णवे॰ गणेशंचकुलाध्यक्षंदुर्गांलक्ष्मींसरस्वतीं त्रिकोणेषुततःपूज्यवसंतंमदनं
प्रिये स्तनयोः पूजयेत्पश्चात्स्रवेत्तस्याः सुधाकरं उत्तरतंत्रे॰ मौलौगणेशंकेशाग्रेकुलाध्यक्षंललाटके॰ दुर्गांभ्रुवोर्म
ध्येलक्ष्मींरसनायांसरस्वतीं॰ इति ज्ञानार्णवे॰ दक्षपादादिमूर्द्धांतंवाममूर्द्धादिसुंदरि॰ पादांतंपूजयेत्सर्वाःकलावैका
मसोमयोः श्रद्धाप्रीतिरतिश्चैवेत्यादिमातृकाश्चापिसंदृश्याः उत्तरतंत्रे॰ स्वरैरेवंप्रपूज्याहिसर्वकार्य्यार्थसिद्धये ललि
तातंत्रे॰ भगेतदीपविज्ञेयानाड्यस्तिस्रःप्रवाहिकाः एकातत्रवाहिकाचांद्रीसौरीचान्यातुवाहिका॰ आग्नेयीचपरात्रेया
पूजयेत्तास्तुसाधकः अमृतंस्रवतिचांद्रीसापुष्पंस्रवतिभानवी॰ बीजंस्रवतिचाग्नेयीतासुनामभिरर्चयेत् वाग्भवा
द्यैर्नमोयुक्तैः पूजयेत्तुप्रसन्नधीः उत्तरतंत्रे॰ पूजयेन्मदनागारेरक्तचंदनचर्चिते॰ भगमालामनुंप्रोच्यत्रितारांतेतरत
था॰ ऐंक्लींश्रींऐंजंब्लूंक्लिन्नेततःपरं॰ सर्वाणीतिभगानीतिवशमानयमेततः ह्सौःक्लींब्लैंक्लींब्लूंभगमालिन्यैनमः ऐंह्रीं
श्रींमितिमंत्रेणगंधाद्यैस्तांसमर्चयेत् इहागच्छावाहनेनात्रिजीवन्यासोमहेश्वरि॰ अथैवंचविधानेनतांषोडशोपचारकैः
इष्टदेवींप्रपूज्याथसर्वसिद्धीश्वरोभवेत् अर्चयेत्पंचपुष्पाद्यैःस्वशिवंतदनंतरं मूलमंत्रंततःचोंनमःशिवायततःपरं

यजेत्तन्मुखाचारसंघोज्ञानादिसंकेतकैः तारं च शांभवीतां च तदंगे तदनंतरं समयविद्यामुच्चार्य त्रिकोणं चैव पूजयेत् उत्तर
तंत्रे॰ अवधूतेश्वरीकुब्जिकामातंगीसमयामपि॰ वज्रेश्वरीकालिकां च तथा दिक्करवासिनीं महाचंडेश्वरीं तारां पूजयेत्तत्र
साधकः तदनुज्ञां ततो लब्ध्वा दत्वा तां हलमेव च शिवं वदति चेति त्रिपञ्चगजनत्रेशाख्यमनुद्वया॰ धर्माधर्मौ हविर्दीप्तमात्माग्नौ म
नसा स्रुचा॰ सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहान्तोयं महामन्त्र आरंभे परिकीर्तितः ततो जपेत्त्रियंगकल्पविद्या
त्रिभुवनेश्वरी प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचा धर्माधर्मकलास्नेहपूर्णमग्नौ जुहोम्यहं स्वाहान्तोयं महामंत्रः
सुकृत्यागे प्रकीर्तितः ज्ञानार्णवे॰ शिवशक्तिसमायोगो योग एव न संशयः सीत्कारो मंत्ररूपं च नस्तवनं भवेत् आलिंगनं
तु कस्तूरीकर्पूरं चुंबनं भवेत् नखदंतक्षतादीनि पुष्पाणि विविधानि च मैथुनं तर्पणं विद्धि वीर्यपातो विसर्जनं कुलार्णवे॰
आलिंगनं चुंबनं च स्तनयोर्मर्दनं तथा दर्शनस्पर्शनं योनेर्विकारो लिंगघर्षणं॰ प्रवेशस्थापनं शक्तेर्नव पुष्पाणि पूजयेत् याम
ले संयोगाज्जायते सौख्यं परमानंदलक्षणं कुलामृतं प्रयत्नेन रक्षणीयाद्दुर्लभं नरः तेनामृतेन दिव्येन सर्वतत्त्वं भवेत् हि॰
यत्काममुक्ते मैथुनेन लक्षणं देवि सिद्ध्यति॰ ज्ञानार्णवे॰ कुलद्रव्यं च संशोध्य शिवशक्तिमयं प्रिये॰ बीजामृतेन परं ब्रह्म जपंति त्रिपु
रसुंदरि अर्चयाद्यामृतैर्यस्तु निर्विकल्पः सदानघः श्रीविद्याक्रममाश्रित्य परे ब्रह्ममयो भवेत् इति ते कथितं ज्ञानं मासरस्यव
रानने॰ सविकल्पस्तु सततं पापभाग्जायते नरः विचिकित्सापरो मंत्री जायते गुरुतल्पगः अतएव वरारोहे निर्विकल्पः स
दा भवेत् कुलार्णवे॰ कुलामृतं समादाय तदर्चेत् त्रिपुरां बुधः तदर्घेण समाराध्य पूजाशेषं समापयेत् शोधितस्य कुला
मृतस्य शोधनमंत्रस्तु॰ श्रीक्रमे॰ ओं अमृते अमृतोद्भवे अमृतवर्षिणि प्रिये॰ देवि पदं स्फुरत् शापप्रमोचय पदद्वयं अमृतं स्रा

वि·
या·व·
१२६

126

वयहंढंग्रसंतेकरयुग्मकं स्वाहापदं ततोदेवि मुक्तहस्तिर्भवेत्प्रिये· मुक्तैरक्षतनतएलैः सुगंधिकुसुमैर्युतैः अर्चयेद्देवमुद्रेवेशि
योनौ देवीं प्रपूजयेत् उत्तरतंत्रे· धूपदीपैश्च नैवेद्यैर्विविधैः कुलसाधकः विधायवंदितांतां च नत्वा द्विहंस पंचरेत् शिवागमे च अ
तिवारशान्त्युच्छिष्टं पिबेच्च कृष्णरोयदि· घोरं च नरकं याति कुलमार्गात्पतेद्ध्रुवं तस्माद्धि वार्य्ययत्नेन शान्त्युच्छिष्टं पिबेत्सुधीः आ
नंदकारये हारस्तेन निर्भ्रांतिनः पिबेत् इति संक्षेपतः शक्तिशोधनं विशेषस्तत्र प्रयोगविधौ वक्ष्यते· अथपीठपूजाप्रयोगस्तत्र·
तत्रादौ टंकेन श्रीचक्रमभ्युक्ष्य समानपीठोपरि ४ गुरुपादुकाविद्यामुच्चार्य श्री अमुकानंदनाथ श्रीपादुकां पूजयामीति संपू
ज्य दक्षिणे गणपतिं श्रीः इति संपूज्य सर्वाधस्तादारभ्यानलादि समपानालाभावनयोपर्युपरि ४ मण्डूकायनमः ४ कालाग्निरु
द्रायनमः मूलप्रकृत्यै· आधारशक्तये· कूर्माय· वाराहाय· अनंताय· पृथिव्यै· अमृताम्भोधिनिधये रत्नद्वीपाय· नानावृक्षम
होद्यानायनमः कल्पवृक्षवाटिकायै· हरिचंदनवाटिकायै· मंदारवाटिकायै· पारिजातवाटिकायै· पुष्परागरत्नप्राकाराय· पद्म
रागप्राकाराय· गोमेदरत्नप्राकाराय· इन्द्रनीलरत्नप्राकाराय· वज्ररत्नप्राकाराय· वैडूर्यरत्नप्राकाराय· माणिक्यमण्डपाय· स
हस्रस्तंभमंडपायनमः अमृतवापिकायै· आनंदवापिकायै· विमर्शवापिकायै· बालातपोद्गाराय· चंद्रिकोद्गाराय· महाशृंगा
रपरिखायै· महापद्माटव्यै· चिंतामणिगृहराजाय· पूर्वाम्नायपूर्वद्वाराय· दक्षिणाम्नायदक्षिणद्वाराय· पश्चिमाम्नायपश्चिम
द्वाराय· उत्तराम्नायउत्तरद्वाराय· रत्नदीपवलयाय· महासिंहासनाय· ततो महासिंहासने पंचप्रेतमयं ध्यात्वा तत्र वामे आदिको
चतुष्पद्यासनपादचतुष्टये हेतस्थितान्ब्रह्मविष्णुरुद्रेश्वरान्पीतश्यामसितार्कप्रभान् भोञ्जनभुंजानुपविष्टांस्तेषां स्कंधेषु संलग्नम
ञ्चानतत्पाणिनमदकृष्णीर्षसदाशिवं ध्यात्वा पूजयेत् तद्यथा· वायव्ये ४ लांपृथिव्यधिपतये ब्रह्मणेनमः ब्रह्मप्रेतासनश्री·

१२६

३ = सावायव्यादिकोणचतुष्टये धर्मादिचतुष्टयं तस्य पश्चिमादिचतुर्दिक्षु
अधर्मादिचतुष्टयं च पादादिरूपेण संपूज्य तन्मध्ये मायाविद्ये संपूज्य तत। ३ =

ईशाने। ४ वां अपामधिपतये विष्णवे नमः विष्णुप्रेतासनश्री। आग्नेये। ४ रां तेजोधिपतये रुद्राय नमः रुद्रप्रेतासनश्री।
नैर्ऋत्ये ४ वां वाय्वधिपतये ईश्वराय नमः ईश्वरप्रेतासनश्री। मध्ये ४ हंसौः वियदधिपतये सदाशिवाय नमः सदाशिव
महाप्रेतासनश्री। इति पंचप्रेतासनं संपूज्य तदुपरि पंचदशाक्षरविराजिताय अनंताय नमः इति संपूज्य तन्मध्ये मोला
वष्टदलकमलं कामेश्वरीपीठं ध्यात्वा पद्माय नमः इत्यादि परं तत्वानं संपूज्याष्टदलकेसरेषु मध्ये च मोहिन्यादि नवशक्तीर्योगपीठन्या
सोक्ताः संपूज्य न्यासोक्तपीठमंत्रेण समस्तपीठं संपूज्य तदुपरि श्रीचक्रं विभाव्य ४ समस्तप्रकटेत्यादि समष्टियोगिनीमंत्रेण सम
स्तचक्रं संपूज्य विंदुचक्रे ४ मः। ऐं ह्रीं क्लीं ऐं भगवति अंबे नित्ये कामेश्वरि ह्रीं सर्वसत्ववशंकरि सः त्रिपुरभैरवि ऐं विच्चे क्लीं श्रीं श्रीं महा
त्रिपुरसुंदर्यंबा श्री। इति शक्तिविद्ययावि: संपूज्य पुनर्मूलेन त्रिः संपूज्य श्रीचक्रं परत्रयात्मकं ध्यात्वा चतुरस्रत्रये षोडशदलात्मके
प्रथमचक्रे ४ प्रथमकूटमवाग्भवेश्वरीरात्मने नमः चतुर्दशारद्वयात्मके मध्यचक्रात्मके मध्यचक्रे ४ द्वितीयकूटात्मने नमः अष्टा
रत्रिकोणविंद्वात्मकांतश्चक्रे ४ तृतीयकूटात्मने नमः इति संपूज्य पुनर्वाह्यमध्यांतरभेदतः प्रोक्तक्रमेण कूटत्रयेण संपूज्य त
त्रामध्यचक्रत्रये अभ्यंतरत्रये च संपूज्य त्रिकोणचक्रस्य कोणत्रये मध्ये च पीठचतुष्टयं संपूज्य विंदुचक्रे महायोगपीठे हिरण्मय
सहस्रदलकमलाय नमः इति संपूज्य चतुरस्रपद्मद्वये च चतुर्दशारदशारद्वयाष्टारस्त्रिकोणविंदुचक्रेषु षडासनानि संपूज्य
चतुरस्रे ४ नादशक्तिश्री। षोडशदले विंदुशक्तिश्री। अष्टदले ४ कला[illegible]सर्वानंदाशक्तिश्री। इति नवशक्तीः संपूज्य। षट्त्रिंश
तत्वात्मकं श्रीचक्रं ध्यात्वा ४ अं ५। शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्यारागकलानियतिपुरुषप्रकृत्यहंकार
बुद्धिमनः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवाय्वग्निसलिलपृथिव्यात्मने श्री
महात्रिपुरसुंदर्यै योगपीठाय नमः इति समस्तपीठं पुष्पांजलिना संपूज्य तत उपरि मध्ये प्रसूननालिकां कल्पयामीति

= शक्तिश्री चतुर्दशारे [illegible] शक्तिश्री। दशारद्वये ४ [illegible] शक्तिश्री। अंतर्दशारे ४ वामाशक्तिश्री। अष्टकोणे विषघ्नीशक्तिश्री। त्रिकोणे ४ हृल्लेखा = ४

वि॰
पा॰ व
(१२८)
127

पुष्पांजलिः क्षिप्त्वा तदुपरि ऐं ह्रीं श्रीं महात्रिपुरसुन्दर्याः सकलचैतन्यानंदमयीं श्रीकामेश्वरकामेश्वरीमूर्तिं कल्पयामीति पुष्पादिम
देपेण ध्यानोक्तां मूर्तिं भावयन् शान्त्युत्थापनमुद्रां प्रदर्श्य मूलमन्त्रान्ते परसे कामेश्वरकामेश्वरीमूर्त्यै नमः इति कल्पितमूर्तिं पू
जयेत् द्वितीयोऽपि पीठपूजा॰ अथ श्रीचक्रपूजा॰ तत्र प्रथमं सत्सम्प्रदायकमले श्रीचक्रध्यानान्तं मध्ये देवीं ध्यायेत् ततो ध्यानं प्रवक्ष्यामि
त्रिदशैः सेवनीयकं॰ ततः पद्मनिभां देवीं बालार्ककिरणारुणां जपाकुसुमसंकाशां दाडिमीकुसुमप्रभां॰ पद्मरागप्रतीका
शां कुंकुमोदकसन्निभां स्फुरन्मुकुटमाणिक्यकिंकिणीजालमंडितां कालालिकुलसंकाशकुटिलालकपल्लवां प्रत्यग्रारुणसं
काशवदनाम्भोजमंडलां किंचिदर्द्धेन्दुकुटिलललाटमृडपट्टिकां पिनाकधनुराकारसुभ्रूलतां परमेश्वरीं आनंदमुदितोल्लास
लीलांदोलितलोचनां स्फुरन्मयूखसंघातविलसद्धेमकुण्डलां सुगंडमण्डलाभोगजितेन्दुमण्डलां विश्वकर्मादिनिर्मा
णसूत्रसुस्पष्टनासिकां॰ ताम्रविद्रुमबिंबाभरक्तोष्ठीममृतोपमां॰ दाडिमीबीजवद्राजद्दंतपंक्तिविराजितां॰ स्मितमाधुर्यवि
जितमाधुर्यरससागरां अनौपम्यगुणोपेतचिबुकोद्देशशोभितां कंबुग्रीवां महादेवीं मृणाललसितैर्भुजैः मणिकंक
णकेयूरमाराविधैः प्रशोभितां॰ रक्तोत्पलदलाकारसुकुमारकरांबुजां करांबुजनखज्योतिर्वितानितनभस्तलां मुक्ताहार
लतोपेतसमुन्नतपयोधरां त्रिवलीवलनायुक्तमध्यदेशसुशोभितां लावण्यकदलीतुल्यजंघायुगलमंडितां गूढगुल्फ
पदद्वंद्वप्रपदाजितकच्छपां॰ ब्रह्मविष्णुशिरोरत्ननिघृष्टचरणांबुजां तन्दीर्घांगुलाभास्वन्नविराजितां शीतांशुशतसंकाश
कांतिसंतानहासिनीं लौहित्यजितसिंदूरजपादाडिमरागिणीं रक्तवस्त्रपरीधानां पाशांकुशकरोद्यतां रत्नपुष्पनिविष्टां च
रक्ताभरणमंडितां चतुर्भुजां त्रिनेत्रां च पंचबाणधनुर्द्धरां॰ कर्पूरसकलोन्मिश्रताम्बूलापूरिताननां महामृगमदोद्दा
मकुंकुमारुणविग्रहां सर्वशृंगारवेषाढ्यां सर्वाभरणभूषितां जगदाह्लादजननीं जगद्रंजनकारिणीं॰ जगदाकर्षिणी

कंरीं जगत्कारणकारिणीं सर्वमंत्रमयीं देवीं सर्वसौभाग्यसुंदरीं सर्वलक्ष्मीमयीं नित्यां परमानंदनंदितां एवं ध्यायेत्परेशानीं
महात्रिपुरसुंदरीं एवं स्वहृदये तु ध्यात्वा मूलविद्यया शिरसि पुष्पांजलिं दत्वा पुनर्हृदयकमले यथोक्तरूपां भग
वतीं सांगां सावरणां ध्यात्वा देवीं मानसैरुपचारैः संपूज्य नैवेद्यं दत्वा भोजनावसरे नैवेद्यदेवं ऊर्ध्यात् तद्यथा ·
तत्र मूलाधारेष्वात्मांतरात्मपरमात्मज्ञानात्मेत्यादिचतुष्टयात्मकं चतुरस्रं कुंडं अग्निसमुज्ज्वलं कुंडं ध्यात्वा त
त्र श्रीदेवतां ध्यात्वा तन्मूले मूलविद्यांते अहंतां जुहोमि स्वाहा इत्यादि अहंतां संत्यज्य कामक्रोधलोभमोह
मदमात्सर्याणि सुषुम्णा सुपुष्पमनः स्वेनैव प्रत्येकं कृत्वा पुनर्हृदयकमले भक्तवतीं देवीं ध्यात्वा उत्तरापोशा
नादिसर्वोपचारैराराध्य मूलविद्यां यथाशक्ति जपित्वा जपं समर्प्य मूलविद्यया व्यापकं विन्यस्य विन्यस्य कराभ्यां पुष्पांज
लिमादाय मातृकां भोजनेन कल्पयित्वा त्रिखंडामुद्रां बद्ध्वा हृदि श्रीचक्रराजदेवीं यथोक्तरूपां सपरिवारां ध्यात्वा तद्रूपता
मापाद्यात्ममुद्रामयोगेण मूलाधारात्कुंडलिनीमुत्थाप्य तया सह षट्चक्रभेदक्रमेण हृदयं श्रीचक्रराजदेवीं यथोक्तस्वरूपा
णां मार्गेण ब्रह्मरंध्रे नीत्वा परतेजसे तेनामृतेन महाद्भुतं ध्यात्वा विश्रम्य शिवशक्तिसामरस्यमहत्वमनुभूय ॥ ह्सैं ह्सक
लरीं ह्सौः नमः श्रीमहात्रिपुरसुंदरि महापद्मवनांतस्थे कारणानंदविग्रहे सर्वभूतहिते मातरेह्येहि परमेश्वरि · प
रेहि देवदेवेशि त्रिपुरे देवि पूजिते · परामृतप्रिये शीघ्रं सान्निध्यं कुरु सिद्धिदे देवशिभक्तिसुलभ परिवारसमन्विते या
वत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव इत्यावाहनमंत्रमुच्चार्यार्घ्यं दत्वा साधु साधनात्रिखंडामुद्रामुद्रितकरस्य पुष्पांजलौ
तत्तेजः समानीय श्रीपादांतः कल्पितमूर्तेः शिरसि ब्रह्मरंध्रस्थाने सन्निवेश्य कामेश्वरांकस्थां सावरणां श्रीमहात्रिपुर

वि॰
पा॰ व॰
१२८

128

सुंदरीं सर्वावयवभावेन ध्यात्वा ध्मू॰ उच्चार्य श्रीमहात्रिपुरसुंदरि इह तिष्ठ तिष्ठेति स्थापनया मुद्रया संस्थाप्य तथैव इह सन्निधे
हि सन्निधेहीति सन्निधाय मुद्रया सन्निधाप्य पुनस्तथैव सन्निरुध्यस्व २ इति सन्निरोधिन्या सन्निरुध्य तथैव संमुखी भव २
इति तन्मुद्रया संमुखीकृत्य तथैव अवगुंठिता भव २ इति तन्मुद्रया अवगुंठ्य देव्यंगेषु षडंगविन्यासेन सकलीकृत्य तथैव धेनुमुद्र
या अमृतधारयाभिषिंचन् अमृतीकृत्य तथैव महामुद्रया परमीकृत्य आवाहन्यादि नव मुद्राः प्रदर्श्य ततो मूलविद्या सर्वांग
दीपनी विद्यां ककारादि ककारांतां मातृकां वोच्चार्य जलेन देवीं त्रिः प्रोक्ष्य श्रीं क्रों ह्रीं हं गणपकालिके म्रा सः सकल ह्रीं
क्लीं ह्रीं क्लीं श्रीं इति जीवन्यासविद्यया देव्या हृदयकमले जीवं संस्थाप्य प्राणप्रतिष्ठां कुर्यात् तत्र सर्वीकरणप्राणप्रतिष्ठामंत्रेण
देवीहृदये स्पर्शनं तन्मंत्रं त्रिः सकृद्वा पठेत् इत्येवं प्राणप्रतिष्ठां विधाय ततः संक्षोभद्राविणाकर्षणोन्मादमहांकुशखेचरी
बीजयोन्याख्य नव मुद्राः द्रां द्रीं क्लीं ब्लूं सः क्रों ह्स्ख्फ्रें ह्सौः ऐं इति प्रत्येकं बीजोच्चारणपूर्वकमेकैकां मुद्रां प्रदर्श्य आं क्रों भि
त्रिपाशमुद्रां क्रों क्रों इत्यंकुशमुद्रां धनुः इति धनुर्मुद्रां द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां सां इति दशभिर्बीजैर्बाणमुद्रां च प्रदर्श्य ध
मू॰ श्रीमहात्रिपुरसुंदरीपादुकां पूजयामीति देवीं संपूज्य पुनः ध मूलमुच्चार्य श्रीमहात्रिपुरसुंदरीपादुकां तर्पयामी
ति सव्यहस्तानामिकांगुष्ठाभ्यां विशेषार्घ्यबिंदुभिस्त्रिवारान् दत्त्वा मूलमष्टोत्तरसहस्रावधि यथाशक्ति श्रीपरदेवतामुख
कमले तर्पयित्वा आसनादिषोडशोपचारान् कुर्यात् तत्र मूलविद्यामुच्चार्य भगवति श्रीमहात्रिपुरसुंदरि तुभ्यमि
तिमासनं कल्पयाम्यशक्यं तां भवत्येति वा दर्शयापाश्चात्यामिकामुद्रां तेजस्वा य मूलेन पुष्पांजलिं दत्वा ततम मासनं कल्पयि
त्वा देव्या वामभागे निवेश्य सिंहासनपद्ममुद्रां प्रदर्श्य प्रणम्य अहं हं रं इदमिदमिदं गृहाण स्वाहेति प्रार्थनमुद्रया निवेदयन्

लेन पुष्पांजलिं दद्यात् ततो मूलमुच्चार्य श्रीमहात्रिपुरसुंदरि स्वागतमिति कुशलप्रश्नं कृत्वा स्वागतकुशलमुद्रे प्रदर्शयेत्
लेन पुष्पांजलिं दद्यात् ततो मूल॰ श्रीमहात्रिपुरसुंदरीपादुकायै अर्घ्यं कल्पयामि स्वाहेति देव्याः शिरसि सामान्यार्घ्या
किंचिज्जलमुत्सृज्य दद्यात् ततो निवेदनमंत्रेण निवेद्यार्घ्यमुद्रां प्रदर्श्य पुष्पांजलिं दद्यात् ततः पाद्यपात्राज्जलमुद्धृत्य ४
मू॰ श्रीमहात्रिपुरसुंदरीपादुकायै पाद्यं परिकल्पयामि नमः इति देव्याः पादयोः पाद्यं दत्वा प्राग्वन्निवेद्य पाद्यमुद्रां प्र
दर्श्य पुष्पांजलिं दद्यात् एवमाचमनीयं परिकल्पयामि स्वधेति मुखे॰ इति दत्वा तन्मुद्रे प्रदर्श्य ततः पुनराचमनीयपात्र
स्थशुद्धजलेन शुद्धाचमनीयं मुखे ततो रत्नपादुके उपनीय पादके परिधाप्य यावत् त्रिपुरे रत्ननिर्मिते॰ स्नानमण्डपमायाहि स्नाना
र्थं शक्तिदिग्गतमिति प्रार्थ्य रत्नपादुके परिधाप्य स्नानमण्डपं नीत्वा स्नानवस्त्रं परिधाप्य कनकासने समुपवेश्य प्राग्वदर्घ्यपाद्या
चमनीयानि दत्वा ४ मूलमुच्चार्य श्रीमहात्रिपुरसुंदरीपादुकायै स्नानीयं कल्पयामि नमः इति सुगंधितैलामलकादिस्ना
नीयद्रव्याणि परिकल्प्य प्राग्वन्निवेद्य महाराजोपचारवत् अभ्यंगोद्वर्तनकेशप्रसाधनानि विधाय गोमोदकेन निर्मलस्ना
नं कारयित्वा वैदिकपौराणिकमंत्रैः पंचगव्यैः पंचामृतेन च स्नापयित्वा पुनः शुद्धजलेन स्नापयित्वा इक्षुरसनारिकेलसलि
लपनसाम्रादिविविधफलरसैः कर्पूरादिसुवासितैः स्नापयित्वा पुनर्जलेनाभिषिच्य रत्नगणाभिः स्वर्णादिघटैर्नानाती
र्थोपहृतैः सलिलैः स्नापयित्वा प्राग्वत्पुष्पांजलिं दत्वा स्नानमुद्रां प्रदर्श्याचमनीयं कल्पयित्वा केशानामार्जनार्थं विस्त्रं दत्वा
जलप्रच्यवनं कारयित्वा नानारत्नखचितं रत्नकुंडलद्वयमिति प्रोद्य मूलेनाभिमंत्र्य बृहस्पतिदैवताभ्यां वासोभ्यां नमः इति
पूज्य ४ मू॰ श्रीमहात्रिपुरसुंदरीपादुकायै वाससी परिकल्पयामि नमः इति परिधाप्य वस्त्रमुद्रां प्रदर्श्य पुनराचमनीयं निवे
दनेन च पुष्पांजलिदानेन च कृत्वा पट्टसूत्रमयं स्वर्णादिरचितं वा कंठसूत्रं विष्णुदैवतायकं त्र्यम्बकाय नमः इति प्रजनेद्देव्यै समर्प्य

पवीतमुद्रां प्रदर्शयेत्॰ श्रीमहात्रिपुरसुंदरि॰ पादुके परिधायां वत्रिपुरे रत्ननिर्मिते॰ आगच्छ निर्मितं याम्यमलंकारस्य मण्ड-
पे इति प्रार्थ्यालंकारमण्डपं नीत्वा सिंहासने समुपवेश्यालंकारान्नुहृतो निधाय यवमिति प्रोक्ष्य मूलेनाभिमंत्र्य विसृदैवते-
भ्यो॰ लंकारेभ्यो नमः ˘ ˘ ˘ ज्यमुकुटललाटाभरणकर्णशरहारग्रैवेयकांगुलीयकप्रालंविकारत्नसूत्रांगदाव-
लीकर्णोत्तंसपार्श्वभूषणनावेद्यानांगुलिच्छदहृत्लेवाहुहारमध्यभारललंतिकांगदकेयूरवलयवज्रवेष्टमसीमंतिकाग-
णभूषणांघ्रभूषणनाभिभूषणरत्नमालामणिमेखलांघ्रिखलादंतरत्नकर्णिकनीवीरत्नजानुभूषणपादांगुली-
˘ ˘ ˘ ˘ ˘ ˘ ˘ ˘ ˘ मुद्रिकापंचकमिति चत्वारिंशाद्भिरन्यैश्च रत्नताटंकनानाविधैश्चालंकरणै-
रलंकृत्य सर्वं वन्निवेदनमंत्रेण निवेद्य पुष्पांजलिं दत्वा भरणमुद्रां प्रदर्शयेत् रत्नपादुके उपनीय धम्मः श्रीमहात्रिपुरसुंदरि॰
पादुकां पुण्यामहं तुभ्यं पंचवाद्यपुरःसरं यागमण्डपमायाहि परिवारगणैः सह॰ इति प्रार्थ्य छत्रचामरादिनानोपकरणहस्ता-
भिः शक्तिभिः सह यागमण्डपं नीत्वा कामेश्वरांके भगवतीं समुपवेश्य परिवारदेवता अपि यथास्थानं समुपवेशयेत्। ततः श्री-
चक्रमातृकाध्याये त्रिपुरसुंदरीमित्यादिप्रागुक्तरीत्या ध्यात्वा मूलेन पुष्पांजलिं दत्वा चंदनागरुकर्पूरकस्तूर्यादि गंधपंचकं
चूर्णधूपदाहजं संमर्दजं प्राण्यंगजमिति पंचविधं गंधं तद्गमंतमेवा प्रागवस्तोऽस्य विष्णुदेवता यगंधायनमः इति संप्रोक्ष्य धमूलं
श्रीमहात्रिपुरसुंदरीपादुकायै गंधं परिकल्पयामीति गंधं समर्प्य प्राग्वन्निवेद्य गंधमुद्रां प्रदर्श्य पुष्पांजलिं दत्वा सुगंध-
रूपाणि नानाविधपुष्पाण्यानीय प्रोक्ष्य वनस्पतिदेवताभ्यः पुष्पेभ्यो नमः इति संप्रोक्ष्य धमूलं श्रीमहात्रिपुरसुंदरीपादुका-
यै पुष्पाणि परिकल्पयामि वौषडिति पुष्पाणि निवेद्य पुष्पमुद्रां प्रदर्श्य पुष्पांजलिं दत्वा धूपग्राहिण्यां धूपमानीय प्रोक्ष्य धे-
नुमुद्रया अमृतीकृत्य ह्रीं स्हरभिंते जसे स्वाहा इति मंत्रेण दशांगं शार्करायुतं मिश्रितं गुग्गुलं यानि : दिव्यस्रोगंधर्वदेव

स्यायधूपायनमः इति धूपं संपूज्य ॥४॥ म्रं वनस्पतिरसोत्पन्नो गंधाढ्यो गंधउत्तमः । आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां श्री
महात्रिपुरसुंदरीपादुकायै धूपं परिकल्पयामि नमः इति धूपमंत्रं जप्त्वा धूपमुद्रां प्रदर्श्य वामभागे घंटां निधाय दक्षिणे
प्रोक्ष्य धेनुमुद्रयाऽमृतीकृत्य पुनरस्त्रेण घंटां दिग्भिः संपूज्य ओं जगध्वनिमंत्रमातः स्वाहेति घंटां मंत्रेणाभिमंत्र्य वामह
स्तेन वादयन् दक्षिणहस्तेन धूपपात्रं चालयन् नीचैर्धूपं निवेद्य तत्पात्रं देव्या वामभागे निधाय दीपपात्रं गोघृतेनापूर्य
तस्मिन् कर्पूरगर्भिणीं वर्तिं निः क्षिप्य क्लीमिति प्रज्वाल्य धेनुमुद्रयाऽमृतीकृत्य विश्वदेवस्याय दीपायनमः इति सं
पूज्य ॥४॥ म्रं· स्वप्रकाशो महादीपः सर्वत्रतिमिरापहः । सबाह्याभ्यंतरज्योतिर्दीपोयं प्रतिगृह्यतां श्रीत्रिपुरसुंदरीपा
दुकायै दीपं परिकल्पयामि नमः इति दीपमंत्रं जप्त्वा दीपमुद्रां प्रदर्श्य पात्रवन्निवेद्य घंटावादनपूर्वकमग्रे दीपं प्रदर्श्य तत्पा
त्रं देव्या दक्षिणभागे निवेश्य देव्यग्रे चतुरस्रमंडलं जलेन विधाय स्वर्णादिपात्रं नानाव्यंजनभरितं षड्रसोपेतं पंचविधनै
वेद्योपेतं तस्मिन्मंडले साधारं पात्रं निधाय मूलेन निरीक्ष्यास्त्रेण प्रोक्ष्य तेनैव क्रं प्रोक्षितः सतानासकवचेनाभ्युक्ष्यामृ
जूंसः चोषरित्यनेन समाभिमंत्र्य तेन जलेन पुनः प्रोक्ष्यास्त्रमंत्रेण चक्रमुद्रां प्रदर्श्याधोमुखवामकरेण नैवेद्यस्य
शानचक्रमिति वीजेन समयाभिमंत्र्य अनेन तदमृतीकृत्य मूलेन त्रिः प्रोक्ष्य षाढ्विंदुभिः प्रोक्ष्य विश्वदेवस्याय नैवेद्यायनमः इति
संपूज्यास्त्रेण संरक्ष्य मूलेन सप्तवारमभिमंत्र्य ओं क्लीं कामदुघे अमोघे वरदे विच्चे स्फर स्फुर स्त्रीं स्त्रीं प्रीं इति कामधेनुवि
द्यया धेनुमुद्रयाऽमृतीकृत्य महामुद्रया परमीकृत्य देव्यै प्राग्वत्स्यायाचमनीयं दत्वा मूलविद्यया देवीं संपूज्य पा
त्राज्जलममृतीकृत्य चुलुकेनादाय वामांगुष्ठेन नैवेद्यपात्रं स्पृशन् मूलमनुच्चार्य सोमायसाधपायमपरि

वारायै सर्वात्मिकायै भगवत्यै श्रीमहात्रिपुरसुंदरीपादुकायै नैवेद्यं कल्पयामि नमः इति नैवेद्योपरि चुलकोदकं समर्प्य
येत् ततः कृतांजलिर्मूलमुच्चार्य श्रीमहात्रिपुरसुंदरि हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतं पंचधा षड्रसोपेतं गृहाण
परमेश्वरि इत्यनेन प्रागुक्तमनुना निवेद्य पात्रांतरे जलममृतीकृत्य देव्या दक्षिणहस्तेन तज्जलं किंचिद्दत्वा ॐ अमृतोपस्त
रणमसि स्वाहेति देवीं प्राशयित्वा वामकरेण ग्रासमुद्रां विकचोत्पलसन्निभां दर्शयन् दक्षिणहस्तेन प्राणादिपंचमुद्राः
प्रदर्शयेत् तद्यथा ॥ ऐं प्रीं प्राणाय स्वाहा इत्यंगुष्ठेन कनिष्ठानामिके स्पृशन् ॥ क्लीं अपानाय स्वाहेति अंगुष्ठेन तर्जनी
मध्यमे स्पृशेत् ॥ सौः ॐ व्यानाय स्वाहेति अंगुष्ठेनानामिकामध्यमे स्पृशेत् ॥ ऐं क्लीं उदानाय स्वाहेत्यंगुष्ठेनानामिकामध्यमा
तर्जनीः स्पृशेत् ॥ ऐं क्लीं सौः समानाय स्वाहेत्यंगुष्ठेन सर्वाः स्पृशेत् इति प्राणादिपंचमुद्राः प्रदर्शयन् पंचग्रासान् ग्रा
हयित्वा कृतांजलिर्मूलविद्यामुच्चार्य ऐं आत्मतत्वव्यापिका श्रीमहात्रिपुरसुंदरी तृप्यतु नमः मू॰ क्लीं विद्यातत्वमू॰ सौः
शिवतत्व॰ मू॰ ऐं क्लीं सौः सर्वतत्व इति तत्त्वग्रासमथ तत्त्वपंचग्रासं ग्राहयित्वा नैवेद्यमुद्रां करद्वयेन प्रदर्शयन् ॥ मू॰ श्रीमहात्रि
पुरसुंदरि विप्याद्रैसद्भावि : सौराव्य विविधानेकभक्ष्ययुक्तं निवेदयामि ते देवि सानुगायै जुषाण तत् इति नेन मंत्रेण
पुष्पांजलिं समर्प्य नैवेद्यजातं तादात्म्येन सपरिवारायै देव्यै निवेदयेत् ततः स्वर्णादिपात्रस्थं कर्पूरादिसुवासितं ज
लं येनमुद्रयाः मृतीकृत्य ॥ मूः श्रीमहात्रिपुरसुंदरि॰ नमस्ते देवदेवेशि सर्वतृप्तिकरं परं अमृतानिवदितं सुहृदमकृतिस्थ
सुशीतलं अमृतानंदसंपूर्णं गृहाण जलमुत्तमं इति जलं निवेद्यानेन मंत्रेण जवनिकया भोजनस्थजलं सवेष्टां चंदा वा
दयन् भुंजानां परदेवतां ध्यायेत् तद्यथा॰ ब्रह्मेशाद्यैः सरसमभितः सूपविष्टैः समंताशिंजद्वालव्यजननिकरैर्वीज्यमाना

सवीभिः तर्मकोशप्रहस्तनपराणेकिभोक्तृन्‌ संतीभक्तेपाचेकनकघटितेषट्संख्याश्रीविलासा इति ध्यात्वा मूलविद्यां दशधा जपि
त्वा जयं समर्घ्यमुक्तवतीसंतत्मादेवीविभाव्य धेनुमुद्रया पाद्यान्ते जलममृतीकृत्य ओं ह्रां समस्तापिधानमसि स्वाहेति देव्या हस्ते
उत्तरापोशानजलं दत्वा तमा। तस्याश्रितनवमानस्यागन्तस्यां नैवेद्यममृतं कृत्वा नेत्रस्त्रंता दृष्टिस्थापयेत्‌ ततो स्त्रमंत्रेण तत्‌
स्थानं प्रोक्षणपद्भिः संशोध्य हस्तमुखप्रक्षालनार्थं देव्यै जलं दत्वा करोद्वर्तनार्थं मृगमदमिश्रितं ताम्बूलमानीय प्रोक्षवनस्य
तिदेवतायै ताम्बूलाय नमः इति संपूज्य। श्रीमहात्रिपुरसुन्दरीपादुकायै ताम्बूलं कल्पयामि नमः इत्युत्सृज्य। श्रीम
हात्रिपुरसुन्दरीपादुकायै ताम्बूलं कल्पयामि नमः इत्युत्सृज्य। श्रीमहात्रिपुरसुन्दरि तमालदलकर्पूरशकलभागतराणि
ते। संशोधितं सुगंधं च ताम्बूलं परिगृह्यतामिति। ते ओं ह्रं ह्रं ह्रं दमिदमिदं गृहाण स्वाहेति देव्यै ताम्बूलं निवेद्य योनिमुद्रया
प्रणम्य - - - - - - - - - - - - - - सायाणप्रकारेण पूजां विधाय क्लीं इति नमस्कारमुद्राव
ध्या मूलेन प्रदर्श्य प्रणम्याङ्गमिति त्यजेत्‌ शाक्तस्तदनुलोमविलोमेन मूलविद्यया संपुटितैर्मातृकाक्षरैः सूक्ष्ममातृका
स्थानेषु देव्या देहे गंधपुष्पाद्यैः संपूजयेत्‌ षडंगपूजामपि देव्या देहे कुर्यात्‌ इति लयांगपूजां विधाय सद्यो भक्षणादि
मुद्राः प्रदर्श्य विशेषार्घ्यबिंदु स्त्रिर्वामहस्तेन संतर्प्यावरणपूजां कुर्यात्‌ अथ लयांगपूजानंतरं संमूलैर्मातृकाव
र्णैरनुलोमविलोमगैः तत्तत्स्थानेषु देव्या अंगोपांगाभ्यर्चनपूर्वकैः पूजयित्वा प्रथमतः षडंगैः पूजयेत्सुधीः लयांग
मेतत्समाख्यातं देवताभावसिद्धिदं षडंगावरणं चक्रे कल्पोक्तविधिना यजेत्‌ भोगांगं तत्समुद्दिष्टं देवताप्रीतिकारकं अ
चलयागभोगांगपूजानन्तरं आवरणकाललयांगकल्पये हृदेव्याः सपरमेष्ठीति ज्ञानार्णवोक्तत्वात्‌ अचलयागभोगांगे
मतद्वयमस्मत्देवमुद्रो विशेषमाह। ज्ञानार्णवे। मूलमंत्रेण दीपिन्या मालिन्यार्घ्योदकेन च त्रिवारं प्रोक्षयेद्देवदेव

वि॰
घा॰व
१२१

131

स्फुद्दितितीरिता॰ इदंतत्कालीमते॰ कादिमनेनमूलमंत्रेणदीपिमामधुपर्कार्घ्यबिंदुभिः त्रिवारंप्रोक्षयेद्देवं देवस्फुद्दितितीरितेति
त्रिपुरार्णवोक्तत्वात् अत्रसमष्टिपूजाव्यष्टिपूजाचकर्तव्या॰ तदुक्तंस्वच्छंदविग्रहे॰ समष्टिपूजाप्रारंभेव्यष्टिपूजावसानके॰ क
र्तव्यासिद्धिमिच्छद्भिर्देवताप्रीतिकारिणी॰ रश्मिरूपामहादेव्याः सर्वावरणदेवताः स्वच्छादर्शेयथायंत्रतथैवप्रतिबिंबि
ता॰ प्रतिबिंबितदेवानांपूजाशास्त्रोक्तमार्गतः समष्टिपूजासाप्रोक्ताव्यष्टिपूजाथोच्यते॰ रश्मिरूपामहादेव्याअत्रपूजित
देवताः श्रीमद्दर्पणगलीनास्ताः सतुसर्वसुखावहाः पृथक्पृथक्स्थानेदेव्यंगेविलीनायंत्रदेवताः विविधत्वादिविभाव्येवंतत
त्स्थानेषुदेशिकः देव्यंगेषुयजेत्सुव्यष्टिपूजासमीरितेति॰ आवरणपूजाप्रारंभेषु ४ मू॰ सच्चिन्मयेपरेदेविपरामृतचरु
प्रिये॰ अनुज्ञांदेहिदेवेशिपरिवारार्चनायमे॰ इतिपुष्पांजलिंदत्वाआवरणपूजामारभेदितिसंप्रदायः तारत्रयंपूर्ववन्मायाह
सः सोहंस्वविधिया॰ सर्वसौभाग्यजननीपादुकांपूजयामिच॰ ततस्तन्मनुनादेव्येदद्यात्पुष्पांजलित्रयं प्रदर्शयेद्योनिमुद्रां
ततःसंप्रार्थयेद्बुधः सर्वमंत्रमयेदेविसर्वदेवनमस्कृते॰ अनुज्ञांदेहिदेवेशिपरिवारार्चनायमे॰ इतिसंप्रार्थ्यदेव्यंगाद्वि
र्गताविस्फुलिंगवत् वह्नेः समस्तावरणदेवतारश्मिरूपिणः देवास्तयास्थिताः स्वस्वस्थानेषुपरिचिंतयेत् मनुश्चंद्रः
कुबेरश्चलोपामुद्राचकामराट्॰ अगस्त्यनंदिसूर्याश्चविष्णुस्कंदशिवास्तथा दुर्वासाश्चतथाशक्रउन्मनीवरुणस्तथा ध
र्मराजोनलोनागराजोवायुर्बुधस्तथा ईशानश्चरतिश्चैवतथानारायणस्तथा ब्रह्मजीवोमहादेव्योपासकाःपंचविंशतिः ए
तैरुपासिताविद्याजाग्रत्स्वप्नसुषुप्तिकाः तुरीयाबिंदुचक्रेस्मिन्विशेषार्घेणतेनच पूजनीयाःप्रयत्नेनतारत्रयपुटाःक्रमात्
अमुकोपासिताश्रीचविद्याश्रीपादुकांततः पूजयामितमस्मात्कायजेत्संचोपचारकैः पाशांकुशधनुर्बाणधारिणारक्तविग्र
हाः चिंतनीयाःप्रयत्नेनसर्वसौभाग्यदायुधैः दर्शयेद्योनिमुद्रांवैसर्वसौभाग्यवाक्यदां अनेनक्रमयोगेनविद्यादेवींविचिंतयेत्

विद्याहं रमयीश्रंजां पुष्पांजलिविधानतः निवेदयेन्महादेव्यै तर्पणादि समाचरेत् एतस्मिन्समये देवि तिथिनित्याः समर्चयेत् वि
भागं च महानित्यं दद्यात्पूर्वोक्तक्रमात् रेखासु त्रिषु देवेशि पंचपंचविभागशः प्रतिपत्तिथिमारभ्य पौर्णमास्यंतमद्रिजे एकै
कांश्च जयेन्नित्यां महासौभाग्यभाग्भवेत् क्रमस्य एते विचित्रादि कामेश्वर्यंतमेव हि एकैकं ह्यहोरात्रं च दर्शांतेन क्रमेण तु यजेत्
कामेश्वर्यादिका नित्या विचित्रांताः क्रमाद्यजेत् पंचोपचारैः गंधाद्यैः श्रीपात्रामृतबिंदुभिः तत्तद्विद्यां समुच्चार्य नामरचि
तयसंपुटं उच्चार्यामुकनित्याश्रीपादुकां पूजयामि च नमः पदं महादेवि सर्वत्रायं क्रमः स्मृतः कामेश्वरी महानित्या त
तो वै भगमालिनी नित्यक्लिन्ना महानित्या भेरुंडा वह्निवासिनी महाविद्येश्वरी नित्या शिवदूती तथैव च त्वरिता च
महादेवि ततो वै कुलसुंदरी नित्या नीलपताका च विजया सर्वमंगला ज्वालामालिन्यथ तता चित्रा त्रिपुरसुंदरी रक्तांर
क्तांगरागलेपना रक्तभूषणा पाशांकुशौ धनुर्बाणान्पुस्तकं चाक्षमालिकां वराभीती च दधती त्रैलोक्यवशकारि
णी एवं कामेश्वरीं ध्यायेद्रूपसौभाग्यवाक्प्रदां कदंबवनमध्यस्थामरुणार्कसमद्युतिं नानाभूषणसंपन्नां त्रैलोक्या
कर्षणक्षमां पाशांकुशौ पुस्तकं च तोलिकां गलल्लेखिनीं वरदं चाभयं चैव दधतीं विश्वमातरं एवं ध्यायेन्महादेवीं भ
गमालां विचक्षणः रक्तां रक्तांगवसनां चंद्रचूडां त्रिलोचनां खिद्यद्वक्त्रां मदाघूर्णलोचनां रत्नभूषितां पाशांकुशौ क
पालं च महाभीतिहरं तथा दधतीं संस्मरेन्नित्यक्लिन्नां पद्मासनस्थितां चंद्रकोटिप्रतीकाशां स्रवंतीममृतद्रवं ध
नीलकंठां त्रिनेत्रां च नानाभरणभूषितां इंद्रनीलस्फुरत्कांतिं शिखिवाहनशोभितां पाशांकुशौ कपालं च छुरिकां
वरदाभये दधतीं चिंतयेद्देवीं भेरुंडां विघ्ननाशिनीं ध्यायेन्महावर्णाभीं नानाभरणभूषितां पाशांकुशौ स्वस्ति
कं च शक्तिं च वरदाभयं दधतीं रत्नमुकुटां देवीं वै वह्निवासिनीं जपाकुसुमसंकाशां रक्तांशुकविराजितां माणि

कंठभूषणां नित्यां नानाभूषाविभूषितां पाशांकुशौ कपालस्य सुधापानविघूर्णितां अभयं दधतीं ध्यायेन्महाविद्येश्वरीप
रां हृद्यवर्णां त्रिनेत्रां च महासिंहसमासनां शरवाह्निचापवाणांश्च हस्तैः पाशं वराभये दधतीं चिंतयेन्नित्यां शिवदूतीप
रां शिवां प्रणमाम्यरक्तस्यां चरणांबुजशोभितां नूपुरादिसुमंजीरां फहाररत्नविभूषितां पर्णांशुकां पर्णभूषां वेणुप
हितं हेममेखलां तनुमध्यां पीनतुंगकुचयुग्मपरां अभये दधतीं शिखिपिच्छाभां वलयांगदशोभितां गुंजाहरणां त्वपाहींद
केयूरां रत्नभूषितां स्फुरत्सिंहासनप्रोद्यत्संस्मेरवदनां बुधः ध्यायेद्देवीं महेशानीं कदंबवनमध्यगां रत्नमण्डपम
ध्ये तु महाकल्पवनान्तरे मुक्तातपत्रच्छायायां रक्तसिंहासने स्थितां अनर्घ्यरत्नघटितमुकुटां रत्नकुण्डलां हारग्रैवेय
सद्रत्नविचित्रांककणोज्ज्वलां हीरमुक्तालसद्भूषाशृंखलादाम विराजितां हीरमंजीरसद्भृंगारकोमलपदांबुजां शुभ्रांग
रागसद्भृंगाकर्पूरसकलोज्ज्वलां पुस्तकं चाभयं वामे दक्षिणे चाक्षमालिकां वरदानरतां दिव्यां महासारस्वतप्रदां एवं
ध्यायेन्महानित्यां देवीं श्रीकुलसुंदरीं एवं नित्यां महादेवीं चिंतयेद्धि कोन्नमः शुभ्रपद्मासनारम्यां चंद्रकुंदसमद्युतिं
सुप्रसन्नां शशिमुखीं नानारत्नविभूषितां अनंतमुक्ताभरणां स्रवंतीममृतद्रवां वरदाभयशोभाढ्यां स्मरेन्नील
पताकिकां ध्यायेद्देवीं महानित्यां स्वर्णाभरणभूषितां उद्यद्विद्युल्लताकांतिं स्वर्णस्रुक् विराजितां महासिंहास
नप्रोद्यज्ज्वालामालाकरालिनीं अरिशंखखड्गखेटत्रिशूलं डमरुं तथा पानपात्रं च वरदं दधतीं शत्रुनाशिनीं शुभ्रां
गीर्ज्ञानदां नित्यां विचित्रवसनां सदा विचित्रतिलकां नित्यां विचित्रांकुकुमोज्ज्वलां वरदाभयशोभाढ्यां नानाशास्त्रधरां
कविं बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनां पाशांकुशशरांश्चापं धारयंतीं शिवाश्रये इति षोडशनित्याध्यानं
एतस्मिन्समये देवि गुरुं संपूजयेद्बुधः प्राग्भागे ध्ययोरनंतरालगुरुपंक्तित्रयं यजेत् गुरुमंत्रेण नाम्नापि निजं संपूजयेद्गुरुं

ग्रे गुरुमध्यमाभ्यां च गुरून्सम्यक्प्रतर्पयेत् आनंदनाथशब्दांतानेवं ताः शक्तयः क्रमात् गुरूंस्तु पूजयेद्देवि परमादिगुरूंस्त
था परापरगुरूंश्चैव परमेष्ठिगुरूंस्तथा गुरुशक्तीर्यजेद्देवि ततः श्रीगुरुपादुकाः इति सामान्यतो देवि गुरुपाद्योदकैर्य
जेत् अथादिशिवनाथश्च तत्तानां वाच सदाशिवः इच्छा वा ईश्वरश्चैव अविकारुद्र एव च रौद्री विष्णुस्तथा अम्बा ब्रह्मा वा
सापराभिधाः हंसस्वामश्च दिव्यौघाः सनकश्च सनंदनः सनातनश्चापि सनत्कुमारस्तनथैव च सनत्सुजातश्च विभुर्द
त्तात्रेयोथ रोचनः वामदेवस्तथा व्यासः शुकः सिद्धौघसंज्ञकाः पशुपराख्यगुरवोन्ये सिंहश्च महेश्वरः भास्करश्च महा
देवि ततस्तस्मान्महाशिवः सदाशिवो मानवौघाश्च पराख्या महेश्वरि· एते सामान्यगुरवः श्रीनाथादीन्यजेत्ततः परमप्र
काशाभिधश्च ततः परशिवस्तथा परशक्तिश्च कौलेशः शुक्लदेवी कुलेश्वरः कामेश्वरी च दिव्यौघाः परीख्या गुरवः क्रमात्
भोगः क्लिन्नस्तु समयः सहजो वेदसंख्यकः परापराख्याः सिद्धौघा गगनो विश्व एव च विमलो दमनश्चैव भुवनो नील एव च
आत्मा प्रियो मानवौघा अपराख्या निजास्तथा कामराजाख्यविद्याया गुरवोत्र प्रकीर्तिताः अस्तानगुरुशिष्याणां कथ्यंते गु
रवः क्रमात् गुरुभ्यो नमः स्मृत्वा पादुकाभ्यो नमो वदेत् तथैव परमेशानि लोपामुद्राप्रभामाया
दिव्याश्चित्रस्तथैव च कैवल्यानंदनाथश्च देवात्मानं परमाश्च परापराः परमेष्ठिन आचार्यास्ततो निजगुरून्यजेत् परमा
दिशिवश्चैव कामेश्वर्यंविका तथा· दिव्यौघश्च महोदयश्च सर्वाख्यस्तदनंतरं प्रकाशदेवी प्रकाशश्च दिव्यौघाः संप्रकीर्ति
ताः लोपामुद्राप्रभामायादिव्याश्चित्रस्तथैव च· कैवल्यानंदनाथश्च देवात्मानंदनाथकः महोदयश्च सिद्धौघाश्चिदा
नंदस्तथैव च· अघोरवाचतथाविश्वः शांभवाचरमानतथा· कमलश्च परश्चैव मनोहर इति क्रमात् आत्मा च प्रमितश्चैव मान
वौघाः प्रकीर्तिताः लोपामुद्राख्यविद्याया गुरवश्च निजास्ततः परमप्रकाशश्च तथा विमर्शस्तु परादिकः कामेश्वरी

वि·
घा·व·
१३२

133

चदिव्यौघामेदं श्रीमत्संतकः श्रुहषोघोरवायोवप्रकामः मत्स्यहस्तथा· सिद्धौघाश्चमेदेशानितततउन्नमउद्भवः परमात्मस्य
सर्वज्ञः सर्वः स्वस्यस्वसिद्धकः गोविंदः शंकरश्चैव मानवौघाः प्रकीर्तिताः श्रीविद्यामात्रगुरुवस्तनोनिजगुरुक्रमात् पने·
तरीयाविषये गुरवः सर्वेपवह्नि· ज्ञानमुद्रास्तथा पूर्णकपालाब्जकरद्वयाः गुरवो रक्तवर्णाः स्युर्जटाभारशिरोधराः एताम्
चोपचारैस्तु यजेन्मध्ये हृन्मुद्रया· गुरुक्रमं प्रपूज्याथ यजेदाम्नायदेवताः वह्निकोणेत पूर्वादि श्रीपादाम्भतविंदुभिः पूर्वाम्ना
येश्वरीं देवीं निर्मलां पूर्वदिग्गतां दक्षिणाम्नायेश्वरीं च भोगिनीं दक्षिणे यजेत् पश्चिमाम्नायेश्वरीं वक्रां वह्निकोणे पश्चिमे यजेत्
उत्तराम्नायेश्वरीं च कालिकामुत्तरे यजेत् ऊर्ध्वाम्नायेश्वरीं देवीं महात्रिपुरसुंदरीं वराभयकरा रक्ता पाशाङ्कुशधराः शुभाः
पंचोपचारैः संपूज्य योनिमुद्रां च दर्शयेत् आम्नायं तत्प्रपूज्याथ समयायतनं यजेत् अन्तर्दशारे पूर्वादि गुरुपादाम्भतेन च·
ब्राह्मदर्शने गायत्रीं पूर्वायतनदेवतां नारायणं वैष्णवाख्ये याम्यायतनदेवतां सौरदर्शने सूर्यं च पश्चिमायतने ता· –
बौद्धदर्शने बुद्धं चोत्तरायतननायकं ऊर्ध्वायतने शैवाख्यदर्शने शंभुं शिवं यजेत् ऊर्ध्वायतने शाक्ताख्यदर्शने श्रीपराभिधां
शक्तिं यजेद्दिङ्चक्रे देवताः परिचिन्तयेत् वराभयकरा रक्ताः स्वस्वायुधकरद्वयाः पंचोपचारैराराध्य लिंगमुद्रां प्रदर्शयेत्
प्रपूज्यायतनं पश्चात्पंचरत्नं प्रपूजयेत् वह्निर्दशारे पूर्वादि श्रीपादामलविंदुभिः श्रीविद्यासिद्धलक्ष्मीश्च मातंगी भुव
नेश्वरी· वाराहीति महेशानि पंचरत्नं प्रकीर्तितं श्रीविद्यापूजनस्थाने चक्रराजे महेश्वरीः महारत्नेश्वरीं हृद्यमर्धिरतामनसं
स्थिताः सर्वसौभाग्यजननीं पाडुकाः पूजयामि च पूजयित्वार्घ्यं यजेन्मन्त्रयोनिमुद्रां प्रदर्शयेत् पाशाङ्कुशकरा रक्ता निजायु
धकरद्वयाः पंचरत्नं प्रपूज्याथ पंचकल्पलतां यजेत् चतुर्दशारे पूर्वादि श्रीपादाम्भतविंदुभिः श्रीविद्या त्वरिता चैव पारि
जेश्वरी तथा त्रिकूटा पंचवाणेशी पंचकल्पलताः स्मृताः पाशाङ्कुशकरा रक्ता निजायुधकरद्वयाः लतां तां पूजनां तेनं च पंच

सिंहासनं यजेत् अष्टपत्रेन पूर्वादिक्षु श्रीपात्रामृतविंदुभिः बालासंपत्प्रदा चैव चैतन्यातदनंतरं द्वितीया चैतन्यरूपा कामेशी तदनंतरं
ललिता भैरवी चैव कामेशी भैरवी तथा रक्तनेत्रा भोगिनी च विसृसु सिंहासनं ततः दक्षिणे संस्थिताश्चैव यजेत्सौभाग्यहेतवे ष
ट्कूटभैरवी नित्याभैरवी तदनंतरं मृतसंजीवनी चैव मृत्युंजयप्रदा तथा। वज्रप्रस्तारिणी चैव कुब्जिका रौद्रमेव च सिंहासने
प पनेहरविभ्रमाणंदाणिक्रमात् सिंहासने तूत्तरे च प्रयजेद्भुवनेश्वरी सकलेशी भैरवी च सिद्धिकैलासभैरवी डामरा
ख्या भैरवी च कामिनी भैरवी तथा कालिकामीश्वराख्या च यजेत् सिंहासने बुधः विंदुमध्ये महेशानि ऊर्द्ध्वसिंहासनस्थिताः
प्रथमा सुंदरी चैव द्वितीया सुंदरी तथा तृतीया सुंदरी चैव चतुर्थी सुंदरी तथा पंचमा सुंदरी चैव महात्रिपुरसुंदरीः सदाशिवा
ख्य देवेशि यजेत् सिंहासनं ततः वराभयकरा रक्ताः पाशांकुशकराः शुभाः सिंहासनाभ्यर्चितांते पंचकोशार्चनं भवेत् षोड
शारे तु पूर्वादिक्षु श्रीपात्रामृतविंदुभिः श्रीविद्या च तथा लक्ष्मीर्महालक्ष्मीस्तथैव च त्रिशक्तिः सर्वसाम्राज्यलक्ष्मीः पंचपंकी
र्तिकाः पाशांकुशकरास्तानि जापुथकरद्वयाः पंचलक्ष्मीः पूजयित्वा पंचकामदुघा यजेत् शिष्टचक्रे तु पूर्वादिक्षु श्रीपात्रा
मृतविंदुभिः श्रीविद्यामृतपीठेशी सुधामृतमृतेश्वरी अन्नपूर्णेति विख्याताः पंचकामदुघाः क्रमात् पाशांकुशास्तथा
पात्रकलशारक्तविग्रहाः पूजयित्वा कामदुघाः समयाः पंचपूजयेत् स्थितिचक्रे तु पूर्वादिक्षु श्रीपात्रामृतविंदुभिः बगलाकु
लरात्रिष्ठुजपडंगानतथैव च वज्रवैरोचनीदेवी समयाः पंचकीर्तिताः पाशांकुशकरास्तानि जापुथकरद्वयाः समयाः पूजने
नेतु षडंगावरणं यजेत् संहारचक्रे आग्नेशासुरवायव्यकोणके विंदुमध्ये चतुर्दिक्षु श्रीपात्रामृतविंदुभिः मध्ये दिक्षु क
मेणैव यजेत्सर्वार्थसिद्धये सर्वज्ञा नित्यपरमा च तथा नादप्रबोधनी स्वतंत्रा च महाशक्तिर्नित्यानुमा तथैव च नित्यानंता
चक्रस्थिता तथा भोगषडंगके तुषारस्फटिकश्यामनीलरक्तारुणाम्बिकाः वरदाभयधारिण्यः प्रधानतत्ववासिन्यः

एतानित्तमहादेवीविशेषावरणानिवै· तृतीयोयामकान्तेचपतास्यावश्यकानिवै· कूटविद्यास्वैवेनतद्दुःखल्लमदंगाकं अथमध्य
विधानीषान्नवाह्निरश्चाविके देविमध्यविधानीह्यावरणानिवै तृतीयोयामकान्तेचपतास्यावश्यकानिवै· कूटविद्यास्वैवेनतद्दु
रवल्लमदंगाकं) स्मरणप्रिये अग्रपार्श्वयोरग्रेसामान्यास्मरतविन्दुभिः उदीच्यामयनेदेवितोभणद्भावणेनतनः आकर्ष
वश्यवाणोघ्यदक्षिणेनुसमर्चयेत् अग्रेसम्मोहनेयष्टुाचिंतयेद्वाणदेवता· वराभयकरारक्ताः स्मरणिवाणधनु
र्द्धराः अनङ्गप्राग्देवि शिवपार्श्वयोरग्रयोस्तथा वाणवयजनेकुर्य्यात्पंचकामान्वरानने· कामममन्मथकंदर्पमक
ध्वजस्तकाः मीनकेतुर्महेशानिपंचकामाः प्रकीर्त्तिताः वराभयकरारक्ताः पंचवाणधनुर्द्धराः वहिर्दशारेखद्वा
यः कामवत्सजयेत्प्रिये· सामान्यपावसद्धयालीनावायपरापरा· मध्यमावाक्पश्यन्तीवैखरीतिप्रकीर्त्तिता ज्ञा
नमुद्राभयाम्भक्कवीणापुस्तकपाणयः चतुर्दशारचक्रेचपार्श्वयोरुभयोस्तथा· अग्रेचविंदुमध्येचसामान्यास्म
तविंदुभिः वेदसंख्याअवस्थाश्चयजेत्सर्वार्थसिद्धये जाग्रत्स्वप्नसुषुप्तश्चतुरीयाचप्रकीर्त्तिताः वराभयकरारक्ताः
धृतपाशांकुशाःशुभाः अग्न्यष्टदलमूलेचवृत्तेवेष्टनया - - सामान्यपात्रसुधयायजेद्वामादिदेवताः वामाज्ये
ष्ठातथारौद्रीअविकेच्छामथैवच· ज्ञानक्रियाकुब्जिकाचविल्वीचित्राविष - - का· भूचरीखेचरीचैवजयाचविज
यातथा· नंदाहनंदादेवेशिशाकुपः परिकीर्त्तिताः दशाष्टमूलवृत्तेतुवामायादिकभूषणाः पाशांकुशधरा
रक्तावरदानरतास्तथा· मुक्ताछत्रंशारवेन्दुचंद्रिकारम्यचामरैः उशीरच्छिन्नचेद्राक्षत्लिमव्यजनसुगमकं प्रातमु
क्तावलीराजत्स्वर्णादर्शीचपीठिकां अलंकारमयीमंडीकरण्डशशिशेखरे नवरत्नस्फुरद्दीमंतांबूलस्यकरण्डकं
कर्पूरमृगनाभाढ्यकुंकुममंत्रोदभाजनं चषकंस्वर्णरचितंसुधाकुंभंकमण्डलुं मल्लिकामालतीजातीशतपत्रा

ध्यादामभिः पूर्णरत्नमयं भाण्डं कंकतीगजदंतनां कज्जलस्य शलाकां च दधाना निजशक्तयः ततः षोडशपत्रा
ब्जमूलहृन्ने महेश्वरि · नेष्टं तत्वेन सामान्यसुधया रश्मिपूजनं विद्याज्ञा च चिन्माया नादो ध्यानं त्रिपुरश्च ः स्थि
तिमुक्तिभुक्तिशान्ताव सत्त्वसदसदात्मिका · क्रियात्स ज्ञातलोकाख्य देववेदांतथैव च संविज्जन्मस्पंदसंज्ञानि
स्पंदः कुण्डली तथा शब्दवर्णस्वराश्चैव वर्गसंयोगमंत्रकाः भैरवोमूर्त्तं रश्मिमस्य रश्मिहृदंप्रकीर्त्तितं ततः
षोडशपत्रा · मूलहृन्ने महेश्वरि · नेष्टं तत्वेन · · · · · · · · · · तेनः षोडशपत्राब्जवासे
प्रथमहृत्तके · वेष्टमत्वेन सामान्यसुधया योगिनीर्यजेत् डाकिनी राकिनी चैव लाकिनी काकिनी तथा शा
किनी हाकिनी चैव याकिनी योगिनी तथा षोडशारवासहृन्ने योगिन्यो डाकिनीमुखा पाशांकुशकपा
लासिपाणयः शववाहनाः मुण्डमालासमायुक्ता दंष्ट्राभीममुखांबुजाः चतुर्वक्त्रा रक्तवर्णा भीमरू
पा मदोद्धताः मध्यहृन्ने वेष्टनेन सामान्यसुधया शिवे · भैरवी पूजयेद्देवि भैरवीत दंनंतरं महाभैरवमथसि
द्धभैरवी धूम्रभैरवी · नागाद्या · · · · मोहनाद्याभैरवीति भैरव्यः कथिताः प्रिये · षोडशारवह्निम
ध्यहृन्नेत भैरवीमुखाः पाशांकुशवराभीमाः कपालशूलपाणयः मुण्डमालाधरास्ताभीमदंष्ट्राः श
वासनाः ततः सामान्यसुधया भैरवान् दशपूजयेत् हेतुकं चैव वेतालं त्रिपुरांतकमेव च अग्निजिह्वं च का
लांतकरालं चैकपादकं भीमरूपं महादेवि अचलं हाटकेश्वरं षोडशारांत्यहृन्नेत हेतुचकाद्या दशस्थिताः

भैरवाभीमदंष्ट्रास्यास्त्रिशूलटंकधारिणः मेघश्यामाः शवारूढाः कपालदण्डधारिणः अर्चने कथितं मध्यविधारणसंज्ञ
कं शृणु वक्ष्ये महादेवि नवावरणार्चनं एतच्चक्रं महेशानि मध्ये बिंदुविराजितं ततस्त्रिकोणं चाष्टारं दशारद्वद
शारकं मनुकोणं महेशानि मध्यचक्रमिदं प्रिये बैंदवादष्टकोणान्तं सर्वमध्यमिदं भवेत् चत्वारिंशाङ्गगैर्युक्तं त्रिभगैर
पि पार्वति वसुपत्रं कलापत्रं चतुरस्रं क्रमात्प्रिये भगात्मकमिदं सर्वं नवयोन्यंकितं भवेत् चतुःषष्टियुतः कोट्यो यो
गिनीनां महौजसां चक्रेस्मिन्सविशेषास्ताः साधकं मानयंति हि विना गुरूपदेशेन साधकं भक्षयंति हि त्रैलोक्य
मोहने चक्रे बाह्ये रेखां समाश्रिताः सामान्यपात्रस्थयार्चयेत्सिद्धिदेवताः चतुरस्रांतरेखायां पश्चिमादिषु वै क्रमात्
द्वारेषु वायुकोणादिकोणेष्वध ऊर्ध्वतः दक्षिणावर्त्तयोगेन यजेत्सर्वार्थसिद्धये अणिमा महिमा चैव गरिमा लघि
मा तथा ईशित्वं च वशित्वं च प्राकाम्यं भुक्तिरेव च इच्छाप्राप्तिः सर्वकामा मोक्षसिद्धिः क्रमात्प्रिये सद्यः संतप्तहेमाभाः
पाशांकुशधराः शुभाः महाभरणरत्नानि सुवर्णानि वै निधीन् प्रयच्छंत्य साधकेभ्यः पद्मरागप्रभास्तथा त्रै
लोक्यमोहने चक्रे मध्यरेखां समाश्रिताः तप्तजांबूनदाभासाः पंचाशत्पीठदेवताः पाशांकुशाभयवरकराः प्रकटरूप
काः ताः अर्चयित्वा च ततो ब्राह्म्याद्याः सिद्धिवद्यजेत् पूर्वद्वारादि द्वारेषु वह्निकोणादिषु क्रमात् ब्राह्मी माहेश्वरी चैव
कौमारी वैष्णवी तथा वाराहीन्द्री च चामुण्डा महालक्ष्मीः क्रमात्प्रिये असितांगो रुरुश्चण्डः क्रोधनोन्मत्तसंज्ञकः क
पाली भीषणश्चैव संहारश्चाष्टभैरवाः कामरूपं च मलयं कोल्लगिरिं च कुलांतकं चौहारपीठं देवेशि जालंधरमतः परं

उड्याणं देवि त्रिकोणं च पीठाष्टकमुदाहृतं मातरो भैरवांकस्थाः स्मेरवक्त्रा महालसाः ब्राह्मीप्रभृतयो दिव्या यो-
गिन्यः प्रकटाः शुभाः पाशांकुशधराः सर्वाः क्रमेण दधतीः स्मरेत् त्रिशूलं च शक्तिं च चक्रं चैव गदां ततः वज्रवैडूर्य-
मालां च पद्मं च वरदास्तथा भैरवास्तु सितांगाख्याः पीठाष्टकनिवासिनः शूलं कपालं प्रेतं च बिभ्राणाः खड्गदंड-
भिः गजत्वगंबराभीमाः कुटिलालकशोभिताः पाशांकुशवराभीतिकराः पीठाष्टदेवताः तत्र जांबूनदप्रख्या यो-
गिन्यः प्रकटाः शुभाः पवं तृतीयरेखायां सिद्धिवसुजये प्रिये मुद्रादेवीः प्रयत्नेन सर्वसंक्षोभणादिकाः सर्वसंक्षोभ-
णी चैव सर्वविद्राविणी तथा सर्वाकर्षिणिका सर्ववशीकारिणिका तथा सर्वोन्मादनिका चैव ततः सर्वमहांकुशा
सर्वखेचरिका सर्वबीजमुद्रा तथैव च सर्वयोनिस्ततः सर्वत्रिखण्डा परिकीर्तिता सर्वसंक्षोभिणीमुख्या मुद्रास्ताः सौ-
म्यविग्रहाः धृतपाशांकुशाः सर्वाः स्वस्वमुद्राकरास्तथा तप्तचामीकराभासा योगिन्यः प्रकटाः शुभाः पाशांकुशो-
त्पलाभीतिपाणयो रक्तविग्रहाः प्रकटाः कामरूपादिचतुः पीठादिदेवताः अणिमासिद्धिपुरतः चक्रेशीं त्रिपुरां य-
जेत् पंचोपचारैराराध्य मुद्रां मायां च दर्शयेत् एताः प्रकटयोगिन्यश्चतुरस्रे व्यवस्थिताः त्रैलोक्यमोहने चक्रे समुद्राः
सायुधास्तथा सवाहनाश्च सपरिवाराश्चैव ससिद्धयः सांगोपांगाश्च सर्वोपचारैः संपूजितास्तथा तर्पिताः संति
निवेद्य जलं तत्र त्रिभिः क्षिपेत् अभीष्टसिद्धिं मे देहि त्रिपुरे देवपूजिते भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनं
इत्युक्त्वार्घ्यं महादेव्यै दद्यात् पुष्पांजलिं ततः इति ते कथितं भद्रे प्रथमावरणार्चनं अथ वक्ष्ये महेशानि द्वितीयावर-
णार्चनं ततः षोडशपत्रेषु कामाकर्षिणिकां यजेत् सामान्यपात्रस्थपया पश्चिमादिक्रमेण तु कामाकर्षिणिका चै-
व ध्याकर्षिणिका तथा अहंकाराकर्षिणी च शब्दाकर्षिणिका तथा स्पर्शाकर्षिणिका चैव रूपाकर्षिणि

कानथा॰ रसाकर्षिणिकाचैवगंधाकर्षिणिकानथा चित्ताकर्षिणिकाचैवधैर्याकर्षिणिकानथा स्मृत्याकर्षिणिका
चैवनामाकर्षिणिकानथा॰ वीजाकर्षिणिकाचैवामृताकर्षिणिकानथा॰ आत्माकर्षिणिकाचैवशरीराकर्षि
णीनथा सर्वशापूरके चक्रे दलषोडशके स्थिताः कामाकर्षिणिकाद्याश्च योगिन्योगुप्तसंज्ञकाः कलाषोडशत
याश्चचंद्रमण्डलमध्यगाः स्वस्ववर्णारक्तवर्णाः स्वस्वनीरूपविग्रहाः पाशांकुशस्तथापूर्णिकाश्मरीचस्तन
दाः चक्रेशीत्रिपुरेशीचकामाकर्षिणिकाग्रतः यजेद्विद्राविणीमुद्रां दर्शयेज्ञानपूर्वतः॰ एतास्तुगुप्तयो
गिन्यः सर्वशापूरके तथा चक्रेसमुद्रां दशमादिदेव्यैपुष्पांजलिंदिपेत् अभीष्टसिद्धिमेदेहि त्रिपुरे देवपूजिते॰
भक्त्यासमर्पयेतभ्यं द्वितीयावरणार्चनं॰ इत्युच्चार्यार्घ्यदेवेशे दद्यात्पुष्पांजलिंततः सर्वसंक्षोभणे चक्रे माला
ष्टकविजृंभिते॰ यजेत्सामान्यस्वधयाअनंगकुसुमादिकाः पूर्वादिदिक्स्थपत्रेषुआग्नेयादिविदिक्षुच अनं
गकुसुमानंगमेखलातदनंतरं अनंगमदनापश्चात्दनंगमदनातुरा॰ अनंगरेखानंगवेगिन्यथानंगांकु
शातः अनंगमालिनीहेताश्चवंधूककुसुमप्रभाः पाशांकुशस्फुरत्खड्गदनीलोत्पलकराः शुभाः अनंगाङ्
समाग्रेतुयजेत्त्रिपुरसुंदरी॰ चक्रेशीदर्शयेन्मुद्रां सर्वाकर्षिणिकांततः एतागुप्ततराश्चैवयोगिन्यः सर्वतस्त
था॰ क्षोभणे चतथाचक्रे समुद्रे मादिनाततः देव्यैपुष्पांजलिंदद्यादभीष्टेतिचमंत्रवित् चतुर्दशारके चक्रे सर्व
सौभाग्यदायिके॰ सामान्याङ्घ्रिः पश्चिमादिवामावर्तक्रमेणच सर्वसंक्षोभणीमुख्याः शक्तीर्विपूजयेत्प्रिये स
र्वसंक्षोभिणीशक्तिः सर्वविद्राविणीतथा सर्वाकर्षिण्यथततः सर्वाह्लादिन्यनंतरं सर्वसंमोहिनीसर्व
स्तंभिनी सर्वजृंभिणी॰ सर्ववशंकरीशक्तिः सर्वविद्राविणीतथा॰ सर्वाकर्षिण्यथातथासर्वार्थरंजिनी

ततः सर्वोन्मादिनी च तथा सर्वार्थसाधिनी· ततो वै सर्वसंपत्तिपूरणी शक्तिरेव च सर्वमंत्रमयी शक्तिः सर्वद्वंद्व
क्षयंकरी सर्वसौभाग्यदे चक्रे सर्वसंक्षोभणीमुखाः संप्रदायाख्ययोगिन्यः सर्वाभरणभूषिताः इंद्रगो
पनिभाः सर्वाः सगर्वोन्मत्तयौवनाः पाशांकुशौ दर्पणं च पानपात्रसुधामयं विधान्य सर्वसुभगाः साध
काभीष्टदायकाः सर्वसंक्षोभणी पूर्वं यजेत्त्रिपुरवासिनी सर्ववश्यकरीमुद्रां दर्शयित्वा विचक्षणः ततः
एताः संप्रदाययोगिन्य इति वैक्रमात् देव्यै पुष्पांजलिं दत्वा ततः सर्वार्थसाधके बहिर्दशारके चक्रे सामान्य
सुधया शिवे पूर्ववत्तर्पयेद्देवि सर्वसिद्धिप्रदामुखाः सर्वसिद्धिप्रदा देवी सर्वसंपत्प्रदा तथा सर्वप्रियंकरी देवी
सर्वमंगलकारिणी सर्वकामप्रदा देवी सर्वदुःखप्रमोचिनी सर्वमृत्युप्रशमनी सर्वविघ्नविनाशिनी सर्वा
गसुंदरी देवी सर्वसौभाग्यदायिनी सर्वार्थसाधके चक्रे कुलकौलाभिधाः पराः सर्वसिद्धिप्रदाख्ययोगि
न्यः सर्वकामदाः जपाकुसुमसंकाशाः स्फुरन्मणिविभूषिताः महासौभाग्यगंभीराः पीनवृत्तघनस्तनाः
रत्नपंक्तिविनिर्मितसाधुकेस्मितभूषणा· नानारत्नमयान्दीपान्दधत्यो हसिताननाः पाशांकुशधराः सर्वा
रत्नदानपरास्तथा सर्वसिद्धिप्रदाख्ये तु चक्रे श्रीत्रिपुरां यजेत् ततः सर्वोन्मादिनीं च मुद्रां संदर्शयेद्बुधः
एताः कुलकौलाख्ययोगिन्य इति पूर्ववत् देव्यै पुष्पांजलिं दद्यात् ततः पुष्पाद्यैर्नियजेत् सर्वरक्षाकरे चक्रे तद्दशारमहे
श्वरि· सामान्यपात्रसुधया पश्चिमादिक्रमेण तु· सर्वानंदमयी देवी सर्वरक्षास्वरूपिणी पूजनीया प्रयत्नेन सर्वे

वि॰
या॰व
१२८

137

सर्वज्ञा सर्वशक्तिश्च सर्वैश्वर्यफलप्रदा सर्वज्ञानमयी चैव सर्वव्याधिविनाशिनी॰ सर्वाधारस्वरूपा च सर्वपापहरा तथा
सर्वानंदमयी देवी सर्वरक्षास्वरूपिणी॰ पूजनीया प्रयत्नेन सर्वेप्सितफलप्रदा॰ सर्वकामप्रदा देवी निगर्भाख्याशु
भप्रदा॰ सर्वाज्ञायाश्च योगिन्यो ज्वलत्पावकतेजसः उद्यत्सूर्यसहस्राभा मुक्तालंकारभूषिताः पाशटंकायुधज्ञा
नमुद्रावरदसत्कराः सर्वज्ञा देवि पुरतो यजेत्त्रिपुरमालिनी॰ देव्यै संदर्शयेद्देवि मुद्रां सर्वमहांकुशा॰ एता निग
र्भयोगिन्यः सर्वरक्षाकराभिधे चक्रे समुद्रास्त्वादि दद्यात्पुष्पांजलिं ततः सर्वरोगहराधारचक्रे सामान्यविंदु
भिः पश्चिमादिक्रमेणैव वशिन्याद्यां यजेत्क्रमात् वशिनी कामेश्वरी च मोदिनी विमलारुणा॰ जयिनी सर्वेश्व
री च कौलिनी वाग्धीश्वरा॰ सर्वरोगहरे चक्रे रहस्याख्याः शुभप्रदाः योगिन्यः कामदायिन्यो दाडिमीकुसुम
प्रभा रक्तवस्त्रपरीधाना रक्तगंधानुलेपनाः नानाभरणसंपन्नाः पंचबाणधनुर्धराः पुस्तकं वरदानं च दधा
नावाक्प्रदा इमाः यजेत्त्रिपुरसिद्धां च चक्रे श्रीवशिनीपुरे मुद्रां प्रदर्शयेत्सर्वखेचरीं भाग्यहेतवे एता रहस्य
योगिन्यो पादिना च महेशितुः अभीष्टसिद्धिसिनि च देव्यै पुष्पांजलिं क्षिपेत् अंतराले महाचक्रे सर्वसिद्धिप्रदा
भिधे सामान्यपात्रस्य धयायजेदायुधदेवताः कामेश्वरस्य कामेशबाणजंभकाबाणदेवताः मोहकाचापदेव्यश्च पा
शदेव्यो वशंकराः स्तंभ · · · · · · · त्र्येवांकुशदेवताः ततः श्रीपात्रस्य धयानिजाग्रादित्रिकोणके वा
मवाद्ये सूर्यचक्रे कामरूपे च पीठके मित्रेशनाथात्मिका च तत्याजाग्रदधिष्ठिता रुद्रात्मशक्तिसदिताका

मेशी सर्वसिद्धिदा· ततो वै कामराजाख्ये सोमचक्रे महेश्वरी पीठे शर्णगिरौ चैवोड्डीशनाथात्मिका ततः तथा
स्वमाधिष्ठिता च विष्णुशक्तिरुदीरिता· वज्रेश्वरी महादेवी ततस्तृतीयकोणके शक्त्याख्ये वह्निचक्रे च पी
ठे जालंधरे ततः षष्ठीच नाथात्मिका च तथा रुद्रप्रधिष्ठिता ब्रह्मात्मशक्तिरुदितो देवि श्रीभगमालिनी
बिंदुमध्ये महेशानि हृत्त्रयविजृंभिते समस्तव्योमचक्रे च पीठे चोड्याणसंज्ञके चर्यानाथात्मिका चै
वतुरीयाधिष्ठिता ततः परब्रह्मात्मशक्तिः श्रीमहात्रिपुरसुंदरी· सर्वसिद्धिप्रदे चक्रे योगिन्यः सिद्धिदाय
काः अतिरहस्यसंज्ञास्ता आयुधाष्टकदेवताः कामेश्वर्यादित्रिकोणकोणत्रयविराजिताः आयुधा
ष्टकदेवतास्तास्यैव नोन्मत्तविग्रहाः रक्तविद्युल्लताकारा उद्दामकुसुमान्विताः नवरत्नविशोभाढ्याः स्वस्वा
युधधराः क्रमात् वराभये सुधापात्रं धारयंत्यः सुखावहाः कामेश्वरी शुक्लवर्णा शुक्लमाल्यानुलेपना
मुक्ताफलस्फुरद्भूषा नानाभरणभूषिताः पुस्तकं वाक्षसूत्रं च वरदं चाभयं तथा दधती चाग्रकोणस्था रु
द्रशक्तिः प्रकीर्तिता· वज्रेश्वरी कुंकुमाभा स्फुरद्रत्नविभूषणा बालार्कवसना नीलकर्णा त्रिविलोचना
दक्षकोणस्थिता देवी विष्णुशक्तिरियं मता सद्यः संतप्तहेमाभा भगमाला सुशोभिता अनर्घ्यरत्नघटित·
भूषणा भुवनेश्वरी पाशांकुशज्ञानमुद्रावरदानकरांबुजा· ब्रह्मशक्तिर्महेशानि तापत्रयनिकृंतनी·३

दक्षकोणस्थितादेवीसर्वकामफलप्रदा· चक्रेशींत्रिपुरांबांचकामेशींपुरतोयजेत् पंचोपचारैराराध्यवी
जमुद्रांप्रदर्शयेत् पराख्यातिरहस्याख्यायोगिन्यइतिपूर्ववत् पुष्पांजलिंप्रदद्याद्दैदेव्यैदेविमहेश्वरि· विं
दुचक्रेमहेशानिसर्वानंदमयाभिधे पश्चिमादिक्रमेणैवश्रीपात्रसुधयाशिवे कूटत्रयक्रमेणैवरतिःप्री
तिर्मनोभवा· पूजनीयाःप्रयत्नेनश्रीमत्त्रिपुरसुंदरी सर्वमंत्रेश्वरीचैवसर्वचक्रेश्वरीतथा सर्वतंत्रेश्व
रीचैवसर्वयोगेश्वरीतथा सर्वभोगेश्वरीचैवसर्ववीरेश्वरीतथा सर्वपीठेश्वरीचैवसर्ववागीश्वरीतथा·
सर्वविद्येश्वरीचैवसर्वसिद्धेश्वरीतथा सर्वलोकेश्वरीचैवसर्वयोगेश्वरीतथा सर्वभोगेश्वरीचैवसर्ववी
रेश्वरीतथा सर्वपीठेश्वरीचैवसर्ववागीश्वरीतथा सर्वविद्येश्वरीचैवसर्वचक्रेश्वरीतथा सर्वानंदमये
चक्रेपरेशाख्यातिगोचरे परापररहस्याख्यायोगिन्यःप्रतिपूर्विकाः उद्यत्सूर्यसहस्राभानानालंकारभू
षिताः पाशांकुशधराःसर्वाज्ञानमुद्राभयेतथा दधानायौवनप्रोच्छाःपीनतुंगघनस्तनाः श्रीविद्या
भिमुखाःसर्वादेवताःपरिचिंतयेत् श्रीविद्यांचापिसर्वासामाभिमुख्येस्थितांस्मरेत् अथचारशमयःसर्वादे
वीरूपेणचिंतयेत् श्रीचक्रेपरमेशानिस्वतंत्रेस्वसमप्रभाः चक्रेशीरतिपूर्वेतमहात्रिपुरभैरवी पूजयित्वाततःसर्व
योनिमुद्रांप्रदर्शयेत् परापररहस्याख्ययोगिन्यादिनाप्रिये देव्यैपुष्पांजलिंदद्यात्तर्पयेच्चत्रिधात्रिधा इतिविद्यार्णवेदशमाश्वासः ९

अघोरान्तामन्त्रायावरणानि तथाकलाणिवे· नवावरणपूजांचक्रनादेवीमतर्प्यच षोडशैरुपचारैस्तु सांगंसावरणंशिवं पू
जयेन्मूलमंत्रेणगंधपुष्पाक्षतयादिभिः सदाशिवोत्थोदिताशेषपरिवारांचशांभवि प्रणवादिनमोंतेनतन्नाम्नाम्प्रपूजये
त् उत्तरतंत्रे विदावासनरूपेणस्थितंचपरमंशिवं पराप्रासादमंत्रेणतुरीयाविद्ययाथवाः षोडशैरुपचारैस्तुपूजयेत्त
र्पयेत्त्रिधा गुरुपात्रामृतेनैवाग्रवाश्रीपात्रबिंदुभिः पंचप्रणवसंपुटार्चाश्चशिवशक्त्यात्मकादिच परमादिशिवश्रीचपा
दुकांतर्पयामिच तर्पयेत्दशधाप्रोक्तदशमुद्रांप्रदर्शयेत् बिंदुचक्रेचपूर्वादिचतुर्दिक्षुचमध्यतः गुरुपात्रामृतेनैव
षडंगावरणंयजेत् ईशानस्तत्पुरुषाघोरवामसद्यादिमूलकैः षडंगावरणयष्ट्वाब्रह्मविष्णोस्तथैवच रुद्रशंभुपराणां
चविश्रांतिचरणान्यजेत् आद्यनाथादिगुरवोदिविसिद्धौघमानवाः पूजनीयाःप्रयत्नेनसर्वकामार्थसिद्धये ततोष्टकोण
संधिस्थग्रंथ्यष्टकविभेदतः युग्मशःपार्श्वयुग्मेषुश्रीपात्रामृतबिंदुभिः कुलयोगिनिपूर्वादिमूलविद्यास्तुषोडशः ध
नपाशांकुशारक्तावरदाभयपाणयः पूजयेत्तर्पयेच्चापितेतोंतर्दशकोणके चतुर्दिक्षुततोह्योथः श्रीपात्रामृतबिंदुभिः
यजेत्षडाधारविद्यानंदाद्यस्यदशारके: ईशानस्यकलायस्तामन्वस्त्रेषुरुषस्यतु: अघोरस्यकलाष्टदलग्रंथिषुसंय
जेत् षोडशच्छदपद्मेतुवामदेवकलायजेत्. सद्योजातकलाभूमिश्रेरंसंपूजयेत्ततः श्रीचक्रस्यांतरालेषुकेसरेषुचवेक्र
मात् चतुरस्रप्रक्रमेणसामान्यार्घ्यस्यबिंदुभिः सदाशिवोत्थोदिताशेषदेवतापरिपूजयेत् षट्शांभवमहाभूमीनांबिंदु
चक्रेतुपूजनं इत्थंपूजांविधायाथषोडशैरुपचारकैः सर्वावरणसंपूर्णांसंपूज्यतदनंतरं इतिगामार्गिसंताया ते
वेद्यषड्रसोपेतकामधेनुपवित्रतं इभाकर्पूरसहितंताम्बूलपरशक्तये निम्नहोमप्रकुर्वीतपूर्वोक्तविधिनाप्रिये यथा

वि॰ ११
ली॰ व॰
१२५
139

शक्तिजपं कुर्य्यान्नत्वातिं च परमेश्वरि आदिश्लोकद्वयेनापि तथा सौभाग्यदेवता: आद्यादिश्लोकद्वयं तु: श्रीमल्लक्ष्मीकोशाह्वयं पंच
सिंहासनात्मकः फलकल्पस्तु तानाचचाकरत्नस्फुरत्कल चतुरायतनानंदि चतुरन्वयकोशगं नित्यानंदिपरं ब्रह्म तथा
मनोमिस्व्रतापयइति तथा सौवर्णिकोस्फादिपात्रे वसुदलं लिखेत् गंधेन चक्रकमध्ये मुद्राचानयेवैन्यसेत् वसुपत्रेषु वा
स्मेन पूर्वितान्नवदीयकान् भ्रामयेद्रत्नविद्याभिस्त्रिधा धृत्वाथ मस्तके मूलेन तां स्मरेद्देवं सर्वविघ्नोपशान्तये रत्नविद्यातु
ज्ञानार्णवे गतैव यमुना: पद्माद्दिद्वया: क्रमशः स्मिवे वामकर्णविशोभाध्या बिंदुभूषितमस्तका: रमामायासंपुटे
नक्रेशीयं नवाक्षरी श्रीं क्लीं ह्लूं ह्लूं लृं स्त्रं क्लीं श्रीं इति स्वच्छंदविग्रहः प्रधानतन्त्रऋषि: प्रोक्तस्त्रिष्टुप्छंदः प्रकीर्तितं रत्नेश्वरी
देवतास्यान्माया बीजं तु बीजकं श्रीबीजं शक्तिरुद्दिष्टा ग्लूं बीजं कीलकं स्मृतं स्वप्रकाशानंदवंशी विनियोगः प्रकीर्तितः
माययादीर्घभाजा च षडंगानि प्रविन्यसेत् रत्नेश्वरीं रत्नविभूषितांगीं माणिक्यमौलिं तरुणार्ककांतिं करैर्वदंतीं नवरत्नदी
याप्रकाशमानां मनसा स्मरामीति तथा समस्तचक्रचक्रेशियुते देवि नवात्मिके आरार्त्तिकमिदं देवि गृहाण मम सिद्धये
मंडलं वा ततः कुर्य्यात्साधको भूमिजानुकः वहस्नुटेन हस्ताभ्यां मंडलोद्धारलेखनं चतुरस्रे व्योमचक्रं क्रमेणानेन पूजयेत्
तारं च भुवनेशानीं व्यापकादि च मंडलं ॐ नवाम्भवहूम्मेत्रोमत्र: सूर्य्यात्तरो भवेत् अग्नेरिंदमिश्रभागेन मायारेखाश्च पूजितं ॥
संस्थाप्य पात्रं तत्रैव कलार्णेन बलिं हरेत् तारं परां सर्वविघ्नकृद्भ्यः सर्वं च भूलिखेत् तेभ्यो ऽव क्रिजायाच त्रिवारोच्चारणाद्ब
लिः पूर्वोक्तबलिदानं तु कुर्य्याद्विघ्नोपशांतये चतुर्थी बलिदानं तु त्रिषु लोकेषु दुर्लभः ततः कुमारी: संतर्प्य विप्रोरेपानयाथवा
मयूरवान्परमेश्वर्य्या: संभाव्य मनु वितमः खेचर्य्या: शक्तिचक्रस्य स्वामिनी संपदं परां योजयेदात्मनि ज्ञानगहने कृपयागुरो

शिवकोणे देशिके म्योतिर्मालं सिद्धये क्षिपेत् अर्घ्यपात्रं ततो देवि गुरवे गुरुमंत्रवित् नाममंत्रेण च स्वस्य तर्पयेदुपदेशतः वाम
मार्गेण देवेशि तत्त्वमुद्राधरः शुचिः पुनराधारगं कुर्यादाचारे दीपलक्षणं आरार्त्रिकस्य मध्यस्थमूलेनैव तु भक्षयेत् कपा
लिन्या वा पिपात्रेन यावाविसमुद्भवेत् द्वितीयं तत्त्वगंदद्वे संयोगेनैव पार्वति तत्त्वत्रयेण संयोगात्तर्पयेत्सां तवासिनी प्रथ
मं ब्रह्मरूपं तु द्वितीयं सर्वमंत्रवित् तृतीयं मीशानरूपं पंचविज्ञेयं मुनिसत्तमैः किंचिदुल्लासमुद्राभिः पंचभिः परमेश्वरि श्री
गुरोराज्ञया देवि स्वयं पीत्वि शुद्धा भवेत् अधोमुखानि सर्वाणि पात्राण्यग्रे प्रतिष्ठयेत् आकृष्य मंत्रामंत्रस्य शेषिकाम्योदनादि
कं दत्वा तु परमेशानि सुखी न संशयः अनर्घ्यमपि विज्ञेयमतरैः कथितं मया जलाहारेण म्योयेन चंद्रदीपेन वा प्रिये गोपि
तव्यं त्वया भद्रे जननीजारगर्भवत् अत्र नित्यहोमविधानं दीक्षाप्रकारेणैव वक्ष्यामः प्रयोगत्रेय अथ प्रयोगाः तथा दक्षिणमूर्ति
संहितायां मूलाणुद्देवि प्रवक्ष्यामि विधायं त्रसमाहितः सहस्रजन्मजं पापं हंति मासेन देशिकः पूजयेद्भक्तवैविनैश्चपकैः स्वर्णजे
प्रिये अवश्यं सर्वकालेषु परमात्मा परो भवेत् नाशयेत्सर्वपापानि कोटिजन्मभवान्यपि सम्पुवलयापृष्ठीनेप्राप्य सुखमेधते
नित्यशः पूजयेद्देवी चपकैरजतोऽद्भवैः सबुद्धिमान्भवेद्देवि सर्वत्र विजयी भवेत् पश्चिमाभिमुखं लिंगं हृष्ट्वा प्रयमस्थापिवा स्व
यंभूर्वाणदेशे वा शैवस्थाने महेश्वरि तत्र स्थित्वा जपेन्मंत्रं प्रवालादसृजा तथा मुक्ताफलाद्वा पद्माद्वा स्फटिकोद्भवया तथा मा
णिक्याद्यमरागादिमनोहर्या जपेत्सुधः जपमालस्तेकमात्रेन भूचर्यौ विघ्नकारकाः तासामपि यदानासो दोभयानिमतागा
पि तदालक्तत्रयं कुर्यान्नियमेन तु विद्बुधः मानसेनाथवा वाचोपांशुना वा जपेत्सुधीः मानसोच्चारणे देवि जपकोटिफलप्र
दं उपांशुच्चारणाद्देवि वाचिकं शतधा भवेत् वाचिकं मुखमात्रस्याछ्री गुरोराज्ञया प्रिये तद्दशांशेन होमः स्यात्कुसुमैर्ब्र
ह्मवृक्षजैः कुसुंभपुष्पैर्जुरयात्स मधुत्रितयसंप्लुतैः सिद्धा भवति विद्येयं सर्वविद्यास्वरूपिणी योनिकुंडेऽथवाकारे ।

वि॰ १२
ए॰ व
१८॰
त
१०४

वर्त्तुलेत्वर्द्धचन्द्रे प्रिये नवत्रिकोणचक्रे वा चतुरस्रेऽथवास्वरे वाक्कान्तिर्योनिकुण्डे तु भगाद्याकर्षणं भवेत् वर्त्तुले श्रीपदं देवि चन्द्रार्द्धे तत्र
भवेत् नवत्रिकोणे महती खेचरीसिद्धिदा भवेत् चतुरस्रे तु सकलं स्तम्भजातं भवेत्सदा शान्तिकं पौष्टिकं लक्ष्मीरारोग्यं च सु
खादिकं पद्मांके दश सिद्धीस्तु साधयेन्नात्र संशयः मल्लिकामालतीभिश्च त्रिमध्वक्तैर्वचःपतिः करवीरजपाउष्यैः सद्दैतैर्भु
वनत्रये योषिद्दर्शनान्तो देवि कर्पूरैर्गुग्गुलैर्हुनेत् समग्रगुरसं दर्थ्यो वश्यतामस्य भवति हि हुत्वाफलत्रिमध्वक्तं खेचरत्व
चतुष्पथे दधिक्षीरमधुसर्पिर्लाजाहुत्वानकालभुक् अश्ववानवलद्दत्तं जपहिद्यासमाहितः तद्दशांशेन होमस्तु दूर्वाक्तवि
धिनायजेत् साधयेत्स्वर्गभूलोकपातालतलवासिनः राजिकालवणाभ्यां तु होमयेज्जगतीमिमां दध्नाशतानाष्टकं हुत्वा काल
मृत्युं विनाशयेत् घृतक्षीरदध्याद्यायुष्मतोऽष्टशतकं हुनेत् मध्वाज्यगुग्गुलैर्नैव राजेन्द्रं वशमानयेत् आरोग्यं पद्मनदूर्वाभ्यां हु
वनेन शताष्टकं मध्वाज्याक्तैरक्तवर्णैः करवीरैः सगुग्गुलैः हुनेल्लुं त्वं वशीकुर्य्यास्त्रिशान्तिधरणीभुजां मध्वक्तकरवीरैस्तु सौ
गभूयं च शानयेत् सप्तरात्रेण साज्येन शशिना पूर्ववद्यजेत् पाटलेयूथिकाकुन्दैः शतपत्रैश्च जातिभिः मालतीनववल्लीभि
र्मल्लिकापद्मकिंशुकैः पूजनाद्धवनाद्वापि मिश्रैर्वा मिश्रितैरपि सर्वसौभाग्यमाप्नोति वृद्ध्या वाक्कान्तिरुच्यते मध्वक्तैर्विल्व
पत्रैः फलैरसितनीरजैः नागरैराजचंपैश्च सिद्धयोषो भवन्ति हि नारिकेलैश्च खर्ज्जूरैर्द्राक्षाभिश्च तमः फलैः मनसाचिन्ति
तं कार्य्यं साधकस्य तु होमतः पूजनेन च होमेन श्रीविद्यां परितोषयेत् वकुं विकीर्य्य सर्वत्र कुमारीपूजनादिभिः दूर्वाक्तबलिदा
नेन ग्रहं संतोष्य चक्रमात् सुवासिनीश्च संपूज्य दद्यात् दक्षिणं सतां समग्रकुसुमं होमं कूष्माण्डं वा हुथा हुनेत् नारिकेलान्तरफ
लैः सकलैस्तु मनः प्रिये समग्रेणैव चूतस्य फलेन वदरं तथा पनसैः फलगर्भस्थैर्गरैर्विलोकितै हुनेत् जंबूफलं समग्रस्या
द्राक्षां वै वतथा हुनेत् रंभाफलं मनोभागं लक्ष्मुचेत्तवाणितं न हि फलं लघुसमग्रस्यात् कस्तूरीकुंकुमं वशी गुंजामात्रं हुनेद्दे

२

वितिलराजीशतंकृतेनेत् तथैवलक्षणलाजानामुष्टिमात्रंकृतेनेद्बुधः अन्नंतथासमात्रंहिपक्वान्नैस्तुतथाकृतेनतः इषुंतिक्रमुकार्द्रैनश्री
खण्डेक्षुस्तुकाकृतिः तथागुरुकृतेनेद्वांसमनः संतोषकारिभिः तत्त्वततुरुणभेदेनदधियुक्तैर्वेकृतेनेदा सर्वासामाकृतीनांतुमाने
देविमनःप्रियं कुण्डस्यपूजनेवक्ष्येमहाविघ्नविनाशनं चतुर्विंशतिसंख्याभिरंगुलीभिःसुविस्तरं खातंचरचयेत्कुण्डंसर्वत्र
सुमनोहरं चतुरस्रंसर्वतेत्रसुभगंमेखलास्ततः सर्वत्रैकांगुलत्यक्तास्तिस्रःकार्यास्तुशोभनाः आदिमवसुवेदानांसंख्यांगुलि
भिरुच्छ्रिताः चतुरंगुलविस्ताराश्चित्राधिपरमेश्वरि कुण्डस्यपश्चिमेभागेयोनिंकुर्यात्सलक्षणां एकांगुलिसुविस्तारांतुद्व्यंगु
लिसुविस्तरां मध्येषडंगुलांदेविद्व्यंगुलोच्चांमनोरमां लक्षणंचतुरस्रस्यकथितंतवसुन्दरि एतस्मिन्मानेयद्यान्यंतदप्ये
वंयथाभवेत् तेनमानेनसर्वाणिकुण्डानिरचयेद्बुधः गोमयोदकसंलिप्तेदूर्वान्वितेसमदिग्गते दक्षिणाग्रततांतत
तिस्रस्तिस्रश्चकारयेत् प्रणवेनाम्बुहस्तमध्येकल्पयेद्यागविष्टरं शर्करांविकिरेत्तत्रत्रिकोणंतन्मध्येलिखेत् तद्बहिर्वसुप
त्रंचततोभूमण्डलंलिखेत् उपर्युपरिभेदेनतत्रपीठंसमर्चयेत् मण्डूकंचतथारुद्रंकालाग्न्याख्यंततःपरं आधारशक्तिंकू
र्मंचततोनंतंवराहकं पृथिवींचतथाकंदंनालंपद्मंचकर्णिकां पद्मानिकेसराण्येवंततस्थानेषुपूजयेत् धर्मंज्ञानंचवै
राग्यमैश्वर्यंपीठवदिह्वच आधर्मांश्चैवकोणेषुपीठस्यपरिपूजयेत् पुनस्तारेणसंपूज्ययागविष्टरकंन्यसेत् मध्येश्रुतम
तीवेदमानरवेदस्तकं गुरुपादपिष्टितोध्यात्वातद्योनौसंपुटस्थितां वह्निकुंडेपरिभ्राम्यकिंचिदंगारकंत्यजेत् अस्त्रमंत्रेण
सकलान्भूतान्संत्रासयेत्सुधीः पश्चात्प्रज्वालयेद्वह्निंज्ञानाग्नेःसंक्रमेणत दीपाद्दीपांतरन्यायात्स्फुरत्तेसर्वतोमुखं श्वास
मार्गेणसंतुविद्योनिमार्गेणसंक्षिपेत् कुण्डत्रिकोणमध्येतुततस्तत्प्रज्वालयेत्सुधीः आदौव्याहृतिभिःपश्चाद्वह्निमंत्रेणचक्र
मात् चित्पिंगलहनहदहदहहहपचविधा सर्वज्ञाताप्यस्वाहामनुनाभ्यर्थयेत्ततः अग्निंप्रज्वलितंवदेजातवेदंकृताश

वि॰ ११
णी॰ व
१५१
151

नं स्ववर्णवर्णममलेशसन्नं विश्वतोमुखं उपस्थाने विधायैतस्य जिह्वाग्राणि प्रविन्यसेत् सप्तश्यावलराषक्षरमस्वस्वरयान्विता विंदु
नादांकिताः स्वसप्तजिह्वाग्नेः परिकीर्तिताः पद्मरागाभवर्णा च तृतीया भद्रलोहिता लोहिता च तथा श्वेता धूमिनी च कलाग्नि
का क्रमेण योजयेद्वीजैर्विन्यसेत्परमेश्वरि पञ्चिंगशुद्धमूर्द्धास्यनासानेत्रेषु चक्रमात् सुराश्च पितरश्चैव गंधर्वा यक्षपन्नगाः
पिशाचा राक्षसाश्चैव सप्तैतास्तास्तु सप्तसु सहस्रार्चिः स्वस्तिपूर्णो उत्तिष्ठपुरुषस्तथा धूमव्यापी सप्तजिह्वो धनुर्द्धर इतीरिताः
ऊं हृदंतैः षडंगानि ततो मूर्त्यष्टकं न्यसेत् जातवेदाः सप्तजिह्वो हव्यवाहन एव च अश्वोदरश्च तर्थः स्याद्वैश्वानर उभेततः ब
हुकौमारतेजाश्च विश्वदेवमुखं न्यसेत् मूर्द्धासि पार्श्वकुक्षौ च कटिपार्श्वांसकेषु च ऊं तास्तु सकलाज्ञेया अग्निमूर्त्यंगकाः क्रमा
त् एवं विन्यस्तदेहः सन् पर्युक्ष्यार्घ्यजलेन च द्विसुदर्भैः परिस्तीर्य ततस्तु परिषेचयेत् वैश्वानर ततो जातवेद पश्चादिहावह
लोहिताक्ष च सर्वाणि कर्माणि पि च साधय स्वाहा नोऽग्नरयनारंचक्रं विस्फिंगलापि च अनेन वह्निमभ्यर्च्य ततो जिह्वाः समर्चये
त् मध्ये च कोणषट्के च ततोऽंगानि प्रपूजयेत् मूर्तयो वसुपत्रेषु भूर्विं वेदिगधीश्वराः पुनर्वैश्वानरं सावित्रिनेत्रमरुणप्रभं स्रु
ल्लावरं रक्तरक्तभूषणं पद्मसंस्थितं वरशक्तिस्वस्तिकं चाभीतिहस्तैश्च विभ्रतं अनेकहेममालाभिरंकितं संस्मरेद्बुधः अ
ह्योत्तरकेन पात्राणि प्रोक्षयेत्कुशदचेततः उन्मुखीकृत्य सर्वाणि तत्र तत्र विनिःक्षिपेत् प्रणीताप्रोक्षणीयुग्मे जलं स्थाल्यां तु तं
तथा अन्यान्सर्वेषु पात्रेषु होमद्रव्याणि संक्षिपेत् स्रुक्पात्रे च स्रुवं पात्रे हुतशेषं विनिःक्षिपेत् स्थालीपूर्वान्विनोकुर्यात्सर्वतोभू
पयेत्प्रिये मेखलासु च सर्वासु वेष्टयेद्दीपमालिकाः त्रिपंक्त्या चाभितः कुंडं ततो व्याहृतिभिर्हुनेत् ब्रह्माणं दक्षिणेभ्यर्च्य क्रमेनै वै
श्वानराणेना गर्भाधानादिकं संस्कारं चिंतयेत्सिद्धिहेतवे अनेन विधिनाभ्यर्च्य श्रीचक्रं तत्र चिंतयेत् तदंतरे समावाह्य महात्रिपुरसुंद
री समस्तचक्रचक्रेशी संहिता होमयेत्ततः दशाज्याहुतिभिः पश्चात्स्नानादिक्रमेण च समस्तचक्रचक्रेशी प्रकटाद्याश्च योगि

नी होममेवं बहुनेनैव चैकैकामाहुतिक्रमात् ततः पूर्वोक्तमुद्रयैव होमयेत्सुभगोपरां हवने पद्मरागाया सर्वसिद्धिप्रदं भवेत्
रुद्ररक्ताम्बवर्णा च सर्वकामफलाप्तये लोहिताया भवेत्क्रान्तिः स्तम्भने चक्रमाद्भवेत् उच्चाटने तु धूम्रिम्या करालिन्या च मारणे
इति ते कथितं दिव्यं होमलक्षणमुत्तमं कृते विघ्नोपशमनी नान्यथा वरवर्णिनी दीपस्थानं समाश्रित्य जपहोमौ समाचरेत् वसु
कोष्ठं लिखेत्कूर्मं मध्ये स्थाने कल्पयेत् स्वरान्द्वंद्वविभागेन पूर्वादिक्रमतो लिखेत् कादयावर्गास्तु सप्तैते पूर्वादिक्रमतो लिखेत् अष्ट
वर्गोष्टमे योज्यः कूर्मचक्रमिदं भवेत् स्थानाद्दूरे यत्र देवि सिद्धिस्तत्र न संशयः स्थानाद्दूरं मुखं तेयं पार्श्वयोस्तस्य वै करौ तत्र शून्य
फलं मध्यकोष्ठयुग्मं तु मस्तकं उदरं कच्छपस्यैतत्पादौ तत्पश्चिमौ क्रमात् रोगहानिकरौ पुच्छे तयोर्मध्यगतं भवेत् दारिद्र्यदः
एवं तत्स्माद्धक्कसमाश्रयेत् तथैव सिद्धिर्नास्त्यत्र श्रीगुरोराजषाप्रियः देशं वा कल्पयेत्स्थानं नगरं ग्राममेव वा स्थानाद्दूरं य
त्र देवि सिद्धिस्तत्र न संशयः स्थानाद्दूरं मुखं तेयम्॥ पार्श्वयोस्तस्य वै करौ तत्र शून्यफलं मध्यकोष्ठयुग्मं तु मस्तकं दीपो वा
स्तीपि कर्तव्यः किं पुनर्हवने यजेत् खचक्रं सागरैश्चक्रराजं समालिख्य सिंदूररजसा प्रिये स्वयंभूकुसुमाक्तैः स्वकुसुमै रक्त
नैर्यजेत् नवावरणदेवीनां गायत्रीभिः समंततः गायत्रीसमन्त्रमुच्चार्य नदंतैर्यमुकं ततः वशमानय मे ते च ततस्त्वव
मुच्चरेत् ततश्चामुकदेवीश्रीपादुकां पूजयामि च एवमाकर्षणे मोहे स्तंभनोच्चाटकर्मसु समाहाभ्यंतरे मंत्री वांछितं सम
वाप्नुयात् अस्यार्थः कविहितविक्रे देशा सिंदूरादिरक्तद्रव्यैः स्वकराजं विलिख्य तेन स्थापनीयात्म पूजानंतरं यथोक्तपीठपूजां
विधाय स्वयंभूकुसुमाक्तैः रक्तैः पुष्पैर्वा आवरणपूजां कुर्यात् तत्र वशे ताराद्वयपूर्वकं ततस्तु गायत्रीमुच्चार्य अमुकदेवि अमु
कं मे वशमानय अथवा वशं कुरु कुरु वौषट् अमुकदेवीश्रीपादुकां पूजयामि इति प्रयोगः एवं प्रत्यावरणं प्रतिदेवीं पूज
येत् आकर्षणे अमुकमाकर्षयाकर्षयेति एवं स्तंभनादिप्रयोगे ऊहनीयमित्यर्थः तथा मूलाधारादिचक्रेषु श्रीच

वि० ११
णी० व
१४२
142

ॐ भावयन्पृथक्तत्तन्मन्त्राणि किरणैर्हृतान्धकस्य देवता: पार्थिवैः स्तंभनं कुर्य्यादिप्यादिष्वापमक्रोक्तफलानि ज्ञेयानि दक्षिणस्य
त्रिसंहितायां अथातः संप्रवक्ष्यामि चक्रराजस्य साधनं पर्वसंसिद्धविद्यायाः विनियोगक्रमं स्मरण ज्ञात्वा सिंदूररजसा चक्रंत
त्रविचिंतयेत् साध्यप्रतिकृतिं कृत्वा लेखनीकाम्बुभानतः ज्वलंतीं तत्क्षणाद्देवि मोहिताभयवर्ज्जिता त्यक्तलज्जा समायाति स्व
ध्यानात्कथ्यते प्रिये तन्मध्यस्थं स्थितो मंत्री चिंतयेदरुणप्रभां ध्यात्मानं च तथा साध्यं तथा सौभाग्यसुंदरः अरुणैरुपचारैस्तु पूज
न्मद्याहृतः यस्य नाम्ना पुनः सम्यक्संभवेद्दासपवदि अष्टहस्तीनामवर्णाष्टकमध्ये विलिखेत् योनिमुद्राधरो भूत्वा व
गादाकर्षणं भवेत् देवकन्यां राजकन्यां नागकन्यामथापि वा गोरोचनाकुंकुमाभ्यां समभागं च चंदनं अष्टोत्तरशताहृत्याति
लकं सर्वमोहनं पुष्पफलं जलं चान्नं गंधवस्त्रं च भूषणं ताम्बूलं सर्वजनं मंत्रयस्मै संप्रेषयेत्स तत् अंगना वीक्षणादेव दासी चास्य
भवत्प्रिये करवीरै रक्तवर्णैस्त्रिमाधुरैक्तैः प्रपूजयेत् चिंतयन्मासमात्रं हि साध्या खेलललनां ततः इति कुर्वन्महेशानी पूजयेद
रुणप्रभां सिंदूररचिते चक्रे राजानं मोहयेत्क्षणात् त्रैलोक्यडुलभां वापि रंभां वा कर्षयेद्ध्रुवं चितागारेण चक्रं तल्लिखेद्दक
द्रवेण हि वध्वा वा हावथका पिज्वरं नाशयति तत्क्षणात् अर्क्कानिंबद्रवाभ्यां तल्लेखिन्या काकस्य संलिखेत् गोमूत्रे स्थापयेत्तत्र भ
वेद्विद्वेषणं क्षणात् पूपयेच्चंदनेनाग्रे वस्त्रं वा धारयेत्ततः अष्टोत्तरशताहृत्या मोहयेद्भुवनत्रयं लिप्तगोमयभूमौ तल्लिखेद्रो
चनया ततः स्वरूपां प्रतिमां रम्यां भूषाढ्यां परिचिंतयेत् तन्मालगालहन्नाभिजन्ममण्डलयोजितं जन्मनाम महाविद्यामंकु
शांतर्विदर्भितं सर्वांगसंधिसंलीनं कामकूटं समालिखेत् साध्याशाभिमुखो भूत्वा श्रीविद्यान्यासविग्रहः क्षोभणीवीजम
द्रायां विद्यामष्टशतं जपेत् योजयेत्ताकामगेहे चंद्रसूर्यकलात्मके सानुरागातिविमलाकामसायकपीडिता त्रैलोक्यसुं
दरीनाम क्षणादायाति मोहिता अथवा मातृकाचक्रं चाद्यं संवेष्ट्य मंत्रवित् चक्रं प्रपूजयेत्सम्यक् विद्याशर्णीं च धारयेत्

५

अवध्यः सर्वदुष्टानां व्याघ्रादीनां न संशयः ॥ श्रीखण्डागरुकस्तूरीकर्पूरैश्च सकुंकुमैः ॥ स्वनामकृतोल्लेखं पूर्ववन्मातृकां ततो ज
रामरक्षेत् साधकस्य न संशयः ॥ अनेनैव प्रकारेण रोचनागरुकुंकुमैः ॥ चक्रं विलिख्य साध्यानि साधकानि विदर्भितं ॥ त्रैलोक्य
मोहनो मंत्री भवत्येव न संशयः ॥ कामकूटेन देवेशि संदर्भ्य हृदयगतं ॥ साध्यनाम त्रिकोणांतर्मातृकावेष्टयेद्धृदि ॥ स्मरेण
मध्यगतं यावच्छिखायां यत्र कुत्रचित् ॥ लोकपालाश्च राजानो दुष्टाश्च लोकाः संस्थिताः ॥ ते सर्वे वशमायान्ति सन्निपातादयो
ज्वराः ॥ अनेन विधिना नामपूरीसंदर्भसंदीपयेत् ॥ चतुष्पथे मध्यदेशादिषु पूर्वादिषु क्रमात् ॥ तस्य सौभाग्यमायाति राजा
नः किंकराः सदा ॥ स्मरतेजोमयं दृष्ट्वा प्रज्वलंतीं चराचरं ॥ चक्रांतःस्थितं येन त्रिस्त्रिमासषट्कं ततो नरः ॥ तेन कंदर्पसुभगो
लोके भवति निश्चयात् ॥ दृष्ट्याकर्षयते लोकान् विषं नाशयति ज्वरान् ॥ तथा विषं च हरति दृष्ट्यावेशं करोति च ॥ रात्रौ सिंदू
रं लिखितं पूजयेदेकचित्ततः ॥ करोत्याकर्षणं हृद्यं योजनानां शतादपि ॥ अग्न्यादिकोणेषु क्रमेण परिपूजयेत् ॥ यथा
तथैव लोको यवशो भवति नान्यथा ॥ भूर्जपत्रे लिखेच्चक्रं रोचनागुरुकुंकुमैः ॥ स्वनामसंदर्भितं कुर्याद्दृशावाप्तपुटभेदनं म
उले विषमस्थाने भूमौ चक्रं निधापयेत् ॥ धारयेद्वा ततो मंत्री पूरितो भवति क्षणात् ॥ उन्मत्तरसलाक्षाद्यैः क्षीरकुंकुमरोचनाः
कस्तूर्या लक्तसहितां एकीकृत्य तु संलिखेत् ॥ यन्नाम तस्य देवेशि चौरजं व्याघ्रजं भयं ॥ ग्रहजं व्याधिजं चैव रिपुजं सिंहजं भयं
अहिजं वाग्निजं वापि सर्वं मोहयति क्षणात् ॥ रोचनाकुंकुमाभ्यां तु मध्यगां संलिखेद्बुधः ॥ त्रिकोणे भयगां चैव साध्यनामा
कितां मयः ॥ तच्चक्रं धारयेद्यस्तु स माहात्म्यकिंकरो भवेत् ॥ पीतद्रव्येण चक्रांते लिखेद्विद्यामथ स्तनः ॥ साध्यनाम विलिख्यैतस्म
वेष्टाद्दिशि संदीपयेत् ॥ तस्माद्बलापि जीवोपि सर्वज्ञो मूकतां व्रजेत् ॥ अनेन विधिना नीलीरसेन विलिखेच्च तत् ॥ दक्षिणाभिमु
खो मंत्री वश्यार्थं दग्धारिपुस्तनं देहेत् ॥ महिषाश्वपुरीषेण गोमूत्रेण च संलिखेत् ॥ आरनालस्थितं कुर्याद्द्वेषिद्वेषणं क्षणात्

वि॰ ११
ए॰ व॰
१४३
143

साध्यनामलिखित्वमध्येकाकपदेनसंचयेत् संलिख्यरोचनाद्यैश्चाकाशेहरिद्रयायथा शत्रूनुच्चाटयेदाशुदृष्टोच्चाटोद्यमीरितः महा
नीलिरसोऽन्विनारोचनाकुंकुमविमिश्रितैः लाक्षारसैर्लिखेच्चक्रंचतुर्वर्णान्वशंनयेत् अनेनविधिनानीरेस्थापयेत्तज्जलेनतु सौभा
ग्यमहदाप्नोतिस्नानपानान्नसंशयः पीतेचक्रेयजेत्सर्वंस्तम्भयेत्सर्ववादिनः सिन्दूरलिखितेचक्रेउत्तरेलोकवश्यकृत् पश्चि
मेपूजितेचक्रेगैरिकालिखितेहृदात् मंत्रिणोदेवतावश्याः किंपुनर्योषितःप्रिये नष्टेवद्दक्षिणास्यकृत्तलंचक्रंसमर्चयेत्
साध्यस्यमंत्रहानिःस्यान्मरणंचविशेषतः क्रमादिग्गतस्यास्यसन्निकृष्टकोणादिषुक्रमात् संभविद्वेषणंव्याधिमुच्चाटकृत्तनेनरः
उग्रेवश्यकरंहिंस्रंरोचनालिखितंहृदात् दग्धातद्वह्निमध्यस्यसर्वशत्रून्विनाशयेत् गोमूत्रमध्यगंचैतत्देवदुच्चाटनंरिपोः
विद्वेषणंभवेच्चक्रेतेनैवपरमेश्वरि सिंदूरेणलिखेच्चक्रंनिर्जनेतुचतुष्पथे सर्वांवाहयतआरभ्यमध्यान्तंमातृकांलिखेत् कुला
चारक्रमेणैवताश्चासंपूजयेत्क्रमात् साधकःखेचरोदेविजायतेनात्रसंशयः चतुर्दश्यांनिशिस्वस्थोरुद्रभूमौप्रपूजयेत् षण्मास
सप्तजापेनसाक्षाद्रुद्रइवापरः अंजनंविवरंसिद्धिंगुटिकांपादुकांजनं खड्गंवेतालसौभाग्यंयक्षिणीचेटकादिकं सकलंसि
द्धिजननंमंत्रीप्राप्नोतिनान्यथा चतुर्दश्यांचतुर्दश्यांप्रत्यहंप्रासमाहितः एकविंशतिरात्रंतुनिशिप्रेतमितोजले श्रीच
क्रंपूजयेद्यस्तुरहस्यंसाधकः पाशांकुशधनुर्बाणैःपौरुषैर्महेश्वरि कामोभूत्वासर्वभूस्थपानालनलयोषितो
हर्षोत्कर्षास्वयंचैवमहदाकर्षणंभवेत् तत्कामेश्वरीशास्त्रेह्यात्माभुवनत्रये पुरुषाकर्षणंचैतद्राजानःकिंकराःप्रिये एतत्काम
कलाध्यानंकथितंबीजभेदतः वाग्भवाराधनेदेविज्ञानंसारस्वतंभवेत् श्वेताभरणवस्त्राभ्यांश्वेतपुष्पैःसमर्चयेत् अनेन
विधिनादेविवाग्भवाराधनंभवेत् अथकामकलानामसामर्थ्यंशृणुपार्वति कामंमन्मथकंदर्पंमकरध्वजएवच महाका
मश्चसर्वीकाःपंचकामाःक्रमेणतु कामंमन्मथमध्यस्थंदेविकंदर्पवेशमगं नमस्करंसौमीनकेतंमहाकामेसमात्मकं अनेन

कामततेनमोहयेज्जगतीमिमां मूलादिसृष्टिसंहारविसतंततनीयसी तस्मात्कुण्डलिनी शक्तिः शक्तिकूटे महेश्वरि त्रिकूटात्त्रि
पुराद्देवी सर्वसिद्धिप्रदा भवेत् ततः षड्विंधतः कोट्यो योगिनीनां महौजसां चक्रमेतत्समाश्रित्य सततं सिद्धिप्रदाः सदेति अथ
नानावैदिकमंत्रमिश्रिताः श्रीविद्यामंत्राः उध्रियन्ते सकृदसंग्रहे प्रणवं कमला माया कामपीठं च गणपं ततो वाग्भवकूटं
चयदयकच्चूहत्रहन् कामराजमहाकूटं उद्गाम्यभिसूर्यश्च शक्तिकूटं समालिख्य सर्वजनं दिङ्नेवशे ग्लं गं गणपतिं पश्चा
द्वरांतेवरदेतिच ततः सर्वजनं मे तेवशमानय वद्वयं गणराजेश्वरो मंत्रः सर्वैश्वर्यफलप्रदः सर्ववश्यकरः पुंसामायुरा
रोग्यसिद्धिदः महागणपतेर्मंत्रे ऋष्टं भजातवेदसे अर्द्धं संवादसूत्रस्य पुनरर्द्धं क्रमालिखेत् ततः षण्णां निचाक्षराणि त्रिकू
टैर्गर्भितानि च प्रत्यहं जपतां पुंसां यथाशक्तिविशेषतः जगत्संमोहनं वश्यं कांतिसौभाग्यपुष्टिदं अस्यार्थः ओं श्रीं ह्रीं क्लीं
ग्लौं गँ गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा कएईलह्रीं जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः सनः
पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः हसकहल ह्रीं संसमिद्युवसे वृषन् अग्ने विश्वान्यर्य आ इडस्पदे समिध्य
सेसनो वसून्याभर संगच्छध्वं संवदध्वं संवो मनांसि जानताम् देवभागं यथा पूर्वे संजानाना उपासते सकलह्रीं समानो मंत्रः
ममितिः समानी समानं मनः सहचित्तमेषां समानं मंत्रमभिमंत्रये वः समानेन वो हविषा जुहोमि समानीव आकूतिः स
मानाहृदयानि वः समानमस्तु वो मनो यथा वः सुसहासति इत्येहारः भद्रंनो अभिमंत्रस्य गर्भस्या सुंदरी जपेत् कुबेर
इव वित्ताढ्यो जायते सुविसानवः अस्यार्थः भद्रंनो अभिवातय मनः कएईलह्रीं मरुतामोजसे स्वाहा हसकहल ह्रीं इंद्रो वि
श्वस्य राजति सकलह्रीं शन्नो भवद्विपदे शं चतुष्पदे इति तथा यदा देवीवचनात् त्रिंशसर्पदि गुणैततः अकाचकं समाख्यातं
महासारस्वतप्रदं पतज्जपस्य विधानं प्राग्वत्कृत्वा पृथक्पृथक् पंचमंत्राः समुद्दिष्टा महासारस्वतप्रदाः अस्यार्थः यदा

वि· ११
ए·व
१५४
144

म्वदंतिविचेतननानिकयेईलक्ष्मी राष्ट्रीदेवानांनिषदासमेंद्राहसकरहलङ्गीचससखऊर्जंडड्हेपयांसिसकलक्ष्मींकसिदस्याःपरमंज
गाम १ देवींवाचमजनयंतदेवाःकपर्ईलक्ष्मीनोविश्वरूपाःपशवोवदंति हृ सानोमंद्रेषमूर्जंदुहानासकधेनुर्वागस्मानुपसुष्टुतैतु
चत्वारिवाक्परिमितापदानिक तानिविदुर्ब्राह्मणायेमनीषिणः हृगुहात्रीणिनिहितानेंगयंतिस तुरीयंवाचोमनुष्यावदंति ३ स
सर्पशरीरेमेंतीवाधमानाक· हृहस्तिमायजमदग्निदत्वाह श्वासत्ध्यसरुद्धहितानननानस श्रवोदेवेषुमनमर्जयं ४ ससर्पशरीरभंरंत
यमेभरंक प्रथिश्रवःपांचजन्यासुकृष्टिषु· सायदासारव्यभाङ्ईयानाम यामेपलक्तिजमदग्नयोदडुः ५ इतिपंचमंत्राः त
था यच्छंदसाप्रारीरंमेयोदेवानामितित्रयं सुंदरिगर्भंगंजप्यानस्थयकरध्यगानंद्विजः मेधावीश्रुतिधारीचनीरोगीचप्रियंवदः वक्तु
श्रुतःशास्त्रकर्ताश्रुतान्वेदागमानपि नविस्मरतिमर्त्योसौसर्वज्ञोभवतिध्रुवं अस्यार्थः यच्छंदसामृषभोविश्वरूपःक छं
दोभ्योध्यमृतात्संवभूव सेंद्रोमेधयास्पृणोतिस· अमृतस्यदेवधारणोभूयासम १ शरीरंमेविचर्षणंक· जिह्वामेम
धुमत्तमाह· मनसःकाममाकूतिंसवाचःसत्यमशीमहि २ योदेवानांप्रथमंपुरस्तात्क· विश्वाधिपोमहर्षिःरुद्रः हिरण्य
गर्भंपश्यतजायमानंस सनोदेवश्शुभायस्मृत्यासंयुनक्तु· ३ इतित्रयोमंत्राः तथापद्मादित्रेह्यमस्मानेंद्राग्नीत्रयंभवेत् चत
र्थीत्वंसोमचेतिपंचमीतम्प्रजायते यतत्वचर्चेगर्भस्याहंदेवीप्रजपेत्स्थकृ योनरस्तस्यनियतंधनधान्यधरासुतैः गोगजाश्वावि
महिषदास्यभूषादिसंकुलः लक्ष्मीसमावहेद्दस्यापुत्रपौत्रादिगामिनी अस्यार्थः पद्मादित्रेविश्वेदेवायहस्रेक यद्देवाँश्रिये
ममनसाहविर्भिः हृ· बृहस्पतेसुप्रजावीरवंतः स· वयंस्यामपतयोरयीणाम् १ यूयमस्मान्नयतवस्योःअच्छाक· निःहृति
भ्योमरुतोगृह्णानाः हृ· जुषध्वंनोहव्यदातिंयजत्रास· वयंस्यामपतयोरयीणाम् २ एवेंद्राग्नीपपिवांसासुतस्यकंवि
स्वस्मायंसंजयतंधनानिंह तन्नोमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीःउतद्यौः ३ त्वंसोमप्रचिकितोमनीषाक· त्वंर

२

जिह्मनुनेषिपंथांह· तवमत्मीतिपितरोनः इंद्रोस· देवेभुरत्नसमजनधीरा: ४ प्रजापतेनत्वदेतान्यन्यःक· विश्वाजातानिपरिता
बभूवह· यत्कामास्तेजुहुमस्तन्नोअस्तुस· वयंस्यामपतयोरयीणां ५ इतिपंचमंत्राः तथा अथयालक्ष्मपद्मयीगर्भस्थासुद
रीयजेत् धनैर्धान्यैश्चविभवैरश्वैश्चगवादिभिः आपूरयंतीमनंततेवरमेनरमा· अस्यार्थः यालक्ष्मीसिंधुसंभवाक· अतिर्थ
तुगुरुवस्तः ह· यमाविश्वावसुर्हेदेवीस· सदानोजुषतांशृहम् २ अश्वदायिगोदायिक· धनदायिमहाधनेह· धनमेजुषतां
देवीस· सर्वकामार्थसिद्धये २ इतिमंत्रद्वयं· कलातिथ्यर्चसूक्तस्यमंत्रपादचतुष्टयेः संपुटीकृत्यजपतोफलाम्याचत्मरह
स्फुटं अस्यार्थः कलाऋचसूक्तंपुरुषसूक्तंसहस्रशीर्षेत्यादियजुर्वेदेप्रसिद्धं· तिथ्यर्वसूक्तंश्रीसूक्तं· हिरण्यवर्णामित्यादि
ऋग्वेदेप्रसिद्धं संपुटीकरणेन· सहस्रशीर्षापुरुषःसहस्राक्षः सहस्रपात् सभूमिंविश्वतोवृत्वास· अत्यतिष्ठद्दशांगुलम् १
पुरुषएवेदंसर्वंह· यद्भूतंयच्चभाव्यंह· उतामृतत्वस्येशानः स· यदन्नेनातिरोहति २ एतावानस्यमहिमाह अतोज्यायां
श्चपूरुषःह· पादोस्यविश्वाभूतानिस· त्रिपादस्यामृतंदिवि ३ त्रिपादूर्ध्वउदैत्पुरुषःह· पादोस्येहाभवत्पुनःह· ततोवि
ष्वङ्व्यक्रामत्स· साशनानशनेअभिः ४ तस्माद्विराडजायतह· विराजोअधिपूरुषःह· सजातोअत्यरिच्यतसपश्चाद्भू
मिमथोपुरः ५ यत्पुरुषेणहविषाह· देवायज्ञमतन्वतह· वसंतोस्यासीदाज्यंसग्रीष्मइध्मशरद्धविः ६ तस्यास्यासन्परिध
यःस· तस्माज्जाताःप्रजाश्चव ७ इत्यादिकमेवंषोडशपादानांपादेः संपुटंकृत्वाजपेत् पुरुषसूक्तमंत्रपादैर्लोपायाः संपुटं
श्रीसूक्तमंत्रपादैः कामराजविद्यायाः संपुटमितिज्ञेयं तदुक्तंकुलार्णवे· लोपांवासंपुटीकृत्यपौरुषेचजपेद्बुधः श्रीसूक्तैः
कामराजाख्यांप्रजपेद्यत्नतोबुधः श्रीसूक्तैः पुरुषसूक्तस्यमंत्रपादैः एवंहिरण्यवर्णांहरिणीकः हिरण्यरजतस्रजांह· च
न्द्रांहिरण्मयींलक्ष्मींसजातवेदोममावहः १ एवंक्रमेणप्रत्येकंजपेत् तथा प्रथमेनसहनावाप्तिर्द्वितीयाजीवसूर्भवेत् तृतीये

वि॰ ११
शिव॰
१४५
145

नचतुर्थेनवंध्यादोषविनाशनं पंचमेनाथषष्ठेनपुत्रंदीर्घायुषंलभेत् सप्तमेनतुगर्भस्यस्थिरतास्यष्टमेनतु स्रावयत्सूतिर्नव
मार्जारीदोषाद्विनाशयेत् दशमेनपरेणापिपुष्पदोषाद्विनाशयेत् द्वादशेनतुकन्यायाःसूतिदोषमपास्यच पुमपत्यं
भवत्येवचतुर्भिस्तुसरेर्ध्रुवं सर्वदोषाविनश्यंतिगर्भजातान्नसंशयः अथश्रीसूक्तफलानि॰ प्रथमेसंपदाप्राप्तिर्द्वितीयेन
पशून्बहून् तृतीयेनभवेद्धान्यंचतुर्थेनमहीभवेत् भक्तान्पंचममंत्रेणषष्ठेनतुमहद्यशः सप्तमाद्राजसन्मानमष्टमेनधृतिः
स्थिराः नवमेनतुरंगाप्तिर्दशमेनगजान्लभेत् एकादशेनवस्त्राणिद्वादशेनसुतान्लभेत् त्रयोदशेनरत्नानिचतुर्दशमहाम
नोः पृथिवीशस्यसंपूर्णांश्रियंपंचदशेनतु॰ सूक्तमंत्रैस्तथाकृत्वानतुकर्माणिसाधयेत् श्रीविद्याप्र— भितहृत्स्वैवंसंपुटोयदि
पंचाशच्चसहस्राणिदशलक्षमितानिच जायंतेतत्कमंत्रात्वागुरुतःशास्त्रतोपिवाः विनियुज्यात्प्रयोगेषुतत्तत्कर्माण्यतंद्रितः
दीक्षातुषोडशार्णाद्याःषट्दर्शनविधाभवेत् तत्रादौशाक्तदीक्षायाःक्रमंवक्ष्येयथाविधि चतुर्विंशतिहस्तंतुमण्डपंकारयेड
यः नवकुण्डानिकुर्वीतचतुरस्राणिवैक्रमात् योनिकुण्डानिवैकुर्यादर्द्धचंद्रनिभानिवा त्रिकोणानिचहस्तानिषट्को
णान्यवृत्तानिवा अष्टास्राण्यथवाचार्यकुण्डमीशेंद्रमध्यतः सार्द्धहस्तद्वयंत्यक्त्वावेदिकांतःप्रकल्पयेत् हस्तमात्रंप
रित्यज्यकुण्डान्यन्यानिकल्पयेत् कुण्डस्थलतुर्णांतग्रेवदिष्यामः श्रीकुलार्णवे॰ शृणुदेविप्रवक्ष्यामिवैष्णवानांविशेष
तः दीक्षायांषोडशार्णायाजपहोमेषुसुव्रते मंत्रान्वक्ष्येशृणुप्राज्ञेकुण्डेषुषट्सुवैक्रमात् नारायणंवासुदेवंवाराहंवैसंवृत
था श्रीकंठंनारसिंहंचगोपालंकार्त्तमेवच पंचदश्यांसमायोज्यजपेद्धोमेचपार्वति वैदिकेतुविशेषेणगायत्रीवेदमातर
जातवेदसपंचर्चंदेवीलक्ष्म्योस्तुसूक्तकं शैवेतुशिवपंचार्णमघोरंशरभंतथा प्रासादंवापाशुपतंदक्षिणामूर्त्तिसंज्ञकं
मृत्युंजयंदशार्णंचक्रमेणपरमेश्वरि सौरेतुघृणिमंत्रंवैषडर्णवेदवर्णकं ऋतंषोडशार्णंचद्वादशार्णंषडंगकं अजपाख्यं

तु शाक्ते तु बालामंत्रश्च भैरवी त्रिपुरावासिनी सिद्धामालिनी त्रिपुरादिका भैरवीत्रिपुरांबा च वीद्दे पद्मावती तथा उग्रतारा
ष्येकजटा तारानीलसरस्वती मातंगी सुमुखी चैव चंद्रमातंगिनी तथा ऊर्द्ध्वाम्नायक्रमं चैव हृद्विद्येन तथैव च मूलविद्याः षो
डशी शैवदीक्षायां श्रीगुरोर्मनोः भ्रुक्त्रं रुक्तं मिश्रितं च विश्रान्ते चरणत्रयं शांभोश्चरणविद्ये देवपराप्रासादसंज्ञके पंचब्रह्मात्मका
मंत्राश्चाष्टविंशत्कलास्तथा प्रकारं गणपत्येन महागणपतिं तथा क्षिप्रसंतगणेशं च वक्रतुण्डं तथैव च लक्ष्मीगणप
तिं चैव हेरंबं गणपं तथा विद्यागणपं चैव तथा शक्तिगणेश्वरं दक्षिणाकालिकायास्तु प्रकाराणामणिमेव च सिद्धकालीषडर्णाच
मन्त्रवर्णाकाम्तथा दशाक्षरं द्वयं चैव ताराया घोडशाक्षरी आद्यदीनाश्चाष्टतारा भुवनेश्वर्यागमाणिकं श्रीवाक्कामपरा रुद्धात्रि
विद्यात्रिपुटा तथा पंचदशाविशेषेणत्रिचत्तः पंचकूटकाः षट्कूटा सप्तकूटा स्यादष्टकूटा तु पंचमी नित्यापंचदशानां च अ
गांगित्वपरस्परं पीतांबराष्टवाराह्याद्दीक्षायां तु परस्परं दुर्गायामहिषार्हित्याश्चालिनी वनदुर्गिका जयाख्यो च नवार्णा च शांत
त्रिलवणात्मिकाः अतिदुर्गा च संप्रोक्ता गायत्र्यास्तदनंतरं पंचायतनभेदेस्तु सौरे शाक्ते च वैष्णवे शैवे च गाणपत्ये च प्रोक्ता
मंत्रनायकाः वैष्णवाष्टकमध्येन हित्वा वाष्टादशाक्षरं तदीयावेदमानानामसंयोज्या परमेश्वरी· शैवे पाशुपतं हित्वा तत्रैव यं व
कं क्षिपेत् सौरेऽप्यष्टाक्षरं हित्वा उद्युत्मंत्रं नियोजयेत् गाणपत्येगणानां त्वा हित्वा क्षिप्रं गणेश्वरं शाक्ते प्रागेव च संयोज्यं दीक्षाहो
मजपादिषु एतदायतनानां च अंगांगित्वपरस्परं शाक्ते सम्यक्प्रवक्ष्यामि चक्रेश्वर्यः प्रकीर्तिताः षट्शांभवोपदेशे तु अंगां
गित्वपरस्परं अक्षरं चतुरर्णा वाप्येकाक्षरमतःपरं सिद्धलक्ष्मी राज्यलक्ष्मीवाग्भवेद्द्वयं पुनः पुनरन्यत्निलितास्त्र चांगांगित्व
परस्परं अन्यविद्यासु सर्वत्र पुनर्न भेदैः परस्परं अंगांगित्वप्रकर्त्तव्यं तन्मन्त्रकर्माणि निश्चयात् पंचायतनदीक्षायां पूजायां च वि
शेषतः अंगांगित्वप्रकर्त्तव्यं तन्मन्त्रकर्माणि निश्चयात् पंचायतनदीक्षायां पूजायां च विशेषतः अंगांगित्वप्रकर्त्तव्यं तन्मन्त्रकर्मा

वि·११
णव·
१४६
146

णानिश्चयात् पंचायतनदीक्षायांस्नायांचविशेषतः अंगांगित्वंप्रवक्ष्यामिश्रृणुदेविसमाहिता महागणेशमंत्रेणाहृणीमंत्रेण
संयुताः पराप्रासादमंत्रेणलक्ष्मीनारायणेनच संयोज्यषोडशार्णेनमितायांजपपूजने दक्षिणाकालिकायास्तुतथैवपरिकी
र्त्तिता तारायांछिन्नमस्तायांविशेषोत्रनिगद्यते मार्तंडभैरवस्यैवमंत्रजोषस्तथैवच उच्छिष्टगणनाथस्यमुकुंदोबालएवच
भुवनेश्यामहादेव्यापार्वत्यावैस्नवाः प्रिये गाणपत्याश्चसौराश्चशैवाश्चापिविशेषतः भैरवीवगलाचण्डामातंगीचापराजिता
दीक्षायांजपहोमेचस्नानेचविशेषतः पंचायतनमंत्रेतुतारावत्परिकीर्त्तिता दुर्गाचभुवनेशीचमहालक्ष्मीस्तथैवच अन्या
स्तुसंप्रदायेनप्रयोज्यादेशिकोत्तमैः तथाचकादिमतेश्रीतंत्रराजे· षडूर्ध्वद्वारपूर्णानांवैस्नवानामशेषतः मंत्राणांपरतत्वार्थ
वाचकत्वादभेदता ललिताविद्ययातद्वत्प्रासादस्यत्रयात्मनः तथैवचपरायाश्चगायत्र्याश्चोक्तरूपतः व्याहृतीनांमहावाक्यपरमा
त्मजपात्मता प्रणवस्यचताद्रूप्ययोगास्यात्तत्तदात्मता इति अथसंप्रदाय आम्नायक्रमः तत्वैत्रवदिष्यामः अथश्रीविद्यायाः
व
श्रीचक्रेश्वरीपूजायांनारायणादिप्रोक्तमंत्राणांऋष्यादिन्यासध्यानानियथातंत्रांतरेषु तत्रप्रातःकृत्यादियोगपीठन्यासां
तेमूलेनप्राणायामत्रयंकृत्वाशिरसिसाध्यनारायणऋषयेनमः मुखेदैवीगायत्रीछंदसेनमः हृदयेश्रीपरमात्मनेदेवतायै
नमः इतिविन्यस्यममेष्टार्थेविनियोगः इतिकृतांजलिःकृत्वामूलेनकरयोर्व्यापकंविन्यस्यक्रुद्धोल्कायस्वाहाहृदयायनमः
महोल्कायशिरसेस्वाहा वीरोल्कायशिखायैवषट् द्युल्कायस्वाहाकवचायहुं सहस्रोल्कायस्वायस्वाहाअस्त्रायफट् इतिमं
त्रांनगुल्फादिषुविन्यस्यध्यायेत् हस्तैश्चक्रदरौगदांसरसिजंविभ्राणमर्कोज्ज्वलत्कान्तिंश्रीधरणीविभूषितलसत्पार्श्वंकिरीटान्वि
तं श्रीवत्साकसकौस्तुभोरुपदकंकेयूरहारोज्ज्वलंराजत्कुण्डलमप्यनंतहृदभजेपीतांवरंशार्ङ्गिणं इतिध्यात्वा ॐनमोनारा
यणायइत्यष्टाक्षरंजपेत् अथवासुदेवमंत्रस्य ततःप्रातःकृत्यादियोगपीठन्यासांतेमूलेनप्राणायामत्रयंकृत्वाशिरसिप्र

जापतिऋषयेनमः मुखेगायत्रीछंदसेनमः हृदयेश्रीवासुदेवदेवतायैनमः इतिविंन्यस्यममसर्वाभीष्टसिद्धयेविनियोगः
इतिकृतांजलिस्तत्कामूलेनकरयोर्व्यापकंकृत्वा ॐहृदयायनमः शिरसेस्वाहा भगवतेशिखायैवषट् वासुदेवायकवचा
यहुं नमोभगवतेवासुदेवायअस्त्रायफट् ततःसमाहितोभूत्वावासुदेवंहृदिस्मरेत् मध्येऽरण्यांबुधेर्द्वीपेदिव्ययोषानिषेवि
ते तत्रसंचिंत्यविपिनमखिलर्तुनिषेविते तन्मध्येकल्पवृक्षंतुदिव्यमद्भुतदर्शनं तस्याधस्ताद्रत्नमंचेकमलंविमलप्रभं श्री
रम्सौरींद्रविलसत्प्रभापटलराजितं तत्रसंचिंतयेद्देवंवासुदेवंस्मितानन्ं कुंदेंदाभंगदाचक्रपद्मशंखलसत्करं चंद्रायुत
लसत्कांत्यामोहयंतंजगत्त्रयं केयूरांगदसंराजद्धारैरत्नभूषणं श्रीवत्सांकलसद्रत्नमुकुटंकौस्तुभांवितं अरविंददला
ताम्रसुरम्यायतलोचनं कुंडलप्रोल्लसद्गंडमंडलंपीनवाससं ग्रैवेयहारसंशोभिकंबुकंठंसुकंकणं विशालवक्षसंरा
जत्प्रफुल्लवनमालकं सनकादिमुनींद्रैश्चतत्त्वनिर्णयकांक्षया निषेवितंदिव्यदितिजानतगंधर्वसंचयैः सिद्धविद्याधरार्यैश्चसे
वितंचमहोरगैः इतिध्यात्वाजपादिकंविदध्यात् अथवराहमंत्रस्य तत्रप्रातःकृत्वादियोगपीठन्यासांतेमूलेनप्राणायामत्रय
कृत्वाशिरसिभार्गवायऋषयेनमः मुखेनुष्टुप्छंदसेनमः हृदयेश्रीवराहायदेवतायैनमः इतिविन्यस्यममसर्वाभीष्टसि
द्धयेविनियोगः इतिकृतांजलिस्तत्कापकंष्ट्रायहृदयायनमः व्योमोल्कायशिरसेस्वाहा तेजोधिपतयेशिखायैवषट् विश्व
रूपायकवचायहुं महादंष्ट्रायअस्त्रायफट् इतिपंचांगमंत्रान्विन्यस्यध्यायेत् वह्निप्रभशशिनिभंशिरसोगलान्नमोलिस्थला
द्विपद्मंदनिभंचक्रांतेसविभ्रतेकरनलैरविशंखखड्गान्खेटंगदानदनुशक्तिवराभयानि सर्वसहाथरणशोभितदेकंद
ष्ट्रमाद्यंवराहमनिशंप्रभजेत्स्वविजे इतिध्यात्वा ॐनमोभगवतेवराहरूपायभूर्भुवःस्वःपतयेभूपतित्वंमेदेहिददापय
स्वाहा अयंमंत्रोयोज्यः अथविष्णोः ततःप्रातःकृत्वादियोगपीठन्यासांतेमूलेनप्राणायामत्रयंकृत्वाशिरसिकपिलायऋष

वि. ११
ए.व.
१४७

येनमः मुखेगायत्रीछंदसेनमः हृदयेश्रीभोगवामनायदेवतायैनमः इतिविन्यस्यममसर्वाभीष्टावाप्तयेविनियोगः इतिकृतांज
लिरुक्त्वा ॐनमोहृदयायनमः भगवतेशिरसेस्वाहा विश्वेशिखायैवषट् सुरपतयेकवचायहुं महाबलायनेत्रत्रयायवौषट्
स्वाहाअस्त्रायफट् इतिषडंगमंत्रान्विन्यस्यध्यायेत् नीलवर्णस्फुरद्बीजः शंखचक्रगदासिधृक् सर्वान्भोगान्ददात्येषभक्तानांभो
गवामनः इतिध्यात्वा ॐनमोभगवतेविश्वेश्वरपतयेमहाबलायस्वाहा इतिनियोज्य अथश्रीकरमंत्रस्य तत्रप्रातःकृत्यादि
योगपीठन्यासांतेमूलेनप्राणायामत्रयंकृत्वा शिरसिवामदेवऋषयेनमः मुखेपंक्तिछंदसेनमः हृदयेश्रीकरायदेवतायैनमः
इतिविन्यस्यममसर्वाभीष्टावाप्तयेविनियोगः इतिकृतांजलिरुक्त्वा ॐभीषयभीषय ॐहृदयायनमः त्रासयत्रासयहुं
शिरसेस्वाहा हूंमर्दयमर्दयहुं शिखायैवषट् श्रीप्रध्वंसयप्रध्वंसयहुं कवचायहुं करक्षयरक्षयहुंनेत्रत्रयायवौषट् अस्त्रायफट्
ततः नेत्रयोः रंउदरेस्वाहेष्टे ह्रांइतिविन्यस्यध्यायेत् ततः संचिंतयेद्दिव्यंश्रीकरंहृदयांबुजे लोलकल्लोलजालेन फेनिलेसोर्मि
मालके दुग्धाब्धावथमध्येहीपंम्लक्मयंशुभं हेमस्थलीसमाकीर्णंनानामणिगणोज्ज्वलं वनंसंचिंतयेत्तत्रसकलर्तुनिषेवि
ते कल्पद्रुमसमूहैश्चवासितानतपत्रमं षट्पदालीकलारावसंकुलेलोलपल्लवे पुष्पव्रजपरागौघनुषारपरिपूरिते हिरण्म
यानांरत्नानांमणिपुष्पेषुचंचले इंदिरालिचक्रेणनीलशक्रमणीरुचे अंगीकरोतियत्रापिरमतेःपरसःसुरैः पुष्पव्र
जपरागौघ श्रीदार्ष्यशोभनेस्वर्णसौभाग्यादिगुणैर्युतः रूपाभिराममधुराकृतिभिसुकुमारके मंदस्मितलसद्दंतमरीचिद्यो
तितानना: मनोज्ञाजितचंद्राभामदस्फुरितलोचनाः जल्पाकशुकोकिलोघदेवहंदानिरंतरं उन्निद्रितोयन्मदनाःपीन
स्तनतटालसाः सुश्रोणिभाराश्मर्थाःमंदगामिन्यउत्तमाः एवंभूताभिरप्सरसःक्रीडंतेयत्रचामरैः सारसेनापतिर्विवन
लक्ष्म्यागृहंयथा जनस्थानमप्सरसांचकल्पहस्तहरेहुयः इंदिरायाःसोदरस्तत्रनवरत्नमयस्यच शिखावलिसमुद्योतिप्रो

तलस्पतलेम्भे स्वर्णकुट्टिस्वसंशोभिमहारत्नमनोरमे उद्यदर्कप्रभाभास्वत्पीठसन्निहितस्य च प्रसिद्धविक्रमोयस्य पद्मिरा
जस्य चोपरि उपविष्टं गालितानम्रसम्भविद्रावकसन्निभं रत्नौघन्मकराकारचारुकुण्डलमण्डितं किरीटमणिसंदीप्तदिक्कं
चारुभूषणं शशिकुण्डलसच्छुभ्रक्लिमामलविशेषकं स्मितिचञ्चलसच्छ्रिष्टिमुकुटोज्वलगण्डकं स्मितसंशोभिवक्त्रेन्दुकं
फोणफलकोज्वलं दशनावलिरम्योघविराजितसुभाधरं पक्वविम्बाधरं रम्यरक्तपद्मपलाशवत् आयतारुणनेत्रं च स
म्यकात्मविराजितं उरुहारमणिव्रातदीपितिप्रोल्लसद्गलं दिव्यरत्नांगदद्योतितवक्रजालधरं हरिं गदाकमलशंखारि
धारिणं वाकदण्डकैः कपाटविपुलेनाथकमलानिलयेन च लसत्कौस्तुभदीप्तौघविद्योतिततलेन च वत्ससाम्बविराजंतं
त्रैलोक्यनिलयेन च त्रिवलीशोभिना सम्यग्रोमराजिलसद्रुचा उदरेण विराजंतं रम्याकटितटेन च पीतपट्टांशुकरुचाविल
सन्मणिमेखलं शरन्नणसहकीनरम्योरुपरिभूषितं केकिकंठलसत्कांतिजंघायुगमनोहरं रक्तोत्पलाभचरणं या
दाग्रजितकच्छपं शशरक्तसहक्रान्तिध्वजाज्ञाकितपत्तलं करसद्रक्तकमलरमयालिंगितं सदा हमयोचोपगूढं च
नवमाणिक्यशोभितं नवयौवनकांत्योघसंशोभिसकलांगकं सुरासुरर्षिप्रमुखैः सेवितं चाप्सरोगणैः शीर्णडविंब
सद्दशवितानसमलंकृतं सुरयोषाकराज्ञालिलसच्चामरराजितं विद्युल्लतासंविलोलवैजयंतीसुशोभितं यक्षविद्या
धरवृन्दवारणादिनिषेवितं एवं ध्यात्वा· ॐ नृसिंहश्रीकरस्वाहा अयं मंत्रोषोडशार्णोयासयोज्यः अथन्रसिंहमंत्रः तत्र
प्रातः कृत्यादियोगपीठन्यासांते मूलनप्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखेनुष्टुप्छन्दसे नमः हृदये
श्रीनृसिंहदेवतायै नमः इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृतांजलिरुक्त्वा· ॐ उग्रंवीरं हृदयाय नमः
महाविष्णुं शिरसे स्वाहा ज्वलंतं सर्वतोमुखं शिखायै वषट् नृसिंहं भीषणं कवचाय हुं भद्रं मृत्युमृत्युं नेत्रत्रयाय वौषट्·

वि॰ ११
शि॰
१४८

नमाम्यहंअस्त्रायफट् इतिविन्यस्यध्यायेत् नृसिंहंभजेजानुविन्यस्तवाहुं त्रिनेत्रंभुजप्रोल्लसच्चक्रशंखं कृशानुप्रभज्योतिषाग्रस्तदै
त्यशिरःशोभिदंष्ट्रास्त्रदीप्तदिग्जिह्वं इतिध्यात्वा उग्रंवीरंमहाविष्णुंज्वलन्तंसर्वतोमुखं नृसिंहंभीषणंभद्रंमृत्युमृत्युंनमाम्यहं
इतिमंत्रोयोज्यः अथगोपालमंत्रः तत्रप्रातःकृत्यादियोगपीठन्यासान्तेमूलेनप्राणायामत्रयंकृत्वा शिरसिनारदायऋषयेन
मः हृदयेश्रीकृष्णायदेवतायैनमः गुह्येक्लींबीजायनमः पादयोःस्वाहाशक्तयेनमः सर्वांगेकृष्णायप्रकृतयेनमः हृ
दिश्रीदुर्गायैअधिष्ठात्र्यैदेवतायैनमः इतिविन्यस्यममाभीष्टसिद्धयेविनियोगः इतिकृतांजलिःक्लांमूलेनकरयोर्व्याप
कंकृत्वा आचक्रायस्वाहाहृदयायनमः विचक्रायस्वाहा शिरसेस्वाहा सुचक्रायशिखायैवषट् त्रैलोक्यरक्षणचक्राय
स्वाहाकवचायहुं असुरान्तचक्रायस्वाहा अस्त्रायफट्नमः इतिषडंगमंत्रान्विन्यस्यध्यायेत् इरा¯ चापसहाणगुणांकुश
करांबुजं वेणुमादायहस्ताभ्यांवादयंतंमुदान्वितं रविमंडलगंकृष्णंध्यायेदिष्टफलाप्तये इतिध्यात्वा क्लींकृष्णायगो
विंदायगोपीजनवल्लभायस्वाहा इतिमंत्रोयोज्यः अथकृष्णमंत्रः तत्रप्रातःकृत्यादियोगपीठन्यासान्तेमूलेनप्राणायाम
त्रयंकृत्वाशिरसिनारदऋषयेनमः मुखेगायत्रीछंदसेनमः हृदये श्रीकृष्णदेवतायैनमः गुह्येक्लींबीजायनमः इत्यादिवि
न्यस्यममाभीष्टसिद्धयेविनियोगः इतिकृतांजलिःक्लांपूर्णज्ञानात्मनेहृदयायनमः पूर्णैश्वर्यात्मनेशिरसेस्वाहा पूर्णप्रभा
त्मनेशिखायैवषट् पूर्णानंदात्मनेकवचायहुं पूर्णतेजआत्मनेनेत्रत्रयायवौषट् पूर्णशक्त्यात्मनेअस्त्रायफट् इतिषडंग
मंत्रान्विन्यस्यध्यायेत् ध्यायेद्धरिंमणिनिभंजगदेकवंद्यंसौंदर्यसारमरिशंखवराभयानि दोर्भिर्दधानमजितंसरसंचभैष्मी
सत्यासमेतमखिलप्रदमिंदिरेशं इतिध्यात्वाक्लींकृष्णायनमः इतिमंत्रोयोज्यः योगस्तु॰ हसकलह्रींनमोहकहलह्रींना
रायणायसकलह्रीं १ ॐहसकलह्रींनमोहसकहलह्रींभगवतेसकलह्रींवासुदेवाय २ ॐनमोभगवतेह॰ वराहरूपा

यह्र॰ ॐभूर्भुवः स्वः पतये सकललक्ष्मीभूपतिं त्वं मे देहि दापय स्वाहा ३ ॐ नमो भगवते ह्र॰ विश्ववे ह्र॰ सुरपतये ह्र॰ महाबलाय स्वा
हा ४ उत्तिष्ठ ह्र॰ श्रीकर ह्र स्वाहा स॰ ५ उग्रवीरं महाविष्णुं ह्र॰ ज्वलन्तं सर्वतोमुखं ह्र नृसिंहं भीषणं भद्रं सकललक्ष्मीस्तम्भस्तं नमा
म्यहं ६ क्लीं कृष्णाय ह्र गोविंदाय ह्र॰ गोपीजनवल्लभाय स॰ स्वाहा ७ क्लीं ह्र॰ कृष्णाय ह्र॰ नमः स॰ एवंयोगश्स्मर्थः वेदि
कदर्शनेन मंत्रमाह तत्र प्रातः कृत्यादि योगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा अस्य श्रीगायत्रीमंत्रस्य शिरसि वि
श्वामित्राय ऋषये नमः मुखे गायत्रीछंदसे नमः हृदये श्रीपरमात्मने देवतायै नमः इति विन्यस्य मम अभीष्टसिद्धये विनियोग
इति कृतांजलिः रुक्त्वा तत्सवितुः ब्रह्मात्मने हृदयाय नमः वरेण्यं विष्ण्वात्मने शिरसे स्वाहा भर्गो देवस्य रुद्रात्मने शिखायै
वषट् धीमहि ईश्वरात्मने कवचाय हुं धियो यो नः सदाशिवात्मने नेत्रत्रयाय वौषट् प्रचोदयात् परमात्मने अस्त्राय फट् इति
षडंगमंत्रान्विन्यस्य ध्यायेत् मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटां तत्त्वार्थवर्णात्मि
कां गायत्रीं वरदाभयांकुशकशान् शुभ्रं कपालं गुणं शंखं चक्रमथारविंदयुगलं हस्तैर्वहंतीं भजे इति ध्यात्वा तत्सवि
तुर्वरेण्यं भर्गो देवस्य धीमहि ह्र॰ धियो यो नः प्रचोदयात् १ अथ जातवेदसमंत्रस्य तत्र प्रातः कृत्यादि योगपीठ
न्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि मरीचिपुत्रकश्यपाय ऋषये नमः मुखे त्रिष्टुप्छंदसे नमः हृदये श्रीजातवेदाग्न
ये दुर्गायै देवतायै नमः इति विन्यस्य मम अभीष्टसिद्धये विनियोगः इति कृतांजलिः रुक्त्वा जातवेदसे सुनवाम हृदयाय नमः
सोममरातीयतो शिरसे स्वाहा निदहाति वेदः शिखायै वषट् स नः पर्षदति कवचाय हुं दुर्गाणि विश्वा नावेव नेत्रत्रयाय
वौषट् सिंधुं दुरितात्यग्निः अस्त्राय फट् इति षडंगमंत्रान्विन्यस्य ध्यायेत् विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेवितां हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं बिभ्राणामनलात्मिकां

वि॰ ११
शिव॰
१५९
149

प्राशिधरां दुर्गां त्रिनेत्रां स्मरेत् इति ध्यात्वा जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः स नः पर्षदति दुर्गाणि विश्वा नावे
व सिंधुं दुरितात्यग्निः १ अथ तामग्निवर्णामिति मंत्रस्य तत्र प्रातः कृत्यादि योगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा
ऋष्यादीन् प्राग्वद्विन्यस्य मम अभीष्टसिद्धये विनियोगः इति कृतांजलिः कृत्वा ह्रां हृदयाय नमः ह्रीं शिरसे स्वाहा ह्रूं शिखायै वषट्
ह्रैं कवचाय हुं ह्रौं नेत्रत्रयाय वौषट् ह्रः अस्त्राय फट् इति विन्यस्य प्राग्वद्ध्यात्वा तामग्निवर्णां तपसा ज्वलंतीं वैरोचनीं कर्मफ
लेषु जुष्टां दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः इति जपेत् अथाग्न इत्यस्य प्रयोगः तत्र प्रातः कृत्यादि योगपी
ठन्यासांते ऋष्यादिषडंगन्यासान् ध्यानं च प्राग्वद्विधाय अग्ने त्वं पारया नव्यो अस्मान् स्वस्तिभिरति दुर्गाणि विश्वा पूश्च
पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः इति जपेत् अथ विश्वानि न इत्यस्य प्रयोगः तत्र प्रातः कृत्यादि योगपी
ठन्यासांते मूलमंत्रेण प्राणायामत्रयं कृत्वा ऋष्यादिकरषडंगन्यासध्यानानि प्राग्वद्विधाय विश्वानि नो दुर्गहा जातवेदः
सिंधुं न नावा दुरितातिपर्षि अग्ने अत्रिवन्मनसा गृणानः स अस्माकं बोध्यविता तनूनां इति जपेत् अथ पृतनाजितमित्य
स्य प्रयोगः तत्र प्रातः कृत्यादि ध्यानांतं विधाय पृतनाजितं सहमानमुग्रमग्निं हुवेम परमात्सधस्थात् स नः पर्षदति दु
र्गाणि विश्वा क्षामद्देवोऽति दुरितात्यग्निः ततः श्रीसूक्तदेवीसूक्ते ऋग्वेदे मसिद्धे अथ शैवप्रयोगः तत्र प्रातः कृत्यादियो
गपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि वामदेवाय ऋषये नमः मुखे पंक्तिश्छंदसे नमः हृदये श्रीसदाशिवाय दे
वतायै नमः इति विन्यस्य मम अभीष्टसिद्धये जपे विनियोगः इति कृतांजलिः कृत्वा सर्वज्ञाय हृदयाय नमः नित्यतृप्ताय शिरसे
स्वाहा अनादिबोधाय शिखायै वषट् स्वतंत्राय कवचाय हुं नित्यमलुप्तशक्तये नेत्रत्रयाय वौषट् नित्यमनंतशक्तये अस्त्रा
य फट् इति षडंगमंत्रान्विन्यस्य ध्यायेत् गोक्षीरफेनधवलं रजताद्रिसमप्रभं चारुचंद्रकलाराजज्जटामुकुटमंडितं पंचवक्त्रं

परं शंभुं पतिं वक्त्रं त्रिलोचनं शार्दूलचर्मवसनं रत्नाभरणभूषितं इति ध्यात्वा हसकलह्रीं हसकहलह्रीं नमः सकलह्रीं
शिवाय इति मंत्रं जपेत् अथ अघोरास्त्रस्य प्रयोगः तत्र प्रातः कृत्वा दियोगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरस्यघो
राय ऋषये नमः मुखे त्रिष्टुप्छंदसे नमः हृदये श्री अघोररुद्राय देवतायै नमः गुह्ये ह्रीं बीजाय नमः पादयोः हूं शक्तये नमः
इति विन्यस्य ध्यायेत् एवं न्यस्ततनुर्मंत्री ध्यायेद्देवमनन्यधीः कालमेघनिभं देवं भीमदंष्ट्रं त्रिलोचनं भुजंगभूषणं रक्तव
स्त्रानुलेपसंयुतं परशुं कंदवालं च बाणं त्रिशिखमेव च दधानं दक्षिणैर्हस्तैः रुद्रं दीर्घक्रमतः प्रिये डमरुं खेटकं चापं च
कपालं च पार्वति काम्यकर्मसु रक्ताभमसितं चाभिचारके निग्रहे चरद्भूतादिमुक्तौ मुक्तानिभं स्मरेत् एवं ध्यात्वा ओं ह्रीं
स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोरतर तनुरूप चट चट प्रचट प्रचट कह कह वम वम बंध बंध घातय घातय हूं फट् इति मं
त्रं जपेत् अथ शरभप्रयोगः तत्र प्रातः कृत्वा दियोगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे पं
क्तिश्छंदसे नमः हृदये शरभेशाल्वाय पक्षिराजाय देवतायै नमः इति विन्यस्य मम अभीष्टसिद्धये विनियोगः इति कृतांजलिरुक्त्वा
ओं नमो भगवते रुद्राय नमः शरभशाल्वाय शिरसे स्वाहा पक्षिराजाय शिखायै वषट् मम शत्रून् नाशय नाशय कवचाय हुं हुं
फट् नेत्रत्रयाय वौषट् स्वाहा अस्त्राय फट् ध्यानं अष्टापदं पतति मूलराजद्रंष्ट्राकरंहाटकपक्षकूटं हेमांगमंगीकृतपक्षरागं चञ्चु
पुटोल्लासितमुखारविंदं सूर्यानलेंदुद्युतिराजमाननेत्रत्रयोल्लासितपक्षरागं नीलाभ्रमदीप्ताखिलरोमसंघं शीतांशुखंडोज्ज्व
लितोत्तमांगं विषादिहृद्वद्वोत्तमकपिलजटाभारसंचारिगंगातरंगांकितांगं गात्कमगलितष्टषत्संगहाराभिरामं अथो
घ्राणगंधपऋमुच्चलितसत्याग्रथि पंचांगुलाघनमञ्चस्य प्रथिवाहुद्वंद्वभुजयुगलोल्लासिमालाभिरामं कदाशवबृहद्वेपुपाहि
पयुगललसच्चंद्रनीलाभ्रलीलाचरत्तरोपाकलापप्रादप्राकपतिकुलं वैरिसंघैककालं पाशाकारासलोलहृषभवाशीवि

मकुत

वि॰ ॥
एव॰
१५॰
150

खाधीशभोगस्फूर्जत्फूत्कारघोरं खेचरस्फुटनिकरदलनसमर्थंसहनं भक्तयंत्रपादित्रूपं भक्तानां वैरिसंचयं शरभं शाल्वरूपं च ध्याये
देकाग्रमानसः इति शरभरूपं शिवं ध्यात्वा ॐ नमो भगवते शरभशाल्वाय हूं पक्षिराजाय हूं मम शत्रून्नाशय २ सर्वं घ्रं हुं फट् स्वा
हा इति मंत्रं जपेत् अथ प्रासादमंत्रस्य प्रयोगः तत्र प्रातः कृत्यादि योगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि वामदे
वऋषये नमः मुखे पंक्तिछंदसे नमः हृदये श्रीसदाशिवाय देवतायै नमः गुह्ये हं बीजाय नमः पादयोः औं शक्तये नमः
इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृतांजलिः कृत्वा हां हृदयाय नमः हीं शिरसे स्वाहा हूं शिखायै वषट् हैं
कवचाय हुं हौं नेत्रत्रयाय वौषट् हः अस्त्राय फट् इति षडंगमंत्रान्विन्यस्य ध्यायेत् ध्यायेद्देवं नतो वत्सहृदि चैकाग्रमानसः
सिंदूरपुंजशोणांग्रस्मेरवक्त्रं त्रिलोचनं मणिमौलिलसच्चंद्रकलालंकृतमस्तकं दक्षिणार्धकरे टंकं दधानं तदधो वरं वा
मार्धहस्ते हरिणं तदधः करमादरात् पीनहस्तकरोत्तुंगस्तनाग्रे विनिवेश्य च वामांसके विनिविष्टायाः प्रियायाः रक्तपंक
जे दधत्पादक्षिणहस्ते चासीनं रक्तपंकजे नानाभरणसंदीप्तं दिव्यगंधस्रगंबरं इति ध्यात्वा ॐ ह्रौं हूं ह्रीं हूं नमः सः शिवा
य इति मंत्रं जपेत् अथ पाशुपतास्त्रस्य प्रयोगः तत्र प्रातः कृत्यादि योगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शि
रसि वामदेवऋषये नमः मुखे पंक्तिछंदसे नमः हृदये श्रीपशुपतये देवतायै नमः इति विन्यस्य ममाभीष्टसिद्धये विनि
योगः इति कृतांजलिः कृत्वा ह्रूं फट् हृदयाय नमः श्लीं हूं फट् शिरसे स्वाहा पं हूं फट् शिखायै वषट् शं हूं फट् कवचाय हुं हूं
फट् नेत्रत्रयाय वौषट् फट् हूं अस्त्राय फट् इति षडंगमंत्रान्विन्यस्य ध्यायेत् ध्यायेत्पशुपतिं सम्यक् हृदि चैकाग्रमानसः
पंचवक्त्रं दशभुजं प्रतिवक्त्रं त्रिलोचनं अग्निज्वालानिभश्मश्रुसंयुतं भीमदंष्ट्रकं खड्गबाणान्नमस्त्रं च शक्तिं परशुमेव च
दधानं दक्षिणैर्हस्तैर्हस्तादिक्रमतो गुरुं खेटचापौ कपालं कां च त्रिशूलं च बलं दण्डयुक् वामहस्तैश्च बिभ्राणं मध्याह्नार्कसम

प्रभं नानाभरणसंदीप्तं पन्नगेंद्रैरलंकृतं स्फटिकौघनिभं शांतं सर्वरत्नाकरं स्मरेत् एवं ध्यात्वा ओं श्रीं ह्रः पशु ह्रः फ्रंस फट्
इति मंत्रं जपेत् अथ दक्षिणामूर्तिमंत्रस्य प्रयोगः तत्र प्रातः कृत्यादि योगपीठन्यासान्ते मूलेन प्राणायामत्रयं कृत्वा शिरसि
शुकाय ऋषये नमः मुखे गायत्रीछंदसे नमः हृदये श्रीदक्षिणामूर्तये देवतायै नमः गुह्ये ओं बीजाय नमः पादयोः ह्रीं श
क्तये नमः इति विन्यस्य ममाभीष्टसिद्ध्यर्थे विनियोगः इति कृतांजलिः कृत्वा मूलमंत्रेण करशुद्धिं विधाय ओं ह्रां दक्षिणा
मूर्तये ह्रां हृदयाय नमः ओं ह्रीं नमः ह्रीं शिरसे स्वाहा ओं ह्रूं वटमूलनिवासिने ह्रूं शिखायै वषट् ओं ह्रैं ध्यानैकनिरतां
गाय ह्रैं कवचाय हुं ओं ह्रौं नमो रुद्राय ह्रौं नेत्रत्रयाय वौषट् ओं ह्रः शंभवे ह्रः अस्त्राय फट् इति षडंगमंत्रान्विन्यस्य ध्यायेत्
वटविटपिसमीपे भूमिभागे निषण्णं सकलमुनिजनानां ज्ञानदातारमारात् त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं जननमर
णदुःखच्छेददक्षं नमामि इति ध्यात्वा ओं ह्रीं दक्षिणामूर्तये तुभ्यं वटमूलनिवासिने ह्रः ध्यानैकनिरतांगाय नमो
रुद्राय शंभवे ह्रीं ओं इति मंत्रं जपेत् अथ मृत्युंजयस्य प्रयोगः तत्र प्रातः कृत्यादि योगपीठन्यासान्ते मूलेन प्राणायाम
त्रयं कृत्वा शिरसि कहोलाय ऋषये नमः मुखे निचृद्गायत्रीछंदसे नमः हृदये श्रीमृत्युंजयाय देवतायै नमः गुह्ये ओं बी
जाय नमः पादयोः सः शक्तये नमः नाभौ जूं कीलकाय वौषट् सः अस्त्राय फट् इति षडंगमंत्रान्विन्यस्य ध्यायेत् ध्याये
द्देवं ततो वत्स समाहितमनाश्चिरं शुद्धस्फटिकसंकाशं शुभ्रपद्मासनस्थितं कपर्दमौलिविलसच्चंद्रखण्डच्युतामृतैः
अभिषिक्तसमस्तांगमर्केन्दुवह्निलोचनं दक्षिणोर्ध्वकरे मुद्रां ज्ञानाख्यां तदधःकरे दधानं चिंतयेद्देवं मृत्युरोगभयापहं इति
ध्यात्वा ओं हूं जूं हः सः सः इति मंत्रं जपेत् अथ दशाक्षरस्य प्रयोगः ततः प्रातः कृत्यादि योगपीठन्यासान्ते मूलेन प्राणा
यामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे विराट्छंदसे नमः हृदये सदाशिवाय देवतायै नमः इति विन्यस्य ममाभीष्ट

सिद्धयेविनियोगः इतिकृतांजलिःकृत्वाओंह्रःहृदयायनमः ओंनमःशिरसेस्वाहा भगवतेशिखायैवषट् रुद्रायकवचायहुं ओंनमो
भगवतेनेत्रत्रयायवौषट् रुद्रायअस्त्रायफट् इतिषडंगमंत्रान्विन्यस्यध्यायेत् आकीर्णदिव्यभोगैरमरदितिसुतैरर्चितं
शैलकन्यादेहार्द्धधारयंतंस्फटिकमणिनिभंव्याघ्रचर्मोत्तरीयं द्वैपाकृत्तिंवसानंहिमकिरणकलाशेखरंनीलकंठंलसद्वा
मकलाभिर्धृतकपिलजटंभावयेयंमहेशं इतिध्यात्वा ओंह्रः नमोह्रः·भगवतेसः· रुद्राय· इतिजपेत् अथसौदर्शनविधानं
तत्रादौघृणिमंत्रस्यप्रयोगः तत्रप्रातःकृत्यादियोगपीठन्यासांतेमूलेनप्राणायामत्रयंकृत्वाशिरसिदेवभागायऋषये
नमः मुखेगायत्रीछंदसेनमः हृदयेसूर्यदेवतायैनमः इतिविन्यस्यममाभीष्टसिद्धयेजपेविनियोगः इतिकृतांज
लिःकृत्वासत्यतेजोज्वालामणिहुंफट्स्वाहा हृदयायनमः ब्रह्मतेजोज्वालामणि - - हुंफट्स्वाहानेत्रत्रयायवौष
ट् सर्वतेजोज्वालामणिहुंफट्स्वाहा अस्त्रायफट् इतिषडंगमंत्रान्विन्यस्यध्यायेत् रक्ताब्जयुग्माभयदानहस्तंकेयूरहा
रांगदकुंडलाढ्यं माणिक्यमौलिंदिननाथमीडेबंधूककांतिंविलसत्त्रिनेत्रं इतिध्यात्वा घृणिःह्रः·सूर्यह्रः·आदित्यसः·
इतिमंत्रंजपेत् अथषडर्णस्यप्रयोगः तत्रप्रातःकृत्यादियोगपीठन्यासांतेशिरसिब्रह्मणेऋषयेनमः मुखेगा
यत्रीछंदसेनमः हृदयेश्रीसवित्रेदेवतायैनमः इतिविन्यस्यममाभीष्टसिद्धयेविनियोगः इतिकृतांजलिःकृत्वासूक्ष्म
रूपायस्वाहा हृदयायनमः सूक्ष्मतेजसेस्वाहा सूक्ष्मांकायायस्वाहा शिखायैवषट् सूक्ष्मबालायस्वाहाकवचायहुं
सूक्ष्माकायायहुंफट्स्वाहा नेत्रत्रयायवौषट् मूलमंत्रमुच्चार्यअस्त्रायफट् इतिषडंगमंत्रान्विन्यस्यध्यायेत् रक्तप
द्मद्वयेहस्तैर्बिभ्राणंवरदाभये बंधूकाभंत्रिनेत्रंचरविंध्यायेत्स्रग्भूषितं इतिध्यात्वा ओंखह्रःखोह्रः·ल्कायस्वाहाइ
तिमंत्रंजपेत् अथचतुरर्णस्यप्रयोगः तत्रप्रातःकृत्यादियोगपीठन्यासांतेमूलेनप्राणायामत्रयंकृत्वाशिरसिब्रह्मणे

ऋषये नमः मुखे गायत्री छंदसे नमः हृदये श्रीसूर्य्यरूपिणे भुवनेश्वर्य्यै देवतायै नमः इति विन्यस्य मम अभीष्टसिद्धये विनियोगः
इति कृतांजलिरुक्त्वा ॐ हृदयाय नमः (मुखे गायत्री छंदसे नमः हृदये श्रीसूर्य्यरूपिणे) ह्रीं शिरसे स्वाहा ॐ शिखायै व
षट् ह्रौं कवचाय हुं ह्रौं नेत्रत्रयाय वौषट् ह्रौं अस्त्राय फट् इति षडंगमंत्रान्विन्यस्य ध्यायेत् भास्वद्रत्नसहस्रमौलिविल
सच्चेद्राईमघोतयद्दस्तानेदर्थदंकुशांगुणावराभीनाः स्तनंगुस्तनं पायाद्गालिनकांचनांबुजनयाविद्युज्ज्वलत्कांतिभिर्वि
श्वघोतयदार्कमांश्वशिशिरंविश्वशिकायावतुः इति ध्यात्वा ॐ ह्रौं ह्रीं हंस इति मंत्रं जपेत् अथ अपरस्य प्रयोगः
तत्र प्रातः कृत्वा दियोगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि ब्रह्मजपाय ऋषये नमः मुखे गायत्री छंदसे न
मः हृदये श्रीसूर्य्याय देवतायै नमः इति विन्यस्य मम अभीष्टसिद्धये विनियोगः इति कृतांजलिरुक्त्वा गुह्यादिपादपर्य्यंतं ह्रां
नमः कंठाद्गुह्यपर्य्यंतं ह्रौं नमः मूर्द्धादिकंठांते सः नमः इति विन्यस्य ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इति करषडंगन्यासान्विधाय ध्या
येत् अरुणकमलसंस्थं त्रीक्षणं भूरिभूषं स्फुरणकमलयुग्माभीष्टदाभीतिहस्तं अरुणतरशरीरं भावयामो दिनेंद्रं स्फु
रणकरसमेतं सर्वदेवान्वितं च इति ध्यात्वा ह्रां ह्रीं सः सः इति मंत्रं जपेत् अथ षोडशाक्षरप्रयोगः तत्र प्रातः कृत्वा दियो
गपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्री छंदसे नमः हृदये श्रीभास्कराय देव
तायै नमः इति विन्यस्य मम अभीष्टसिद्धये विनियोगः इति कृतांजलिरुक्त्वा ॐ ऐं हृदयाय नमः क्लीं क्लीं ह्रूं शिरसे स्वाहा ह्रां
ह्रीं ह्रूं शिखायै वषट् सः कवचाय हुं श्रीभास्कराय नेत्रत्रयाय वौषट् स्वाहा अस्त्राय फट् इति षडंगमंत्रान्विन्यस्य ध्यायेत् मा
णिक्याभ्वरथारूढं मणिकुंडलधारिणं हस्ताभ्याम् अभीष्टदं शंखचक्रपद्मधरं रविम् किरीटिनं मेखलिनं कवचिनं तु शरी
रिणं नानारत्नसमोपेतं ऋषिसंघोपशोभितं नक्षत्रग्रहराशिगणाद्यैः सेवितं मुनिमंडलैः सावित्र्या चैव गायत्र्या सरस्वत्या च

वि॰ ११
रवि॰
१५२

पद्माभिनं नानादेवसमायुक्तं भास्करं चिंतयेद्बुधः एवं ध्यात्वा ॐ ऐँ ह्रँ ह्लौँ क्लीँ ऐँ ह्रः फ्रौँ फ्लौँ ह्रूँ सः सः श्रीभास्कराय स्वाहा इति मंत्रं ज
पेत् अथ द्वादशाक्षरस्य प्रयोगः तत्र प्रातः कृत्यादि योगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि देवभागाय ऋषये नमः
मुखे विराट्छंदसे नमः हृदये श्रीआदित्याय देवतायै नमः इति विन्यस्य मम अभीष्टावाप्तये विनियोगः इति कृतांजलिः कृत्वा क्रां
क्रीं क्रूं क्रैं क्रौं क्रः इति षडंगमंत्रान्विन्यस्य प्राग्वद्ध्यात्वा ॐ ॐ ह्रः फ्रीं श्रीं घृणि हंसः सूर्यः आदित्य ॐ इति मंत्रं जपेत् अथ षडक्ष
रस्य प्रयोगः तत्र प्रातः कृत्यादि योगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्रीछंद
से नमः हृदये श्रीआदित्याय देवतायै नमः इति विन्यस्य मम अभीष्टाप्तये विनियोगः इति कृतांजलिः कृत्वा ॐ हृदयाय नमः ॐ शि
रसे स्वाहा फ्रीं शिखायै वषट् क्लीं कवचाय हुं ग्लौं नेत्रत्रयाय वौषट् फ्रौं अस्त्राय फट् इति षडंगमंत्रान्विन्यस्य प्राग्वद्ध्यायेत् ॐ
फ्रां श्रीं ह्रः क्रीं क्लीं ह्रः ग्लौं सः फ्रौं इति मंत्रं जपेत् अथाम्नाष्टाक्षरस्य प्रयोगः तस्य न्यासध्यानादिकं प्रपंचयागमातृकाविधाने
विहितं ॐ क्लीं ह्रः हंसः सोहं स्वाहा इति मंत्रं जपेत् अथ शाक्तदर्शनविधानं तत्रादौ बालामंत्रस्य प्रयोगः तत्र प्रातः
कृत्यादि योगपीठन्यासांते मूलमंत्रेण प्राणायामत्रयं कृत्वा शिरसि दक्षिणामूर्तये ऋषये नमः मुखे पंक्तिछंदसे नमः
हृदये श्रीबालायै देवतायै नमः गुह्ये ऐं बीजाय नमः पादयोः सौः शक्तये नमः नाभौ क्लीं कीलकाय नमः इति विन्यस्य मम
अभीष्टसिद्धये विनियोगः इति कृतांजलिः कृत्वा ऐं हृदयाय नमः क्लीं शिरसे स्वाहा सौः शिखायै वषट् ऐं कवचाय हुं क्लीं ने
त्रत्रयाय वौषट् सौः अस्त्राय फट् इति षडंगमंत्रान्विन्यस्य ध्यायेत् भ्रमद्भ्रमरनीलाभनयनत्रयराजिता सूर्यभास्वन्महार
त्नकुंडलालंकृतांबरा मुक्तालेखारत्नवलयनीलकांचितमालिका विस्फुरन्मुक्तविंदाद्यचंद्ररेखाकिरीटिनी भ्रमद्भ्रम
रनीलाभनयनत्रयराजिता सूर्यभास्वन्महारत्नकुंडलालंकृतांबरा मुक्ताकारस्फुरन्मुक्ताहारभूषणभूषिता कंकणादि

लसद्रत्नांमणिबंधलसत्प्रभां प्रवाललतिकाकारपाणिपल्लवशोभितां वज्रवैडूर्यमुक्तालिमेखलां विमलप्रभां स्रोत्प
लदलाकारपादपल्लवशोभितां नक्षत्रमालासंकाशमुक्तामंजीरमंडितां वामेन पाणिनैकेन पुस्तकं चापरेण तु अभ
यं च प्रयच्छन्तीं साधुकायचरानने अक्षमालां च वरदं दक्षपाणिवहेन तु दधतीं चिंतयेद्देवीं वश्यसौभाग्यवाक्प्रदां ह्रीं र
कं देउथवलामसत्त्रासस्मरेत्प्रिये इति ध्यात्वा ऐंह क्लीं ह सौस इति मंत्रं जपेत् अथ भैरव्याः प्रयोगः ततः प्रातः कृत्यादियोग
पीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि दक्षिणामूर्तये नमः मुखे पंक्तिछंदसे नमः हृदये श्रीत्रिपुरभैरव्यै देवतायै
नमः गुह्ये वाग्भवकूटाय नमः पादयोः शक्तिकूटशक्तये नमः नाभौ कामराजकूटकीलकाय नमः इति विन्यस्य मम मा
भीष्टसिद्धये विनियोगः इति कृतांजलिः कूटत्रयबीजत्रयद्विरावृत्त्या षडंगानि विन्यस्य ध्यायेत् हृदयस्यारुणांभोजकर्णिका
मध्यसंस्थितां जपाकुसुमसंकाशामरुणांबरभूषणां स्मितधौतमहामोहां त्रिनेत्रां चंद्रशेखरां विश्वसौंदर्यसर्वस्वावि
र्भावसागररूपिणीं आनंदमधुरां देवीं मदघूर्णितलोचनां ब्रह्मविष्णुरुद्रेशशिवाख्यैर्मंचसंस्थिते मणिरत्नांगी महादे
वीमुक्ताजयवरीधरां पुष्पकार्मुकहस्तवरां वरदाभयधारिणीं एकांगरागसुभगां ध्यायेत् त्रिपुरभैरवीं एवं ध्यात्वा दसक
लहैं हसकलरीं हसैंस इति जपेत् अथ चैतन्यभैरव्याः प्रयोगः तत्र प्रातः कृत्यादियोगपीठन्यासांते मूलेन प्राणा
यामत्रयं कृत्वा ऋष्यादिकरषडंगन्यासान् प्राग्युक्तवद्विधाय ध्यायेत् उद्यद्भानुसहस्राभां नानालंकारभूषितां मुकुटोद्यल्लसच्चंद्र
रेखारत्नांवरान्वितां पाशांकुशधरां नित्यां वामहस्तकपालिनीं वरदाभयहस्तां च पीनोन्नतघनस्तनीं एवं ध्यात्वा यजेद्देवीं
सर्वसिंहासनस्थितां एवं ध्यात्वा सहैं सकलसकलह्रीं हसौः सह इति जपेत् अथ कामेश्वरीभैरवी तत्र प्रातः कृत्यादि
ध्यानांतं प्राग्वद्विधाय सहैं सकलह्रीं नित्यक्लिन्ने मदद्रवे सहौः इति जपेत् अथ भैरव्याः प्रयोगः तत्र प्रातः कृ

वि० ११
र्णव०
१५२
153

न्यादिषडंगन्यासांतं सर्वं विधाय ध्यायेत् उद्यन्मूर्ध्यसहस्राभां चंद्रचूडां त्रिलोचनां नानालंकारसुभगां सर्वदेवैरभिष्टुतां ॥
स्रवद्रुधिरमुंडालिकलितां रक्तवाससं त्रिशूलं डमरुं खड्गं तथा खेटकमेव च पिनाकं च शरान् देवि पाशं चांकुशमुद्गरं कमात्
पुस्तकं चाक्षमालां च शववसिंहासनस्थितां एवं ध्यात्वा हसखफ्रें हसकलरीं हसौंस इति जपेत् इति नित्याभैरवी अ
थ भुवनेश्वरीभैरव्याः प्रयोगः तत्र प्रातः कृत्यादि षडंगन्यासांतं प्राग्वद्विधाय ध्यायेत् जपाकुसुमसंकाशं दाडिमीकुसुम
प्रभां चंद्ररेखाजटाजूटां त्रिनेत्रां रक्तवाससं नानालंकारसुभगां पीनोन्नतघनस्तनीं पाशांकुशवराभीतिं दधानां च शि
वाश्रये इति ध्यात्वा हसैं हसकलरीं हसौं सः इति जपेत् इयमेव सकारं सर्वा विधेया भुवनेश्वरीभैरवीभेदः संपत्प्रदा
सकाराद्याचकौलेशभैरवी संपत्प्रदाया आद्ये तेरेफरहिता सकलसिद्धिदाभैरवी एतासां विधानं त्र्यक्षादिकं प्राग्वत्
अथ वोडदर्शनाधिदेवतामंत्राः तत्रादौ पद्मावतीप्रयोगः तत्र प्रातः कृत्यादियोगपीठन्यासांतं मूलेन प्राणायामत्रयं
कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्रीछंदसे नमः हृदये श्रीपद्मावत्यै देवतायै नमः इति विन्यस्य ममाभी
ष्टसिद्धये विनियोगः इति कृतांजलिः कृत्वा क्रौं क्रौं मित्यादिना षडंगन्यासं कृत्वा ध्यायेत् पद्मासनस्थां नवकुंकुमाभां रक्तो
त्पले संदधतीं त्रिनेत्रां आविभ्रतीमाभरणानि रक्तां पद्मावतीं पद्ममुखीं नमामि इति ध्यात्वा क्रौं हसपद्मावती हस्ता
ह्राम इति मंत्रं जपेत् उग्रतारा एकजटा नीलसरस्वती त्र्यक्षरत्वात् एतासां मंत्रास्तु ऐं क्रीं श्रीं सौः हुं उग्रतारे हुं फट्
इत्युग्रतारा ह्रीं हुं क्रीं हुं फट् इत्येकजयाः ओं क्रीं स्त्रीं हूं फट् इति तारा क्रौं स्त्रीं हूं इति नीलसरस्वती एतासां च तत्त्मणां
जपेत् बीजानि तत्रैव पंचदशी कूटत्रयं प्रत्येकं प्रत्येकं संयोज्य जपेत् प्रयोगस्तु प्रातः कृत्यादियोगपीठन्यासांतं मूलेन प्रा
णायामत्रयं कृत्वा शिरसि अमुकाय ऋषये नमः मुखे गायत्रीछंदसे नमः हृदये अमुकदेवतायै नमः इति विन्यस्य ममाभी

ष्टसिद्धये जपे विनियोगः इतिकृतांजलिरुक्त्वा ॐ ऐं ह्रीं अखिलवाग्रूपिण्यै हृदयाय नमः ॐ ऐं ह्रीं अखण्डवाग्रूपिण्यै शि
रसे स्वाहा ॐ ऐं ह्रूं ब्रह्मवाग्रूपिण्यै शिखायै वषट् ॐ ऐं ह्रीं विष्णुवाग्रूपिण्यै कवचाय हुं ॐ रुद्रवाग्रूपिण्यै नेत्रत्रयाय
वौषट् ॐ ऐं ह्रः सर्ववाग्रूपिण्यै अस्त्राय फट् इति षडंगमंत्रान्विन्यस्य ध्यायेत् विश्वव्यापकवारिमध्यविलसच्छ्वेताम्बुज
न्मस्थितां कर्त्रीं खड्गकपालनीलनलिनं राजत्करां नीलभां कांचीकुण्डलहारकंकणलसत्केयूरमंजीरतां माप्तैर्नागवरै
र्विभूषिततनूमारक्तनेत्रत्रयां पिंगोग्रैकजटां ललत्सरसनां दंष्ट्राकरालाननां व्याघ्रत्वक्परिधानशोभितकटिं स्मेरास्थिप
हालिकं अद्रौ मेण्णाविराजमानशिरसं स्मेराननां मोहनीं तारां शावरुदासनां हृत्कुचामवां त्रिलोकातस्मरेत् इति ध्यायेत्
अथ मातंगीप्रयोगः तत्र प्रातः कृत्यादि योगपीठन्यासांतं मूलेन प्राणायामत्रयं कृत्वा शिरसि दक्षिणामूर्तये ऋषये नमः मुखे
गायत्रीछंदसे नमः हृदये श्रीमातंगीश्वरीदेवतायै नमः मम सर्वाभीष्टसिद्धये विनियोगः इतिकृतांजलिरुक्त्वा ऐं ह्रीं श्रीं ॐ
नमो भगवति श्रीमातंगेश्वरि सर्वजनमनोहारि हृदयाय नमः सर्वमुखरंजिनि सर्वमुखरंजिनि शिरसे स्वाहा सर्वराजवश
करि सर्वस्त्रीपुरुषवशंकरि शिखायै वषट् सर्वदुष्टमृगवशंकरि सर्वसत्ववशंकरि कवचाय हुं सर्वलोकममुकं मेव
शमानय नेत्रत्रयाय वौषट् स्वाहा अस्त्राय फट् इति षडंगमंत्रान्विन्यस्य ध्यायेत् एवं न्यस्तशरीरो सौ चिंतयेन्मंत्रदेवतां अ
मृतोदधिमध्यस्थे रत्नद्वीपे मनोरमे स्वर्णप्राकारसंवीते मण्डपे रत्ननिर्मिते कदंबविल्वकहारिकल्पवृक्षोपशोभिते वे
दिमध्ये सुखासीनां रत्नसिंहासने प्रभो अष्टपत्रमहापद्मकेसरान्तः सकर्णिके तन्मध्ये च त्रिकोणं स्यात् अष्टपत्रे ततो बहिः
पुनः षोडशपत्रं स्यात् तद्बाह्ये स्याच्चतुर्दलं वेदास्रं च चतुर्द्वारं मण्डलं प्रोक्तमुत्तमम् तस्य मध्ये सुखासीनां श्यामवर्णां सुचि
स्मितां कदंबमालाभरणां श्यजितां चमरापरैः प्रलंबालकसंयुक्तां चन्द्ररेखावतंसितां ललाटे तिलकोपेतां मीषत्प्रहसि

वि॰
र्णव॰
१५४
154

ताननां किंचित्स्वेदांबुमधुरललाटफलकोज्वलां वलीतरंगमध्यांतां रोमराजिविराजितां सर्वाभरणसंयुक्तां मुक्ताहारविभूषितां
नानामणिगणोनद्धकटिसूत्रैरलंकृतां वलयैरत्नखचितैः केयूरैर्मणिभूषितैः भूषितां द्विभुजां बालां मदघूर्णितलोचनां आ
पीनमण्डलाभोगसमुन्नतपयोधरां प्रलंबकर्णाभरणां कर्णोत्तंसविराजितां तमालनीलां तन्वङ्गीं मधुमत्तां मतंगिनीं चतुः
षष्टिकलारूपपार्श्वस्थशुकमातृकां कोटिबालार्कसंकाशां जपाकुसुमसंनिभां एवंवापीनवर्णां च ध्यायेन्मातंगिनीं प
रां एवं ध्यात्वा ऐं क्लीं श्रीं नमो भगवति मातंगेश्वरि सर्वजनमनोहारि सर्वमुखराजि सर्वमुखरंजनि हसकल ह्रीं सर्वराजवशंकरि
सर्वस्त्रीपुरुषवशंकरि हसकहल ह्रीं सर्वदुष्टमृगवशंकरि सर्वसत्ववशंकरि सकल ह्रीं सर्वलोकममुकं मे वशमानय स्वाहा
एवं जपेत् अथ सुमुखीप्रयोगः तत्र प्रातःकृत्यादि योगपीठन्यासांतेन मूलेन प्राणायामत्रयं कृत्वा शिरसि भैरवऋषये नमः मु
खे गायत्रीछंदसे नमः हृदये श्रीसुमुख्यै देवतायै नमः इति विन्यस्य मम अभीष्टसिद्ध्यर्थे विनियोगः इति कृतांजलिः कृत्वा ऐं क्लीं श्रीं
हृदयाय नमः उच्छिष्ट शिरसे स्वाहा चण्डालि शिखायै वषट् मातंगि कवचाय हुं सर्ववशंकरि नेत्रत्रयाय वौषट् नमः स्वाहा
अस्त्राय फट् इति षडंगमंत्रान्विन्यस्य ध्यात्वा स्मरेत्प्रथमपुष्पिणीं रुधिरबिंदुनीलांबरां गृहीतमधुपात्रिकां मदविघूर्णनेत्रत्रयां
घनस्तनभरालसां गलितचूलिकां बालिकां करस्फुरितवल्लकीं विमलशंखताटंकिनीं इति ध्यात्वा ऐं ह्रीं श्रीं ह्रः उच्छिष्टच
ण्डालि मातंगि ह्रः सर्ववशंकरि नमः स्वाहा इति जपेत् अथ चण्डमातंगिनीप्रयोगः तत्र प्रातःकृत्यादि योगपीठन्यासांते
मूलेन प्राणायामत्रयं कृत्वा शिरसि दक्षिणामूर्तये ऋषये नमः मुखे गायत्रीछंदसे नमः हृदये श्रीचण्डमातंगिन्यै देवतायै
नमः इति विन्यस्य मम अभीष्टसिद्ध्यर्थे विनियोगः इति कृतांजलिः कृत्वा मायया षड्दीर्घया षडंगानि विन्यस्य मातंगीं नवयावका
र्द्रचरणां मल्लासिकृत्संपुंकां वीणोल्लासिकरां समुन्नतकुचां मुक्तावालावलीं हृद्यांगीं सितशंखकुण्डलधरां विंबाधरां स

सस्मितामाकीर्णीलकवेणिमज्ञनयनां ध्यायेच्छुकश्यामलां इति ध्यात्वा क्लीं नमः ह्रः हिलि हिलि हूः चण्डमातंगिनी स्वा
हा इति जपेत् ॥ अथ गाणपत्यदर्शनाधिदेवतामंत्राः आदावेकादशगणपतिमंत्रप्रयोगः तत्र प्रातः कृत्यादि योगपीठन्या
सांते मूलेन प्राणायामत्रयं कृत्वा शिरसि गणकाय ऋषये नमः मुखे निचृच्छंदसे नमः हृदये श्री विघ्नेश्वराय देवतायै नमः
इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृतांजलिः कृत्वा ॐ गणंजयाय स्वाहा हृदयाय नमः एकदंष्ट्राय हुं फ
ट् शिरसे स्वाहा अचलकर्णिने नमः शिखायै वषट् गजवक्त्राय नमो नमः कवचाय हुं महोदराय नेत्रत्रयाय वौषट् चण्ड
यहुंफट् अस्त्राय फट् अथ वामांगी मित्यादिना षडंगानि विधाय ध्यायेत् रक्ताभः पाशिमौलिः क्रुशगुणो दंतवरं धारय
न्हस्ताग्रैर्द्विरदाननस्त्रिनयनो रक्तांगरागांशुकः वीजापूरहृदत्कशेफजठरोदानाईगण्डस्यलोलोकेशः फणिभूषणो
गणपतिर्भूयाद्भवद्भूतये इति ध्यात्वा गंहः गंहः गंस इति जपेत् अथ महागणपतेः प्रयोगः तत्र प्रातः कृत्यादि योगपीठन्या
सांते मूलेन प्राणायामत्रयं कृत्वा शिरसि गणकाय ऋषये नमः मुखे निचृद्गायत्री छंदसे नमः हृदये श्री महागणपतये दे
वतायै नमः गुह्ये गं बीजाय नमः पादयोः क्लीं शक्तये नमः इति विन्यस्य ममाभीष्टसिद्धये विनियोगः इति कृतांजलिः कृ
त्वा· श्रां गां हृदयाय नमः गीं शिरसे स्वाहा ह्रीं गूं शिखायै वषट् ग्लीं गैं कवचाय हुं ग्लौं गौं नेत्रत्रयाय वौषट् गंगः अस्त्रा
य फट् इति षडंगमंत्रान्विन्यस्य ध्यायेत् चक्राब्जत्रिशिखान्गुणोत्पलगदेरक्तोत्पलं सहृदंतावीह्ययान्वितवीजपूररदंकुंभ
करैर्विभ्रत्पयोघटकरया निजप्रमदया श्लिष्टं जपासन्निभं सार्द्धेंदुप्रभजे महागणपतिं नेत्रत्रयोद्भासितं एवं ध्यात्वा श्रीं
ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा इति जपेत् अथ हरिद्रागणपतिप्रयोगः तत्र
प्रातः कृत्यादि योगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि गणकऋषये नमः मुखे विराट्छंदसे नमः हृदि श्री

वि॰ ११
शिव॰
१५५
155

क्षिप्रप्रसादनायगणपतयेदेवतायैनमः इतिविन्यस्यममाभीष्टसिद्धयेविनियोगः इतिकृतांजलिःकृत्वा गांगींमित्यादिनाकरषडंग-
न्यासंविधायध्यायेत् सिंदूराभमिभाननंत्रिनयनंहस्तैश्चपाशांकुशौबिभ्राणंमधुमत्कपालमनिशंसाध्वींदुमौलिंभजे पुष्ट्याश्लि-
ष्टतनुंध्वजाग्रकरयापद्मोल्लसद्धस्तयातद्योन्याहितपाणिमात्तवसुमत्पात्रोल्लसत्पुष्करं एवंध्यात्वा गंहः· क्षिप्रप्रसादनामहः·
नमःस· इतिमंत्रंजपेत् अथवक्रतुण्डप्रयोगः तत्रप्रातःकृत्यादियोगपीठन्यासांतेमूलेनप्राणायामत्रयंकृत्वाशिरसि
भार्गवऋषयेनमः मुखेऽनुष्टुप्छंदसेनमः हृदयेश्रीवक्रतुण्डायदेवतायैनमः इतिविन्यस्यममाभीष्टाप्तयेविनियोगः इ-
तिकृतांजलिःकृत्वा वंहृदयायनमः क्रंशिरसेस्वाहा तुंशिखायैवषट् उंकवचायहुं यंनेत्रत्रयायवौषट् हुंअस्त्रायफट् इति
षडंगमंत्रान्विन्यस्यध्यायेत् रत्नाब्जिन्नारुणांतरमणिद्युतिसंशोभिकांतिंसंबिभ्राणंकरकिशलयैःपाशमप्यंकुशाग्रंसाभी-
तीष्टंत्रिनयनयुतंरत्नमाल्याम्बुकाढ्यंअंभोजोद्यत्पुटगतमधुसंस्मरेद्वक्रतुण्डं इतिध्यात्वाहः वक्रतुण्डायहः हूंसः इतिमंत्रंज-
पेत् अथलक्ष्मीगणेशप्रयोगः तत्रप्रातःकृत्यादियोगपीठन्यासांतेमूलेनप्राणायामत्रयंकृत्वाशिरसिअंतर्यामिऋष-
येनमः मुखेनिवृद्गायत्रीछंदसेनमः हृदयेश्रीलक्ष्मीगणेशायनमः इतिविन्यस्यममाभीष्टसिद्धयेजपेविनियोगःइतिकृ-
तांजलिःकृत्वाश्रांगामित्यादिनाषडंगानिविन्यस्यध्यायेत् हेमाभःपीतवस्त्रःकरकमलतलैःसद्ध्वजचक्रशंखैर्दत्ताभीती-
चनासाधृतकनकघटःपद्मसंस्थस्त्रिनेत्रः वामांकाविष्टलक्ष्म्याविधृतकमलयाप्रोल्लसद्दत्तदोर्भ्यांश्लिष्टःसौवर्णकान्त्या
गणपइहमहाश्रीकरोवःश्रियेस्तु इतिध्यात्वा श्रींगंसौम्यायहः· महागणपतयेवरवरदहः· सर्वजनंमेवशमानयसक
स्वाहा इतिजपेत् अथहेरंबस्यप्रयोगः तत्रप्रातःकृत्यादियोगपीठन्यासांतेमूलेनप्राणायामत्रयंकृत्वाशिरसिगणका-
यऋषयेनमः मुखेगायत्रीछंदसेनमः हृदयेश्रीहेरंबदेवतायैनमःइतिविन्यस्यममाभीष्टाप्तयेविनियोगःइतिकृतांजलि

हत्वा गां गीमित्यादिना षडङ्गानि विन्यस्य ध्यायेत् मुक्ताविद्रुमयोर्दामसत्तमुरुणनिभैः पंचभिर्नागवक्त्रैर्हेरंबो भावनीयः प्राणधरमुक्
टोट्टमसिंहाधिरूढः हस्तैर्बिभ्रद्विश्वलोकं कुशाकजपवटीमुद्गरान्सुकपालं टंकाकोमोदकंस्याद्दलसदभयेदानमक्षौघदीप्तिः
एवं ध्यात्वा श्रांहृं गुंहृं नमः स्वः इति जपेत् अथ विरिगणेशमंत्रप्रयोगः तत्र प्रातः कृत्यादियोगपीठन्यासांते मूलेन प्राणा
यामत्रयं कृत्वा शिरसि गणकाय ऋषये नमः मुखे गायत्रीछंदसे नमः हृदि विरिविरिविघ्नेश्वराय देवतायै नमः इति विन्यस्य
ममाभीष्टसिद्धये जपे विनियोगः इति कृतांजलिः कृत्वा विरिविरिहृदयाय नमः गणपति शिरसे स्वाहा वरवरद शिखायै वषट्
सर्वलोकमेकवचाय हुं वशमानय नेत्रत्रयाय वौषट् स्वाहा इति षडंगमंत्रान्विन्यस्य ध्यायेत् सिंहूरानमिति प्राग्वत् ॐ
विरिविरिहृं गणपतिवरवरदहृं सर्वलोकंमेवशमानय स्वाहा हृं इति जपेत् अथ शक्तिगणेशप्रयोगः तत्र प्रातः कृत्यादि
योगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि गणकाय ऋषये नमः मुखे निवृद्गायत्रीछंदसे नमः हृदये शक्तिश्रीगणे
शाय देवतायै नमः इति विन्यस्य ममाभीष्टसिद्धये विनियोगः इति कृतांजलिः कृत्वा ॐ हृदयाय नमः गं शिरसे स्वाहा ॐ शिखा
यै वषट् महागणपतये कवचाय हुं स्वाहा नेत्रत्रयाय वौषट् ॐ गं ॐ महागणपतये स्वाहा अस्त्राय फट् इति षडंगमंत्रा
न्विन्यस्य प्राग्वद्ध्यात्वा ॐ गं ॐ हृं महागणपतये हृं स्वाहा स्वः इति जपेत् ॥ अथेदानीमाम्नायक्रमेण श्रीविद्याषोडशार्णाया उपदेशे
षोडश मूलविद्यास्वेकैकस्य द्वे द्वे विद्ये प्रयोज्ये ता विद्यास्तु ऐं ॐ ऐं श्रीं सहस्रखफ्रें सहौः सहत्मलवरयीं ह्रौं क्रौं हसः सोऽहं स्वाहा
इत्येकादशबीजानि सर्वत्र विद्यादौ योज्यानि स्वप्रकाशपरिपूर्णपरापरमहाकुलसिद्धविद्या महाकुलयोगिनी ह्रौं इति
कुलयोगिनीमूलविद्या १॥ स्वात्मानंदबोधयबोधय हसौ प्रासादपरापरयोगिनी क्रौं इति प्रसादपरायोगिनीमूलविद्या
२॥ ऐं ह्लूं क्लिन्ने क्लेदिनि क्लिन्नद्रवे क्लेदय क्लेदय ऐं क्लीं क्लीं महामदमोहय मोहय क्लीं नमः स्वाहा इति रहस्ययोगिनीमूलविद्या २॥

वि॰ ॥
शिव॰
१५६
156

स्वच्छानंदपरमहंसपरमात्मने स्वाहा हसौः इति शांभवी योगिनी मूलविद्या॰ ४ ॥ ह्रीं नित्यस्फुरत्तानंदमयी महाबिंदुव्यापकमात्रमा
त्रस्वरूपिणी ह्रीं इति नादशा योगिनी मूलविद्या॰ ५ ॥ स्वच्छप्रकाशात्मिके कुलमहामालिनि ह्रीं इति समयविमला योगिनी मूलवि
द्या ६ ॥ हसः नित्यप्रकाशात्मिके कुलकुण्डलिनी आज्ञासिद्धिमहाभैरवविश्रात्मानं बोधय बोधय ऊं वे भगवति ह्रीं इति परबो
धिनी योगिनी मूलविद्या ७ ॥ ऐं मोहं कुरु कुरु इति पंचान्तरी योगिनी मूलविद्या॰ ८ ॥ हसैं हसकलह्रीं हसौः इति लोपामुद्रा
चैतन्यत्रिपुरयोगिनी मूलविद्या॰ ८ ॥ ऐं श्रद्धस्त्वं निर्विकल्पपरब्रह्मात्मस्वरूपिणी क्लीं परानंदमयी शक्तिः सौः ॥
इति अनुत्तरकौलिनी योगिनी मूलविद्या॰ ९ ॥ स्वच्छानंदपरमहंसपरमात्मने स्वाहा हसः इति गुह्यतमविमर्शिनी योगि
मूलविद्या १० ॥ अनाभासाव्योमातीतापरापरव्योमातीताव्योमेश्वरी ह्रीं इति अनाभासा योगिनी मूलविद्या ११ ॥ ऐं ईं ॐ
संकेतसारविद्या योगिनी मूलविद्या १२ ॥ ह्रीं विच्चे भगवति वाग्वादिनि महाह्रदे महामायामातंगिनि ऐं ह्लूं रं ह्रीं इति अनुत्तरवा
ग्वादिनी योगिनी मूलविद्या १३ ॥ हसौः हस्त्रीं दसौः इति अनुत्तरविद्या योगिनी मूलविद्या १४ ॥ ह्रीं सर्वानंदमये महाचक्रे
वेदवेद्यपरब्रह्मस्वरूपिणी परामृतशक्तिः सर्वमंत्रेश्वरी सर्वतंत्रेश्वरी सर्वयोगेश्वरी सर्वज्ञानेश्वरी सर्वपीठेश्वरी जगदुत्पत्ति
मातृका ह्रीं इति तुरीया योगिनी मूलविद्या १६ तथोत्तरतंत्रे॰ पंचमाम्नायदीक्षायां चतुराम्नायदेवताः अगस्तेन समाख्या
ता हृद्दे विद्ये समभ्यसेत् सुरेंद्रानलयोरैशान्या याम्ये वैयाम्यकोणयोः वारुण्ये पाशिमरुतोस्तत्परे सौम्यदिग्भवे अस्यार्थः
पंचमाम्नाय ऊर्ध्वाम्नायस्तत्र दीक्षायां चतुराम्नायदेवताः पूर्वदक्षिणपश्चिमोत्तराम्नायदेवता इत्यर्थः हृद्दे विद्ये एकस्यैक
स्याम्नायस्य समभ्यसेत् योजयेत् दिग्विभागमाह सुरेंद्रेति प्राक्कुण्डाग्नेयकुण्डयोः ऐंद्र्यां पूर्वाम्नायविद्ये॰ याम्यकोण
योः याम्यनैर्ऋत्ययोः याम्ये दक्षिणाम्नायविद्ये॰ पाशिमरुतोः पश्चिमवायव्ययोः वायव्यां पश्चिमाम्नायविद्ये॰ तत्परे उत्तर

शानकुणयोः सौम्यदिग्भवे उत्तरदिङ्मुखसंभूते उत्तराम्नायदेवता इत्यर्थः श्रीकुलार्णवे आकुणे तु भैरवी प्रोक्ता ह्याग्नेये भुव
नेभुवनेश्वरी पीताम्बरा भोगिनी वायव्यकुणे प्रशस्यते वाराही नैरृते कुणे पश्चिमे चापराजिता भवानी वायुकोणे तु श्यामा
ताराम्नायत्परे इति तत्रैव पंचकुण्डात्मके पदे चतुःसप्तदेवताः चतुराम्नायविद्या वा प्रयोज्याः परमेश्वरि अथ श्रीगुरुविद्या
दीक्षायां तु क्रमगत्वेन चरणादिविद्याः प्रयोज्याः परप्रासाददीक्षायां तु पंचब्रह्ममंत्राः पंचानां त्रयाणां भागक्रमं माहृ दक्षिणे
तिः आद्यहीनेति स्पष्टार्थः भुवनेश्वर्यास्तु गणणीं कपाशांकुशभुवनेश्वरी श्रीस्त्रियाभिधिक्रमभुवनेश्वरी वाक्कू वाग्भ
वरुद्धभुवनेश्वरी कामराजरुद्धा त्रिविधा त्रिपुटेति श्रीवीजादिका कामवीजादिका मायावीजादिकेत्यर्थः पंचदशपा इ

तुरीया

ति अत्र जाग्रत्स्वप्नसुषुप्तितुरीयातीतेति पंचविधा जाग्रद्विद्याया जाग्रविद्यायाः स्वप्नविद्या सुषुप्तिविद्यायाः सुषुप्तिविद्याः
तुरीयविद्यायास्तुरीयविद्या तुरीयातीतायास्तुरीयातीतविद्या एवं प्रयोज्या इत्यर्थः श्रीकुलार्णवे परप्रासादमंत्रश्च लक्ष्मी
नारायणस्तथा चिदंबरमहामंत्रः पतिरपश्चिशारभाः षडेव शांभवाश्चैव महामृत्युंजयस्तथा लक्ष्मीजनार्दनो लक्ष्मी
वासुदेवस्तथैव च राजराजेश्वरश्चैव पंचवक्त्रश्च मारुतेः मार्तंडभैरवश्चैव महागणपतिस्तथा उच्छिष्टगणनाथश्च व
क्रतुण्डस्तथैव च गणपत्याश्रिता युक्ताः सीतारामस्तथैव च नृसिंहानुष्टुभं चैव पंचवाणस्तथैव च पंचकामाश्च देवेशि
जैना बौद्धास्तथैव च शांभोरूपास्त्वादेव निर्गता वीरवंदिते शिवपंचाक्षरी भेदाः प्रासादाख्याः शिवास्तथा विष्णोरष्टा
क्षरी भेदा वासुदेवाक्षयास्तथा गाणपत्येन तथैकार्णभेदाश्चरणि मनुस्तथा एवामाम्नायात्तु कथिता वराहस्त्वटुकस्तथा
हरिद्रागणपश्चैव वटुकाः क्षेत्रपालकाः पाशुमंत्रा नृसिंहाख्यास्तथा हरिहरात्मकाः श्रीहंसमंत्रभेदाश्च दयिवाम
नसंज्ञकाः दक्षिणाम्नायविख्यातास्तथोच्छिष्टगणभेदकाः पुरुषोत्तमसंज्ञश्च मालामंत्रास्तथैव च अघोररुद्रभेदाश्च येपि

वि॰ ११
र्णव॰
१५८
157

वीरप्रवेदकाः पश्चिमाम्नायविख्याताः दक्षिणामूर्त्तिरेव च ग्रहाणां लोकपालानां मंदाक्षाणां स्मरस्य च वेतालाः क्षेत्रकाश्चैव यैवे हरि
हरात्मकाः वीरभद्रश्च सुब्रह्मण्यपादयो मातृश्चकाः उत्तराम्नायविख्याताः शीघ्रकालफलप्रदाः अथेष्टदेवताप्रीत्यै यजेदाय
तनान्यपि आयतनानि गोणायतनानि तानि तन्मध्यस्थेष्टदेवतायाः अंगतया पूज्यानि तत्स्थापनक्रमाद्दतत्रैव तत्राद्यपंचाय
तनस्य वक्ष्ये संस्थापने भक्तिविभेदभिन्ने भास्वद्गणश्रीपतिपार्वतीशान् विघ्नेश्वरार्कद्विसुताहरीश्वा कृत्यैकदंतेन तनगेऽजेशामा
येश्वरेभाननभास्कराजाः ईशानविघ्नाधिपशक्तिकृष्णमध्याग्निकोणक्रमतस्तु पूज्याः रत्नसागरे रविर्विनायकोदेवि विष्णुः
शंकरपूजने गणेशाम्बिकेशानास्तथा नारायणार्चने शिवो विघ्नो हरिः कात्यायनी सूर्यार्चने क्रमात् देव्यर्चने शिवो विघ्नः
सूर्यो विष्णुस्तथैव च शिवो रविर्भवानी च विष्णुर्विघ्नेश्वरार्चने आग्नेयादिषु कोणेषु स्थाप्या अंगाग्निभागतः पूज्याश्चैव महेशा
निमध्यस्थाः सुरेश्वराः सदा अत्र सर्वत्र देवपूजायां तत्तत्पूजारूपचक्रमुद्दिश्य तत्तत्कल्पोक्तविधिना तत्तत्पीठपूजापूर्वकं पंचायत
नदेवताः पूजयेत् अन्यथा पूजायां तैः पापस्यात् तदुक्तं कुलार्णवे देवस्य यंत्ररूपस्य यंत्रव्याप्तिमजानता कृत्वार्चनादिकं सर्वं
व्यर्थं भवति शांभवि यंत्रं मंत्रमयं प्रोक्तं देवता मंत्ररूपिणी यंत्रसंपूजिता देवी सहसैव प्रसीदति कामक्रोधादिदोषोत्थसर्वदुः
खनियंत्रणात् यंत्रमित्याहुरेतस्मिन् देवः प्रीणाति पूजितः शरीरमिव जीवस्य दीपस्य स्नेहवत्प्रिये सर्वेषामेव देवानां तथा यं
त्रप्रतिष्ठिते तस्माद्यंत्रे लिखित्वा वा ध्यात्वा वा भजते शिव ज्ञात्वा गुरुमुखात्सर्वं पूजयेद्विधिना शिवे एकपीठे पृथक्पूजाविता
यंत्रे करोति यः अंगांगित्वमविज्ञात्वा देवताशापमाप्नुयात् एकपीठे सुरेशानि स्वस्वयंत्रे पृथक्पृथक् यजेदावरणोपेतान् देवा
स्तत्रविधानतः आवाह्य देवता मध्ये सर्वं येष्वन्यदेवताः उभाभ्यां लभते शापं मंत्री चंचलमानसः कुलप्रकाशतंत्रे स्वर्णरते
स्फटिके दग्धेप्ये हेमानविवर्जिते वंगेनर्हे पञ्चसप्तेष्टपतिते इष्टभूमिषु अन्यमंत्रार्चिते चैव पतितस्पर्शदूषिते दशास्वपि च नोक्त

र्भुः सन्निधानं दिवौकसः ॥ अत्र पंचायतनपूजायाः संप्रदायात्पूज्यपूजकयोर्मध्ये पूर्वदिक्त्वप्रकल्पनं तदनुसारेणाग्नेयादिकं परिकल्प्य
चतुरायतनदेवताः पूजयेत् धर्मादिपूजायां पूज्यपूजकयोस्तुल्यन्यायात् अत्र केचित् प्रधानदेवतावाहनानंतरमेव तदावरणपूजार्थं
देवताग्नेयप्राचीकल्पनानन्तरमेव चतुरायतनदेवतानां पूजायाः कार्यत्वात्कल्पनमयुक्तमिति यथास्थितानेयादिदिक्षु च
तुरायतनदेवताः पूजनीया इत्याहुः तत्र ॰ काम्यपूजास्तु पूर्वाशाभिमुखो भूत्वा वश्यकर्मणि पूजयेत् दक्षिणाशामुखो भूत्वा
मारणे पूजयेत्प्रिये पश्चिमाभिमुखो भूत्वा पूजयेद्धनसिद्धये उत्तराभिमुखो भूत्वा शांतिकर्मणि पूजयेत् इति ब्रह्मयामलव
चनात् अग्निरात्सवायव्यशंभुकोणमुखोऽर्चयेदिति कुलमूलावतारवचनात् अन्यत्रापि एवमनेकान्तत्वेषु दर्शनाच्च यथास्थि
तदिक्क्रमेण पूजायामीशानकोणस्थितायाः कदाचित्प्रधानदेवतायाः वामभागे कदाचिद्दक्षिणे कदाचिदग्रे कदाचित्पृ
ष्ठे चेति स्थितिनैयत्यप्रसंगात् यथास्थितानेयादिषु स्थापनासंभवात्प्रधानदेवतायाः पीठपूजानंतरमेव चतुरायतनदेवतापू
जनात् पीठपूजायामपि धर्मादिपूजने कल्पितप्राच्यनुसारेणैवाग्नेयादिकल्पनाच्च चतुरायतनदेवतानामंगत्वात्प्रधानदेवता
मूर्तेः कल्पितत्वाच्च तदग्रप्राचीकल्पनस्यैवोचितत्वादिति अन्ये तत्तांत्रिकदीक्षावद्भिः शंभौ मध्यगते हरीनहरभूदेव्यो
हरौ शंकरेभास्यनागसुतारवौ हरगणेशाजांबिकाः स्थापिताः देवी विष्णुहरैकदंतरवयो लंबोदरे जेश्वरेनार्यः शंकरभाग
तो हि सुखदा व्यस्तास्त्वनेऽष्टः खदा इति नारायणीयोक्तरीत्या कल्पितप्राच्यनुसारेण मध्येशानादिकोणेष्विष्टदेवतादिकाः पंचदे
वतास्थाप्याः तांत्रिकदीक्षाहीनैस्तु भविष्यपुराणवचनेन पंचायतनदेवतायजनस्यावश्यकत्वं मत्वा वैदिकस्मार्तपौराणि
स्मृतमविधिना पंचायतनयजनं कुर्वद्भिर्यथास्थितेशानकोणेषु मध्ये च पंचायतनदेवतास्थाप्या इत्याहुः तदसंगतमसंगतं
तेषां पंचानां मध्ये एकस्यापि इष्टदेवतात्वाभावे तत्पांगित्वाभावात्कस्यापि मध्ये स्थापनासंभवात् रविर्विनायको विष्णुश्चण्डिके

वि· ।।
ण्व·
१५८
158

शम्भुः पंचमः अनुक्रमेण पूज्यास्ते व्युत्क्रमेण भयावहाः इति पुराणसारसमुच्चये तेषां पंचायतनदेवतानां यजनक्रमस्तोमतत्वाद्वेति·
अत्र पंचायतनपूजायां गणेशाव्यतिरिक्तचतुर्देवतोपासकैः प्रोक्तक्रमेण देवताः संस्थाप्य गणेशमारभ्य प्रादक्षिण्यक्रमप्राप्तदेव
ताचतुष्टयं संपूज्य मध्ये स्वेष्टदेवतां पूजयेत् गणेशोपासकैस्तु सूर्यमारभ्य प्रादक्षिण्यक्रमप्राप्तदेवताचतुष्टयं संपूज्यान्ते गणे
शं पूजयेदित्यागमसिद्धान्तः अत्र केचित्पंचायतनपूजायां देव्याराधकः सूर्यगणेशशिवविष्णूनभ्यर्च्यान्ते देवीं पूजयेदिति स्व
तंत्रमिति वदन्ति· तदसंगतं प्रादक्षिण्याभावे क्रमस्याप्यलाभतयाः स्वमतक्रमापत्तेश्च वस्तुतस्तु गणेशविष्णीशादु
र्गाश्चावाह्य पूजयेदिति योगिनीतंत्रे देवीपूजायां पंचायतनपूजाक्रमदर्शनात् आदौ गणपतिं देवं सूर्यं विष्णुमुमापतिं दु
र्गां च पूजयेद्विद्वानिति भैरवीतंत्रेपि पंचायतनपूजाक्रमदर्शनाद्वीर्यमेव तांत्रिकसिद्धान्तः सत्संप्रदायसिद्धश्च अन्यदेवोपा
सकैरपि तथैव गणेशादिक्रम एव कार्यः पक्षकृष्ण्यायात् इयं पंचायतनपूजा त्ववश्यकी शिवं भास्करमग्निं च केशवं कौ
शिकीमपि· मनसा नार्चयन्याति स्वर्गलोकादधोगतिमिति भविष्यपुराणे तदकरणे प्रत्यवायश्रवणस्यात् मनसाप्य
नर्चयन्निरर्थः अग्निर्गणेशः योब्रह्मा स हरिः प्रोक्तो यो हरिः स महेश्वरः महेश्वरः स्मृत· सूर्यः सूर्यः पावक उच्यते·
पावकः कार्तिकेयोसौ कार्तिकेयो विनायक इति· भविष्योत्तरपुराणवचनात् प्रथमं मध्यस्थापितमूर्तौ स्वेष्टदेवतामावा
ह्य पूजयेत् तत्र मूर्तिस्तु तत्तद्ध्यानोक्तरूपा सा तु शिवलिंगशालग्रामादावपि भावनीया· शिवलिंगानां सर्वदेवतपूजाधि
करणत्वात् तेषु सर्वाश्च देवताः पूज्याः तेषां लिंगमणौ कुम्भे मण्डले च प्रपूजनं शालग्रामे च तद्ध्यायन्त्रादौ च प्रपूजयेत्
भूमावेवक्रमात् पूजा पुत्रायुर्धननाशिनीति रुद्रयामलवचनात् शालग्रामशिलायां तु तत्तद्ध्यानसमर्चयेत् इति सोमशंभु
वचनात् लिंगस्थण्डिलयोर्वह्नौ सूर्ये कुड्ये पटेषु च मण्डले फलके मूर्तौ हृदये दश कीर्तिताः येषु स्थानेषु देवेशि यजंतिप

रमंशिवमितिकुलार्णववचनाच्च शिवमित्युपलक्षणं तेषामित्युक्तेः तेषां पंचायतनदेवतानां यंत्राद्द्वावितस्त्यादिपरं प्रतिमादिपरं शा
लग्रामेश्वराणां यत्रेश्वलिङ्गे प्रतिमासु च पूजा न कर्तव्या केवलेन तु भूतले इति त्रैलोक्यसंमोहनतंत्रवचनात् ततस्तहस्तोनोत्कृष्टप्रमाणप्रति
माकार्या: मातृमात्राङ्गुलप्रमाणेन दशपंचदशाङ्गुला गृहे तु प्रतिमा पूज्या नाधिका तु प्रशस्यते इति कपिलपंचरात्रोक्तरूपाप्रति
माकार्या दशाङ्गुलमिता पंचदशाङ्गुलमिता वेत्यर्थः दशाङ्गुलप्रमाणमारभ्य तिथ्यङ्गुलमिता अथवा अर्चाप्रतिमा विस्तारो गृहे
ष्वगृहमेधिभिर्मितिहयशीर्षपंचरात्रवचनात् अत्रापि वेश्मने दशाङ्गुलमारभ्य दशाङ्गुलपर्यन्तार्चाप्रतिमा कार्येत्युक्तमिति
सांप्रदायिकाः पूर्वश्लोकस्याप्ययमेवार्थ इति वदंति मात्राङ्गुलप्रमाणं तु मण्डपनिर्माणप्रकरणे बोद्धव्यं शिवलिंगनिर्माणप्र
कारस्तु शिल्पिशास्त्रे लिंगमस्तकमध्यात्तु सूत्रमापादमण्डलकं लिंगप्रमाणे लिङ्गपृष्ठे त्वं तावदेव प्रकीर्तितं उच्चत्वे च तथा पीठे
पंचसूत्रसमायुक्तं शिवलिंगं प्रपूजयत् भुक्तिं मुक्तिं ददे चैव धनरोग्यसुखप्रदमिति तन्निर्माणप्रकारस्तु कालोत्तरे अंगुलादि
वितस्त्यन्तं लिंगं गेहे प्रपूज्यते प्रासादे तु तत ऊर्ध्वं स्यात्तज्जनीयं प्रयत्नतः लिंगमस्तकविस्तारं शुभ्र भागसमं नयेत् नाहतस्त्रि
गुणं कुर्यान्नाहस्त्वर्धं पीठविस्तृतिः भूज्याद्याद्विगुणं कुर्यात्तच्च पीठं समुन्नतं हृत्वा वा वतरस्तं च मध्येकं वसमन्वितं द्विगुणं
लिंगहानाच्चकं वत्तवसमाचरेत् त्रिमेखलमथ श्रोत्रं दंसमं चापि द्विमेखलं लिंगमस्तकविस्तारषड्भागं विभजेत्ततः मेखलामेक
भागेन कुर्यात्खातं च तत्समं लिंगदैर्घ्यसमं कुर्यात्प्रनालं तस्य वा यतः विस्तारं तत्समं मूले तदग्रे च तदर्धतः जलमार्गः प्र
कर्तव्यस्तत्समध्ये विभागतः कुर्यात्पीठार्धदीर्घं वा प्रनालं वा श्रीशिवोदितं सर्वेषां रत्नलिंगानां सपीठानां विशेषतः लोहादी
नां च लिंगानां मितं लक्षणमाचरेदिति अस्यार्थः स्वाभिमतलिंगं कृत्वा तस्य मस्तकं स्य विस्तारं शुभ्र लिंगस्योभागः उच्च
तानतस्त्रीनयेत कुर्यादित्यर्थः लिंगमस्तकविस्तारो लिंगोच्छ्राय समो भवेदिति शैवागमवचनात् तावो लिंगमस्तकविस्तारो

वि॰ ११
णव॰
१५९
159

यावत्तत्त्रिगुणसूत्रवेष्टनयोग्यं लिंगस्य नाहं स्थौल्यं कृत्वा लिंगस्य योनाहस्तत्समानविस्तारं तज्जस्य लिंगस्याधः अंशाउच्चस्ततो द्विगु
णोन्नत्ययुक्तं वृत्ताकारं चतुरस्रं वा पीठमध्ये लिंगस्य नाहं सूत्रस्य स्थौल्यमात्रस्य द्विगुणसूत्रवेष्टनयोग्यस्थूलकं वृत्तं कृत्वा कंठस्योर्द्ध
मधश्च समांशेन मेखलात्रयं मेखलाद्वयं वा विधाय लिंगमस्तकविस्तारं षोडशधा विभज्य तेनैकांशमानेन पीठीपरिभागे सर्ववाह्यां
शेन मेखलां कृत्वा तदन्तर्मानेन तत्सलग्नांशेन खातं विरच्य पीठाद्बहिर्लिंगस्य समानदैर्घ्यं पीठमानस्यार्द्धमानदीर्घं वा मूलदेश
दीर्घांशमानविस्तारमग्रदेशे तदर्द्धमानविस्तारं तन्मध्ये मूलाद्याग्रावधिप्रणालविस्तारस्य तन्नीयांशमानविस्तारं खातं तत्रूपं जल
मार्गयुक्तं पीठवत्समं मेखलं प्रणालं च कुर्य्यादिति स्फटिकादिरत्नविशेषैः पाषाणादिभिर्वा शिवलिंगनिर्माणं साधारणोयं वि
धिरिति शिवलिंगनिर्माणप्रकारः ॥ इति श्रीविद्यार्णवे एकादशश्वासः ॥ ११ ॥ अथ श्रीचक्रनिर्माणप्रकारः श्रीहृदया
मले॰ ततः कुंकुमसिंदूरैः कार्य्यं यंत्रं तु योगिना सौवर्णे राजते ताम्रे स्फाटिके वैद्रुमे तथा चक्रे यथोक्तविधिना इष्ट्वा देवीं नरोत्तमैः
इति तंत्रराजे॰ रत्नैर्हेमनिरूप्यैर्वा ताम्रे दृषदि चक्रमात् कृत्वा चक्रस्य निर्माणं स्थापयेत्पूजयेदपि लक्ष्मीकांतियशःपुत्रधना
रोग्यादिसिद्धये दृषदि गंडकीशिलायां गणकीभवपाषाणे स्वर्णे रजते ताम्रे योर्वा इति दक्षिणामूर्त्तिसंहितावचनात् अथवा
तु विशेषफलकालसंख्याविशेषमाह रत्नसागरे यावज्जीवं स्ववर्णे स्याद्रूप्ये द्वाविंशतिप्रिये ताम्रे द्वादशकं वर्षं तदर्द्धं भूर्जपत्रके
तन्त्रांतरे ताम्रे द्वादशकं वर्षं स्फाटिकादौ तु सर्वदा तेषां मध्ये स्फाटिके तु सर्वसिद्धिप्रदं भवेत् लक्ष्मसागरे भूमौ सिंदूररजसा च वि
तं सर्वकामदं स्ववर्णे रचितं यंत्रं सर्वराजवशंकरं रजतेन कृतं यंत्रमायुरारोग्यकांतिदं ताम्रेण रचितं यंत्रं सर्वैश्वर्यप्रदं मतं यंत्रं
हि स्फाटिके देवि मनोभिलषितप्रदं माणिक्यलिखितं यंत्रं राज्यदं भुक्तिदं मतं गोमेदरचितं यंत्रं सर्वैश्वर्यप्रदायकं कूर्मे मरक
ते यंत्रं सर्वशत्रुविनाशनं लोहत्रयोद्भवं यंत्रं सर्वसिद्धिकरं मतं देव्युवाच लोहत्रयोद्भवं यंत्रं कथं कार्य्यं महेश्वर वदस्व कृपया

देव

यावयदंतवववल्लभा ईश्वर उवाच भागादशस्य वर्णस्य रजतस्य च षोडश: तास्रस्य रविभागेन पीठं कुर्यान्मनोहरं तस्मिन्पीठे तु निर्मा
णं श्रीचक्रस्य तु कारयेत् शांतिदं पुष्टिदं प्रोक्तं सर्वशत्रुनिबर्हणं आयुरारोग्यजननं कांतिदं पुष्टिदं गतमिति अथ चक्रस्य प्रस्ता
रभेदेन त्रैविध्यं च तत्रैव । त्रैविध्यं तस्य चक्रस्य भूप्रस्तारो र्हमेरुकं पातालवासिनो देवि प्रस्तारो नित्यरेखकं कुहरे खो महेशानि
मर्त्यलोकनिवासिनां स्वर्गलोकाधिवासानां यंत्राणां मेरुसंज्ञकः भूपुरं तु समारभ्य बैंदवांतं महेश्वरि क्रमात्समुन्नतं सर्वमेह
रूपमयोदितं समोर्द्धरेखं नवकं मूर्द्धरेखं प्रकीर्तितं नित्यरेखो समायोगाद्भूप्रस्तारो मयोदितः यंत्रराजस्वरूपं ते मया स्नेहात्प्र
काशितं गोपितव्यं त्वया भद्रे स्वगुह्यमिव संततमिति अथैतत्प्रस्तार त्रयस्य फलानि प्रस्तारांतरं च । श्रीतंत्रराजे । चतुरस्रं
समारभ्य नवचक्राण्यनुक्रमात् उन्नतोन्नतमामध्याद्बैंदवस्यान्निधनेथवा त्रिविक्रमाङ्गन्नतेनतद्भजन्त्वश्रियं लभेत् एकाहि
षट्कर्मेमान्त्रामश्रियैकीर्त्यै च कल्पते नवानि समरूपाणि सर्वभीष्टार्थसिद्धये तथा कुलमूलावतारे उच्छ्रितं कमशो देवि दि
नशो मिस्रतो मतिः भूचक्रं षोडशारं वाप्यष्टारं च समं भवेत् शेषमुन्नतमीशानि चार्थोस्य मजदं भवेत् चतुरस्रं समं देवि षो
डशारादि बिंदुकं मिथः समुन्नतं देवि श्रियै कीर्त्यै च कल्पते चतुरस्रं समारभ्य बिंदंत समरेखकं तथा श्रीकीर्तिरारोग्य
मस्रतायोपकल्पते अथ श्रीचक्राधिकरणे निषिद्धधातून्यानि निषिद्धानि करणानि चाह तंत्रराजे सीसकांस्यादिषु पु
नः पूर्वोक्तविपरीतकृत् फलकायां पटे भित्तौ स्थापयेन्न कदाचन स्थापितं यदि मोहेन लोभेनाज्ञानतोपि वा कुलवित्तमप
त्यं च निर्मूलयति सर्वथेति कुलमूलावतारे अग्निरंगुलविस्तारद्वात्रिंशदक्षिणोत्तरं पलप्रमाणं कर्तव्यं सर्वार्पीठं मनो
हरं यवार्द्धोच्छ्रयं प्रकुर्वीत चतुरस्रं समंततः तस्मिन्पीठे च निर्माणं श्रीचक्रस्य तु कारयेत् सौत्रामणीतंत्रे । ऋजुरेखाभवेल्लक्ष्मी
र्वक्ररेखादरिद्रता अग्निरंगुलविस्तारो यवार्द्धेनोच्छ्रितिर्भवेत् इति लक्ष्मसागरे अग्न्यंगुलहेमसेत्यादि प्रागुक्तश्रीचक्रनिर्मा ६

वि॰ १२
शिव॰
१६॰

160

णप्रस्तारे सृष्ट्यादिप्रपंचोन प्रपंचितोऽधुना विशेषमाह उत्तरतंत्रे सृष्टिक्रमेण पूजा हि सृष्टिचक्रेऽभिधीयते स्थितिक्रमेण पूजा स्यात्
स्थितिचक्रे महेश्वरि संहारक्रमयोगेन पूजा संहारचक्रके । अत्र श्रीचक्रं त्रिविधं सृष्टिस्थितिसंहारभेदात् तत्क्रमं मातृकासर्वस्वे ॥
श्रीचक्रं त्रिविधं प्रोक्तं सृष्टिस्थितिलयात्मकं प्रत्येकं त्रिविधं ज्ञेयं नत्साकर्थान्प्रयत्नतः मूलभेदा नवैव स्युस्तत्तद्भेदास्त्वनेकधा ।
अत्र सृष्टिसृष्ट्यात्मकं स्थितिस्थित्यात्मकं लयलयात्मकं चेति त्रिविधं सृष्टिसृष्ट्यात्मकं स्थितिसृष्ट्यात्मकं सृष्टिलयात्मकं ल
यसृष्ट्यात्मकं स्थितिलयात्मकं लयस्थित्यात्मकं एतेन नव भेदाः एवं सर्वं द्वादशभेदाः अत्र विवेकस्तन्त्रेष्वेव सृष्टिचक्रं समा
समाख्यातं नवचक्रात्मनुक्रमात् उन्नतोन्नतमामध्यं विज्ञेयं देशिकोत्तमैः श्रीचक्रं सृष्टिसृष्ट्याख्यं प्रतिरेखं तथोन्नतं समाईरेखान्व
कं समे पीठे चयजेद्भवेत् स्थितिचक्रं तदेवोक्तं स्थूलरेखं महेश्वरि सूक्ष्मरेखं भवेत्तत्र स्थितिस्थित्यात्मकं शिवे लयात्मकं निम्नरे
खं स्थूलं लयलयात्मकं सूक्ष्मं पातालरेखं लयात्मकं स्थूलं पातालरेखं लयलयात्मकमित्यर्थः सृष्टिस्थित्यात्मकं चेति सृष्टि
स्थित्यात्मकं त्विति अर्द्धमेवात्मकं यत्रं द्विधाख्यातं महेश्वरि अर्द्धक्रमादुन्नतं यच्च तत्रस्यादितरस्ततः तदर्द्धसमरेखं स्यात्सृष्टि
स्थित्यात्मकं शिवे वैपरीत्येन चैतस्य स्थितिसृष्ट्यात्मना भवेत् चतुरस्रं समारभ्य चक्रत्रयमपीश्वरी क्रमोन्नतं तदर्द्धं तु समं स्या
न्निम्नरेखकं सृष्टिसंहाररूपं स्याद्वैपरीत्येन तस्य तु । लयसृष्ट्यात्मकं त्वत्र प्रोक्तं ज्ञेयं मनीषिभिः अर्द्धपातालरेखं तु तदर्द्धं
चोर्द्धरेखकं लयस्थित्यात्मकं प्रोक्तं वैपरीत्येन तस्य तु स्थितिसंहाररूपं तु विज्ञेयं देशिकोत्तमैः स्थितिस्थित्यात्मकं चक्रं प्रशस्तं गृ
हमेधिनां आयुःकीर्तिधनारोग्यपुत्रपौत्रविवर्द्धनं सृष्टिस्थित्यात्मकं चक्रमप्रजस्त्वश्रियं लभेत् पंचाशद्वर्षतश्चोर्द्धं पुत्रपौत्रप्रदं
भवेत् स्थितिसृष्ट्यात्मकं यंत्रं पुत्रायुर्धनवृद्धिदं पंचशद्वर्षतश्चोर्द्धमपत्यर्द्धं सकृद्भवेत् अन्ये प्रोक्तास्तु ये भेदाः श्रीचक्रस्य महे
श्वरि यतिवैखानसानां तु विशेषाद्वर्णिनामिति उत्तरतंत्रे । कूर्मपृष्ठेन यद्यंत्रं न पूज्यं श्रेयस्कृता तस्मात्सर्वप्रयत्नेन परीक्ष्य

वसमाचरेत् सृष्टिचक्रे महेशानि पूजा सृष्टान्ततो भवेत् स्थितिचक्रे तु स्थित्यन्ता संहारे तु लयान्तता गुरुपारंपर्यतो वा पितृभ्रातृक्रमा
च्चैव प्राप्तं श्रीगुरुमुखात्तं तं गुरुरूपेष्टकनिष्ठके: इत्थं भाग्यवशाद्देवि लभ्यते यदि साधकः पूजां तत्र प्रकुर्वीत स्थित्यन्तां परमेश्वरि उ
द
ष्टं यन्त्रमपि प्रोक्तं फलं नान्यथा शिवे इति पितृपितामहक्रमतो गुरुपारंपर्यक्रमतश्च कालवशाद्भाग्यवशाद्वृष्टं यन्त्रं प्राप्यते च
तस्मिन्यन्त्रे पूजा तत्प्रथमतः संहारक्रमेण ततः स्थितिक्रमेण विधेया शुभफलदं भवतीत्यर्थः अथ दीक्षाङ्गाभिषेका॰
ङ्गकुण्डमण्डपादिविधिः अथ दीक्षाङ्गभूतमण्डपरचनार्थं प्राचीपरिज्ञानस्यावश्यकत्वात्तत्परिज्ञानप्रकारः प्रदर्श्यते तत्र
दिक्साधनं तन्त्रे॰ निर्मले दिवसे हस्तप्रासादादिविवर्जिते स्थाने समतले स्वच्छां कृत्वा हस्तां पदं स्थूयी: तदवष्टम्भतः ऊर्ध्वा
द्वादशाङ्गुलमानतः वृत्तं तत्परितो भ्रामयित्वा तन्मध्ये स्थापयेद्बुधः स्वच्छं सरलं शङ्कुं वर्तुलं द्वादशाङ्गुलं षडङ्गुलपरीणाहं मूल
शिलाविवरेणाव रचितं यत्नतस्तस्मिन्वृत्ते पूर्वापराह्णयोः शङ्कुच्छायासंपातस्थानयोश्चिह्नयुग्मकं कृत्वा चिह्नद्वयप्रा
पिसूत्रं प्राक्प्रत्यगायतं दत्वा वृत्तायतार्द्धेन सूत्रेणोच्छ्रायाधिकेन वा: पूर्वपश्चिमयोर्मत्स्यद्वयं श्लिष्टं परस्परं विधाय च तयोः संधि
यप्रापि प्रसारयेत् मध्यचिह्नस्पृष्टमध्यं तत्सूत्रं दक्षिणोत्तरं पतस्यार्धप्रमाणेन कृत्वा कोणेषु लाञ्छनं तेषु सूत्राष्टक॰
न्यासाच्चतुरस्रं समं भवेत् अथैतद्रचनाप्रकारः अथ मेघाघनाहतस्पृष्टे निर्मले नभोमण्डले दिवसे हस्तप्रासादघनाहते
भूप्रदेशे समे स्थाने कांचिद्विडिं कृत्वा तदवष्टम्भतः प्रतिदिशं द्वादशाङ्गुलमानेन वृत्तं निष्पाद्य तत्र षडङ्गुलमानपरिणाहं मूल
उन्नतोन्नतपरिहाप्य च येन सूचीमात्रीकृताग्रपरिणाहं सरलाकृतिं द्वादशाङ्गुलोच्छ्रायोपेतं वृत्ताकारं शिलाविवरेण निर्मितं शङ्कुं वृ
५५
त्तमध्यस्थबिन्दुमध्ये शङ्कुमूलपरिणाहो यथा भवति तथा संस्थाप्य तच्छङ्कुच्छायाग्रस्पर्शाङ्केन वृत्तरेखा पश्चिमभागे यत्र सं
पातस्तत्र चिह्नं कृत्वा: अपराह्णे शङ्कुच्छायाग्रस्य वृत्तरेखा पूर्वभागे यत्र संपातो भवति तत्र चिह्नं विधाय चिह्नद्वयप्रापि सूत्रं वि
रा

वि॰ १२
एवि॰
१६१

161

पायपूर्वपश्चिमं परिकल्प्य तन्त्रिकद्वयावष्टम्भेन तन्त्रिकान्तरालमानस्यार्धाधिकार्धमानेनान्योन्यं संश्लिष्टं पूर्वापरं तन्त्रिकद्वयं विधाय तद्वत्
रेखोदक्दक्षिणोत्तरं संधिद्वयमापि प्राक्पश्चिमसूत्रमध्यगतमानतिर्यग्रूपेण यत्तत्रं दक्षिणोत्तरं परिकल्प्य पूर्वपश्चिमदक्षिणोत्तरसूत्र
द्वयाग्रचतुष्कसंपातात् हस्तमाणमाणमानेन तत्स्वरूपकाल्पितसूत्राग्रैस्तैस्तैर्मण्डपकुण्डादीनां प्राक्पश्चिमदक्षिणोत्तराम्
कदिक्चतुष्टयं परिकल्पयेदिति अत्र स्थूलदृष्ट्या प्राचीसाधनविधिः प्रदर्शितः सूक्ष्मप्रकारस्तु तन्त्रान्तरे । समे भूतले
कृत्वे सारम्भोक्तप्रकारेण पूर्वदिनकृत्यमुक्तादिनान्तरेऽपि देवेशि प्रागवच्चिह्नद्वयं सुधीः कृत्वाहूते तयोश्च सा च्छायायाः परमेश्वरि ।
प्रवेशो निर्गमश्चैव तत्र पूर्वदिने यदा प्रविष्टनिर्गताच्छाया यद्दानन्मध्यनाडिकाः छायादिनान्तविज्ञाय च्छायायुगमविक्रयोः अ
न्तरं दिनयोरिष्टैस्तन्त्राद्यैर्विभागतः विभज्य तत्र चिह्नानि कृत्वा नाभिः सुरेश्वरि नाडीभिः कल्पिता भागा गुणनीयाः प्रयत्नतः षष्ट्या
हृतं तल्लब्धांशैः पूर्वं युर्यत्कृतं भवेत् प्राचीसूत्रं पूर्वभागे ऽत्नेरेत्तत्तरायणे अयने दक्षिणे चैव दक्षिणस्यां दिशि ध्रुवं चाल्पते चेत्स्फु
टा वा स्यात्प्राची तु परमेश्वरीति प्राचीसाधनं विधाय व्यासद्विगुणरज्वा तेनो पाशौ कृत्वा कं येदिमां व्यासार्धमानेन शंकुं दत्त्वार्धस्मिन्क
र्षणायव प्राच्यन्तशंकोस्तत्पाशौ कृत्वा वा कर्षकर्षणे शंकुं केऽवांकुश्रोणिरेव मदव्यात्पस्याचां .. कौ इति शिल्पिशास्त्रोक्तः
रीत्या मण्डपदेत्र मुद्दिष्टमानाद्धिकविस्तारायामसमचतुरस्रं कल्पीयत् अस्यार्थः कुण्डमण्डपादेर्यो सौ या वा निर्दिष्टस्ताव
द्विगुणरज्जुमभवतः पाशं कृत्वा तामेकतः पाशाद्व्यासार्धमात्रे शंकुं द्वं विन्यस्येत् ततः शंकुकाद्यतो व्यासार्धमानेन विन्य
यकर्षणतः कुण्डमण्डपादेः प्राचीसूत्रप्रमाणेन दत्त्वा तदन्तयोः शंकू निखन्य तयोः तद्रज्जुपाशौ न तथा कुर्याद्यथा व्यासार्ध
ध्यंको यतः कृतः स पाशः प्रतीच्यां स्यात्कर्षं चिह्नं दक्षिणत आकृष्य व्यासार्धं चिह्नं दक्षिणश्रोणिशंकुं दत्त्वा तस्यैवोत्तर दिक्श्रोणिप
च शंकुं दद्यात्ततः पाशौ व्यत्यस्यैवमंशौ साध्याविति एवं समचतुरस्रं तदेत्रं कृत्वा वा तन्मात्रोद्दिष्टमानाभ्यधिकां चतुरस्रां भुवं ।

वाऊमात्रखननादिभिस्तुषांगारादिलोष्टादिकं निरस्य शुद्धमृद्भिः पूर्य्य दृढीकृत्य कीलेनैकीकृते मूले पृथक्तत्समसमाग्रयोर्हिउ
योरग्रे नैकधे न्यस्तिर्य्यक्सूत्रमध्यविन्यस्तः कीलादिना योजनीये दण्डसमतया द्वयोः मूलदेशे लंबसूत्रमसंस्पृशन्यावद्भवं भू
स्येग्रगुणमध्यांकान्निर्य्यग्दण्डगतावयतः सबलेन सूत्रेयेरन्यत्रिमूत्रये द्वाभिसुक्तिनः अर्केयावत्सूत्रमेतन्निभूरेवं समतां व्रजे
त् अयमर्थः समस्थानप्यदीर्घरज्ज्वोः कीकीलेन प्रोतमूलयोर्दण्डयोरग्रनिकटेनाहत्य तिर्य्यग्दण्डं तद्दीर्घकीलेन यो
जयित्वा तन्मध्ये चिह्नं कृत्वा दण्डद्वयेण दीर्घत्रिकोणाकारं विधाय दीर्घदण्डयोर्मूलाल्लंबमानं सूत्रमग्रे लघुपाषाणादिवद्धं
तिर्य्यक्दण्डस्य मध्यचिह्नोपरि भूमिं यथा न स्पृशति तथा विधाय भूमिस्पृष्टाग्रयोरनयोर्मूलं धृत्वा शनैराकृष्टे तिर्य्यग्दण्ड
मध्यांकाग्रसूत्रं चलति तत्र निम्ना भूस्तां पूरयेत् अन्यत्रावनितावा यथा मध्यचिह्ने सूत्रमेति तथा सर्वत्र कुर्य्यादिति शिल्पि
शास्त्रोक्तप्रकारेण भूमीं समीकृत्य तत्रोत्तममध्यमकनिष्ठान्यतमं मण्डपं कुर्य्यात् मण्डपलक्षणं तत्रोत्तरे राज्ञां होमा
भिषेकेषु दीक्षादानव्रतादिषु भानोर्गत्यादिशो ज्ञात्वा पुण्याहं वाचयेत्सुधीः ततः पंचनिनादेन मण्डपं रचयेच्छुभं ज्ये
ष्ठमध्याधमत्वेन तन्मानं त्रिविधं मतं षोडशाष्टादशमितैर्हस्तैर्मानमिहोत्तमं हस्तैर्विंशतिभिः केचिन्मानमुत्तममूचि
रे मध्यमं द्वादशकैश्चतुर्द्दशकरैर्मितं अधमं दशभिर्हस्तैर्मितमाहुर्मनीषिणः केचिन्नवभिस्तद्धस्तैरष्टभिर्वाथ पंच
भिः हस्तैर्मितं वदंत्येवं विस्तारायामसंयुतं स्तंभैः षोडशभिर्युक्तं चतुर्द्वारं सुशोभनं दिक्षु द्वाराणि चत्वारि सार्द्धांगुलकरद्वया
त् सार्द्धांगुलकरं द्वाविद्पीतकरद्वयात् ततो मण्डपसूत्रं तत् त्रिगुणं परिकल्पयेत् पूर्वादिदिक्क्रमात्तस्य मध्यभागस्तु वे
दिका इष्टकाभिर्मृदा वा सा कार्य्या दर्पणसन्निभा वेदीकोणेषु विन्यस्ताः स्तंभा वेदस्वरूपकाः ते चोत्तमे तदुद्दीर्घा मध्यमा
धमयोः पुनः अष्टहस्तोच्छ्रितिर्मताः स्तंभा द्वादश शोभनाः ऋजवः पंचहस्ताः स्तंभाः शाखाः समंततः चतुःकोणेषु च

वि॰ १२
शिव॰
१६२

162

त्वारष्टाष्टैतेमष्टकोटिषु समंततालाः सर्वेतेस्थाप्याः षोडशादेशिकैः पंचमांशोन्मितास्तांश्च निखनेद्भुविदेशिकः मध्यस्तंभवत्तंकाया
देकीभूतायकंपुनः कृत्वाकाष्टचतुष्कंतत्तद्ग्रेकलशाम्बुभं शोभितंकलशेनाथमुखेस्थेनसदारुजं निर्मितंशिल्पिभिःसम्यक्स्था
पयेद्देशिकोत्तमः आच्छादयेत्ततोवंशैःकटैःकरदलैस्ततः मण्डपद्वारबाह्येचयुग्मंयुग्मंदिशाक्रमात् अश्वत्थोडुंबरप्लक्षवटोत्थैस्तो
रणैन्यसेत् सप्तषट्पंचककरैर्निखनेद्भुविपूर्ववत् विशालतावत्तस्याथदशभिस्त्वङ्गुलैर्मिता पंचाङ्गुलपिनद्धोत्सेधंसचामरभू
षितं पंचहस्तोच्छ्रयः प्रोक्तोदण्डस्तुदशहस्तकः ततस्तुलोकपालानांपताकावाऊसम्मताः द्वादशाङ्गुलविस्तारास्तत्तन्मूर्त्या
चलांछिताः पीतरक्तश्यामधूम्रकृष्णश्वेतधूम्रासिताञ्जनाः आयुधांकापताकाःस्युःपुष्पगंधसमन्विताः यथायोगंचदण्डप्रताःस्त
त्तत्संज्ञेणतन्न्यसेत् चंद्रमण्डलगौरेणवितानेनविभूषितं उत्फुल्लवेष्टितस्तंभंनानादीपाद्यलंकृतं आम्रपल्लवमालाभिःशो
भितंद्वारमुत्तमं वेष्टितंदर्भरज्ज्वाचविदध्यान्मण्डपंशुभमिति उत्तरतंत्रे॰ विंशद्धस्तेदशाष्टहस्तेर्मण्डपश्चोत्तमोमतः अष्टादशाष्टहस्तैः
शतेर्हस्तैरथापिवा एकाशीतिमितैर्हस्तैर्द्वासप्ततिकरैरपि षष्टिहस्तैरष्टचत्वारिंशद्भिर्हस्तकैःक्रमात् षट्त्रिंशद्भिस्त्रिंशद्भिः
सप्तविंशतिहस्तकैः चतुर्विंशतिहस्तैर्वामण्डपंकारयेद्बुधः चतुरस्रंतथावृत्तंषट्कोणंचाष्टकोणकं त्रिकोणमष्टपत्राभं
नवकोणंद्विकोणकं पंचकोणंसप्तकोणंरुद्रकोणंतथैवच द्वादशषोडशंचाष्टादशविंशतिकोणकं चतुर्विंशतिकोणंच
सप्तविंशतिकोणकं द्वात्रिंशत्कोणकंचैवषट्त्रिंशत्कोणकंतथा अष्टचत्वारिंशदस्त्रमत्स्याकारोडमाकृति सूर्यकांतासिम
गात्यत्रमेड्डरकाकृति मण्डपास्तत्रकर्तव्याःकुण्डान्यपिविशेषतः स्वर्णाभिषेकेदीक्षायामभिषेकादिशांतिषु तत्तत्कामप्र
योगेषुतत्तत्कुण्डानिदेशिकैः कर्तव्यानिविशेषेणतत्तत्कर्मणपतंद्वितेः अत्रयावंतोमण्डपभेदाउक्तास्तावंतःकुण्डभेदाअपिज्ञे
याः अथैतन्मण्डपरचनाप्रकारः अत्रस्वर्णाभिषेकादिषुचतुर्विंशतिहस्तपरिमिताःकुण्डमण्डपायेउक्तास्तेकर्तव्याः चतुर्विं॰

प्रतिविंशतिरष्टादशषोडशहस्तैर्वोत्तममण्डपमुत्तमं चतुर्दशहस्तैर्द्वादशहस्तैर्वा मध्यमो द्विविधः दशहस्तेनाष्टहस्तैः सप्त
हस्तैः पंचहस्तैश्च समायामविस्तारैश्च कनिष्ठस्त्रिविधः अथ पदे त्रिविधे यथावकाशं त्रिकुसदस्यासाजिकाद्युपदेशादेः सो
कर्यमुक्तं मण्डपं कुर्यात् हस्तचतुर्विंशांगुलदेहोंगुलमानेन महाकपिलपंचरात्रे वातायनपथप्राप्ते मांतिरविरश्मयः
तेषु सूक्ष्मा विमर्ध्यंते रेणवस्त्रसरेणवः परमाणोरष्टगुणस्त्रसरेणुरुदाहृतः तेष्टौ केशाग्रकं यास्तेष्टौ विज्ञा यूकास्तदष्टकं ॥
तदष्टकं यवस्तेष्टावंगुलिः समुदाहृता सा चोत्तमांगुलिः सप्तयवा सैव तु मध्यमा षड्यवा साधमा प्रोक्ता सा मानांगुलमितीरितं
विन्यस्तैस्तिर्यग्रेखाभिर्यवैर्मानांतरांगुलं प्रत्ललिभिर्वीक्ष्य तस्यैस्त्रिभिर्मानांतरं भवेत् आचार्यदक्षिणकरे मध्यमांगुलिमध्यमा
पर्वणोरंतरं दीर्घं मात्रांगुलमुदाहृतं विनांगुष्ठेन शेषाभिर्मुष्टिमंगुलिभिः कृतं चतुर्धा विभजेदेको भागो मुष्ट्यंगुलः स्मृतः
येके चित्सारूप्यायामं विभज्य दशधा पुनः एकं द्वादशधा भागं कृत्वा तेत्तकं सांगुलं देहलब्धांगुलं नाम ज्ञानीयात्तस्य तत्त्वतः
उच्छ्रायः प्रतिमायाः स्यान्महामानांगुलाश्रयः महामानांगुलिरिति मात्रांगुलिरिहोच्यते प्रासादादीश्च तेनैव कुर्यात्तस्मा
नांतरेणैव वेदिकापीठशिबिकारथादीनां विधिः पुनः मानांतरांगुलेनैव भवेन्नान्येन केनचित् योगोपकरणानां च कु
र्यान्मानांगुलेन वै होमांगादिध्रुवादीनि कुण्डमुष्ट्यंगुलाश्रयं देहलब्धांगुलेनैव प्रतिमांगानि कल्पयेत् चतुर्विंशति
संख्याभिर्हस्तस्त्वंगुलिभिर्भवेदिति अत्राचार्यो यजमानः एतावदुक्तं यस्मान्न यजमानस्य तद्भवेदिति तन्त्रान्तरे कर्तुर्दक्षि
णहस्तस्येति शारदावचनात् उत्तरतंत्रे विशेषः नवैकादशपंचाशदानि कुर्यात्तन्मण्डपे चतुःकुण्डी मध्यमे स्यात्कनिष्ठे एक
कुण्डकमिति इत्येवमुक्तप्राकारमात्रांगुलात्मकांगुलादिभिर्हस्तादिपरिकल्प्य प्रोक्तमण्डपं कुर्यात् तत्रोक्तविधिना
समीकृते भूतले पंचवाद्यघोषपुरःसरं ब्राह्मणैः स्वस्तिवाचयित्वा यथोद्दिष्टमानहस्तविस्तारं समचतुरस्रं कोणचतुष्टय

वि॰ १२
एव॰
१६२
मण्डपमानस्य
163

म॰ २

निखातत्वं कुर्वन् इत्थं विधाय पूर्वापरायतं दक्षिणोत्तरायतं च मध्यसूत्रं दृढीकृत्य तत्सूत्रस्य देशं पुनर्नवधा विभज्य परितः कोणव
तुष्टये स्तंभचतुष्टयं दिक्चतुष्टयगतं पूर्वपश्चिमदक्षिणोत्तरायतसूत्रचतुष्कं कोणचतुष्टयगतस्तंभाष्टकमिति संभूय द्वादश स्तंभान्नाति
कृशान् वक्रान् व्रणान् एकजातीयान् स्त्रीपुन्नाम्नश्च हस्तमुच्छ्रायान् खातप्रविष्टस्वस्वपंचमांशान् समानान् द्विहस्तस्थूलस्थौल्यान् तनीयोशा
स्थूलविनस्तृतशिखायुक्तान्मध्यविभक्तैः कोणचतुष्टयैः स्तंभचतुष्टयं पूर्ववत् स्तंभसजातीयं पूर्ववत् किंचित्स्थूलमुन्नमम
ण्डपे तन्मानस्यार्धमानोच्चमन्यमण्डपैः हस्तोच्चं पूर्ववत्सशिखं पंचमांशेन प्रविष्टभूतलमिति संभूय षोडश स्तंभान् त्रिखाय
तेषामुपरि सजातीयानि अक्षतान्यव्रणानि शिखाप्रवेशयोग्यवेधयुक्तकोटिद्वयहीनानि तिर्यक्काष्ठानि शिल्पिभिः परिकल्पि
तानि द्वादश स्तंभाग्रेषु मध्यस्तंभचतुष्टयाग्रेषु च चतुरस्राकारेण समारोप्य मध्यस्तंभचतुष्टयशिखाग्रप्रविष्टमू
लवेधयुक्तमेकीकृताग्रं चतुष्टयनिविष्टसजातीयकाष्ठकलशं कमलाकृतिशोभिताग्रं दिक्विदिक्स्थद्वादशस्तंभशिखाग्र
प्रोतमूलमध्यस्तंभचतुष्टयाग्रस्पृष्टाग्रमध्यतिर्यक्काष्ठचतुष्टयमध्यगताग्रं अर्धाकृतिपथायोग्यदीर्घस्थौल्ययुतमस्तारितद्वादशका
ष्ठयुतमन्यैरपि काष्ठैर्यथायोग्यं दृढीकृतं नारिकेलदलैर्वंशकटैर्वा सम्यगाच्छादितं तैरेव निरोधपिहितकोणचतुष्टयं चतुर्दि
क्षूत्तममध्यमकनिष्ठेषु सार्धाङ्गुलहस्तद्वयस चतुरङ्गुलहस्तद्वयद्विहस्तविस्तारयुतसशाखाद्वारचतुष्टयोपेतं मण्डपं विर
चय मण्डपस्य पूर्वद्वाराद्बहिर्हस्तमात्रं परित्यज्य स्वस्थलं तस्योत्तममध्यमकनिष्ठेषु सप्तषट्पंचहस्तोच्छ्रितं दशांगुलविस्तृतं
पंचाङ्गुलस्थूलं विस्तारस्य दशाङ्गुलत्वात् स्थौल्यस्य पंचाङ्गुलत्वात् वैषम्यं वोद्धव्यं विषमचतुरस्रप्रमाणाद्विरिक्तं विनस्तृतत्
शिखं द्वारस्योभयपार्श्वयोरुत्तममध्यमकनिष्ठेषु सार्धहस्तद्वयसपादहस्तद्वयहस्तद्वयान्तरालं यथा पूर्वं पंचमांशेन प्रविष्ट
भूतलं फलकद्वयं अग्निसीलेपरोहितं यत्र स्पदेवमर्हविजं हैतानारं रत्नधातवं इति मन्त्रेण निखायतत्सजातीयकाष्ठेन समानवि

ष्ट

ल्लारस्थले विषमचतुरस्त्रं कोटिद्वयेपि शिखाप्रवेशयोग्यवेधयुतं तिर्यक्फलकं समारोप्य दर्भमालां च बध्नीयात् एवं दक्षिणद्वारे उदु-
म्बरं तन्मयं तोरणं इषे त्वोर्जे त्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वम् इति मन्त्रेण न्यसेत् ततः पश्चिमद्वारे अश्व-
त्थमयं तोरणं प्राग्वन्निर्मितं अग्न आयाहि वीतये गृणानो हव्यदातये नि होता सत्सि बर्हिषि इति मन्त्रेण न्यसेत् ततउत्तरद्वारे वट-
स्थमयं तोरणं प्राग्वन्निर्मितं शन्नो देवीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः इति न्यसेत् ततस्तेषामुपरिगततिर्य-
क्फलकेषु मध्यतः सुच्छिद्रं विधाय तेषु तोरणसजातीयकाष्ठेन निर्मितमुत्तममध्यमकनिष्ठेषु त्रयोदशैकादशनवाङ्गुल-
मात्रदैर्घ्यं ततस्तन्मूर्ध्नि षोडशांशविस्तारं शूलं वा त्रिशूलाकारं वै सव्ये चक्राकारं तोरणोपरिगततिर्यक्फलकस्य द्वादशांशमात्रदीर्घमग्रा-
गादिक्रमेण शङ्खचक्रगदापद्मलाञ्छनं प्रतितोरणमेकैकं कीलमारोपयेत् ततस्त्रिशूलनिर्माणप्रकारस्तु पिङ्गलामते · शूले
न निर्मिताः कुर्याद्द्वारशाखासु मस्तके शूलेन नवाङ्गुलं दीर्घं तुरीयांशेन विस्तृतिः ऋजवैर्मध्यशृङ्गः स्यात् किञ्चिद्वक्रं च पार्श्वयोः हीने
चैवं समाख्यातं द्व्यङ्गुलं रोपयेत्तथा शेषाणां द्व्यङ्गुलाद्वृद्धिर्विंशत्यङ्गुलवृद्धितः इति हीने कनिष्ठमण्डपे · शेषाणां मध्यमोत्तमानां
विंशः प्रवेशः वास्तुशास्त्रे मस्तके द्वादशांशेन शङ्खचक्रगदाम्बुजं प्रागादिक्रमयोगेन न्यसेत्तेषां सदा रुजमिति द्वादशांशं तिर्य-
क्फलकस्य स्वराहुजं ततस्तोरणसजातीयकाष्ठसंभवं तेन कनिष्ठमण्डपे चतुरङ्गुलोच्चं मध्यमे सार्धचतुरङ्गुलं उत्तमे पञ्चाङ्गुलमि-
ति केचित् · तत्र हस्तोन्मिताः कीलाः संस्थाप्या वै सव्येन तथा शङ्खचक्रगदापद्मलाञ्छिताः शूलसन्निभाः शैवे इति मन्त्रान्तरवचनात्
हस्तमात्रं कीलं वदन्ति तत्र तिर्यक्फलकेषु तदा तद्धस्तमात्रेषु कीलेषु क्रमानेनैवा प्रदेशेषु शङ्खचक्राकारं वा त्रिशूलाकारं वा का-
र्यं बिलप्रवेशस्तन्मध्ये एव कार्यः उर्ध्वरितं तन्तेषां दण्डं वद स्थापनम् इति ततो मण्डपाग्रे दशहस्तदैर्घ्यं वंशदण्डावलं वितं हस्तमात्रवि ८
तं पञ्चहस्तदैर्घ्यं वा तत्तन्मन्त्रदेवतावाहनमूर्तिकितचन्द्रादिभूषिताग्रसुम्भेन च तन्मध्ये वततद्देवतवर्णानुरूपवर्णं वा ध्वजमारोप्य दश-

वि·१२
णि·व
१६४

164

दिव्यवाक्रमात्रदीर्घाय यथायोग्यमानदण्डावलम्बि वितानस्तम्भलोकपालवर्णानुरूपवर्णास्तम्भलोकपालवाहनमूर्द्धाङ्किता· द्वादशांगुलविस्त
तालोकपालानां वेदोक्त तत्तन्मंत्रेण पताकाश्च बध्नीयात्तत्रेन्द्रस्य पीतवर्णा· वह्नेः पिंगलवर्णा· यमस्य कृष्णवर्णा· निर्ऋतेः श्यामवर्णा· व
रुणस्य श्वेतवर्णा वायोर्धूम्रवर्णा· सोमस्य श्यामलवर्णा· ईशानस्य श्वेतवर्णा· ब्रह्मणो रक्तवर्णा· अनन्तस्य श्वेतवर्णा इति पताकाभि
रलंकृत्य· मण्डपाभ्यन्तरे स्तम्भेन वितानपुष्पमालाभिरलंकृत्याम्राश्वत्थदलग्रथितदर्भरज्जुरूपचंदनमालया मण्डपमंतर्बहि
श्च परिवेष्ट्य स्तम्भानुक्रमेण संवेष्ट्य तन्मध्ये स्तम्भचतुष्टयमध्यगते चतुरस्रकुण्डमध्यावेदेः पक्षेष्टकादिभिः स्निग्धमृद्भिर्वा चतु
रस्रां दर्पणोदरनिभ पार्श्वचतुष्टयमध्यप्रदेशां समतलां वेद्यायामस्यैकादशांशेन नवमांशेन सप्तमांशेन पंचमांशेन चतुर्थांशे
न तृतीयांशेन वा समुन्नतां हस्तमात्रोन्नतां वा वेदिं विदध्यात् तदुक्तं तन्त्रान्तरे उच्छ्रायोस्यार्द्धहस्तेन वसुपेद्विहस्ते त्रिभागकैरिति· क
पिलपंचरात्रे· चतुर्थांशोच्छ्रितस्तस्याश्चिपंचसप्तमोपि वा नवैर्द्वादशभागैस्तामिष्टकाभिः प्रकल्पयेदिति तन्त्रराजे· विदध्यान्म
ध्यतो वेदीं करमात्रसमुन्नतामिति· शारदायां· नवत्र्यग्रहवाराणामनुकूले शुभेहनि· ततो भूमितले शुद्धे तुषांगारवर्जिते पु
ण्याहं वाचयित्वा तन्मण्डपं रचयेच्छुभं पंचभिः सप्तभिर्हस्तैर्नवभिर्वा मितान्तरं षोडशांस्तम्भसंयुक्तं चत्वारस्तेषु मध्यगाः अष्ट
हस्तसमुच्छ्रायाः संस्थाप्या द्वादशाभितः पंचहस्तप्रमाणास्तु निश्छिद्राश्च ऋजवः शुभाः तेषां च मांशानि खनेन्मतिमांस्तत्रवि
त्तमः नारिकेलदलैर्वंशैः छादयेत्तत्समंततः द्वारेषु तोरणानि स्युः क्रमात्क्षीरमहीरुहां स्तंभोच्छ्रायसमनस्तेषां सप्तहस्तैः पृथ
क् पृथक् दशांगुलप्रमाणेन तत्सरीणा हरीरितः तिर्यक्फलकमानेस्यात्तम्भानां मध्यमानतः शूलानि कल्पयेत्तन्मध्ये तोरणोह
स्तमानतः ~~शूलानि कल्पयेत्तन्मध्ये तोरणोहस्तमानतः~~ दिव्यध्वजान्निबध्नीयाल्लोकपालसमप्रभान् वितानदर्भमालाद्यैरलंकुर्वी
त मण्डपं तत्त्रिभागमिते देशे रत्निमात्रसमुन्नतां चतुरस्रां ततो वेदीं मण्डलाय प्रकल्पयेत् इति मण्डपनिर्माणविधि अथकलि

ष्टमण्डपेषु दशहस्तमण्डपेऽपि मध्यमांशाधिकत्रिकरायता वेदी कुण्डवेद्योरन्तरालमुभयतः कंठमेखलासहितकुण्डद्वयव्याप्तभूमिश्च
तद्धस्तमिताऽन्तर्बहिः पार्श्वद्वयेऽपि कुंभस्थापनार्थं हस्तद्वयमिति समस्तमण्डपभूमिर्व्याप्ता अतः परमाचार्यैरत्र कुसदस्यादीनुपवे
शनस्थानमपि न लभ्यत इति नायं पक्षः समीचीनस्तस्मादयं पक्षस्त्वेकैककुण्डे कमेखलादिसंक्षेपचिकीर्षया मेतावता चारितार्थ्या
त्तद्विषय इति ज्ञेयः इत्थं मण्डपं विधाय तस्मिन्मण्डपे पूर्वाद्यष्टदिक्षु चतुरस्रयोन्यर्द्धचंद्रत्रिकोणवर्तुलषड्कोणपद्माष्टास्राख्या
न्यष्टौ कुण्डानि कुर्यात् तत्रादौ चतुरस्रकुण्डनिर्माणप्रकारमाह शारदायां प्राक्प्रोक्ते मण्डपे विद्वान्वेदिकाया बहिस्त्रिधा क्षे
त्रं विभज्य मध्येंऽशे पूर्वादि परिकल्पयेत् अष्टाशास्वाशास्कुण्डानि रम्याकाराण्यनुक्रमात् चतुरस्रं योनिमर्धचंद्रं त्र्यस्रं च वर्त्तु
लं षडस्रं पंकजाकारमष्टास्रं तानि नामतः आचार्यकुण्डं मध्ये स्याद्गौरीपतिमहेन्द्रयोः हस्तमानमितां भूमिं पूर्ववत्परिसूत्रयेत्
समंतात्कुण्डमेतस्याश्चतुरस्रस्य भावयेत् चतुर्विंशत्यंगुलाख्यं हस्तं तत्र विदो विदुः चतुरस्रीकृते क्षेत्रे पंचधा विभजेत्तथौ न्यसेत्
रस्रादेकांशं कोणार्द्धार्द्धप्रमाणतः भ्रामयेत्कोणमानेन तदान्यदपि मंत्रवित् सूत्रयुग्मं ततो दद्यात्कुण्डं योनिनिभं भवेत् चतु
रस्रीकृते क्षेत्रे दशधा विभजेत्ततः एकमेकं त्यजेदंशमधऊर्द्ध्वं च तत्रवित् ज्यासूत्रं पातयेदग्रे तन्मानाद्भ्रामयेत्ततः अर्द्धचं
द्रं कुण्डं रमणीयमिदं भवेत् चतुर्द्धा भेदिते क्षेत्रे न्यसेदुभयपार्श्वयोः एकैकमंशं तन्मानादग्रतो लांछयेत्ततः सूत्रत्रयमथ कुर्या
त्र्यस्रं कुण्डमुदाहृतं अष्टादशांशे क्षेत्रे अंशं न्यसेदेकं बहिर्बुधः भ्रामयेत्तेन मानेन तदा कुण्डमनुत्तमं अष्टधा विभजेत्क्षेत्रं मध्ये सू
त्रस्य पार्श्वयोः भागं न्यसेदेकमेकं मानेनानेन मध्यतः कुर्यात्पार्श्वयुगे मत्स्यचतुष्कं तत्र वित्तमः सूत्रषट्कं ततो दद्यात्षडस्रं कु
ण्डमुत्तमं चतुरस्रीकृते क्षेत्रे विभज्याष्टादशांशतः एकभागं बहिर्न्यस्य चतुरस्रं प्रकल्पयेत् अष्टयोऽथ चतुरस्रस्य को
णार्द्धार्द्धप्रमाणतः बाह्यस्य चतुरस्रस्य कोणभ्रमपरिलांछयेत् दिक्षुप्रतियथान्याय्यमष्टौ सूत्राणि पातयेत् अष्टास्रं कुंड

वि॰ १८
र्ती॰ व
१६५

165

मेतद्धितं च विजितिरुदीरितं श्रीतंत्रराजे॰ प्राक्प्रत्यक्सूत्रमास्फाल्य तन्मध्ये चिह्नकल्पनं कृत्वा ततः सर्वतः पश्चाद्द्वादशांगुलमानतः तत
स्तदग्राण्यालंब्य मध्यचिह्नस्य मानतः कुर्याद्धंसपदं कोष्ठान्यभितस्तेषु पातयेत् परं प्रसज्य तत्रापि विदध्याच्चिह्नयुग्मकं प्राक्प्रत्य
क्चिह्नमानेन तयोरेवावलंबतः दक्षिणोत्तरतो हंसपदं कृत्वा तयोस्ततः प्रसार्य सूत्रं तत्रापि मार्जयित्वोक्तमानतः चतुष्टयेत
स्त्र्याणां चतुरस्रं भवेत्समं इति अथैतत्कुंडरचनाप्रकारः तत्र वेद्याः पूर्वभागे मध्ये षडंगुलमानेन हस्तमात्रां भुवं परित्यज्य प्राक्कल्पित
दिक्क्रमेण प्राक्प्रत्यगायतं सूत्रमास्फाल्य तन्मध्ये चिह्नं कृत्वा तच्चिह्नात्सर्वतः पश्चिमतः षडंगुले द्वादशमानेन चिह्नं कृत्वा तन्म
ध्यकोणं मार्जयित्वा तच्चिह्नद्वयावष्टंभेन तत्सूत्राद्धि किंचिदधिकमानभ्रमेण पूर्वापरतः किंचिन्मोन्मसंश्लिष्टं तत्र द्वयं विधा
य तयोर्दक्षिणोत्तरसंदेशरूपं हंसपदद्वयं प्रागपि प्राक्प्रत्यक्कल्पसूत्रमध्यगतहंसपदभेदं दक्षिणोत्तरं सूत्रमास्फाल्य तत्रापि मध्य
चिह्नाद्द्वादशांगुलमानेन दक्षिणोत्तरं चिह्नद्वयं विधाय तत्र द्विकाणं मार्जयित्वा तत्सूत्राग्रचतुष्टयावलंबेन द्वादशांगुलमाने
न चतुर्ष्वपि कोणेषु हंसपदं विधाय तत्र द्वयान्तर्हंसपदप्रापि प्राक्प्रत्यक्सूत्रद्वयं दक्षिणोत्तरं सूत्रं स्फाल्य चतुरस्रं कुर्यात् तत

मं

स्तत्प्राक्प्रत्यगायतवस्त्रसूत्रमानतिष्कसमं चतुरस्रं तत्र खातं कृत्वा ततः परितः कृणमानस्य चतुर्विंशांशमितां भुवं परित्यज्य

द्वयं संभूय हस्त
चतुष्टयमा=

तद्बहिर्द्वादशांगुलविस्तारो चतुरंगुलोत्सेधः प्रथमेखलां कृत्वा तदुपरि वाह्ये परितश्चतुरंगुलमानेन त्यक्त्वा ष्टांगुलविस्तारं चतुरंगु
लोन्नतां द्वितीयां मेखलां कृत्वा तदुपरि वाह्ये चतुरंगुलं त्यक्त्वा विस्तारां तथा भूपाचतुरंगुलमितां तृतीयां मेखलां कुर्यात् एवं
ते प्रथमामेखला द्वादशांगुलोन्नता चतुरंगुलविस्तृता द्वितीयाष्टांगुलोन्नता चतुरंगुलविस्तृता तृतीया चतुरंगुलोन्नता चतुरंगु

र्ं

लविस्तृता च भवतीति अत्र केचित्प्रथमामेखला चतुरंगुलविस्तृता नवांगुलोन्नता द्वितीया त्र्यंगुलविस्तृता पंचांगुलो
न्नता तृतीया त्र्यंगुलविस्तृता द्व्यंगुलोन्नतेति मेखलामानमाहुः एतन्मेखलया सह हस्तमात्रता नपदेशेयं तत्र पंचद १

शांगुलमित्रत्वात्तस्यैव विश्वकर्मणोक्तत्वात् तदर्द्धेन वांगुलैर्छायस्यैवावष्टम्भकत्वात् हस्तमात्रत्वात्पदेतत्सर्वेषामेवलामानं
वितस्त्यष्टतदर्द्धकैः विस्तारोत्सेधयोः कुर्यादिति तंत्रराजवचनात् सत्वपूर्वकगुणान्विताः क्रमात् द्वादशाष्टचतुरंगुलोच्छ्रिताः
सर्वतोंगुलचतुष्कविस्तृता मेखलाः सकलसिद्धिदा मता इति मयपंचरात्रवचनाच्च । पूर्वोक्तपदपदः समीचीन इति । ततः सर्व
बाह्यस्यमेखलाया बहिश्चतुरंगुलायामविस्तारोत्सेधं चतुरस्रपीठं मृदा कृत्वा तदुपरि निहितमूलद्वादशांगुलदीर्घोत्तरोत्तर
हीनपरिणाहमध्यमेखलासंलग्नरंध्रनालयुतां मूले कुंभद्वययुक्तामध्ये सगर्भामुपरितनमेखलोपरिगतामष्टांगुलमा
नमूलां तन्मध्यदेशादुभयपार्श्वतः क्रमेण संकुचितामेकांगुल्यग्रविस्ताराग्रां द्वादशांगुलमानायाममेकांगुलोत्सेधमेखला
मश्वत्थपत्राकारां मूलात् किंचित्क्रमान्निम्नामीषत्कुण्डप्रविष्टाग्रां योनिं कुर्यात् अथ कुण्डमध्यस्थहंसपदावलंबेन प्रतिदि
शं चतुरंगुलमानेन वृत्तं त्रिःपरिघात्तद्बहिः पुनः षडंगुलमानेन च दत्वा नेकत्वा कर्णिकां च परिकल्प्य वृत्तद्वयान्तरालवीथ्या
मष्टदलानि कृत्वा षडंगुलोर्द्धनाभिं कुर्यादिति चतुरस्रकुण्डनिर्माणविधिः अथ योनिकुण्डमाह तंत्रराजे । तन्मध्यपंचमांशो
नविकाशपत्रसूत्रकं पूर्वतः पश्चिमं द्वद्वकोष्ठयोर्मध्यदेशतः तत्कोणमानेन तथा भ्रामयेत्पश्चिमाग्रकान् उत्तराग्रा
वधि तथा दक्षिणाग्रावधि प्रिये तन्मध्यतिर्यक्सूत्राग्रद्वयावष्टंभतस्तथा विकासितवलसूत्रावधि स्याद्द्वयं भवेत् योनिकुण्ड
मिदमद्वेष्टाद्वृत्तर्ष्टभयात्मसु तस्मिन्नेवाब्जकुण्डं निवद्धामि समानतः चतुरस्राभितो याति तत्तत्स्यात् भूः सास्यतः स्थिता । लभ
ते सर्वं कुण्डेषु तेन सर्वाणि सर्वतः तन्मात्रे च जायंते षष्ठ्यं वसंगुलात्मनेति अथैतत्कुण्डरचनाप्रकारः तत्र प्राक्चतुरस्रंनि
र्मीय चतुष्कोष्ठयुतस्य वस्त्रसूत्रं तन्मानपंचमांशेन पूर्वस्यां दिशि वर्द्धयित्वा तत्कोष्ठचतुष्टयात्मकचतुरस्रस्य पश्चिमभागस्य द
क्षिणोत्तरकोष्ठयोर्नैरृत्यादीशानांतभागे यदि वायव्यांत चतुष्कोणसूत्रद्वयास्फालनेन लक्षितस्तत्र द्वयसंपातं विदितमध्य

विहूहृदयं विधाय तत्पश्चिमाविहृद्दक्षिणोत्तरायततं तिर्यक् तत्र तत्र तत्पश्चिमसूत्रं तिर्यक्सूत्रं = द्वय=२ स्यं

वि·१२ णि·व १६६ 160

देशावष्टंभनस्तत्कोणावधिमानेनोत्तरकोष्टप्राक्प्रत्यक्सूत्रस्य पश्चिमाग्राद्दिदक्षिणोत्तरतिर्यक्सूत्रेणोत्तराग्रावधिनद दक्षिणकोष्टेनतत्सू
त्रपश्चिमाग्रादितत्तिर्यक्सूत्रदक्षिणाग्रावधिभ्रमादर्द्धचंद्रद्वयमुत्पाद्य तन्मध्यतिर्यक्सूत्राग्रमारभ्य प्राक्प्रसारितब्रह्मसूत्राग्राव
धिसूत्रद्वयास्फालनेन योन्याकारं देशं परिकल्प्य तद्बहिःस्थकंठमेखलयोर्यथोक्तमानेनोत्कृष्टतया योनिमण्डलद्वयं निष्पाद्य प्राग्व
त्खातं कृत्वा योन्याकारमेव कंठमेखलादि कल्पयेदिति कुण्डानां यादृशं रूपं मेखलानां च तादृशं कुर्य्यात्सर्वेषु कुण्डेषु इति कुल
प्रकाशवचनात् अथार्द्धचंद्राकारकुण्डमाह· तत्रराज्ञे· तन्मध्यदशांशांशात्परित्यज्याथ ऊर्द्ध्वतः शेषांशांशकमानेन तन्म
ध्याङ्गमयेन तथा अर्द्धचंद्राकृतिर्यत्र भवेत्कुण्डं तदीरितं इति अथैतत्कुण्डरचनाप्रकारः तत्र प्राक्चतुरस्रं निर्माय तद्विष्कंभमा
नं दशधा विभज्य तेष्वेकैकांशं प्राक्पश्चिमयोः परित्यज्य तत्पश्चिमे दक्षिणोत्तरायततिर्यक्सूत्रं तच्चतुरस्राद्बहिः प्रपंचशत्र्यमाने
न दक्षिणोत्तरयोर्वर्द्धयित्वा तदग्रद्वयावधितत्कल्पितपश्चिमब्रह्मसूत्रसंधिमध्यावलंबेन तत्सूत्रं वार्द्धचंद्रनिभं मण्डलद्वयं कृ
त्वा प्राग्वच्च मध्यगतब्रह्मसूत्रसंधिमारभ्य षोडशांशमानसूत्रभ्रमादर्द्धचंद्राकारं कुण्डं भवेदिति· इत्यर्द्धचंद्राकारमंडलं निर्माय तद्ब
हिः प्रथुक्कष्टकमाच्चैकांगुलमानेन द्वादशांगुलमानेन वा अर्द्धचंद्रनिभं मण्डलद्वयं कृत्वा प्रथममण्डलमध्ये हस्तमात्रनि
म्नं खातं कृत्वा बहिः कंठस्थानं परित्यज्य प्राग्वन्मेखलादिकं कुर्य्यादिति अथ त्रिकोणकुण्डमाह तत्रैव· षष्ठमांशात्पार्श्वयो
स्तु विकाशयेत् प्रत्येकं पश्चिमे सूत्रं तन्मानेनाथ सूत्रयोः विन्यसेद्धस्तसूत्रं तद्द्वयाग्रावधिलंबनात् कुण्डं त्रिकोणमुदितमिति
अथैतत्कुण्डरचनाप्रकारः तत्र प्राग्वच्चतुरस्रं कृत्वा तद्ब्रह्मसूत्रस्य प्रागग्रं बहिर्गत्वा प्रसार्य्य तच्चतुरस्रविष्कंभमानेषोढाऽवि
भज्य तेष्वेकैकांशेन पश्चिमतिर्यक्सूत्राग्रद्वयं पार्श्वद्वयेऽपि बहिः प्रसार्य्य तदग्रद्वयात्तत्सूत्रद्वयस्य प्राक्प्रसारितब्रह्मसूत्रस्य
चयत्रसंपातस्तदवध्यास्फालनात्त्रिकोणं परिकल्प्य तद्बहिरेकांशमानेन तद्बहिर्द्वादशांशमानेनोत्कृष्टतया त्रिकोणद्वयं निष्पा·

स्वा

तस्यैव=

यद्वा तत्कंठमेखलादिभागवत्कल्पयेदिति अथ वृत्तकुण्डमाह तत्रैव तन्मध्यादष्टादशांशेन प्राक्सूत्राग्रं विकाशयेत् तिर्यक्सूत्राद्बहि
स्तेन मानेन भ्रामयेत्तथा मध्यचिह्नावलंबेन तद्वद्वृत्तमंडलमिति अथ तत्कुण्डरचनाप्रकारः तत्र प्राक्चतुरस्रं दत्ते सूत्रे साधयि
त्वा तन्मध्ये विष्कंभमानमष्टादशधा विभज्य तेष्वेकांशमानेन तत्पश्चात्तं चतुरस्राद्बहिर्वलनसूत्रस्य प्रागग्रं विस्तार्य मध्यचिह्नमवलंब्य वि
स्तारितवलनसूत्राग्रमानेन परितो भ्रमेण वृत्तं निष्पादयेत् बहिः पुनरत्र चतुरस्रस्य चतुर्विंशांशेन कंठार्थं वृत्तं कृत्वा तद्बहिः पुनर्द्वा
दशांगुलमानेन वृत्तांतरं निष्पादयेत् प्रथमकृतवृत्तमध्ये हस्तमात्रखातं कृत्वा कंठमाद्बहिर्द्वादशांगुलान्तरालवीथ्यां प्राग्वन्मेख
लात्रयं योन्यादिकं रचयेदिति अत्र वृत्तकुण्डे योनिर्नास्तीति केचित् तत्र ॰ योनिकुण्डे योनिः पद्मकुण्डे नाभिश्च नास्तीति तन्मते त्रिक
ह्नातः अथ षडस्रकुण्डमाह तत्रैव तन्मध्यषोडशांशेन विकाश्य वलनसूत्रकोणं तन्मानेन च तत्प्राक्कृत्वा वृत्तमतिस्फुटं तद्वृत्ते
न मध्यस्य कुर्याद्दर्शनलांछनं तत्र षडस्रत्रयं तेन भवेत्कुण्डं षडस्रकमिति अथैतत्कुण्डरचनाप्रकारः तत्र प्राग्वच्चतुरस्रं
विधाय तन्मध्यमानं षोडशधा विभज्य तेष्वेकांशमानेन वलनसूत्रस्य प्रागग्रं विकाश्य तन्मानेन चतुरस्रमध्यस्थहस्तपद्म
ध्यावलंबेन भ्रमण वृत्तं निष्पाद्य तन्मध्यविष्कंभमानार्द्धेन तन्मध्यतिर्यक्सूत्रदक्षिणाग्रादिपरितो दत्ते चिह्नषट्कं विधाय तत्र चि
ह्नाचिह्नमानसूत्रषट्कमास्फाल्य तत्तच्चापरूपवृत्तखंडमार्जनेन षट्कोणकुण्डं तत्र निष्पाद्य तद्बहिरेकादशांगुलान्तरा
क्रमात्षट्कोणद्वयं निष्पाद्य खातादीनि प्राग्वत्कल्पयेदिति अथ पद्मकुण्डमाह लक्षणसंग्रहे चतुरस्रीकृते दत्ते त्रिभजेद्दश
धा विके अष्टमात्रप्रमाणेन कर्कटेन तन्मध्यतः वर्त्तुलं भ्रामयेत्सम्यक्कर्णिकाकेसरात्पुनः अष्टमांशाद्वयेनैव मध्यतो वर्त्तुलं भ
वेत् तृतीयेनाष्टमांशेन पत्राणां मध्यभूमिता ॰ चतुर्थं तु भवेत्तत्र व्यासतत्त्वेन च भ्रमात् चतुर्विंशतिधा भक्ताद्वलनसूत्रव
शानेन तस्यैकं भागमादाय भक्ता षोडशधा पुनः पंचभिः षोडशैर्भागैर्मण्डलं पंचकमष्टकं भागमादाय तद्बाह्ये पंचमं मण्डलं

शिवे मध्यतो भ्रामयेत्सर्वैः पत्राणामग्रभूर्मता॰ प्रागुक्तविधिना देवि ततः पद्मं समालिखेत् वायव्यान्तरालं यत्तन्मानं केसराग्रतः तन्मा
नं कर्कटं कृत्वा केसराग्रे निधाय च गुरूपदिष्टमार्गेण षोडशार्द्धनिशाकरान् लिखित्वाकृतिहस्तेन यत्राग्राणि समालिखेत् कर्णि
काव्याससमानेन परितस्तत्र च यत्नतः निखनेद्वृत्तं केसराणां च मण्डले खनेद्दलस्तथाकारं कुर्वन्नत्र भुवं खनेत् पत्राकारं यथा
सम्यक् जायते परमेश्वरि पद्माख्यमण्डमिति प्रोक्तमिति अथैतत्कुण्डरचनाप्रकारः तत्र प्राक् चतुरस्रीकृते क्षेत्रे अष्टधा विभज्य तन्म
ध्यचिह्नावलंबेन परितस्तेष्वेकांशसमानेन कर्णिकार्द्धवृत्तं निष्पाद्य तद्बहिरंशद्वयमानेन केसरार्द्धवृत्तं कृत्वा तद्बहिरंशत्रय
मानेन तद्दलार्द्धवृत्तं विरच्य तद्बहिरंशचतुष्टयमानेन वृत्तं भ्रामयित्वा तद्बहिरपि सार्द्धषट्यवमानेन चतुरस्रदेशाद्बहिर्वृ
त्तमेकं भ्रामयेदिति वृत्तपंचकं कृत्वा द्वितीयवृत्तपंचमवृत्तयोरन्तरालमानकर्कटेन केसरवृत्ताग्रात्सर्वतो वास्यवृत्तस्पृष्टं शृंग
द्वयाग्रकान्षोडशार्द्धचन्द्रान्निष्पाद्य साग्राण्यष्टदलानि कृत्वा तन्मध्यकर्णिकावृत्तं विहाय केशराणि कर्णिकापरितः प्रकाशय
न् केसरवृत्तं दलमध्यवृत्तं च सम्यक् खनित्वा चतुर्थपंचमवृत्तयोर्दलानि साग्राणि यथा भवन्ति चतुरस्रकुण्डस्य विस्तारया
मः खातसमानं तेन फलवत् तेन फलं च यथा भवति तथा गुरुक्रमयुक्त्या खननं विधाय वह्निः॰ पद्माकारेण च कण्ठमेख
लादिकं कुर्यादिति अथाष्टास्रकुण्डमाह तत्रान्तरे तन्मध्यस्य चतुर्विंशमानेनाल्पापि पूर्ववत् विधाय चतुरस्रं तत्पूर्वकोण
द्वमानतः कोणादभितः पार्श्वयोः कृत्वा चिह्नानि चाष्टधा वै तेषु चिह्नेषु कृत्वाष्टसूत्राणि परितः शिवे कुर्यादष्टास्रकं
कुण्डमिति अथैतत्कुण्डरचनाप्रकारः तत्र प्राग्वच्चतुरस्रं विधाय तन्मध्यसूत्रमानं चतुर्विंशतिधा विभज्य तेष्वेकांशमा
नेन तद्बहिः प्रतिदिशं प्रसारितसूत्राग्रे पूर्ववच्चतुरस्रं प्रोक्तक्रमेण विधाय तत्पूर्वचतुरस्रस्य कोणसूत्रस्यार्द्धमानेन वास्यच
तुरस्रकोणचतुष्टयमध्यमासां वष्टभाङ्गमयतः प्रतिरेखं चिह्नद्वयं क्रमात्संभूयाष्टचिह्नानि कृत्वा चिह्नाच्चिह्नं प्राग्वत्सूत्राष्टक

ग्रं बहिर्विकाश्य तन्मानेन चतुरस्रमध्यस्थहस्तपदावलंबनेन भ्रमात् हस्तं निष्पाद्य तच्चतुरस्रमध्यसूत्र [illegible]

मात्स्फाल्य तद्बहिर्गतकोणमार्जनाद् षडस्त्रं कुण्डं भवति इत्थमष्टास्त्रं वा कुण्डक्षेत्रं परिकल्प्य खातखण्डमेखलादिकं यथावत्कु
र्यादिति दीक्षायामष्टौ कुण्डानि कार्याणि । अथ प्रसंगात् काम्यहोमार्थं पंचास्त्रसप्तास्त्रकुण्डयोरपि लक्षणमुच्यते तत्रादौ पंचा
स्त्रकुण्डमाह तत्रैव तन्मध्यसप्तमांशेन ब्रह्मसूत्रं विकाश्य तत् मानेन परितो भ्रान्त्या कृत्वा हस्तं तथा च मत् तत्पंशमानात् हस्ते कृ
त्वा चिह्नानि तत्रैव पातयेत् स्वच सूत्राणि तत्साम्यं चास्त्रकुण्डकमिति अथैतत्कुण्डरचनाप्रकारः तत्र प्राक्कृतचतुरस्रवेदे
त्रं कृत्वा तन्मध्यमानस्य सप्तमांशेन ब्रह्मसूत्रस्य भागं ग्राह्यादि परितः पंच चिह्नानि विधाय तत्र चिह्नाच्चिह्नान्तं रूपाणि पंच सू
त्राणि आस्फाल्य तद्बाह्यगतखण्डमार्जनात् पंचास्त्रकुण्डं भवति इत्थं पंचास्त्रकुण्डक्षेत्रं परिकल्प्य तद्बहिरपि प्रोक्तमेखलाकण्ठमे
खलार्थं पंचास्त्रहृदयं परिकल्प्य खातादिकं कुर्यादिति अथ सप्तास्त्रकुण्डमाह तत्रैव तन्मध्यदशमांशेन विकाश्य ब्रह्म
सूत्रकं तेन मानेन सं भ्रान्त्या कृत्वा हस्तं तथा ततः तद्वृत्तः षष्टिभागेषु त्रयस्त्रिंशांशमानतः हस्ते विधाय चिह्नानि सप्त सप्त
णि पातयेत् तत्सप्तास्त्रं भवेत्कुण्डमिति अथैतत्कुण्डरचनाप्रकारः तत्र प्राग्वत् समचतुरस्रं कृत्वा तन्मध्यमानं दशधा वि
भज्य तेष्वेकांशमानेन ब्रह्मसूत्रं बहिर्विकाश्य तन्मानेन चतुरस्रमध्यस्थहस्तपदमवष्टभ्य हस्तेन कृत्वा तद्वृत्तचतुरस्रमध्यसूत्र
प्रमाणं चतुःषष्टिधा विभज्य तेषु त्रयस्त्रिंशदंशमानेन ब्रह्मसूत्रभागग्राहादारभ्य हस्तेन सप्त चिह्नानि कृत्वा चिह्नाच्चिह्नान्तं रूप
णि सप्त सूत्राणि आस्फाल्य तद्बाह्यरूपहस्तखण्डमार्जनादेतत्सप्तास्त्रकुण्डं भवेदिति इति दशविधकुण्डनिर्माणप्रकारः
अत्र दीक्षायामष्टौ कुण्डानि प्रागादिषु दिक्षु नवममाचार्यकुण्डं चतुरस्रमेवेशानयोर्मध्ये कुर्यादिति संभूय नव कुण्डानि
कार्याणि अष्टकुण्डकरणाशक्तौ प्रागादिचतुर्दिक्षु चतुरस्रार्द्धचन्द्रवृत्तपद्माख्यानि चत्वार्येव कुण्डानि कुर्यात् अत्रापि
शक्तौ विदिक्ष्वैशानयोर्मध्ये चतुरस्रमाचार्यकुण्डमेकमेव कुर्यादिति अथैतेषां कुण्डानां काम्यहोमेषु कुण्डभेदेन फलभेदः

वि॰१२
ली॰व॰
१६८
168

तत्र कुलप्रकाशतंत्रे । चतुरस्रे स्तंभने स्यात्सर्वसिद्धिकरं च तत् भोगाः पुत्रा योनिकुण्डे स्युर्द्वचंद्रं शुभावहं मारणे किं विदिष्ठं तित्रि
कोणं द्वेषकारकं विद्वेषणकरं कै विह्नं शान्तिकरं तथा षट्कोणमुच्चाटमृतिच्छेदे शुभं तु विशिष्यते वृष्टिदं वृष्टिदं वापि पद्मकुण्डं वि
दुर्बुधाः अष्टकोणं तु कुण्डं स्याद्रोगपीडितके च नः पंचकोणं चाभिचारशमने भूतकृतेन समासमेव विज्ञाय काम्यकर्माणि
साधयेत् अथ वर्णभेदेन कुण्डभेदः कुलमूलावतारे । वर्णानामादितः कुण्डान्युक्तानि क्रमतः शिवे चतुरस्रं वृत्तमर्द्धवृत्तं
त्र्यस्रमिति क्रमात् सर्वेषां चतुरस्रं वा दीक्षायामुत्तमं शिवे अथ वेदिकापरितः कुण्डनिर्माणे विशेषः तंत्रराजे । कुण्डान्यष्टौ
चतुष्कं त्वेषां पंचनामकं निर्माणं सकलं वक्ष्ये यथाविधि तवानघे तुलाकुलीरमेषाणां मकरस्य च देशतः विदध्याद्धस्तकुं
डानि चरराशिचतुष्टये वृषसिंहवृश्चिके च कुंभे च स्थिरराशिषु विदध्याच्चतुरस्राणि कुण्डानि क्रमात् मिथुने कन्य
कायां च चापे मीने क्रमेण वै उभयात्मसु कुर्वीत योनिकुण्डानि मंगले । अमंगलेषु कुर्वीत चरेषु द्वैशशांककं स्थिरेष्वपि त्रिकोणा
नि परेषु तु चतुष्टये पंचास्रं च षडस्रं च समास्रं चाष्टकोणकं राशिस्थितिमाह तत्रैव । प्राच्यां मेषवृषौ वह्नौ मिथुनं दक्षिणे त
था कुलीरसिंहमथ नैर्ऋत्यां कन्यका तथा तुलाकीटौ पश्चिमतोऽथ धनुर्वायौ तु संस्थितं नक्रकुंभावुत्तरतो मीनमीशे तु संस्थि
ते इति अथ कुण्डस्वरूपं तत्रासनाच । प्रथमतंत्रे । परं शरीरं प्रकृतेः कुण्डरूपं परं शिरः याम्यसौम्यकरौ कुण्डमुदरं पश्चि
मं तथा योनिश्च चरणौ प्रोक्तौ सर्वतंत्रेषु शोभवीति अथ होमसंख्याभेदेन कुण्डमानभेदः तत्र लक्षसागरे पंचाशन्मिते
होमे कुण्डं रत्निमितं भवेत् अरत्निमात्रं तु शते सहस्रमितहोमके चतुर्विंशत्यंगुलाढ्यं द्विहस्तमयुते मतं चतुर्हस्तमितं लक्षे
षट्करं दशलक्षके कोटिहोमे चाष्टहस्तं कुण्डं कुर्यान्महेश्वरि प्रकारान्तरं च तंत्रैव । एकलक्षं समारभ्य यावत्स्याद्दशल
क्षकं तथैकहस्तमारभ्य दशहस्तं विवर्द्धयेत् कोट्यादशाकरं कुण्डं प्रशस्तं परमेश्वरीति । एतत्पत्रपुष्पवेलहुतहोमेषु विज्ञेयं ।

तत्रातिविस्तारस्याप्रयोजनाभावात् अथैतेषां द्विहस्तादिकुण्डविशेषाणां मानांगुलक्षेत्रफलानि च लक्षसागरे॰ फलांगुलानि
यावंति हस्तक्षेत्रे भवंति हि द्विहस्तस्य चक्रकुण्डस्य ततो हि गुणप्रमित्याने॰ हस्तक्षेत्रांगुलान्यत्र षट्सप्तत्यासदैव च शतानि पंचवि
घ्नेतेन मूलं त्र्यस्रस्य तत्रकं चतुर्विंशत्यंगुलानि विद्याद्द्विपि वस्तुतः अंगुलानि हि पंचाशदेकादशशतानि च तद्बीजं मध्यतो लक्ष्या
चतुष्कं चार्धसंयुतं चतुरस्रस्य तथा एकायवाः सप्त तथैव च अंगुलानि त्रयस्त्रिंशन्मानस्त्र्येत्र मध्यमे सप्तदशशतान्यष्टविं
शतिस्त्वंगुलानि च क्षेत्रस्य तु त्रिहस्तस्य मानमेतदुदीरितं तन्मूलमंगुलान्येकचत्वारिंशाच्च तुर्यवाः एकाचतुष्टयं किं
चिन्न्यूनं लक्षं चतुष्टयं चतुरंगुलयुक्तानि त्रयोविंशच्छतानि च चतुर्हस्तस्य कुण्डस्य मानमेवमुदीरितं मूलं तस्यांगु
लान्यष्टचत्वारिंशन्मितं भवेत् त्र्यस्रस्य तत्र ततः पंचहस्तक्षेत्रांगुलानि तु॰ द्विसहस्रशतान्यष्टावशीतिर्बीजमुच्यते षट्पं
चाशदंगुलानि च तु त्रिंशच्छतानि च तन्मूलमष्टपंचाशदंगुलानि च षट्यवाः किंचिद्भागादिकं एकाब्धयं सप्तकरस्य च
वेदसंख्यासहस्राणि द्वाविंशत्यधिकानि च मूलं चतुर्यवैः साकं त्रिषष्टिरंगुलानि च त्र्यस्रस्य तत्र तथाष्टहस्तक्षेत्रांगुलानि च॰
वेदसंख्यासहस्राणि साष्टानि षट्शतानि च अंगुलानि तथा सप्तषष्टिः सप्तयवाः पुनः किंचिदूनं मूलमस्य नवहस्तेषु
दृश्यते शतानि त्वेकपंचाशच्चतुर्भिरधिकानि च अशीतिरंगुलान्यत्र क्षेत्रमानसितं भवेत् द्वासप्ततिरंगुलानि मूलमस्य
प्रकीर्तितं पंचांगुलानि क्षेत्रस्य दशहस्तमितस्य च सहस्राणि तु संख्यानि मुनिसंख्यशतानि च षष्टिश्च कथिता स्यात् तन्मू
लं त्र्यस्रस्य तत्रकं वर्धयेच्च सप्तत्याधिकैः सप्तयवैस्तथा ग्रस्याधिकाभ्यां लक्षाभ्यां साकमेकं प्रकल्पयेत् अतिअल्पसमा
स्यायकुण्डान्यारचयेत्सुधीः द्विहस्तादिमितानां च निर्माणं दर्शितं शिवे॰ इति अनियतमिति अत्रसरेण्वादिदशापर्य
न्तान्मानभेदान् सम्यक्कृत्वा तान् कुण्डविस्तारायामसमानि निखिलानि यथोक्तमानखण्डमेखलादिकं च कर्णादि तत्प्रोक्तः ऊर्ध्व

कं ठ

वि॰ १२
र्णव
१३५
169

देश्वतियत्नसाध्यत्वात् त्रसरेण्वादिमानभेदास्तु॰ लक्षणसंग्रहे॰ जालांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः प्रथमं तत्प्रमाणानां त्र
सरेणुं प्रचक्षते॰ त्रसरेणुस्तु विज्ञेयो ह्यष्टौ ते परमाणवः त्रसरेणोरष्टगुणो रथरेणुस्तु संस्मृतः रथरेणवास्तु तेऽष्टौ वालाग्रं त
न्मतं बुधैः वालाग्राणष्टलक्षात्तु यूकालक्षाष्टकं स्मृतं अष्टौ यूका यवं प्राहुरंगुलं तु यवाष्टकं रत्निरंगुलपर्वाणि विज्ञेयस्तु क
विंशतिः॰ करपवकलांशेन हीनो रत्निरुदाहृतः चत्वारि विंशतिश्चैव हस्तः स्यादंगुलानि तु अथास्य कुण्डविस्तारायामसमान
निम्नत्वात् करणमेखलादीनां च प्रमाणवचनानि तथा च विंशतिश्चैव तु रथिकाभिरंगुलीभिः सूत्रेण प्रथ्यपरिकल्प्य भूमिभागा
न्ताभिः प्रखनन्तु तावतीभिरंशामिति प्रपंचसागरवचनात् यावान्कुण्डस्य विस्तारः खननं तावदीरितमिति शारदावचना
त् कुण्डविस्तारवन्निम्नमिति वायवीयसंहितावचनात् चतुरस्रं चतुःकोष्ठं सूत्रैः कृत्वा यथापुरा हस्तमानेन तन्मध्ये तावन्नि
म्नायते खनेदिति दिव्यसारस्वतप्रयोगसारवचनात् चतुर्विंशांगुलायामं तावत्खातसमन्वितमिति॰ गणेश्वरपरामर्शिणीव
चनात् चतुर्विंशतिसंख्याभिरंगुलीभिः सविस्तरं खातं चरचयेत्कुण्डमिति दक्षिणामूर्त्तिसंहितावचनाच्च कुण्डविस्ताराया
मसमाननिम्नत्वात्कर्त्तमिति सिद्धान्तः अत्रेकेचित् हस्तमात्रखनेनिर्थस्तूर्द्धमेखलया सहेति होमसारवचनात् पंचत्रिमे
खलोच्छ्रायं त्वाशेषमधः खनेदिति प्रतिष्ठासारसंग्रहवचनात् व्यासात्खातकरः प्रोक्तो निम्नस्त्रिंध्यंगुलेन विति विष्वक
र्मवचनात् कुण्डजिनांगुलैस्त्रिर्थ्वमूर्द्धं मेखलया सहेति प्रथमतंत्रवचनात् खातं कुण्डप्रमाणं स्यादूर्द्धं मेखलया सहेति सिद्धा
न्तशेखरवचनाच्च मेखलया सहहस्तमानं खातं वदंति एतत्परं मेखलयाऽनुगमनेन खातस्याप्यनुगमप्रसंगात् खातं कुण्डायेन
स्वल्पमंगं त्वेतस्य कीर्तितं सन्निपत्योपकारेण मेखलादेर्विशिष्यत इति योगिनीहृदयवचनात् सन्निपत्योपकारस्य खात
स्याराडुपकारकांगमेखलयासहेति वीह्रानो विध्यानथोक्रमपदस्यैव निष्क्रमत्वात् किंच॰ मध्यमांगुलिमध्यस्य पर्वणः परि

णाहतः तृतीयांशो भवेदत्र तत्र सर्वत्र वांगुलिः तेष्वन्तर्भिर्भवेन्मुष्टिर्वितस्तिस्तत्त्रिभिर्गुणैः अरत्निस्तद्द्वयेन स्याद्धस्तस्तद्द्वयतः शिवे
तद्द्वयं तु भवेद्व्यामस्तन्मानास्यान्ततोन्नतिः षस्मवत्यंगुलायामस्यानन्माने कुण्डकल्पनमिति श्रीतन्त्रराजवचनात् कुण्डस्य ष
स्मवत्यंगुलायामविस्तारस्यावश्यकत्वात्पंचदशांगुलखातपतेखातमध्यादारभ्य मेखलार्हपर्यन्तस्य द्वादशनवइतिषट्त्रिं
शदंगुलमात्रदर्शनात्तस्य पार्श्वद्वयेपि द्विगुणेपन द्वासप्तत्यंगुलमात्रतया चतुर्विंशत्यंगुलस्य तुरीयांशस्य न्यूनत्वात् द्वादशां
गुलोच्चमेखलासहितहस्तमात्रखातेन पार्श्वद्वयेपि मध्यप्रदेशात् द्वादशचतुर्विंशतिद्वादशेतिगणनया अष्टचत्वारिंशां
द्विगुणेन षस्मवतिरिति प्रोक्तसंख्यापरिपूरणात् हस्तमात्रखातस्य युक्तद्वादशांगुलोच्चमेखलापदस्यवश्रेयानिति एकां
गुलविस्तारस्य कंठस्याविद्यमानत्वात् पार्श्वद्वयेपि तत्र द्वयहरणेन द्व्यंगुलविस्ताराधिकत्वात् षस्मवत्यंगुलायामत्वं कुण्डस्यानु
पपन्नमिति चेन्न· कंठस्यानावश्यकत्वात् अत एवं तन्त्रराजे कंठो नोक्तः तर्हि कंठाकरणेपि दोषः श्रूयते· सत्यं तस्य तन्त्र
राजविरोधादेव न्यूनमेखलान्यूनखातपरत्वं कल्पनीयमिति तस्मान्मेखलया सह खातप्रतिपादकवचनानि रत्न्यादि
कुण्डेषु पंचाशदादिहोमविधानेन खाताधिक्यप्रयोजनाभावात् तद्विषयकाणीति मन्तव्यानि अथात्र मेखलाः पंचवा
कार्याः षट्पंचाशद्द्वित्रिपदकैरितिलक्षणसंग्रहवचनात् षष्ठ्यागाद्विवक्तिनेत्रमिताः स्युः पंचमेखलाइति सिद्धान्तशे
खरवचनाच्च· पंचवामेखलाः कार्याः तथापिंगलामते षष्ठांशेनाष्टमांशेन मेखलाहितयं मतं एकाषड्गुलोत्सेधविस्ता
रामेखलामताइति अथ कुण्डानामयथाकरणे दोषा भवंतीत्याह वसिष्ठः अनेकदोषदं कुण्डमत्र न्यूनाधिकं यदि तस्मात्स
म्यक्परीक्ष्यैव कर्तव्यं मम भक्तिमिच्छतेति तत्र दोषानाह विश्वकर्मा खाताधिके भवेद्रोगी हीने धेनुधनक्षयः वक्रकुण्डे तु संतापो
मरणं छिन्नमेखले मेखलारहिते शोकोभ्यधिके वित्तसंक्षयः भार्याविनाशकं कुण्डं प्रोक्तं योन्या विना कृतं अपत्यध्वंस

वि॰१२
ली॰व
१७०
170

नेमोक्तं कुण्डं यत्कंठवर्जितमिति तथा क्रियासागरे न्यूनाधिकप्रमाणं यत्कुण्डं कर्करमेखलं भंगाररहितं यच्च यजमानविना
शकृत् इति तथा जयद्रथयामले स्वल्पाधिके सुकुण्डे षोमानहीने दरिद्रता वाग्रोधः कंठहीने स्यादसिद्धिर्न्यूनमानके अधिके
चास्त्ररे भोगोमानेनाधिकमेखले व्याधयः सम्भवर्जे नैवियोनौ स्यादपस्मृतिः उच्चाटः स्फुटिते छिद्रे संकुले वा च्युता भवेदिति
इत्यनिदाश्रवणाद्यथोक्तलक्षणसंपन्नानि सर्वाणि कुण्डानि कार्याणीति अथ कंठः तत्र वसिष्ठः कंठोष्टयवमात्रः स्यात्कुंडे
तत्करमात्रक इति तथा कालोत्तरे खाताद्बाह्योंगुलः कंठः सर्वकुण्डेष्वयं विधिः चतुर्विंशतिकं भागमगलं परिकल्पयेदिति ।
अथ योनिः वायवीयसंहितायां मेखलामध्यतः कुर्यात्पश्चिमे दक्षिणेपि वा । योनिं सुशोभनां किंचिच्छिन्नामुन्नालिकाशनैः
अग्रेण कुण्डाभिमुखीं किंचिदुन्नतमेखलां कुंभहृदयसमा पृष्ठामश्वत्थदलसन्निभामिति तथा च वसिष्ठसंहितायां यो
निश्च मध्यमे भागे प्राङ्मुखी मध्यसंस्थिता अष्टांगुलेषु विस्तीर्णा चायता द्वादशांगुलैः एष्टोन्नता गजोष्ठी च सच्छिद्रा मध्यतो
न्नतेति सच्छिद्रा मध्ये । मध्येलाज्यधृतिः स्रवेति त्रैलोक्यसारवचनात् आज्यधृतिरिति योनिमध्ये गर्तं कर्तव्यमित्यर्थः सा
प्रदायिकाः तथा लक्षणसंग्रहे ईषत्कुण्डप्रविष्टाग्रा जिनाशकृतमेखला मेखलार्धपृथक्भूमिर्नयाश्वत्थवाहनः प्रि
ये योनिर्देवे तु साकार्या इति नारदः कुण्डेऽस्मिन्विस्तारा योनिरुच्छायतोङ्गुलाः कुण्डार्धेन तु दीर्घा स्यादिति तथैव त्रैलो
क्यसारे । दैर्घ्यात्त्र्यंगुला नालं अंशोना विस्तरेण तु एकांगुलोच्छ्रिता सा त्विति । नालं अंशोनाष्टांगुलविस्ताराः नाल
स्य द्वादशांगुलदैर्घ्यादिति । स्वायंभुवेपि । मेखलामध्यतो योनिः कुण्डार्धांशप्रविस्तृता इति विस्तारो मूलदेशे पिप्पलप
त्राकृतित्वात् हि हस्तादिकुण्डेषु नयारीत्या तत्तत्कुण्डार्धदीर्घा नन्नतीयांशविस्ताराननचतुर्विंशांशोच्चा च योनिः कार्या ।
तदुक्तं सोमशंभौ । कुण्डानां चतुर्विंशो भागः सोंगुलसंज्ञकः विभज्य तेन कर्तव्या मेखलाकंठनाभय इति सिद्धान्तशेखरेपि

ग

चतुर्विंशतिमो भागः कुण्डानामंगुलं स्मृतमिति दीर्घार्कपर्वमियोनिर्विस्तारेण षडंगुला उच्छ्रितिर्द्व्यंगुलेनोन्नास्यादिति उक्तं अ

ष्टांगुलषडंगुलयोरेकांगुलयोश्च विकल्पः तथा होतुरग्रे योनिरासामुपर्यश्वत्थपत्रवदिति· शारदावचनात् योनिः स

र्वत्र होतुरग्रे प्रोक्तविधिना स्यादयोति तत्र चतुरः कुण्डपक्षे चतुरस्रे अर्धचन्द्रे कुण्डे च योनिर्दक्षिणभागस्थमेखलोपरि स्या

त्तयोर्होत्रोरुत्तराभिमुखत्वात् अन्यकुण्डयोः पश्चिममेखलोपरि योनिः स्यात्प्रा· तयोर्होत्रोः पूर्वाभिमुखत्वात् दक्षस्या पूर्व

यामेव तन्नलस्या पश्चिमोत्तरे पंचमस्यापि कुण्डस्य योनिर्दक्षिणदिक्स्थिते ति त्रैलोक्यसारवचनात् पंचमस्याचार्यकुण्डस्य

त्वर्थः अत्र कुण्डपक्षेत्वपागाग्नियाम्यकुण्डानां प्रोक्ता योनिरुदङ्मुखी शेषाणां प्राङ्मुखी प्रोक्तेति तन्त्रान्तरवचनात् पूर्वाग्रयथा

मेषु उदङ्मुखी योनिः अन्येषु प्राङ्मुखी नवमस्य तु प्रागवदेव· एतेन योनिकुण्डेऽपि योनिः कार्य्येति केचित् तत्र· योनिकुण्डे यो

निमत्कुण्डे नाभिं च वर्जयेदिति विश्वकर्मवचनात् आसां मेखलानां नालमुक्तः तन्त्रराजे बहिस्थमेखलादारभ्य वीजनालक

वितस्तिमात्रकमिति बहिस्थमेखलामध्यान्तमध्यगतं चतुरस्रपीठादिरर्थः तथैव तन्त्रदीकाकृता· मनोरमाकारेणव्या

ख्याततत्वात् आचार्यवरणे तु योनिस्तत्पश्चिमायामथ दिशि चतुरस्रमेखलाम[illegible]त्वपीठादिरर्थः ब

[illegible] योनिस्तत्पश्चिमायामथ दिशि प्रोक्तं नालेस्तूक्तं तत्रपद्म

पादाचार्यैः मेखलात्रयाद्बहिश्चतुरं चतुरंगुलायामविस्तारं कृत्वा तत्र नालं स्थापयामि ति व्याख्याते वितस्तिमात्रं द्वादशां

गुलमात्रं प्रयोगसारे तु याम्याः पश्चिमतो नालमायाम चतुरंगुलं त्रिद्व्येकांगुलविस्तारं क्रमात् ऊर्ध्वाग्रमिष्यत इति च

तुरंगुलमानेन नालमुक्तं एतच्चतुरंगुलषडंगुलादि स्वल्पमेखलापक्षे तेन्य नाभिमाह· तच्च कुण्डानां सर्वत्र कुण्डमध्ये विधा

तव्यः अष्टच्छदं सरोजं तु विदध्याच्चारुविग्रहं चतुर्भिरंगुलैः कर्णिकाकर्णिकां दलमेव च विस्तारादियवोत्सेधं षड्भिः षड्भि

वि॰ १२
ली॰ व
१७१
171

रुद्राख्यमिति शारदायां॰ ऊर्ध्वानां कल्पयेद्दन्तनाभिमंडुमसन्निभं तत्तत्कुण्डानुरूपं वा मानमस्य निगद्यते नेत्रवेदांगुलोपेतः ऊ
र्ध्वास्त्रेषु वर्द्धयेत् नाभिदेशं च विधाभिन्नां ततः कुर्वीत कर्णिकां बहिर्विंशाङ्गयेनाष्टौ पत्राणि परिकल्पयेत् इति नाभिलक्ष
णमुक्तं तत्र यथा रम्यक्षेत्रे य मातयेद्दाविंयेनाभिप्रालेपगोपिहृद्योरिति नाभिशब्दः पुल्लिंगेप्यस्ति अथ वास्तुपूजा॰ तत्र श्री
तत्त्वराजे॰ चतुरस्राकृतिः कश्चिदसुरः सर्वनाशकः पुरा तस्य वधायैव सर्वे देवाः समुद्यम कृत्वा निहत्य मुष्टिकास्तैरवष्टोभ
वद्धरात् भावयोस्तन्निरासाय मामेत्याकंपयंस्तथा कथयामासुरस्माकमधुना तद्वास्तुरूपस्य त दर्भ्यांशानितिनेचेद्दस्य विश्व
मासीदुपद्रुत इत्युक्तैस्तैर्मया प्रोक्तं निपतंतस्तदुः एवं कं स्थानानमवनीतस्य शरीरे स्थापयेत्तथा नित्यशश्च त्रिपवाशत्रि
ष्वदाक्रमणायैव नियोजितेषां पूजाविमुक्तोऽस्मै ते कृतानित सुकृतीनसमानद्युई(?) : कृतानि च ऊर्ध्वते तस्मात्तेषामर्द्धनंतत्प्र
यत्नं कुर्वतां सदा शुभान्येव तु जायते नाशुभानि कदापि चेति तच्चक्रादिकमाह तच्चक्रादिविधानं तु यथावदभिधीयते कृ
त्वा समतलां भूमिं चतुरस्राकृतिं शुभां अष्टाष्टकोष्ठतपदांकोणसूत्रसमन्वितां चतुष्पदयुतेन स्यात्मध्यकोष्ठे च देशिकः
ब्राह्मणमर्चयेत्तत्र चतुष्पदयुतेष्वतः प्रादक्षिण्येन पूर्वादि यजेत्कोष्ठचतुष्टये अर्यमकं च विवस्वन्तं मित्रमन्यं महीधरं को
णार्द्धकोष्ठयोरेकमेकं मंत्री समर्चयेत् वह्न्यादीशानमभितो वक्ष्यमाणेष्वनुक्रमात् सावित्रः सविता शक्र इन्द्रजिद्रुद्र
जितौ॰ आपापवत्सकौ चेति प्रोक्तास्तेष्टौ नमामतः कोणार्द्धकोणपार्श्वेषु वह्न्यादीशानमर्चयेत् शर्वं गुहं चार्यमणं
जंभकं पिलिपिच्छकं चरकीं च विदारीं च पूतनां चैव देशिकः ततः पूर्वादिपरतो यजेदष्टौ दिशं प्रति ईशानश्चानतथा(?)
वारिकः सुग्रीवस्तथा॰ वरुणः पुष्पदन्तश्चासुरः शोषा(?)रोगकौ पश्चिमाशास्थकोष्ठेषु पूज्याः प्रोक्ता यथाक्रमं वायुर्ना
गस्तथा मुख्यः सोमो भल्लाटकस्तथा अर्गलादितिरप्येवमदितिश्च यथाक्रमं कोष्ठेष्वन्तरसंस्थेषु देवाः प्रोक्ताः समीरिताः

चित्रै रजोभिराद्यर्घ्यदेवतानां पदानि वैः व्रीहिमुद्गयवैः दौत्रहृतरूग्यास्तैः क्रमात् अष्टोत्तरशतं वाष्टोत्तरं विंशतिरेव वा
प्रत्येकं तैस्तैर्नैर्द्धैर्मिश्रैः स्नहव्यपायसैः वलिं चनेषाज्जवीनपाय्यसैर्व्यजनान्वितैः सस्मितैर्द्वैरथकदलीफलाद्यपादिसंयुतैः
इति अथैतच्चक्ररचनाप्रकारः इष्टां विधिच्चव्वद्वाते तत्र मण्डपस्य नैर्ऋत्यकोणे हस्तमात्रविस्तारायामां वितस्तुन्नतां
समचतुरस्रां वेदिकामतिसुदृढां कृत्वा प्राग्वत्समर्गायताद्दक्षिणोत्तरायतान्नव नव रेखाः कृत्वा समं ततः कोलानि चतुःष
ष्टिकोष्ठानि कृत्वा तत्र वायुकोणादाग्नेयकोणगतं नैर्ऋत्यकोणादीशानगतं च तिर्यक्सूत्रद्वयमास्फाल्य वास्तुचक्रं नि
र्मायतन्मध्यकोष्ठचतुष्टयमेकीकृत्य तद्बहिः प्रागादिचतुर्दिक्षु प्रतिदिशं चत्वारि कोष्ठानि मध्यकोष्ठसंलग्नान्येकीकृत्य त्रिपञ्चा
शद्देवतास्थानानि परिकल्पयतानि स्थानानि वक्ष्यमाणरजोभिर्मनोहराणि यथा भवन्ति तथा समभ्यर्च्य पुष्पाञ्जलिमादा
य ब्रह्मादित्रिपञ्चाशद्देवताः इहागच्छत आगच्छतेति पुष्पाञ्जलिप्रदेयेणावाह्य ब्रह्मादित्रिपञ्चाशद्देवता यथास्थानं तिष्ठति
ष्ठेति संस्थाप्य ब्रह्मादिभ्य इदमासनमिति पुष्पाञ्जलिं दत्वा सर्वमध्ये ब्रह्मणे नमः पूर्वादिचतुर्दिक्षु ॐ अर्यम्णकाय
नमः ॐ विवस्वते नमः ॐ मित्राय नमः ॐ महीधराय नमः इति प्रादक्षिण्येन संपूज्याग्नेयादिकोणचतुष्कगतार्द्धकोष्ठ
द्वके प्रादक्षिण्येनाग्नेयादीशानपर्यन्तं ॐ सावित्राय नमः एवं सवित्रे नमः शक्राय नमः शक्रजिते नमः रुद्राय नमः रुद्र
जिते नमः आपाय नमः आपवत्सकाय नमः इति संपूज्य तद्बहिः स्थवीथ्यामाग्नेयादिकोणचतुष्कगतकर्णसूत्रभि
न्नकोष्ठचतुष्टयपार्श्वगतकोष्ठद्वके आग्नेयादीशानपर्यन्तं ॐ शर्वाय · एवं गुहाय · अर्यम्णे · जम्भकाय · पिलिपि
च्छकाय · चरक्यै · विदार्यै · पूतनायै इति संपूज्य तद्बहिर्गतवीथ्यां चतुष्टये प्राचीदिग्गतवीथ्यामीशानाद्याग्नेयान्तं ॥
ॐ ईशानाय नमः एवं पर्जन्याय · जयन्ताय · शक्राय · भास्कराय · सत्याय · वृषाय · अन्तरिक्षाय नमः इत्यष्टौ देवताः सं

वि•१२
ए•व•
१२२

पूज्य• दक्षिणवीथ्यामाग्नेयादिनैर्ऋत्यंतं• ॐ अग्नये• एवं पूष्णे• वितथाय• यमाय• गृहक्षतकाय• गंधर्वाय• मृगाय नमः इति सं
पूज्य• ततः पश्चिमवीथ्यां नैर्ऋत्यादिवायव्यांतं ॐ निर्ऋतये नमः एवं दौवारिकाय• सुग्रीवाय• वरुणाय• पुष्पदंताय• असुराय शो
षाय• रोगाय नमः इति संपूज्योत्तरवीथ्यां वायव्यादीशानांतं ॐ वायवे नमः ॐ नागाय• मुख्याय• भल्लाटकाय• अर्गलाय• दि
त्यै• अदितये• इति गंधपुष्पाद्यैर्द्विपंचाशद्देवताः संपूज्य• कुण्डस्थण्डिलादौ वक्ष्यमाणविधिना• अग्निस्थापनं कृत्वा ॐ ब्रह्मणे
स्वाहा एवं अर्यकाय स्वाहेत्यादि पूजितदेवतानां स्वाहांतैर्नाममंत्रैः प्रत्येकं व्रीहियवमज्जैर्घृतमधुदुग्धपरिस्नुतैः सहितैः
पायसैः प्रत्येकैकद्रव्येणाष्टोत्तरशतसंख्यमष्टाविंशतिसंख्यं प्रत्येकैकदेवतानाम्नाऽस्वाहा ॐ ब्रह्मणे एष बलिर्नमः इत्या
दिपूजितदेवताभ्यस्तत्तन्नाम्ना तिलतंडुलकदलीफलापूपनानान्नव्यंजनान्वितपायसैस्तत्तत्स्थानेष्वेव बलिं निवेदयेत् इति
वास्तुपूजाविधिः अथ वास्तुपूजाफलं तदकरणे फलवैपरीत्यं च तंत्रराजे• एवं सिंहगते भानौ पूर्णिमायां प्रतिवत्सरं स्वगे
हे वास्तुपूजायां मण्डले तु समाचरेत् न वालमरणव्याधिभूतप्रेतादिकानि च न सर्पपीडना न्योन्यकलहाद्यशुभानि
च पुत्रपौत्रधनारोग्यपशुदासीसमृद्धिभाक् अरोगी विजयी स्वायचिरंजीवति तद्गृहे राजवेश्मसु सर्वेषु तथा च महि
षीगृहे सचिवामात्यसेनानीभवनेषु पुरे तथा विदध्यात्प्रतिवर्षं तु एवं सिद्धांतदेशिकः न चेत्कुर्यात्तथा रूपफलः
क्लेशो नित्यं भवेत् अथांकुरार्पणविधिः• तंत्रांतरे• समभिन्ने च अभिवापि दिनैर्दीक्षादिनात्पुरा• बीजारोपणकर्मेदं कर्तव्यं
सर्वकामदं मण्डपोत्तरदिग्भागे सुसंवृततरे परे भवने मंडले कुर्याद्वेदिके प्राग्वरुणायतं यामोदीच्यायतं त्वन्यं प्रव
दंति मनीषिणः पदानि द्वादशात्र स्युस्तेषु स्थानत्रयं भवेत् चतुष्पथपदोपेतं पदान्याश्रयेत्ततः पीतरक्तसितश्यामै
रजोभिर्वर्त्तिपूर्वकं ईशानं क्रमतस्त्वाद्यं पात्राणि त्रिविधानि च वेसवः पालिकाः प्रोक्ताः मध्ये तु विंशांगुलोच्छ्रिताः वैरिंचाः

१२२

पंचमृत्स्नयाप्युक्षिताः षोडशांगुलैः पैवाः शरावाश्चतारोभान्वंगुलसमुच्छ्रयाः प्रदात्पसूत्रैः संवेष्ट्य स्थाने षट्त्यादि विन्यसेत्
शालिशर्कराणुगंधादि दर्भकूर्चयुतेषु च पूरयेत्तानि पात्राणि वाल्लिकामस्तकरीषकैः शालिस्तेनेन नादेश्य पंचभिर्व्रीहिलक्षणशीर्षः
दालयेद्गव्यपंचवीजैस्ततो वीजानि निर्वपेत् तानि प्रियंगुश्यामाकतिलशर्षपशालयः मुद्गाढकाश्च निष्पाववल्लमाषाः प्र
कीर्तिताः हरिद्राद्रिश्च संसिद्धवर्हिःराकाद्येद्गुरुः संध्ययोरुभयोरात्रावप्रदद्याद्वलिमंबलिं त्रिविधस्यापि पात्रस्य स्वमेहस्वपि दिने
षु च प्रथमे हनि भूतेभ्यस्तिलालाजाहरिद्रया दधिसक्तानमिश्रं क्षिपेद्भस्तिलतण्डुलाः तृतीये ह्नि यक्षेभ्यः करंभाला
जसंयुताः चतुर्थेह्नि नागेभ्यो नारिकेलहृताक्षतं सक्तुपिंडं च संयोक्तं पंचमे ब्रह्मणे बलिं पश्चात्तनाभ्रषष्ठे क्षिपेच्छिवायाप्र
पसंयुतं अन्नस्यान्नस्य मे चाक्षिपिविश्वेभ्यो वसुभ्यो हरिद्रौदनं यदि सप्तरात्रं चतुर्दशे मयदिने बलिं विश्वेभ्यो वसुभ्यश्च दुग्धान्नकृस
रंचक्रमात् ततः प्रणवाद्येर्ह्न्दते स्वनामभिर्बलिमंत्रकः करंभादधिसक्तवः पश्चात्तनापमवीजानि कृसरस्तिलमुद्गैः
सह सिद्धमोदनः अथ तन्मण्डलरचनाप्रकारः तत्रदीक्षादिनात् पूर्वमेव नवभिः सप्तभिर्वा दिनैः प्राक् निर्मितमण्डप
स्यान्तर्भागे सत्सहस्तं गृहं निर्माय तत्र गोमयोपलिप्ते सुसमे भूतले प्राक्संस्थागायताः पंच हस्तदीर्घाः पंचरेखा याम्योदीच्या
यता वितस्त्यन्तरालाभ्रेकादशरेखाः कृत्वा चत्वारिंशत्कोष्ठोपेतं सार्धहस्तविस्तारोपेतं मण्डलं कृत्वा तत्रादि गतं कोष्ठ
न्यैकीकृत्य वीथीः कृत्वा मध्यचतुष्कोभयपार्श्वयोः कोष्ठद्वयं संमार्ज्य विशिष्टचतुस्त्रयात्मकं द्वादशपदोपेतं मण्डलं
निर्माय चतुष्कुनः कोष्ठे रेकमेकस्थानं तत्र लविस्तृहद्वाणं पश्चिममध्यम पूर्वक्रमेण द्वादशकोष्ठान्यापूर्य नत्रस्थानत्रये
मध्यमचतुष्के विस्तृदेवताश्चन विंशांगुलोन्नतैर्विस्तृतैश्चकाडमरुकाकाराश्चनवैः पालिकामध्ये पिप्पलदशान्वपल्ल
वैः सह सूत्रेण संवेष्टिताः संस्थाप्य तथा पश्चिमचतुष्के एकस्मिन् पात्रे पंचपात्राणि यथा भवंति तथा शिल्पिवरनिर्मितानि

क्षु ला

वि॰१२
एव॰
१७३
स्वल्पाः चरमकाः(?)
173

लु=

प्राग्वत् डमरुकाकाराणि षोडशांगुलोन्नतिविस्तृतियुक्तानि ब्रह्मदैवत्यानि चत्वारि पात्राणि तथैव पिप्पलादिदलयुक्तानि
संस्थाप्य तथा पूर्ववच्चतुष्कं द्वादशांगुलोन्नतिविस्तृतिमतः शिवदैवत्याः प्राग्वत् पिप्पलादिदलादियुक्ताः अश्ववारः शरावाः सं
स्थाप्येति द्वादश पात्राणि प्रक्षालितानि द्वादशकोष्ठेषु प्रतिकोष्ठमेकमेकं पात्रं शालिपुंजेषु गंधाक्षतनक्तचंद्वययुक्तेषु संस्थाप्य
तानि पात्राणि वाङ्किकामृत्करीषकैः संपूर्य एकस्मिन्नूतनभाण्डे स्वर्णादिरचिते मरणमेयवा प्रियंगुश्यामाकतिलशर्षप
शालिमुद्गाढकीनिष्पावखल्वमाषाख्यानि दशधान्यान्येकीकृत्य वमित्यमृतबीजेन गोडगंधैः प्रक्षाल्याश्शंखस्वना
दिपंचवाद्यपुरस्सरं तेषु पात्रेषु ब्रह्मदैवत्येषु प्रथमं ततो विष्णुदैवत्येषु ततः शिवदैवत्येषु त्रिक्रमेण बीजानि निर्वा
प्य हरिद्रामिश्रजलैः संसिच्य नूतनवस्त्रैराच्छाद्य संध्ययोरर्द्धरात्रे च सप्तस्वपि दिनेषु प्रतिदिनं बलिं दद्यात् तत्र प्रथम
दिवसे तिललाजासक्तुशाल्योदनानि हरिद्राचूर्णसंयुक्तान्येकीकृत्य कवलत्रयं निष्पाद्य त्रिविधस्यापि पात्रस्य समी
पे सर्वभूतानीशानगच्छतेह तिष्ठन्ते तिभूतान्यावाह्य संस्थाप्य ॐ सर्वभूतेभ्यो नमः इति गंधादिभिः संपूज्य सर्वभूतबलि
द्रव्याय नमः इति बलिद्रव्यं च संपूज्य पद्मकूलेन जलं गृहीत्वा वामहस्तेन बलिपात्रं स्पृशन् ॐ सर्वभूतेभ्य इति एष बलि
र्नमः इति बलिपात्रोपरि जलं तिः दिपत्त्वबलिमन्त्रजेन् एवं विष्णुपात्रसमीपे शिवपात्रचतुष्कसमीपे च बलिं दद्यादिति।
प्रोक्तकालत्रयेपि बलिदानविधिः अत्र मण्डलस्य चतुर्दिक्षु बलिर्देय इति केचिदाहुस्तत्र यथा गुरूपदेशं कार्यमिति
ततो द्वितीयदिने पिष्टभक्ष्यतिलतण्डुलैः प्राग्युक्तपरिपाट्यैव प्रोक्तकालत्रयेपि बलिं दद्यात् एवं तृतीयदिवसे यवेभ्योदधि
सक्तुलाजामिश्रितं बलिं दद्यात् चतुर्थे मिनागेभ्यो नारिकेलजलासृतसक्तुपिष्टबलिः पंचमदिवसे ब्रह्मणा पयसान्
न बलिः षष्ठदिवसे शिवायापूपसंयुक्तौदनबलिः सप्तमदिवसे विष्णवे गुडौदनबलिः नवरात्रपदे विष्णवपवाष्टम

पात्रत्रयेकृत्वा(?)
त्रिकोणमण्डले

दिसेद्दुग्धौदनवलिः नवमदिने कृसरवलिर्देयः अत्रसर्वत्रवलिदाने प्रथमदिनप्रोक्तएवविधिर्ज्ञेयः तत्रत्रामन्त्राश्च जनेवलु
न्मार्जनंचज्ञेयं इतिअत्रनवस्वपिदिनेषु प्रतिदिनं तत्तद्देवतावलिदानानंतरं दशादिक्पालेभ्योपि तत्तद्दिक्षु ॐ इंद्रायएष
वलिर्नमः इत्यादितत्तन्मन्त्रास्तु तन्नशार्करासहितपायसेनवलिर्देयः इतिवीजारोपणविधिः अथदीक्षाकालाः तत्रादौमासाः
तत्रमंथानभैरवतंत्रे· चैत्रेदुःखायदीक्षास्याद्वैशाखेसर्वसिद्धिदा· ज्येष्ठेमरणप्रदामासाषाढेबंधुनाशिनी श्रावणेहृद्धि
दान्हणांनभस्येदुःखदामता आश्विनेसर्वसिद्धिः स्यात्कार्त्तिकेज्ञानदायिनी· शुभदामार्गशीर्षेचपौषेमेधाविनाशिनी
माघेसुवर्णलाभः स्यात्फाल्गुनेसर्वसिद्धिदा· तथातंत्रांतरे मधुमासेभवेद्दुःखमाधवेरत्नसंचयः मरणंभवतिज्येष्ठेवा
वंधुनाशनं नभसि: श्रावणेन्ननभवेद्भाद्रपदेक्षयः प्रजानामाश्विनेमासेसर्वतःशुभमेवहि ज्ञानंस्यात्कार्त्तिकेसौ
ख्यंमार्गशीर्षेभवत्यपि· पौषेज्ञानक्षयंमाघेभवेन्मेधाविवर्द्धन फाल्गुनेपिसमृद्धिः स्यान्मलमासंपरित्यजेत् दद
न्मत्रंभवेन्मत्रीदारिद्र्यसमजन्मसु इतिशिवयामलवचनादाश्विनमासोदीक्षायांविहितोपिनिषिद्धः महाभवचत
दृशीशिवरात्रिः तथाश्रीकंठसंहितायां· शरत्कालेचवैशाखेदीक्षाश्रेष्ठफलप्रदा· मार्गफाल्गुनकेश्रेष्ठाज्येष्ठेचैवतु
थामा माघमासेतुशुभदाद्दुष्टासाषाढमासके आनंददाश्रावणेसापौषभाद्रेचनिंदितेति· तथाज्ञानार्णवे· शुक्लपक्षे
शुभदिनेशुभवारेवरानने मंत्राद्यारंभणंकुर्यादिति तथाकालोत्तरे· मुक्तिकामैःकृष्णपक्षेभूमिकामैःसितेतथा दीक्षा
कार्यामहादेवीति तथाशैवागमे· शुक्लपक्षेप्रकुर्वीतकृष्णेवादेशिकोत्तमः शुक्लेसर्वसमृद्धिः स्यात्कृष्णेमध्यमतोभवे
त्इति अथनक्षत्राणिचिंतामणौ· अश्विनीरोहिणीचार्द्रातथापुष्योत्तरात्रयं हस्तचित्रास्वातिमैत्रविशाखाश्रवणधनिष्ठ
या पुनर्वसुरेवतीचतथाचाप्युत्तरात्रयम् शुभान्येतानिदीक्षायां नक्षत्राणिवरानने इति· अथनिषिद्धानिपिंगलामते·

वि॰ १२
ली॰ व॰

१७४
174

कृत्तिकायामनन्तायोभरण्यांचमहापदः पूर्वायांदारुणेयुद्गानामघायांमरणमादिशेत् मूलेनकलहंविंद्याज्ज्येष्ठाभवतिहानिदा
पूर्वाषाढेभयंप्रोक्तंश्रवणेनकरोगदाः शतभिषायांदोभवांसंतापभाद्रपदाभवेत् इति अथतिथयः पूर्णिमापंचमीचै
वद्वितीयासप्तमीतथा त्रयोदशीचदशमीप्रशस्तासर्वकामदा तथाश्रीकंठसंहितायां द्वितीयासप्तमीश्रेष्ठाषष्ठीस
र्वत्रनिंदिता द्वादश्यामपिकर्तव्यंत्रयोदश्यामथापिवा विजयमालिनीतंत्रे॰ पंचम्येकादशीशुक्लासप्तमीचत्रयोदशी
दशमीशुक्लपक्षस्यद्वादशीचविशेषतः रत्नसागरे तृतीयाविहितानित्यंषष्ठीसर्वत्रनिंदिता सप्तम्यांधनलाभस्या
दष्टम्यांगुरुनाशनं नवम्यामरक्यनाशः दशमीसर्वदायिनी एकादश्यांभवेल्लाभोधनस्यहषमस्यच द्वादश्यांधनला
भःस्यात्त्रयोदश्यांसदोदयः शिष्यहानिश्चतुर्दश्यांपौर्णमासीतुसिद्धिदा अमायांपुत्रनाशःस्यात्प्रतिपद्बुद्धिनाशिनी
ति अथदेवताविशेषेतिथिविशेषःकालोत्तरे ब्रह्मणःपौर्णमासीप्रोक्ताद्वादशीचक्रधारिणः चतुर्दशीशिवस्योक्तावाचः
प्रोक्तात्रयोदशी द्वितीयातुश्रियःप्रोक्तापार्वत्याश्चतृतीयका॰ चतुर्थीगणनाथस्यभानोःप्रोक्तातुसप्तमी अथवास
राणि॰ तत्रमेरुसद्भावे॰ मंत्रारंभोरवौशुक्रेबुधेजीवेविशेषतः शनौमरणःत्वयंभौमेसोमेसर्वत्रनिष्फलं उत्तरतंत्रे॰
रवौगुरौबुधेशुक्रेकर्तव्यंपरमेश्वरि इतिज्ञात्वावरारोहेमंत्रंदद्याद्विचक्षणः विजयमालिनीतंत्रे रवौबुद्धिमवाप्नोतिशु
क्रेचैवधनागमम् बुधेभियोगरहितागुरौज्ञानान्वितोभवेत् शन्यंगारकयोर्मृत्युरविद्यासोमकेभवेत् इतिज्ञात्वावरा
रोहेदीक्षांदद्याद्विशालधीरिति अथयोगास्तत्ररत्नावल्यां योगाश्चप्रीतिरायुष्मान्सौभाग्यःशोभनस्तथा सुकर्माच
धृतिर्वृद्धिर्ध्रुवःसिद्धिश्चहर्षणः वरीयांश्चशिवःसिद्धोब्रह्मायैन्द्रश्चषोडशेति अथात्रयोगास्तत्रवसिष्ठः पूर्वाषाढांप्र
तिपदंपंचमींकृत्तिकामथ॰ पूर्वाभाद्रपदांषष्ठींदशमींरोहिणींतथा द्वादश्यामश्विनंदत्रमर्घ्यमणावत्रयोदशी नदत्र

लंपाइत्येतेदेवानामपिनाशदा सर्पनक्षत्रमश्लेषाउत्तराफाल्गुनीपूर्यमण अथज्योतिःशास्त्रेकरणानि· शुभानिकरणा
न्याऊर्द्दीक्षायांतुविशेषतः शकुन्यादीनिविष्टिंचविशेषेणविवर्जयेत् इति अत्रादिपदेनकिंतुघ्नचतुष्पदनागानांग्रहणं
अथलग्नानितंत्रांतरे मंत्राद्यारंभणेमेषेधनधान्यप्रदंभवेत् वृषेमरणमाप्नोतिमिथुनेपत्यनाशनं कर्कटेसर्वसिद्धिः
स्यात्सिंहेमेधाविनाशिनी कन्यालक्ष्मीप्रदानित्यंतुलायांसर्वसिद्धयः वृश्चिकेसर्वसिद्धिःस्याद्धनुर्ज्ञानविनाशनम्
मकरःपुत्रदःप्रोक्तःकुंभेधनसमृद्धिदः मीनेदुःखप्रदोनित्यमेवंराशिफलंप्रिये तथाचरुद्रयामले· मीनेसिंहेत
थाचापेवृषेहानिःप्रजायते· मेषेसर्वसमृद्धिःस्यात्कन्यायांतुप्रदाभवेत् तुलायांधनधान्यंस्याद्वृश्चिकेसर्वसिद्धिदः मकरेपु
त्रलाभःस्यात्कुंभेपशुसमृद्धयः मिथुनेपशुनाशःस्यात्कर्कटेराज्यदोमतः एवंलग्नफलंज्ञात्वामंत्रंदद्याद्विशालधीः
वृषमीनेतथाचापेसिंहेलग्नंविवर्जयेत् सर्वदंशुभदंनित्यंकन्यायांसर्वसिद्धिदंइति अथदीक्षालग्नात्स्थानविशेषेषुस्थितानां
ग्रहाणांशुभाशुभफलानि त्रिषडायगताःपापाःशुभाःकेंद्रत्रिकोणगाः दीक्षायांतुशुभाःसर्वेरंध्रस्थाःसर्वनाशकाःआ
यःएकादशस्थानं·लग्नचतुर्थसप्तदशमस्थानानांकेंद्रसंज्ञा· पंचनवमस्थानयोस्त्रिकोणसंज्ञा· सूर्यशनिराहुकेतुकुज
पापयुतबुधःक्षीणशशीचपापाः गुरुभृगूतत्पापरहितबुधपूर्णचंद्राःशुभाः रंध्रमष्टमस्थानेसर्वेनवग्रहाःपि अथचं
द्रफलं जन्मत्रिषट्सप्तैकादशपंक्तिगः श ·· शुभफलप्रदोमतः नेत्रद्वादशवस्वपंचवेदग्रहराशिगःशशीदुष्टःस्मृतःअ
थदीक्षायांकालः तत्त्वसागरे· अथोमहत्सुशुभेषुचेदंशुद्धोविशेषतः कृत्स्नेनाराधलकुर्यात्स्वनामादिविचिंतनं धर्मदः
प्रातःकालःस्यात्संगवाराज्यदःस्मृतः मध्याह्नेसर्वसिद्धिःस्यात्सायाह्नेसर्वतोभवेत् रजनीमंत्रदानेतुनिषिद्धाद्देशिकोत्तमैः
दिवासर्वप्रकाशेवीनसिद्धिदंपरमेश्वरतमिति· अथोमहत्सुनक्षत्रागिनमूलाग्नेयमघाद्विदेवभरणीसार्पाणिपूर्वात्रयंज्योति

वि॰१२
दी॰व
१७५

175

विह्निरथो मुखं हित्वकं भानोमिदं कीर्तितं वापीकूपतडागगर्त्तपरिखाखातोन्निषेधः स्मृतिः देवो शून्यविलप्रवेशनगरीनारंभाः प्रसिद्धं
निच द्विदेवते विशाखा॰ विशाखानक्षत्रस्य इन्द्राग्नी देवते इति श्रुतिः अथ दीक्षायाः कालविशेषः तत्र तन्त्रार्णवे॰ मंत्राणा
रंभणं कार्यं ग्रहणे चंद्रसूर्ययोः ग्रहणे हृद्वदेवेशि कालसंपदिनाविधिः पवित्रपर्वदेवेशि राममेवाम्बुभे दिने कालच
चीनकर्तव्या ग्रहणे चंद्रसूर्ययोः उपणतीर्थे कुरुक्षेत्रे देवीपीठ च वनस्य इति तथा रत्नसागरे॰ सतीर्थे अर्कविधुग्रासे तन्तुदा
मनपर्वणोः मंत्रदीक्षां प्रकुर्वाणो मासतीदीन शोधयेत्॰ इति अत्र यद्यपि सूर्यग्रहणकालेन तनान्यदन्वेषितं भवेत् सू
र्यग्रहणकालेन समो नान्यः कदाचन तत्र यद्यत्कृतं सर्वमनंतफलदं भवेत् न मासतिथिवारादिशोधनं सूर्यपर्व
णि॰ दद्यात् दीक्षां च गृह्णीयात्तस्मिन्काले गुरोर्नरः सिद्धिर्भवति मंत्रस्य विनाभ्यासेन वेगतः इति चिंतामणि कालिकोद्भव
योः सूर्यग्रहणस्यैव विधायकवचनात् चंद्रग्रहे तु या दीक्षा या दीक्षा वनचारिणां॰ जनकस्य तु या दीक्षा दारिद्र्यं सप्तजन्म
सु इति योगिनीतंत्रे॰ चंद्रग्रहे दीक्षानिषेधवचनदर्शनात् गुरुकर्तृकमंत्रनिषेधवचनस्येति सूर्योपरागकालोऽपु
परागसाधारण्येन तथा प्राग्गुरुक्षिवयामलवचनेन निषिद्धत्वान्नामंत्रप्रशस्त इत्यवधेयः किंच॰ चंद्रसूर्यग्रहे तीर्थे सि
द्धक्षेत्रे शिवालये मंत्रमात्रस्य कथनमुपदेशः स उच्यते इति कालिकोद्भववचनान्मंत्रांतरेषु वैधिवद्दीक्षितानां दोषाव
ह इति अथ क्रियावती दीक्षा॰ उत्तरतंत्रे॰ अथ वक्ष्यामि दीक्षाणां विधानं मंत्रकाम्यया॰ याभिर्विना न लभ्यंते सर्वमंत्रफ
लानि वै॰ आत्मलाभं ददत्येताः द्विएव तिडरितास्यपि॰ तेन दीक्षा इति प्रोक्ता तास्तास्तत्त्वविचारकैः नाम्ना क्रमेण कथिता
क्रियाख्या वर्णमय्यपि॰ कलामयी वेधमयी चतस्रो ज्ञानदाः शुभाः पंचमीस्वरीतंत्रे शृणु हे वाचयितां दीक्षां ब्राह्मणैः स्व
स्तिपूर्वकं पंचवाद्यनिनादैश्च वेदघोषैः सुसुहृतः गत्वा शुभगृहं शिष्यः प्रणम्य गुरुपादुकां दत्वा वरणसामग्रीसंकल्पपूर्वया गुरुं

ल

उच्चार्य्यामुकमंत्रस्यग्रहणायद्विजोत्तमः गुरुत्वेनेतिसंभाष्यत्वामहंवरतोवृणे इत्युक्त्वावरणायाथशिष्योहंतोस्मीतितेनतोगुरुः यथो
चितंगुरोःकर्मगुरुश्चेतिवदेच्छिशुः करवाणीतिचोच्चार्य्यपंचवाद्यपुरःसरं ततःशिष्येणसहितोयायाद्यागगृहंगुरुः पुण्याह
वाचनंकृत्वाशिष्योभक्तिपरायणः हारकुण्डलकेयूरमुद्रिकांगदभूषणैः हेमयज्ञोपवीतैश्चमधुपर्कैर्यथाविधि महार्घवस्त्रै
स्ताम्बूलफलपुष्पसुगंधकैः अविघ्नशाखामभ्यर्च्ययथावद्वरणायाद्गुरुं ऋत्विजोपितथाभ्यर्च्यवरणयाद्यस्यसंख्यकान् अथ
मधुपर्कविधानमुक्तंआगमे मधुपर्कविधानंतेयथावत्कथयाम्यहं श्रीपर्णीवृत्तपीठानिहस्तमानानिमानतः अष्टांगुल
समुच्छ्रायसहितानिसमानिच सप्तविंशतिदर्भाणांवेष्ट्यग्रंथिभूषिताः विष्टरैःसर्वयज्ञेषुलक्षणंपरिकीर्तितं सरावांसाद
कसेरुणीःपाद्यार्थेताम्रगडुकाः शंखाद्यर्घ्यप्रदानायगंधपुष्पजलान्विताः दूर्वोदकसमायुक्ताः स्थापनीयाःपृथक्पृथक्
कमण्डलुःस्वताम्रस्य आचम्योदकपूरिताः संपूतमधुपर्कार्थंकांस्यादध्यादिपूरिताः महान्मुद्रालिदुम्बालिमुद्रिकांगसभूषणं
मयूरपत्रछत्राणिसोपानीयाणिसमाहरेत् पादुकाश्चाहरेन्नवधर्मभूषणभूषिताः अमात्स्यामेयदप्युक्तंमधुपर्कस्यपूजने
तत्कृत्वाफलमाप्नोतिमहायज्ञार्हणोपमं अन्येभ्योमधुपर्कस्यविप्रेभ्यःपूजनेस्मृतं भक्त्यानद्विगुणंदद्यादाचार्यायसुभक्ति
मान् अन्यैर्द्विजैःसमंयत्रदेशिकस्यप्रपूजनं तस्मिन्यत्तफलंस्वल्पमनाहृष्टायथाक्षितिः देशिकश्चविधानेनस्नात्वानिर्वर्ति
ताह्निकः मौनमास्थायभूषाढ्योगच्छेद्यागगृहंप्रति आचार्यःपूर्वदिग्भागेउपवेश्यसमासने शिष्यंमूलेनसंजप्तंदद्यादिदं
नथावनं दंतान्विशोध्यपुरतःस्थण्डिलेहस्तमात्रके चतुरस्रेपूजयेत्तरीदेतननेगुरुः ईशानाद्येज्ञानलाभःप्राग्नेयभूतिरु
त्तमा अग्नेय्यामेमनस्तापोवंधुनाशश्चदक्षिणे राक्षसाग्रेमरणभयंवारुण्येमनःसुखं वायव्यामेव्यसनाचकौवेराग्रेसुखावहं अग्ने

वि०१२
ए०व
१२६

126

गलं स्थानपाते प्रायश्चित्तं समाचरेत् प्रायश्चित्तमथो पुरश्चरणप्रकरणे वक्ष्यते ततः स्वस्य परीक्षां च कुर्याद्देशिकसत्तमः कु
रस्वप्नं प्रथमादीक्षायां पूर्वे मध्यमासना उत्तमस्वप्नं पूर्वानदीक्षायां सर्वोत्तमासना स्वप्नलक्षणानि तन्निवेदनप्रकारं दुःस्वप्ने प्रा
यश्चित्तं चाग्रे पुरश्चरणे वक्ष्यते एवं विचार्य पुरेषो गुरुः पूजां समाचरेत् विधाय आचमनं तत्र सामान्यार्घ्यं विधाय च अर्घोदकेन
संप्रोक्ष्य द्वारपूजां समाचरेत् द्वारपूजा वक्ष्यते ततश्च देशिको दिव्यान् दिव्यावलोकनेन च अन्तरिक्षगतानस्त्रोदकेनोत्सा
रयेत्ततः पार्थिवान्पार्ष्णिघातैस्त्रिभिरुत्सारयेत्ततः अंगं संकोच्य किंचित् प्राग्वामगतः स्पृशन् उत्सारितानां भूता
नां देहलीमुद्दक्षिणे पादेन दक्षिणेनाथ प्रविशेद्यागमण्डपमिति दक्षिणपादपुरःसरं प्रवेशः शुद्धदैवतविषयः शा
क्ते तु वामपादपुरःसर एव: वामपादं पुरस्कृत्य प्रविशेद्यागमण्डपमिति त्रिपुरार्णववचनात् तथा । ब्रह्माणं वास्त्वधी
शं च नैर्ऋत्यां दिशि पूजयेत् अर्घ्याम्बुना च गन्धेन यागस्थाने तु चिंतिते वीक्षणाद्यैस्ततः शुद्धिं च तद्दीक्षां समाचरेत् संवीक्ष्य
मूलमन्त्रेणास्त्रेण प्रोक्षयेत्ततः कुर्यात्ताडनमस्त्रेण कवचेनाथ सेचयेत् श्रीखण्डागुरुकर्पूरैर्भूषिते त्रेण समथा य
वान्नचंदनसिद्धार्थदूर्वाभस्माक्षतान्कुशान् सजलान्विकिरेन्मंत्री प्रसूनं ह्युद्यान्मण्डले मार्जयेदस्त्रमंत्रेण तान्मंत्री
दर्भमुष्टिना आसनाय तत्त्ववर्द्धन्यां ईशाने स्थापयेत्तान् पुण्याहं वाचयित्वाथ विप्रान्संतोषयेत्ततः वेदिकायां लिखे
न्मध्ये सर्वतोभद्रमण्डलं तल्लक्षणमथो वक्ष्ये सर्वतंत्रानुसारतः देशिको वेदिकामध्ये गोमयेनोपलेपिते दूर्वाकुंकुममयो
गेन चतुरस्रं प्रकल्पयेत् चतुष्कोष्ठसमायुक्तं कर्णसूत्रविभूषितं तत्र कोष्ठचतुष्कानः सूत्राणां स्याच्चतुष्टयं कोणस्य को
ष्ठमध्येत द्वयं तेन मस्यकाः यथा ऐन्द्रवारुणगं युग्मं सौम्ययाम्यगतद्वयं मकरेत्तेषु सूत्राणि दद्याच्चतारिमं च वित् पूर्वपश्चि

मगंतहृद्द्वेत्रगतं पुनः मकरान्पूर्ववत्कुर्यात्तत्र सूत्राणि पातयेत् शतद्वयं च पंचाशत्सूत्रपदानि यथा पुनः प्राङ्मुखवति र
श्मानि सूत्राण्येवं विकाशयेत् षट्त्रिंशत्कोष्ठकैर्मध्ये सरोजं परिकल्पयेत् तद्बाह्ये पंक्तिः पीठमेकं पंक्त्या प्रकल्पयेत् अथ वक्ष्ये
विधानेन सरोजलेखनक्रमं सरोजस्थानजं भागं द्वादशांतं परित्यजेत् ततो वृत्तत्रयं मध्ये कुर्यात्सम्यक् यथाविधिः आद्यवृत्तेन
पत्राणि पत्राग्राण्यष्टभागतः अन्त्यवृत्तेन मध्यस्य प्रतिमाणं च यद्भवेत् किंजल्काग्रेषु संस्थाप्य पार्श्वतस्तद्द्वयं द्वयं काण्डं संलिख्य
संधिं संवद्धसूत्रन्यासं विधाय च दलाग्रमानतो वृत्तं कुर्यात्सम्यग्विचक्षणः वृत्तांतमध्यसूत्रस्य पार्श्वयोस्तु यथाविधिः बु
द्धिरेकेन कुर्वीत पत्राग्राणि विधानवित् किंजल्कान्पद्ममूलेषु द्विशः कुर्वीत देशिकः सामान्यकमलस्यैतल्लक्ष्म सर्वत्र गीयते
त्रिभिः पदैस्तु पीठस्य पादान्कोणेषु कल्पयेत् अतिरिक्तैः पदैः पीठगात्राणि रचयेत्ततः वीथीपंक्तिद्वयं सम्यग्गोकीर्णं प्रमार्ज
येत् कोष्ठद्वयेन चैकेन प्रत्येकं द्वारपार्श्वयोः शोभा भवेत्ततः कोष्ठैरेकतस्त्रिभिरेव च उपशोभास्ततः कोष्ठैः षड्भिः कोणा
नि कल्पयेत् रजोभिर्भूषयेत्सं च वर्णैरेतन्मण्डलम् निशारजो भवेत्पीतं शुक्लं तण्डुलजं स्मृतं रक्तं कौसुम्भमुद्दिष्टं कृष्णमाकर्म
नीषिणः पुलाकदग्धसंभूतं श्यामं बिल्वदलोद्भवं पंचवर्णाः समाख्याताः तादृशा मण्डलकर्मणि उत्सेधतारतो रेखाः स्युस्त्वङ्गुष्ठाङ्
गुलमानतः तारो विस्तारः सर्वाः सीमाः सिताः कार्याः शुभ्रा मण्डलकर्मणि पीतवर्णेन चूर्णेन कर्णिकां पूरयेत्ततः किंजल्कान्
रक्तवर्णेन दलानि श्वेतवर्णतः पृणामेन रजसा संधिं मन्त्रविद्याभिः पूरयेत् किंजल्कान्पीतरक्तेन पीठगात्राणि कल्पयेत् वीथीं च
तत्कमध्ये कल्पवल्लीः प्रकल्पयेत् पत्रमूलफलाकारमणिरत्नादूर्ध्वगमाः नानावर्णरजोभिस्तां रंजयेत्कुशलो गुरुः सु
भ्राणि रजसा द्वाराण्येतेषु पूरयेत्ततः रक्तवर्णेन तच्छोभा पीतेनैवोपशोभिताः कृष्णवर्णेन कोणानि वह्निरेखात्रयं ततः शुक्ला
रुणासितैः सर्वं रजोभिर्भूषयेत्क्रमात् सामान्यं सर्वतोभद्रं मण्डलं स्यात्तदुत्तमम् अन्यानि मण्डलान्यत्र वक्ष्यन्तेऽपि प्रसंगतः प्र

वि॰ १२
ए्रीव॰
१२२
177

वीथिं च तत्र सेतेन नालस्तन्त्राणि पातयेत् यावत्स्यात्कोष्ठशतकं चत्वारिंशत्समन्वितं वेदाग्नितत्वमध्येषु पद्मं षट्त्रिंशता शुभं एकपंक्त्या
भवेत्पीठं वीथ्याकारा तत्र दृश्यते पूर्ववद्द्वारशोभास्यादुपशोभा च नास्ति वै । षड्भिः कोष्ठैस्तथा कुर्यात्कोणानि प्रोक्तवर्त्मना अत्र
सर्वविधानं च प्रोक्तमण्डलवच्छुभं एतन्मण्डलमस्यतच्चतुरस्त्रे सुशोभने पातयेत्कुम्भशः सूत्रं यावत्कोष्ठानि सर्वतः चतुष्के
तु पद्मानि विदध्यात्कमलमुत्तमं चतुष्काणि विदिक्स्थानि चत्वारि विभजेत्सुधीः यावत्षोडशकोष्ठानि भवेयुस्तानि मार्जयेत् त
थाथावत्स्वस्तिकानामाकारः प्रकटी भवेत् रजोभिः शुक्लहारीतरक्तनीलैः प्रपूरयेत् स्वस्तिकानि शतं चात्र पूर्ववत्परिकल्प
येत् उदितं मण्डलं ह्येतन्नवनाभं सुशोभनं एतद्देवोक्तमार्गेण स्वस्तिकाख्यमनुत्तमं मण्डलं स्नानपर्वाद्यं सर्वकामफलप्रदं दी
क्षायां वा महादाने देवप्रतिष्ठितादिषु एतन्मण्डलमध्ये तु कुर्यात्स्नपनमं बुधः एवं मण्डलमालिख्य प्रोक्तेषु स्नपनं गुरुः वे
दिकायामासने सम्प्राङ्मुखः संविशेत्तथा बद्धपद्मासनो मौनी निष्कलंको जितेन्द्रियः देशिकेन्द्रस्तु संस्थाप्य शङ्खोपकरणानि तु
दक्षिणे वामभागे तु स्थापयेत्कलशं शुभं गन्धपुष्पजलैः पूर्णं च हस्तप्रक्षालनाय च पश्चात्प्राणविधायाथ दीपान्प्रज्वालयेत्क्र
मात् अनन्तेन तु करञ्जं वा मन्त्रवित् संस्कुर्याद्यानि सर्वाणि वक्ष्यमाणविधानतः करशुद्धिं विधायाथ कुर्यात्तालत्रयं बु
धः शरमन्त्रेण दिग्बन्धं कुर्यान्मन्त्री समाहितः महत्स्थितं तत्र वर्तन्ते ह्यसर्वतः भूतशुद्धिं ततः कृत्वा प्राणस्थापनमाचरेत्
न्यासादिकं ततः कुर्याद्देशिको यतमानसः ऋषिं न्यसेन्मूर्ध्नि छन्दो वक्त्रगं तं न्यसेत् देवतां हृदये न्यस्य मूलमन्त्रस्य देशिकः षडङ्ग
विन्यसेन्मन्त्री पञ्चाङ्गं वा यथाविधि यस्य मन्त्रस्य पञ्चाङ्गं तत्र तस्य विधीयते अङ्गैर्विहीनस्य मनोरङ्गैरेव कल्पयेत् तत्र मन्त्रोक्त
मार्गेण न्यासान् न्यस्य समाचरेत् शरीरे स्वस्य मन्त्रस्य योगपीठं प्रकल्पयेत् देहात्मके ततः पीठे ध्यायेन्मन्त्रस्य देवतां दक्षिणे
वामतो मुद्राः स्थापयेदर्घ्यमुत्तमं जलेन पूरितं तद्दक्षिणे त्वर्णीं स्थापयेत्ततः तत्रालयमलं प्राग्वोद्वृत्त तत्र तो न्यसेत् पाद्यमाचम

नीयं च मधुपर्कं च मंत्रवित् ततो मूलानुमंत्री प्रोक्षणपद्भिः समाहितः स्नानानैमेऽङ्गलं चान्यत्सोपकरणादिकं प्रोक्षयेत्
पुष्पाद्यैर्हृदे स्वे देशिकोत्तमः योगपीठं समभ्यर्च्य मानसमार्गेण मंत्रवित् पीठांते वततत्ततः पूजयेदिष्टदेवतां देवतात्मा
ततः पंचकुर्यात्स्व समनोऽञ्जलीन् शीर्षे हृदि तथाधारे चरणे सर्वगात्रके पूजयेच्च निवेवेन रहितैश्चंदनादिभिः सर्वो
पचारैस्तत्तुष्ठ्यं गुर्वादिष्टेन कर्मणा समापयेदिदं सर्वं प्रोक्षणपद्भिः समाचरेत् पानीयं प्रोक्षणीसंस्थं तस्मात्संपूर्ण पूर्वव
त् उपचारैश्चंदनाद्यैर्मण्डलं पूजयेद्गुरुः पूरयेत्कर्णिकां शुभ्रैः शालिभिस्तण्डुलैस्ततः दर्भान्तमेऽग्र पर्यंषां मात्तनं कूर्चकं
ततः छिन्नमूलाः कुशा दीर्घाः सप्तविंशतिसंख्यकाः वल्लयग्रंथियुतास्तु यदेश कूर्च इहोच्यते यजेदाधारशक्त्यादिपीठ
मंत्रावसानकं स्वर्णादिरचितं तत्र कलशं छिद्रवर्जितं त्रिगुणात्मकसूत्रेण वेष्टितं सर्वतो बहिः चंदनागरुकर्पू
रैर्धूपैः सम्यक्सुधूपितं एवं जपविधानेन स्थापयेद्देशिकोत्तमः नवरत्नानि निक्षिप्य कुंभे कूर्चं मध्योपरि हेमाचंद
नसंयुक्तं विन्यसेद्दत्तनान्वितं पुष्पनीलं च वैडूर्यं विद्रुमं मौक्तिकं तथा ततो मरकतं वज्रं गोमेदं पद्मरागकं मौक्तिका
नि च रत्नानि देशिकैस्तत्र विन्यसेत् स्नाणं तांक मैता मंत्री मातृकां मनसा जपन् मूलमंत्रं जपन्मंत्री विन्यसेत्कामात्मनः
घटस्य पीठभेदं च विन्यसेत्साधकोत्तमः पंचाशदोषधिक्वाथैः पूरयेत्तदनंतरं अपहृत्तत्वाकाथैर्वल्लभूरुहत्वगुद्भवैः
गंधपंकप्रसूनादिवासितैर्वाम्भभिर्जलैः क्वाथादिनो यैरापूर्य शास्त्रं तस्मिन्विलोडयेत् गंधाष्टकमम्भमंत्री सर्वसंपत्प्रदा
यकं कलाः सर्वाः समावाह्य पूजयेच्च तथाविधि कुलादिदेवतारूपशास्त्रवती रेवदेहदित्पेत् चंदनागरुकर्पूरकाश्मीरैरो
चनान्वितैः ससिल्हकजटामांसीशठीभिः शाक्तसम्भवं गंधाष्टकम्भवशं पशाक्तिमंत्रेषु योजयेत् काश्मीरं कुंकुम
सिल्हकं शिलारसः सर्वाकर्पूरः चंदनागरुकर्पूरचोरकुंकुमरोचनाः जटामांसीकपियुताः शाक्तेर्गंधाष्टकमिति श्री

वि·१२
ली·व
१२८
178

रदातिलकवचनात् ह्रीवेरं चंदनं कुष्ठं अगरु कुंकुमं मुरं सेव्यकं घनरामांसी वेसवं नडदीरितं ह्रीवेरं वालकं सेव्यकं उशीरं मुर
मोरहरीतिप्रसिद्धं मुरा गंधवती दैत्या गंधाढ्या गंधमादिनी सुरभिर्भूतनंगधा चकुटी गंधकुटी स्मृता: एकांगी तिनानार्थवच
नादेकांगमेवमुरशब्देनोच्यते एकांगी छर्धुरिति लोके प्रसिद्धा: जलकाश्मीरकुष्ठैस्तरक्तचंदनचंदनै: तमालगरुकर्पूरै:
शुभं वचाष्टकं गंधक जलंवालकं· गंधाष्टकस्य संयोगात्सामर्थ्याद्देशिकस्य च सशाक्तिकजलं कुंभे भवेदेव न संशय:
आदौ कृशानुसंबंधिकलादशकमर्चयेत् कलाद्वादशकं सौरं श्रज्येयमदनंतर कलाषोडशकं चंद्रं यजेत्पश्चाज्जगन्मय:
वेदादिभेदसंजाता: कला: पंचाशतैर्युता: सन्निधाप्य समभ्यर्च्य ततो मंत्रीततः क्रमात् मध्यमध्यक्षच: पंचपूजनीयाः इमा
अपि आत्ममंत्रं समुच्चार्य मत्रविषन्पदमुच्चरेत् वषडंतमंत्रपदं तदनु होमपदं ततः पदं तावद्विषपदे दतिष्ठेद्वपदं तत:
त्राणमन्त्रपदमुच्चार्य तत्षट्स्वपदं वदेत् वदेत्महतसयोमसदङ्गाणोपदं वदेत् वदेज्जात्मतनेत्पश्चाद्दिङ्नाशाद्वमुच्चरेत् सप्त
मस्वरमुच्चार्य सविंदु षाष्ठिनं वदेत् उकाराद्दन्यदंवा तेप्रथमो मंत्र ईरित: आत्ममंत्र: हंसरति सप्तमस्वर ऋकार: आ
षाष्ठीतकार: अन्यानि पदानि स्वरूपाणि· तथा लोहितो वह्निसहित: इतनार्यतिकाततः उकारान्तस्तवने पश्चाद्दीर्घेण
स्पदं वदेत् गोनभीमस्वकुचरोगिरिष्टाश्चनतो वदेत् यस्यारुष्णुत्रिष्णुपदं ततो विक्रमणोष्वपि त्रियंतितपदं भूयाद्भुवना
नितततो वदेत् तोपस्योमाधव: पश्चाद्वानस्यातो यशांतियुक् द्वितीयो मनुराख्यातस्तृतीय: प्रोच्यतेधुना लोहित: पका
र:वह्नीरेफ: तेनप: इतनाततकार: तोयं वकार: तस्योमाधव इकार: तेन विषानेश: तोयेव: शांतिआ· तेनस्था· अन्या
निपदानि स्वरूपाणि: एणं तो ग्निमांतो पान्तस्य कलायुक्तान्तृतीयक: चतुर्भुव: सचेंद्रार्द्धस्ततः स्याच्चयजामहे· पंर
स्वगोयिवशीतिवर्द्धनं च ततो भवेत् पदस्वर्वारुकवंधनान्मपदं वदेत् स्वोर्मुक्षीयपदे पश्चान्मामृतात्पदमुच्चरेत् एणंत:

नकारः अग्नीरेफः मांतो यकारः उपांत्यकला विंदुः एतेभ्यः यत्तृतीयो वकारः चतुर्थो वः ककारः चंद्रार्द्धो विंदुः तेन कं। अन्यानि प
दानि स्वरूपाणि। गायत्र्यात्मा चतुर्थः स्यान्मंत्रः स्यात्तोज्जगन्मले। तोपस्थापशाल्मली प्रोक्ता सहजाग्रेन विसर्गयुक् अग्निश्च के
वलः प्रोक्तो योनिकल्पपदं वदेत्। यतन्त्वत्पदं पश्चात्तनो रूपाणि पिंशतु। आसिंचनं प्रजापश्चात्तनिर्द्दहनापदं वदेत्। ग
र्भं दधानि तिपदं आषाढी पद्मनाभयुक्। पंचैते वैदिका मंत्रास्तेष्वेकैकं प्रपूजयेत्। तोयं वकारः शाल्मली इकारः तेन वि
सहजा षकारः ज्वांतो णकारः विसर्गयुक् उकारयुक्तः तेन स्नुं। अग्नीरेफः केवलो विस्वरः आषाढी नकारः पद्मनाभ एका
रः तेन नेश्रति। तारस्य पंचभेदोत्थकलानामंतरे सुधीः आवाह्यादौ कलाः पश्चात्संनिधाप्य च देशिकः प्राणान्संस्थाप्य बोध
धैः पूजयेत्साधकोत्तमः यत्र यत्र कलापूजाविधिस्तत्रैवमेव हि। तारस्य पंचभेदोत्थकलानां पूजयेत्सुधीः कलादशकमा
वाह्य स्थापयाः सन्निधाप्य च हंसः शुचिषदित्याद्यृचं संजप्य पूजयेत्। प्राणसंस्थापनं कृत्वा कलानां पूजयेत्ततः एवं जप
घास्तीदृशा याः पीनायाश्च विधानतः निहत्यायाश्चापि यजेदेतत्प्रमाविचक्षणः अकारोकारकौ प्रोक्तौ मकारो विंदुना
दकौ। शक्तिसाता नवमी समध्रुवभेदाः समीरिताः यंतिमो द्वाविमौ भेदौ पृथगेव समीरितौ शक्तिः सकारः सांतो हकारः
ततो रसालपनसपिप्पलोदुम्बरपल्लवैः पैद्वाकृणिसत्रामवल्लरीभिर्दृढैः कल्पवृक्षमनीषया। कलशस्थापने मंत्री विदधीत स
माहितः पश्चाद्रत्नसंयुक्तां सफलां सुभचाक्षिकां देशिकेंद्रः समाहृत्य स्थापयेत्पल्लवोपरि कल्पवृक्षफलानां हि म
त्वा विशदधीर्गुरुः पद्मावरयुगेनैव वेष्टं पश्चात्सवेष्टयेत्। प्रधानकुंभसंस्थाप्य वेद्यामेवं गुरूत्तमः तोरणानां समीपेषु पूर्वा
दिषु यथाक्रमं प्राग्वन्मण्डलमालिख्य पद्मं वा षड्दलं शुभं प्रागुक्तविधिना तेषु कुंभान्संस्थाप्य देशिकः ध्रुवधरोवाकाति
च विद्ध्या शांतेषु पूजयेत्। आग्नेयादिषु कोणेषु कुंभान्संस्थाप्य पूर्ववत् अनंतरंडंजयं चैव सिद्धार्थं मंगलं तथा संपूज्य वक्ष्यको

वि०१२
ए०व०
१२४

179

णादिषु इन्द्रादीनथ पूजयेत् पूर्वादिष्वष्टकुंभेषु तेषां मंत्रैस्तु वैदिकैः पुनः पूर्वादिकुंभेषु पूजयेद्दिग्गजानपि । ऐरावतं पुण्डरी
कं वामनं कुमुदांजनौ । पुष्पदंतं सार्वभौमं सुप्रतीकं च देशिकः पुनर्वेद्यां गुरुर्गत्वा उपविश्य निजासने संवित्य मूलमंत्रे
ण मूर्तिं तस्मिन् हृज्जमः तस्यां मूर्तौ समावाह्य पूजयेदिष्टदेवतां सकलां मूलमनुं मंत्री सम्यक् कृत्वा उदीर्य यथा ततः निर्गम
य च चैतन्यं नासिकाग्रविनिर्गतं अञ्जलौ मातृकापद्ममहः पुष्पान्वितं गुरुः मस्तके न्यस्य संस्थाप्य तस्यामावाहयेत्ततः
सन्निधापनं प्रथमं ततः सन्निधानमतः परं सन्निरोधं च सकलीकरणं त्ववगुण्ठनं अमृतीकरणं परमीकरणं स्वस्वमु
द्रया । सन्निरोधं चेति चकारात् संमुखीकरणमपि ज्ञेयं क्रमाद्धि द्रष्टव्यं ततः उपचारान् प्रकल्पयेत् आसनादिप्रसूनां
तानुपचारान् प्रकल्प्य च तत्तन्मंत्रविधानेन प्रोक्तान्यावरणान्यपि सर्वान्ते लोकपालानां तदस्त्राणां च पूजनं विधाय पूजा
मेवं हि धूपदीपनिवेद्यकैः प्रपंचसारे । ततो निवेद्य च ततो मण्डलं पश्चिमे क्रमात् मंगलांकुरपात्राणि स्थापनीयानि
मंत्रिणा तथा । वेदिकायां दक्षभागे कृत्वा स्थण्डिलमुत्तमं संस्थाप्य वह्निं संस्कृत्य वैश्वदेवं समाचरेत् तत्र प्रणवव्या
हृतिभिः कृत्वा व्याहृतिभिः पुरः मूलार्णेन ततो हुत्वा साज्येन हविषा सुधीः पंचविंशतिधा पश्चाद्धुत्वा व्याहृतिभिः पुनः
समूल्पं तां चेदनाद्यैः पीठमूर्तौ तु योजयेत् अग्निं विसृज्य शिष्टेन पायसेन बलिं हरेत् पार्षदेभ्यश्च दत्त्वा गन्धादिपुष्पान्तं तत समर्पि
ते ततः स्थाप्य नैवेद्यं तत्स्थलं शोधयेत्सुधीः पुनर्यजेद्बोपचारैः पंचभिर्दर्शयेत्ततः छत्रं च चामरं पश्चाद्दर्पणं ह्लमं
मं छत्रं चेति चकाराद्दर्पणं व्यंजनैः पिपृत्येत सहस्रं च जपेन्मंत्री मूलमंत्रं समाहितः देवतायै निवेद्याथ तं जपं सम
र्पयेत् ततः ईशानदिशि यः पूर्वं स्थापितो विकिरोत्र च सुवर्णवस्त्रसंयुक्तं करकं जलपूरितं न्यसेदत्र यजेदस्त्रदेवतां घोररू
पिणीं । पश्चिमं स्यात् खड्गखेटधारिणीं सिंहसंस्थितां तिष्ठन्संश्च पचनतो गृहीत्वा तं प्रदक्षिणं भ्रमेदन्तस्त्वरन्देति लोकेषा

नाभिनीरयन् नालयुक्तेनोदकेन देवतां भावयेत्ततः स्वस्थाने स्थापयेत्तं तु षट्मंत्रेण ततोर्च्चयेत् उपविश्य ततः श्रेयोसूत्रं गंधाद्यैर्मंत्रवि
त्तमः ततो वह्निसंस्कृतं च रुं गोपयसा पचेत् तं वै ताम्रादिजे पात्रे क्षालितेन च शारणुना मूलाणुनाभिमंत्र्याथ तण्डुलान् शालि
संभवान् निष्पसृतिमानेन शारण्युप्रजपन् क्षिपेत् प्रक्षालितेन पात्रेण पात्रवक्त्रं पिधाय च ॐ मंत्रेण ततो मूलमनुनादेशि
कोत्तमः पचेच्चरुः प्राग्नुवस्त्रुक्स्त्रुवेन तमभिघारयेत् मूलेन स्त्रुवसंस्थेन तत्तेनाथावतारयेत् ॐ मंत्रेण स्वसंज्ञकुशास्ती
र्णे विभज्य ततः त्रिधा तेकं देवताये परं वह्नौ निवेदयेत् शिष्टं शिष्येण सहितो गुरुर्भुंजीत मंत्रवित् कृताचमनः प्राचां त शिष्य
प्रानीय मंत्रवित् प्रादेशमात्रं हृष्ट्वं [illegible] यथोक्तं दंतधावनं शिष्याय दद्यात्स रदान्विशोध्य क्षालितं त्यजेत् प्राचांत मत्र च पद्या विधि
तच्छिखायां बंधैः सुरक्षितं ममंत्र प्रविधाय मंत्री वेद्यां शयीत कुशसंस्तरणे रजन्यां शिष्येण सार्द्धं समनागादितो धिवासः ना
ज्यादिपात्रादिपादेन स्वप्नमथ ग्रहणे तत्क्षणे मुक्तेकात्यायनेन निर्वपूर्वं समिन्मात्राः [illegible] नातिहृत्स्नुवी मामेयोद्दुंबरी वापि
चरुस्थाली प्रशस्तं शुभमिलेन त्रिः फलीकृतांस्तण्डुलान् त्रिर्देवेभ्यः प्रक्षालयेदिन्याजेति कुशलोदकैः तेन श्रितमिव
मर्दितेन ततः ईश्वरदानक्रियात्समिति खिन्नः सुशान्तो मस्वस्विन्नो लदग्धो कठिनः शुभः न चातिशिथिलः पाच्या
नववीनरसोमवेदित्तु कलत्रणे हुतेन संस्कृतेन ॐ मंत्रेणावतारयेदिति पूर्वेणान्वयः अत्र ॐ मंत्रेणत्यादि भूतनत्कल्पो
क्तकवचमंत्रास्त्रमंत्रादयो ज्ञेयाः तत्तु ॐ मात्रं फणमात्रं वा अथाग्निस्थापनं नारदपंचरात्रे कुण्डस्यारंभकाले तु संस्कारान्
कृतानादि निष्पत्तस्य च तत्सर्वे विधेयाः स्युः क्रमेणैव उत्तरतंत्रे होमकर्म ततो वक्ष्ये सकलागमसंमतम् सुसंस्कृते गुरोः कु
ण्डसंस्कारैश्च यथाविधि ते दशाष्टाधिकाः प्रोक्ताः सर्वागमविशारदैः मूलाणुनाथ संवीक्ष्य संप्रोक्ष्यास्त्राणुना ततः कुशैः
सताड्य चास्त्रेण प्रोक्षयेत् कवचाणुना खननं स्यात्क्षुरेणाथ तेनैवोद्धारशीतता शुरणं च तदास्त्रेण समीकुर्याच्च सेचनं क

वि॰ १२
ए॰ व॰
१८०
180

कचेनास्त्रत्राणेनकुहनंवर्मणामतं मार्जनंचविलेपंचसंविंत्यचकलात्मनां कुर्य्यात्त्रिसूत्रीकरणंनमोमंत्रेणपूरयेत् शरेण
वज्रीकरणंत्वंकुशैःस्याच्चतःपथं कवचेनेंद्रियाणांवापुत्त्वाटनमथाचरेत् एवमुक्तैस्तुसंस्कारैर्होमेऽजुग्नानिदेशिकः सं
स्कुर्य्यादथवातानिचतर्भिःप्रथमोदिनेः शरेणानयंदेशभूतास्त्रमंत्रेण प्रोक्षणमुमानहस्ताग्रेण अभ्युक्षणमुष्टिवेधेनसिं
चनं उद्धारःस्वानमुद्राः पूरणमन्यमस्ता उक्तंचनारदपंचरात्रे॰ गृहीत्वाचैकदेशान्तकुण्डेमध्यान्तमृत्तिका अंगुष्ठानामि
काभ्यांतदुदयेनाथपूरयेत् सेचनमभ्युक्षणमेव॰ शास्त्रेशास्त्रमंत्रेण॰ वर्मणोत्सेनदद्भिमेषुचतर्षुसंवध्नाति तदुक्तंसोमशं
भुना॰ संमार्जनंसमालेपकलारूपस्यकल्पना त्रिसूत्रीपरिधानेचवर्मणाभ्युक्षणंरुदेति॰ कलारूपप्रकल्पनंसोम
सूर्य्याग्निकलारूपप्रकल्पनं त्रिसूत्रीकरणंसूत्रत्रयकल्पनं हृदयेनपूजनंतुमेखलात्रयस्यैव तदुक्तंनारदपंचरात्रे
समभ्यर्चनतोवाह्येमध्यतःप्रणवेनतु ततेनैवविधिनानाभिंपूजयेच्चद्रसन्निभं मेखलात्रयपूजायांहृन्मंत्रेणप्रपूजये
त्॰ इति॰ वज्रीकरणंवज्रवदृढचिंतनं चतुःपथंकुशैस्त्वंतर्हिर्द्वमार्गचतुष्टयकरणं शारदातिलकेतु॰ तन्मंत्रेण
तनुपादतपाटनमित्युक्तं अतयाटनलक्षणंतुनारदपंचरात्रे॰ अछिन्नाग्रैस्तदादर्भैरस्त्रमंत्राभिमंत्रितैः कुण्डेभित्तिग
णांसर्ववर्मणापरिभूषयेत् इत्येवमत्तपाटाख्यकुण्डसंस्कारमनंतरं अत्रेंद्रियाणामुत्त्वाटनमितियदुक्तंतत्त्वेवमेवकर्त्तव्यं
अत्तशोहेंद्रियवायकत्वादत्तपाटनमिंद्रियाणामुत्त्वाटनमित्यर्थः हुंकारेणरासहस्रनिवारणमितिकेचित् आदित्ताता
नांवर्णानांपाटनेव्याप्तिरित्यपरे एतान्तरमाहात्म्यचेति प्रथमोदिनैर्वीक्षणप्रोक्षणताडनाभ्युक्षणैः तथा॰ त्रिधास्त्रिशो
खिलेल्लेखाःप्रागुदग्यायतादाणना॰उदगग्राइतिदिग्गताउदगग्राः सतनाग्रप्राङ्मुखाणांदेवाविस्त्रीणावासवाःउद
गुखाग्रेखाणांब्रह्मसूर्य्यादयःक्रमात् अत्रेरखालिखनेकृतमारंभःकृत्वावसानेऽस्माकांतायामाह सोत्रामणीतंत्रे॰

प्राचीमूर्द्धमुदक्संस्थं दक्षिणारंभमालिखेत् प्राचीमूर्द्धप्रागग्रं उदगग्रं उत्तरः संस्थं शर्वीशर्वावसानकं नारदपंचरात्रे· उ
ल्लिखेद्दशराजेन दर्भकाण्डेन यत्नतः भूमावभ्यंतरे कृत्य दक्षिणाद्यादितः क्रमात् उत्तरावधि विधिं यावद्दशद्वयाद्रेखाचय
सम· प्रथमभागान्तमारभ्य यावत्पूर्वावधिं नयेदिति· अत्र ह्युत्तमंत्राग्रमंत्रयोर्विकल्पः तथा· अथवाग्नि[illegible]तानस्य वह्नि
गेहं लिखेत् क्रमात् अग्नियुग्मं त्रिकोणद्वयरूपं षट्कोणं· वह्निकोणं त्रिकोणं· अत्र रेखाषट्कोणयोर्विकल्पः त
थायामले· षट्कोणेनाहतं देवि त्रिकोणं तत्र संलिखेदिति अत एव नारदपंचरात्रे· रेखामात्रमुक्तं शारदातिलके· सर्वा
नभ्युक्ष्य तारेण योगपीठमथार्चयेत् सौभाग्यमणीतंत्रेन· प्रोक्षयेद्वाग्भवेन वेदमंत्रवा शक्तः प्रणवापेतया अभ्युक्ष्य कु
शसलिलेन· अभ्युक्ष्य चक्रमाभोभिरिति योगिनीतंत्रवचनात् प्रपंचसारे· प्राणाग्निहोत्रविधिनाथ्यावसथ्ययोः न
लस्याने प्राणाग्निहोत्रविधिरपि तत्रैव· मध्येंद्रवरुणशक्तिदग्नातान्निक्रमेण कुण्डानि· आवसथ्यसभ्याहवनीया
न्वाहार्यगार्हपत्यानीति उत्तरतंत्रे· संप्रोक्ष्य प्रणवेनाथ योगपीठं समर्चयेत् योगपीठार्चनं प्रयोगे वक्ष्यते तत्र शक्तिं
चसंस्थाप्य समावाह्य तत्र मतीं प्रभां अतींद्रियाभां सकलजगदात्मस्वरूपिणीं ईशानसहितां तत्र समभ्यर्च्य गंधपुष्पादिभिर्यजेत्
शक्तिमंत्रेण तां शक्तिमीशानं मूलमंत्रतः अभ्यर्च्य मैत्रीवित्सम्यक् मणिजं वारणेयकं कुलीनद्विजगेहाद्वा पात्रे कृतव
हूतनः आनीयाग्नेयेणनैरृत्यां क्रव्यादांशं परित्यजेत् देवांशं मूलमंत्रेण स्थापयेद्यत्नतः सुधीः पश्चात्तमग्निसंस्कारैः
[illegible] संस्कुर्याद्दीक्षणादिभिः प्रदीपकलिकाकारं तेजश्चावाहयेत्ततः पेकांजाठरवेदं च वह्निर्मां जाठरस्य च ॥
स्मृत्वाग्निबीजकेनास्य चैतन्यं योजयेद्बुधः ओंकारेणाभिमन्त्र्याथ धेनुमुद्रामृतीकृतं सारदाचशारणाथ्यकवचेनावगुंठ
येत् ततः संरक्ष्य कुण्डस्य भ्रामयीत्तु प्रदक्षिणा प्रणवेन ततः समस्य संमुखे स्वीयकुण्डके देवायोनौ तत्रगातुस

वि० १२
णि० व०
१८१
[18]

छत्रमिच्छद्देशिकः शिवबीजमिति ध्यात्वा निक्षिपेत्सुदक्षिणं ततश्चाचमनीयं च देव्या देवस्य कल्पयेत् वैसवयोगेन तन्ना
रदपंचरात्रे • तत्र नारायणस्य शक्तिर्विद्यात्तल्लक्षणम् • लक्ष्म्याकृतिपदस्था सा अमृतात्मृतजीवनीति • तथा कपि
लपंचरात्रे कामात्मजं ततः कृत्स्नं लक्ष्मीस्तु अमृतीं स्मरेत् तयोः संगमयोगेन वह्निः संजात संस्थितिरिति • कुंभसंभ
वोप्याह लक्ष्मीस्तनमतीभद्रा प्रभा नारायणस्य च ग्राम्यधर्मेण संजातमग्निं तत्र विचिंतयेत् पात्रेताम्रादिपात्रे • प
राहस्त्रिः पात्रान्तरेण पिहिते ताम्रपात्रादिके शिवे अग्निप्रणयनं कुर्यात्कुण्डे वा तादृशे पि ना पिहितेकवचमंत्रेण त
दुक्तं पिंगलामते • अस्त्रेणाग्निं समाधाय कवचेन पिधाय च कथा दग्धा च नैऋत्यां तु जेदस्त्रेण पार्वतीति तथा नारदपं
चरात्रे • तेजसे ताम्रपात्रे वा मृण्मये भिन्नवर्जिते वा • तेजसं पदगोवलीवर्द्धन्यायेन ताम्रेतरपरं पतेनशं तत्र विभिन्नपा
त्रे वा कपाले वोल्मुके पि वा नाग्निप्रणयनं कुर्यान्महाविघ्नानि भयावहमिति सरस्वतीसारलिखितवचनेष्व रा
तत्र स्यात्तपरं अभिनवदत्ते • भैरवीतंत्रेत • योनावेवं विन्यसेत्स्वामिवह्निं पश्चादेवं मूलमंत्रेण मंत्री तदुक्तं तदत्र
प्रणवमूलमंत्रयोर्विकल्पः जाबरश्रुति • बिंदुः परमात्मा तस्यांशो भीमकृता तत्तज्ज्वावह्निः वैदवः पार्थिवो भौ
मः अमृतीकृतं वंबीजेन अमृतीकरणं ततो विदध्यात्ज्वलबीजेन स विंदुनाकृशानोरिति योगिनीतंत्रवचनात् • शारे
णास्त्रेण उत्तरतंत्रे उक्ताश्चितिपिंगलमते हनयुगं पचद्वयं दहयुग्मं च सर्वज्ञं आज्ञापय ततो द्विठः अस्त्रमंत्रं प्रभाष्यैव
कृशानुं ज्वालयेत्ततः द्विठः स्वाहाकारः पंचसारे • अग्निप्रज्वलिते वेदे जातवेदहुताशने सुवर्णवर्णममलं समि
द्धे सर्वतो मुखं अनेन ज्वलितं मंत्रेणोपतिष्ठेद्हुताशनं सर्वज्ञमिति शाखः कर्मणि द्वितीया • मंत्रेण संबुध्यांतेनेयं स
र्वज्ञाज्ञापय स्वाहेति दक्षिणामूर्तिवचनात् ज्वालयेत्कृशेः सुवेन वा • ततः प्रज्वालयेत्कृशैरिति कुंभसंभववचनात्

मुखेनैव धमेदग्निं मुखाद्देवोऽभ्यजायत इति कात्यायनवचनाच्च मंत्रतंत्रप्रकाशे· ततः प्रविन्यसेज्जिह्वां देहे मंत्री विभावसोः
सलिंगगुदमूर्द्धास्यनासानेत्रेषु चक्रमात् स सर्वांगेषु सर्वास्ता वह्नेस्ते त्रिविधा अपि· हिरण्या कनका रक्ता कृष्णा चैव तु सु
प्रभा बहुरूपातिरिक्ता च जिह्वाः सप्तेति सात्विकाः अनलेराद्यविन्द्वेनसादियान्तान्तरान्विताः अनलो रेफः ईरोय
कारः अर्घीश उकारः अयं क्रमो बीजोद्धारे सोऽकर्ष्यायेव· न्यासेत्तु· सलिंगगुदमूर्द्धास्यनासानेत्रेषु चक्रमात् विन्यसेदिति
दिक्रान्ताः सर्वांगे वह्निरूपिणी इति सिद्धान्तशेखरवचनात् सर्वांगे वह्निरूपान्न्यसेत् प्रपंचसारे मंत्री प्रविन्यसेज्ज्यो
वेहरंगानिवेक्रमात् सहस्रार्चिः स्वस्ति पूर्णोत्तिष्ठः पुरुषस्तथा धूमव्यापी सप्तजिह्वो धनुर्द्धराश्मीरितः अंगमं
त्राः क्रमादष्टमूर्तिश्चापि प्रविन्यसेत् मूर्द्धांसपार्श्वकट्यंधुकुटिपार्श्वांसकेषु च· पादक्षिण्येन विन्यसेद्यथावद्देष्टि
कोमतः जातवेदाः सप्तजिह्वो हव्यवाहन एव च अश्वोदरजसंज्ञश्च स वैश्वानर एव च कौमारतेजाश्च तथा विश्वदे
वमुखाह्वयौ· स्युरष्टमूर्तयो वह्नेरग्नये पदपूर्वकाः प्रणवादिनमोन्ताश्चेति प्रादक्षिण्येन शिरश्चारभ्य वामांसादि
क्रमेण दक्षिणांसावधि न्यसेत् इति अधुलिंगगुदमिति केचिन्मुखेशाहुः प्रत्येकं स वध्यते· कौमारः स्याद्द्विमुखो
देवमुखस्तथेति शारदातिलकवचनात् उत्तरतंत्रे प्रादक्षिण्यक्रमेणैव समिध्यचतनोज्ज्वलेः मेखलोपरि संस्पृष्टैः
पुनर्दर्भचतुष्टयैः दिक्क्रमेण परिस्तीर्य दिव्यैर्दीवर्जमात्मवित् निधिपेत्परिधीन्ब्रह्मविष्णुशास्तत्र पूजयेत् दर्भच
तुष्टयैः प्रागुदगाग्रैः पूर्वाग्रैः दक्षिणाग्रैश्च दर्भैरग्निं परिस्तरेदिति गणेश्वरपरामर्शिनीवचनात् प्रागाग्रैरथ दर्भैर्धनदक्षिणा
ग्रैः परिस्तरेत् ऊर्ध्वमिति भैरवीतंत्रवचनात् त्रिमेखलकुण्डे मध्यमेखलायां परिस्तरणं परिधिप्रदेशः काष्ठैः तदुक्तं या
मिनीतंत्रे एकमेखलके कुण्डे मेखलाधः परिस्तरेत् द्विमेखले द्वितीयायां मध्यमायां त्रिमेखले मितिः· ननु पश्चिममे

वि॰१२
ली॰व

१८२

182

खलासंलग्नतयानालस्यविद्यमानत्वान्मध्यमेखलायांपरिस्तरणपरिधिप्रक्षेपः कथंभवेदित्याकांक्षायामाह उत्तरतंत्रे ।ना
लमेखलयोर्मध्येपरिधेः स्थापनस्यतु । तथंकुर्यात्तथाविद्वान्मध्यमस्यमेखलोपरीति । स्थण्डिलेसिकतानांचाप्येषविन्यासे
न्यपरिधीतिच पैंद्रीवज्रपरिधीदक्षिणेदंडिनिसंबंधः दक्षपश्चिमदक्षिणोत्तराद्भु । स्पविष्टोमध्यं । प्रणीयाग्न्यायीयानद
क्षिणार्थकनिष्ठोप्यत्रसिद्धउत्तरार्थइति । स्वाचितत्वात् पश्चिमेउत्तराग्रंमन्ययोः पूर्वाग्रंचेति दक्षिणामूर्तिसंहितायां प्रणीता
प्रोक्षणीयुग्ममेजलंचास्यहस्तेनतयेति । तमाचम्यायनप्रकारमाह : कुंभसंभव । आज्यानायमपिविधिवत्परिस्तीर्यकुशान्तरैः स्व
गृह्योक्तविधानेनवायुदेशादितोमुने पात्राण्यासाद्यविधिवदियंततत्रेणमंत्रवित् तान्यवेक्ष्यपवित्रेणचोत्तानानिविधायच ।
पुनःप्रोक्षणतेषात्रपरिशुद्धभावुना दत्वातत्तान्यविचवतदमृयनिधापयेत् दिक्षुतरस्यांतस्यात्रप्रणीतेस्युचाततुष :
ततःकिंचित्प्रणीतातुप्रोक्षणपाधायतज्जले : यज्ञसाधनसंभारंप्रोक्षयेन्मूलमंत्रतः उत्तरतंत्रे । आसनंचततोवन्हेः कल्प
यित्वाप्रपूजयेत् आसनंयोगपीठंचप्रयोगेवत्पने । तथा कोणषट्केचमध्येचजिह्वाभिः केसरेषुच अंगमंत्रैस्ततोवा
ह्येचाष्टभिर्मूर्तिभिःक्रमात् ततोऽग्निमनुनातेनमंत्रीमध्येच संयजेत् वैश्वानरजातवेदप्रोक्ताद्देवावहोतिच लोहिताद
पदंसर्वकर्माणीतिसमीरयेत् रूपांत्र्साधयेत्तेनवह्निजायांतिकोमनुः मंत्रसर्वाणिपदानिसंवुध्यंतानितेयानि त्रिन
यनमरुणस्त्रग्वद्धमौलिंसप्तजिह्वाश्मकमनरणमनेकाकल्पमंभोजसंस्थंअभिमनवरशक्तिःस्वस्तिकाभीतिहस्तंनमतक
नकमालालंकृतांसरकृशानुं जिह्वाज्वालासच : प्रोक्तावरामप्यत्वनानिच अंगानिमूर्तयः शक्तिस्वस्तिकोद्यनदोहृयः ॥
कोणषट्केचमध्येचेतिसंबंधः तडकसोमपाभौः रूद्देदवह्निमांसादवरुणानिलगोचरे हिरण्यायास्थितावह्नेरसनाःष
उत्क्रमात् मध्यतोवह्निरूपास्थितिः गणेश्वरपरामर्शिनां । मध्येचकोणषट्केचजिह्वाः समयजेत्ततः हिरण्यात्तमहे

माभा म्लपाणि दिशि स्थिता । वैदूर्यवर्णा कनका याम्यां दिशि समाश्रिताः तरुणादित्यसंकाशा रक्ता जिह्वाग्निसंस्थिता ॥ कृ
ष्णांजनचयप्रख्या नैरृत्यां दिशि संस्थिता ॥ सुप्रभा पद्मरागाभा वारुण्यां दिशि संस्थिता । अतिरिक्ता जपाभासा वायव्यां दि
शि संस्थिता बहुरूपा यथार्थाभा दिशेशान्तरमध्यगा । नारदपंचरात्रे प्रभा दीप्ता प्रकाशा च मरीचिस्तापिनी तथा करा
लालेलिहा चेति कुण्डे त्वाप्ये व्यवस्थिता । ईशाद्वीग्निदिग्भागे प्रभाद्यं त्रितयं स्थितं रक्षोवारुणवायव्ये मरीच्याद्यं त्रयं तथा
सौम्ये च मध्यमे याम्ये स्थिते कालेलिहाभिधाने । हिरण्यादीनामिव नामान्तराणि प्रभादीनि । यद्वा । वैष्णवयागे त्वेताः स्वतं
त्राः तथा वायवीयसंहितायां हिरण्या प्रागुक्तजिह्वा कनका दक्षिणे स्थिता । रक्ताग्नेयी नैरृती च कृष्णा सौम्या सुप्रभाम
ताः इति । अतिरिक्ता मनुजिह्वाः राजस्य स्तम्भमुख्यसम्बद्धते । केचित् । कुण्डस्य मध्ये स्वयम्भा प्रशस्ता जिह्वा हिरण्या
भुवि कामे णास्तेः स्तंभनादिषु मता कनका तद्वर्णादिषु मता वेला तिरिक्ता मारणे विनाद्भिन्ना भुवि क्तस्ता सुप्रभा युध
चरे विद्वेषणे त्वा । उच्चाटने च रक्ता ताः इति वदति । ज्वालावच इति जिह्वानां ध्यानं जिह्वाः सर्वाः परिज्ञेयाः ज्वालामालाः स्व
रूपतः इति प्रयोगसारवचनात् एता ज्वालारूपा वा वीताः वराभयधृता अपीति गणेशपरमार्थिनी वचनाच्च । प्रपंचसा
रे । संस्कृतेन च तेनाभियोतनोद्योतनेन च वाचालस्पन्तं तं रेते न जुषयान्मनुना त्रिशः अभियोतनेनोद्योतनाख्येन संस्कृतो
रहयसंस्कृतेनेति संबंधः अपरे तु संस्कारान्तरमप्यंगीकुर्वन्ति । पिंगलामते । कुण्डे चाष्टादश ज्ञेयाः संस्काराः शिवशा
स्त्रतः हुते तत्त्व चित्त्वे चाष्टाविति । उत्तरतंत्रे । समादाय हुतस्थालीमस्त्रमंत्रेण सेचयेत् हुते तत्र समाहृत्य दर्भाणां दक्षिणादि
षु संस्कृतं वायव्ये वा हुतौगारान्कृतानेषु रुद्रान्न्यसेत् तापनं तु समहृद् हृद्कपाहृयमतः क्षिपेत् आज्यप्रज्वालितं वह्नौ वि
न्यसेन्नत्तत्तान्वितं पवित्रीकरणं दर्भद्वयेन ज्वलितेन च । वर्मणा ज्यचनीराज्य वह्नौ दर्भद्वयं क्षिपेत् अभियोतनमत

वि॰ १२
ती॰ व
१५

स्मादभिद्योतनमुच्यते॰ कुशं प्रज्वलितं चाग्नेर्दर्शयेन्महृदाग्निवितं पवित्रीकरणं दर्भद्वयेन ज्वलितेन तु॰ वर्मणाज्यं च नीराजयेद्वह्नौ
दर्भद्वयं क्षिपेत् अभिद्योतनमेतत्स्मादभिद्योतनमुच्यते कुशं प्रज्वलितं वह्नौ विन्यसेन्महृदा क्षिपेत् वक्त्रावुद्धासवद्धृतमं
गारानग्निंर्भ क्षिपेत् आपः संस्पर्श मंत्रत्तः कुर्यादुत्प्लवनं ततः अस्त्रमंत्रं जपन्मन्त्री कुशौ प्रादेशमात्रकौ अंगुष्ठानामि
काभ्यां च गृहीत्वा हृतमुत्प्लवेत् ततो रुद्रा कुशाभ्यां तु स्वाभिमुख्येन संप्लवेत् हृतेनन्स्पा संप्लवनं षट् संस्काराः प्रकी
र्तिताः आज्यमिति॰ उक्तमंशोहृतं प्रोक्तमध्ये मम हि षीभवं अथ मंत्रागलीजातेन तस्मात्कर्म प्रशस्यते इति पिंगलामते
नोक्तं वीक्षणादिसंस्कृतं हृतमाशय्यमूलमंत्रेणाभिमंत्र्य॰ धेनुमुद्रयामृतीकृत्य पश्चादुक्तसंस्कारैः संस्कुर्यात्
उक्तं शैवागमे॰ गव्यमाज्यं समादाय मूलमंत्राभिमंत्रितं स्वकांब्रह्ममयीं मूर्तिं संचिन्त्य परितापयेत् वायवीयसं
हितायां अस्त्रमंत्रेहृतेन मुद्रां दशयेद्धेनुसंक्तिनामिति वाल्यनः कुण्डस्यासादितिशेषः प्रज्वालितकुशद्वयेन हृदाज्ये द्योति
पेत् इत्यन्वयः नीराजनमभिनः परिभ्राम्य दर्भद्वयं दर्भाणामग्रोप्रक्षेपः प्रतिपत्तिकर्म॰ अनयैव मंत्रोपि नोक्तः॰ तत्र
दर्भनाशोस्तीति॰ अकृतेपि प्रक्षेपेन वैगुण्यमिति अंगुष्ठानामिकाभ्यां हस्तद्वयेनेति शेषः उत्पवेदग्निसमुत्थमित्यर्थः
शैवागमे॰ प्रादेशमात्रदर्भाभ्यामंगुष्ठानामिकाग्रकैः हृताभ्यां संमुखं वह्नेः रक्षणोत्पवमेवाचरेत् उभयवह्नेप्रक्षेपणपव
कुशान्तो प्रतिपत्तिकर्म शैवागमे॰ गृहीत्वा स्रुक्स्रुवौ हस्ते मुखो वायोर्मुखो क्रमात् प्रत्यग्राग्रैस्त्रिधा दर्भमूलमध्या
ग्रकैः स्पृशेत् मूलमध्याग्रदेशेषु आत्मविद्याशिवात्मकं क्रमात्तत्वक्रमंन्यसेत् ह्रां ह्रीं हूं बीजकैः प्रिये स्रुचि शक्तिं स्रु
वे शंभुं विन्यस्य रुद्रयाणना॰ त्रिसूत्रवेष्टितग्रीवौ पूजितौ कुसुमादिभिः कुशानामुपरिष्टात्तु स्थापयेत्तौ स्वदक्षिणे
दर्भमूलादिभिः स्रुक्स्रुवयोर्मूलादिस्पर्शः स्पर्शमभिधायोक्तं उक्तं तंत्रे॰ तत आदाय वामेतो प्रोक्षयेद्धस्तपाणिना॰

भूयो ग्रैतैः प्रणाव्याथ कुशानग्रैर्निवेदयेत् प्रणावृत्तिश इति शेषः उक्तं पिंगलामते पुनस्त्रिशः प्रणाप्याथो मुखावग्रो
कुशान्क्षिपेत् मूलमध्याग्रकेष्वस्येच्छाक्रियारिच्छादिकाः क्रमादिति इच्छाज्ञानक्रियाः उत्तरतंत्रे कुशद्वयेहृतेष्वस्य नतः
प्रादेशसंमिते सग्रंथि कृत्वा साग्रौ होमस्रुक्स्रुवौ विचिंतयेत् पक्षौ वामदक्षौ दक्षेपिंगलां मध्यतस्ततः सुषुम्णां स
स्मरेत्तन्नाडीनतो होमं समाचरेत् सग्रंथिकुशद्वयमित्यन्वयः दक्षभागाज्जुहीत्वाज्यं स्रुवेणाज्यहृदाणुना जुहुयाद
ग्निनेत्रेषु स्वाहान्तमन्त्र येन ततः गृहीत्वा वामभागाच्च हुतेवामे त्रिलोचने जुहुयाच्च हृदासोमाय स्वाहेति च देशिकः
गृहीत्वा मध्यतस्त्वाज्यमग्रे वल्लिकलोचने रुद्राणेनाग्निं शोभाम्यां स्वाहेति जुहुयात्सुधीः दक्षभागाज्जुहीत्वा रुद्राज्यं
जुहुयात्सुधीः दक्षभागाज्जुहीत्वानलरुद्राज्यं जुहुयात्सुधीः वक्त्रे वक्त्रे स्विष्टकृते स्वाहेति च ततो गुरुः सर्वत्र रुन्मंत्रस्त्वा
ज्यग्रहणे ज्ञेयः शारदातिलके सनाभिर्व्याहृतिभिराज्येन जुहुयात्पुनः जुहुयाद्ग्निमन्त्रेण त्रिवारं देशिकोत्तमः
व्याहृतिभिर्यद्वा समस्ताभिस्त्रिस्त्रिभिः प्रपंचसागरे गर्भाधानादिका वक्ष्ये समुद्वाहावसानकाः क्रियास्तारेणैव कुर्यादा
ज्याहुत्यष्टभिः क्रमात् शारदातिलके गर्भाधानं पुंसवनं सीमंतोन्नयनं तथा वायवीयसंहितायां जातस्याग्नेवमाकारे
जातकर्म समाचरेत् नालापनयनं कृत्वा ततः सर्पाध्यसूतकं शिवाग्निरितिमावास्य कृत्वाहुतिपुरः सरं पित्रोर्विसर्जनं कृ
त्वा चूडोपनयनादिकं अथोद्वाहावसानं यत्कृत्वा संस्कारमस्य त्विति शिवाग्निरिति शेषः अन्यत्रतु नारायणाग्निर्गाग्नि
रित्यादि उत्तरतंत्रे गर्भाधानं पुंसवनं सीमंतोन्नयनं तथा जातकर्म ततो नामकरणं चोपनिष्क्रमं अन्नप्राशनचौलोपनयना
नि ततः परं महानाम्न्यं महाशैवं व्रतं च तदनंतरं ततोपनिषद्व्रतं गोदानं तदनंतरं समावर्तनमुद्वाहसंस्कारामरणांति
काः क्रूरकर्मणि कर्तव्या मरणं नाम्नि देशिके पंचत्रयीपदयाथामारदपंचरात्रे मणिवर्णमत्त्वार्यतः कर्म समाचरेत् स

वि·१२
ली·व·
१८५

पादयामित्याहेति सर्वकर्मस्वयं विधिरिति सौत्रामणीतंत्रे विवाहं नानाप्रभवेनेसमुक्तं तदेतयोर्विकल्पः उत्तरतंत्रे· विवाहानं
तरं प्रभृत्येव वह्निः पितरो संयोज्यात्मनि मंत्रवित् इत्युक्तं सौधामंत्रपंचांतंयेनैवं तथा· आग्येतेहुतंतसंक्षिष्टाः पंचाशत्स
मिधो हुनेत् जुहुयादृसतां गाष्टमूर्तिमंत्रैः सकृद्धृतैः गणेश्वरपरामर्शिन्या ततो जुहुयाद्गामंत्रायैस्त्रसकृत्सकृत् त
न्मामांतेति पितथीः स्वाहांतेस्त्र यथाक्रमं विस्तधर्मोत्तरे· मंत्रेणोंकारपूर्वेणस्वाहांतेनविचक्षणः स्वाहावसानेजुहु
यात्तयन्त्वेमंत्रदेवतामिति श्रुतिरपि· यस्यैदेवतायैहविर्गृहीतंस्यात्तां मनसाध्यायेद्वषट्करिष्यन्निति· स्वाहांतमंत्र
स्तु तदंतोनकर्तव्यः उत्तरतंत्रे· चतुर्वारंस्त्रुवेणाज्यं गृहीत्वाप्सुचिनिः क्षिपेत् तेनैवतांपिधायाथैहुनेन्त्रिष्टप्नुरु
स्वयं वषडंतेन वह्नेस्तु मनुनास्वपदेनतु प्रपंचसारे· जिह्वायामध्यसंस्थायामश्रीज्वालावलीततो· तारादैहृ शभिर्मं
त्रैः पूर्वपूर्वसमन्वितैः मनुनागाणपत्येन हुनेत्सर्वदसाहुतीः आज्येनसाध्यमनुनापंचविंशतिसंख्यकं जुहु
यात्सर्वहोमेषु सुधीरनलतत्परे तांत्रिकानाममंत्र्यासोहुतानासमुदीरिताः गाणपत्येन· गणेश्वरपरामर्शिन्या म
महागणेशमंत्रेण पूर्वपूर्वयुतेनच तारादिबीजषट्केषु करणेष्वद्विवर्णकैः भिन्नेनदशधानेनसमस्तेनहुनेत्प्रिये· सं
त्रः प्रयोगेवक्ष्यते इष्वव्ःपंचवाराणीनींद्रियाणिपंच अद्रयःसमःबीजषड्क इत्युपदच्छेदः चरुहोमेनुचरुमिदानीं अपये
त् नमस्कारः प्रागेवप्रपंचितः उत्तरतंत्रे· संपूज्यदेवतापीठंवह्नौसम्यक्हुतोगुरुः अग्निरूपधरात्तत्रपूजयेदिष्टदेव
तां आज्येनसाध्यमनुनापंचविंशतिसंख्यकं हुनेत्सप्तजिह्वास्यमुखवह्नैकीकरणंमतं आत्माभिदेवतानांचचिंतयेत्त्र
कामात्मवित् एकादशाथमूलेनहुनेदाज्येनचाहुतीः नाडीसंधानमेवहिप्रोक्तंदेशिकसत्तमैः अंगप्रसत्याहुतीना
मेकैकामाहुतिंहुनेत् पूर्वादिदिक्कुंडेषु सर्वेष्वपि यथाविधिः गुरुर्वह्निप्रविहरेत्संस्कृतेषु हुतवर्त्मना· सर्वर्त्विज

स्पंदनाद्यैः संपूज्य प्रोक्तदेवतां सर्वावरणसंयुक्तां मूलेन जुहुयात्ततः पंचविंशतिधा सर्पिः संयुतेन पयोऽमसा । वायवीसंहि-
तायां स्रुवेणाज्यं समिदाद्यं स्रुवा शेषकरेण वा । तत्र द्रव्येण होतव्यं तीर्थेनार्षेण वा तथा छंदोगपरिशिष्टे । दैवेन तीर्थेन
बहूयते हविः स्वांगादिगिस्त्वर्द्धिर्षितं त्वच पावके । ध्यानविषिज्ञहोमस्तु ग्रीष्मगादिराणिच मानवः । मंदाग्निरामयावी च दरिद्र-
श्चोपजायते । तथा प्रपंचसारे । हुनेत्त्वदेशिकः पश्चात्मण्डले बलिमाहरेत् । नक्षत्राणां सवाराणां सराशीनां यथा
क्रमं दद्याद्बलिं गंधपुष्पधूपदीपकमादरात् । नाराणीमाम्बन्यादीनां राशिः पादाधिकं द्वयं मेषादियुक्तानतत्र संज्ञा
पूर्वमनंतरं देवताभ्यः पदं प्रोक्तादिवानक्तं वदेत्तथा चादिभ्यश्चाथ सर्वेभ्यो भूतेभ्यो वै नमो वदेत् । एवं राशौ तु संपूर्णेन
तद्वत्प्रयोजयेत् । तथा राशयधिपानां च ग्रहाणां तत्र तत्र च समानां करणानां च दद्यान्मीनाक्रमेषयोः अंतरांतर्बलिस्त्वष
संप्रोक्तः कल्पशात्मकः । पुनर्निवेद्य मुहूर्त्तं पूर्ववत्परिहृत्य च सुखावासादिकं दत्वा दद्यान्नयुक्तया पुनः । स्तुत्वा यथाव-
त्प्रणमेद्भक्तियुक्तस्तु साधकः । मीनाक्रमेषयोरंतराले ईशानपूर्वदिशोर्मध्ये । तथा तैत्रेराज्ञे । प्राच्यां मेषवृषौ वक्रौ मिथु-
नं दक्षिणे तथा कुलीरसिंहौ च तथा नैर्ऋत्यां कन्यका स्थिता । तुलाकीटौ पश्चिमतो धनुर्वायौ तु संस्थितं । नक्रकुंभावुत्तर-
तो मीनमीशाने संस्थितमिति इति श्रीविद्यार्णवे द्वादश श्वासः ॥ १२ ॥ उत्तरतंत्रे समुत्थायोषसि तिलैर्जुहुयुः सर्पिरन्वितैः
पुनः साध्येन मन्त्रेणाष्टोत्तरसहस्रकं द्रव्यैर्विधानमोक्तैर्वा जुहुनेदष्टाधिकं शतं । स्निग्धं स्नानं पंचगव्यं पाययेन्मंत्रवित्तमः
ज्ञागज्ञभ्यामाशमानीय दिव्यहस्तावलोकयेत् हस्तपुण्डरीकाद्येन मंतस्वात्मनि योजयेत् आचार्यस्तु तत्प्रधानं षड्विंशो-
धयेत्क्रमात् तेकलातत्वभुवनानिपदामंत्रपूर्वकाः प्रधानः षट्च संप्रोक्तास्तेषां लक्षणमुच्यते कलानिवृत्तिप्र-
मतोस्तद्धापंचकीर्तिताः शैवादितिगमैर्भिन्नास्तत्वा यानी व क्रमाः तत्र शैवानि तत्वानि षट्त्रिंशत्प्रमितानपि । वदा

वि॰ १३
लि॰ व
१८५
185

तेशिवशक्तीचसदाशिवश्चेतीरितः विद्याचेतानिशुद्धानिशुद्धाशुद्धानिसप्तच मायाविद्याकलारागःकालोनियतिरेवच पुरुषश्चाथ
शुद्धानिप्रकृतिर्बुद्ध्यहंकृतिः मनःश्रोत्रेन्द्रियदशकंतन्मात्राभूतपंचकं उक्तानिशिवतत्त्वानिषड्विंशान्मंत्रवेदिभिः इति ग्रथवैसवतत्त्वा
नि॰ द्वात्रिंशत्तानिमानिच वक्ष्यतेजीवसहितः प्राणोबुद्धिर्मनस्तथा दशेन्द्रियाणितन्मात्राभूतानांपंचकंतथा इत्येतेजसांचैव
त्रयंचस्यादेवच वासुदेवादयःसोराण्युच्यतेभूतपंचकं तन्मात्राश्चेन्द्रियाणिस्युर्मनोहंकारबुद्धयः प्रधानंचेतिशक्तिस्तत्त्वानि
स्युर्दशैवहि॰ आत्मविद्याशिवाख्येनेविपरीतात्मपवच सर्वतत्त्वंचसंप्रोक्तास्तत्त्वाध्वानस्तुदेशिकैः भुवनानीहसर्वाणिभु
वनाध्वाप्रकीर्तितः भुवनानिलोकाः तन्त्रकुलार्णवे॰ अतलोवितलश्चैवसुतलश्चमहातलः रसातलश्चतदनुतलातल
इतिस्मृतः पातालोभूर्भुवःस्वश्चमहर्जनतपाकयाः सप्तलोकश्चसंप्रोक्तालोकापतेयथाक्रमं आदिक्षांतास्तथावर्णाश्च
र्णाध्वानंप्रचक्षते पादाध्वावर्णाहंदस्मात्मनाधापदसंचयः शिष्येतस्मरेन्नान्यादोधुनाभिहृज्ज्वालमूर्द्धसु॰ हुंबीजेनचतुरः शि
ष्यस्यशन्कुणेश्वकेक्रमेण तिलैर्हुत्वाद्येस्तारायमन्त्रकाधानमंत्रच शोषयामिद्विठांतेनमंत्रेणाष्टाक्षरीः पृथक् कुला
र्णवे॰ शूद्रसंकरजातीनांनाधर्माद्विर्विधीयते पादोदकप्रदानाद्यैः कुर्यात्पापविमोचनं तथा॰ षडध्वनःक्रमात्सम्यकूप्र
विलाप्यशिवावधिः सृजेत्स्रष्टाविलीनांस्तान्शिवांतान्गुरुत्तमः देशिकेंद्रश्चतंशिष्यंहस्ताद्धस्ताचदिव्यया॰ तत्रैवतन्त्रस्थितं
तस्मिंस्तस्मिन्नेवनियोजयेत् क्रमेणमहाव्याहृतिभिस्ततोदेशिकसत्तमः अगप्रभत्याहृतीनांक्रमेणकुर्याद्धुतेनवैः भूरग्नयेचप
श्राद्यपृथिव्यैचयुतोमनुः स्वरादित्यायचदिवेचयुतोमनुरीरितः भूर्भुवःस्वप्रजापतयेभ्यश्चपूर्वतः दिग्भ्यस्ततोवदे
देषमंत्रःप्रोक्तस्तुरीयकः महतेचद्विठांताःस्युर्महाव्याहृतिमंत्रकाः महतेश्चतिपदंभूतिमादिचतस्रस्तथैवेति द्विठःस्वा
हाकारःब्रह्मार्पणाख्यमंत्रेणसर्वकर्मच्छिदेसुधीः जुहुयादाहुतीरष्टौकेवलाज्येनमंत्रवित् वदेदितःपरश्चैवप्राणबुद्धि

स्ततो वदेत् देहस्थमौपाधिकारं वजायताम्मसत्स्वप्नमिति वदेत्तवस्यामनमनसावाचापदमुद्धरेत् कर्मणाचैवहस्ताभ्यांपद्भ्यामुत्क्रोदरे
णाच वदेच्छिखाचयच्छेद्देसस्तेनयत्पदमुच्चरेत् ॐकंचयत्कृतंतच्चसर्वंब्रह्मार्पणंभवं तस्माद्धोतव्यंसंप्रोक्तो ब्रह्मार्पणमनून्नमः
कृत्वा शरणागतिमंत्रीत्यृचामूलाणनानतः ब्रह्मार्पणमंत्रः प्रयोगेस्पष्टीक्रियते कपिलपंचरात्रे अर्चयित्वायथान्यायंजुहु
याद्धैष्णवः सुधीः स्नात्वातिरिक्तपूर्णार्थेद्दामिमहत्तनेतिल विल्ववीजसमुच्चार्यसांगंकुरुकुरुद्विठः यानुलोमाष्टकंवर्णषष्ठो
पांतस्वराकुलम् प्रणवेनसमायुक्तं विल्ववीजं प्रकीर्तितं यानुलोमाष्टकंहकारः षष्ठस्वरउकारः उपांत्यस्वरोविंदुः शैवा
गमे कृत्वान्तसउनामाग्निमभ्यर्च्य प्रयतः पठेत् सहस्रार्चिर्महातेजानमस्तेवज्ररूपधृक् सर्वाशिने सर्वगतपावकायनमो
स्तुते त्वंरौद्रोरौद्रकर्माचघोरहात्वंनमाम्यहं विल्वंत्वंलोकपालोसिशांतिमत्रप्रयच्छमे सर्पिषास्तुचमापूर्यशुष्कवाप्य
थोमुखं स्तुपरिस्तुचदत्वापुष्पंतत्रप्रतापयेत् सव्यान्यकराभ्यांचसंपुटाभ्यांचशंखवत् संगृह्योद्घायसत्यस्त्रनाभौति
ष्ठिन्धायच पूर्णादर्वीतिमंत्रेणमूलेनचसंयतः दद्यात्पूर्णाहुतींतस्य सर्वकामप्रपूरणीः पुष्पदानंस्तुपरि
वायवीयसंहितायां ततोहोमावशिष्टेनहुतेनाप्यर्थ्यवैरूकं निधायपुष्पंतस्याग्रेस्तुवेणाधोमुखेनतो सदर्भेणसमाछा
द्यमूलेनांजलिनानतः वौषडंतेनजुहुयाद्धाराजपसमन्विता पूर्णादर्वीतिशिखाविशेषेवैदिकहोमे मूलेनवौषडंतेनस्वा
हाकारंततोहोमेपूर्णायांवौषडेवहीतितदीयवचनात् कृत्वाचहविषाद्द्यात्त्रवाशरणागतित्रयं वौषडंतेनमंत्रेणवैस्रवेन
स्तुरोत्तमइति हयशीर्षपंचरात्रवचनाच्च हुतभावेनतुनारदपंचरात्रे अभावेत्तुहुतस्यैवहोमद्रव्येणपूरयेत् तस्योपरि
हुतंदद्यात्तहृदिकुसुमादिकमिति देवीहोमेतुपूर्णायोगे आज्येनस्रुवमापूर्य्यतेनाप्यर्ध्यस्रुवेनतः तदर्हेयोमुखेकृत्वास्रुव
मुत्थायमंत्रवित् कन्यकायतत्रयोमूलेनाभिमूलेनिधायच मूलेनमोतमुच्चार्यवामपादपूर्वः सरं दद्यात्पूर्णाहुतींमंत्री

परामृतविधानेनइति गणेशस्यपरामर्शिन्यां ओंओंओंवह्नेमहाशक्तेसर्वकर्मप्रसाधक · कर्मान्तरेऽपिसंप्राप्तेसान्निध्यंकुरुसादरम्
इतिमंत्रेणसंप्रार्थ्यवह्निमुद्वास्योद्वासयेदपीति उत्तरतंत्रे पुनःसंहृत्यगाथायैर्मूलमंत्रेणमंत्रवित् कुण्डान्नुद्वास्यचाचार्योदेवता
कलशेन्यसेत् सांगांसावरणांतत्रपूजयेच्चयथाविधि समभ्याहृत्यग्निजिह्वादीनामेकाकृतिक्रमात् कृत्वाद्भिःपरिषिंच्या
ग्निमिति कपिलपंचरात्रे ततोब्राह्मणमुद्वास्यब्राह्मणायप्रदापयेत् द्वाविंशत्पलतामेणनिर्मितंताम्रपात्रकं तण्डुलेनसमा
पूर्यसहिरण्यंसदक्षिणं गुरुर्हेतायतन्नस्मैपूर्णपात्रंविदुर्बुधाः उत्तरतंत्रे · संयोज्यात्मनिमंत्रवित् ततःपरिस्तरानग्नौ
परिधीन्निक्षिपेत्ततः · नित्यनैमित्तिकेतांस्तुक्षिपेद्देशिकसत्तमः वस्त्रेणानेनमंत्रेणशिष्यनेत्रेनिबध्यच कुण्डाद्दक्षसमा
दायनयेन्मण्डलसन्निधौ · स्रमनोभिःप्रपूर्याथास्याञ्जलिंक्षिपेद्घटे मूलमंत्रोच्चारपूर्वंदेवताप्रीतयेगुरु नेत्रबंधमपास्याय
वेशयेत्कुशसंस्तरे तत्रस्थपाठयेच्छिष्यंमंत्रमेनंगुरूत्तमः अज्ञानतिमिरांधस्यज्ञानांजनशलाकया · चक्षुरुन्मीलितंयेनत
स्मैश्रीगुरवेनमः अतःपूजाविधानेनसंहारेणनयेच्चतं तान्मन्त्रकाशिषोद्देहन्यासान्सर्वान्प्रविन्यसेत् अभ्यर्च्यपंचोपचा
रैःकलशस्थेष्टदेवतां तेषाक्रमवर्त्मनातत्रसकलीकृतिमाचरेत् अथोपवेशयेच्छिष्यंभूषितंमण्डलांतरे कुंभास्यस्थस्त
वर्त्मस्वमूर्ध्निन्यस्यशिखांगुरुः अथपंचनिनादैश्चविप्राशीर्वचनैःसह सुस्थितंनियतात्मानंसिंचेत्कलशपुष्करैः येनयेन
प्रकारेणपूराशरितस्थापारसः तोयैरक्तरसंयुक्तैर्घटस्तेनेववर्त्मना तथैवेनंचाभिषिंचेदाम्नुसंपदवाप्नुयात् गृहीत्वाभ्यवि
तंपूर्वकरकंन्यस्तरूपिणं ततोयैरभिषिंचेत्तंरक्तायैदेशिकोत्तमः जलेनशिष्टेनशिष्यंगुरुराचामयेत्ततः तद्देवतास्वरूपे
चविदध्यात्सकलीकृतं वाससीविमलेरम्येपरिधायायाज्ञयागुरोः आचम्यानिकटेतस्यनिविशेद्वाग्यतःशिष्यः गुरुःसंपूज्य
शिष्यस्यदेवताभावयंस्तयोः पकांगुरुर्विनीतस्यसम्पन्नस्यमनंत्रिशः दत्वाकर्णेवदेद्विद्वान्विप्रायोदकपूर्वकं अनेनभ्यस्त

वदेद्देवमेवं मंत्री विचक्षणः अगस्त्यः स्वयंज्योतिर्मयीं विद्यां गच्छंतीं भावयेद्गुरुः आगतां भावयेच्छिष्यो धन्योऽस्मीति विशेषतः तथा
अष्टोत्तरशतं शिष्यः प्रजपेद्गुरुणोदितं अष्टाविंशतिवारं वा यद्वा शक्त्याथवा जपः गुरुदेवतात्ममंत्राणां प्रकाशो शिष्यो विभावये
त् प्रणतं विभवे कुर्यात्साधको भक्तिमान्गुरुः सोष्टांगमथवा पंचांगः पूजाकर्मसु संमतः हस्ताभ्यां चरणाभ्यां च जानुभ्यां
वक्षसा तथा मूर्द्धा हस्यां तथा वाचा चित्तेनाष्टांग ईरितः हस्तजानुशिरोवाक्यधीभिः पंचांग ईरितः आचार्याज्ञातः कुर्या
त्स्वयः शिष्यो विभावयच अलंकारांश्च वासांसि दद्यात् गलिभ्य आदरात् ईश्वरार्पणबुद्ध्या तु द्विजाशीर्भिश्च नंदितः प्रदद्या
द्गुरवे शिष्यो विचार्यार्द्धं तदर्द्धकं दशांशं वा प्रदद्याद्वा वित्तशाठ्यविवर्जितः तदधीनमना नित्यं तच्चित्तस्तत्परायणः तस्या
दाज्ञारजो भूयो भवेत्साधकसत्तमः तंत्रराजे गुरवे दक्षिणां दद्यात्स्वतत्त्वाय शिवात्मने सर्वस्वं वा तदर्द्धं वा तदर्द्धं वा तदात्मया
न चेत्तच्छक्तिसंक्रांतिः कथमस्य भविष्यति गजाश्वमहिषीमेषपश्वरासीमहीयुतं स्वर्णभूषणवासोभवनं चान्यदीप्सितं
दद्यात्स्वशक्तिभक्तितः ततो नानाविधैर्भक्ष्यैर्लेह्यैश्चोष्यैस्तथेतरैः ब्राह्मणान्भोजयेत्सम्यक् प्रदद्याद्दक्षिणां एवं क्रि
यामयी दीक्षा संबद्धात्र निरूपिता अत्रोदकपूर्वकमित्यनेन गोहिरण्यवन्मंत्रस्य प्रदानप्रतीयते दानं तु स्वस्वत्वापरित्यागपूर्व
कं विधिवत्परस्वत्वप्रतिपादनरूपं भवति तत्र स्वकार्यपि शिष्याय मंत्रं दत्वा पुनस्तं मंत्रं गुरुर्नजपति नाराधयति तद्वन्नरस्य
स्मै कस्मैचित्त्रदद्याति वचनं संप्रदायो वा न दृश्यते तस्मादुदकदानं त्वौपचारिकमिति वाच्यं तर्हि चतुर्णामपि वर्णानामुद
कदानं साधारणं कथं न स्यात् दीक्षायां विशेषाभावादौपचारिकत्वाच्च तस्मादुदकदानं मंत्रदानरूपमेव तत्र परस्वत्वापा
दने कृतेपि स्वस्वत्वापरित्यागराहित्यं तु कन्यादानवद्द्वित्वमर्हतीत्यास्तां विचारः अनंतरोक्तवर्णात्मदीक्षावत्सैव यथाविधिः
पुंप्रकृत्यात्मकत्वं हि वर्णानां समुदीरितं नादक्रांचशरीरस्य प्रोक्तमेवास्ति देविकैः ततस्तैतो शिशोर्न्यसेत्स्वहृणां देशिकसत्तमः

वि·१३
णि·व
१८७
(187)

संहरेद्दैवपरीक्षेण तद्वर्णानि तत्स्थानसंस्थितान् देशिकेंद्रः स्वसामर्थ्यादाज्ञया देवतात्मनः देवतात्माभवेच्छिष्यस्तदा संलीनतत्वकः तत
स्तु शिष्यचैतन्यं परात्मनि योजयेत् तानर्णांस्तत उत्पाद्य स्वे च्छिष्यशरीरके तस्मिञ्छस्सृष्टिक्रमतस्तच्चैतन्यं पुनर्न्यसेत् भवेच्छि
ष्यादेवतात्मा नित्यानंदात्मकः शिशुः ज्ञानदार्णमयी दीक्षा कथिता सर्वसिद्धिदा· अथोच्यते कलात्मा सा दीक्षा दिव्यतत्वदायि
नी· कलानिवृत्तिमुख्या भूतानां पंच चेरिताः शिष्यकाये भूतमये वेधयेत्ताः क्रमात्तथा पादादिजानुपर्यंते निवृत्तिः संस्थि
ता कला· भालाच्छिरोवधि प्रोक्ता शान्त्यतीता कला तथा एवं यथाक्रमतो विद्यान्वेधयेत्स्थानतो गुरुः स्थाने स्वीयाज्ञया चैवा
कलादीक्षा समीरिता अथ वेधात्मिकादीक्षा प्रोच्यते भवमोचनी चतुर्दले सरोजे तत्र मूलाधारे शिशोस्ततो यामत्रितयसंयु
क्ते त्रिकोणोत्कविलेः सुधीः त्रिरावर्त्तमयी देवी विद्युत्पुंजस्वरूपिणी महादेवमयी साक्षाज्ज्ञानमात्रस्वरूपिणी अणोरणीयसी
देवी चक्रषट्कप्रभेदिनी सुषुम्णागवर्त्मना दिव्या याती शिवं ब्रह्मपतिः· सा तत्वादीन्बलस्थार्णान्यश्च यानो समाहरेत् षड्दल
कमले तत्र लान्तवादीवर्णयुग्दले स्वाधिष्ठाने गुरुः सम्यक् योजिता तु वेधयेत् दंतार्णांतानये द्विसो विसृते नाभिपंकजे·
फांतडादिवर्णसंयुक्ते दिग्दले वेधयेत्स्वयं वर्णांस्तान्मोचयेत्कुंडे रुद्रं तत्र लयं सरोरुहे ठांतकाद्यर्णपत्राब्जे वेधयेदीश्वरो स्वयं वर्णांस्ता
नाहरेत्तस्मिन् कंठपद्मे च तं तथा कलामयदले पद्मे स्वरान् संयोज्य यत्नतः सदाशिवे च संयोज्य तान् भ्रूमध्यपद्मके द्विदले ह
संयुक्ते वेधयित्वा तु देशिकः हक्षौ तावाहरेद्विंदौ कलायामाहरेच्च तं कलां नादे समायोज्य नादं नादांतके पुनः नादांतमुन्मनी
मध्ये विष्णुवक्त्रे तथोन्मनीं विष्णुवक्त्रं स्वके चक्रे संहरेद्देशिकः स्वयं शाक्तास्तदेवमात्मानं नयेत्परशिवावधिः देशिकाज्ञा
वशाच्छिष्योदृग्याज्ञानस्तदादितो येन दिव्यामविज्ञानः सर्वज्ञो जायते ततः सदाशिवः स्वयं भूयात्तत्स्वमेव न संशयः ज्ञा
नप्रदा मयाप्रोक्ता दीक्षा वेधात्मिका शुभा चतस्रस्तेवमुद्दिष्टा दीक्षाः सम्यक्प्रभावदाः श्रीकुलार्णवे ह्सौः शिवः ध्यात्वा जपन्मूलं

का

गमालिंनी गुरुः स्पर्शेच्छिष्यतनुं स्पर्शदीक्षा भवेदियं वित्रंतत्वे समाधाय परतत्त्वोपबृंहितान् उच्चरेत्संहतान्मंत्रान्वाग्दीक्षेति निगद्य
ते निमील्य नयने ध्यात्वा परतत्त्वप्रसन्नधीः सम्यक्पश्येद्गुरुः शिष्यं दृग्दीक्षा सा भवेत्प्रिये गुरोरालोकमात्रेण भाषणात्स्पर्श
नादपि सद्यः संजायते ज्ञानं सा दीक्षा शांभवी मता ज्ञेयाः सिद्धान्तशास्त्रार्थविस्तारापि शिवाज्ञया किंचित्कालं विधायैनं तस्मि
ष्याय समर्पयेत् तस्यार्पिताधिकारस्य योगः साक्षात्सदाशिवे ततस्तु शाश्वती मुक्तिरिति शंकरभाषितं तस्मात्सर्वप्रयत्नेन
साक्षात्सदाशिवोदितं संप्रदायमविच्छिन्नं सदा कुर्याद्गुरुः प्रिये भुक्तिमुक्तिप्रसिद्ध्यर्थं परीक्ष्य विधिवद्गुरुः पश्चादुपविशेन्म
न्त्रं अन्यथा निष्फलं भवेत् अन्यायेन च यो दद्याद्गृह्णात्यन्यायतश्च यः ददतो गृह्णतो देवि कुलशापो भविष्यति गुरुशिष्या
वुभौ मोहादपरीक्ष्य परस्परं उपदेशं ददन्गृह्णन् प्राप्नोति पिशाचतां अशास्त्रीयोपदेशं तु यो गृह्णाति ददाति च भुंजाते ता
वुभौ घोरान्नरकानेकविंशति प्रसह्य स्वोपदेशं तु यः करोति विमूढधीः विनश्यति च तन्मंत्रं सैकते शालिबीजवत् अनर्हे च
स्वविज्ञानं न तिष्ठति कदाचन तस्माद्विपरीतं वक्तव्यमन्यथा निःफलं भवेत् स्वच्छिष्यायाति भक्ताय यज्ज्ञानमुपदिश्यते
तन्नापयाति तत्त्वं गोक्षीरान्न घृतं यथा धनेच्छाभयलोभाद्यैरयोग्यं परिदीक्षयेत् देवताशापमाप्नोति कृतं च विकृतं भवे
त् अथ पूर्णाभिषेकविधिर्लिख्यते उत्तरतंत्रे- पूर्णाभिषेकं वक्ष्यामि साधकानां शुभावहं विना येनाभिषेकेण साधकः पूर्ण
बोधतां आचार्यत्वं समाप्नोति सद्गतिं च समीहितां तस्माद्गुरुः प्रियं शिष्यं बोधयित्वाभिषेचयेत् विरच्य विपुलं चक्रं मण्डपेऽति
मनोरमे खारीतोयभृतं कुंभं स्थापयेच्च क्रमधातः अमेयकलशान् रत्नवस्त्रहेमसमन्वितान् दलेषु विधिवत्स्थाप्य तत्रा
वाहयेष्टदेवतां अभ्यर्च्य मध्ये चान्येषु चांगावरणदेवताः शिष्यस्य जन्मनक्षत्रे प्रागवक्त्रेरभिषेचयेत् अथ पूर्णाभिषेकः सा
साधकाभीष्टसिद्धिदः खारीलवणं तत्स्कंदपुराणे पलद्वयं प्रस्तं तु कुडवं त्रिगुणं मतं चतुर्भिः कुडवैः प्रस्थमाढकं तैश्च

वि० १२
णी० व०
१८८

188

तर्पणैः चतुर्गुणेन भवेद्धोमः कुंभस्तु हुयतः स्मृतः कुंभैस्त्वेरष्टभिः खारीति अथ दीक्षाप्रयोगः तत्रैवं विचार्य विहितकालेषु दीक्षादि
नात्पूर्वदिने शिष्यः प्रातः स्नानः कृतनित्यक्रियः समलंकृतः पंचवाद्यघोषपुरस्सरं ब्राह्मणैः कृतस्वस्तिवाचनः प्रियः सुहृद्भिः सा
र्द्धं स्वयं गुरुगृहं गत्वा तं विधिवत्प्रणम्य तदाज्ञया प्राणायामपुरःसरं ॐ अद्यामुकमासि अमुकराशिगते सवितर्यमुकपक्षे अमु
कतिथावमुकगोत्रो ब्राह्मणोऽहममुकशर्मा तत्तच्छाखाध्यायी अमुकवर्मा वैश्यः अमुकगुप्तः शूद्रोऽमुकदासोऽहं चतुर्विधपुरुषार्थसि
द्धिकामोऽमुकमंत्रग्रहणं करिष्ये । इति कुशहस्तः प्राङ्मुख उदङ्मुखो वा संकल्पं विधाय । प्रमाणोक्तमधुपर्कसामग्रीभिः
स्वशाखोक्तविधिना श्रीगुरुं मधुपर्केणाभ्यर्च्य धौतोत्तरीयप्रच्छदपटस्वर्णांगुलीयककर्णाभरणस्वर्णयज्ञोपवीततोहार
केयूरांगदादिनानाभरणछत्रचामरोपानद्युगलशय्यातल्पास्तरणसप्रावरणसामग्रीं गुरुसन्निधौ निधायायेत्यादिशा ऽ
खनिष्ठुत्येवं तं अमुकगोत्रोऽमुकशर्माहं यथावर्णविहितमुपाख्याहं चतुर्विधपुरुषार्थकामोऽमुकमंत्रग्रहणार्थममुक
गोत्रममुकवेदांतर्गतामुकशाखाध्यायिनममुकशर्माणं यथाशक्ति विहितवरणसाधनैर्गुरुत्वेन वृणे । इति गुरुपादयोः
प्रणम्य । वरणसामग्रीं निवेदयेत् ततो वृतोऽस्मीति गुरुणा प्रतिवचने दत्ते शिष्यः कृतांजलिर्यथोक्तं कर्म कुरुष्वेति ब्रूयात्
ततो गुरुः करवाणीति प्रतिब्रूयात् इत्थं गुरुवरणं विधाय ततस्तत्रयः श्रोत्रिया ब्राह्मणा वेदवेदांगपारगान् स्वेष्टदेवतोपास
कान् प्राग्गुरुवरणोक्तसामग्रीभिस्तथैव ऋत्विक्त्वेन वृणुयात् चतुः कुण्डीपक्षे चत्वारः पंच वा ऋत्विजः कार्याः ततः शिष्येणैव
वृतो गुरुः कृतनित्यक्रियः समलंकृतः पंचवाद्यघोषपुरःसरं ब्राह्मणैः सुहृज्जनैश्चावृतः शिष्येण सह मण्डपं समागत्य वास्तु
माणविधिना द्वारश्रृंगा विधाय । तत्रैव भूतोत्सादनपूर्वकं मण्डपांतः प्रविश्य तत्रैव पंचगव्यार्घ्यतोयप्रोक्षणपूर्वकं वस्तुमा
णवीक्षणादि चतुर्भिः संस्कारैः संस्कृत मण्डपाभ्यंतरे चंदनागुरुकर्पूरधूपिते चंदनघर्षपहर्वीभस्माक्षतलाजान्स्वमंत्रेण

सम्प्रथाभिमंत्रितानमण्डपांतर्विकीर्य्यास्त्रमंत्रेणकुशमुष्टिनासंमार्ज्यमण्डपस्यैशानकोणेसंस्थाप्य ब्राह्मणैः पुण्याहवा
चनेकारयित्वावास्तुपुरुषपूजादिकंविधाय भैरवाज्ञया गुरुःसरवेदिकायामासीर्थवक्ष्यमाणविधिनासंपूज्य तत्रप्राङ्मुख
उपविश्यःस्वगुरुतःस्वसमेभूतलेवेदिकोपरिसर्वतोभद्रमण्डलंकुर्य्यात् तत्रप्रागग्रायतादक्षिणोत्तरायतांश्चसप्तदशरे
खाःकृत्वाषट्पंचाशदुत्तरशतद्वयकोष्ठयुतंचतुरस्रमण्डलंकृत्वातन्मध्यगतषट्त्रिंशत्कोष्ठान्येकीकृत्य· तद्बहिस्थित
दिक्त्वेकपंक्तिंपरितःसंमार्ज्यैकीकृत्यपीठंपरिकल्प्य· तद्बहिस्थितद्दिग्गतपंक्तिद्वयमेकीकृत्यःसंमार्ज्यवीथींपरिकल्प्य· स
र्वमध्यगतसरोजस्थानेबहिःपरितोद्वादशमभागंपरित्यज्यसर्वमध्यावलंबनेनसमांतरालहस्तत्रयंनिष्पाद्य तत्रसर्व
हस्तमध्यकर्णिकांपरिकल्प्यतद्बहिर्गतहस्तवीथीकेसराग्रंपरिकल्प्य केसरस्थानेषोडशधाविभज्यतच्चिह्नावलंबे
न तृतीयहस्ताद्बहिस्थकैकांशेनामध्यचिह्नावलंबेनहस्तांतरंनिष्पाद्यगुरुरूर्ध्वमुखपत्राणिविधायैकैकदलमूलेके
सरद्वयंयथादृश्यतेतथाविरच्यपद्मंकृत्वापद्मबहिर्गतैकपंक्तिरूपचतुरस्रपीठस्यकोणचतुष्टयेपिकोष्ठत्रयेणपीठ
पीठपादान्परिकल्प्यावशिष्टकोष्ठैरेकीभूतैःपीठगात्राणिविधायतद्बहिर्गतपंक्तिद्वयकोष्ठानिसम्यक्संमार्ज्यतद्बहि
र्गतपंक्तेश्चतुर्दिक्षुमध्येमध्येकोष्ठद्वयमेकीकृत्यसर्वबाह्यगतपंक्तेरपिचतुर्दिक्षुप्रतिदिशंकोष्ठचतुष्टयमार्जनेनद्वारचतु
ष्टयंपरिकल्प्यद्वारचतुष्टयस्यापिपार्श्वयोःरथ्यन्तःपंक्तेःकोष्ठमेकंबहिःपंक्तेःकोष्ठत्रयमितिकोष्ठचतुष्टयमेकीकृत्योपशो
भांविधायावशिष्टैःषड्भिःकोष्ठैःचत्वारिकोणानिकल्पयेदितिसर्वतोभद्रमण्डलंनिर्मायसरोजकर्णिकाकेसरदलाग्र
पीठवीथीद्वारशोभोपशोभाकोणस्थानानिपंचवर्णरजोभिर्भूषयेत् पंचवर्णरजांसितहरिद्राचूर्णपीतरजः तण्डुल
चूर्णंशुक्लं कुसुम्भकुसुमचूर्णंरक्तंदग्धतण्डुलचूर्णंकृष्णंबिल्वपत्रचूर्णंश्यामं इतिरजोविन्यासप्रकारस्तुसीमागताः सर्वे

वि॰ १३
ए॰ ब॰
१८९

189

शुक्लरजसा पङ्कजं गुणेनोत्सेधविस्तारयुताः कार्याः पीतरजसा कर्णिकां केसराणि च रक्तरजसा पूर्य्य शुक्लरजसा दलानि च
संपूर्य्य श्यामरजसा दलसंधीनापूरयेत् अथवा कर्णिकां पीतेन केसरान् सितरक्ताभ्यां दलानि रक्तेन दलसंधीन् कृष्णेन रजसा
संपूर्य्य· पीतेन कृष्णेन वा पीठगर्भमापूर्य्य पीठपादान् रक्तेनापूर्य्य पीठगात्राणि शुभ्ररजसापूर्य्य वीथीं च तत्पूर्वेकल्प
वल्लीः कोरकपुष्पपल्लवमण्डिता नानावर्णै रजोभिरारक्तशुभ्रेण रजसा द्वाराणि द्वारशोभाः कृष्णेन कोणानि चापूर्य्य तद्बहिरे
खात्रमयैकैकांगुलान् रालं शुक्लरक्तकृष्णरजोभिः कुर्यादिति सर्वतोभद्रमण्डलं विधाय वेदीपरितो दीपान्ज्वालयेत् वक्ष्य
माणविधिना पूजाद्रव्याणि साधयन् तथैव तानि संस्कृत्य छत्रचामरध्वजदर्पणव्यजनादिकं च यथास्थानं विधाय गुर्वादि
देवपूर्वकं करन्यासहितालत्रयदिग्बन्धनाग्निप्राकारत्रयभूतशुद्धिप्राणप्रतिष्ठामातृकान्यासयोगपीठन्यासमूलमंत्रन्या
सान्विधाय मुद्राविरचनं स्वेष्टदेवताध्यानमानसपूजां निवेद्य देवं मूलमंत्रं जपं तत्समर्प्पणार्घ्यस्थापनात्मपूजां तद्व
न्मूलमंत्रजपतत्समर्पणानि विधाय सर्वतोभद्रमण्डलाय नमः इति मण्डलं गंधादिपञ्चोपचारैः संपूज्यार्घ्यजलेन प्रो
क्ष्य तत्र वक्ष्यमाणविधिना पीठपूजां विधाय तत्कर्णिकां शालिभिरापूर्य्य तण्डुलान्कुशान्दूर्वाः सप्तविंशतिभिः कुशैर्वे
ष्टीकृताग्रविरचितमत्स्यग्रन्थिकं कूर्चं च निधाय तत्र वक्ष्यमाणविधिना शालिपुञ्जोपरि वह्निमण्डलं वह्निकलाश्च संपू
ज्य तत्र स्वर्णादिनिर्मितं त्रिगुणीकृतसूत्रवेष्टितं सर्वांगं चन्दनागुरुकर्पूरधूपधूपितं कुम्भं प्रणवमुच्चरन् संस्थाप्य तत्र पु
ष्परागनीलवैडूर्य्यविद्रुममौक्तिकमरकतवज्रगोमेदपद्मरागाख्यानि नवरत्नानि सप्तवर्णानि निक्षिप्य कुंभस्योपरि
गंधाक्षतदूर्वान्वितं गुरुफलदलं पूर्णं कूर्चं च निधाय तत्र कलशं इत्यादि विलोममातृकां तेन मूलमंत्रं त्रिर्जपन् स्यात्मनः कुंभ
स्यैव योगपीठस्य चैकत्वं भावयन् वक्ष्यमाणपंचाशद्दत्तौषधिकाथैः स्पर्शाद्यैर्वरुणदेवत्काथैः पलाशदत्तवक्का

थेः कर्पूरचंदनकस्तूरीकुंकुमवासितैस्तीर्थजलैर्वा कुंभमापूर्य स्वपुरतो वक्ष्यमाणविधिना शंखं संस्थाप्य कुंभपूरितजलसजातीय
जलेनापूर्य तत्र गंधाष्टकं विलोड्य तत्र वक्ष्यमाणवह्निकलाः सूर्यकलाः सोमकलाश्चावाह्य तासां पृथक्पृथक्प्राणप्रतिष्ठां
विधाय संपूज्य प्रणवोत्थपंचाशत्कलावक्ष्यमाणकलामातृकात्मकान्यासोक्ताः संपूज्याः तत्र प्रथममकाराद्ब्रह्मण उत्प
न्नाः कवर्गोत्थाः सृष्ट्यादिदशकलाः समावाह्य हंसः शुचिषदिति मंत्रस्य वामदेव ऋषिर्जगती छंदः सूर्यो देवतेति ऋष्यादीन्
न्यस्य ओं हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्‌ नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृह
त्‌ इति मंत्रमुच्चार्य ब्रह्मणे नमः इति संपूज्य पूर्ववत्प्राणप्रतिष्ठामंत्रेण मम पदस्थाने सृष्ट्यादीनामिति पदं दत्वा सृष्ट्यादीनां प्रा
णप्रतिष्ठां विधाय ओं कं सृष्ट्यै नमः इत्यादि दशकलाः संपूज्य उकाराद्विष्णोरुत्पन्नाः टवर्गोत्थाः जरादिदशकलाः समावाह्य
ओं प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा इति पठित्वा
विष्णवे नमः इति संपूज्य तामेव जरादिदशकलानां प्राणप्रतिष्ठां विधाय जरादिदशकलाः संपूज्य मकाराद्रुद्रादुत्पन्नाः पवर्गोत्था
स्तीक्ष्णादिदशकलाः समावाह्य ओं त्र्यंबकमिति मंत्रस्य वसिष्ठ ऋषिरनुष्टुप्छंदः त्र्यंबकरुद्रो देवता इति ऋष्यादिकं न्यस्य ओं
त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्‌ इति पठित्वा रुद्राय नमः इति संपूज्य तासां प्रा
णप्रतिष्ठां विधाय ओं पं तीक्ष्णायै नमः इति संपूज्य ईश्वराद्बिंदोरुत्पन्नाः षकारादितकारान्ताः पंचवर्णोत्थाः पीतादिपंचकलाश्चा
वाह्य ऋष्यादिस्मरणपूर्वकं गायत्रीमुच्चार्य ईश्वराय नमः इति संपूज्य तासां प्राणप्रतिष्ठां विधाय ओं षं पीतायै नमः इत्यादि पंच
कलाः संपूज्य ततो नादोत्थाः ततो नादोत्थाः सदाशिवादुत्पन्नाः स्वरजा निवृत्याद्याः षोडशकलाः समावाह्य विष्णुर्योनिं क
ल्पयत्विति मंत्रस्य त्वष्टागर्भकर्ता ऋषिरनुष्टुप्छंदो विष्णुर्देवतेति ऋष्यादिकं न्यस्य ओं विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु

ऋतजा

वि·
र्णव·
१८०

190

आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते इति पठित्वा सद्योजाताय नमः इति संपूज्य ततो ऽश्वत्थपनसाम्रपल्लवानि इंद्रवारुणीलतया सं
वेष्ट्य दिति वेद्यां प्रधानकुंभस्थापनं विधाय पूर्वादितोरणसमीपे प्रागुक्तमण्डले ऽष्टदलकमले वा शालिपुंजोपरि प्रागुक्त
विधिना प्रतिद्वारमेकमेकं स्थाप्य तत्र पूर्वद्वारगतकुंभे फलवद्दक्षिणे तथा पश्चिमे वाकातिमुत्तरे विघ्नेशं च संपूज्य तदाग्नेय्या
दिकोणचतुष्टये कुंभान् संस्थाप्याग्नेयकुंभे स्कंदं नैर्ऋत्ये दुर्गां वायव्ये सिद्धार्थं ईशाने मंगलं च संपूज्य· पुनः पूर्वादिकुं
भेष्विंद्रादिलोकपालानावाह्य वेदोक्तमंत्रेण संपूज्य पुनः पूर्वाद्यष्टदिक्कुंभाद्बहिरैरावतपुण्डरीकवामनकुमुदा
जनपुष्पदंतसार्वभौमसुप्रतीकं च पूजयेदिति दिग्गजान्संपूज्य पुनर्गुरुर्वेद्यां गत्वा स्वासने समुपविश्य स्वेष्टमंत्रेण प्राणा
यामत्रयं कृत्वा तन्मंत्रस्य ऋष्यादिकरषडंगन्यासपूर्वकं सकलन्यासजालं विधाय देवतां ध्यात्वा· मानसैरुपचारैः संपू
ज्य प्रधानकुंभे वक्ष्यमाणप्रकारेण मूर्तिं परिकल्प्य तत्र स्वेष्टदेवतामावाह्य वक्ष्यमाणप्रकारेण नित्यहोमप्रोक्तविधिना वह्निं
संस्थाप्य चरुं श्रपयित्वा· तत्र देवमावाह्य संपूज्य नित्यहोमोक्तविधिनाज्येन तेन च रुद्रद्रव्येण कृत्वा पुनर्देवं संपूज्य कुंभस्थ
मूर्तौ संयोज्य· तथैव वह्निं संपूज्य विसृज्य वक्ष्यमाणविधिना सर्वभूतबलिं तत्तत्कल्पोक्तबलिदानं च विधाय देवायोत्तरा
पोशनादिनीराजनांते नित्यपूजोक्तविधिना विधाय प्राणायामत्रयं ऋष्यादिकरषडंगन्यासपूर्वकं मूलमंत्रमष्टोत्तरसह
स्रं जपित्वा देवाय वक्ष्यमाणविधिना जपं समर्प्य पूर्वमण्डपस्यैशानकोणे स्थापितविकिरपुंजोपरि सुवर्णगर्भवस्त्रयुग्मवेष्टि
ते जलपूरिते करके विन्यस्य तत्रास्त्रदेवतां सिंहरूपां दक्षवामकरयोः खड्गखेटकधारिणीं चोरस्थां पश्चिमाभिमुखीं ध्यात्वा तिष्ठ
त्वं यथादि पंचोपचारैः संपूज्य नमस्कृत्य तं करकं कराभ्यामुद्धृत्य मण्डपाभ्यंतरे प्रदक्षिणं भ्रमन् करकं स्वस्थाने निवेश्योपविश्यास्त्रमं
त्रेण पुनस्तामस्त्रदेवतां पंचोपचारैः संपूज्य· ततः प्राक्तनेषु कुण्डेष्विंद्रेशानयोर्मध्यगताचार्यकुण्डे गुरुरग्निस्थापनं कुर्यात् तत्रा

दौ कुण्डं गोमयेनोपलिप्य कुण्डसमीपे नित्यस्नानोक्तविधिना स्नात्वासनमास्तीर्य संशुद्धतनुरुदङ्मुखः प्राङ्मुखो वोपविश्य मूलमन्त्रेण प्रा
णायाममृष्यादिकरषडङ्गन्यासान्विन्यस्य देवं ध्यात्वा मानसोपचारैः संपूज्य मूलं यथाशक्ति जपित्वा जपं समर्प्य श्रीगुरुं प्रणम्य कुण्ड
संस्कारान्कुर्यात्। तत्रादौ कुण्डं मूलमन्त्रेण वीक्ष्यास्त्रमन्त्रेण प्रोक्ष्यास्त्रेणैव कुशैस्त्रिः संताड्य कवचेनाभ्युक्ष्यास्त्रेण कुण्डमध्ये किं
चित्खात्वास्त्रमन्त्रेण तां मृदमङ्गुष्ठानामिकाभ्यामस्त्रमन्त्रेण समीकृत्य कवचमन्त्रेण जलैः संसिच्यास्त्रमन्त्रेण काष्ठादिना कुट्टयि
त्वा दृढीकृत्य कवचमन्त्रेण कुशैः कुण्डं संमार्ज्य कवचेन गोमयाद्भिः संलिप्य कवचेनैवाग्निसूर्यसोमानामष्टत्रिंशत्कलारूपं
संचिन्त्य कवचेनैव मेखलात्रयं पवित्रीगुणीकृतसूत्रेण प्रतिमेखलं त्रिस्त्रिः संवेष्ट्य ओं अमुककुण्डाय एतदासनं नमः स्वाद्या
सनादिदीपान्तैरुपचारैः प्रथमचतुरस्रादित्रिमेखलाकुण्डनाभ्या चतुर्थीनमोन्तेन संपूज्य तथैव नाभिं च संपूज्य। मेखलात्रयेऽत
थैव हुंमन्त्रेण संपूज्यास्त्रमन्त्रेण कुण्डं वज्रवद्दृढं संचिन्त्य हुंमन्त्रेणैव कुशैः कुण्डस्य चतुर्दिक्षु वह्निज्वालाविलासा
यचतुष्पथं मार्गचतुष्टयं परिकल्प्य कवचमन्त्रेण छिन्नाग्रैः कुशैरस्त्रमन्त्राभिमन्त्रितैः कुण्डं भित्तिगणैः सर्वमाच्छादयेत्
अद्यपातनं कुर्यादित्यष्टादशसंस्कारान्कुर्यात्। यथाक्रमं प्रथमोदितैः स्वतन्त्रैरेव संस्कारैः कुण्डं संस्कृत्य तत्र हुंमन्त्रेण
स्त्रमन्त्रेण वा दक्षिणमध्योत्तरेषु प्रागग्राभ्यामुद्धृत्य वह्निस्पृक्वा हुंमन्त्रेणाङ्गुष्ठमटिकया खात्वा नाभ्यर्थं पश्चिममध्यपू
र्वेषूदगग्रा इति तिस्रस्तिस्रो रेखाः कुशमूलेन विलिख्य प्रणवेनाभ्युक्ष्य प्रागग्रासु रेखासु दक्षिणरेखायां विष्णवे नमः
मध्यरेखायां रुद्राय नमः उत्तरस्यां इन्द्राय नमः। उदगग्रासु रेखासु पश्चिमायां ब्रह्मणे नमः मध्यमायां ब्रह्मणे नमः पूर्वरेखा
यां सोमाय नमः इति संपूज्य। तत्र वक्ष्यमाणयोगपीठक्रमेण मण्डूकादिपरतत्त्वान्तं योगपीठं संपूज्य। तत्र पद्मकेसरेषु स्था
ग्रादिप्रादक्षिण्येन मध्यान्त ओं जयायै नमः ओं विजयायै नमः ओं अजितायै नमः अपराजितायै नमः नित्यायै विलासिन्यै

वि॰ १३
लिव॰
१९१
191

दाग्न्यै॰ अघोरायै॰ मंगलायै नम इति संपूज्य क्लौं सर्वशक्तिकमलासनाय नमः इति मध्ये पुष्पांजलिं निक्षिप्य तत्र भुवनेश्वरीत
न्त्रमन्त्रेणावाहयावाहनादिपरमीकरणान्तं तन्मुद्रया विधायासनादिषोडशोपचारैरभ्यर्च्य तत्र श्रीशिवं ध्यात्वा मूलमन्त्रेण
तथैव संपूज्य देवीमृतुस्नातां देवं च कामोन्मत्तं च विचिन्त्य स्वर्णादिपात्रेण सम्यात्रं चेव्रत्तनेन स्त्र्यर्कोनादि भवमरणि
भवं श्रोणियरहस्यहः स्त्रिमस्त्र मंत्रेण पात्रे कृत्वा कवचमन्त्रेण सजातीयेन पात्रान्तरेण पिधाय कन्यया सुवासिन्या वा समानी
तगुरुदारया वास्त्रमंत्रेणैकमंगारं तन्मध्यात्क्रव्यादांशं नैर्ऋत्यकोणे परित्यज्य देवांशं मूलेन पूरतः संस्थाप्य मूलेन वीक्ष्या
स्त्रेणाभ्युक्ष्य: संताड्य कवचेनाभ्युक्ष्य तत्र संमूलाधारस्थवह्निमण्डलगतपरमात्मस्वरूपमग्नीषोमात्मकाद्धृदः सकाशा
द्वह्निमणिपूरगतं जठरानलेन सह सुषुम्णामार्गेण ब्रह्मरन्ध्राद्धूमानिष्क्राश्य परमिति वह्निबीजमुच्चरन् पूरतः पात्रस्थितेवह्नौ व
ह्निचैतन्यं संयोज्य: ओं दर्थ्यैवैश्वपार्थिववह्नीनामैक्यं विभावयन् प्रणवेनाभिमंत्र्य वं इति धेनुमुद्रया॰ मृतीकृत्य॰ स्त्रमंत्रेण संर
क्ष्य कवचेनावगुण्ठ्य: ओं रं वह्नये नमः इति गंधादिभिः संपूज्य जानुभ्यामवनीं गतस्तत्पात्रं कराभ्यामादाय कुण्डोपरि त्रिः
प्रदक्षिणं परिभ्राम्य देव्या योनौ शिववीजमिति ध्यायन् स्वाभिमुखं कुण्डमध्ये प्रणवमुच्चरन्तमग्निं निक्षिप्य मैथुनधिया
देवदेव्योराचमनं दत्वा ओं चित्पिंगल हन हन पच पच दह दह सर्वज्ञाज्ञापय स्वाहा इति मंत्रमुच्चरन् मुखेन फूत्कृत्य कुशैर
ग्निं प्रज्वाल्य काष्ठैः पञ्चकृत्वः कृताञ्जलिस्तिष्ठन् ओं अग्निं प्रज्वलितं वंदे जातवेदं हुताशनं सुवर्णवर्णममलं समिद्धं सर्वतोमु
खं इति ज्वलंतं वह्निमुपवेश्य वक्ष्यमाणवह्निमंत्रेण प्राणायामत्रयं कृत्वा शिरसि भृगुऋषये नमः मुखे गायत्रीछन्दसे न
मः हृदये अग्नये देवतायै नमः गुह्ये रं बीजाय नमः पादयोः स्वाहाशक्तये नमः इति विन्यस्य दीक्षाङ्गहोमे विनियोगः
इति कृताञ्जलिर्वदेत् लिंगस्थे हिरण्यायै नमः गुदे सुकनकायै नमः शिरसि सुरक्तायै नमः मुखे सुकृष्णायै नमः नासि

कायांसंसप्रभायैनमः नेत्रयोः संरक्तायै अतिरक्तायैनमः सर्वांगेसंवज्ररूपायैनमः इतिसप्तजिह्वाः विन्यस्य ॐ सहस्रार्चिषे
हृदयायनमः स्वस्तिपूर्णायशिरसेस्वाहा उत्तिष्ठपुरुषायशिखायैवषट् धूमव्यापिनेकवचायहुंफट् सप्तजिह्वायनेत्रत्रयाय
वौषट् धनुर्द्धरायास्त्रफट् इतिषडंगानिविन्यस्य शिरस्यग्नयेजातवेदसेनमः वामांसेअग्नयेसप्तजिह्वायनमः वामपा
र्श्वेअग्नयेदेवमुखायनमः इतिविन्यस्यवह्निरूपस्वात्मानंध्यात्वासप्तजिह्वामुद्रांप्रदर्श्यकुण्डस्योत्तरभागेकुशास्तरेस्रु
क्स्रुवौप्रोक्षणीपात्रेआज्यस्थालीचरुस्थालीपरिधित्रयंसमिदाज्यवान्मकमिध्मल्लन्मूलसाग्रकुशमुष्टिरितियावत्प्रणीताप्रो
मुखानिसंस्थाप्यानामपिदध्यात्तनादिबलिंदद्यात्गंधपुष्पादिपूजाद्रव्याणिचयथायथंसंस्थाप्याधोमुखानिस्रुक्स्रु
वादीनिसपवित्राधोमुखहस्तसेकरूपावेदनिणपूर्वकमुत्तानीकृत्यप्रणीतापात्रंप्रदानाल्पमस्तपरतः कुशास्तरेनिधायमु
द्गजलेनापूर्यतत्रगंधाक्षतानि: द्विपप्रादेशमात्रंसाग्रंकुशद्वयंमध्येवस्त्रग्रंथियुतंजलाग्रेउत्तराग्रंपवित्रंनिधायकरद्व
यानामिकांगुष्ठाभ्यांपवित्रंमूलाग्रेविधृत्यास्त्रमंत्रमुच्चरन्पवित्रमध्येनजलंपात्राद्बहिः त्रिवारंभूमौनिक्षिपेदिमुत्पवनं
विधायतन्मध्येकिंचिद्घृतंनिक्षिप्यतत्पात्रंकराभ्यामस्तकंमुद्धृत्यकुण्डस्योत्तरभागेकुशास्तरेनिधायततउपरिप्रागग्रान्दर्भा
न्निक्षिपेत् इतिप्रणीतापात्रंसंस्थाप्यप्रोक्षणीपात्रंप्रदानाल्पमुद्गजलेनापूर्यतन्मध्येप्रणीतापात्रजलंपात्रान्तरेणोद्धृत्यकिंचि
द्दत्वातेनजलेनमूलमंत्रेणसर्वाणिपात्राणिहोमद्रव्याणिपूजाद्रव्याणिचप्रोक्षयेदितिद्रव्यासादनंविधायप्रोक्षणीयजले
नाग्निंपरिषिच्यागर्भैस्त्रिभिर्दर्भैः प्राचीदिशमारभ्यप्राच्यामुत्तराग्रैरीशानादिनिर्ऋत्यंतंपरिस्तीर्यपुनर्दक्षिणस्यांप्रागग्रैः
पूर्वपरिस्तरणमूलमग्रेणाच्छादयन्पुनः पश्चिमायामुत्तराग्रैर्दक्षिणपरिस्तरणमूलमग्रेणाच्छादयन्पुनरुत्तरस्यां
प्रागग्रैः पश्चिमपरिस्तरणाग्रंपूर्वपरिस्तरणाग्रमग्रेणाच्छादयन्परिस्तीर्यपरिधित्रयमारोपयेत् सव्येतः स्थूलंपश्चिमेउत्तराग्रं

तलेन

वि० १३
दी० व०
१९२

192

तः कनिष्ठं दक्षिणे पूर्वाग्रं पश्चिमपरिधेर्मूलं परिमूलं यथा भवति तथा उत्तरस्तेनापि कनिष्ठमुत्तरस्यां पूर्वाग्रं पश्चिमपरिधेरग्रो
परिमूलमिति कुण्डस्य मध्यमेखलोपरि परिधित्रयं निक्षिपेत् अत्र पश्चिममेखलायां तु परिस्तरणपरिधिस्थापनं योनिना
लोर्ध्वमेखलयोरंतराले कार्यमिति । पश्चिमपरिधौ ॐ ब्रह्मणे नमः दक्षिणपरिधौ ॐ विष्णवे नमः उत्तरपरिधौ ॐ रुद्रा
य नमः इति संपूज्य स्वेष्टदेवतादीक्षितं ब्राह्मणमाहूय । कुण्डस्य दक्षिणे भागे कुशासने समुपवेश्य अमुकगोत्रः अमुक
शर्माहं मम कवेदांतर्गताः अमुकशाखाध्यायिनः अमुकशर्माणं मम इष्टदीक्षांगभूतहोमकर्मणि कृताकृतावेक्षणाय ब्र
ह्मत्वेन त्वां वृणे इति वस्त्रालंकारादिभिर्वृणुयात् ततो गंधादिभिः संपूज्य ब्राह्मणाभावे कुशावटुकं वा संपूज्य वह्निमंत्रे ।
णार्घ्यपाद्याचमनीयमधुपर्कपात्राणि संस्थाप्य सत्कृत्य कुण्डमध्ये षट्कोणगर्भितकर्णिकं सकेसरं चतुर्द्वारयुक्तं चत
रस्रत्रयवेष्टितम् अष्टदलकमलं वह्नेः अरुणायै कृष्णायै धूम्रायै तीव्रायै विस्फुलिंगिन्यै रुचिरायै ज्वालिन्यै नमः
इति मध्यांतनवनशक्तीः संपूज्य रं सर्वशक्तिकमलासनाय नमः इति समस्तपीठं संपूज्य तन्मध्ये वह्निं करैर्वरस्व
स्तिकशक्त्यभीतीर्दधानं ममोजगतां त्रिनेत्रं सिंदूरवर्णं तपनीयभूषं वह्निं जटाभूषितमौलिमीडे इति ध्यात्वा सप्तजिह्वा
मुद्रां प्रदर्श्य · ॐ वैश्वानर जातवेद लोहिताक्ष सर्वकर्माणि साधय स्वाहा अग्नये नमः इत्यग्निं त्रिः पुष्पांजलिना संपूज्य ·
पुनर्वह्निमंत्रमुच्चार्याग्नये एतदासनं नमः एवमग्ने एष तेऽर्घः स्वाहा एतत्ते पाद्यं नमः एतत्ते आचमनीयं स्वधा एषते
मधुपर्कः स्वधा । एतत्ते पुनराचमनीयं स्वधा एतत्ते स्नानं नमः इति पुरस्फुरणमुखमूर्द्धादिसर्वांगोद्देशेन मेखलायां वह्निः
पात्रांतरेऽर्घ्यपाद्यादिस्नानांतान् वह्नेस्तत्तदंगभावनोपरिकल्प्य पुनराचमनीयं दत्त्वा वह्नौ वस्त्रं दत्त्वा पुनर्वह्निराचमनीयं
दत्त्वा यज्ञोपवीतं निवेद्यः वह्निः पुनराचमनीयं दत्त्वा गंधपुष्पे वह्नौ एवं निवेदयेदिति वह्निमंत्रेणासनादिपुष्पांतानुपचारा

त नया=२ द्वि

नुपचर्य्यच्चकोणेषु देवाग्न्यादिकोणमारभ्य मध्यान्तं सं हिरण्यायै नमः क्षं कनकायै नमः श्रं रक्तायै नमः कं कृष्णायै नमः लं
प्रभायै नमः सं अतिरक्तायै नमः यं बहुरूपायै नमः इति संपूज्याष्टदलकमलेषु अग्नीशासुरवायव्यदेवतान्यग्नतदादिव
तर्हिद्वः ॐ सहस्रार्चिषे हृदयाय नमः ॐ स्वस्तिपूर्णाय शिरसे नमः ॐ उत्तिष्ठपुरुषाय शिखायै नमः ॐ धूमव्यापिने
कवचाय नमः सप्तजिह्वाय नेत्रत्रयाय नमः ॐ धनुर्धराय अस्त्राय नमः इति षडङ्गानि संपूज्याष्टदलेषु देवाग्न्यादिप्रादक्षिण्ये
न ॐ अग्नये जातवेदसे नमः एवमग्नये सप्तजिह्वाय अग्नये हव्यवाहनाय अग्नये अश्वोदरजाय अग्नये वैश्वानराय अग्न
ये कौमारतेजसे अग्नये विश्वमुखाय अग्नये देवमुखाय इति प्रादक्षिण्येनाष्टमूर्तीः संपूज्य तदहिः पत्रस्य रसे · इन्द्रादी
न्सायुधान्संपूज्य · पुनर्वह्निमन्त्रेण वह्निं संपूज्य धूपदीपादि दत्वा नैवेद्यमुत्सृज्याग्नौ प्रक्षिप्य प्राग्वदाचमनीयं दत्वा ततः
स्रुक्स्रुवौ प्राग्वदधोमुखौ वह्नौ संताप्य तयोरग्रं कुशाग्रैर्मध्यं मध्यैर्मूलं मूलैरिति त्रिः संमृज्याग्नौ प्रक्षिप्य स्रुक्स्रुवौ
स्वदक्षिणभागे कुशास्तरे निधाय आज्यस्थालीमादाय अस्त्रमन्त्रेण प्रक्षाल्य स्वपुरतः कुशास्तरे निधाय तदुपरि कु
तराग्रं प्रादेशमात्रं मध्ये बद्धग्रन्थियुतं कुशद्वयरूपं पवित्रं निधाय पात्रान्तरस्थं शुद्धं गोघृतं गन्धादिदूषणरहितं वीक्षणादिव
न्तः संस्कारैः संस्कृतं वमिति धेनुमुद्रया अमृतीकृतं मूलेनाष्टधाभिमन्त्रितमाज्यस्थाल्यां निक्षिप्य कुण्डादङ्गारानुद्धृत्य मेख
लावह्निभूमौ वायव्यकोणे निक्षिप्य तेष्वाज्यस्थालीं हुं मन्त्रेण निधाय कुशद्वयं प्रज्वाल्य हुं मन्त्रेणाज्ये निक्षिप्य शेषमग्नौ नि
वेश्य पुनर्दर्भद्वयं प्रज्वाल्य कवचमन्त्रेणाज्यस्थालीमभितः परिभ्राम्य दग्धशेषमग्नौ निक्षिप्य पुनः कुशान्प्रज्वाल्य हुं मन्त्रेण
ज्येमद्दर्पदग्धशेषमग्नौ निक्षिप्याज्यस्थालीमुद्धृत्य प्रादक्षिण्येन कुण्डोपरि त्रिर्भ्रामयन् आनीय स्वपुरतः कुशास्तरे निधा
य वह्निस्थानं गारान्कुण्डमध्ये निक्षिप्य · आपः संस्पृश्याङ्गुष्ठानामिकाभ्यामाकरद्वयेन पवित्रं मूलाग्रधृत्वा मन्त्रमुच्चरन् ॥

वि॰ १३
णि॰ व
१९३

पवित्रमध्येनघृतमन्वयघृतमंत्रमुच्चरन् तथैवपवित्रमध्येनस्वाभिमुखंघृतंक्षिः संप्लाव्यततःपवित्रमाज्यस्थाल्यांप्रागग्रंमध्ये
निवेश्यभागद्वयंकृत्वा दक्षिणभागमस्त्रकपदंवामभागंकृत्स्नपदंसंपरिकल्प्यपुनस्तत्रैववामभागेइडांदक्षिणभागेपिंगलां
मध्येसुषुम्णामितिनाडीत्रयंसंचिंत्यस्त्रुवेणदक्षिणभागमस्त्रकपदंवामभागंकृत्स्नपदंसंपरिकल्प्यपुनस्तत्रैववामभागेइडांद
क्षिणभागेपिंगलांमध्येसुषुम्णामितिनाडीत्रयंसंचिंत्यस्त्रुवेणदक्षिणभागात्घृतंमंत्रेणान्यमादायाग्नयेस्वाहेतिवह्नेर्दक्षिणने
त्रेकृत्वा अग्नयइदंनमम इतिउद्देशत्यागंविधायपुनर्हृदयमंत्रेणवामभागाद्आज्यंगृहीत्वासोमायस्वाहेतिवह्नेर्वामनेत्रेकृत्वा
सोमायेदंनमम इतिउद्देशत्यागंविधायपुनर्हृदयमंत्रेणमध्याद्आज्यंगृहीत्वा ॐअग्नीषोमाभ्यांस्वाहेतिवह्नेर्ललाटलोच
नेकृत्वा इदं अग्नीषोमाभ्यांनममेत्युद्देशत्यागंकृत्वापुनर्दक्षिणभागाद्धृदाज्यंगृहीत्वाअग्नयेस्विष्टकृतेस्वाहेतिवह्नेर्वक्त्रेकृ
त्वा अग्नयेस्विष्टकृतेनममेत्युद्देशत्यागंविधाय ॐभूः स्वाहा ॐअग्नयेइदंनमम ॐभुवः स्वाहा॰ वायवइदंनमम ॐस्वः
स्वाहा सूर्यायेदंनमम ॐभूर्भुवःस्वः स्वाहा प्रजापतयेइदंनमम ॐवैश्वानरजातवेद॰ इहावहलोहिताक्षसर्वकर्मा
णिसाधयस्वाहेतिवह्निमंत्रेणवारत्रयंकृत्वा अग्नयेइदंनममेत्युद्देशत्यागंकृत्वा ॐअग्नयेगर्भाधानंसंपादयामिस्वा
हा एवंपुंसवनं सीमंतोन्नयनं इतिप्रतिकर्माज्याहुतिपंचकंकृत्वावागीश्वरीजातंवह्निंप्रागुक्तरूपंध्यायन् अग्नयेजात
कर्मइत्यष्टावाज्याहुतीःकृत्वावह्नेर्नालच्छेदनंकृत्वासूतकंसंशोध्य वह्नेर्नामकरणंसं इत्यष्टाज्याहुतीःकृत्वा शिवाग्नि
रितितस्यनामकृत्वा ॐवह्नेरुपनिष्क्रमणंसं॰ अन्नप्राशनंसं अग्नेश्चौलंसं अग्नेरुपनयनंसं अग्नेर्महानाम्नंसं अग्ने
र्महाव्रतंसं अग्नेरुपनिषदं अग्नेर्गोदानंसं॰ अग्नेः समावर्तनंसं॰ अग्नेरुद्वाहंसं इतिप्रतिकर्माष्टाज्याहुतीःकृत्वा वह्ने
र्गर्भाधानाद्युद्वाहान्तान्संस्कारान्विधायवह्नेः पितरौदेवदेवौप्रागवन्नस्त्र्यविसृज्य॰ मूलायेषु॰ हृतसंसिक्ताः पंचसमिध

न्त्री एकदेवं जलिनावकैसमर्प्य ॐ ह्रूं हिरण्यायै स्वाहा एवं स्रूं कनकायै· स्रूं क्लसायै ल्रूं सप्रभायै· न्त्रूं अतिरक्तायै य्रूं बहु
रूपायै· ॐ सहस्रार्चिषे हृदयाय स्वाहा एवं स्वस्तिपूर्णाय शिरसे उत्तिष्ठपुरुषाय शिखायै धूमव्यापिने कवचाय सप्तजि
ह्वाय नेत्रत्रयाय धनुर्द्धराय अस्त्राय अग्नये जातवेद स्वाहा एवं अग्नये सप्तजिह्वाय अग्नये हव्यवाहनाय अग्नये अश्वोद
रजाय अग्नये वैश्वानराय अग्नये कौमारतेजसे अग्नये विश्वमुखाय· अग्नये देवमुखाय इति जिह्वागमूर्त्तिमन्त्रैरेकैका
माहुतिं दत्वा ॐ लं इन्द्राय स्वाहा इदमग्नये· यमाय निर्ऋतये वरुणाय वायवे· कुबेराय· ईशानाय· ब्रह्मणे· अनन्ताय·
वज्राय· शक्तये· दण्डाय· खड्गाय· पाशाय· अंकुशाय· गदाय· शूलाय· पद्माय· चक्राय· एवं तन्नामभिरेकैकामा
हुतिं कृत्वा· सर्वत्र तन्नामोद्देशात्यागं कुर्यात् ततः स्रुवेणाज्यमादाय चतुर्वीरं तिद्दिप्याधोमुखं स्रुवमुखेनिधायो
ध्याय प्राङ्मुखः वह्निमन्त्रमुच्चार्य स्वाहास्थाने वौषडित्यन्तेनेति हुत्वा उपविश्य· ॐ स्वाहा· ॐ श्रीं स्वाहा ॐ श्रीं ह्रीं स्वाहा
ॐ श्रीं ह्रीं क्लीं स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये स्वाहा ॐ श्रीं ह्रीं क्लीं
ग्लौं गं गणपतये वरवरद स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये व
रवरद सर्वजनं मे वशमानय स्वाहा इति दशधा विभक्तेन महागणपतिमन्त्रेण दशाहुतीः कृत्वा ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणप
तये वरवरद सर्वजनं मे वशमानय स्वाहेति समस्तमन्त्रेण चतस्रः आज्याहुतीः कुर्यात् इत्यग्निस्थापनविधिः इत्यम
ग्निस्थापनं विधाय ततः ताम्रादिपात्रमस्त्रमन्त्रेण प्रक्षाल्य तत्र मूलमन्त्रेणाष्टधाभिमन्त्रितान् तण्डुलान् चतुर्दशप्रसृतिमिता
न् त्रिः प्रक्षालितान् अस्त्रमन्त्रेण जप्तान्निक्षिप्य· तत्र गोदुग्धं वा क्षिपेत् यावत् तावत् पक्वं भवति तावत् निक्षिप्य प्रक्षालितेन पात्रेण क
वचमन्त्रमुच्चरन् तत्पात्रपोतहृन्मे पिधाय यथा तदुपं वाष्पवशादुपर्य्यायाति तदा मन्त्रेण नमदहनेन मूर्द्धमवतारय·

वि॰ २३
पी॰ व॰
१९४
194

मूलमंत्रं स्मरन् प्राङ्मुखो गुरुः स्वरूपविशिष्ट्य मण्डपपरितः पूर्वमंकुरार्पणकर्मणि कृतांकुरभाजनानि निक्षिप्य ध्वजदण्डं
निष्टमयदीपांश्च निधाय तान्येतस्मिन्मूलमंत्रेणाभ्युक्ष्य वेणोनिक्षिप्य कवचमंत्रेणानन्तराच्छमवतार्य्यास्त्रमंत्रेणाभिमंत्रितेऽ
ण्डास्तरेवरूनिक्षिप्य त्रिधा विभज्यैकं भागं देवाय कुम्भस्थाय निवेद्य मण्डपपरितः पूर्वमंकुरार्पणकर्मणि कृतांकुरभाज
नानि निक्षिप्य ध्वजदण्डनिष्टमयदीपांश्च निधाय कुण्डसमीपं गत्वा स्नात्वा सम्यगुपविश्य तत्र वक्ष्यमाणविधिना मूलमंत्रे
णार्घ्यादिपात्रस्थापनं विधाय कुण्डमध्ये वह्निश्रेष्ठं जाचक्रं विभाव्य तत्र वक्ष्यमाणविधिना मण्डूकादिपीठमन्त्रान्तं संपूज्य तत्र
देवतामावाह्य वक्ष्यमाणविधिना सांगं सावरणं सर्वोपचारैः पूजयेत् अग्न्यर्घ्यादिस्नानान्तानग्निपूजावदेव कुण्डहृदि: पाद्या
नेरदेवमुद्दिश्य कल्पयेत् अन्यत्सर्वं कुण्डमध्य एव कल्पयेत् ततो मूलमंत्रेण वह्निदेवतयोर्वह्न्यैकीकरणार्थं पंचविंशत्या
ज्याहुतीर्हुत्वा स्वात्मानाग्निदेवतानामैक्यं विभावयन् मूलेन नाडीसंधानार्थमेकादशवारं हुत्वा षडंगाचरणे देवतानामे
कैकामाहुतिं हुत्वा॰ प्राङ्गि॰ र्मितचतुस्तनीयांशेन तथाविभज्यैकांशेन मूलेन पंचविंशतिधा हुत्वा प्रागादिदिक्स्थकुण्ड
षु स्विविभिः प्रागुक्तविधिना षोडशसंस्कारैः संस्कृतेषु गुरुः स्वकुण्डादग्निमुद्धृत्य तेषु निक्षिपेत् ऋत्विजश्च स्वस्वकुण्डेषु
ग्निं प्रागुक्तविधिना प्रज्वाल्यापस्थापयपरिषेचनपरिस्तरणपरिधिप्रक्षेपणपूजादिभिः सम्यक्परितोष्य समिद्धेतस्मि
न्नेवेष्टदेवतां नित्यपूजोक्तविधिनादेवमावाह्य नानाहलानै रुपचारैः सम्यक्संपूज्य वह्न्यैकीकरणनाडीसंधानांगावरणाद्य
मांते मूलमंत्रेण गुरुहुतद्रव्यविभज्या नेतर्हुतमिश्रेण पायसेन पंचविंशतिधा स्वस्वकुण्डे जुहुयुः अथ गृहः सर्वतोभद्र
मण्डलस्य पूर्वादिवीथीचतुष्टये मेषादिराशिस्थानेषु प्राच्यां मेषवृषौ॰ आग्नेय्यां मिथुनं दक्षिणे कर्कटसिंहौ नैर्ऋत्ये
कन्यां पश्चिमे तुलावृश्चिकौ॰ वायव्ये धनुः उत्तरे मकरकुंभौ ऐशान्ये मीनः इति विभक्तेषु राशिस्थानेषु राशाधिपतीनाध्याय

देशेभ्यो नक्षत्रेभ्यः करणेभ्यश्च ऋतशेषेण पायसेन बलिं दद्यात् यथा मेषवृश्चिकस्थाने यो: कं खं गं घं ङं· मेषावृश्चिकराश्यधिपतये
मंगलाय एष गंधपुष्पधूपान्नबलिर्नमः एवं चं ५ वृषतुलाराश्यधिपतये शुक्रायैष· नमः टं ५ मिथुनकन्याधिपतये बुधायै-
ष· नमः यं १ कर्क्काधिपतये सोमायैष· नमः शं १६ सिंहाधिपतये सूर्यायैष· नमः तं ५ धनुर्मीनाधिपतये गुरवे एष·
नमः पं ५ मकरकुंभाधिपतये शनैश्चरायैष· नमः पुनः क्रमेण मेषादिस्थानेषु मेषराश्यंशभूताश्विनीभरणीकृत्तिका
पादनक्षत्रदेवताभ्यो दिवानक्तंचरेभ्यः सर्वेभ्यो भूतेभ्यः एष गंधेत्यादि प्राग्वत् एवं वृषराश्यंशभूतकृत्तिकापादत्रयरोहिणी
मृगशिरोर्द्धनक्षत्रेभ्यादि· मिथुनराश्यंशभूतमृगशिरोर्द्धार्द्रापुनर्वसुपादत्रयनक्षत्रेभ्यादि एवमग्रेपि मंत्राकृतयः ततो
मीनमेषयोरंतराले ववकरणायैष इत्यादि· एवं वृषमिथुनयोरंतराले बालवाय मिथुनकर्कयोर्मध्ये कौलवाय सिं-
हकन्ययोर्मध्ये तैतिलाय· कन्यातुलयोर्मध्ये वणिजे धनुर्मकरयोर्मध्ये विष्टये एष गंधाद्यन्नपुष्पघृतपायसबलि-
र्नमः इति बलिं दद्यात् अत्र राशिद्वयाधिपतीनां राशिद्वयस्थानेपि बलिर्देय इति संप्रदायः ततो गुरुः कुंभस्याग्रदे
वायोत्तरापोशानादीनी राजनेनानेवक्षमाणविधिनाकृत्वा स्वतामण्डनमापयेत् ततस्तृतीयभागे शिष्येण सह
गुरुर्भुक्त्वा स्वयमाचांतः स्वाचांताय शिष्याय षडंगमासयोनसकलीकृताय प्रादेशमात्रं यथोक्तलक्षणं मंत्रेणाष्टधाभि-
मंत्रितं दंतकाष्टं दद्यात् शिष्योपि तेन दंतधावनं विधाय दंतकाष्टं प्रक्षाल्य पुरतः परित्यज्याचम्य गुरोः समीपमागच्छे-
त् ततो गुरुः शिष्यशिखां बध्वा मूलमंत्राभिमंत्रितेन संस्रुतेनेन सार्द्धं वेद्यां कुशास्तरणे तस्याराद्धोशयनं कुर्यादि-
त्यधिवासः अत्र प्राकोक्तविधिनोर्द्धाम्नायदिव्याम्नायदेवतानां दीक्षायां तु तन्मंत्रहोमस्तु तद्देवताश्रजनकर्मोक्तरी-
तिभिर्विधेयः नवग्रहपूजानंत्रगागमोक्तेवा वैदिकर्मवा विधेयः प्रागानकोणवेद्यां पृथगेवेति संप्रदायः पंचषट्कृत्वं

वि ९३
शिव
१९५
165

याम्येंऽशे धिनं वरुणा मैरिति क्रमप्रोक्तक्रमेणैव दीक्षाप्रयोगक्रमः साधीयस्त्वंगंगत्वेनान्यमंत्राकथनात् षट्दर्शनांगभूत
प्रदानविद्यादीक्षाविधौ न षट्दर्शनेषु अंगत्वेन ये ये मंत्रा अभिहिताः तद्दीक्षैव वर्त्तिकुसामयिके होमजपपूजादयोऽपि विधे
याः गुरुणापि नैव संगोपांगपूर्णत्वेपेणोपदेशः कार्यः पूर्णाभिषेकविधिमेतत्प्रकरणे वक्ष्यामः वैदिकद
र्शनप्राधान्येन यत्रोपदेशस्तत्र क्रान्तिसरस्तु कविधिनैव विशेषो वोद्धव्योऽन्यत्साम्य अथ वैदिकदर्शनदीक्षायाः आदौ
गणपतिपूजादिमण्डपूजाप्रयोगः तत्रादौ गणेशपूजा यजमान आसनोपविष्टः पवित्रपाणिः सम्प्राणायामत्रयं कृत्वा कृ
शाक्षतान् हस्ते गृहीत्वा संकल्पं कुर्यात् तद्यथा अद्येत्यादि मासपक्षाद्युल्लेखानन्तरं करिष्यमाणअमुकदेवतामं
त्रदीक्षाकर्मणि प्रत्यूहशान्तये गणपतिपूजनमहं करिष्ये इति संकल्प्य आवाहनादिषोडशोपचारैर्गणानां त्वेति मंत्रेण गण
पतिं संपूज्य बद्धाञ्जलिः प्रार्थयेत् वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा पू
जां संपूर्णतां यातु वाचयित्वा विसर्जयेत् ततः पीठे प्रदत्तपुंजेषु गौर्य्यादिषोडशमातृका ब्राह्म्याद्यासप्तमातृकाश्च पूज
येत् तास्तु गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः धृतिः पुष्टिस्तथा तु
ष्टिरात्मनः कुलदेवताः ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही च तथेन्द्राणी चामुण्डा सप्तमातरः पूजाप्रका
रस्तु पूजोपकरणान्युपकल्प्य प्राङ्मुख उपविश्य कुशयवतिलानादाय अद्येत्यादि करिष्यमाणमंत्रदीक्षांगतया
गौर्य्यादिषोडशमातृपूजनं ब्रह्म्यादिसप्तमातृपूजनं करिष्ये इति संकल्प्य ततः ओं भूर्भुवः स्वः गौरि इहागच्छेह ति
ष्ठेत्यावाह्य स्वशाखोक्तमंत्रेण प्रतिष्ठाप्य गौर्य्यै नमः इदमासनमित्यादिरीत्या पदार्थान् समर्पयेत् सर्वाः प्रत्येकमुक्तरस
स्याः पूज्याः एवं ब्रह्म्यायाः पि यदा तु मातृणां गणदेवतात्वेन तदा प्रत्येकं नाममगृहीत्वा गौर्य्यादिभ्य इति वाक्यायुगपत्पू

ब्राह्म्या

जयेत् एवं ब्रह्माण्यापि । ततः स्वाचारतो वसोः पवित्रमसीति । कुशलग्नाः पंचसप्तवा हुतेन धाराः कुर्यात् ततः स्नानमपि केचिदाहुः न
तः शान्तिपाठः ततो यथाचारं वृद्धिश्राद्धं संकल्पपूर्वकं स्वशाखोक्तं कुर्यात् ततः पुण्याहवाचनं तत्रावनिकृतजानुमण्डलः
त्यादि पुण्याहं भवन्तो ब्रुवन्त्विति त्रीन् ब्राह्मणान् श्रावयेत् ते च पुण्याहमिति त्रिः प्रतिब्रूयुः ॐ स्वस्ति भवन्तो ब्रुवन्त्विति त्रिः ॐ
स्वस्तीति त्रिः प्रतिवचनं ॐ ऋद्धिं भवन्तो ब्रुवन्त्विति । त्रिः ॐ ऋध्यतामिति प्रतिवचनं ततो मण्डपाद्बहिः पश्चिमदेशे उपलिप्ते
यजमानः प्राङ्मुख उपविश्याचम्य प्राणानायम्य । देशेत्यादि अमुकदेवतामन्त्रदीक्षाकर्मकर्मनि माचार्य्यर्त्विजां वरण
महं करिष्ये इति संकल्प्य आचार्य्यमुदङ्मुखमुपवेश्यासितांवरहेमकुण्डलस्रक्केयूरकंकणाभरणाभिरामं कृत्वा बद्धाञ्ज
लिर्दीक्षादानेन त्वं मे गुरुर्भवेति प्रार्थ्य भवानीति तेनोक्ते अमुकप्रवरान्विताऽमुकगोत्रममुकवेदान्तर्गतामुकशाखा
ध्यायिनममुकशर्म्माणममुकप्रवरान्वितामुकगोत्रोऽमुकशर्म्माहं एभिर्गन्धाक्षतपुष्पताम्बूलहेमाभरणाङ्गुली
यकवासोभिरमुकमन्त्रदीक्षादाने गुरुत्वेन त्वां वृणे वृतोऽस्मीति स वदेत् एवं पूर्वकं गायत्रीहोमार्थमेकं आग्नेय द
क्षिणनैर्ऋत्यपश्चिमवायव्यसोमेशानकुण्डेषु होमार्थं सप्तब्राह्मणान् नवब्राह्मणान् वृणुयात् ततः पूर्वद्वारपाल
नार्थं द्वौ ऋग्वेदिनौ दक्षिणद्वारपालनार्थं द्वौ यजुर्वेदिनौ पश्चिमद्वामहाद्वारपालनार्थं द्वौ सामगौ । उत्तरद्वारपालनार्थं
द्वावथर्वाणौ एवमष्टौ पृथक्पृथग्वृणुयात् वरणवाक्यमभवदेव एवं पूजकाचार्य्यं वृणुयात् अत्र द्वारपालकास्त
सर्वदर्शनसाधारणाः ततः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः सपत्नीकः सशिष्यर्त्विक् आचार्य्यो मंगलघोष
जायमानो शंखतूर्यकलशहस्तो भद्रं कर्णेभिरित्यादि मन्त्रघोषेण मण्डपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्य मण्ड
पात् पश्चिमदेशे उपविश्याचम्य प्राणानायाम्य देशकालौ संकीर्त्य करिष्यमाणदीक्षादानाङ्गत्वेन यागस्थलशुद्ध्यामण्ड

वि० १२
वर्ण०
१९६

196

पदेवतास्थापनादिकरिष्ये इति संकल्प्य षोडशोपचारैर्गणेशं पूजयेत् गौरसर्षपान्सर्वतो मण्डपान्तर्विकिरेत् तत्र मंत्रः रक्षो
घ्नाः यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु अपक्रामन्तु भूतानि पिशाचाः सर्वतो दि
शं सर्वेषामविरोधेन ब्रह्मकर्म समारभे इति पञ्चगव्येन कुशैः सर्वत्र प्रोक्षयेत् शुचीवो हव्या मरुतः आपो हि ष्ठेति ऋचा ततः कृ
ताञ्जलिः स्वस्त्ययनेतीर्थमिति मंत्रद्वयं जपेत् ततः पूर्वस्यां दिशि मण्डपद्वाराद्बहिर्हस्तमात्रे वटतोरणमाम्रस्य वा हस्तद्वयोच्छ्रना
मकं सुशोभननामकं वा शंखांकितं अग्निमीले पुरोहितमिति निधाय नाम्ना संपूज्य चंदनादि चर्चितं कृत्वा राऊँ हस्पति
तत्र न्यसेत् तत्रैकः कलशः स्थाप्यः तत्र मंत्राः महीद्यौरिति भूमिं स्पृशन् प्रार्थ्य ओषधयः समसितियवान्दिस्वा आकलशे
ति आजिघ्र कलशमिति वा कलशं निधाय इमं मे गंगे इति जलेन पूरयेत् गंधद्वारामिति गंध या ओषधीरिति सर्वौषधीः
ओषधयः समिति यवान् काण्डात्काण्डादिति दूर्वाः अश्वत्थे व इति पंचपल्लवाः स्योना पृथिवीति पंचमृदः याः फलिनी
रिति फलं सहिरत्नानीति पंचरत्नानि हिरण्यरूपमिति हिरण्यं युवा सुवासाः इति वस्त्रेण रक्तसूत्रेण च समुद्वेष्टयेत्
पूर्णादर्वीत्यपिधाय पूर्णपात्रं निधाय तत्र ऋग्वेदमावाह्य पूजयेत् ततो दक्षिणे ओं ईश्वरं वा सुभद्रं विकटं वा चक्रांकि
तं तोरणं इषे त्वोर्जे त्वेति निधाय नाम्ना पूर्ववत्संपूज्य चंदनादि चर्चितं कृत्वा तत्पूर्णमंगारकं च न्यसेत् ततः पूर्ववत् कलशं स्था
पयित्वा तत्र यजुर्वेदमावाह्य पूजयेत् ततः पश्चिमे साद्वमो ओं वरं वा सुहोत्रं सुप्रभं पद्मांकितं तोरणं शन्नो देवीरिति निधाय
नाम्ना पूर्ववत्संपूज्य चंदनादि चर्चितं कृत्वा शुक्रं बुधं च तत्र न्यसेत् पूर्ववत्कलशं निधाय सामवेदमावाह्य पूजयेत् तत उत्त
रे वा हस्तमात्रस्य पालाशं वा पूर्णं सुकर्मं सुभीमं वा गदांकितं तोरणं अग्न आयाहीति निधाय नाम्ना संपूज्य चंदनादि चर्चितं कृ
त्वा सोमकेतू शनीस्तत्र न्यसेत् ततः पूर्ववत्कलशं निधाय तत्र विघ्नेशमावाह्य पूजयेत् ततः ओं पतये ह्रीं सर्वामरसिद्धसाध्ये

रभिष्टुतो वज्रधरामरेशः सेवीज्यमानोप्सरसांगणेन रक्षाध्वरं नो भगवन्नमस्ते इंद्रेहागच्छेह तिष्ठेतींद्रं सांगं सपरिवारं सायुधं स
शक्तिकं द्वारकलशे आवाह्य तत्रस्नानान्तरमितींद्रं संपूज्यामुः शिक्षानरतिपीतां पताकां पीतं च ध्वजं हृदयमपि पंचहस्तं दण्डमु
च्छ्रयेत् इंद्रं वो विश्वतस्परीति वा मंत्रः ततः सहस्राक्षं मत्तैरावणस्थितं पीनकिरीटकुण्डलधरं दक्षिणवामकरस्थवज्रोमल
मिदं ध्यात्वा इंद्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः इति नत्वा इंद्राय सांगाय
सपरिवाराय सायुधाय सशक्तिकाय एतं माषबलिं समर्पयामीति बलिं दद्यात् ततः आचम्याग्नेय्यां गत्वा शर्ववल्कलं निधाय
तत्र पुण्डरीकं पूजयित्वा स्मतेच प्रपूज्य एह्येहि सर्वामरहव्यवाह मुनिप्रवीरैरभितोभिष्टुतः तेजोवता लोकगणेन सा
र्धं ममाध्वरं पाहि कवे नमस्ते अग्ने इहागच्छेह तिष्ठेति सांगं सपरिवारं सायुधं सशक्तिकं अग्निं कलशे आवाह्य ततोऽ
ग्नेरग्निं गंधादिना प्रपूज्याग्निं दूतमिति रक्तां पताकां रक्तध्वजं पंचहस्तं दण्डमुच्छ्रयेत् ततः छागस्थं रक्तं दक्षिणवामकरस्थ
तरक्तकमण्डलुं यज्ञोपवीतिनमग्निं ध्यात्वा आग्नेयपुरुषो रक्तः सर्वदेवमयोऽव्ययः धूमकेतू रजोध्यक्षस्तस्मै नित्यं न
मो नमः इति नत्वा सांगायेत्यादि कृसरान्नाऽग्नये एतं माषभक्तबलिं समर्पयामीति बलिं दद्यात् ततः आचम्य दक्षिणग
त्वा प्रतिद्वारशाखं शर्ववल्कलशाट्यं संस्थाप्य वामनगं तत्र संपूजयेत् ततो यजुर्विदा ऋत्विजा कान्तरादौ यजुर्वेदस्वेष्टभो
विश्वदेवतः काश्यपेय स्वाविप्रेंद्र शांतिपात्वं मखे ऋत्विक् विनिप्रभेकं प्राच्यां गंधादिनेषेत्वोर्जेति पूजयेत् ततः ॐ एह्येहि वैवस्व
त धर्मराज सर्वामरैरर्चितधर्ममूर्ते शुभाशुभानंद शुचामधीश शिवाय नः पाहि शिवं नमस्ते भो यमेहागच्छेह तिष्ठेति
सांगादिविशिष्टं यममावाह्य यमाय सोमम् इति गंधादिभिः पूजयित्वा कृष्णां पताकां कृष्णं च ध्वजं पंचहस्तमायतमा
यं गोरिस्म उच्छ्रयेत् ततो महिषारूढं पुनर्दण्डपाशं दक्षिणवामकरद्वयं कृष्णांजनवयो यममग्निसमनयनं यमं ध्यात्वा

वि॰ १३
ए॰ व॰
१९०

१९७

महामहिषमारूढं दण्डहस्तं महाबलं आवाहयामि यज्ञेस्मिन् पूजामेष प्रतिगृह्यतां इति नत्वा सांगायेत्यादि यमायेमं माषभक्तब
लिं समर्पयामीति बलिं दद्यात् ततआचम्य नैर्ऋत्यां पूर्ववत् कलशं स्थापयित्वा कुमुदगजेन्द्रजेयं च पूजयित्वा ओं एह्येहि र
क्षोगणनायक सर्वविशाल वेतालपिशाचसंघैः ममाध्वरं पाहि पिशाचनाथ लोकेश्वर त्वं भगवन्नमस्ते भो निर्ऋते इहागच्छे
ह तिष्ठेति सांगादि विशिष्टमावाह्य ओं घृणिः इति अस्मिन्नन्तमिति वा निर्ऋतिं गंधादिभिः पूजयित्वा नीलां पताकां ध्वजं
च पंचहस्तं दण्डं मोघुणाः समुच्छ्रयित्वा नरारूढं महाकायं खड्गहस्तं महाबलं नीलं रक्षोगणैर्युक्तं नीलाभरणभूषितं निर्ऋ
तिं खड्गहस्तं च सर्वलोकैकनायकं आवाहयामि यज्ञेस्मिन् पूजामेष प्रतिगृह्यतां इति नत्वा सांगायेत्यादि निर्ऋतये पतं माष
भक्तबलिं समर्पयामीति बलिं दद्यात् ततआचम्य पश्चिमद्वारे प्रतिशाखं कलशद्वयं पूर्ववत् स्थापयित्वा अंजने दिग्ग
जं च पूजयेत् ततः साम विदाहं तिज्ञां मामेव दत्त पिंगाक्षो जगतः शक्रदेवतः भारद्वाजस्त्रिविमेदशांतियात्वं मखङ्ग
विति प्रार्थ्य गंधादिना आग्न आयाहीति पूजयेत् तत ओं एह्येहि यादोगणवारिधीनां गणेन पर्जन्यमहाप्सरोभिः विद्या
धरेंद्रामरगीयमान पाहि त्वमस्मान् भगवन्नमस्ते भो वरुणेहागच्छ इह तिष्ठेति सांगादि विशिष्टं वरुणमावाह्य तत्त्वाया
मीति गंधादिभिः पूजयित्वा श्वेतां पताकां ध्वजं च एवं वरुणोमुच्छ्रयेत् ततो मकरस्थं पाशहस्तं शुक्लवर्णं किरीटधारि
णं ध्यात्वा पाशहस्तं च वरुणं मणिसरित्पतिमीश्वरं आवाहयामि यज्ञेस्मिन् वरुणाय नमो नमः इति नत्वा सांगाये
त्यादि वरुणायेमं माषभक्तबलिं समर्पयामीति बलिं दद्यात् ततआचम्य वायव्यां पूर्ववत् कलशं निधाय पुष्पदंतं सिद्धा
र्थं च संपूज्य ओं एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः सह सिद्धसंघैः प्राणाधिपः कालकवेः महाय पूजां भग
वन्नमस्ते भो वायो इहागच्छ इह तिष्ठेति सांगादि विशिष्टं वायुमावाह्य ततो वायो इतस्पर इति गंधादिना पूजयित्वा धूम्राप

ताकांध्वजं च वायोः शान्तमिति ध्यायेत् मृगाधिरूढं विश्वं वरध्वजधरं दक्षवामहस्तं वायुं ध्यात्वा वायुमाकाशगं चैव पवनं वेगवाह
नं आवाहयामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतां अनाकारो महौजाश्च यष्टृदृश्यगतिर्दिवि तस्मै शश्वाय जगतो वायवे हं नमामि चेति
नत्वा सांगाय सपरिवाराय वायवे एनं माषभक्तबलिं समर्पयामीति बलिं दद्यात् तत आचम्योत्तरद्वारे प्रतिद्वारणं एवं कलशद्वयं
प्राग्वत् स्थापयित्वा सार्वभौमं दिग्गजं स्य प्रपूज्याथर्वं लिदाहृतिजेः ओ ह ह्रः त्रेधाथर्ववेदो नृष्टभोगुरुदेवतः वैशंपायनविप्रे
दु शांतिपावं मखे कुर्विति माथर्व शन्नो देवीरिति गायत्र्यादिना पूज्य ततः एह्येहि यज्ञेश्वर यत्त रक्षां विधत्स्व नक्षत्रगणेन सा
र्द्धं सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते सोमेहागच्छ इह तिष्ठ इति सांगादिविशिष्टं सोममावाह्य सोमा
य नं वयं सोमेति वा पूजयित्वा हविर्नां श्वेतां पताकां ध्वजं चाप्यायस्वेतिना सितनरयुतविमानस्थं कुण्डलहारकेयूरकविस्व
रगदाधरं दक्षिणवामभुजद्वयं मकुटिनं महोदरं महाकायं हरितवर्णं कुबेरं ध्यात्वा सर्वनक्षत्रमध्ये तु सोमो राजा व्यवस्थि
तः तस्मै सोमाय देवाय नक्षत्रपतये नमः इति नत्वा सांगाय सपरिवाराय सोमायैनं माषभक्तबलिं समर्पयामीति बलिं दद्यात् त
त आचम्य ईशान्यां पूर्ववत् कलशौ निधाय सुप्रतीकं दिग्गजं मध्ये च तत्र संपूज्य ओं एह्येहि विश्वेश्वर त्रिशूलखट्वाङ्गधारस्व
गणेन सार्द्धं लोकेन यज्ञेश्वर यत्त सिद्ध्यै गृहाण पूजां भगवन्नमस्ते भो ईशानेहागच्छेह तिष्ठ सांगादिविशिष्टमीशानमावाह्य
तमीशानमिति गायत्र्यादिना प्रपूज्य श्वेतां सर्ववर्णां वा पताकां ध्वजं च अभि त्वा देव सवितरिति ध्यायेत् वृषारूढं दक्षिणवाम
हस्तधृतवरत्रिशूलं त्रिनेत्रं शुभ्रवर्णं ईशानं ध्यात्वा वृषस्कंधसमारूढं शूलहस्तं त्रिलोचनं आवाहयामि यज्ञेस्मिन् पूजाम
प्रतिगृह्यतां सर्वाधिपो महादेव ईशानः शङ्कर ईश्वरः शूलपाणिर्विरूपाक्षस्तस्मै नित्यं नमो नमः इति नत्वा सांगायेत्यादि
ईशानायैनं माषभक्तबलिं समर्पयामीति बलिं दद्यात् तत आचम्य ईशानपूर्वयोर्मध्येऽधः पद्मे हि पातालराम हे हृदा

वि·१३
ली·व
१९८

गंगनाकिंनरगीयमानः रत्नोरगेंद्रामरलोकसंघैरनंतरत्नाधरमस्तदीयं भोअनंतेहागच्छेहतिष्ठेतिमंत्रगादिविशिष्टमनंतमावाह्य
गंधैरितिगंधादिभिरभ्यर्च्यमेघवर्णाभ्रेतांपताकाध्वजंवायंगौरित्युच्छ्रयेत् अनंतशयनासीनंफणासप्तकमंडितं पद्मशंखधरोर्ध्व
योदक्षभागकरद्वयं चक्रंगदाधरोर्ध्वाधोवामभागकरद्वयं नीलवर्णमनंतंध्यात्वायोसावनंतरूपेणब्रह्मांडंसचराचरं पुष्पव
द्धारयेन्मूर्ध्नितस्मैनित्यंनमोनमः इतिनत्वा सांगायेत्यादि अनंतायेतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात् ततआचम्य
पश्चिममेनैर्ऋत्यमध्ये· ॐह्रें ॐपद्मयोनिसर्वाधिपतेसंहेंद्रलोकेनसार्द्धंपितृदेवताभिः सर्वस्यधातास्यमितप्रभावोविशाधुरंत्वनः
सनातनशिवाय भोब्रह्मन्निहागच्छेहतिष्ठेतिसांगादिविशिष्टंब्रह्माणमावाह्य ब्रह्मजज्ञानमितिगंधादिभिरभ्यर्च्य· रक्तांप
ताकांध्वजंचतेनैवोच्छ्रित्यात्तसूत्रकुशमुष्टिधरोर्ध्वाधोदक्षिणकरंस्रुवकमंडलुधरोर्ध्वाधोवामकरद्वयंचतुर्मुखंपद्मसुलज
दिलेलेवादंरक्तवर्णंब्रह्माणंध्यात्वा पद्मयोनिश्चतुर्मूर्तिर्वेदावासःपितामहः यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मैनित्यंनमोनमः
इतिनत्वा सांगायेत्यादिब्रह्मणेपंतमाषभक्तबलिंसमर्पयामिइतिबलिंदद्यात् ततआचम्य मंडपमध्येचामरकिंकिणीयुतमा
स्तृत्वदंडंदशषोडशहस्तदंडोवादशहस्तदीर्घंत्रिहस्तविस्तारः पंचहस्तदीर्घोहस्तविस्तारोवामहाध्वजोविचित्रवर्णाइंद्र
स्यहूशइतिस्थाप्य ब्रह्मजज्ञानमितिवतनैवब्रह्मपूजनंकार्यं ततोमंडपषोडशस्तंभेषुसर्वेभ्योदेवेभ्योनमः वंशेषुकिन्नरे
भ्योनमः ततःपूर्वस्यांदिशिकिंचिन्निम्नपल्लिष्यापविश्य त्रैलोक्येयानिभूतानिस्थावराणिचराणिच ब्रह्मविष्णुशिवैःसार्द्धं
रक्षांकुर्वंतुतानिमे देवदानवगंधर्वायक्षराक्षसपन्नगाः ऋषयोमानवागावोदेवमातरएवच सर्वेममाध्वरेरक्षांप्रकुर्वंतुमुदा।
न्विता ब्रह्माविष्णुश्चरुद्रश्चक्षेत्रपालागणैःसह रक्षंतुमंडपंसर्वेघ्नंतुरक्षांसिसर्वतः त्रैलोक्यस्थेभ्यश्चरेभ्योऽभूतेभ्योनमः ब्रह्म
णेविष्णवे·शिवाय देवेभ्यो गंधर्वेभ्यो यक्षेभ्यो राक्षसेभ्यः पन्नगेभ्यो ऋषिभ्यो·मनुष्येभ्यो गोभ्यो देवमातृभ्योनमइतिप्रत्येकंसं

पूजा॰ पुष्पादिपूजनं सर्वकर्मेश्वरैरेव तत्सांप्रतमावेनेभ्यः एवमाषभक्तबलिं दद्यात् ततआचार्यः सविकृष्यप्रक्षालितपादपाणिराचांतः प्रा
कद्वारेण मण्डपं प्रविश्य दक्षिणद्वारपश्चिमदेशे उपविश्य आचम्य भोजनात्मणा यथाविहितं कर्म करिष्यामि इति ब्रूयात् ततो गुरुर्म
हावेद्याः परि पुष्पाणि विकीर्य उपरि च वितानं पंचवर्णफलपुष्पोपशोभितं वेदिमाने बध्नीयात् ग्रहवेद्यां च तत्मानं बध्नीयात्
सर्वतोभद्रं च लिखेत् शूर्णाभिषेकदीक्षायां तु नवहस्तदशहस्तपरिमितमथ वेद्यां श्रीचक्रं तत्र हि इष्टदेवताचक्रं वा स्व
येत् नवहस्तत्रिहस्तवा श्रीचक्रमभिषेचने स्थण्डिले नित्यपूजायां हस्तमात्रप्रशस्तमिति तंत्रराजवचनात् तस्मिन्न
देयहवेदी सर्वतोभद्रमण्डलवेदी चेशान्यां क्रियते गुरुमण्डलवेदी वायव्ये मिथुनपूजावेदी आग्नेय्यां तु हि नित्यापूजा
वेदी वास्तुमण्डलसमीपे इति संप्रदायः तथा अत्रावसरे आचार्यः स्वगृह्योक्तविधिना स्वकुण्डे अग्निस्थापनं कुर्यात् तेनैव
क्रमेणान्यकुण्डेष्वपि स्वशाखोक्तविधिना ऋत्विजः अग्निस्थापनं कुर्युः गुरुस्तु सर्वकर्माध्यक्षस्तिष्ठेत् एवमग्निप्रणीते
षु गुरुर्ग्रहवेद्यां सर्वतोभद्रे च अद्येहेत्यादि॰ दीक्षादानांगतया मण्डलदेवस्थापनं करिष्य इति संकल्प्य ब्रह्मादीन्स्थापयेत्
मध्ये ब्रह्मा॰ ब्रह्मजज्ञानं गौतमो वामदेवो ब्रह्मा त्रिष्टुप् ब्रह्मस्थापने पूजने च विनियोगः एवमुत्तरत्र ॐ ब्रह्मजज्ञानं १ उत्तरे सो
मः ॐ आभित्वादेवसवितः २ पूर्वे इंद्रः इंद्रं वो मधुच्छंद इन्द्रो गायत्री ४ आग्नेय्ये अग्निः अग्निं काण्वो मेधातिथिः ऋषिर्गायत्री ७
पश्चिमे वरुणः तत्त्वायामि शुनःशेपो वरुणस्त्रिष्टुप् ८ वायव्यां वायुः वायो शतं गौतमो वामदेवो वायुरनुष्टुप् ९ वायु
सोममध्ये अष्टौ वसवः अत्र मे याव वरुणो वसिष्ठो वामसवस्त्रिष्टुप् ॐ जन्मया अत्र च १० सोमेशानमध्ये एकादश रुद्राः आरुद्रासः
श्यावाश्व एकादशरुद्राः जगती आरुद्रासः। ॥ ईशानेंद्रमध्ये द्वादशादित्याः त्यान्नुक्षत्रियान् साम देवो मरीचि द्वादशादित्यागा
यत्री १२ इंद्राग्निमध्ये अश्विनौ अश्विनावर्तगणो गौतमो अश्विनावुष्णिक् १३ अग्नियममध्ये विश्वेदेवाः सप्तरकाः ओमासश्च

वि·१३
ली·व
१९५
199

पुत्रंदेविश्वेदेवागायत्री १४ यमनिर्ऋतिमध्ये सप्तयक्ताः अभितंवामदेवः सप्तयक्ताः प्रकृतिः ॐ अभित्वंदेवंसवितारमोण्योक
विक्रतुमर्चामिसत्यसवरत्नधामभि प्रियंमतिंकविंऊर्ध्वायस्यामतिर्भाऽअदिद्युतत्सवीमनिहिरण्यपाणिरमिमीतःसुक्रतुःकृपा
स्वः १५ निर्ऋतिवरुणमध्ये भूतनागाः आपएपासार्पराज्ञीसर्पागायत्री अयंगौः १६ वरुणवायुमध्ये गंधर्वाप्सरसः अप्सरसा
मेनशाक्राख्यमेणोगंधर्वाप्सरसोनुष्टुप् ॐ अप्सरसानांगंधर्वाणां १७ ब्रह्मसोममध्ये स्कंदनंदीश्वरशूलमहाकालाः कुमार
कुमारः स्कंदस्त्रिष्टुप्कुमारमाता १८ ऋषभंऋषभोवैराजोनुष्टुप्ऋषभंमा १९ ब्रह्मेशानमध्ये ब्रह्मादिः सप्तकोणावाअदिति
लौकोबृहस्पतिर्देवोनुष्टुप् ॐ अदितिर्ह्यजनिष्ट· २० ब्रह्मेंद्रमध्ये दुर्गाविश्वभुक्· तामग्निवर्णांसोमभरिर्दुर्गात्रिष्टुप् ताम
ग्निवर्णां २१ इदंविष्णुः कदावोमेधातिथिर्गायत्री· ॐ इदंविष्णुः २२ ब्रह्माग्नेयमध्ये स्वधा उदीरतांशंखः स्वधात्रिष्टुप् उदी
रतांशंखः स्वधात्रिष्टुप् उदीरतांसूनृताः २३ ब्रह्मयममध्ये विश्वमृत्युरोगाः परंमृत्यो संकसुकोमृत्युरोगास्त्रिष्टुप् २४
ब्रह्मनिर्ऋतिमध्ये गणपतिः गणानान्त्वागृत्समदोगणपतिर्जगती २५ ब्रह्मवरुणमध्ये आपः शन्नोदेवीरभिः सिंधुद्वीप
आपोगायत्री २६ ब्रह्मवायुमध्ये मरुतः मरुतोयस्यराहूगणोगौतमोमरुतोगायत्री २७ ब्रह्मणः पादमूले· कर्णिकायां
पृथ्वी· स्योनामेधातिथिर्भूमिर्गायत्री· २८ तत्रैवगंगादिनद्यः इमंमेसिंधुद्वीपमेधागंगायमुनासरस्वत्योजगती २९ तत्रै
वसप्तसागराः यामत्रोधाम्नोराजन्नितोवरुणनोमुंचयदापोअघ्न्याइतिवरुणेतिशपामहे ततोवरुणनोमुंच मपिवायोमा
षष्ठीहिंसीरतोविश्वभ्रवाभूस्त्वोतोवरुणनोमुंच ३० तदुपरिमेरुनाम्नाष्टुजयेत् वाह्येसोमादिसमीपेक्रमेणायुधानि·
गदां· त्रिशूलं· वज्रं· शक्तिं· खड्गं· पाशं· अंकुशं· तद्वाह्ये उत्तरादितः गौतमः भरद्वाजः विश्वामित्रः कश्यपः जमदग्निः व
शिष्ठः अत्रिः अरुंधतीति· ८ तद्वाह्ये पूर्वादि· ऐंद्री· कौमारी· ब्राह्मी· वाराही· चामुण्डा· वैष्णवी· माहेश्वरी वैनायकी· इत्य

जरग:

ष्टौ शक्तयः एतास्स्वस्वमंत्रैः प्रतिष्ठाप्य । प्रत्येकं सहवा पूजयेत् एवमग्निं प्रणीय देवतास्थापनवेद्यां ग्रहादिपंचाशीतिदेवस्था
पनं कुर्यात् तत्रायं प्रयोगः अद्येत्यादि । दीक्षादानाख्यकर्मणि ग्रहादिपीठदेवतास्थापनमहं करिष्ये प्रणवस्य परब्रह्म
ऋषिः परमात्मा देवता देवी गायत्री छंदः आहुतीनां क्रमेण जमदग्निभरद्वाजभृगुगौतमऋषयः अग्निवायुसूर्या देवता देवी गाय
त्री देवी बृहत्पंक्तिछंदांसि सूर्याद्यावाहने विनियोगः तत्राग्रपीठमध्ये वर्तुले द्वादशांगुले मंडले प्राङ्मुखं सूर्यं रक्तपुष्पाक्ष
तैः आकृष्णेनेति हिरण्यस्तूप ऋषिः सविता देवता त्रिष्टुप् छंदः सूर्यावाहने विनियोगः आकृष्णेन । ॐ भूर्भुवः स्वः कलिंग
देशोद्भव काश्यपसगोत्र सूर्य इहागच्छेत्यावाह्येह तिष्ठेति स्थापयेत् १ तत्राग्नेये चतुरस्रे चतुर्विंशांगुले मंडले प्रत्यङ्मुखं
सोमं श्वेतपुष्पाक्षतैः आप्यायस्वेति गौतमः सोमो गायत्री सोमावाहने विनियोगः ॐ आप्यायस्व । ॐ भूर्भुवः स्वः यमुना
तीरोद्भव आत्रेयसगोत्र सोमेहागच्छेत्यावाह्येह तिष्ठेति स्थापयेत् २ ततो दक्षिणे त्रिकोणे त्र्यंगुले मंडले दक्षिणामुखं भौ
मं रक्तपुष्पाक्षतैः अग्निर्मूर्द्धेति विरूपकोंगारको गायत्री अंगारकावाहने विनियोगः ॐ अग्निर्मूर्द्धा । ॐ भूर्भुवः स्वः स
रस्वतीसमुद्भव भरद्वाजसगोत्र भौमेहागच्छेह तिष्ठेति स्थापयेत् ३ तत ईशाने बाणाकारे चतुरंगुले मंडले उदङ्मुखं
बुधं पीतपुष्पाक्षतैः उद्बुध्यस्वेति बुधः सोमपुत्रो बुधस्त्रिष्टुप् बुधावाहने विनियोगः ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयस
गोत्र बुधेहागच्छेत्यावाह्येह तिष्ठेति स्थापयेत् ४ तत उत्तरतो दीर्घचतुरस्रे षडंगुले उदङ्मुखं बृहस्पतिं पीतपुष्पाक्षतैः बृ
हस्पते अतीति गृत्समदो बृहस्पतिस्त्रिष्टुप् बृहस्पत्यावाहने विनियोगः ॐ बृहस्पते अति । ॐ भूर्भुवः स्वः सिंधुदेशोद्भव आंगिर
सगोत्र बृहस्पत इहागच्छेत्यावाह्येह तिष्ठेति स्थापयेत् ५ ततः पूर्वे पंचकोणे नवांगुले मंडले प्राङ्मुखं शुक्रं शुक्लपुष्पा
क्षतैः शुक्रः पाराशरः शुक्रो द्विपदा विराट् शुक्रावाहने विनियोगः ॐ शुक्रः शुशुक्रात । ॐ भूर्भुवः स्वः भोजराटदेशो

वि०१२
ग्री०व०
२००

200

ऽवभार्गवसगोत्रशुक्रेहागच्छेत्यावाह्येह तिष्ठेति स्थापयेत् ६ ततः पश्चिमेधनुषिद्व्यंगुलेमण्डलेप्रत्यग्मुखं शनिं कृष्णपुष्पाद
तैः शमग्निरिति विदिः शनिरृषिः कृशम्यावाहने विनियोगः ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भवकाश्यपसगोत्रशनेइहागच्छ
इत्यावाह्येह तिष्ठेति स्थापयेत् ७ ततः कृष्णस्तंथमण्डले प्रत्यग्मुखं शनिं कृष्णपुष्पादतैः शमग्निरिति विदिः शनिरृषिः
कृशम्यावाहने विनियोगः ॐ भूर्भुवः स्वः पूर्वदेशोद्भवपावलिगोत्रराहो इहागच्छेत्यावाह्य इह तिष्ठेति स्थापयेत् ८ ततो वा
यव्ये ध्वजाकारे मण्डले दक्षिणामुखान्केतून्कृष्णपुष्पादतैः केतुं जैमिनिः केतवो गायत्री केत्वावाहने विनियोगः ॐ केतुं
कृण्वन् ॐ भूर्भुवः स्वः मध्यदेशोद्भवाः जैमिनिगोत्राः केतव इहागच्छतेत्यावाह्येह तिष्ठतेति स्थापयेत् ९ अथाधिदे
वताः श्वेतपुष्पाक्षतैः क्रमात्सूर्यादीनां दक्षिणतः स्थाप्याः त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप् विनियोगः सर्वत्रेत्येव त्र्यंबकं ॐ
भूर्भुवः स्वः ईश्वरं १ गौरीर्मिमायदीर्घतमाउमाजागतीसोमदक्षिणे २ यदक्रंदो दीर्घतमाः स्कंदस्त्रिष्टुप् ३ विष्णोर्दीर्घ
तमा विष्णुस्त्रिष्टुप् ४ ब्रह्मयज्ञाने गोतमो वामदेवो ब्रह्मा: त्रिष्टुप् ५ इंद्रं वो मधुच्छंद इंद्रो गायत्री ६ यमाय सोमाय
यमो यमोनुष्टुप् ७ मोषुणो घोरः कण्वः कालो गायत्री ८ उषो वाजप्रस्कण्व चित्रगुप्तो बृहती ९ एवमेव शुक्लपुष्पा
दतैः ग्रहाणां वामे मंत्रानेवाह्यतानेहन्के इहागच्छ इह तिष्ठेति चोक्त्वा प्रत्यधिदेवताः स्थापयेत् अग्निं कोणे मेधातिथिरग्नि
र्ग्निर्गायत्री ॐ अग्निं दूतम् १ अप्सु मेधातिथिरापोनुष्टुप् २ स्योना मेधातिथिर्भूमिर्गायत्री ३ इदं विष्णुर्मेधातिथिर्विष्णु
र्गायत्री ४ इंद्रश्रेष्ठानि गृत्समद इंद्रस्त्रिष्टुप् ५ इंद्राणीं वृषाकपिरिंद्राणी पंक्तिः ६ प्रजापते न हिरण्यगर्भः प्रजापतिस्त्रि
ष्टुप् ७ आयं गौः सार्पराज्ञी सर्पा गायत्री ८ ब्रह्मयज्ञानं गोतमो वामदेवो ब्रह्मा त्रिष्टुप् ९ ततः शुक्लपुष्पादतैः विनाय
कादीन्पंचगणानां त्वा गृत्समदो गणपतिर्जगती राहो विनायकं जातवेदसे कश्यपो दुर्गा त्रिष्टुप् १ शनेरुद्ररनोडुर्गा २

तववायवृतस्पतेभ्यस्वस्त्रंगिरसोवायुर्गायत्रीरेवेकृतनरंतोवायुंप्रतानंमंत्रान्मंतिसांप्रदायिका: १ आदित्यत्वस्पतस्तस्याका
शोगायत्रीराहोर्दक्षिणेआकाश: ४ एषोऽषामस्कण्वोश्विनौगायत्रीअश्विनाविहागच्छेतेहृतिष्टेतानिकेतोर्दक्षिणे: श्वि
नौ॰ ५ अथलोकपाला: इंद्रविम्वाजेनामाधृच्छंदसइंद्रोनुष्टुप्॰ इंद्रेहागच्छेहृतिष्ट॰ पूर्वेइंद्रमेवमनरत्र १ अग्निमेधातिथि
रग्निर्गायत्री २ यमायसोमंयमोयमोनुष्टुप् ३ मोषणोयोरोकाण्वोनिर्ऋतिर्गायत्री ४ त्वन्नोअग्नेवामदेवोवरुणस्त्रिष्टुप्
ननोवायोअस्पेवायुर्गायत्री ६ सोमाधेनुंगौतम: सोमस्त्रिष्टुप् ७ तमीशानंगौतमईशानोजगती ८ सहस्रशीर्षाना
रायणोनतोनुष्टुप्ईशानपूर्वयोर्मध्ये॰ नंत ९ ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप् नैर्ऋत्यपश्चिमयोर्मध्येब्र
ह्माणं १० नत्रउग्रैरक्षेत्रस्यवामदेववक्षेत्रपालोनुष्टुप्वास्तोष्पतेवशिष्टोवास्तोष्पतिस्त्रिष्टुप् तत: सामधुनिशारीरस्तंवाह
नपरिमेष्टिन: विषपापहरोनित्यमत: शांतिंप्रयच्छमे इत्यनेनउत्तरेगरुत्मंतमावाह्य॰ रवे: पूर्वेशोषसोमस्याग्नेवास्तु
किंभौमाग्नेनत्कंबुधोत्तरेककौटकंबृहस्पतेरग्रेपद्मकंशानिपश्चिमेशंखपालंराहो: पुर: कंवलंकेतो: पुर: कुलिकंपी
ठान्याच्यामश्विन्यादिसप्तनक्षत्राणिविष्कंभादिसप्तयोगा: ववबालवकरणेसप्तद्वीपानिऋग्वेदंचदक्षिणेपुष्यादिसप्त
नक्षत्राणिधृत्यादिसप्तयोगा: कौलवतैतिलकरणेसप्तसागरान्यजुर्वेदंचपश्चिमेस्वात्यादिसप्तनक्षत्राणिवज्रादिसप्त
योगान् गरवणिजेकरणेसप्तपातालानिसामवेदंच उत्तरेअभिजिदादिसप्तनक्षत्राणिसाध्यादिषट्योगान् विष्टि
करणंभूरादिसप्तलोकान् अथर्ववेदं वायव्यांध्रुवंसप्तर्षींश्च॰ अध्यपथावकाशेगंगादिसप्तसरित: सप्तकुलाचला
न् अष्टौवसून् द्वादशादित्यान् एकादशरुद्रान् एकोनपंचाशन्मरुत: षोडशमातॄ: षड्ऋतून्द्वादशमासान् द्वेअय
ने॰ पंचदशतिथीन् षष्टिसंवत्सरान् नागान्यज्ञ–न् यक्षान् गंधर्वान्॰ विद्याधरान् अप्सरस: रक्षांसि॰ भूतानि॰ मनुष्यानिति॰

वि·१३
र्णा·व
२११

201

ततो वेदीशान्यां कलशं स्थाप्य । तत्र वरुणमावाह्य संपूज्य । अभ्यर्चयेद्यथा कलशाभिमंत्रणं ॐ कलशस्य मुखे विष्णुः कंठे
रुद्रः समाश्रितः मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा ऋग्वेदोथ यजुर्वे
दः सामवेदो ह्यथर्वणः अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः अत्र गायत्री सावित्री शांतिः पुष्टिकरी तथा आयां
तु यजमानस्य दुरितक्षयकारकाः देवदानवसंवादे मथ्यमाने महोदधौ उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः शिवः स्वयं त्वमेवासि वि
ष्णुस्त्वं च प्रजापतिः आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः त्वयि तिष्ठंति सर्वेपि यतः कामफलप्रदाः त्वत्प्रसादादिमं
यज्ञं कर्तुमीहे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा । इति । ततः फलपुष्पमाल्योल्लसितवितानं हृहस्पतिदे
वतं सूर्यादिभ्य इदं न ममेत्युत्सृजेत् ग्रहवेद्युपरि विधीयात् एवं वेदीक्रमणं उपप्रतिष्ठादिकं विदध्यादिति अन्यत्सर्वं श्रा
गुक्तविधिना विधेयं ततो गुरुः सशिष्यः प्रातः स्नायकृतावश्यककियः शिष्याय प्रादेशमात्रं यथोक्तं दंतकाष्ठं मूल
मंत्रेण सप्ताभिमंत्रितं दत्वा दंतधावनं कारयित्वा दंतान्विशोध्य दंतकाष्ठं प्रदाप्य । पुरस्तात्से हस्तपात्रे स्थंडिले त्य
जेत् ततो गुरुस्तत्परीक्षां कुर्यात् तत्र शुभाशुभफलानि प्रागेव प्रमाणनिरूपणे प्रोक्तानि प्रायश्चित्तं चाग्रे वक्ष्यते
ततः शिष्योपि स्नातः कृतपूर्वाह्णिकक्रियः समलंकृतः श्रीगुरुं प्रणम्य तदाज्ञया तत्सामीप्यं उपविशेत् ततो गुरुस्तत्र
त्रिजप्य स्वस्वकुण्डे तथैव देवं सांगं सावरणं संपूज्य सद्योनैः तिलैः समंत्रकल्पोक्तपुरश्चरणहोमदशांशैर्वा अष्टोत्तरसहस्रमष्टो
त्तरशतं वा जुहुयात् ततो गुरुः शिष्यं स्वहस्तान्निर्मितं पंचगव्यं पाययित्वा कुण्डसमीपं नीत्वा दिव्यदृष्ट्यावलोकनतस्य हृ
दयारविंदाज्जीवात्मानं मूलमंत्रसुषुम्नया परिपाट्या तदेहात् ब्रह्मरंध्रमार्गेण निःसार्य्य स्वात्मनि गुरुरुक्तपूर्वया योगबलेन संयोज्य

शिष्यषडध्वशोधनं कुर्यात् तत्र शिष्यस्य पादयोः कलाध्याने निवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यतीताख्येति पंचकलात्मकं संचिंत्य त
तत्स्थलिंगप्रदेशे शिवशक्तिसद्रूपरसगन्धाकाशवाय्वग्निसलिलपृथिव्यात्मकं षट्त्रिंशत्तत्त्वरूपं शैवतत्त्वाध्यानं ध्यायेत् इति
शैवदीक्षायां । वैष्णवदीक्षायां तु जीवप्राणधियमनइंद्रियदशकतन्मात्राभूतानां पंचकमपि लक्ष्मतेजसांत्रितयं सोमसूर्याग्नि
मयं वासुदेवप्रद्युम्नवासुदेवसंकर्षणप्रद्युम्नानिरुद्धाख्यतारः सौरदीक्षायां तु भूततन्मात्रेंद्रियाणि मनोगर्वश्च बुद्धिश्च
धीस्तथाप्रधानं चेति । इंद्रियाणि दश । ज्ञानकर्मभेदात् गर्भोऽहंकारः प्रधानप्रकृतितत्त्वं शक्तिदीक्षायां तु आत्मविद्याशि
वाख्यते विपरीताभ्यस्तपवच सर्वतत्त्वं चेति विपरीताः शिवविद्यात्मानः इति क्रमेण तपवच आत्मविद्याशिवाख्ये वेति दश
तत्त्वानि । इत्थं तत्तद्दीक्षायां तत्तत्स्थाने चिंतयेदिति । गाणदीक्षायां तु शैवतत्त्वान्येव ज्ञातव्यानि ततः शिष्यस्य नाभौ अतल
वितलसुतलमहातलतलातलपातालभूर्भुवःस्वर्महर्जनस्तपःसत्यलोकात्मकं चतुर्दशभुवनाध्यानं संचिंत्य ततः
शिष्यशिरसि पदसमुदायमयं मूलमंत्रस्वरूपं मंत्राध्यानं भावयेदिति शिष्यशरीरे षडध्वकं संचिंत्य तेनार्चनं स्पर्शनं गु
रुः स्वकुर्यात् । अमुकस्य कलाध्यानं शोधयामि स्वाहा इत्यष्टधा हुत्वा भुवनाध्यानं वर्णाध्वनि विलीनं विभाव्य पुनः अमुक
स्य वर्णाध्यानं शोधयामि स्वाहा इत्यष्टधा हुत्वा तं पदाध्वनि विलीनं विभाव्य पुनः ॐ अमुकस्य पदाध्यानं शोधयामि स्वाहा
इत्यष्टधा हुत्वा तं मंत्राध्वनि विलीनं विभाव्य पुनः अमुकस्य मंत्राध्यानं शोधयामि स्वाहा इत्यष्टधा हुत्वा ब्रह्मरंध्रस्थ परम
शिवे विलीनं विभाव्य पुनः संहृतिप्रतिलोमेन परमशिवस्य सकाशान्मंत्राध्यानं सृष्ट्वा ततः पदाध्यानं तस्माद्वर्णाध्यानं त
तो भुवनाध्यानं तस्मात्तत्त्वाध्यानं ततः कलाध्यानं च सृष्ट्वा तत्तत्स्थाने संस्थाप्य शिष्यं दिव्यदृष्ट्या विलोकयन् स्वस्मिन् स्थित
शिष्यचैतन्यं तत्तनोः हृदयारविंदे आवाहनोक्तप्रकारेण तत्तद्ब्रह्मरंध्रे नियोजयेत् अत्र यद्द्रव्यसंकरतान्तीनामध्वशोधनं तत्कार्यं ते

वि· २३
शि·व·
२·२
202

षांपादोदकप्रदानेनशोधनंकुर्यात् ततः सर्वव्रतेष्टदेवतांगावरणदेवतानांहुतेनैकैकामाहुतिंकृत्वा ॐभूरग्नयेपृथिव्यैचमह
तेचस्वाहा ॐभुवोवायवेन्तरिक्षायचस्वाहा ॐस्वरादित्यायचदिवेचमहतेचस्वाहा· ॐभूर्भुवःस्वःचंद्रमसेनक्षत्रेभ्योदि
ग्भ्यश्चमहतेचस्वाहा इत्याहुतिचतुष्टयंकृत्वा ततः पूर्वप्राणबुद्धिदेहधर्माधिकारतोजाग्रत्स्वप्नसुषुप्त्यवस्थासुमनसावा
चाकर्मणाहस्ताभ्यांपद्भ्यामुदरेणशिश्नायत्स्मृतंयदुक्तंयत्कृतंतत्सर्वंब्रह्मार्पणंभवतुस्वाहा इत्यष्टावाज्याहुतीःकृत्वा·
ॐसहस्रार्चिर्महातेजानमस्तेवह्निरूपधृक् सर्वाशिनेसर्वगतपाकायनमोस्तुते त्वंरौद्रश्चोरकर्माचघोरहात्वंनमोस्तुते
विस्रस्त्वंलोकपालोसिशांतिमत्रप्रयच्छमे इत्यग्निंप्रार्थ्याग्निमंत्रेणप्राग्वदग्निंसंपूज्य· न्यूनातिरिक्तसिद्ध्यर्थंददामिसहु
तेनितिलं ॐसांगंकुरुकुरुस्वाहा इतितिलैराहुतिंकृत्वाहुतेनस्रुवमाज्यपूर्णंतदुपरिपुष्पमधोमुखंस्रुवंनिधायपाणिभ्यांस्रुवंस्रु
ग्दण्डाभ्यांकराभ्यांगृहीत्वोत्थायस्रुक्स्रुवयोर्मूलंनाभौनिधायवौषडंतेनमंत्रेणाहुतित्रयंप्राग्वत्तत्रदेवंसंपूज्य· वह्नेः स
काशाद्ब्रह्मासनकलशौविसृज्यप्राग्वद्ब्रह्मार्पणमग्निजिह्वागन्तृत्रिमंत्रैरेकैकामाहुतिंकृत्वाप्राग्वत्प्रोक्षणीयजलेनाग्निंपरि
षिंच्य· ॐभोभोवह्नेमहाशक्तेसर्वकर्मप्रसाधक· कर्मांतरेपिसंप्राप्तेसान्निध्यंकुरुसादरं इत्यग्निंप्रार्थ्य· संहारमुद्रयात
स्तान्नत्वाब्रह्मणःपरिधीन्विस्तरणान्ब्रह्मसीमग्नौप्रक्षिप्य· प्रणीतापात्रमब्रह्मणःसव्यउत्तरतःकुशास्तरेनिधाय ॐप्राच्यैदिशे
नमः एवंदक्षिणायैप्रतीच्यैउदीच्यै· ऊर्ध्वायैदिशेनमः इतितत्तद्दिक्षुप्रणीताजलमुत्क्षिप्य· अधरायैदिशेनमः इति भू
मौजलंनिक्षिप्य भूमौपतितजलेनस्वात्मानंप्रोक्ष्यचकुशैः संप्रोक्षयेदितिप्रणीतोद्वासनंविधायब्रह्माणमुद्वास्यव
स्त्रस्थानेब्राह्मणायसहिरण्यंपूर्णपात्रंदापयेत् इतिशैवागमहोमविधिः पूर्णपात्रस्वरूपंतदीयप्रमाणेऽभिहितं ततोग
न्धमंत्रेणशिष्यनेत्रेनूतनवस्त्रपटेनबध्वातंहस्तेनगृहीत्वा कुंभसमीपेगत्वातेनसहतस्यांजलिंपुष्पैरापूर्यस्वयंमूल

मंत्रमुच्चरन् वटस्थदेवतायै पुष्पांजलिं दत्वा तस्य नेत्रबंधनं विमुच्य कुशास्तरे तमुपवेश्य अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः इति मंत्रं पाठयित्वा कुंभे देवं सांगं सावरणं सर्वोपचारैः संपूज्य प्राग्वत् भूतशुद्धिं विधि
ना शिष्यस्य देहे संस्कृत्य संशोध्याप्याय्य तस्य देहे मूलमंत्रस्य ऋष्यादि सकलन्यासजालं विधाय पुनः कुंभस्थदेवतां गंधा
दिपंचोपचारैः संपूज्य मण्डपस्थदेवताः सलोकपालाः सावरणदेवताश्च देवता गणेशादिचतुरायतनदेवताः स्वस्वसाव
रणसहिता देवस्यांगे विलीना इति विभाव्य तं प्राणकृद्विधिना षडंगन्यासयोगेन सकलीकृत्य तेजोरूपमापाद्य ततस्तेजोरूपं
कलशजलं परब्रह्ममयं संचिंतयन् शिष्यं समलंकृतं वेद्याः समीपे पूर्वे ऐशाने वा तदन्यतमदिशि सर्वतोभद्रादिमण्डले
पूर्वाभिमुखं भद्रपीठे समुपवेश्य पंचवाद्यघोषपुरःसरं गुरुः कुंभमुद्धृत्य कुंभस्थाम्रपल्लवादिकं कल्पवृक्षशाखां तु
ध्यात्वा शिष्यशिरसि निधाय वेदघोषं कुर्वद्भिः ऋत्विग्भिः अन्यैश्च ब्राह्मणैः सह मूलमंत्रेण विलोममातृकया तं पूर्वाभि
मुखोपविष्टं पूर्वाभिमुखः स्वस्तिकेन अभिषिंच्य पुनः पूर्वमभ्यर्चितमस्त्ररूपं शंखस्थितं तत्तोयैरभिषिच्य तत्करकावशि
ष्टजलेन शिष्यमाचामयित्वा देवतास्वरूपं तं प्राग्वत् षडंगन्यासेन सकलीकृत्य पुनस्तं नववाससी परिधाप्य स्वाचा
न्तं स्वसमीपे समुपवेश्य शिष्यदेहे संक्रान्तं देवं तस्यैव देहे गंधादिपंचोपचारैः संपूज्य शिष्यदेवतयोरैक्यं विभावयन् स्ववि
नस्य शिष्यस्य दक्षिणकर्णे श्रीमूलमंत्रं गणेशादिचतुरायतनमंत्रपूर्वकं गणेशादीनां याम्यादिपूर्वकं तत्तं दग्गतयाऽ
जनक्रमेण वारत्रयं वदेत् शिष्यो ब्राह्मणश्चेत्तस्य हस्ते मंत्रदानरूपेणोदकं दद्यात् अन्येभ्यस्त्वेवमेव वदेत् ततः शिष्यः
स्वगुरूपदिष्टमंत्रं ऋष्यादिकरषडंगन्यासपूर्वकमष्टोत्तरशतमष्टाविंशतिवारं यथाशक्ति वा जपित्वा जपं समर्प्य गुरुमंत्रदेव
तानामैक्यं विभाव्य साष्टांगं दंडवत् प्रणम्य गुरुं प्रणमेत् पुनः पंचांगप्रणाममेव तत्र साष्टांगपंचांगयोर्लक्षणमुक्तं प्रागेव प्र

माणे· इत्थं प्रणम्य गुरवेऽक्षतिं सम्यक्स्वप्रमाणोक्तां दक्षिणां दद्यात् इति क्रियामयी दीक्षा अथैवं विस्तरतः क्रियादीक्षां कर्तुमश
क्तश्चेत्सर्वैकैकनिष्ठमण्डपे प्राग्वद्वेदिकायां मण्डलं कृत्वा तत्रैव कुंभस्थापनं कृत्वा ऋत्विग्वरणं शास्त्रोक्तं गुरुः स्वयमेव
कुण्डे कृत्वा तत्राग्निस्थापनाद्यखिलं कृत्वोक्तविधिनाभिषिच्य दीक्षां दद्यात् मण्डपकरणाशक्तौ क्वचित्प्रशस्तस्थले प्रा
ग्वन्मण्डलं तत्र देवतापूजां चक्रं च वा कृत्वा तदशक्तौ प्रागुक्तविधिना स्थण्डिलं कृत्वा तत्रोक्तविधिनाग्निं संस्थाप्योक्तवि
धिना होमादिकं कृत्वाभिषिच्य मंत्रं दद्यात् अथैर्वर्णीयाः तत्र नारदपंचरात्रे अथैर्भास्वद्गंधाश्च शब्दाख्याकृतयस्तथा
विकाराश्च विशेषेण वह्निवेद्याः कर्मसिद्धये· पद्मरागद्युतिः श्रेष्ठो लाक्षारससमप्रभः वालार्कवर्णोऽक्षतभुक्कुजपाभः शस्त
ते बुधैः इन्द्रगोपकसंकाशः शोणिताभोथ पावकः शक्रचापनिभः श्रेष्ठः कुसुंभाभस्तथैव च रक्तानां पुष्पजातीनां व
र्णेनाग्निर्विहोच्यते अथ गंधः स्तांधद्रव्यगंधाग्निहुतगंधः सुशोभनः आज्यधूः पद्मगंधः स्याद्विल्वगंधश्च सुव्रतः नाग
चंपकपुन्नागपाटलीयूथिकानिभः पद्मेंदीवरकह्लारसर्पिर्गुग्गुलसन्निभः पावकस्य शुभो गंधः इति अथ शब्दः जीमू
तवल्लकिशिखीम्रदंगध्वनितुल्यकः शब्दोऽग्नेः सिद्धये होतुरन्यथा स्यादसिद्धिदः शारदातिलके· भेरीवारिदहस्तींद्र
ध्वनिर्वह्नेः शुभावहः इति अथाकृतिः हंसाकारो द्विजः श्रेष्ठध्वजचामरसन्निभः विमानानां हयानां च प्रासादानां वृष
स्य च आकारेणाथ हंसानां मयूराणां च सिद्धिदः तदाकृतिः सदा वह्निः सद्यः सिद्धिकरः स्मृतः शेषाणां दक्षिणांतरू
पेन शस्तं होमकर्मणि· यद्रूपकथितं चैतद्यदि तस्य प्रतिक्षणं अथान्योन्यत्वमपद्येत तदा सिद्धिकरोनलः अथ शिखाः
विषमाश्च शिखा वह्नेः स्यादयस्त्वशुभावहाः कृशाकृशेन तान्दीर्घाग्निज्वाला सिद्धिदाः स्मृताः तथा शारदातिलके प्र
दक्षिणावर्त्तकंपाः शुभाः शिखिनः शिखाः शुभदा यजमानस्य राज्यस्यापि विशेषतः तथा नारदपंचरात्रे· प्रदी

मेलेलिहाने तैर्गानिर्हुमे सम्पुटेन तथा इत्येतत्कथितं देवि होतव्यं सिद्धिमिच्छता ॥ शिखा प्रदक्षिणावर्ता सुशुभा स्थापियो जयेत् ति
न्त्रमेवं सुभकरो यदस्मै वर्जितो गुणैः ॥ अथ निषिद्धः ॥ अल्पतेजाश्च रुक्षश्च विस्फुलिङ्गसमन्वितः ॥ धूमावलीश्च ज्वालश्च कृशानुर्न
वसिद्धिदः ॥ दुर्गन्धश्चावलीकश्च स्फुलिङ्गः कर्कशस्वरो भवेत् ॥ भूमिं च विलिखेद्यस्तु सोऽपि दुर्भाग्यसम्भवः ॥ तथा शारदातिलके कृशः
कृष्णगौरवर्णो यजमानं विनाशयेत् ॥ इति गोधाह्न नवहोहोतं ई: स्वप्रदो भवेत् ॥ छिन्नाहताः शिखाः ऊर्ध्वा स्वर्णमुधनपरितय
शुकपत्त्रनिभो धूमः पारावतसमप्रभः पारावतसमप्रभः हानिं तु रगजातीनां गवां च कुरुते चिरात् ॥ तथा तत्रसारे स्वराष्ट्रम
दिषादीनां उत्तमं चलसिद्धये ॥ रक्तश्चेटचटाशब्दः स्वपसमागतिस्तथा उल्लिखेद्धमथां यस्य [illegible] यस्याथः शिखपवचः
तेषामेते सौम्यनिष्ठेष्टशाहस्सिन्यारमेस्वरे ॥ अत्रैवं विधेषु दोषेषु प्रायश्चित्तमथोच्यते ॥ कुलप्रकाशतन्त्रे ॥ एवंविधेषु दोषेषु प्राय
श्चित्तं यदेशिकः ॥ मूलेनाज्येन जुहुयात्पञ्चविंशतिराहुतीः ॥ पञ्चविंशतिरेकैकस्मिन्दोषे ॥ अथ वह्नेः सात्त्विकादिजिह्वाभे
दाः ॥ तत्रदीक्षागहोसे सात्त्विकशान्तिकहोमे हिरण्याद्याः प्रागेवोक्ताः ॥ अथ वश्यादिकस्य होमेषु राजस्यो जिह्वाः ॥ कुलम्
लावतारे ॥ राजस्यः पद्मरागैकास्य सुवर्णाभद्रलोहिताः ॥ चतुर्थी लोहिताख्या च ताम्रभूमिन्यप्राकरालिकेति ॥ तामस्या अपि त
त्रैव ॥ तामस्यो विश्वमूर्तिकाः ॥ स्फुलिङ्गिनी धूम्रवर्णा च चतुर्थी तु मनोजवा ॥ पंचमी लोहिताख्या स्यात्करालीगदिता त
था काली च सप्तमी प्रोक्ता तन्ता सन्त्याः कार्यभेदतः ॥ यागक्रियाकास्य होमेक्रूरहोमेषु चक्रमात् ॥ इति ॥ अथ जिह्वानामधि
देवताः ॥ कुलप्रकाशतन्त्रे ॥ जिह्वानामधिदेवाः स्युर्विविधाः पितरस्तथा ॥ गन्धर्वयक्षनागाश्च पिशाचा राक्षसास्तथा ॥ रसना
सप्तरादीनां जुहुयात्कार्यस्य हेतये ॥ तस्मादयुक्तता देवा वाञ्छितां सिद्धिमन्नमा ॥ रसनाः सीयनामामाः कृणेनाः प्रायशोम
ताइति ॥ उत्तरतन्त्रे ॥ वैश्वानरं स्थितं ध्यायेत्सर्वहोमेषु देशिकः ॥ शयानमाज्यहोमेषु निषण्णं शेषवस्तुषु ॥ अथात्र होमकाले

वह्नेर्जिह्वाः शिरःकर्णादिकं ज्ञात्वा जिह्वायामेव जुहुयात् तथा चोक्तं महाकपिलपंचरात्रे-नारदकल्पे च सर्वकार्यप्रसिद्ध्यर्थं जि
ह्वायां तस्य होममेयत् चक्षुःकर्णादिकं ज्ञात्वा होममयेद्दिशिको नमः अग्निकर्णे कृते यत्न कुर्याच्च व्याधितो भयं नासिकायां महदुः
खं च वस्तुषो नाशनं भवेत् केशेदाहिद्वंदंशोक्तं तस्माज्जिह्वासु होमय यत्र काष्ठं तत्र कर्णं यत्र धूमस्तु नासिके यत्राल्पज्वलनं ने
त्रं यत्र भस्म तत शिरः यत्र प्रज्वलितो वह्निस्तत्र जिह्वा प्रकीर्तिता तथा शारदातिलके अस्मात्तदीयाहुतयः विपश्चित्सर्वकर्मसु
कर्णहोमे भवेद्व्याधिर्नेत्रे त्वंधत्वमीरितं नासिकायां मनःपीडा मस्तके धनसंक्षयः सधूमाग्निः शिरः प्रोक्तो निर्धूमश्चक्षुरेव च
ज्वलन्कृशो भवेत्कर्णः काष्ठलग्नस्तु नासिका अग्निर्विजायते यत्र शुद्धस्फटिकसन्निभः तन्मूलनं च वित्तेयं चतुरंगुलमान
तः अथ स्रुक्स्रुवौ उत्तरतंत्रे स्रुकुस्रुवौ शिंशपास्यन्यश्रीपर्णीखादिरामजौ चंदनहृदयदेवद्रुवैकंकतशमीभवौ विल्वोद्भव
पालाशनागकेसरसंभवौ वकुलाशोकपुंनागप्लक्षन्यग्रोधचंपकैः निर्मिताविति शारदातिलके श्रीपर्णीशिंशिपा
क्षीरशाखिवैकंकतसंभवः गृहीतां विभजेद्धस्तमात्रं षट्त्रिंशता बुधः विंशत्यंशैर्भवेद्दंडो वेदिस्तैरष्टभिर्भवेत् एकांशेन मि
तः कंठः सप्तभागमितं मुखं वेदिश्चांशेन विस्तारः कंठस्य परिकीर्तितः अग्रं कंठसमानं स्यान्मुखे मार्गं प्रकल्पयेत् कनि
ष्ठांगुलिमानेन सर्पिषो निर्गमाय वै वेदीमध्ये विधातव्यो भागेनैकेन कर्णिका विस्तीर्णवहिस्तस्या एकांशेनाभितो वट
तस्य खातं त्रिभिर्भागैर्हंसमर्द्धांशतो वहिः अंशेनैकेन परतो दलान्यष्टौ प्रकल्पयेत् मौवलायुखवेद्योः स्यात्परितोर्द्धांशमा
नतः दंडमूलाग्रयोः कुंभौ गुणावेदांगुलैः क्रमात् दंडीयुगं यमांशैः स्यात् दंडनोहरुतौरितः षड्भिरंशैः पृष्ठभागो वे
द्याः कूर्माकृतिर्भवेत् हंसस्य वा हस्तिजो वा योत्तणो वा मुखं लिखेत् मावस्य पृष्ठभागे स्यात्तत्प्रोक्तलक्षणस्रुवः स्रुवश्चतुर्वि
शतिभिर्भागैरारचयेत्तं च द्वाविंशत्या दंडमानमंशैरेतस्य कीर्तितं चतुर्भिरंशैरानाहः कर्षार्धव्याप्तितच्छिरः अंशद्वयेन नि

ष

६३

खनेनत्वंकेसरगपदाकृतिं दण्डमूलाग्रयोर्गण्डीभवेत्कंकणभूषितेति गण्डीयुगंकंकणाकारं कंकणभूषितेतिस्वय
मुक्तत्वात् गुण्डीकंकणवद्भवेदितिवायवीयसंहितावचनाच्च अन्यत्रतुगण्डीकुंभः तत्रतस्यैवावश्यकत्वात् वाय
वीयसंहितायां स्रुक्स्रुवौतेनसौवापीति स्रुक्स्रुवाभावेकुंभसंभवः पलाशपत्रेनिश्छिद्रेरुचिरैस्रुक्स्रुवौस्मृते वि
दध्याद्धाम्यपत्रेसंदिग्धहोमकर्मणीति अथैतद्धवनप्रकारमाह तत्रशिंशिपाश्वत्थश्रीपर्णीखदिरास्त्रचंदनदेवदा
रुवैकंकतशमीपलाशोदुंबरबिल्वपनसवकुलाशोकनागकेसरपुन्नागचंपकवटहृताणमन्यतमसमुत्पन्नमव्रणम
ष्ठीणचूर्णादिभिरदुष्टमुद्दिष्टमानादधिकस्थलदीर्घसमचतुरस्रंकाष्ठंगृहीत्वातत्रमुष्ट्यंगुलेनचतुर्विंशत्यंगुलमानेषट्
त्रिंशदंशेनविभज्यतेषुविंशत्यंशेदण्डार्द्धविभज्यावशिष्टेषोडशभागेषुअग्रदशभागाष्टकंमुखार्थंपरिकल्प्यावशिष्टभागाष्टके
नसमचतुरस्रांवेदींकृत्वातन्मध्यचिह्नंकृत्वातच्चिह्नमवलंब्याऽर्धांशमानेनाभितोवृत्तंनिष्पाद्यतद्बहिरेकांशमानेनवृत्तांतरं
निष्पाद्यवृत्तयोरंतरालेऽष्टदलानिपरिकल्प्यतद्बहिरर्धांशमानेनसमाकारांचिह्नितांवाशोभांदद्यात् ततोऽग्रेऽवशिष्टांशेनवेद्या
स्तृतीयांशेनपार्श्वद्वयखण्डेनमध्यप्रकाशेनकंठंविधायकंठतः किंचिदुच्चमवशिष्टंसमभिरंशैरग्रेकेवंसमानविस्तारंसमत
लमधस्तादधोधः हीयमानविस्तारंकृत्वामुखेपिवेदीमेखलांपरिकल्प्यकंठादधोमुखस्यमेखलामभिंदन् प्रणालिकाका
रमेकांशमाननिम्नंकनिष्ठाप्रवेशयोग्यंखातंकृत्वाकर्णिकामध्यस्थखातमध्यान्मुखमध्यस्थप्रणाकारखातमध्येयथाह
तेनिःसरतितथातस्रलोहशलाकयाकंठवेदपरिधिभेदनंसुषिरंविधायतथैवाग्रेपिमुखपरिधिभेदनंच्छत्रंनिर्गमाय
कनिष्ठाप्रवेशयोग्यंरंध्रंकुर्यात् ततोवेद्याःपृष्ठभागेकूर्माकारंमध्येकिंचिन्नमत्तलंभूमौयथानिश्चलेतिष्ठतितथाकृत्वा
मुखस्यपृष्ठभागेमध्येकिंचिन्निम्नंकृत्वामुखेरंधाथस्याऽर्द्धंहंसमुखाकारंगजमुखाकारंवराहमुखाकारंवासरम्यंकृत्वा

दण्डस्याग्रे वर्धनपर्कांशेन कंकणाकारं त्रयं चतस्त्रयं वा कृत्वा तद्दंडांशचतुष्टयेन मुखवर्कं च मध्यमूलादिसहशोभितमूर्ध्वम्
खं निर्माय तस्य पुनरेकांशेन प्राग्वत् कंकणानि कृत्वा तद्दंडनवांशमानं स्रुवं तेल षडंशमानं दैर्ध्यं सूत्रेणावेष्टनयोग्यस्थू
लं दण्डमध्यं कृत्वा तदधः पुनरेकांशेन कंकणानि तद्दंडांशत्रयेण प्राग्वद्धृदुमुखं कुर्मान दधः पुनरेकांशेन च कंकणा
नि च कुर्यात् इति स्रुवं निर्माय स्रुचः षट्त्रिंशभागेषु चतुर्विंशतिभागं दैर्घ्यमग्रदेशं शद्वयमानेन वर्तुलाकारं स्थूल
शिरोभागयुतं स्रुचं निर्माय तस्य मुखप्रदेशो पंकमध्यगतमर्गपदाकारं कर्षमात्रग्राहि खातं कृत्वा तदधस्तले कांशमाने
न प्राग्वत् कंकणानि तंशत्रयेणाङ्गं भं पुनरेकांशेन कंकणानि च कुर्यात् इति स्रुवनिर्माणप्रकारः एवं स्रुग्दीपतास्र
मयौ वा स्रुवौ कार्यौ स्रुवाभावे पलाशस्य मध्यपत्रद्वयं पिप्पलद्वयं वा होमे ग्राह्यं संस्कारोपि स्रुक्स्रुवयोरिव पत्रयो
रपि कार्यः अथ होमद्रव्यप्रमाणानि तत्रणाज्यदायाकर्षमात्रं हुतं होमे मुक्तिमात्रं पयः स्मृतं दधिप्रसृतिमात्रं स्यात्
लाजाः स्युर्मुष्टिसम्मिताः एकैकं पत्रपुष्पाणि तथा रूपाणि कल्पयेत् कदलीनागरंगाणां पलान्येकैकशो विदुः मा
तुलुंगं चतुःखण्डं पनसं दशधाकृतं मुष्टधानारिकेलानि खण्डितानि विदुर्बुधाः तथाभूतं विल्वफलं कपित्थं च ख
ण्डितं द्विधा उर्वारुकफलं होमे कथितं खण्डितं त्रिधा फलामतान्यखण्डानि समिधः स्युर्दशाङ्गुला दूर्वात्रयं समुदि
ष्टं गुडूचीचतुरंगुला व्रीहयो मुष्टिमात्राः स्युर्मुद्गमाषयवा अपि तण्डुलाः स्युस्तदर्धांशाः कोद्रवा मुष्टिसम्मिताः गोधू
मारक्तकलमाविहिता मुष्टिमात्रतः तिलाः स्थूलकुमात्राः स्युः शार्षपास्तत्प्रमाणकाः मुक्तिप्रमाणं लवणं मरिचान्य
पि विंशतिः पुरुर्वदरमानं स्याद्ग्रामहेतत्समं स्मृतं चंदनागरुकर्पूरकस्तूरीकुंकुमानि च तिंतिणीबीजमानानि सम्म
दिष्टानि देशिकैः इति उत्तरतंत्रे पाद्यसंवादसम्मितमिति कर्षलक्षणं तत्रैव माषादशगुंजा स्यात् षोडशमाषा निगद्यते

रथुकालत्रमाराणाःस्युः शक्रवो पितथोदिताः ॥ गुडंपलार्द्धमानं स्यात् च्छर्करापि तथा स्मृता॥
ग्रासार्द्धं चरुमानं स्यात् दुःपर्वविधिः स्मृताः॥ = ७

त्रिधाकृतं = ६

कर्षइति तैलस्याप्येतद्देवपरिमाणं शुक्तिः कर्षद्वयं प्रसृतिमात्रं पलद्वयमात्रं मुष्टिः पलं पलार्द्धं कर्षद्वयं ग्रासार्द्धं अशीति
रक्तिकामितं कुलमूलावतारे· गुंजाभिर्दशभिर्माषः शाणो माषचतुष्टयं द्वौ शाणौ च टंकः कोलो वदरं इत्यणप्रसः तौ द्वौ
पाणितले कर्षः सुवर्णकवलग्रहः पिचुर्विंशलपटकं तिंडकोत्तस्त्रतद्वयं शुक्तिरष्टात्मिका ते द्वे पलं विल्वचतुर्थिका·
मुष्टिराम्रप्रगुंजाथ द्वे पले प्रसृतिस्तथेति मातुलुंगवीजपूरं उर्वारुकंकर्कटी नदर्द्वीशाः शुक्तिमिताः चुलुकमात्रा पा
णितलप्रमाणाः कर्षमात्रा इत्यर्थः अक्षसमितं कर्षद्वयमात्रं गुरुर्गुग्गुलः वदरमानमशीतिगुंजामितं रामठं हिंगु
नारदपंचरात्रे तृतीयखण्डमूलानां रसानि स्वप्रमाणतः शैवागमेपि· खण्डत्रयं स्यान्मूलानां सूक्ष्माण्येव च होमयेत्
एवं केवलमखण्डमिति यावत् कंदानामष्टमभागलतानामंगुलद्वयमिति अथ समिधः नारदपंचरात्रे· समित्प्रादेश
मात्रेण समच्छेदान्विता तथा विशीर्णा द्विदला ह्रस्वा वक्रा स्थूला कृशा द्विधा क्रिमिदष्टा अदीर्घा अत्वनिस्त्वचः परिवर्जि
ताः विशीर्णायुष्यक्षयं कुर्यात् द्विदला व्याधिसंभवाः ह्रस्वा या मृत मा प्नोति वक्रा विघ्नकरी तथा स्थूलाभिर्हरते लक्ष्मीं कृ
शा या जायते क्षयः द्विधा यानेत्रदोषाः स्युः कीटदष्टार्थनाशिनी द्वेषं प्रकुरुते दीर्घाः प्राणघ्नाः निस्त्वचकृताः सक्षीराना
धिकाः मूलाः समिधः सर्वकामदाः अर्द्धत्वचं महच्छेदा जर्ध्वांगुलवर्त्तुला ईदृशी होमयेत् प्राज्ञः प्राप्नोति विपुलां श्रियं श्रीतेजस्का
न्तैव तेजोक्ते समिधः परिकीर्त्तिताः तथा वायवीयसंहितायां ताः पालाशपरा वापि याज्ञेया द्वादशांगुलाः अवक्राश्च सत्वचं
सूक्ष्माः सत्वचा निर्व्रणाः समाः दशांगुला वा विहिताः कनिष्ठांगुलसम्मिताः प्रादेशमात्रा वा लाभे ह्येतत्काले सकलाश्रापि अथ
प्रकृतं क्रियादीक्षाशक्तानां वर्णदीक्षा विधिर्लिख्यते· तत्र च प्रकृत्यात्मकाकारादिक्षकारांतानां मातृकावर्णानां प्रकृत्यात्मके
शिष्यदेहे यथाविधि विन्यस्य पुनः संहारक्रमेण मूलाधारादिहृदयान्तस्यक्षकारं नाभ्यंतस्थलकारे संहरामि हृदादिनाभिपर्यंत

स्थलकारं हृदादिवामपादाग्रस्थे हकारे संहरामि हृदादिवामपादाग्रपर्यन्तस्थं हकारं हृदादिदक्षिणपादाग्रपर्यन्तस्थे स
कारे संहरामि हृदादिदक्षिणपादाग्रपर्यन्तस्थं सकारं हृदादिवामपाण्यग्रावधिस्थे षकारे संहरामि हृदादिवाम
पाण्यग्रावधिस्थं षकारं हृदादिदक्षिणपाण्यग्रावधिस्थे शकारे संहरामि । एवं युक्त्या शकारं वकारे संहरामीत्या
दि मूर्धपर्यन्तस्थमाकारं शिरःस्थे अकारे संहरामि एवं युक्त्या वर्णान्संहृत्य पुनस्तस्मिन्नेव तत्त्वे सकलतत्त्वग्रामसमेतं प
रमात्मनि संयोज्य विलीनसकलतत्त्वसमूहं विगतनिखिलकलङ्कं दिव्यतनुं शिष्यं विचिन्त्य पुनः परमात्मनः
सकाशादकारादिक्षकारान्तान्वर्णान्पूर्ववदुत्पाद्यमानान्सृष्टिन्यासक्रमेण शिष्यदेहे मातृकावर्णान्विन्यस्य पु
नस्तत्तत्स्थानेषु तत्तत्तत्त्वग्रामसमेतं तस्मिन्संयोज्याभिषिञ्चेदिति वर्णात्मदीक्षा अथ कलादीक्षा तत्र
पादतो जान्वन्तं निवृत्तिकलां जानुतो नाभिपर्यन्तं प्रतिष्ठाकलां नाभितः कण्ठपर्यन्तं विद्याकलां कण्ठतो लला
टपर्यन्तं शान्तिकलां ललाटाद्ब्रह्मरन्ध्रपर्यन्तं शान्त्यतीतकलां शिष्यदेहे संचिन्त्य निवृत्तिकलां प्रतिष्ठाकलायां
संहरामि प्रतिष्ठाकलां विद्याकलायां संहरामि विद्याकलां शान्तिकलायां संहरामि शान्तिकलां शान्त्यतीतकला
यां संहरामि इति क्रमात्संहृत्य तेषु ध्यात्वा तां परमात्मनि संहृत्य प्राग्वत्तस्य शरीरं संशोध्य समुत्पाद्य परमात्मनः
सकाशात्तु शान्त्यतीतकलां ततः शान्तिं ततो विद्यां ततः प्रतिष्ठां ततो निवृत्तिं च सृष्टिक्रमेण शिष्यदेहे तत्तत्स्थाने संयो
ज्य परे शादिकं कुर्यादिति एवमष्टत्रिंशत्कलाभिर्वा क्रमयुक्त्या संहारसृष्टिन्यासक्रमेण शिष्यं संस्कृत्य दीक्षां दद्या
दिति कलादीक्षा अथ स्पर्शदीक्षा । तत्र गुरुः स्वहस्ततले शिवरूपं स्वगुरुं ध्यायेन् मूलविद्यां षडङ्गमातृकां च जप्त्वा पर
शिष्यस्य शिरसि स्वदक्षिणकरं निधायोपदिशेदिति स्पर्शदीक्षा अथ वाग्दीक्षा तत्र गुरुः परचिद्रूपे शिवे चित्तं निधाय

तदुक्तान्समस्तमंत्रान्ध्यायेदात्मना: स्वयं शिष्याय मंत्रानुपदिशेदिति वाग्दीक्षा अथ दृग्दीक्षा॰ अथ गुरुः स्वनेत्रे निमील्य प
रमात्मस्वरूपिणीं देवतां ध्यात्वा प्रसन्नचित्तो दिव्यचक्षुषा शिष्यं निरीक्ष्य मंत्रोपदेशं कुर्यादिति दृग्दीक्षा पश्चादुक्तक्रमेण दीक्षा
त्रयं दिरक्षानो शिष्याणां तत्वविद्या गुरुणा कार्यमिति स्त्रीणां तु वामवाग्दीक्षैव विहिता नान्या अथ वेधदीक्षा तत्र गुरुः
शिष्यस्य मूलाधारे चतुर्दलपंकजमध्ये त्रिकोणमध्ये यथोक्तरूपां कुण्डलिनीं ध्यात्वा तत्र चतुष्टयमध्यस्थ वादिसां
तान्वर्णचतुष्टयं तन्मध्यस्थिते कमलासने संरुत्य तद्ब्रह्माणं तद्हृद्गत स्वाधिष्ठानाख्यषट्पत्रकमलमध्यस्थिते विस्नौ
संयोज्य वेधयित्वा तत्र षट्कमध्यस्थ वादिलान्तवर्णषट्कं विस्नौ संयोज्य तद्हृद्गं नाभिमण्डले दशदलकमलात्म
के मणिपूरकं च विस्नुं संयोज्य तत्र दशकमध्यस्थ डादिफान्तवर्णदशकसहितं विस्नुं तत्पंकजमध्यस्थे रुद्रे संयोज्य
वेधयित्वा तं रुद्रमनाहताख्ये हृत्पद्मे कादिठान्तद्वादशवर्णयुक्तद्वादशदलसंयुक्ते संयोज्य तैः स्वरैः सार्द्धं ईश्वर तन्मध्य
स्थे सदाशिवे संयोज्य वेधयित्वा कंठदेशे षोडशस्वरात्मषोडशदलकमले विशुद्धिचक्रे तमीश्वरं संयोज्य तैः स्वरैः सा
र्द्धं ईश्वर तन्मध्यस्थे सदाशिवे संयोज्य वेधयित्वा तं सदाशिवं भ्रूमध्य द्विदलपंकजात्मा वक्रे नीत्वा तत्र हक्षयहस्त
वर्णद्वयसहिते सदाशिवं तन्मध्यवर्तिनि विंदौ संयोज्य वेधते विंदुं तद्हृद्ध स्थितायां संयोज्य तत्र नादे तेनादान्तमुन्म
न्यान्ते विसुचक्रे चेमन्नरोत्तरं संयोज्य वेधयित्वा जीवात्मना सहितां कुण्डलिनीं परशिवे संयोज्य वेदयेत् एवंकृते शि
ष्यो गुरुवीर्येयाछिन्नसंसारपाशो विसंत्तः सद्यः शितितलेप वेति ततो गुरुः संरुत विपरीतक्रमेण परशिवात्कुण्डलि
नीमुत्थाप्य तयारुतमाखिलं सृष्टिक्रमेण शिष्यदेहे तत्तच्चक्रे तां तां देवतां संयोज्य हृदये जीवं मूलाधारे कुण्डलिनीं
संयोज्योपदेशादिकं कुर्यात् तत्र सत्तानां दिव्यबोधो भूतभविष्यवर्तमानज्ञः सदाशिवो भवति इति वेधदीक्षा॰॥

वि ११
द्या॰व
२०७

प्रायःकलौवेधदीक्षाकरोगुरुस्तद्योग्यशिष्यश्चदुर्लभस्तस्मात्क्रमाचार्यैः प्रसंगादत्रापिलिखितेयमितिशिवं अथैवंदीक्षिता
नांसत्क्रियायुक्तानांगुरुतःशास्त्रतश्चाधिगताशेषरहस्यपरमार्थानांगुरुःशिष्याणांपूर्णाभिषेकाख्यंद्वितीयमभिषेकंकु
र्यात् तत्रप्रागुक्तमण्डपेवेदिकायांवक्ष्यमाणंविपुलंतत्त्वस्रजाचक्रंनिर्मायप्रागवत्पंचरजोभिःकर्णिकादलकेसरकोणा
दिमापूर्यतस्यमध्येस्वर्णादीनांयथाप्राप्तकुंभंप्रागुक्तविधिनासंस्थाप्यान्येषुदलेषुचतत्रस्थेषुचसर्वावरणदेवतापूजास्थानेषुप्र
त्येकंपयजलपूर्णकलशान्संस्थाप्य तत्रमध्यकुंभेदेवतामावाह्यप्रागुक्तविधिनाषोडशोपचारैःसंपूज्यान्येषुकलशेषुतथैवां
गावरणदेवताःसंपूज्यदीक्षोक्तविधिनाशिष्यंजन्मनक्षत्रेप्रागवत्पंचवाद्यघोषपुरःसरंस्वेष्टदेवतामंत्रैर्बीजसहितैःसहतेनस
म्यगभिषिंचेत् ततःशिष्यःप्रागवच्छ्रीगुरुंप्रणम्यदक्षिणादिकंदत्वाब्राह्मणान्भूरिदक्षिणादिभिस्तोषयेदितिपूर्णाभिषे
कविधिः पूर्णाभिषेकहीनोयःसाधकोम्रियतेयदि पिशाचत्वमवाप्नोतिनरकंचप्रपद्यते इतिकुलार्णववचनादावश्य
कोयमभिषेकः इति इतिश्रीविद्यार्णवेत्रयोदशश्वासः १३ अथकादिमतेपूर्णाभिषेकविधिः श्रीतंत्रराजे उक्तलक्षण
संपन्नंशिष्यमाचारभूषणं पंचषट्कूटविद्याभ्यांशोधितंनवकवासरैः कलशैरभिषिंच्यामुंश्रीचक्रेसन्निवेशयेच्च आधारे
हृदयेमूर्ध्निचक्रंसंचिंत्यमध्यतः स्वात्मनादावाह्यसंस्थाप्यसंपूज्यन्याससंयुतं त्रिधाविद्यांजपेत्कर्णेदेव्यात्मापूर्णमानसः
देवतागुरुमंत्रात्मनैक्यंभावयन्मुदा शांतंजपेत्तदग्रस्थोनिवेदेत्त्रिदिनंवसेत् नचेत्सचारिणीशक्तिर्गुरुमेतिनसंशयः
तस्मात्तदंतिकेतस्यपूजादेशादिकंवसेत् तादात्म्यमात्मनोलब्धुंगुरोर्मंत्रात्मनोयतः ततस्तदासमारभ्यतदायत्तोयतादिभिः
अथाभिषेकंद्विविधंसमवाप्यतदाज्ञया अनुग्रहादिकंवीनसिद्धयेनान्यथाभवेत् विधायचक्रंतन्मध्येयोग्यांकुंभांनिधा
यत क्वाथादकैःसमाप्यर्च्याभिषिच्याभिवदेत्तं क्रमागतसमाचारनिरतेभक्तिशालिनि द्वितीयमभिषेकंतत्कुर्या

२०)

द्यात्मसिद्धये विरच्य विपुलं चक्रं प्रतियोनि च षोडश त्रिकोणानि विधायात्र मध्ये कुंभं तु विन्यसेत् सौवर्णं राजतं ताम्रं का
चं मार्त्तिकमेव च पूरितं वारितोयेन कथितेनात्तरोषधैः निक्षिप्य नवरत्नानि धान्यानि विविधानि च हिरण्यानि समस्तानि मणि
वासोभ्यामपि वेष्टयेत् रक्ताभ्यां चंदनं चूतपनसाम्रपल्लवैः शतकदलतावल्लीमातुलिंगफलान्वितैः विधाय कलशा
न्यानन्येषैकैकशो न्यसेत् सार्द्धसहस्रं षट्त्रिंशत्तं च संख्याक्रमोदितान् मध्ये चक्रे स्थितो याद्दिक्षु त्वावाह्याभिपूज्य च का
लात्मनित्यामंत्रांश्च जपित्वा पूर्ववासरात् जन्मदेशान्तरस्थायस्वनित्यां नत्र पूजयेत् सहस्रं प्रजपेत् पश्चाद्धोमं कृत्वा समं ततः मंग
कालकलशाद्वादिवाद्यसंगीतनर्तनैः पुरन्ध्रीयोगिनीवृन्दैरेकैकदेवतात्मभिः कृतैः स्वपूजितैः सार्द्धमभिषिंचेत्स्वयं गुरुः
स्वकर्मतत्स्य कथयेत्तदा प्रभृति सोपितं अनुतिष्ठेदविच्छिन्नं तस्यायुः पर्यविच्युतौ सहस्रं प्रजपेद्विद्यामभिषेकसमन्वित
अथवा षट्स्वन्यस्तकलशांस्तत्र विन्यसेत् तेषु शक्तीः समावाह्य संपूज्यैवाभिषेचयेत् एकं वा कलशं जन्मदिने कृत्वाभि
षेचयेत् एवं नैमित्तिकं नित्यमविच्छिन्नं समाचरेत् मातृकार्णवे शिष्यायोपदिशेद्विद्यानित्या पंचदशात्मिकाः त्रिकू
टाश्च चतुःकूटाः पंचकूटास्तथैव च षट्कूटाः सप्तकूटाश्च वसुकूटा नवात्मकाः दशैकादशकूटाश्च रविकूटास्तथैव
च त्रयोदशात्मकाश्चैव चतुर्दशभिदास्तथा तथा पंचदशाख्याश्च तथा षोडशकूटकाः अंगप्रत्यंगविद्याश्च तथा चावृति
देवताः पंचायतनविद्याश्च न्यासजालं तथैव च मुद्राश्च मुद्रापशवलाः सर्वाश्चोपदिशेत्क्रमात् ता विद्याः प्रजपेच्छिष्यः
क्रमात्सामाः क्रमेणैव गुरुसेवापरो नित्यं गुर्वाज्ञापालको वसेत् क्रमप्राप्तमहाविद्यो निश्रये भक्तिशालिनि द्वितीयमभि
षेकं तु कुर्याद्देव्यात्मसिद्धये प्राक्प्रोक्तविधिना सम्यङ्मण्डपं कारयेद्बुधः चतुर्विंशत्सुतैरेखशतैर्हस्तैश्च मण्डपं शुभे दिने
शुभनक्षत्रे सम्यङ्मुहूर्ते शुभोदये गणेशं पूजयेदादौ पंचवाद्यपुरस्सरं प्राक्प्रोक्तविधिना सम्यक् कुर्यान्मण्डपारवाचनं मा

वि. १४
यार्ण.
२०८

स्कापूजनंचैवहर्षिआदंतथैवच ब्राह्मणान्भूजयेमक्वान्स्वस्तिवाचनपूर्वकं सवर्णभूषणेर्वस्त्रैः श्रीगुरुंदक्षिणयाद्भुथः त
दाजयामविप्रांश्चदक्षिणयावस्त्रणवस्त्रकैः एकंतुपुस्तकाचार्यकृत्विजोवसुसंख्यकान् ब्रह्मणानवसंख्यांश्चद्वष्टौचद्वा
रपालकान् चतुरः शांतिपाठायद्विजानमानस्तुचिव्रतान् स्वविद्यायासकान्मन्नास्वर्णरत्नांगुलियकैः द्विजास्तयागुरुर्म
ध्यवेद्यांचकेलिवित्तथी: श्रीगुरुःकपकारेणसमस्तंत्रंमनोहरं प्रतिरेखंप्रयत्नेनपूरयेद्रक्तनरुले: समसमप्रतिकोणेषु
योनिषुप्रतियोनिच षोडशारचयेत्स्त्रैस्त्रिभिषोडशासंख्यया सर्वत्रपालिवंजेषुकलशान्स्थापयेद्बुधः मध्यस्थयो
निमध्येचत्वारीतोयपूर्णंघटं प्रस्थमात्रयाहिचदानितरेषुनिधापयेत् पदेषुकामेषुपादीनांप्रतिदिविचषोडश अष्टा
सुधानांस्थानेषुप्रतिहेतिचषोडश प्रतिस्थानेषोडशेवसिद्धिमुद्रापदेषुच पार्श्वयोरेकमेकंचदेव्याः पृष्ठेतुद्वयं
हेमरत्नफलेवीत्सोदयपल्लवशोभितान् गुरुमरुलनिर्माणषट्कोणाष्टात्रमध्यतः कमलाष्टस्तयोर्मध्येतिथी
शानांचमरुलं ग्रहमरुलमीशानेसर्वतोभद्रमरुले वीरेशमरुलंमध्येषड्स्वाचार्यकुरुयोः आग्नेयपूर्वमध्ये
तुकुर्यात्रदत्रमंडलं योगम्बदचेदमध्येतुनित्यामरुलमुत्तमं पाश्चनैर्ऋतमध्येतद्दिननित्याप्रपूजने मरुलंरचये
दितिशेष नैर्ऋत्येवास्तुपूजायांमरुलंरचयेद्बुधः वृत्तत्रिकोणमध्येतुकुर्यात्रदत्रमरुलं षट्कोणद्वयोर्मध्येमि
थुनानांचमरुलं आग्नेयेक्रुरुकुल्लायाः वाराह्याचायुगोचरे योगिकावलिदेवीनांमरुलांसंतरांतरेति गुरुमरु
लसर्वतोभद्रमरुलपूजाक्रमः प्रागेवविहितः अथनवग्रहादिपूजाविधिः श्रीतंत्रराजे ग्रहाणांमातृकाविद्याविग्रहं विं
ग्रहयतः तेनतेषांतुपूजार्थवक्ष्येनवाममरुलं तथास्वरैर्भवेद्दिक्षोर्मरुलंभास्करस्यतु तथाव्यंजनरूपस्यादितरेतन्म
यायतः तेनतेषांमरुलानितैस्तैर्वर्णैर्वदामितेन तेषांनवानांपूजास्तुतन्मयंनवमरुलं चंद्रार्कयोः पृथक्पूजास्वभ्य

ध्यमण्डलतयोः क्रमेण स्मरणे देवेशि सर्वश्रेयस्करात्मकं प्राक्प्रत्यक् दक्षिणोदक् च ततः सूत्रनिपातनात् त्रिहस्तमात्रे
जनयेत्र च कोष्ठानि तेनैव मध्यमाकोष्ठयोः कृत्वा हृत्तत्रयमतिस्फुटं तन्मध्ये तिर्यगूर्ध्वं च सूत्रद्वयनिपातनात् विधाय च
चथामध्यमाष्टादि विलिखेत्क्रमात् वामाघष्टस्वरान्मध्ये प्रणवं नभसा युतं हृन्नवीथ्याः स्वरोपेतं नभः सोमात्मकं लिखे
त् तत्रार्कमर्च्चयेत्तस्य नामभिर्द्वादशोदितैः प्रणवाद्यैर्नमोन्तैश्च भानोः सर्वत्र सर्वदा सोमस्याद्यस्वरैर्युक्तं कृत्वा तेन तत
त्पार्च्चयेत् तत्राम्भ्रात्र विलिखेद्विद्याद्यं च स्वराष्टकं कषोडशस्वरयुतं मात्रकां च स्वयोगतः विलिखेद्धृत्तयोर्मध्ये मध्य
कोष्ठेपि तं लिखेत् द्वादशवह्निस्वसहितमर्च्चयेत्तत्र मण्डले सोमं भक्त्या क्रमेणैव प्रोक्तकालेषु सर्वदा निवेद्य शर्करादुग्ध
पायसैश्चोपचारकैः स्वमस्त्वंस्थकोष्ठेषु कृत्वा हृत्तत्रयं तथा तत्र हल्लादिवर्णांश्च स्वरैः सोमात्मकामपि विलिख्य मध्ये च
तथा कृत्वा तेषु च तत्क्रमात् तत्र हल्लादिवर्णाम्भ्योवदरैरालिखेदपि मध्ये प्रणवगर्भस्थं वर्गाद्यक्षरमालिखेत् एवं कृ
तेषु नवसु पूजयेच्च नवग्रहान् आग्नेयादीशान्तमभितो लिखेन्नामान्यनुक्रमात् अक्षराणि च तथ्यं तान्यर्च्चयेत्तैश्च ता
मभिः तानिति भौमं बुधं तथा सौरिं गुरुं राहुं च शुक्रकं केतुमेतैः सर्वत्र मंत्रैः क्रमाच्च पूजनं एवं नवग्रहाणां तु म
ण्डलान्युदितानि वै तेष्वेव तेषामर्च्चां तु कुर्यात्तदनुग्रहे भास्करे हेममन्त्रस्य हारहेयं दर्शं च पूर्णिके स्वप्नयोः स्थि
तयोः सर्वं मण्डलं स्मरणं पार्वति विलिख्य हृत्त्रयं गालं तन्मध्ये तिर्यगूर्ध्वतः रेखाभिर्द्वादशभिर्मध्ये त्वेकाशीतिपदं लि
खेत् ईशाकोष्ठानि पतितः प्रवेशनामस्त्वाणिकान् मायां ताभी निसंख्यातमन्मध्ये दावगानेच तत् हृत्तयोरन्तरा कृत्वा मा
त्रकाग्रथितेन च तैः पंचभिस्त्रालिखेत्तत्र विवेसोमं समर्च्चयेत् कर्पूरचंदनाभ्यां तदालिखेद्दिक्विविक्षु रक्तचंदनसिंदू
रगैरिकैश्च कतोरवेः कृत्वा विवं तत्र तं च पूजयेत्सोक्तरूपतः द्विहृत्तान्तस्तिर्यगूर्ध्वं कृत्वा रेखाः समन्तरा एकोन

वि॰१८
या॰व॰
२०५
909

विंशत्मध्ये तां लिखेन्मार्गवृद्दीरितान् आग्नेयादिकोणेत्रमेणं नक्षत्रस्वरूपेनान्सैर्युतान् हस्तयोरंतरालेत्र पंचविंशतिव
र्णिकैः स्वरैर्वा सयुतैर्वह्निदेशात्सौम्याग्निविनालिपिः विलिख्य विंशदाकारं त्रिहस्तायाममविस्तरं तन्मध्ये भानुमावाह्य पू
जयेन्मार्गदीश्वरि पीठे वास्तु यथाशक्ति भूतले वा शिलातले सुसमे नाहनेक्षुताविवास्तुकानिष्ठजयेत् एवं सर्वत्र तंत्रे
स्मिन्गृहपूजासमीरिता विशेषादेशरहितेन तत्र तत्क्रमतोर्चयेत् अस्यार्थः प्रयोगे वक्ष्यते वास्तुमण्डलपूजा मार्गवप्र
दर्शिता अथातिथिवारदेवता तत्र पिंगलामते आग्नेयदेवि प्रवक्ष्यामि वारतिथ्यधिदेवता रवौ सूर्यः शिवो देवि चं
द्रे सोमां विकेतनः भौमे तु मंगलगुहौ बुधविष्णुतनः परे परेगुरुश्चतुर्वक्त्रौ भृगौ शक्रपुरंदरौ मंदवारेश्वरः काला
वीरपादेविकीर्तिताः परेबुधवारे परेगुरुवारे तथा ब्रह्मा विधाता विष्णुश्च यमः शीतकरो गुरुः इंद्रश्च वसवो नागाध
मैः शिवदिवाकरौ मन्मथश्च कलिश्चैव विश्वेदेवास्तिथीश्वराः इति पिनरौ देवि पूज्याः सर्वोपचारकैः अश्विनौ च
यमो वह्निर्ब्रह्मेंदुश्च शिवोदिति गुरुः सर्वाश्च पितरो भगोर्यमतिनश्चरौ त्वष्टा वायुरथेंद्राग्नी मित्रश्चेंद्रस्ततः पि
ये निर्ऋतिश्चैव तोयं च विश्वेदेवाः प्रजापतिः विष्णुश्च वसवो देवि वरुणश्चाजएकपात् अहिर्बुध्न्यश्च पूषा च प्रो
क्ता नक्षत्रदेवताः एताः सर्वोपचारैस्तु तदहेषु समर्चयेत् प्रणवाद्यैश्च नत्यंतैः देवैर्नामभिरीश्वरि अत्रेंद्राग्नि वि
नेयकस्यैव नक्षत्रस्य देवताद्वयं विशाखानक्षत्रमिंद्राग्निदेवते निर्ऋते उत्तराषाढानक्षत्रस्य विश्वेदेवाः श्रवणस्य वि
ष्णुः एतयोर्मध्ये प्रजापतिः यदुक्तं तदभिजिन्नक्षत्रमस्ति तत्र ज्योतिःशास्त्रेऽवगंतव्यं अथ तद्दिननित्यापूजाविधिः ॥
श्रीतंत्रराजे आसां तु नित्याविधानामंगानि च श्रृणु प्रिये हृन्मुखैस्तैः षडंगानि कुर्यादर्णैः करांगयोः विन्यस्य मातृ
कामेशी जयेद्विद्यास्तथैकशः रक्तारक्तांबरा रक्ताभूषणस्रग्विलेपनाः पाशांकुशौ चकोदंडप्रसूनविशिखाः स्मरेत् ॥

तदावृतीनां पंचानां शक्तीस्तत्सदृशीः स्मरेत् चतुरस्रद्वयं कृत्वा द्वारद्वयविभूषितं अष्टपत्रांबुजं मध्ये नवयोनौ च तान्यजे
अंगावृतीर्मध्ययोनावंतरेखासु थावृतीः पृष्ठतो गुरुपंक्तिं च कोणेष्वष्टसु च क्रमात् बहिर्दलेष्वपि न्यायजेद्वैर्विलो-
मतः रूपिणीशक्तिसहितैर्मायासमादरीयुतैः ब्राह्म्यादिशक्तीस्तद्बाह्ये चतुरस्रे तन्यायजेत् आसां बलिप्रदानं च
करोत्वक्रुरुकुल्लया समानवर्ण्या केवलया प्रोक्तरूपाः स्मरेत्प्रियाः इति अथ प्रयोगाः तत्र प्रातः स्नात्वादि योगपीठ-
न्यासांतेन तद्दिननित्याविद्यया प्राणायामत्रयं कृत्वा शिरसि क्लीं श्रीं दक्षिणामूर्तये ऋषये नमः मुखे पंक्तिश्छंदसे न-
मः हृदये कालनित्यायै देवतायै नमः इति विन्यस्य हृदयादिषडंगेष्वपि विन्यस्य रक्तारक्तांबरामित्यादि ध्यात्वा मा-
नसपूजादिकं विधाय स्वपुरतः स्वर्णादिपट्टे कुंकुमादिना सकेसरमष्टदलकमलं विरच्य तन्मध्ये नवयोनिचक्रं विधा-
यामष्टदलाद्बहिश्चतुरस्रद्वयमंतर्बहिर्विभागेन प्राक्पश्चिमयोर्द्वारद्वययुतं कृत्वा तन्मध्ये योनौ तद्दिननित्याविद्याया
अक्षरत्रयं लिखित्वा श्रीपर्ण्यादिपीठे स्वपुरतः संस्थाप्य तत्र तद्दिननित्याविद्यया पुष्पांजलिं दत्वार्घ्यादिपात्राणि संस्था-
प्यात्मपूजां विधाय श्रीचक्रपीठपूजां विधायावाहनादिपुष्पांतैरुपचारैरुपचर्य लयांगपूजनं कृत्वा योनिमुद्रापा-
शादिचतुर्मुद्राः प्रदर्श्य मध्ययोनिमध्ये श्रीशास्वरवायव्यकोणेषु देव्यग्रे तदादिचतुर्दिक्षु च प्रागवत्षडंगानि संपूज्य म-
ध्ययोनेर्बहिरष्टकोणाभ्यंतरस्थानरालेषु प्रागवदायुधचतुष्टयं संपूज्य देव्याः पृष्ठभागे योनिमध्ये योन्यंतराले गुरु-
पंक्तित्रयस्थाने रेखात्रयं विभाव्य तासु प्रथमरेखायां प्रकाशानंदादिगुरुत्रयं मध्यरेखायां श्रीज्ञानानंदनाथादिगुरु-
त्रयं तृतीयरेखायां स्वभावानंदादिगुरुत्रयं चेति गुरुपंक्तित्रयं पूजयेत् ततोष्टयोनिषु देव्यग्रमारभ्य वामावर्तेन त-
द्दिननित्याविद्याया मध्याक्षरंबीजषोडशस्वरयुक्तं कृत्वा मायाबीजपूर्वकं तेषामाद्यक्षरमुच्चार्य रूपिणीशक्तिपादुकां

वि. १४
धा. व
२१०

210

पूजयामि द्वितीयं रूपिणीं शक्तिपादुकां पूजयामि इत्याद्यष्टशक्तीः संपूज्याष्टदलेषु वामावर्तेनावशिष्टास्तदशक्तीः संपूज्य व
हिश्चतुरस्रवीथ्यां वामावर्तेन ब्राह्म्याद्यष्टशक्तीर्मायाबीजादिकाः संपूज्य लोकपालार्चनादिनैवेद्यदानांते कुसुमांजलिं वि
धाय समस्तावर्ण्यावलिदानं च विधाय सर्वं समापयेदिति तद्दिने नित्यायाः पूजाविधिः अथ डाकिन्यादिषट्धातुदेवतापूजा
विधिर्लिख्यते तत्र श्रीनेत्रराजे भूमौ विधाय षट्कोणं समकं प्रोक्तदिक्क्रमात् मध्ये च तत्रान्तो नित्यानित्यां रोधादिभिर्यजे
त् अभितस्तस्यास्तेषु तत्षट्कं तत्क्रमाद्यजेत् बाह्ये तत्पवनाः प्राग्वत् मातृवर्णैः समर्चयेत् तन्मध्यमस्यामपि तथा षट्
कोणेषु सप्तशक्तयः षट्त्रिंशत्तासामादेव्याः सर्वरूपायुधादिभिः प्राग्वत्तत्र तासां पंचस्वपृथ्वीकादिमातृकाः परेषु
यवसत्वर्णरहितैस्तैस्तथार्चयेत् तेषामपि च चक्राणां शक्तीनां च विलोमतः पूजा निग्रहसंसक्तासु सास्ताशत्रूणां विपत्त
ये अथ प्रयोगः तत्र वेदिकायां गोमयोपलिप्ते पञ्चहस्तपरिरहिते स्वासने पूजादियोगपीठन्यासांते नित्यानित्यापूजा
कृतविधिना प्राणायामादिमानसपूजांतं कृत्वा स्वपुरतः कुंचिद्धिंडं कृत्वा तदवष्टंभतः परितस्तत्र विंशांगुलमानभ्रमा
हृत्तं निष्पाद्य तन्मध्ये प्राक्प्रत्यगायतं ब्रह्मसूत्रमास्फाल्य तद्ब्रह्मसूत्रस्यार्धमानेन तस्मिन्वृत्ते ब्रह्मसूत्रस्य पूर्वाग्रादि
तः पश्चिमाग्रादितस्य दक्षिणचिह्नद्वयमुत्तरभागे चिह्नद्वयमिति संभूय चिह्नचतुष्टयं कृत्वा चिह्नाच्चिह्नं दक्षिणो
त्तरायतं तिर्यक्सूत्रद्वयमास्फाल्य पश्चिमतिर्यक्सूत्राग्रद्वयमारभ्य ब्रह्मसूत्रस्य पूर्वाग्रावधि सूत्रद्वयं विन्यस्य
पुनः पूर्वतिर्यक्सूत्रस्य कोटिद्वयमारभ्य ब्रह्मसूत्रसमेतानि त्रीण्यपि सूत्राणि प्रत्येकं त्रिधा विभज्य चिह्नानि
कृत्वा पश्चिमवायव्यैशानपूर्वाग्नेयनैरृतिदिग्गतेषु षट्सु ब्रह्मसूत्रतृतीयांशस्थानेषु मध्ये च तत्र हृद्वीयमानसू
त्रयमेव हृत्तसमकं कृत्वा ब्रह्मसूत्रत्रयं प्रत्येकं चतुर्विंशतिधा विभज्य मध्यहृत्तमध्यगतविंदुमारभ्य परितः षड्वृत्ते

२१०

षुद्शांमोंशाद्शामांशास्यानेषु तन्मध्यगतबलसूत्रविन्यस्य निकृत्वा पुनर्मध्यहन्तस्य च मध्यादिति आग्नेयकोणगतहृत्वबलसू
त्रेप्राग्वद्शांमांशे विकृत्वानन्तेचाग्नेयमध्यहन्तयोरन्तरालादित्तो वायव्यहन्तमध्यगतबलसूत्रेदशमांशे विकृत्वातेथ
वेशाननिर्ऋतिकोणगतहन्तयोरप्युक्तयुक्त्या प्रहन्ते विकृत्य द्वयं विधाय तत्रैव प्राक्प्रत्यगायतबलसूत्रस्य पश्चिमाग्रादि
तः पूर्वाग्रादितश्च प्राग्वद्शांमांशे विकृत्य द्वयं विधाय सम्यस्वपि हन्तेष्वपि चिह्नेषु चिह्नेषु प्रतिहन्तेन तिर्यग्रेखाद्वयं कृत्वा तेषु प्रा
गुक्तयुक्त्या षट्कोणसमंकं निष्पाद्य तेषु प्रतिषट्कोणं मध्ये षट्सूत्रिकोणेषु हन्तानिकृत्वा बलसूत्राणि मार्जयेदिति
पूजाचक्र मुद्धृत्य तन्मध्ये नित्यानित्याविद्यपादुष्पांजलिं निक्षिप्य नित्याविद्यया च स्थापनाद्यात्मपूजां तेमध्यषट्को
णो नित्यानित्यपूजोक्तविधिनापीठपूजादिपुष्पोपचारांतेनतत्रोक्तविधिना डाकिन्यादि षट्कं संपूज्य धूपदीपौ दत्वा वदमा
णनैवेद्यषट्कं निवेद्य तांबूलादि सर्वं निवेद्य निर्ऋतिकोणधूम्रवर्णां मध्ये डाकिनीमावाह्य धूम्रवर्णां नित्यासमानमुख
भुजायुधादियुतेध्यात्वा डांडीमित्यादि षडंगमेवं नित्या शुक्तैः षडंगन्यासयोगेन सकलीकृत्य तस्याः प्राणप्रतिष्ठां विद
ध्यादेवमुत्तरत्रापि राकिन्यादीनामायद्वरैः षट्दीर्घजातियुक्तैः स्तासां सकलीकरणं प्राणप्रतिष्ठां च कुर्यात् ततः
स्वाभिमुखीमासनादिपुष्पांतैरुपचारैरभ्यर्च्य तदावरणशक्तीश्च निर्ऋतिकोणे डौं श्रों श्रं शक्तिपादुकां पूजयामि
एवं वायव्यकोणे कशक्तिपा पूर्वकोणे २ खशक्तिपा आग्नेयकोणे २ गशक्तिपा• ईशानकोणे २ घशक्तिपा• पश्चिम
कोणे २ ङ.शक्तिपा• इति संपूज्य धूपदीपौ दत्वा पायसान्नं निवेद्य तांबूलादि प्रणामांतैरुपचारैः परितोष्य वायव्याय
षट्कोणे सिंदूरवर्णां राकिनीमावाह्य सिंदूरवर्णां नित्यानित्यासमानमुखभुजादियुतां ध्यात्वासनादिपुष्पोपचारांते
राकिन्यादिकामाद्रदत्तिणग्रहह्हहवामदक्षिणसंमुखस्य पुषट्कोणेषु रौं इतिशक्तिपाएवं चपाक्तिपा• छपाक्तिपा•

वि॰ १८
या॰ व
२११
211

जशक्तिया॰ कशक्तिया॰ ञशक्तिया॰ इति संपूज्य धूपदीपौ दत्वा गुडौदनं निवेद्य तांबूलादि प्राग्वत्कल्पयेत् ततः पूर्वदिग्गत
षट्कोणे नीलवर्णां लाकिनीमावाह्य नीलवर्णां लाकिनीमावाह्य नीलवर्णां प्राग्वन्मुखभुजादियुतां ध्यात्वासनादियु
क्तोपचारान्ते ओंकारीमाषट्कोणेषु शक्तिः णशक्तिः इति संपूज्य धूपदीपौ दत्वा मज्जौदनं निवेद्य शेषं प्राग्वत्कुर्यात् आग्ने
यादिषट्कोणेषु घटादित्रवर्णेन्याहर्शी काकिनीमावाह्य प्राग्वद्ध्यात्वासनादियुक्तोपचारान्ते प्राग्वत्षट्कोणे हेमवर्णां
साकिनीमावाह्य स्वर्णवर्णां ध्यात्वासनादियुक्तोपचारान्ते २ अशक्तिया २ पशक्तिया॰ फशक्तिया॰ वशक्ति भशक्तिः मश
क्तिः॰ इति संपूज्य तिलमिश्रमन्नं निवेद्य शेषं प्राग्वत्कुर्यात् अथ पश्चिमषट्कोणेषु धूम्रवर्णां हाकिनीमावाह्य प्राग्वद्भुजादि
युतां धूम्रवर्णां ध्यात्वासनादियुक्तोपचारान्ते २ रशक्तियाउ २ लशक्तिः दशक्तिः॰ शशक्तिः॰ षशक्तिः॰ सशक्तिः॰ हशक्तिः॰
इति संपूज्य॰ धूपदीपौ दत्वा मुद्गान्नं निवेद्य तांबूलादि प्राग्वत्कल्पयेत् ततो नित्यां प्राग्वत्त्रिकोणे संपूज्य धूपदीपौ द
त्वा स्तवप्रणामादिभिः परितोष्य डाकिन्याद्याः सावरणाः प्रसन्नं संयोज्य तां वक्त्रे लग्नगुह्यस्य तन्मयः सुखं विहरेदिति अ
थ पंचाशन्मिथुनपूजा तत्र श्रीतंत्रराजे॰ आदिदांतान्तरैः प्राग्वद्रूपिणी शक्तिसंयुक्तैः बीजहृद्याद्यैः समासैस्तैः पंच
वर्णान्तरे पंचाशत्क्रमयः पूज्याः पंचाशत्क्षेत्रपालकैः तेषां बीजहृदयवर्णाः स्वपदे तेषु संयुताः समास्तर्याश्च संयुक्ता मंत्राः
पंचादशाक्षराः चतुःषष्टिपदे मध्यवनेष्व दिनविधया मनीषितं समालिख्य तेषु तन्मिथुनानि वै घटिकाक्रमयोगेन
सन्मायामध्यगोचयेत् दिनेषु घटिकायोगात्पंचाशन्मिथुनान्यपि एवं मण्डलमासाद्य प्राप्नोत्येवाभिवांछितं नित्य
शस्ताः समावाह्य तस्मिंश्चक्रे समर्चनात् समस्तवांछितप्राप्तिः सदा भवति सर्वतः आदिदांतेत्यादि सर्वतः इत्यंतस्य श्लो
कषट्कस्यायमर्थः तत्र प्राग्वच्छुभस्थाने समांतरालानि नव सूत्राणि प्राक्प्रत्यग्दक्षिणोदक्त विन्यस्य चतुःषष्टिपदो

पंतं चतुरस्रचक्रं कृत्वा तस्मिंश्चक्रे मध्यकोष्ठचतुष्कमेकीकृत्य तत्र तद्दिननित्याक्षराणि स्वाभिमतप्रार्थनमालिख्य तदनंत
रवाह्याधःपंक्तिमध्यहृद्ये दक्षिणकोष्ठमारभ्य प्रादक्षिण्यक्रमेणामृतक्रमं निर्गमगत्या चक्रवामपंक्त्याधकोष्ठावधि
षष्टिकोष्ठेषु तद्दिनोदयात्तरादीनि मातृकायाः पंचाशदक्षराणि विसर्गस्वरसहितानि क्रौमिति बीजमध्यगतानि वि
लिख्यावशिष्टेषु पुनरप्युदयादीनि दशाक्षराणि समालिख्य तेषु लिखितक्रमेणोदयात्तरादिषु षष्टिघटिकासु त
त्तद्घटिकामिथुनं षोडशभिरुपचारैरभ्यर्च्य तत्फलमवाप्नुयात् 'इत्येवं पंचाशदक्षरादीनि षष्टिमिथुनानि' अत्र
पूजामंत्रस्तु ह्रीं श्रीं अरूपिणि शक्तिपादुकां पूजयामि इत्यादि शक्तिविद्याः पंचाशत् क्लीं श्रीं अरूपदेवेशपादुकां पूज
यामि इत्यादयः देवेशाः पंचाशत् इत्येवं पंचाशदक्षरादीनि षष्टिमिथुनानि यथाक्रमं यथाक्रममेकैकशः स्वविलंबेन
पूजयेत् प्रतिघटिकापूजनस्य तदेककाम्यकर्मविषयत्वात् इति पंचाशन्मिथुनपूजा अथ कामेश्वर्यादिपंचदशनित्या
नां पूजाविधिर्लिख्यते तत्र कामेश्वरीनित्यायजनविधिः तत्र श्रीतंत्रराजे अथ षोडशनित्यासु द्वितीयायाः समीरिता कामे
श्वरीति तां सर्वकामदां प्रणतत्वतः तन्मासे नतस्तानभेदोल्लक्ष्मीलात्म्यपूजने मंत्रोद्धारस्तु तत्रैव भृगुर्विःसेन युतस्ता
घोललिताख्या द्वितीयकः भूमध्यमग्नियुतं पश्चाद्व्योमव्यापिनसंयुतः प्राणोरसाग्निसहितः भूमध्ययुगं मचराश्रितं नभोगो
त्रायुतं षष्ठबादाहेन समयोजिता अंबुस्याद्वरसंयुक्तं वनशक्तियुतं वदेत् एषा कामेश्वरीनित्या कामदैकादशाक्षरीति पंचक
लक्षणा नित्यक्लिन्ने मदद्रवे स्वाहा ॥ इति तथा त्रिपुरार्णवे तंत्रराजे मूलविद्याक्षरैः स्वकुर्यादंगानि षट्क्रमात् एकेन हृदयं शीर्ष
तावतानां हृदयं हृयात् चतुर्भिर्नयनेतत् हृदस्त्रमेकेन चोदितं दिक्छेत्रवाना साहितयेत्रिकालंनामगुल्मके व्यापकत्वेन सर्वा
गमूर्द्धादिप्रपदावधि न्यसेद्विद्याक्षराण्येषु स्थानेषु तदनंतरं समस्तेन व्यापकं तु कुर्यात् क्रमक्रमेणैव अथ ध्यानं प्रवक्ष्या

वि॰ १४
धा॰ व
२१२

मिनित्यश्रृंगारस्वचोदितं येनदेवीस्मरसम्मादद्दातीष्टमयत्नतः बालार्ककोटीसंकाशां माणिक्यमुकुटोज्ज्वलां हारग्रैवेय १
कांचीभिरूर्मिकानूपुरादिभिः मंडितां रक्तवसनां रक्ताभरणशोभितां षट्भुजां त्रीक्षणामिंदुकलाकलितमौलिकां पंचाशत्षोड
शाद्वद्वषट्कोणचतुरस्रगां मंदस्मितलसद्वक्त्रां दयामंथरवीक्षणां पाशांकुशौ च पुंड्रेक्षुचापं पुष्पशिलीमुखं रत्नपात्रं सीधु
पूर्णं वरं दं विभ्रतीकरैः एवं ध्यात्वा र्चयेद्देवीं नित्यश्रृंगारसिद्धये प्रयोगादिषु सर्वत्र वदेद्ध्यानानि तत्रवै मंदनोन्मादनौ पश्चान्न
द्यादीपनमोहनौ शोषणश्चेति कथिता बाणाः पंच पुरोदिताः कुसुमा मेखला पश्चान्मदना मदनातुरा अनंगमदपूर्वास्ता:
पंचमी मदवेगिनी ततो भुवनपालास्या च्छशिरेखा तनंतरा रेखा गगनपूर्वान्त्या पूज्याः पत्रेषु चाष्टसु श्रद्धा प्रीती रतिश्चैव धृ
तिः कांतिर्मनोरमा मनोहराष्टमी प्रोक्ता देवी चात्र मनोरथा मदनोन्मादिनी पश्चान्मोहिनी शंखिनी ततः शोषिणी च वश
कारी सिंजिनी सुभगा ततः सस्वरा षोडश प्रोक्ताः प्रियदर्शीनि कांतिकाः पूज्यास्ताः प्रतिपात्रं तु प्रत्येकं षोडशच्छदे पूषा चैव
सुमनसा रतिः प्रीतिर्धृतिस्तथा ऋद्धिः सौम्या मरीचिश्च परतस्त्वंशुमालिनी शशिनी चांगिरा छाया ततः संपूर्णमण्डला तु
दलकमलेकमलेकर्णिकामध्यस्थितपरमात्मनि शिवेविलीनांविभाव्य। ॐ ३।२।३।२। रक्तारक्तमूलिनि त्रैलोक्यानंददायिनि रक्तमां
त्रिपुरेश्वरि। रक्तारक्तमहादेविश्रीमहीयमिंदवपुः ऐं ह्रीं श्रीं हसफें श्रीं ह्रीं ऐं समयिनि महिरानंदसुंदरि समस्तसुरासुरवंदितेभुजं
गभूपालमालालंकृतवराणकमलेविकटदंतलूहरोपनिवासिनि महीयशरीरंरक्त२ परमेश्वरि हुंफट् स्वाहा। ॐ भूः स्वाहा।
ॐ भुवः स्वाहा। ॐ स्वः स्वाहा। ॐ भूर्भुवःस्वःस्वाहा। नेत्रमालाभरणभूषिते महाकौलिनि महाब्रह्मवादिनि महाधनोन्मादनका
रिणि महाभोगप्रदेश्रीमहीयशरीरंवश्यमयकुरु२ दुर्जनानून२ दुष्टमहीपालान्मतय२ परचक्रंभंजय२ जयकरिणगनगा।
मिनि त्रैलोक्यस्वामिनि घमलवरयूं भमलवरयूं वभमलवरयूं शमलवरयूं श्रीभैरविपंचमादयस्वाहा। कुलांगनाकुलेसर्वमही
यंत्रिपुरेश्वरि। देवीरक्तताद्दिगंगीदिव्यात्माभोगदायिनी। रक्तारक्तमहादेविशरीरं परमेश्वरि। महेदंमदिरानंदश्रीपादतलम
लके। इमात्मरक्तालंकृतात्रिपुरायामहादेवी भुक्तिमुक्तिफलप्रदा। नगरोः सहस्रशवसत्रनदेवः शंकरोयमः नवकोलासरोग्यो
गेन विद्यात्रिपुरीसमा। नचशांतेः परंज्ञानं नचतांतेःपरंस्तवं। नवशक्तिसमोन्यासोनविद्यात्रैपुरीसमा। दर्शनेषुसमस्तेषु।
पात्वगेणुविशेषतः। दिव्यरूपामहादेवीसर्वत्रपरमेश्वरी। इतिमंत्रविद्योमंदिरानंदस्ततापीठोपपीठशिरस्थागगनविहरिभु।
वनगिरिभुवनगोकुलनिवासिनी जयंतिकुलशक्तिमहीनलपातालनिवासिनी कुलकौलविभेदिनी सकलजननमनश्रानंद
कारिणी करोतुममचिंतितं कार्यं भैरवीशतमेकंपूनातपरमेश्वरीमदनमण्डलालंविनी समकोटिसहस्राणांमंत्राणांपरमे
श्वरी। इतिमंत्रसकृज्जपिता। ऐंनमोभगवतित्रिकोणविद्यावैमहालिंगालंकृते त्रैलोक्योत्पत्तिस्थितिप्रलयकारिणि सहल
ह्रींकंदर्पानंददायिनि सहह्रींब्रह्मदंडरौरविमहहूं चित्स्वरूपेणपाशांकुशालंकृतेनवदवदवाग्वादिनि श्रीमुद्रष्टमहीपालना।

अघटेपेवंवरदाशिवहलेसमलजनानंदकारिणि क्लीं क्लीं कामराजवीजाख्ये ग्लौं ह्रीं क्लीं ह्लूंसः ह्सौः भय २ ह्सौः मिणि ह्सौः ह्सः ह्सौः
मथमथ भ्रमय प्रदायिनी चतुर्भुजे त्रिनेत्रे प्रेतासने त्र्यक्षरिणि महाकपालमालालंकृते चंद्रशेखरे त्रिपुरे भुक्तिमुक्तिफलप्रदे ॐ ऐं
ह्रीं नमः सिद्धं ॥ ५१ ॥ तामिमां हि विलोमेन प्रकारान्तं ॥ ५१ ॥ हूं सिमः नक्लौं ऐं ॐ सर्ववीजमातः श्रीसमर्थिनि मम मनोरथं देहि २ स्वा
हा । एवं जपित्वा । ऐं ई सौः श्रीमेवराजाय नमः इति त्रैपुरं मन्त्रमष्टत्रिंशद्विद्याय त्रिपुराया महानाम्नानवयोदशमहाविद्याः पूजयेत् ।
ॐ ऐं सहौः सहलह्रीं सहह्रौः ऐं सहह्रीं सहहूं कामत्रिपुरायै नमः ॐ ऐं ह्रीं क्लीं ह्सौः त्रिपुरभैरव्यै नमः ॐ २ ऐं ह्रीं सः वाक्त्रिपुरायै
नमः ४ ॐ ऐं ह्रीं श्रीं सौः महालक्ष्म्यै त्रिपुरायै नमः ॐ ऐं क्लीं मोहिन्यै त्रिपुरायै नमः ॐ ऐं क्लीं ह्रूं ह्रीं भ्रामरीत्रिपुरायै नमः ॐ २
ऐं ह्रीं श्रीं द्रें ह्सौः त्रैलोक्यस्वामिन्यै त्रिपुरायै नमः ॐ ऐं ॐ ई ह्रूं ३ ॐ ३ः ह्सः त्रिपुरायै नमः ऐं ऐं ऐं सौः कौलिकायै त्रिपुरा । ऐं ऐं सौः
घण्टिकायै त्रि । ऐं ऐं सौः नालमध्यमायै त्रि । ऐं ऐं सौः कपालांकुरवासिन्यै त्रिपुरायै । ठः ठः ठः यथाशक्ति जपित्वा । रक्तपुष्पैः शि
रसि ऐं ई सौः आत्मदेव्यै नमः इति गंधाक्षतैश्च समभ्यर्च्य धूपदीपौ निवेद्य तस्मिन् त्रैपुरे देहे ऐं ई सौः इति वनिताको भकरी
महाकामकलां ध्यायेत् । ततः श्लोकषट्कं मातृसंधानेन पठेत् । तत्र शक्तिरुद्रमयं देहं मदीयं त्रिपुरे कुरु । देहि मे देवदेवे
शि त्वमभीप्सितं । मस्तके मंगला देवी ललाटे कुलसुंदरी । नेत्रयुग्मं महाकाली कर्णौ रक्तकुण्डली । कपाली कर्णगर्भं तु क
पोलौ कमलावती । दन्तान् रक्षतु चामुण्डा चिबुके मेरुवासिनी । भ्रूमध्यं कंठदेशं च रक्षेन्मे भुवनेश्वरी । जिह्वां सरस्वती रक्षे
लकं नालवासिनी । स्थानमे कपिलास्कंधे ऐंस्कंधासे कुलमालिनी । ऊर्ध्वं विनायकी स्थाने जयानन्दा स्तनद्वये । कंठरूपे महा
लक्ष्मी हृदये चण्डभैरवी । ब्रह्माणी नाभिदेशे तु स्थाने ज्वालावती गुदे । लिंगे लिंगप्रभा देवी वशुण्डिनी मेढ्रमण्डले । नाडीचक्रे म
हायोगा ऊरुद्वये द्विलोकरे । वामहस्ते महामाया विद्याहस्तांगुलीषु च । वैष्णवी वामपादे च स्थाने चक्रायुधाम्बिका । तथा हि

विद्या १७

२५६

256

णपादान्ते पकपादा महेश्वरी। पादांगुलीषु कौवेरी रोमकूपे महोद्भवा। माणलीन शपमूले न वाराही मेढ्रमण्डले। जले धरीजा।
लस्थाने कामाख्ये कामरूपगा। उड्डियानाभिलिंगान्ते नासाग्रे पूर्णपीठगा। हृच्चैवेशे जयादेवी अग्निसंधिषु चर्चिका। चर्मधारी च
चांगानस्थाने निमे महायशाः। रक्तमध्ये मनोने च स्थाने मे हिंसिनी शुभा। माहेश्वरी च कौमारी हे चैते स्थानेचांगयोः। वामदक्षि।
णयोश्चैव वीराली करिसेंधिषु। देवी रक्ते मे गात्रे मलके ऊलकामिनी। पृथिव्यापस्तथा तेजो वायुराकाशमेव च। पंचभूतेषु
भूतेशी महारक्ते मे ऊले। रामेन्द्रान्ते मे चैन्द्री प्रजा चैव प्रजावती। मायादेहान्ते मे निमिषं ने धाम्येषशाल्मया। रणराजकुले।
चैव शत्रुमध्ये महावने। रक्ष नेत्रा महादेवी करोतु मम चिंतितं। समया समये देहि या विद्या कुलागमे। साधकानां जगा-
म्राया भुक्तिमुक्तिफलप्रदा। प्राणान् करोतु मे सिद्धि त्रैलोक्य विजया महावि-। वेतालीया महाविद्या सा मे यच्छतु मंगलं। समकोटि
महस्राणां मत्राणां नायिका तया। सा मे महेश्वरी देवी महासिद्धिं प्रयच्छतु। उन्कामुखं च मद्धि स्थाने मार्जारी देहसंधिषु। मदका
लीनया विद्या सा मे स्थाने शिवा मथे। त्रिकोणं च त्रिपावर्तं चैष पंचकं सममे। मस्तके स्थाने मे निमेतस्थाने वहुरूपिणी। पूर्वीका
त्रैपुरी शक्तिस्थाने मे मम योत्थिता। लोभवन्तो जगत्सर्वं महिरानेद विह्वला। १८ निवासे ऊरुमे देहे सा प्रतेदिव्ययोगिनी। पा-
ह्येद्दलं महादेवि सिद्धयोगिनि मे ऊले। शत्रूणां घातनार्थाय जेतृणां भोगदायिनी। महायोगिनि देहेस्मिन् सर्वदानिलंघकुरु। २०
माहेन्द्री च शिवा स्थाने योनिमध्ये गणेश्वरी। प्रेताशीनाम विख्याता करोतु कुशलं मम। २१ डाकिनी पूर्वभागे च मम सा विप्रय
च्छतु। शाकिनी पश्चिमांगेषु दक्षिणे चापि राक्षसी। वाममध्ये महामाया करोतु कुशलं मम। सा सहस्रशिरः स्थाने महानिष्टनु
भैरवी। २२ या विश्वला विशालाक्षी निर्मला मलवर्जिता। सा योगिनी महामाया स्थाने श्रीमस्तके मम। या कालकर्णिका काली
कालरात्री च कथ्यते। सा योगिनी महामाया स्थाने श्रीमस्तके मम। २४ या निशाचरराजस्य पूजिता च निशाचरी। सा योगिनी। २५ या चोर्द्ध

केशिकानामाशुष्कंकेशीमहाभया। सायो। २७ यावीरेतिसमाख्यातावीराणांजयदायिनी। सायो। २८ यामालिनीसमाख्यातानासा
ग्रेविदमालिनी। सायो। गिनीमहामायापानश्रीमस्तकेमम। २९ याकेकालकरालांगीचाएकंकालकुण्डला। सायोगि। ३०। प्रचण्डा
चविरूपाक्षीविरूपाविश्वरूपिणी। सायो। ३१ खेट्वांगीकथ्यतेयाचरौद्रीहृदयपूजिता। सायो। ३२ कलियोगिनीप्रसिद्धायालोके।
श्रूयतेकलौ। सायो। ३३ प्रेतालीकथ्यतेयाचफेत्कारीकंटवर्जिता। सायो। ३४ धूम्रालीयासमाख्याताशास्त्रेसिद्धयोगिनीमते। सायो। २५
घोररूपामहादेवीकथ्यतेयाकुलागमे। सायो। ३५ विश्वरूपाविशेषेणकरोतिचजगत्त्रयं। सायो। ३६ भयंकरीसमादिष्टायावोक्ताव
कुलागमे। सायो। ३७ कपालमालिकाप्रोक्तायादेवीमुण्डधारिणी। सायो। ३८ भीषणाभैरवीनामयादेवीभीमविक्रमा। सायो। ३९ म
ग्रेथवासिनीयाचकथ्यतेचसुरार्चिता। सायो। ४० भैरवीभीषणीयाचभैरवाष्टकवंदिता। सायो। ४१ प्रोच्यतेदीर्घलंबोष्ठीमहामायाम
हाबला। सायो। ४२ खेट्वांगीयामहाशक्तिःसंसारार्णवतारिणी। सायो। ४३ यासमस्तेषुमंत्रेषुप्रोच्यतेमंत्रवादिनी। सा। ४४ कालज्ञीकथ्य
तेयाचयुगांतेपरमेश्वरी सा। ४५ ग्राहिणीतिसमाख्यातासुरासुरमहोरगैः सा। ४६ चक्रिणीगद्यतेयाचप्रकपादात्रिलोचना। सा। ४७
याविश्ववाहकादेवीविश्वनाथप्रियासदा। सा। ४८ दर्शनेषुसमस्तेषुविदितापरमेश्वरी। सा। ४९ कंटकोद्भेदनार्थायशास्त्रेयाकंटकी
स्मृता। सा। ५० कीलकीकथ्यतेयाचसमस्तामहाबला। सा। ५१ संयामेयामहादेवीमहामारीतिकथ्यते। सा। ५२ यमदूतीतिविख्या
तायासुरासुरपूजिता। सा। ५३ करालिनीतियादेवीमहाविद्यामहाबला। सा। ५४ ललितावामहाराज्ञीसर्वचक्रैकनासिका। सा। ५५
नासाग्रेकौलिकीस्यातमदनस्यातथाभुवि। वामजंघेचकपोलेचगलकेचापहारिणी। सा। ५६ द्राविणीद्राविणीचैवलंबिनीमो
हिनीतथा। रौद्रकर्मामहाचंद्राभ्रमरीतारिनामतिः ५७ रौद्रीचकुलमाताचकाकदृष्टिरधोमुखी। कपालकुण्डलीदीर्घाकपालीकुल
गामिनी। ५८ देवीरक्ततमेगात्रेमस्तकेकुलमालिनी। भूमिरापस्तथातेजोवायुराकाशमेवच। ५९ पंचभूतेषुभूतेशीसदारक्षतुमे

विद्या। १४

२५८

257

कुले तस्मिन्स्थाने मे चैन्द्री शक्तिश्चैव प्रजावती: २१ मायास्थाने मे निसिध्यं न पालयन्त्य शास्त्रया रोगे राजकुले चैव शत्रुमध्ये महावने २२ एकानेका
महादेवी करोतु मम चिंतितं सम्यग्यासमये रेहि हिं विद्याकुलागमे २३ साधकानां जगन्नाथा भुक्तिमुक्तिफलप्रदा द्विजटी त्रिजटी प्रोक्ता
कंटलीलतिनाखिला गायत्री वाविकानारापार्वती कमलप्रभा मादिनी मदनोन्मादा मदारी मदनातुरा २५ भीषणा भीषणी नाम प्रेतसिद्धा
विभीषणा दयान्सानयानि द्राकां निदहिस्तब्धायुतिः संध्याधृतीरतिः ह्रांतिर्ह्रीनिशंपरिपठ्यते. स्वनाथेति विख्याता नगरे तव देवता ग्रा
मे देवी स्थितिदात्री पीठे पीठे स्थिरी विदुः कावेरी नर्मदा चैव गंगा नित्यमुनोच्यते २८ गोदावरी महापुण्या प्रोच्यते चाप्यरुंधती त्रैलोक्यापि महा
देवी ह्रीनाम्नी या प्रकाशिता सा देवी रूपले देहस्थाने श्रीहृदये मम सर्वाणि रविनीयोक्ता विद्यामा प्रोच्यते किल निर्मूलिनी भुजंगा।
नं मा करोतु सर्वे मम कुरुकुलेति विख्याता पदिराज्ञमुखोद्भवा या विद्या सा महारूपा जिह्वाग्रे स्थाने मे सदा ओंकारिणीति विख्याता
देहस्थाने सदा मम विद्यापहारिणी नाम कलिरूपविदारिणी भेरुंग स्थाने मे कंठे तोरला स्थाने मस्तके तथा स्तवलेश्वापि मूले स्था
ने सदा मम जांगली विषनाशाय वाचासिद्धिं करोतु मे सर्वसिद्धिकरी विद्या भुक्तिमुक्तिफलप्रदा ब्रह्मा च ब्रह्मा ब्रह्मविष्णुरुद्रो देवो महेश्वरः
सर्वभूतनिवासो हृल्लोके श्रीशक्तिचिंतकः शक्तिर्मासेन शनेन शरीरेण सदा सदा: षट्कोटिदेश मात्रेण प्राणान्रक्षतु मे सदा. शक्तिं विद्या
गिनी रूपं त्रैलोक्ये चाभिशंकर. तत्सर्वं तिष्ठते देहे शक्तिर्मा से उपासिते. कामिनी कुरुते चापि यान्या सभक्तिनिर्मिते तां देवीं दिव्यरूपा
स्यां स्मरेत्त्रिपुरां विदुः नमोस्तु ते जगन्मातर्नमोस्तु भुवनेश्वरी नमो भोगप्रदे देवि महेश्वरि. प्रकटा गोपिता सर्वा निर्वाणा भैरवी शि.
वा. स्वयं मा विजयादेः साशुभा सानल देवता यक्षिणी चूडकम्या चतथा चाकाशगामिनी भूचरी चारिता कुंभी सर्वांगमनिवासिनी
वतः पश्चान्नया देवी योगिभि मार्येन चिंतिता: अघोरेली यमाना स्व सयोगी योगविद्भवेत् ललाटे मण्डल स्थाने विरजा स्थाणु मस्तके.
प्रकाशी दक्षिणस्कंध वामे चैव त्रिलोचना जयंती स्थाने मे कुक्षौ कटाक्ष दर्पे कुंडली मालिनी लिंगमध्ये च हृदि स्थाने समाधिनी. १

ग्रंविकाशस्त्वंशेचपार्श्वयोः स्यात्तुमेदिनी हिंगाजांगी करग्रेचनासाग्रे ह्रीनाक्षसंस्थिता ब्राह्मीचक्रीचवजेचाग्यं स्यात्पादतलेमही प्रस्तताशंखि
नीरंध्रेलोचनेचविलासिनी कालिंदीमूलजिह्वाचारुकेरत्नत्तारुकिनी लांगलीजंगलीरेहेदक्षिणीचाक्षिसंस्थिता मजिनीदेहमज्ञानश्रुके
श्रुकेस्वरीतथा नवेरत्नवेतालीममरोगप्रणाशिनी रुद्रदाकरुनेशंगतिंसदैवममविग्रहे पादापादतलेस्यात्तुपृथिरत्नपंथिनी चोराग्नि
राजसर्पेभ्योभयादत्तुभैरवी दुष्टानांदृष्टिवंधंतमहाकरोतुवंधिनी चापेटीनामयाविद्यामामेकरोतुमंगले मर्कटीचेटकंगीवहत्तुमेनी
चराचरणी गुह्येगर्की मिं विद्यानांवेदेविद्याचतुष्टये चेटकानांनदाविद्याकौमारीचरणावली विघ्नराजेस्तनानामतहासंतानतुरूपिणी सु
लाकाराष्ट्रिताहृसीपानकोटलेनाहूना दृष्टिनामंत्रविद्यास्तुतिष्ठंतुममलके शुभामेचायतः स्यात्तलोहितास्यात्तदक्षिणे वामांग
रनिकालेचपश्चिमेस्यात्तुरेवता सिद्धांगंशांविनीरेक्षेत्वसत्ववतीशुभा कवचेकवचांगीचनेत्रेनेत्रकृतोस्तवा निष्ठंतियोगिनीरूपा
हैलोकेसचराचरे योगिनीयास्तुतनाः सर्वाः देहंकुर्वंतुमेवपुः शुभाणाचयुतदात्स्ये भक्तानांतुविशेषतः शक्तिमासमिदंदेयंतदेयंयस्या
कस्यचित् मंत्रध्याणेणमही लोकेचिंतितार्थफलप्रदे यःकरोतिमहात्मांसंबोध्यमासादिकेविभो संजीवनशक्तिरूपेणैवत्रैलोक्येयात्स्य
लनतमः शक्तिमासेकृतेजीवेयःकश्चिच्छेटकोभवेत् कर्मणामनसावाचानस्यधातोभविष्यति १७ इतिशक्तिमासः एवंमहाशु
क्तिमासेस्वयेहृताशिक्षस्यकारयिवान्तर्यागंकुर्यात नयथा मूलेनप्राणायामंत्रयंकृत्वासासामाचौटकेनस्वपुरान्तरवतरसंकृत्वा श्रों
ह्रींहंसःसोहंस्वाहा इमामममंत्रनामा [illegible] कलशोटकमात्मपात्रसंस्थाप्यस्वदेहेशिखेदंचश्रीचक्ररूपंविचिंतयेत्तंके १८ शिवशक्तिसदा
शिवेश्वरशुद्धविद्यारागकालनियतिविद्याप्रकृतिपुरुषमहंकारश्रोत्रत्वक्नेत्रजिह्वाघ्राणमनोवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगं
धाकाशवायुवह्निसलिलभूमिजीवसर्वात्मनेषट्त्रिंशत्तत्त्वात्मकाय श्रीमहात्रिपुरसुंदरीयोगपीठायनमः इतिपीठसमष्टिविद्ययाहृदिपुष्पां
जलिंप्रक्षिप्यगंधमाल्यादिभिर्भूषयित्वादेवीसंमुखीहृदिध्यानावाहनादिमुद्राःप्रदर्श्यासनाद्युपचारान्समर्प्यध्यानपूर्वकंहृदिसागाग्निमादि
नाडिःसमूहसंतर्प्यमूलेनगंधादिनांपूलाना उपचारान्समर्प्यतदावचतुष्ययशोधनंकुर्यात यथा-प्रे १९ ॐ भूमिर्जीवसर्वात्मनेश्चाग्रोप्र्यदे

विद्या 14

२५८

258

विसृज्य विचक्रमेहृदं नापात्रसंभृतं मदना परमामृतं परां हंता मध्येव ह्रीं जुहोमि शिवरूपतः मूलेनात्मतत्वात्मने स्थूलदेहं शोधयामि स्वाहा इत्यात्म
पात्रांतरेण किंचिन्नीकृत्य ह्सौं क्लीं विद्यादि ॥ शिवशक्ति सदाशिवेश्वरशुद्धविद्यारागकालनियति विद्यापुरुषप्रकृत्यहंकारश्रोत्रत्वक्नेत्र।
जिह्वाघ्राणमनोबुद्धिवाक्पाण्यात्मने कं ॥ ह्सौं महावन्तिवर्द्धितघटाग्रे स्वदीं रघसंग्रहे निमदिदानमोभिः इत्यन्तासोमं दिविदेवतास्वमदेमे
इत्यजमानाः स्वर्क्कताः येन निरंधनमेधमाने मोहाय काश्यपीर्यं थितिसंविद्ग्नौ कस्मिंश्चिद्दृतमरीचिविकाश भूमौ विश्वं जुहोमि वस्तुधा।
इति शिवावसाने मूलेन विद्यातत्वात्मने सूक्ष्मदेहं शोधयामि स्वाहा इति पूर्ववत् किंचिन्नीकृत्य सौः यं ॥ पादपायूपस्थशब्दस्पर्शरूपरसगंधा
काशवाय्वग्निसलिलात्मने यं ॥ सौः वामपाघसविन्नर्वा सम्पन्नाद् देवं देवं वाममसमप्ययावीः वामसप्रदिवयस्टेव भूमेरपाधिधावामभा।
नः स्वाम रूपेंतमातरः सर्वा भैरवाः सविनायकाः देवपालाश्च योगिन्यो मम देहे व्यवस्थिताः मूलेन शिवतत्वात्मने कारणदेहं शोधयामि स्वाहा
इति पूर्ववत् किंचिन्नीकृत्य ऐं क्लीं सौः यं ॥ भूमिजीवसर्वात्म शिवशक्तिसदाशिवेश्वरशुद्धविद्यारागकालनियतिविद्यापुरुषप्रकृत्यहंकार।
श्रोत्रत्वक्नेत्रजिह्वामनोबुद्धिवाक्पाणिपादपायूपस्थशब्दस्पर्शाकाशवाय्वग्निसलिलात्मने यं ॥ ऐं क्लीं सौः धर्माधर्मेद्धविदीमत्यात्माग्नौ मन
सा स्त्रुवा सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं मूलेन सर्वतत्वात्मने स्थूलसूक्ष्मकारणमहाकारणदेहं शोधयामि स्वाहा इति पूर्ववत् किंचि
न्नीकृत्य पुरा धारयन्नाहिवासनेंधनज्वालिते आत्माग्नौ तत्क्रुष्टे समथितनेचिदग्निध्यानात् मूलं ह्सः विदग्निमण्डलाय नमः इति मनसा।
संपूज्य मनसैव पूर्णां जुहोमि स्वाहा पंचपापंकृत्यं प्रकृत्य संकल्पविकल्पं धर्माधर्मौ चेति हुत्वा आत्मपात्रे स्थितं गृह्य मूलेन ह्सः इतः पूर्वं प्राण
बुद्धिमनोऽहंकारदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं
वेशहृदेवतायै समर्पितं ममस्तु स्वाहा इति सर्वं समर्प्य पात्रमाधारे संस्थाप्य आधारादिब्रह्मरंध्रगां विततां तनीयसीं विद्युत्कोटिप्रभां प्रशोध्य ज
गद्रक्षित्रिस्थितिसंहारकारिणीं कुण्डलिनीं देवीं स्वात्मनात्मा यथाशक्ति मूलमन्त्रमालया सजपं निवेद्य मायाजालमतं च विदहं शिवोऽहं शक्त्यन्ते
विदहं शिवोऽहं शिवानन्दस्वरूपः शिवोऽहं मनः परं शक्त्यंतर्गतो हं देशिकवाग्गुपदेशविनष्टपटप्रकृन्मायाभ्रमविकल्पः अहमयं बोधविमर्श

स्तवः सर्वत्र शिवोऽस्मि शिवोऽस्मि इत्यनुसंधाय एतस्य शिष्यस्यापि बाला बीजत्रयस्थाने कूटत्रयं संयोज्य संशोध्य तथैव षोडशार्णायाः स्वर्णत्रयं विवि
धाय संशोध्य श्रीपूर्णाभिषेकदीक्षितः प्रधानकलशं स्वयमस्याग्रे निष्कामपि केवलं शान्त्यायतनं तन्त्रोच्चारणपूर्वकं शिरस्यभिषिंचेत्
श्रमेण अभिषेकं कुर्युः । ततो वस्त्रमाल्यादिना अलंकृत्य श्रीचक्रे समुपवेश्य परां प्रासादं श्रीषोडशार्णा विद्याभेदं वदेत् एवं क्रमेण विद्याम्नायस
म्यक् पंचसिंहासनषट्दर्शनपंचपंचिकाम्नायपंचायतनविद्या श्रीविद्यादिभेदादिदशमहाविद्याः शैववैष्णवगाणपत्यसौरशाक्तविद्यागु
रुपादुकाविद्याः षोडशनित्याविद्या महाषोढा कादिविद्या गुह्यविद्याः क्रमेण संपूर्णमुपदिशेत् स्वक्रममप्युपदिशेत् शिष्योपि गोभूहिरण्यवस्त्रगजा
श्वमहिषीदासीदासगृहाद्यैः श्रीगुरुं तोषयित्वा भूरिदक्षिणादानादिभिः निष्कामयिकान्संतोष्य श्रीमहाराजो विद्यायपरे ... तोष
कृपणे सद्भावलक्ष्म्योज्जयिता दक्षिणादानेन तोषयित्वा श्रीगुरोराज्ञया अन्यत्र यदादिकं न दापयेत् निकुर्यात् इति कालीमतरीत्या पूर्णाभिषेक
विधिः इति श्रीविद्यार्णवे पंचदशः श्वासः ॥ अथ कालीमतरीत्या पुरश्चरणविधिः तत्र पुरश्चरणसंपन्नो मंत्रो हि फलदायकः किं होमैः किं जपै
श्च किं मंत्रन्यासविस्तरैः रहस्यानां हि मंत्राणां यदि न स्यात्पुरस्क्रिया पुरस्क्रिया हि मंत्राणां प्रधानं बीजमुच्यते वीर्यहीनो यथा देही सर्वकर्म
सु न क्षमः पुरश्चरणहीनोपि तथा मंत्रः प्रकीर्तितः इति वैशंपायनेन पुरश्चरणस्यावश्यकत्वाभिधानात् तत्र स्वतंत्रनिबंधेष्वपि विविधविधिप्रदीनानाफलद
नित्यकर्मणामिति विधिहीनानुष्ठाने निदानश्रवणात् तदनुष्ठानविधिर्विविच्य लिख्यते अत्र पुरश्चरणशब्दनिरुक्तिर्वायवीयसंहितायां साधने।
मूलमंत्रस्य पुरश्चरणमुच्यते पुरतश्चरणीयत्वाद्धि नियोगात्मककर्मणः पुरतो विनियोगस्य चरणाद्यान्तथोदितं विनियोगलक्षणमुक्तं मंत्रतंत्र
प्रकाशे धर्मार्थकाममोक्षाणां शास्त्रमार्गेण योजनं सिद्धमंत्रस्य संप्रोक्तो विनियोगो विनिश्चितः फलाय मंत्रसेवा वा राजसेवा यथा तथा चर
णात्सर्वमेवास्य पुरश्चरणमुच्यते इति एतेन विनियोगात्मककर्मसामर्थ्यजनकक्रियापदे कामुष्मिकमंत्राभ्युदिष्टक्रियावा पुरश्चरणमिस
त्रे अत्र केचित् शार्ङ्गेण जपविधिरादरेण कार्यो विद्वद्भिः सरहस्यविधिर्निजेष्टसिद्ध्यै इति दीक्षाप्रकरणाभिधाय मध्ये मध्ये पितृकरणप्रज्ञाजपदे
मोनेव विधायमंत्रे स्वेष्टदेवताभिष्टुतिभिः पिंजपध्यानेदमार्चनादिभिः स्मपसहायैः पंचसारकोरैः श्रीशंकराचार्यचरणैरभिधानात् शारदा

वि या । ६

२५९

259

तिलककृतापि सर्वत्र प्रजाजपहोमानेवं विधायप्रयोगाभिधानात् जपात्सिद्धौ तेमंत्रोनाकृतात्वफलप्रदः अनर्चितोहरेकामाशस्याद्विनयमाचरे ।
दितित्रिलप्रकाशतंत्रवचनाच्चांगत्रयात्मकंपुरश्चरणंभवेदिति · अमेतुसंसारेऽः लभूपिष्टपदीक्षेकुक्रपग्रात्मनः पंचांगोपासनेनैवपुरश्चरणीस्व ।
व्रजेत् · पंचांगानि महादेवि जपहोमस्तर्पणं तथाभिषेकः स्वविप्राणामाराधनमपीष्यते · पूर्वपूर्वदशांशेन पुरश्चरणमुच्यत इति कुलमूलावतारव
चनाच्चपंचांगं भवेदिति · वैसंवतंत्रे जपोहोमस्तर्पणं चसेकोब्राह्मणभोजनं पंचांगोपासनं लोके पुरश्चरणमुच्यते · अपरेतुमूलमंत्राद्दशांशशस्तं हंगा ।
मंत्रजपादिकमिति कपिलवचनाज्जपोपांगानां दशांशेन क्रमेणसिद्धिर्भवतीति वायवीयसंहितावचनाच्चत्रंगं भवेदिति · इतरेतु जपहोमतर्पणा
भिषेकाप्रमर्दनं · मूर्धाभिजलपानेचशणमेदेवपूजने · ब्राह्मणानांभोजनेचपूर्वपूर्वदशांशतः दशांशेनोपासने भक्त्यापुरश्चरणमुच्यत
इतितंत्रांतरवचनात् दशांगं भवेदिति · कश्चित् जपसमसंख्याहोमः होमसममपितर्पणं · कश्चित् सर्वाणि समानमेव · शतांशेनापि कश्चित् होमपे
जपसंख्येयेति प्रयोगांतरेषु · तर्पणादिभावे तेषां मंत्राणां तत्संख्येयेति नैकेणापालीविधये · याचन्ते संख्यात्मजपानावेहोमादिकं चरेत् इति
ग्रहणकालीनपुरश्चरणेतोन कश्चिद्दकः तत्रजपसंख्यायाअनीयस्त्वात् · अथ तत्तज्जपमंत्रेण तत्सदसृतिलैः शुभैः इति मंत्रेष्वविदित्वा वि
धये · तत्रजपस्य भूयस्त्वात् · यद्वाजपचतुर्थांशं स्याद्धातंमंत्रपुत्रास्तत्रनिवेशोपायनसंहितावचनात् · वृणीतदेज्जपमंत्रेणतत्सदस्रवतृतेसृतैः
पायसान्नैः मधुप्लुतैहतितिशारदातिलकवचनात् · होतात्रजपस्याष्टभागेनसिद्धौनिति दक्षिणामूर्तिकल्पवचनात् जुहुयाद्दशांशतो
नसद्धृतैस्तिलैर्वदुर्लैरितिसारसंग्रहवचनाच्च · होमस्यानियतत्वात् · तर्पणे तदशांशेनसघृतेन पयोंभसा · कुर्यात् दशांशतोहोमं
ततःसिद्धोभवेन्मनुरिति सनत्कुमारवचनात् · तर्पणादेराषवद्भ्येषांमनूनां तत्संख्यया · तर्पणं विदितेतिनस्यामिति शैवागमवचनात् ।
चनाच्चतर्पणस्याप्यनियतत्वाच्चतंत्रकल्पानुक्रमेव पुरश्चरणप्रक्रमिष्यस्तितस्मात् स्वकृते श्रीविद्याजपसंख्याच · दक्षिणामूर्तिसं
हितायां · नेमलदेकमात्रेणदैवीनोविघ्नकारिका · तासामपियदानोसौ होमंपानितिमनाग्रपि · तदाललक्षत्रयंजप्यं नियमेन ·
सुविशुद्धः वामनेश्वरे · लक्षलदेकमात्रेण दृष्टे भ्यंते भ्रनलेगणाः यदितत्त्वमनीसंपृतिसाधकस्तमनोमनाक् · सदृप्यंतेततः
सर्वाः पातालेनागकन्यकाः तासामपियदानोसौ होमंयाति मनागपि · ततःस्वर्गनिवासिन्योविद्यनंतिसुरांगनाः ॥ ॥

एवं लक्षत्रयं जप्त्वा व्रतस्थः साधकोत्तमः संक्षोभयति देवेशि त्रैलोक्यं सचराचरं जगत्क्षोभकृतं फलं श्वेतरायरूपत्वात् ज्ञानार्णवे
श्रीविद्यायाः पुरश्चरणमुक्तं यत्र वा कुत्रचिल्लिङ्गे लिंगमत्र पश्चिमाभिमुखं स्वयंभूर्वा बाणलिंगं वा हृष्टमनस्तल स्थिते पश्चिमायतने
वापि स्थिरे चापि स्ववृते शक्तिक्षेत्रे पुण्यगंगायानद्याः पर्वतमस्तके पवित्रे स्थले देवि जपेत् सिद्धि प्रसन्नधीः तत्र स्थित्वा जपेल्लक्षं साक्षा
द्देवीस्वरूपवान् ततो भवति विद्येयं त्रैलोक्यवशकारिणी एवं जप्यं यथाशक्ति कृत्वा होमं साधकोत्तमः किंशुकैर्देवतं कुर्यात् हृ
शैशान वरानने कुसुंभकुसुमैर्वापि मधुरत्रयमिश्रितैः विधिनोक्तप्रकारेण विघ्नौघं नाशयेद्ध्यानात् सर्वकामप्रदं राज्यभुक्ति
मुक्तिफलप्रदेति इत्थं पर्वतलिंगादिषु लक्षजपः श्रीविद्यायाः पुरश्चरणं दशांशहोमस्तत्तद्द्रव्यकामदत्वादिफलसाध्याधि
धानादन्तस्थपर्वतप्रदेशानितिन्यायात् तत्त्वतो विद्यायाः प्रयोगविधौ विधानतः पुरस्कानां प्रयोगानां कथं सिद्धिरित्याकांक्षायां पुरश्चरणं सर्वमेवा
विनियोगविधिरिति इतिवचनान्नदभिधानस्यैव योग्यत्वाच्च तथा श्रीक्रमसंहितायामपि लोपामुद्राविद्यामुद्दिश्योक्तं लक्षमेव
मिदं जप्त्वा सर्वपापहरो भवेदिति लक्षजपमात्रमेवोक्तमिति वामकेश्वरतंत्रे प्येवमेवोक्तमिति वदन्ति वस्तुतस्तु विचार्यमाणा
दक्षिणामूर्तिसंहितैकवाक्यतया ज्ञानार्णवे श्रीचक्रसाधनप्रकारेणोक्तं त्रिलक्षजपएव पुरश्चरणमिति भाति यथा ज्ञानार्णवे श्र
णु सर्वागमप्रभो श्रीचक्रविधिमुत्तमं यस्य विज्ञानमात्रेण कर्त्ता सदाशिवः अनेन विधिना यत्र श्रीचक्रं क्रमसंयुतं पूज्यते तत्र सक
लं वशीकुर्यान्न संशयः नगरं वशमायाति देशमाण्डलमद्रिजे योषितः सकला वश्याः त्वलत्कामाग्निपीडिताः विद्याविभू
त्वदृष्ट्या साधकस्य स्मरमानसाः तद्दर्शनेन देवेशि तायं येन सर्वयोषितः अक्षमाला समाश्रित्य मातृकावर्णरूपिणी अथ मुक्ता
फलमयी वाञ्छितफलदायिनी सर्वसिद्धिप्रदा नित्या सर्वराजवशंकरी यथा मुक्ताफलमयी तथा स्फाटिकनिर्मिता रुद्राक्षमालि
का माहेश भवेत्सर्वसमृद्धिदा प्रवालमाला वश्यत्व सर्वकार्यार्थ माणिक्यमाला फलदा साम्राज्यफलदायिनी पुत्रजीवकमाला

११

२६

२८०

तवशपदाभोगदाभवेत् अक्षमालाप्रदर्श्यार्थं वंदनेन प्रपूजितं समाश्रित्य जपेद्विद्यां लक्षमात्रं यदा शुचिः योषितो भ्रामयेत्येतं मन
स्तुस्यस्तनिश्चलं तदा द्वितीयलक्षं तत्र जपेत्साधकोत्तमः पातालतलनागेन्द्रकन्यकाः क्षोभयंतितं नाम्नाकपत्तनालेस्तुनमोदंयाति
पकः तदा लक्षत्रयं कुर्यात्साधकः स्थिरमानसः तृतीयलक्षे संप्राप्ते द्रावयंति सुरांगनाः अभिमानेन सौंदर्यसौभाग्यमदकारि
णः साधकं द्रावयंत्येव तन्नमस्यात्सोमृतस्थिरः तदा लक्षत्रयं साधुः सर्वपापातिकं ततं एवं लक्षत्रयं समाप्तं तस्य रक्ष्यमानसः
संक्षोभयति भूर्लोकपातालतलवासिनः पुरुषान्योषितो वश्यानाचरमपि प्रिये इति त्रिलक्षजपमुक्त्वा श्रीचक्रसाधनस्याकृत्वा
त् श्रीचक्रसाधनस्य काम्यप्रयोगत्वात्काम्यप्रयोगस्य विद्यासिद्धेरपेक्षितत्वाद्विद्यासिद्धेः पुरश्चरणमूलकत्वात्पुरश्चरणमनुक्त्वा
काम्यप्रयोगकथनानौचित्यादक्षमालाभेदनिरूपणादक्षमालायाः पुरश्चरणप्रकरणएव वक्तव्यत्वाद्विघ्नबाहुल्यकथनादेवं वि
धानां विघ्नानां सिद्धिप्रतिबंधकत्वात्पुरश्चरणकालएव निषिद्धत्वात्काम्यजपेष्वपि तत्तद्विघ्नानामेकफलत्वेनाभिधानाद्वतस्य :
रक्ष्यमानसः इति नियममनःस्थैर्ययोः पुरश्चरणकालएवात्यंतमावश्यकत्वेन तत्कथनस्यौचित्यात् दक्षिणामूर्तिसंहितायाम
पि शृणु देवि प्रवक्ष्यामि श्रीविद्यामंत्रसाधनं शमीदूर्वांकुराश्वत्थपल्लवैरक्षसंभवैः श्रीचक्रं पूजयेद्देवि मासमात्रं समाहितः
सहस्रजन्मजं पापं हंति मासेन दीक्षितः इत्यारभ्य प्रायश्चित्तपूर्वकं तंत्रार्णवोक्तप्रकारेणावश्यानादक्षमालायां प्रादिजपलक्ष
णप्रागुक्तप्रकारेण विघ्नत्रयकथनपूर्वकं च लक्षत्रयजपमुक्त्वा तद्दशांशेन होमः स्यात्कस्तमेव लक्षहुतेन कुंभमुद्धेन हु
यात्मयुरत्रयमेलालितैरिति तद्दशांशहोमकथनादेव लक्षत्रयजपएव पुरश्चरणमिति तंत्रे यत्तत्तंत्रार्णवे यत्रवाकुत्रचिद्भाग
लिंगं समाश्रित्येत्यारभ्य जपध्यानकथनपूर्वकं तत्र स्थित्वा जपेल्लक्षं मातृभ्यो हविः स्वरूपवानिति अक्षसूत्रलक्षशब्दः पूर्वोक्तलक्षत्र
यस्मारकः दक्षिणामूर्तिसंहितैकवाक्यात् अत एव श्रीचक्रसाधनप्रकरणानुक्तस्यानद्दोमावश्यकोक्तिक्रमप्राप्त्या वलक्षमालादी

नाममप्येवं कृतं भवति नवात् नवलक्षजपस्यापि पुरश्चरणं केचिदिहऽऽहुरिति मार्गेऽस्मिन्नवलक्षमत्रयफलप्राप्त्यै ततोऽलक्षत्रयेऽपि दि
तिकं चापि फलाधिकार्थं तथा च वामकेश्वरे प्रत्येकं लक्षफलस्मरणं तथा लक्षमेकं जपेद्देवि महापापैः प्रमुच्यते ल
क्षद्वयेन पापानि सप्तजन्मकृतान्यपि नाशयेत् त्रिपुरादेवी साधकस्य न संशयः त्रयो लक्षत्रयं मन्त्री यस्त्रितो मन्त्रविग्रहः पा
तकं नाशयेदाशु यदि जन्मसहस्रकं चतुर्भिर्विद्यया चतुर्लक्षं महावागीश्वरो भवेत् पंचलक्षात् दरिद्रोऽपि साक्षाद्वैश्रवणो
भवेत् तथा षट्लक्षमेतस्या महाविद्याधरेश्वरः तेनैव सप्तलक्षाणि खेचरीमेलनं भवेत् अष्टलक्षप्रमाणं च ज
प्त्वा विद्यां महेश्वरि अणिमाद्यष्टसिद्धीशो जायते देवपूजितः नवलक्षप्रमाणं च जप्त्वा त्रिपुरसुन्दरीं विधिवज्जायते म
न्त्री हरमूर्त्तिरिवापरः कर्त्ता हर्त्ता स्वयं गौरि लोके चाप्रहतप्रभुः प्रसन्नात्मा मदितोऽथीरः स्वच्छन्दगतिरीश्वरः अन्यत्रापि अ
थवा नवलक्षं तु जपेद्विद्यामनन्यधीः जपेल्लक्षं तु मन्त्रमिममपि क्वचित् तदसामर्थ्ये पदत्रयमध्ये गुरुः संप्रदायान्मू
लं दक्षिणामूर्त्तिसंहितायामपि अथवा नवलक्षं तु जपेद्विद्यां समाहितः तद्दशांशेन होमं तु पूर्वोक्तविधिना चरेत् सा
धयेत्स्वर्गभूलोकपातालतलवासिनः इति ज्ञानार्णवे तु नवलक्षजपो नोक्तः किं त्वेकलक्षमारभ्यैकलक्षस्य दफलर
याद्दिनवलक्षपर्यन्तमष्टपृथग्वरप्रथक् फलमुक्तं तत्र द्वितीयलक्षमतृतीयलक्षे पातितस्मात्तत्रैव संभूय पंचचत्वारिंशल्ल
क्षजपो जायते तेन तत्र पुरश्चरणलक्षणं कार्यं चिन्त्यमस्ति तत् कामस्य जप एवेति निश्चितम् अन्यच्च सिद्धमन्त्रतया तान्त्रिक संख्या
परिश्रमः अथ जपनिर्णयः यस्मिन् प्रतिरोधे नैव मन्त्रसंख्या विधीयते तत्र सर्वमन्त्राणां संख्या ह्यष्टोत्तरशतक्रमात् कल्पा
न्ते कृतेन संख्यात्रेतायां द्विगुणा भवेत् द्वापरे त्रिगुणा प्रोक्ता कलौ संख्या चतुर्गुणा इति रुद्रयामले प्रजपेदुक्तसंख्याया
चतुर्गुणं जपं कलाविति अत्र केचित् पंचयागपारदातिलकाद्युक्तजपस्यापि चतुर्गुणादिनाकलौ पुरश्चरणमिति वदं

१६ त्ति तत्र नारदपंचरात्रादिदर्शनात् प्रपंचसारायुक्तजपस्त्वतुर्गुण एव तथा नारदपंचरात्रे मार्गशीर्षस्य मासस्य त्रीण्यहान्ये
कमेव वा उपोष्य शुक्लद्वादश्यां मारभ्याष्टावर्तं जपेत् अष्टलक्षमविच्छिन्नं पुरश्चरणकृद्द्विजः शुक्लांबरः शुचिः स्नातो वाग्य
तो विजितेंद्रियः मंत्रसिद्धिरहर्षोर्थाल्लक्षद्वयजपाद्भवेत् ततो द्विद्विगुणाभ्यासाद्दैहिकामुष्मिकाचसा एवमेषात्मशुद्धिः स्याद
तावान्प्रथमे युगे त्रेतायां द्विगुणः प्रोक्तो द्वापरे त्रिगुणस्तथा कलौ चतुर्गुणः प्रोक्तो द्वात्रिंशल्लक्षलक्षणा अष्टधा मंत्रमा पु
२६१ न्यकरी ऐहिकी इहलोकस्तु वेदा आमुष्मिकी स्वर्गादिलोकदा आत्मशुद्धिस्तत्त्वज्ञानसाधनभूतशुद्धिरिति एवं द्वा
त्रिंशल्लक्षजपे अतएव द्वात्रिंशल्लक्षमानेन मत्तमंत्रं जपेत्सुनरित्याचार्यचरणैरप्युक्तं तारार्णवे बालाप्रकरणे बालालक्षं जपे
मंत्रं तद्दशांशं हुनेत्प्रिये इति बालायामभिधाय न्यासपूजादिकं सर्वमस्याः पूर्ववदाचरेदिति भैरव्यामंत्रे प्रदिष्टं लक्षत्रयं जपे
च्चतुर्गुणीकृत्य दीक्षां प्राप्य जपेन्मंत्रं तत्त्वलक्षं जितेंद्रियः इति भैरव्यामभिधाय बालायां तावदेषा बालेति विज्ञाता त्रैलोक्यव
शकारिणी न्यासपूजादिकं सर्वमस्याः पूर्ववदाचरेदिति शारदातिलककृतापि प्रदिष्टं तत्त्वलक्षं द्वादशलक्षं अतो द्वादशमंत्रा
तिवर्दत्येके विपश्चित इति प्रयोगसारवचनादिति प्रपंचसारे भैरवीप्रकरणे दीक्षां प्राप्य विशिष्टलक्षणायुतः संप्रदायाद्गुरो
र्लब्ध्वा मंत्रमसं जपेत्स्तुतियतं तत्त्वाख्यलक्षं वशी इति द्वादशलक्षमुक्तं तथा लक्षत्रयं जपेन्मंत्रमिति दक्षिणामूर्तिसंहितायां
उक्तमस्य त्रिपुरामंत्रस्य जपेच्च मंत्रमादित्यलक्षमिति भानुलक्षं जपेदेनमिति प्रपंचसारशारदातिलकयोश्चतुर्गुणजप एवाभि
हितः तेनैकत्र निर्णीत इति न्यायेन सर्वत्र चतुर्गुण एवाभिहित इति निर्णीतं न च तद्द्वैसंख्यमेकं वापि विरोधाभावादिति प्रपं
चसारे अर्हज्जपाभिधानविरोध इति वाच्यं उक्तनारदवचनेनैवास्यैहिकसिद्धिपरत्वादामुष्मिकपरत्वाद्वापि विरोधाभावा
दिति प्रपंचसारे अर्हज्जपाभिधानविरोध इति वाच्य समुद्रगानां सरितां च नीरे जपेद्धि विक्रेनिजपवेगेहि विसर्गे देवाग्रे

षामनस्वी समद्गामात्तदेव अन्यथा सर्वासामपि परं परयानयाद्यान्विशेषणा वैयर्थ्यादिति मनस्वी श्रद्धावान् सनत्कुमारः
नद्याः समुद्रगामिन्यास्तीरे गोष्ठे वा वने । अश्वत्थविल्वमूले वा सिंधुतीरे जलाशये पश्चिमाभिमुखे देवगृहे वा शैलमस्तके देवः शि
वः प्रत्यक्षो विशेषेण स्थाने पुष्पभोगविवर्जिते इति कुंभसंभववचनाच्च नारदपंचरात्रे गिरिगोष्ठप्रविष्टं तनयगणापासमस्तदाः दे
शाः पुण्या जपयज्ञेन यत्र वा जायते रुचिः प्रविष्टदः प्रसवणं नदी पुण्यपनदीतीरं अरण्यपुण्यपर्वतं पुष्करार्बुदादिः पावनेवन
मिति शारदातिलके त्रैलोक्यसंमोहनतंत्रे विल्वच्छायां समाश्रित्य मूले स्थलस्य वा प्रिये गुरोर्वा सन्निधौ गोष्ठे वृषभस्यापि शिवा
ये नदीतीरे द्विरंगेवा तुलसीकानने पि वा अभीष्टदेवसान्निध्ये जपेन्मंत्रं समाहितः नदीतीरे पुण्यनदीतीरे अन्यनदीतीर
स्यनिषिद्धत्वात् कपिलपंचरात्रे तत्र तीर्थवनग्रामदेवालयनदीहृदाः करीविविक्तरूप्यतेदेशाः सुमेत्रासिद्धिदाः वाय
वीयसंहितायां सूर्यस्याग्नेर्गुरोरिंदोर्दीपस्य च जलस्य वा विप्राणां च गवां चैव सन्निधौ शस्यते जपः अथवा निवसेत्
त्र यत्र चित्तं प्रसीदति गृहे जपः समः प्रोक्तो गोष्ठे दशगुणस्तु सः आरामे च तथारण्ये सहस्रगुण उच्यते अयुतं पर्वते पुण्ये
नद्यां लक्षगुणस्तु सः कोटिर्देवालये प्राहुरनंतं मम सन्निधौ । मम शिवस्य तथा शैवः अनंतं विष्णुसन्निधौ यामले म्लेच्छ
दुष्टमृगव्यालशंकातंकविवर्जिते एकांते पावने निंदारहिते भक्तिसंयुते सुदेशे धार्मिके राष्ट्रे सुभिक्षे निरुपद्रवे रम्ये
भक्तजनस्थाने निवसेत्तपराश्रये राजानः सचिवा राजपुरुषाः प्रभवो जनाः चरंति येन मार्गेण न वसेत्तत्र तत्त्ववित्
जीर्णदेवालयोद्यानगृहवृक्षतलेषु च नदीकूलाद्रिकूलेषु भूछिद्रादिषु नो वसेत् पुण्यक्षेत्रादिकं गत्वा कुर्याद्भूमिपरि
ग्रहं ब्रूयादमुकमंत्रस्य पुरश्चरणसिद्धये मध्यं गृहस्व ते भूमिमंत्रो मे सिध्यतामिति भूमेः परिग्रहं कृत्वा परिमाणं च सर्व
तः नदीपर्वततीर्थादौ परिमाणं न विद्यते ग्रामे क्रोशमितं स्थानं नगरे तदर्धमस्तं तोरष्टकमयात्कीलान् अस्त्रमंत्रा

१६

२६२

262

भिमं चिनान् तिथेन हृपादिषु भोगेन स्वस्तं च मण्डलं जपेत् तेन शाकोलितामंत्रेण नविघ्नैः परिभूयते क्षेत्रपालादिकांस्तत्र पूजयेद्धि पि
विघ्नमः दिक्पतिभ्यो बलिं दत्वा ततः तेन समासाद्येत् कूर्मचक्रमविज्ञाय यः कुर्याज्जपयज्ञकं तज्जपस्य फलं नास्ति सर्वा नथा
यकल्प्यते तेनान्तरे कूर्मचक्रं परिज्ञाय यो जपादि विधौ स्थितः प्राप्नोति सकलान्कामान्मन्त्राणां प्राप्नोति च तस्मात्कूर्मं विभा
गं तु विज्ञायाविलमाचरेत् स च तु ह्री स्थितो लोके तत्प्रकारस्तथोच्यते प्रथमस्तु परः कूर्मस्ततो देशगतस्तथा ग्रामगोष्ठ
द्रगश्चेति चतुर्द्धा सम्यगवस्थितः देशग्रामगृहं वाथ तद्यथा विभजेन्नतः प्रागादि पश्चिमान्तं कादिमातादि विन्यसेत् अन्तरा
णाघ्यकादीनि तु व्योमपदयोर्लिखेत् रेफो ह्यं यमयोर्मध्ये स्वगन्धादि विन्यसेत् ईशानान्तं दिशः पश्चान्नामायतरेतो भवे
त तन्मध्ये च पार्श्वयोः पाणी कुक्षिः पादौ ततस्ततः पुच्छमेकं मयोर्मध्ये पृष्ठमेकं षडङ्गवत् मुखे सर्वार्थसिद्धिः स्यात्करयोः
सर्वसिद्धयः कुक्षौ तु निःस्वते फल्यं पादयोर्नैव सिद्धयः पुच्छे मरणमुक्तं तु नियतः पृष्ठे सर्वाः सिद्धयः तस्मात्तन्त्रायुविज्ञाय
कुर्यात्सर्वं जपादिकं कादिमतरीत्या श्रीविद्यामधिकृत्य कुलमूलावतारे ब्रह्मनाडीगतानादिहान्तवर्णान्विभाव्य च
आर्णाविन्दुयुतं कृत्वा स्वेष्टमंत्रं जपेत्सुधीः अकारादिषु मेयोन्यतन्या कादिषु चक्रमात् हार्णामिह मध्ये तत्र कल्पयेज्जगदी
श्वरि तदा लिपिर्भवेत्तमाहृपानसंख्यया अनया सर्वमंत्राणां जपः सर्वार्थसाधकः लकारभेदसंस्थाने लकारादिवि
लोमतः एकैकान्तरितं मंत्रं जपेदेवं फलप्रदमिति अत्राष्टोत्तरसहस्रं वाष्टोत्तरशतं वा यद्वा जपः कार्यः स्यात्तदा वर्गाष्टक
विभेदेन भवेदष्टोत्तरं शतमिति अत्र वर्गाष्टकजपस्तु द्विष्टशतादिसाध्यावसान एव कल्प्यः पक्षक्रमेण जपः कलावे
तच्चतुर्गुणं जपादिकं कार्यमिति श्रीतन्त्रराजे विद्यायाः साधनं सिद्धिन्तद्गतं वस्तुमेव च तदाभिसंख्याचिह्नानि विद्यानि
प्राप्तकालायतः स्वक्रमेणादेवेशि सर्वदा प्रीतिकारकं येन मर्त्योपि सिद्धः स्यात्तजीवन्मुक्तो भवत्ययः स्नानः स्वगंधस्थलि

लैः प्राक्स्नात्प्राक्तरूपवान् यदुहं विनेतसंनेतोप्यरक्तागारेकमंभजेत् संध्यात्रयेपि जपवान्सहस्त्रं मौनसंयुतः मोचयेद्दसमोयेतं
पयः पायसमर्प्पयेत् नीराजनेचकर्प्पूरैः कृष्णात्संध्यासनात्स्वपि होमं दशांशतः कृष्णान्तं ध्याणि चेंडमज्जलैः स्वनित्यादृष्टेनो
नायत्रिसहस्रं दिनं प्रति कृष्णानेनभवेत्सर्वाणि लक्षणानि ममीसुरि एवं लक्षत्रयं प्रोक्तं प्रथमेत्तत्कृतेयुगे त्रेतायां द्विगुणं तद्द्वाप
रेत्रिगुणं स्मृतं कलौ चतुर्गुणं प्रोक्तं मन्त्राणां च संख्यया तान्त्रीयं समसमं संख्यास्तातेनस्मादेकविंशतिरिति तान्त्रीयकृतस्मस्वर
मंत्रनविहूनं स्थकृते समाप्तराणि भवति तेषां समानां वर्णानां प्रतिवर्णं त्रिलक्षमिति [illegible] एकविंशतिलक्षजपः पुरश्चरणांकृतस्य
गेकलावेन चतुर्गुणं जपश्चतिपुरणाणुक्तं पुरश्चरणांते तत्तर्पणं होमं ब्राह्मणभोजनात्मकं पंचांगरूपं भवति अत्रैवं तर्पणं चकं
एवंपूर्वं दशांशतः कार्यमिति विशेषः तथा तेनामिषु गुणेषु सान्मात्वावद्विकृशीविता वतितातोभत्तोभोगात्र विघ्नं यदि जायते
तास्तु संख्या सर्वाणि समस्तं प्रार्थ्यं श्रेयस्कमं वर्ज्ञातिस्पर्शादेवेशितहितेन सर्वदापि च नास्तिकैः सह संलापो मैथुनं परिवर्जितं चि
ताश्चाकोनथालायं देशान्तरपरिश्रमं तद्वास्तेषु वर्ज्याणि प्रोक्तान्यन्यानि शाकादि स्पर्शादर्वत्र सर्वदा सर्वदानाशकानि च परवे
त्रमहस्तीषु वांछान्त्रिदन्तानि च स्त्रीषु दोषप्रहारं च दुष्टात्स्थापिनयोजयेत् सिद्धिविघ्नानि चोक्तानि वा सन्ताकथनेमया अत्रानुकू
लस्य चिह्नानि स्पर्शादिसाधयनस्तदा पुरश्चरणानि विष्टस्य तदा पुरश्चरणाकाले स्वप्ने पाने शुभवतिनाहृदेः संमेलनं निशि गजाद्रिसा
यं स्वर्गे शुभविहारो राजदर्शनं गजानां मंगलानां च दर्शनं नृत्यगीतयोः उत्सवं समत्वं सामदर्शने स्पर्शने तथा तिथ्यादिस्पर्शादे
वेशिविघ्नानर्थकस्वर्णाभिदैः स्वप्नप्रहारं तैललेपनं मैथुनं परनारीभिरिंद्रियच्यवनं तथा राष्ट्रक्षोभावह्निवायू जननीवंधु
नाशनं गुरुबंधुपदासंपत्तिर्वधूनां व्याधिवापनं अन्यमंत्रार्चने अद्धाविघ्नानि नित्यार्चनेऽतिशः तराणां बहुभिः पुण्यैः कृतैर्वद्रुष्टतत्म
स अद्धास्थैर्यसंप्रदायशुद्धिर्नित्यार्चनेभवेत् अथ कूर्मचक्रं कूर्मस्थितिमविज्ञायये जपादिविधिस्थितः समाप्नोति फलान्तु

धौ ना

मेति

१६ क्रान्यन्यथा नाशङ्कानि च तस्मात्कूर्मविभागं तु विज्ञाय ाः खिलमाचरेत् स च तत्त्वज्ञो स्थितो लोके तत्प्रकारं शृणु प्रिये प्रथमस्तु परः
कूर्मस्ततो देशगतस्तथा ग्रामगो गृहगश्चेति चतुर्धा तद्व्यवस्थितिः देशं ग्रामं गृहं वापि तु नवधा विभजेत्ततः प्रागादि पश्चिमान्तेषु का
दिमातानि विन्यसेत् अवर्गाणि समाख्यवचना विपर्ययान्न्यसेत् ईशोद्वयमथो मध्ये स्वरान् प्रागादि विन्यसेत् ईशान्तासु दिक्षुः पश्चान्ता
२६२ मायाणि यतो भवेत् तन्मध्ये पार्श्वयोः पाणिकुक्षि पादेतन् ततः पुच्छमेकं ततो मध्ये हृत्पृष्ठमेकं षडङ्गवान् सोऽव सर्वार्थसिद्धिः स्या
त्करयोरल्पसिद्धिकृत् कुक्षौ तु निःस्वतेष्वल्पं पादयोः सर्वहानिकृत् पुच्छे मृतिस्तु नियतं हृत्पृष्ठे सर्वार्थदायकं तस्मात्तस्या पुवि
263 ज्ञाय कुर्यात्सर्वं समाहितः मन्त्रं देशकूर्मस्या हृत्कूर्मस्वरात्तथा ग्रामादि कूर्मद्विनयं परकूर्मे न तद्द्वयं नित्यं पूर्वं तु वायस्मा
त्तेन तत्सिद्धिरीरिता एवं कूर्मविभागो यमीरितस्तु चतुर्विधः मन्त्राणां येन सिद्धिः स्यात्सर्वेषां सर्वतस्तथा संवर्ग्याया मवि
स्तारं हृत्वा हृष्टाभिस्तु पेषतः विज्ञाय वर्गान्तेष्वेकमाधनानि प्रकल्पयेत् ततस्तु स्थानेषु नियतमनर्थस्तु अन्यथा यतः वात्कपृष्ठा
न तूपेक्षु प्रसिद्धिर्नाम ततो भवेत् अत्रैव तत्र पुक्तोऽपि देशनाम न लिख्यतेन प्राधान्ये देशकूर्मे तु यत्नतः ग्रामकूर्मेऽपि स्वरसति के
वलस्वरयुक्ते तु सर्वत्र स्वरस्मृतिकोष्ठस्वाक्षरं देवीयामले कुरुक्षेत्रे प्रयागे च गङ्गासागरसंगमे महाकाले च काश्यां च दीपस्था
तं न चिन्तयेत् तत्र प्रयोगस्तु तेत्र समुद्रतीरे नदीपर्वतसंगम समुद्रगामिनीनदीतीरे विल्वगह्वरविविक्तनिर्जरदेशो गोष्ठमध्य
विल्वमूलं जलाशयपश्चिमाम्रवृक्षमूलं शिवालयगुरुसन्निधि तुलसीवनस्वेष्टदेवतासन्निधि पुण्यदेशे तीर्थवने पवन
नदीहृद स्वाभिमतस्थानं म्लेच्छदुष्टमृगव्यालशङ्कावर्जिते कानने निर्जरहितया मिकस्वेष्टदेवनामकतनाश्रयस्तमितानि
रुपद्रवराजन्यस्य चिवादिगमनागमनरहितस्थानान्येषामन्यतमं स्थानं ग्रामेऽस्मिन् ग्रामान्ते नगरे क्रोशद्वयं नदीपर्वततीर्था
रूपद्रवराजमन्त्रस्थानसिद्धये समये गृहस्थस्य भूमिर्मित्रोभिसिद्धयतामिति मन्त्रेणाभूमिपरिग्रहं वि
दीपविमानादि ते अथ षट्कर्मसु हृमन्त्रसमयुग्मग्रामसिद्धये

याप्ती रुद्रतत्त्वभवान्वितन्त्रिमितान्दशकौलान्कुर्यात् स्वमंत्रेणाष्टयगणाभिमंत्र्य पूर्वाद्यष्टसु दिक्षु रुद्रेशानयोर्मध्ये तिस्रोतिवरु
णायोर्मध्ये च निवेशयेत् तेषु स्वं च संपूज्य तेषु स्थानेष्विन्द्रादि दशदिक्पालेभ्यो माषभक्तबलिं दद्यात् ततः क्षेत्रपालगणेशवा
स्कबटुकसंपूज्य प्राकारत्रयगायत्र्यादितोरणान्तरायतनाष्टके स्वरान्विलिख्य नव कोष्ठानि कृत्वा तेषु पूर्वादिक्रमेण कचटत
पयशान्वान्वान्त्यसवर्णान्स्वष्टकोष्ठेषु विलिख्येशानकोष्ठे लक्षौ विलिख्य मध्यकोष्ठं तच्छेषं नवधा विभज्य पूर्वादिक्रमेण
द्विशः द्विशः षोडश स्वरान्मध्यकोष्ठेषु विलिखेदिति कूर्मचक्रे निर्मायतत्र मध्यनवके मध्ये पूर्वादिक्रमेणाष्टसु दिक्षु चाष्ट
नवृषभशैलराजवास्तुकार्यकृच्छ्रियपयोनिमहाशविख्यापाडत्रगणान् नव क्षेत्रपालान् प्रणवादिचतुर्थ्यन्तनमोन्ततन्त्र
त्रान्त्रामसंपूज्य ग्रामनामाद्यक्षरयुक्तकोष्ठदिशि कूर्ममुखं वितन्वन्तदलाभे मध्ये कूर्मपृष्ठे वा मठवाटस्थः कोष्ठद्वयान्यतमे [illegible]न मो कू
मेहस्तिवाटद्वंद्वपार्श्वे शीतवातातपनिवारणार्थं मंडपं कुर्यात् । कालिकाहृदये स्थानमाथकयामीश्वरोविग्रहविधेन नरदत्त
शास्त्रेताताताततत्र सम्यक्कारिन्यजेत् अस्य प्रामे अरित्वमहृदयस्यांके गकारेणापरस्पर अहृदयस्य ठकारेण ठकारस्थापितेनच १
ल्टहृदयस्य पकारेण पकारस्थापिल्लहृदयं आहृदयस्य घकारेण घकारस्थापृगेनच २ जकारस्य टकारेण अकारस्य खकारतः
डुकारस्य नकारेण फकारस्य थकारतः ३ भकारस्य तरेफेणायकारस्य सकारतः । अरित्वमेषां वर्णानामन्येषामित्र भावना कु
मिचक्रे विप्रस्थानं साधकायत्नतस्त्यजेत् यथा गर्गस्य वैरिस्यादहं हामं महस्तुं [illegible]यामेरेखुरे स्मिवमाकाराद्येषु यातनेयत्
अरक्षस्य ठक्कारामिल्लनकस्यारिपक्षके उद्दिश्याणां वेमसौ द्वंद्व कुणकस्य च तयतो टकुथारस्यां सास
च डाकदेवस्य नारायणमथमामिफडिभहतः । भद्रस्य रमकं चैव यत्तटत्न स्यमोमकः एवं क्रमेण मेषाद्यवैरिस्थानं त्यजेद्
पः ॥ अथमाला सा तद्विविधा मातृकाक्षरमयी रुद्राक्षादिमणिमयी चेति तत्र प्रथमामाहुर्ज्ञानरत्ने अकारादिक्षका

शोधितामयेमेश्लो का: पुलकामरदं वादेन

जुभद्द=

१ ञ=

ञंञ

१९

२६४

264

गतैर्विद्रुवन्मातृकाक्षरैः अनुलोमविलोमस्थैः क्षिप्तया वर्णमालया प्रत्येकं वर्णपुटकं मंत्रं जप्तमाः स्युः सर्वसिद्धिदाः वैरिमंत्रा
अपि नूनं गोमृसिद्धाः स्यात्तत्क्षिप्रतः शारदातिलके आदिक्षान्तार्णयोगिन्यादक्षमालेति कीर्तिता तत्राण्येव अकारं प्रथमं मेरु
विद्यकारांत्यस्ततः परं अक्षमालेति विख्याता मातृकावर्णरूपिणी अत्र वर्णाष्टकं तयस्तु दिक्षु संख्यावसानकार्यं तद् क्लेमा
तृकार्णैव आरभ्याकारमादौ मनस्तिपरिजपेन्मातृकां तावसानौ पूर्वान्तश्चावसानं पुनरपि च पठेदंतमेवादि वेदि लंतान्तेष्वेव
वर्णैस्तदनुपरिजपेद्वृयवावसाने तांतेसंहारमुक्तं पशुपतिगदितायामलेमालिकेयं ख्याता मेकस्याते अवसानं दकारं ला
ताकचटपयशलाख्यानं तन्त्रुउद्दिष्टसंख्यासमाप्रस्तं तत्रं अवसाने उद्दिष्टशतायवसाने एवावधारणं द्वितीयात्तदुत्तरतंत्रे
अष्टवर्गैरक्षमालाया वियान्तं मंत्रिकाम्यया पंचविंशतिभिः प्रोक्ता मणिभिर्मुक्तिदायिनी त्रिंशद्भिर्धनदा सप्तविंशत्या देवकस
धदा अभिचारकरी पंचदशभिः परिकल्पिता चतुःपंचाशदवेः सकाम्यकर्मसिद्धिदा अष्टोत्तरशतैः क्षिप्ता सर्वाभीष्टप्रदा
मता मण्यः शंखसंभूताः प्रोक्ता लक्ष्मीप्रदा मता मुक्तिप्रदा स्फाटिकजा पद्मास्तापुष्टिवर्द्धना भुक्तिमुक्तिप्रदाः प्रोक्ता रुद्रा
क्षाः सर्वसिद्धिदाः पुत्रजीवभवाः पुत्रपशुधान्यसमृद्धिदाः विद्रुमाख्या तत्स्वर्णयोपतसौभाग्यवश्यदाः मौक्तिकास्तु कि
दाः सर्वसिद्धिदाः प्रोक्ताः सर्वसंपत्समृद्धिदाः पापापहाः कुशमयाः कामदाः स्वर्णरूपजाः तथा शारदातिलके रुद्राक्षमालिका सूतेज
पेन्नाप्यमनोरथान् पद्माक्षैर्विहिता माला शत्रूणां नाशिनी मता कुशग्रन्थिमयी माला सद्यः पापप्रणाशिनी पुत्रजीव
फले क्षैः प्राकुरुते पुत्रसंपदं निर्मिता रूप्यमणिभिर्जपमालेप्सितप्रदा हिरण्मयैर्विरचिता माला मान्यफलं ति प्रवालैर्वि
रचिता माला प्रयच्छेत्पुष्कलं धनं सौभाग्यं स्फाटिकी माला मौक्तिकैर्विहिता श्रियं निर्मिता शंखमणिभिः कुरुते कीर्तिमक्ष
या सर्वैरेतैर्विरचिता माला साम्राज्यं तां मिश्रेणेत्तनिषेधमाह उत्तरतंत्रे इंद्राक्षैर्यो रिजप्यन्तरुद्राक्षैः स्फटिकैस्तथा मा

न्यक्म्यैव प्रयोक्तव्यं पुत्रजीवादिकं वचनात् यद्यन्यत्र प्रयुञ्जीत मालायां जपकर्म्मणि तस्य काम्यं वमोदं वन्नरद्दाति प्रियंकरि जन्मा
न्तरे जायते सोऽपि वेदवेदांगपारगः भिस्त्रीभावं ततो याति वाणालैः पापकर्मभिरिति ब्रह्मयामले रुद्राक्षस्य या माला पितृणां
मोक्षदायिनी निशादार्वाक्कृता वैरिफलादयाज्ञानकर्म्मणि अर्कस्योच्चाटने कार्य्या श्रीफलैर्ज्ञानसाधने गजदन्तस्य मणिभिः
कृय्या सर्वार्थदायिनी राजती सर्व्ववश्येषु मोहने तांत्रजा स्मृता मारणे चायसी प्रोक्तेति श्रीफलैर्बिल्वकाष्ठजैः सा पुनस्त्रि
विधा प्रोक्ता सात्त्विकी राजसी तथा तामसी चेति तास्त्वाधाः शान्तेरष्टान्तरैः शुभैः मणिभिः शंखसंभूतैस्त्वनेपद्मसमुद्भवैः मणिभि
स्तामसी चाष्टजीवैर्वतसंभवैः श्वेतचंदनसंभूतैरन्यैः श्वेतनद्भवैः कुशग्रन्थिभवैः ल्कमा राजसी च तत्र हस्त्रैः पंचाषाढी
रक्तपद्मवीजैर्वा रक्तचंदनैः सौवर्णैः स्फाटिकैः जैपीततारसमुद्भवैः पद्मकाष्ठसमुद्भूतैः रजनीकाष्ठसंभवैः देवदारुसमुद्भूतैः
कुलकाष्ठसमुद्भवैः मणिभिस्तामसी चाष्टविंशद्भिर्मणिभिः कृता सा शमीनिंबाविंबाम्लतुंडुभद्रसमुद्भवैः कपिपार्द्दूलक्ष
लानां जंतूनामस्थिसंभवैः नराश्वरासभमानां लस्तुभिर्ग्रथितैरपि ततत्कार्य्यविभेदेन सा सा कार्य्या विपश्चितेति कुशग्रन्थि
मालां तु ब्राह्मणानामेव कुशग्रन्थ्या जपेद्विप्रः सुवर्णमणिभिर्नृप पुत्रजीवैर्जपेद्वैश्यः पद्माद्यैः सर्व एव चेति नारदवच
नात् गोपालस्य पद्ममतीव प्रशस्तं गौतमेन तन्मात्रविधानात् यथा समाहितमना भूत्वा पद्मवीजाद्यमालया जपेदिति
नारदपंचरात्रेऽपि जयस्य गणनो प्राहुः पद्माद्यैर्भक्तिवर्द्धनैरिति वैष्णवानामपि रुद्राक्षमाऽतीव प्रशस्ता यत्तु भावचन्द्रे
विष्णुपकस्य रुद्राक्षैर्जपो नमापीति वराहवचनात् अथ जपमालासंस्कारः कालः तत्र योगिनीतंत्रे द्वादश्यां वैष्णवी मालाक
र्त्तव्या साधकोत्तमैः मंत्रसंस्कृतैर्विष्णुमंत्रेण दिव्यभोगप्रयत्नतः दिव्यभोगस्पर्वीद्धे शक्तीनामपि कन्त्रमाभुक्त्वा रात्रेय यथाविधिः
भोजनं तद्दिवस एव अष्टम्यां च नवम्यां च चतुर्दश्यां तथैव च चतुर्दश्यां तथा कुर्य्यात् क्रिव स्यापि सरेश्वरि चतुर्थ्यां गणनाथ

१९ पस्मसपञ्चाङ्गैर्भास्करस्य तु पूर्वाह्णे देवि कर्तव्या समसम्पाजगदीश्वरीति । अथ सूत्राणि ॥ तत्रैव पट्टसूत्रकृता माला देव्याः प्रीतिकरी म
दा । कार्पाससूत्रैस्तु वीमाला पञ्चसूत्रैरथापि वा । ऊर्णाभिर्वाथ तैलैर्वापि शेवी माला प्रकीर्तिता ॥ कार्पाससूत्रैरन्येषां विद्यात्
२६५ मालिका । कार्पाससूत्रविशेषस्तत्रैव ततो द्विजेन्द्रप्रपत्नीनिर्मितं ग्रथितवर्तितं त्रिगुणं त्रिगुणीकृत्य सूत्रं प्रक्षाल्य यत्नतः
कालान्तरे रुद्र उवाच देवदेव महादेव सिद्धिस्थितिलयेश्वर रुद्राक्षैर्जपमाला तु कथं कार्या महेश्वर संस्कारश्च कथं नाथ कर्त
मः कीदृशं फलं ईश्वर उवाच शृणु षण्मुख वक्ष्यामि रुद्राक्षैः क्रियते यथा जपमालाविधानेन येन साक्षाच्छिवो हि सा एकवक्त्रैर्हि
चक्रैश्च चतुर्वक्त्रैश्च पञ्चभिः षट्वक्त्रैर्वाथ कर्तव्या मिश्रास्तु वर्जयेत् सविभक्तांस्तु कर्तव्यमुखान् सूलान्तु वर्जयेत् रुद्राक्षमात्र
मेकं मुखं विशिष्टं तु निस्तरं धात्रीफलप्रमाणेन श्रेष्ठमेतदुदाहृतं बदराकृतिप्रमाणेन चणकाख्यमधमं मतम् । ॐ ह्रं चक्रं तु मे
वाच्यं कर्तव्यं तन्न लंघयेत् नवनीतं तु नाच्छेद्यं तद्ध्यानीयं सम स्पृशन् अस्पृशंस्तन्यमन्यस्य उत्तरतन्त्रे एकोमुखस्तु देवः स
र्वेभ्यः स्थूलसंभवः श्राद्धस्थूलं ततस्तस्मान्न्यूनं न्यूनतरं तथा विन्यसेत्क्रमतस्तस्मात्सर्पाकारं च सापतः ब्रह्मग्रन्थियुतं क
ष्यात् प्रतिबीजं यथाविधि अथवा ग्रन्थिरहितं दृढं रज्जुसमन्वितं त्रिरावृत्त्याथ मध्ये तु नैवार्थं हन्यात्तदेशतः ग्रन्थिप्रदक्षि
णावर्तः सब्रह्मग्रन्थिसंततिः तथा कालान्तरे एकभक्तं विधायाथ समाप्य कार्पण्यं येन त्वयं एकभक्तं तु पूर्वदिने तत्तदहि
ने अन्यथा पूर्वोक्तक्रियमाणायाः प्रतिष्ठायाः सर्वस्मैजननासंभवाद् युक्तत्वाच्च कृतनित्यक्रियः शुद्धे उक्ते स्वदेशे मन्त्रचित्त
यथाकामं यथालाभं महताप्यानीय यत्नतः वक्त्रसंख्याकार्याकरणाय यत्त उक्तः अन्यान्यसमरूपाणि नातिस्थूलकृशानि च
कीटादिभिरदुष्टानि विस्तीर्णानि तान्यपि च गव्यैस्तु पञ्चभिस्तानि प्रक्षाल्य च पृथक्पृथक् आदौ पूर्वदिने अन्वानरुद्राला
न् यथाकामं वक्त्रभेदफलभेदश्रवणात् शक्त्यतिरिक्तमेकभक्तं ज्ञेयं पञ्चगव्यं तु नष्टसिद्धस्मरणात् ऽगन्धकाञ्चनवर्णायाः

श्वेतायाश्च वर्णमये गोमूत्रं ताम्रवर्णायाः नीलायाश्च भवेद्दधि घृतं वै कृष्णवर्णाया इत्येतत्पंचगव्यकं गवां वर्णास्त्वस
लभाः संनिदेशेषयत्र च तत्र वर्णविभागेन पंचगव्या निवादयेत् वर्णालाभे न दोषोस्ति मात्राहीनं तु वर्जयेत् गोशकृद्द्विगु
णं मूत्रं सर्पिर्दद्याच्चतुर्गुणं क्षीरमष्टगुणं प्रोक्तं पंचगव्ये तथा दधि गायत्र्यादाय गोमूत्रं गंधद्वारेति गोमयं आप्यायस्वेति च क्षी
रं दधिक्राव्णेति च दधि तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकं प्रतालप्स्यकैकथितं विष्टरेणानिखयं सद्योजातेति मंत्रेण
तालयेत्पंचगव्यकैः पंचगव्यं जलेनैव तालयेत्पंचगव्येन सद्योजातेन मंत्रेलेरितिनत्वमारवचनादिभिः स्वादिपदेन कर्पूरक
स्तूरीकुंकुमादीनि गंधेन मंत्रयेत्पंचमेनैव प्रत्येकं तु शतेन शतं मेरुवं पंचमेनैव तथाघोरेण मंत्रवित् शैवागमे अघस्य यत्र न
वकैः पद्माकारेण कल्पयेत् सूत्रं मणिं च गंधाद्भिः तालितां तत्र वर्तितां येत् तारं शक्तिं मात्रकां च सूत्रे रुद्राक्षकैः पृथक् वि
न्यस्य सज्जयेदाज्येन जुहुयाद्देवमालिकां तः मणिमेकैकमादाय सूत्रे तत्र तु योजयेत् गोपुच्छसदृशीं कार्या एकाग्रा वा समेद
का मुद्राष्टकं दर्शयित्वा प्रत्येकं पूजयेत् क्रमात् ग्रथितं पंचभिर्मंत्रैः पूर्ववचसा शिवः मंत्रैः सद्योजातादिभिः पंचभिर्हो
मोप्यभिरेवं मंत्रैः एतां होममपि एकमंत्रस्यावश्यकत्वात् मुद्राष्टकं त्वावाहनादि अनंतरं पूजाविधानात् अन्यमणिस्त्व
पयं संस्कार इति वदंति तत्र तान्विजृंभितं रुद्राक्षाणामयं प्रोक्तः संस्कारः स्कंदनिदेशतः इति रुद्राक्षतंत्रोक्तः कर्तव्यो गुरुमाय
के वितिकालात्तरवचनादेव अथ रुद्राक्षमाहात्म्यं तद्भूतिस्तत्प्रभेदास्तत्फलानि च तत्र स्कंदपुराणे त्रिपुरो नाम दै
त्यस्तु पुरासीदतिदुर्जयः जिता येन सुराः सर्वे ब्रह्मविष्ण्वादिदेवताः त्रिपुरस्य वधार्थाय देवानामाणाय च लोकानाम
यनाशाय कर्तुं धर्मप्रवृत्तये सर्वदेवमयं दिव्यं ज्वलितं घोररूपकं चिंतितं स्यात्मया पुत्र अघोराख्यमनुत्तमं निश्चयात्तस्य
भार्यायास्त्वाब्यावरयन् दिव्यवर्षसहस्राणि चक्षुरुन्मीलितं मया पुटाभ्यामाकुलाभ्यां पतिता जलबिंदवः ते चाश्रु

१८

२६६

266

विद्वेषोज्ञाता महारुद्राक्षवृन्दकाः स्थावरत्वमनुप्राप्ता मर्त्यानुग्रहकारणात् फलंति सर्वकाले हि स्वविच्छिन्नफलप्रदाः बा
सिष्टलैंगे ब्रह्मेन्द्रमध्ये सकलामरवृन्दार्थसंशोभाः पुरासुरविमर्द्दनकल्पकाले तत्रैव पुरे तावन्निरोधमवाप्य दिवारिरुद्राक्षवृ
क्षनिकराणि नदीव बभूवुः रुद्राक्षान्कण्ठदेशे दशनपरिमितान्मस्तके विंशतिद्वे षट्षट्कर्णप्रदेशे करयुगलगतान्द्वादश
द्वादशैव बाह्वोरिन्दोः कलाभिः पृथगिति गदितं चैकमेवं शिखायां वक्षस्यष्टाधिकं यः कलयति च शतं स स्वयं नी
लकण्ठः रुद्राक्षबीजमिति ये भुवि धारयन्ति देहे च मूर्द्धनि तथा वसति भूमिभागे तेषां वसन्ति महदाशयमप्यत्र नेत्रपद्मा
सनेन्द्रसुरकिन्नरपट्टराशि शिरोमाला च षट्त्रिंशन्नहारदेशे कण्ठमालिका कूर्परे षोडश प्रोक्ता द्वादश मणिबंध
योः अष्टोत्तरशतैर्युक्तमुपवीतं विधीयते नरर्द्दे मुररमो माला शिखायामेकमुच्यते कर्णयोश्चापि षट्संख्या धारणाक्र
मईरितः संख्याहीनेन न कर्त्तव्यमधिकेनैव दुष्यति संख्याभेदं प्रवक्ष्यामि जपमालासु या भवेत् मातार्थं पंचविंशत्या

रुद्राक्षजाति म देवतादि

सप्तविंशति पौष्टिके त्रिंशच्च यतनं संपन्ने पंचदश्याभिचारके ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति चतुर्विधः श्वेतारक्तः स
वर्णाभः कृष्णवर्णः क्रमात्स्मृतः पीतशुक्ला ब्राह्मणाः श्रेष्ठा जपमाला कृतेस्थश स्फला भेत्तु द्विजानां नामपि वा स्वस्वजातयः
स्नितिस्थूलानि सूक्ष्मस्वस्फुरितानि भग्नानि लघुः छिन्नः पुरायूतान्जीर्णान्कृष्टानि तानवरः स्मृतः मौर्ण्यकृमिनस्थानं मूलए
दृष्टनिम्नकं घटयेदेकादि यवलम्मणानि सद्वेत्पंक्तिवत् अन्योन्यसंघर्षणादेव जपद्वादिमवेद्ध्रुवं श्रेष्ठं तत्क्ष्वनानेन वर्त्ति
नत्रयनूपतः अन्योन्यमध्यदेशात्तु कर्त्तव्या ग्रंथयः शुभाः चतुर्दशान्तवक्त्राणि रुद्राक्षाणां क्रमाद्भवेत् धारणस्य फलं ते
षां वक्ष्यते विधिवात्क्रमात् एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति द्विवक्त्रो देवदेवेशो गोवधं नाशयेद्ध्रुवं त्रिवक्त्र
मनलः साक्षात्स्त्रीहत्यां दहति तत्क्षणात् चतुर्वक्त्रः स्वयं ब्रह्मा गुरुहत्यां व्यपोहति पंचवक्त्रः शिवः साक्षात्सर्वपापैः प्र

न

द्वि प्रं न-४

मुच्यते षड्वक्त्रः कार्तिकेयस्तु धारयेद्दक्षिणे करे ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः सप्तवक्त्रो महानागो ह्यनंतो नाम नाम
तः गोवधस्वर्णचौर्याभ्यां मुच्यते सर्वदा नरः अष्टवक्त्रो महासेनः साक्षाद्देवो गणाधिपः विघ्नानामस्य प्रणश्यंति सोंते याति परां
गतिं नववक्त्रो भैरवः स्याद्धारयेद्वामहस्तके भुक्तिदं मुक्तिदं प्रोक्तं मम तुल्यो बली भवेत् दशवक्त्रं भवेद्यस्य साक्षाद्देवो
जनार्दनः पिशाचग्रहवेतालब्रह्मराक्षसपन्नगैः संभवानि च दोषाणि किं प्रणश्यंति धारणात् वक्त्रैकादशरुद्राक्षं रु
द्राएकादश स्मृताः शिखायां धारयेन्नित्यं तस्य पुण्यफलं शृणु अश्वमेधसहस्राणि वाजपेयशतस्य च गवां शतसहस्रस्य
सम्यग्दत्तस्य यत्फलं तत्फलं समवाप्नोति वक्त्रैकादशधारणात् वक्त्रद्वादशरुद्राक्षं भास्करं द्वादशात्मकं बहुस्वर्णाश्वमे
धफलं प्राप्नोति धारणात् वक्त्रत्रयोदशं वक्त्रं रुद्राक्षं यदि धारयेत् पूज्यते सततं देवैः प्राप्यते पुण्यमुत्तमं चतुर्दश
वक्त्रं वै रुद्राक्षं धारयेद्यदि मूर्ध्नि स्थितेन तद्वै नित्यं तस्मिन्मोक्षं म्रियते नरः पवित्रमयवक्त्रं तु शशिखायां शिरः स्वयं वे यते
सततं देवैः सत्यं च षण्मुखस्तु च बहुलं प्राप्यते पुण्यं भाग्यवानुज्जायते नरः स्नाने दाने जपे होमे वैश्वदेवे सुरार्चने प्रा
यश्चित्ते तथा श्राद्धे दीक्षाकाले विशेषतः रुद्राक्षधारी भूत्वा च यत्किंचित्कर्म वैदिकं यो विप्रः सततं कुर्यात्तत्कर्म सफलं
भवेत् पद्मपुराणे कंठे शिरसि हस्ते च कर्णयोरुपवीतके रुद्राक्षधारणाद्देव रुद्रो भवति मानवः शैवपुराणे रुद्रा
क्षान्धारयेद्विप्रः संध्यादिषु च कर्मसु तत्सर्वं सफलं प्रोक्तं लक्षकोटिगुणं ध्रुवं लिंगदर्शनवत्पुण्यं भवेद्रुद्राक्षदर्शनात् नव
कोटिशतं पुण्यं लभते धारणान्नरः शिरसा धारणात्कोटिः कर्णयोर्दशकोटयः गले बद्धा कोटिशतं मूर्तिकोटिसह
स्रकं अयुतं चोपवीतं च लक्षकोटिर्भुजद्वये अप्रमेयफलं हस्ते सरुद्राक्षपरो भवेत् लैंगवाशिष्ठे त्वादत्वासंपिव

स्नस
स्वगो =

१६ त्वयं समगच्छंत्वजातिभिः संयो भवति एतान्मा रुद्राक्षे त्रिपुरसिद्धये स्कंदे रुद्राक्षं कंठमाश्रित्य पुत्रो म्रियते यदि सोपि रुद्रत्वमाप्नो
ति किं पुनर्मानुषादयः उच्छिष्टो वा विकर्मस्थो युक्तो वा सर्वपातकैः मुच्यते सर्वपापेभ्यो नरो रुद्राक्षधारणात् रुद्राक्षमालिकां कंठे
२६७ धारयन्भक्तिवर्जितः पापकर्मापि यो नित्यं रुद्रलोके महीयते वाशिष्ठलैंगे रुद्राक्षधारणे लज्जा येषां नास्ति महामुने संकीर्णा
सा भवेद्ब्रह्मं तेषां वेषपरंपरा अथात्र षामत विशेषाणां च योगिनीतंत्रे उक्तं रुद्राक्षस्त्रैर्ग्रथितां साधको नरः मालां विधा
य वै पात्रे कृत्वा विन्यस्य आदि चर्चितां भूतशुद्ध्यादिकं कृत्वा समाप्य तत्र पूजयेत् गोमूत्रं गोशकृद्दूर्वा विल्वीशार्ङ्गीष्वावाह्य पूजयेत् मंत्रवित्
वर्गास्तु ततो लिख्याद्ध्रीं मंत्रेण च मंत्रवित् तस्मात्तेनोल्पितां मालां स्वर्णपात्रे निधाय च पयो दधि घृतं दोद्घ शर्करा गोमयं क्रमात्
तोयपूर्णानि कैः कृत्वा पंचामृतविधिं बुधः क्रमात्तत्र वसंस्थाप्य स्नापयेच्छीतले जले ततश्चंदनसौगंधिकस्तूरीकुंकुमादिभिः
तां संलिप्य ह्रीं बीजमष्टोत्तरशतं जपेत् तस्मात्तत्र यथाक्रमात् पिटिकालामस्य प्रपूजयेत् ततः संपूज्य च गुरुं गृह्णीयान्मालिकां
शुभां भैरवीतंत्रे श्रीदां गणपतिं देवं सूर्यं विष्णुमुमापतिं दुर्गां च पूजयेद्विद्वान्मालायास्तु समाहितः पंचगव्यैर्लिप्त मालां
प्रासादेनाभिमंत्रितां अत्र प्रासादपराम्पुत्रक प्रासादपरामंत्रैः ततस्तेनोल्पितां मालां स्थापयेद्धेमपात्रके पंचामृतेन संस्था
प्य शीतलेन जलेन च चंदनेन सुगंधेन कस्तूरीकुंकुमादिभिः अभिषेकं ततः कृत्वा मंत्रेणानेन मंत्रवित् प्राणाज्जीवसमा
युक्तैमकारस्वरभूषितैः विंदुनादसमायुक्तं मंत्रराजं प्रविन्यसेत् नवग्रहान्पूजयित्वा ततो दिक्पालपूजनं तिलेन घृतसु
के न प्राक्तिलैर्होमयेत्ततः सर्वालंकृतां दक्षिणां दद्यादशाहे प्राप्तुं परितोषयेत् दत्त्वा गां चाचार्याय प्रासादेन विन्यसेदष्टोत्तरशतं
जपेदित्यर्थः प्राणो हकारः जीवः सकारः स्वर्णपात्राभावे सस्वपत्रे ग्राह्ये उक्तं योगिनीतंत्रवचनात् प्रकारांतरमक्षकुब्जिकातंत्रे

267

शिल्पिनं पूजयेद्दा देवस्तु गंधानुलेपनैः सहेदः कारयेन्मालां विशुद्धां स्वर्णादिरूपिणीं यथायोगं वैयवतीं मालां कुर्य्यादिविचक्षणः वर्णमा
नेन सा कार्य्या पंचगव्येश्च संप्लावयेत् वर्णमानेन मातृकावर्णमानेनेत्यर्थः एतेन शतसंख्यैव देहे मालाकार्य्येति प्राप्यते सूत्रे चा
पि च तद्दैर्घ्यं कल्पयेदस्त्रमंत्रकैः समानवर्णसूत्रेण मापयेद्दृढया गुणा स्वर्णादिगुणैर्वापि ग्रथयेत्साधकोत्तमः ब्रह्मग्रंथिं ततो
दद्यान्नागपाशमथापि वा कवचेनाथवध्नीयान्मालां ध्यानपरायणः सर्वशेषं ततो मेरुं सूत्रद्वयसमन्वितं ग्रथयेत्तारयोगेन वध्नी
यात्साधकोत्तमः एवं निष्पाद्य देवेशि प्रतिष्ठां च समाचरेत् पिप्पलीपत्रमंडलैकनायकाभोगविधिक्रमात् मंडले विष्टदेवताप्र
त्यवक्त्रे प्रतापयित्वा यथात्मा यजेदिष्टदेवमनुक्रमात् न्यासपूर्वं जपेन्मंत्रमष्टोत्तरसहस्रकं जुहुयाच्च दशांशेन पश्चदेवस्य चापि वं
पत्त्रियमित्यर्थः अनेन पुरश्चरणांगहोमे यद्द्रव्यं यद्देवस्योक्तं तेन होमयेदित्युक्तं ततो मंडलमध्येन तां मालां स्थापयेद्गु
थः अस्त्रमंत्रेण ततो न्यस्य मूलमंत्रं ततो न्यसेत् अंगानि तानि विन्यस्य देववत्परिचिंतयेत् अभेदरूपमासाद्य मालां कुर्य्यात्त
दात्मिकां ततो बलिं यथान्यायं दद्यात्तैः साधकोत्तमः एवं प्रतिष्ठामासाद्य मालायामिष्टदेवतां आचार्य्यं पूजयेत्पश्चाच्छिल्पि
नं च यथा श्री नाम्ना मंत्रं जपेत्तत्र यदीच्छेत्सिद्धिमात्मनः अस्त्रादिजिमन्त्रमंत्रस्य ग्राह्यः बलिमालायाः ते हामद्रवैः तथा उत्तव
तंत्रे हृदयेत्तंत्रे नियुंजीत जपेत्प्रीतिततो यथा तीर्णसूत्रे पुनः सूत्रं ग्रथयित्वा शतं जपेत् शैवागमे यथा संग्रथितेन माला ग्रथ
यित्वा तु पूर्ववत् प्रतिष्ठिता यान्तस्यात् मंत्रं जप्यात् नत्यधीः अंगुलिभिरेवापि केचित्कर्मसु निकेचित् नत्र प्रमाणं विंत्य
वक्तुं तत्त्वपुरश्चरणेऽपि जपमालाभावे करेणैव जपगणना कार्य्या उक्तं च नारदपंचरात्रे अथांगुलिभिरेवापि जपकर्म समार
भेत् प्रपंचसारेऽपि पद्मासनः प्राग्वदनोऽप्यलापीनमानसः संज्ञाविवर्जिताभिः अवक्रसंगताभिरंगुलिभिर्यजेत नातिद्रुतं ना
तिविलंबितं चेति मंत्रतंत्रप्रकाशे जपस्य गणनां कुर्य्यादंगुलिपर्वभिः तत्प्रकारमाह श्रीभैरवीतंत्रे अनामामध्य

१९

२६८

268

मारभ्य कनिष्ठान्तु क्रमेण तु मध्यमामूलमापर्य्यन्ता करमाला प्रकीर्त्तितेति गौतमीयेप्याह कनिष्ठानामिकांगुष्ठमध्यमाभिर्जपे
त्सदेति तत्रानामामध्यमूलतनामामध्यमूलकनिष्ठामूलमध्याग्रानामाग्रमध्यमाग्रमध्यमूलपर्य्यन्तमिति नवसु पर्वसु गणना
नांघाहतनायां नववारं जपो भवति एवं द्वादशवारं पुनः पुनरावर्त्तयेत् अष्टोत्तरशतं जपो भवति द्वादशाष्टरशताहत्याऽष्टो
त्तरसहस्रं जपो भवति इत्यामयुतादिष्वप्यूहनीयं वस्तुतस्तु तंत्रान्तरदर्शनात्तर्ज्जनीसहितांगुलिभिरेव जपः कार्य्यः यु
क्तं कुलमूलावतारे अथ वक्ष्ये महेशानि जपसंगणनाफलं अंगुलीजपसंख्याजं फलमेकगुणं स्मृतं रेखयाष्टगुणं वि
द्यात्पुत्रजीवैर्दशाधिकं शतं स्याच्छंखमणिभिः प्रवालैस्तु सहस्रकं स्फाटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते पद्माक्षैर्दशल
क्षंतु सौवर्णैः कोटिरुच्यते कुशग्रन्थ्या च रुद्राक्षैरनन्तगुणितं भवेत् एतत्पद्मार्त्तमालाभिर्जपेत्स्वादिसिद्धफले अंगुलीभिर्जपं
कुर्वन्साङ्गुष्ठांगुलिभिर्जपेत् अंगुष्ठेन विना जप्तं विफलं भवति प्रिये पर्वभिर्वांगुलीनां तु जपेदन्तु दिने प्रिये मध्यमानामिकाम
ध्यपर्वद्वयमिह प्रिये मेरुप्रकल्पनं कुर्वं प्रदक्षिणमनुक्रमात् अनामामूलपर्वादि कनिष्ठान्तु क्रमेण तु तर्जन्यग्रादितो दे
वि मध्यमूलावसानकं गणायेच्च क्रमेणैवं किंचित्संकोचयेत्तलं अंगुल्यो न वियुंजीत जपकाले महेश्वरि अंगुलीनां वियोगे
च छिद्रे च स्रवते जपः उल्लंघ्य गणनां देवि मंत्रं प्रजपेत् क्वचित् यत्तत्तज्जपमीशानि वलाद्रक्षन्ति राक्षसाः अथ वामध्य
मामध्यमूलपर्वद्वयं प्रिये मेरुं कृत्वा जपेद्देवि तर्ज्जनीमूलकावधि अनामामध्यपर्वादि प्रादक्षिण्यक्रमेण वै इति अत्रांगुली
जपो रेखाजपः पर्वजपस्तु प्राक्कलन्तया पर्वेति मातृकाणां वै विष्णुमंत्रस्य पर्वणः स्वरव्यञ्जनभेदतः एषक्कृतान्तैः कुर्वीत व
र्णमालां विशेषतः मेरुं च प्रणवं कुर्य्यात् जपेन्मालया ख्यः शीघ्रसिद्धिर्भवत्येव सत्यं सत्यं न संशयः अष्टाधिकान्तु विज्ञाय
प्रत्याहारक्रमभेदतः तत्तद्वर्णाष्टकेव्यंजनानां स्वरेष्वपि तत्तद्वर्णस्वरैर्युक्तं कृत्वा यो जपस्वरत्रयं तत्तद्वर्णप्रयानानां मेरुं कृत्वा

ब्रह्मचर्यं अष्टविधमैथुन = ८

विवर्जनः तन्मंत्रम्प्रजपेन्नतमालायोगं याति सिद्ध्यति ध्रुवं मंत्राणौषधिचूर्णस्य गुटिकाकृतमालया जपेत्सर्वार्थसिद्धिः स्यान्न
त्र कार्या विचारणा अथ पुरश्चरणकाले विहितानि तत्र नारदः मतः महर्षिणा चैमौनं मंत्रार्थचिंतनं अव्यग्रत्वमनिर्वेदो
जपसंपत्तिहेतवः त्रैलोक्यसंमोहनतंत्रे लोभमात्सर्यरहितः कामक्रोधविवर्जितः सर्वथा लभते सिद्धिमन्यथा तिःफलं भ
वेत् कुंभसंभवः नित्यं नैमित्तिकं यद्यत्कुर्वते काम्यमेवादितं तदेवकर्म कुर्वीत तन्मनास्तत्परायणः दोनात्रिषवणस्नायी मौनी
सम्मानितोत्तरः यत्नेन वै सर्वं कर्म स्थिरधीर्नियतेंद्रियः गौतम स्वकर्मनिरतिर्यस्य तस्य सिद्धिरदूरतः दूरतोपि न सिद्धिः स्यादि
तरस्य हि जोत्तमः कुरस्यापि न सिद्धिः स्यादिति सत्यं न संशयः इतरस्य स्वधर्मनिरतस्य दूरतो चिरकालेनापि मंत्राणि वै मृषाय्या
ब्रह्मचारित्वं मौनं चाध्यानसूयता नित्यं त्रिषवणं स्नानं तुच्छकर्मविवर्जितम् नित्यपूजा नित्यदानं देवतास्तुतिकीर्त्तनं नैमि
त्तिकार्चनं चैव विश्वासो गुरुदेवयोः जपनिष्ठा द्वादशैता धर्मास्तु मंत्रसिद्धिदाः निवृत्तिः तदुक्तं दक्षेण स्मरणं कीर्त्तनं केलिः
प्रेक्षणं गुह्यभाषणं संकल्पोध्यवसायश्च क्रियानिष्पत्तिरेव च एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः इति विपरीतं ब्रह्मच
र्यमेतदेवाष्टलक्षणं अभिलाषपूर्वकस्मरणकीर्त्तनप्रेक्षणानि निषिद्धानि केलिः परिहासादिवाक्चेष्टा गुह्यभाषणं संभो
गार्थरहोमंत्रणं संकल्पो मानसं कर्म अध्यवसायः संभोगनिश्चयः त्रिषवणस्नानं तेषां कपरं स्नानं त्रिषवणं प्रातःमध्याह्ना
ह्नः सायं चरेदिति वैशंपायनवचनात् तुच्छकर्म तु दंभद्वेषौ तथालस्यादुच्चाटोभ्रममारणं व्याधिरिति स्मृत्यंतरे मिलितानारा तंतुद्र = ४ब्रि
धनीयोक्ते नित्यपूजात्वेनेत्पूर्वकमेव जपविधानात् नैमित्तिकार्चनं अपूर्वादि विशेषपूजा तदुक्तं मंत्रतंत्रप्रकाशे अधेत
रमहस्वंतक्रमात्प्रामादरात् जपेन्नातिदिनेयत्त नित्यपूजपः स्मृतः अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः द्वादश्यामे
रिमायांतु तेषु नैमित्तिको जपः नित्याविगुणितः साध्यपूजा चैव द्विरेतेषु नि कपिलपंचरात्रे मंत्रस्य देवतानाराधतिष्ठिवा

१८ देशुत्तयप्यतामिति तथा गौतमः ततो गुरोः पादपद्मं पुष्पाञ्जलिभिरर्च्चयेत् तस्मादाप्तीं सदा ग्राह्यां ततः संतोषमाचरेत् संतुष्टे तु
गुरौ देवः संतुष्टो नान्यथा भवेत् तथा श्रीभगवद्वाक्यं संतुष्टे हि गुरौ यस्मात् संतुष्टं जगत्त्रयं नास्ति साध्यं जगत्यत्र सुप्रसन्ने गुरौ
२६९ मते गुरोर्नित्यमेव गुरोर्वाक्यं न कदाचिद्विलंघयेत् कुंभसंभवः स्नायाच्च पंचगव्येन केवलामलकेन वा ततः स्मृतिपुराणोक्तमंत्रैः
स्नायाद्व्रती ततः अस्तुतिष्टस्तुष्टेयं शुचिर्व्रतनमो निशि प्रपंचसारे अष्टत्र्यहं विष्याशीनकाशीवाजपेयं त्रमिति वाशव्हः स
269 सुचये फेत्कारिणीतंत्रे भैत्यादिनियमाहारः सकृद्रात्रौ विधीयते कंदमूलफलैर्वापि कुर्य्याद्दर्शनमन्वहमिति त्रैलोक्यसं
मोहनतंत्रे गुरुगोविप्रबालवृद्धानां यत्नपोषणं च भवेदाप्यमतिर्मैत्रीं न चद्रोहं समाचरेत् पश्चाद्वाह्यं समभ्यर्च्य ग्रासं दद्या
त्स्वेच्छाभक्तं गौतमः गोषु भक्तिः सदा कार्य्या गोषु शुश्रूषणं तथा नित्यं गोग्रासदानात्सगोपालो विप्रसीदति अथ निषिद्धानि
त्रैलोक्यसंमोहनतंत्रे नाप्रियं कस्यचिद्ब्रूयान्नानृतं वा कदाचन न च्छायामाक्रमेद्विद्वान्विभीतकरंगयोः न कुर्य्यात्कस्य
चित्किंचिन्नरहस्यं भ्रूयाज्ञ्वयंत्रे तैलाभ्यंगं न कुर्वीत मधुमांसं च वर्ज्जयेत् स्त्रीशूद्रसंभाषणं नैव कुर्य्याद्देवि विमोहितः न न
ग्नानस्त्रगंधाद्यं गीतवाद्यं विवर्ज्जयेत् नरहस्त्यादिनिसंभवे असंभवेत्तद्धिनभक्तमात्रं ग्राह्यमिति भवेन्मागपुरके विमा
हितः कामपरवशः प्रयोगसारे विभीतकार्कककारंजस्नुहीच्छायां न संश्रयेत् कुंभसंभवः वाङ्मनः कर्मभिर्नित्यं निस्पृहो व्रति
नादिषु स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणं असत्याश्लीलयोर्नित्यं भाषणापरिवर्ज्जयेत् सभ्यैरपि न भाषेत जपहोमा
र्चनादिषु वर्ज्जयेद्गीतवाद्यादिश्रवणं नृत्यदर्शनं ताम्बूलं गंधलेपं च पुष्पधारणमेव च मैथुनं तत्कथालापं तद्गोष्ठीं च विव
र्ज्जयेत् असद्भाषणमत्युग्रं वर्ज्जयेदन्यपूजनं कौटिल्यं चौरमभ्यंगमनिवेदितभोजनं अस्कालिप्तत्कृत्यं च वर्ज्जयेत् मर्दनादि
कं त्यजेद्वैसोदकस्नानं सुगंधामलकादिकं सर्व्वेर्विनिः प्रायश्चित्तमाहनारदः सकृद्भुक्वितिशाद्प्राणवंलसुदीरयेत् प्रोक्तेयाम

नत्रे

रुशोदृपिप्राणायामंसमाचरेतइति बहुप्रलापेवावश्यंत्यसंगानिनितोञ्जपेत् दृष्टेचैवतथास्पृष्ट्वास्पृश्यानांस्पर्शनेतथा योगी
यीज्ञवल्क्यः यदिवाग्यमलोपः स्याज्जपादिषुकथंचन व्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययं वायवीसंहितायां पतितानामन्त्यजानांद
र्शनेभाषितेक्षुते दोतेयोवायुगमनेजृंभणोजपमुत्सृजेत् प्राप्याचमनमेतेषांप्राणायामंषडंगकं कृत्वासम्यग्जपेच्छेषंयद्वासूर्यादि
दर्शनं मार्जारकुक्कुटंक्रौंचंश्वानंगर्दभंवरंकपिं दृष्ट्वाचमनंचरेत्कर्मस्थएवात्मानंविधीयते एवमदोक्तनियमान्सर्वत्राणाकचरे
त् इति तथाश्रीशिववचनं कोपंत्यक्त्वामदंत्रीणिनिष्ठीवनविजृंभणं दर्शनंश्वपतीचानांवर्जयेज्जपकर्मणि आचांतःसंभवेते
षांस्मरेद्वामांत्वयासह ज्योतींषिचप्रपश्येद्वाकुर्याद्वाप्राणसंयमं मामहेश्वरं त्वयासहपार्वत्यासह लिंगपुराणे सूर्यमग्निंचंद्र
माश्चग्रहनक्षत्रतारकाः एतेज्योतींषिचोक्तानिविद्वद्भिर्बालेणस्तथेति तथाकोपोमदः तृषानिद्रानिष्ठीवनंविजृंभणो श्वनी
चदर्शनंनिद्राप्रलापास्तेजपद्विषः तथाविस्मयमोक्तंरे उपविष्टोजपेत्स्नातः तूत्तनप्रस्खलितादिषु सूजायानामकस्मस्पस
मवारंप्रकीर्तयेत् फेत्कारिणीतंत्रे जपकालेयदापश्येदशुचिंमंत्रवित्तमः प्राणायामंततःकृत्वाततःशेषंसमापयेत् य
दाचैवंभवेन्मंत्रीस्वयमप्यशुचिःपुनः स्नात्वाचम्ययथान्यायंसंकल्प्यापुनर्जपेत् न्यासमप्यधिकारंसपाद्यकं एतेनमूत्रादावशुचि त्व
संभवेस्नात्वात्र अन्यथाप्राणायामषडंगन्यासान्कृत्वाशेषंसमापयेदितिप्रतीयते वैशंपायनः अस्नातस्यफलंनास्तितथात
पयतःपितृन् नाप्यतर्प्ययेत्तोदेवान्नाद्यस्यमभिजल्पतः नैकवासाजपेन्मंत्रंवहुवासाकुलोपिवा योगिनीतंत्रे अनास्था
जपमंत्रेतमश्रद्धाजपकर्मणि आलस्यभावनाशक्तिःसिद्धिनाशायनिश्चितं त्यजेद्दुष्टप्रवादेचपरीवादेचवर्जयेत् त्यजेद
ज्ञानसंस्पर्शंमशकादिभवंत्यजेत् वायवीसंहितायां उष्णीषीकंचुकीनग्नोमुक्तकेशोगलावृतः अपवित्रकरोशुद्धःप्रलप
न्जपेत्क्वचित् असंहतोकरोकृत्वाशिरसिप्रावृतोपिवा चिंताव्याकुलचित्तोवाक्रुद्धोभ्रांतःक्षुधान्वितः अनासनःशयानो

पूर्वं

१६ वा गच्छन्नुत्थित एव वा । रथ्यायामशिवस्थाने जपेन्नतिमिरालये । उपानद्गूढपादो वा न च शय्यागतस्तथा । प्रसार्य्य न जपेत्पादौ
उत्कटासन एव वा । कपिलपंचरात्रे । विलोपादथवालस्याज्जपहोमार्चनादिषु । उत्तिष्ठति तदात्मा सन्ध्याङ्गविस्मृतेस्तु तः । अपवित्रकरः
२७० पवित्रं कुशः । अत्री कुशा कुशात् दर्भपवित्रमिति हि कौशः । विना दर्भेण यत्कर्म विना सूत्रेण वा पुनः । राक्षसं तद्भवेत्सर्वं नामुत्र फलप्रदमि
ति कूर्मपुराणवचनेन तस्यावश्यकत्वाभिधानात् सूत्रं यज्ञोपवीतं विस्मृतमपि स्पष्टालितपाणिपादः । शुचिर्वर्हिःशिखो दर्भपा
णिराचान्तः प्राङ्मुख उदङ्मुखो वा पवित्रमानी ध्यातदेवताः स्मृत्येयदिति तत्र वामेव बहुकुशाः दक्षिणे पाणिविभाषिकं पवित्रं तथा
संध्योपक्रमे कात्यायनः सव्ये पाणौ कुशान्कृत्वा कुर्य्यादाचमनक्रियां ह्रस्वाः प्रचरणीयाः स्युः कुशा दीर्घास्तु बर्हिषः दर्भाः पवि
त्रमित्युक्तमतः संध्यादिकर्मसु सव्यः सोपग्रहः कार्य्यो दक्षिणः सपवित्रकः सव्ये वामे ननु कीदृशाः धार्य्या दक्षिणे धार्य्या न वेत्यत
आह ह्रस्वाः प्रादेशाः पंचयज्ञादिप्रचारार्थाः दीर्घाः बर्हिः संज्ञकाः प्रस्तादेः परिस्तरणार्थाः प्रचारादन्ये प्रसंध्यादि शुद्धेर्भावद्रव्य एव यथा
धाः विशेषरहिताः कर्मसु शुद्धिसाधनं नतेक कुशोपग्रह इति कुशहस्तः समाहित इति अप्सुनंतकं रं कुर्य्यात्सुवर्णरजतैः
कुशैर्वेति पारस्करगोभिलादिभिरुक्तं अतो विशेषाभावात्संध्यादिषु सव्यः सकुशान्तु छिदक्षिणः अनंतगर्भिणं साग्रं कौशं हि
दलमेव च प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् सा कलता पवित्रयुक्तः अंतर्गर्भं भिन्नं गर्भगर्भिहितोयं अंतर्गर्भिन् इति
यच विद्वाय चतुर्थं ग्राह्यं लघुहारीतः जपे होमे तथा दाने स्वाध्याये पितृतर्पणे अशून्यं तु करं कुर्य्यात्सुवर्णरजतैः कुशैरि
ति स्वर्णधारणं तु दक्षिणानामिकायां अनामिकायां तद्धार्य्यं दक्षिणे स्य करस्य तु हेमधारणं प्रकरणे स्यादेवीपुराणवचनात्
रजतं तु तर्ज्जन्यां धार्य्यं यत्राप्युदिष्यते कर्मकर्तुरंगं न तदुच्यते दक्षिणे तत्र विज्ञेयः कर्मणां संपरः करः इति कात्यायनवचना
त्तर्ज्जनी मूलस्य पितृतीर्थत्वेन दैवतरजतधारणं तत्रैव न्यायमित्यनल्पमहाजनाचारेणानि वीनप्रमाणात् तर्ज्जन्यां रजतं तथा

वृ

द्यं

ध्यमिति स्मृतिसमुच्चयलिखितवचनाच्च सव्यापसव्यपलितं ब्रह्मग्रंथिसमन्वितं लंघयेत्सर्वमात्रेण द्वितीयेनैव लंघयेन् इति शि
ष्टवचनाच्च सव्यावाजनेतेति बह्वृचवचने बह्वृच्यायागात्मककर्मांगत्वेन नत्ति न चैतद्विनवस्थावर्णान[illegible]उंकादा
भ्यंज्ञेति रेकथारोणपपपदानत्रेति वामनपुराणे उदकेन विनापूजा विना दर्भेण या क्रिया आज्येन च विना होमः फलं दास्य
ति नैव ते स्मृत्यर्थसारे कुशाः काशा यवा दूर्वा उशीराश्च सकुंदकाः गोधूमा ब्रीहयो मुंजा दश दर्भाः सबल्वजाः तथा मासस्मर
णे तु चिर्दर्भो त्समाहरेत् अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः विरंचिना सहोत्पन्नः परमेष्ठिनिसर्गजः नुद सर्वा
णि पापानि दर्भ स्वस्तिकरो भव इति मंत्रस्मृत्यर्थान्ततः पूर्वोत्तरामुखः हुं फट्का॰ गणमेत्रा सकृच्छित्वा समुद्धरेत् अ
च्छिन्नाः अशुष्काग्राः पित्र्यास्तु हरिताः शुभाः अमूला देवकार्येषु प्रयोज्याश्च जपादिषु समपत्राः कुशाः शस्ता दैवे पि
त्र्ये च कर्मणि अनंतर्गर्भिणं साग्रं प्रादेशं तु पवित्रकं चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकं एकैकं पूर्णमुत्सृज्य वर्णा
नां यथाक्रमं सर्वेषां भवति ह्याभ्यां पवित्रं ग्रथितं तथा त्रिभिस्तु शांतिके कार्यं पौष्टिके पंचभिस्तथा चतुर्भिश्चाभिचा
रे स्याद्द्वाभ्यां निष्कामे एकेन च सपवित्रः सदर्भो वा कर्मांगाचमनं चरेत् नोच्छिष्टं तद्भवेत्स भुक्तोच्छिष्टं तु वर्जयेत् ये कृताः पि
ण्डनिर्वापः श्राद्धं वा पितृतर्पणं विण्मूत्रादिषु ये दर्भास्तेषां त्यागो विधीयते नीवीमध्यस्थितात्त्याज्या यज्ञभस्मास्थितास्त
था वामहस्तस्थितेदर्भेन पिबेद्धस्तेन नतु वस्त्रादिना पुष्टो न दोषः पिबतो भवेत् न ब्रह्मग्रंथिनाचामेत् दूर्वाभिः करा
चन स्नाने होमे जपे दाने स्वाध्याये पितृतर्पणे सपवित्रो सदर्भो वा कुर्वीत तन्नान्यथा कुशाभावे तु काशाः स्युः काशाः
कुशसमाः स्मृताः काशाभावे गृहीतव्या अन्ये दर्भा यथोदिताः नार्द्रा लुनीयाद्रात्रौ वा लुनीयाद्वा न संध्ययोः दर्भाभावे
णीगोप्यतास्वरीष्मः प्रियास्वेरदित्यासंता विस्तरः नारदपंचरात्रे अपवित्रकरो नग्नः शिरसि प्रावृतोऽपि वा प्रलपन्वा जपे

१६ यावत्तावन्निष्फलमुच्यते नग्नमाहात्रिः नग्नो मलिनवस्त्रः स्यान्नग्नश्चार्द्रपटः स्मृतः नग्नो द्विगुणवस्त्रः स्यान्नग्नः स्निग्धप
टः स्मृतः द्विकच्छोनुत्तरीयश्च नग्नश्चावस्त्र एव च भविष्यपुराणे द्विकच्छः कच्छशेषश्च वहिःकच्छस्तथैव च एककच्छः कच्छश्रेया
२७१ नग्नः पंचविधः स्मृतः देवलः वहुवासा भवेन्नग्नो नग्नः कौपीनवाससेति कात्यायनः स्नानमाचमनं होमं भोजनं देवता
र्चनं प्रौढपादो न कुर्वीत स्वाध्यायं चैव तर्पणं आसनारूढपादस्तु जानुनोर्जंघयोस्तथा कृतावसक्थिको यस्तु प्रौढपा
दः स उच्यते मंत्रतंत्रप्रकाशे तु उक्तनियमानभिधाय एवं सर्वमेतद् अशक्तः शक्तितो जपेदित्युक्तं अथ जपस्तत्र
कुंभसंभवः गुरोर्लब्धस्य मंत्रस्य प्रशस्यावर्तनं तद्वियत् अन्तरंगान्तराणां चन्यासपूर्वो जपः स्मृतः अंगोतिस्तलीलात्मा
मं वोपनं अक्षराणां मतनावर्तनं जपइतिनिर्वचः नद्वेदानाद्वापवीयसंहितायां जपस्यादक्षराहृतिः स उच्चोपांशुमान
सः यउच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः मंत्रमुच्चारयेद्वाचा वाचकः स जपः स्मृतः शनैरुच्चारयेन्मंत्रमीषदोष्ठौ च
चालयेत् किंचिच्छ्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः जिह्वाजपः स विज्ञेयः केवलो जिह्वया जपः धियायदक्षर
श्रेणीपदवर्णस्वरात्मकं उच्चवेदार्थं संस्मृत्य मनसा उक्तो मानसो जपः उच्चैर्जपो विशिष्टः स्याच्छतादर्दशभिर्गुणैः उपांशुः
स्याच्छतगुणः सहस्रो मानसः स्मृतः नारदपंचरात्रे वाचिकं सर्वकार्येषु उपांशुः सर्वसिद्धिषु मानसं मोक्षकार्येषु
ध्यायेद्देवं च सर्वतः महाभारते सर्वेषामेव यज्ञानां जपयज्ञः प्रशस्यते अहिंसया हि भूतानां जायते वा महाफलं जप
निष्ठो द्विजश्रेष्ठः सर्वयज्ञफलं लभेत् श्रीभगवद्वचनं च यज्ञानां जपयज्ञोस्मीति पद्मनाभीये यावतः कर्मयज्ञाः स्युः
प्रदीप्तानि तपांसि च ते सर्वे जपयज्ञस्य कलां नार्हन्ति षोडशीं जपेन देवता नित्यं स्तूयमाना प्रसीदति प्रसन्ना विपुलान्भो
गान्दद्यान्मुक्तिं च शाश्वतीं ऋग्संहितायां ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः ते सर्वे जपयज्ञस्य कलां नार्हन्ति षोडशी

रस्तं

इ॥श्री॥ अथासनानि तत्र नारदः कृष्णाजिनो वैरे मुक्ते च तत्र वै मूलमहितः च तद्देशमहिहस्तं च मृदङ्गसंस्तुतिमले आसने कल्प
यित्वा तत्र पकर्मसमारभेतः वैशंपायनः सर्वसिद्ध्यै व्याघ्रचर्मेज्ञानसिद्धिर्मृगाजिनं वस्त्रासने रोगहरे वेत्रजं श्रीविवर्द्धने कौ
शेयं पौष्टिके तैयं केवलं दुःखमोचने वस्त्रमाविके वक्ष्यमाणब्रह्मयामलवचनेन केवलवस्त्रासने दोषश्रवणात् वस्त्रयुक्त
वल्कलमासने देवतुष्टये इत्युत्तरतन्त्रवचनात् भृगुः काम्यार्थं केवलं चैवाभीष्टदं रक्तकम्बलं धर्मार्थकाममोक्षाणां सिद्धैला
जिनकुशासने ब्रह्मयामले केवलं स्वेनरक्तोऽच विचित्रो नीलपीतकौ व्याघ्राजिनं च कौरंगमन्यानी नानाविधासनैः संग्रहे श्र
यानि निषिद्धानि वंशाश्मधरणीदारुतृणपल्लवनिर्मितं वर्जयेदासनं मंत्री दारिद्र्यव्याधिदुःखदं नादीदितो विशेज्ज्ञातु कृ
ष्णाजिनं गृही विशेषतो निवृत्तस्य ब्रह्मचारी च स्नातकः ब्रह्मयामले तृणपल्लवकाष्ठानि पाषाणान्मृन्मयं तथा वंशा
सनं च वस्त्रं च केवलं त्वतिमासने एवमष्टविधं देवि चासनं परिवर्जयेत् तृणासने भवेद्रोगः पल्लवे चित्तविभ्रमः पाषाणा
च तेषां वाटोज्वरः स्यान्मृण्मयासने दिव्यासने भवेन्मीडा पापविस्फोटदुःखदं वंशासने दरिद्रः स्यात् वस्त्रे स्यात्तविनाश
ने चिंता च प्रबला हानिस्त्राटोविविधो ज्वरः शोकशूलादिको रोगान् स्नसुः स्याद्दारुकासने अष्टा चाष्टासने देवि वर्जयेत् सर्व
कर्मसु अथ जपपूर्वदिनकृत्यं तत्र त्रैलोक्यसंमोहनतन्त्रे शुभे मुहूर्ते नक्षत्रे तिथौ स्नात्वा यथाविधिः भोजनाच्छादनाद्यैस्तु
विप्रान्संतर्प्य यत्नतः भूवित्तवस्त्रभूषाद्यैर्गुरुं संतोष्य चात्मनः आरभेत जपं पश्चात्तद्गुर्वाज्ञापुरःसरं प्रथमं तत्र क्षेत्रपाला
य संपूज्य बलिं दद्याद्यथाविधि बलिमंत्रस्तु सर्वविघ्नहिस्वपश्चाद्विडःखः स्यात्सुरदुर्भं भंजयहितं पंभूयान्नं यहितयेत
था पुनः तेनाविघ्नपदंहंसमहाभैरवतत्परे क्षेत्रपालबलिं दद्यात् पापकसंतदी बलिमंत्रायमाख्यातः सर्वकामफ
लप्रदः तथैव परिवाराय बलिमनेन चाहरेदिति मंत्रः प्रयोगे वक्ष्यते ततश्चोपवासः कर्तव्यः अथ जपारंभः तत्र महाकपि

सारसंग्रहे

१६ लपंचरात्रे एतत्तन्त्रतिथ्यादिकं यागयोगवासरे मंत्रोपदेशाद्गुरुणा साधनं यत्प्रभावहमितिप्रोक्तत्वात् तदुक्तं दक्षिणामूर्तिकल्पे
साधयेत्सर्वयो विद्वान् पूर्वेद्युः समाश्रितः । उपमुहूर्ते तत्र तिथ्यास्नात्वा यथाविधि ततो गुरुं गणेशं च तत्वाङ्गेशं च सात्वरः
२७२ तथा कुंभसंभवः ततः संकल्पं कुर्वीत पुरश्चरणमादरात् नारदीये संकल्पतद्बुधः कुर्यात्स्वस्तिवाचनपूर्वकं तथा देवलः
अभुक्त्वा प्रातराहारं स्नात्वाचम्य समाहितः सूर्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत प्रातर्व्रतमाचरेदिति संबंधः व्रतस्वक
तत्र विषयो नियमसंकल्प तदुक्तं कुंभसंभवेन कर्तव्यस्य समस्तस्य नियमग्रहणं व्रतं नियमव्यतिरेकाणां सर्वं भवतीति । फ
ले अभुक्त्वा प्रातराहारमित्येकवचनसामर्थ्यात्पूर्वदिने एकभक्तं कार्यं अतएवोपवासाशक्तस्यैकभक्तं तेन सूर्यादिदे
वताभ्य इति सूर्यः सोमः इत्यादिनामनस्य पुराणोक्तपर्यायेति विघ्नेत्यर्थः तेषां कात्तु प्रयोगे वक्ष्यते महाभारते गृहीत्वा
उदंबरं पात्रं वारिपूर्णमुदङ्मुखः उपवासं तु गृह्णीयात् यद्वा संकल्पयेद्बुधः उदस्त्वा इति नियमग्रहणार्थं संकल्पयेत्सत
सा नियमेदिति तथा गौतमः अंतर्जानुकरं कृत्वा सलिलं सकुशाक्षतं फलं समभिसंधायेति तथा कुंभसंभवः निष्का
मानां मनैवं स्नानाकारो भवेदिति स्नानाकारः स्वेष्टदेवतादर्शनं अनेन पुरश्चरणेनेति अत्र यद्यपि मनसा संकल्प
यति वाचाभिलपति कर्मणा चोपपादयति इति हारीतवचनात् तस्माद्यत्पुरुषो मनसाभिगच्छति तद्वाचा वदति तत्क
र्मणा करोतीति श्रुतेश्च मनसाधिगतस्य वाचाभिलापक्रियमाणेन रूपेण मनसाधिगच्छति तेनैव वाचाप्यभिलाषः
कर्तव्य इति प्राप्यते अतोमुककामनयाइदं कर्तव्यमिति फलक्रियाद्युल्लेखवदेव प्रतीयते तथापि मासादीनाम् उल्लेखः क
र्तव्यः तथा च ब्रह्माण्डपुराणे मासपक्षतिथीनां च निमित्तानां च सर्वशः उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेत् इति
मासपक्षतिथीनां च सर्वशः सर्वप्रकारेण सामान्यविशेषभावेन तत्र सामान्येन भारतवर्षे इत्येतत्तस्य सर्वकर्मफलहेतुत्वात्

तदुक्तं विष्णुपुराणे इतः संप्राप्यते स्वर्गो मुक्तिमस्मात्प्रयाति हि तिर्यक्त्वं नारकत्वं च यात्यस्मात्पुरुषो मुने नान्यत्र मर्त्यानां क
र्मभूमिर्विधीयत इति विशेषेण काश्यपादिपदेन कालस्यापि मासाद्यतः अद्येत्यनेन विशेषतः सूर्योपरागादिपदेन नचैवं
मासादीनां निमित्ततायामुल्लेखप्रसङ्गः संयोगपृथक्त्वन्यायेन सकृदुल्लेखविधेरेवोभयार्थत्वात् उल्लेखवचनप्रयोगमकुर्व
तः फलाभावश्चाभिहितः अत एव गरुडपुराणे श्राद्धप्रकरणे ॐ अद्यास्मिन्देशे अमुकमासे अमुकपक्षे अमुकतिथावमु
कराशिगते सवितरि इत्याद्यभिलाप अग्निपुराणे अद्येमामार्क्कग्रहणसंक्रान्त्यादौ स्तुतीर्थक इति तथा मकरस्थे रवौ
माघे प्रातःकाले तथामले गोपदेपि जले स्नाने स्वर्गादं पापिनामपीति पद्मपुराणे विधिवाक्ये मकरस्थे रवौ माघ इत्युक्ते
एवमन्येष्वपि विधिवाक्येषु श्रूयते फलं चात्र मन्त्रसिद्धिः सकामानामुक्तवचनात न चैहिकं मन्त्रसिद्धिरेव फलं प्रतीयते उ
क्तनारदवचनेनोभयसिद्धेः पुरश्चरणफलत्वाभिधानादिति तथा पूजा त्रैकालिकी नित्यं जपस्तर्पणमेव च होमो ब्रा
ह्मणभुक्तिश्च पुरश्चरणमुच्यत इति कुंभसंभवेन जपादीनामेव पुरश्चरणशब्दाभिधानाच्च पुरश्चरणमहं करिष्य इ
त्यभिलपनीयं न च पुरश्चरणस्य चिरतमसमयसाध्यत्वेनाद्यारभ्यामुकतिथिपर्यन्तं पुरश्चरणं करिष्य इत्युपपद्यते स्यादिति साम्प्रतं करि
ष्य इति कृञ्धातोः कृतिमात्रार्थत्वात् क्रियायाः कृतिसामान्यावच्छिन्नत्वेन वर्तमानतिथौ यथा कथापि कृत्यासंपादितेयातनन्ति
ष्योक्तेनिर्वाहोपपत्तेरिति शिवजपः अद्यारभ्य करिष्य इति अतः परमाशौचेपि न जपबाधः तदुक्तं विष्णुना
प्रवृत्तव्रतविवाहेषु श्राद्धहोमार्चने जपे प्रारब्धे सूतकं न स्यादनारब्धे च सूतकं प्रारंभो वरणं यज्ञे संकल्पो व्रतजापयोः
नान्दीमुखं विवाहादौ श्राद्धे होमपरिष्क्रियेति वस्तुतस्तु तान्त्रिकदीक्षावतामाशौचादिसंभवेपि नित्यार्चनबाधोपि
नास्ति तथा चोदर्वाचेन विधिः कौलादीनां विततेनैः नास्ति पापं यतस्तेषां सूतकं वा यतात्मनामिति देवीयामलवचना

त्रा

१६

२२३

172

न् जातकेमृतकेचैवधूमोद्गारादिकेतथा जप्यंचान्येनवाकुर्य्यान्मंत्रन्यासपुरःसरमितिमहानीलतंत्रवचनात् शिव
विसर्जनेदीक्षितस्यचाग्निपरिग्रहः ब्रह्मचारियमीनाचशरीरेनास्तिसूतकमिति विष्णुयामलवचनात् सूतकेमृतके
चैवनित्यविसर्जनस्यच मानुष्ठानस्यविप्रेंद्र सद्यःशुद्धिःप्रजायते इतिनारदपंचरात्रवचनात् उपासनेतुविप्राणामंगशु
द्धिःप्रजायतइतिपराशरवचनाच्च नत्रविप्राणामित्युक्तेःक्षत्रियादीनामधिकारोनास्तीतिप्रतीयते ब्राह्मणस्यवह्
ज्यादेहशुचेरप्यशुचेरपि स्त्रीशूद्रस्यापिसंस्पर्शोवस्त्रपातःस्वइःसद्इतिविश्ववचनात् विप्रस्यतुसदैवाक्षेत्सेचेर
प्यशुचेरपि एतांमहाविद्यां शूद्रस्यपुनःस्वाचारवर्जितइति शिववचनात् नैवेवाप्नुयात्जीतशिवलिंगंमहेश्वरि
सूतकेमृतकेचापितत्यांशुपशिवपूजनमिति लिंगपुराणवचनाच्चेति स्त्रीशूद्रस्यतुपलक्षणं विप्रस्यसूतकस्यादिति प
ततांत्रिकपूजायामेव पंचयज्ञादौतुनाधिकारः तकेमृतकेचापितत्यांशुपशिवपूजनमिति तात्कालिकीयावतात
त्कर्मसिद्ध्यति नैमित्तिककाम्यपूजायांतुतांत्रिकत्वामपिनाधिकारः सूतकेमृतकेचापिवर्त्तमानेतुनारद काम
नःपूजितेमंत्रेशांतिकादौचकुत्रचित् जपंत्यचशतंमंत्रीसिद्धमंत्रस्यभक्तितः शतत्रयमकामाच्चप्रायश्चित्तविधौ
जपेदिति नारदपंचरात्रवचनात् अकामात्तुनैमित्तिकार्चनेवायवीसंहितायां एकभक्तविधानेनविलंबनविते
विना उक्तसंख्याजपंकुर्य्यात्गुरवःशूराणामिहैव देवतागुरुमंत्राणामैक्यंसंभावयन्धिया जपेदेकमनाःप्रातःकालात्त
यंदिनावधि यत्संख्यायामसमाप्तंतत्कर्मवदिनेदिने यदिन्यूनाधिकंकुर्य्यात्तद्भ्रष्टोभवेन्नरः अत्रदिवापदेवजपंकु
र्य्यान्नरात्रौ अविहितोविधिरिति फेत्कारिणीतंत्रेपि दिवापदाभिधानात् जपंरात्रौचवर्जयेदितिकेचित् असंभवेनरात्र
नौजपनिषेधाद्देशकालाद्युपद्रवसंभावनायांचतत्प्रथममुहूर्त्तंत्यक्त्वातमपित्यक्त्वा पंचममुहूर्त्तमप रात्रसीतानाममावेला

गर्हितां सर्वकर्मसु स्थितिमत्स्य प्रणाशिनीं दिनत्रयादिति अत्र मुहूर्तशब्देन भाग उच्यते दिवसस्य पंचमभागे निषिद्ध इत्यर्थः पिंगलाम
ते नाध्यातेनार्चितो मंत्रः सुसिद्धोपि प्रसीदति नोत्तम सिद्धिदो नैव कुर्वन्न फलदो भवेत् एतद्ध्यानं जपे होमे नित्ये कर्म
चतुष्टये प्रत्यहं साधकः कुर्यात्स्वयं चोत्सिद्धिमिच्छति जपश्रान्तः शिवं ध्यायेत् ध्यानश्रान्तः पुनर्जपेत् जपध्यानसमायुक्तः
शीघ्रं सिध्यति मंत्रवित् नारदः संध्याप्रैमैनि तिजैर्दूर्जपसंख्योरप्राशनः पथ्याककोटज्जकदुयाघ्राविधिसमादितः अथ
वा प्रत्यहं तत्संख्या एवं विस्मिस्तावहेव हि वैशंपायन नैगत्य विधिः प्रोक्तान दिने व्यतिलंघयेत् दिवसातिक्रमात्सुमेऽमंत्रसिद्धि
भवेन्न हि यावत्संख्ये जपेत्प्रक्ष एवं विस्मिस्तावहेव तु दिनांतरेपि प्रजपेत्स्वयं सिद्धिरोयह्मुत गौतमः ध्यानार्चनजपानांच
प्राणायामस्त्रयस्त्रयः आद्यंतयोर्विधीयंते नमस्तिकाप्रसंचारिणः उत्तरतंत्रे जपादौ पूजयेन्मालांतोयैरभ्युक्षयत्ततः निधाय
मंडलस्थानेः सम्यग्हृदस्वगतेर्वयेत् इष्टमंत्रेण मालायाः प्रोक्तं णापरिकीर्तितं ओं मां माले महामाये सर्वशक्तिस्वरूपिणि चतुर्व
र्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव एवं ध्यात्वा ततो मालां गृह्णीयाद्दक्षिणे करे बीजं गणपतेरेवं मुखाभ्यन्तरे ततः अविघ्नं कुरु
मे माले त्वं गृह्णीयादित्यनेन च मण्डलस्थानतः प्राप्य वा स्वहस्तेनाभ्युक्षयेदिति संबंधः तथा जपसमारंभेत्स्वात्मानं
वध्यात्मा स्थितः हृत्तत्वज्ञमानसाय चिंतयेत्मनसा शिवा चिंतयित्वा गुरुं मूर्ध्नि पश्चाद्वर्णादिकं भवेत् मंत्रवर्कं ठतो ध्यात्वा पी
तवर्णादिरागमयं महामायां च हृदये आत्मानं गुरुपादयोः आज्ञाचक्रे ततः पश्चाद्गुरोर्मंत्रस्य चात्मनः देव्याश्चैवैक्यता नीत्वा सु स्था
षुम्णावर्त्मना ततः तत्स्वरूपामेकं तथचक्रप्रतिलंघयेत् षट्चक्रेपि महामायां तासाध्यानासपत्नत लंबयेन्मूलमंत्रेणावा
दिषोडशचक्रके आदिषोडशचक्रस्था साधकानंददायिनी चिंतयन् साधको देवि जपकर्म समारभेत् भुवोर्द्ध्वपरितो गुरु त्रयाणां
यंतउच्यते तंस्थानत्रिपथस्थानेषट्कोणं च तरंगुले रक्तं चकुलयोगस्तेस्ता तावच्चक्रमितीष्यते कंठे च पाणां नाडीनावेष्टनं विधते

ठ नां

१९ रांणां सुषुम्णोडापिंगलानां षट्कोणांतत्वंगुलं तत्स्वहृत्कमिति प्रोक्तं शुकं कंठस्य मध्यगं त्रयाणामपि नाडीनां हृदये चैकता भवेत् त

२७४ स्यानेषोडशांगस्यात्सांगुलप्रमाणतः तत्रैतस्मुक्ते योगज्ञैरादिक्षोडशचक्रकं ध्येयानामपि मंत्राणां चिंतनं स्याज्जपस्य च यस्मादाद्यं

274 [■]नहृदयेतस्मादादौ तिगद्यते तस्मात्प्राणवाच्चारणात् तदुक्तं तंत्रेव निःसेतु च यथा नो यदा नाच्छिन्नं प्रसर्प्यति मंत्रस्तथैव

निःसेतुः त्राणात् तरतिप्रवनो तस्मात्सर्वत्र तंत्रेषु वर्णैर्विहितान् पः पार्श्वयोः सेतुमादाय जपकर्म समाचरेत् समार

मे पुरित्यर्थः छांदसत्वादेकवचनं मंत्राणां प्रणवः सेतुस्तत्सेतुः प्रणवः स्मृतः चतुर्दश स्वरो यो सौ शोधश्चौकारः सेतुकः

सवाक्स्वरं च दांतस्य शूद्राणां सेतुरुच्यते अत्र शिवाभित्युपलक्षणायेन स्वेष्टदेवतानामित्यर्थः सर्वमुक्तास्त्वसंगतमिति स्वयमभि

धानात् तथा पूजयित्वा तां मालां गृहीत्वा दक्षिणे करे मध्यमायामध्यभागे वर्जापयित्वा तर्जनी अनामिकाकनिष्ठाभ्यां अं

नायानप्रभावतः स्थापयित्वा तत्र मालां अंगुष्ठाग्रेण चालयेत् प्रत्येकं बीजमादाय अकारादिहकारांतं भैरव प्रतिवारं पठे[■] मंत्रपूर्वे नोष्ठेन

स्ट चालयेत् मालाबीजं तु जपांते क्षेपणं न हि परस्परं पूर्वं जपप्रयुक्तेन चांगुष्ठाग्रेण भैरव पूर्वबीजं जपन्नेव परबीजं तु संस्पृशेत्

अंगुष्ठेन भवेत्तस्य निःफलः स जपः सदा मालां स्वहृदयासन्ने धृत्वा दक्षिणपाणिना देवीं विचिंतयन् जप्यं कुर्याद्वामेन संस्पृ

शेत् अंगुष्ठेन भवेत्तस्य निःफलः स जपः सदा मालां स्वहृदयासन्ने धृत्वा दक्षिणपाणिना देवीं विचिंतयन् जप्यं कुर्याद्वामेन

संस्पृशेत् अकारादिहकारांतं अंगुष्ठाग्रेणेत्यर्थः मालाबीजं न तु क्षेपयं मणिः शैवागमे तर्जन्या न स्पृशेन्मंत्रं कंपयेन्न विधूनयेत्

न स्पृशेद्वामहस्तेन करभ्रष्टां न कारयेत् अन्तर्गाणां चालनं गुष्ठेनान्यमध्येन न संस्पृशेत् जपकाले सदा विद्वान् नेमं हेनैव विलं

घयेत् परिवर्तनकाले च मेरुं मैनैव कारयेत् कलिघटघटाशब्दो लमानेचलमातिः पतितेदैवा विद्वेषः स्फटिते व्याधि

संभवः हस्तच्युते महाविघ्नः सूत्रच्छेदे विनश्यति चलिते मध्यमायां च अंगुल्यंतरगते स्फटिते मौनं सूत्रच्छेदे ग्रंथिच्छेदे पीत्यर्थः

वे

तथा कामे तंत्रे चक्रं भ्रामयामि कमावर्तनेनैव त्यजेत् प्रमादात् तर्ज्जनीस्पर्शो भवेदावर्तनं त्यजेत् आवर्तनं मंत्रस्य जपोऽतिच्छिद्रं संस्पर्शे हा
लयित्वा पुनर्जपेत् योगिनीतंत्रे सर्वत्र यजिमालासु मेरुः पार्श्वविधीयते नस्पृशेत्तं कदाचित्तु स्पृष्टे प्रावन्तेन पुनः नस्पृशे
त् तर्ज्जन्येति सर्वत्र तर्ज्जनीस्पर्शमेवतिषेधात् अन्याङ्गुलीनां स्पर्शासंभवान्वेति तथा महाकपिलपंचरात्रे एकचित्तः प्र
शान्तात्मा प्यस्तहस्तकरः शुचिः मुक्तग्रीवान्नतः शान्तः काउन्मीलनवर्ज्जितः सविसर्गे समात्रं च सबिंदु स्यात्तु संस्फुटं तद्
तेनापि विश्रान्ते कमाने जपेत्सुधीः नारदपंचरात्रे अतरादत्तं यावत्सर्वदोषविवर्ज्जितं विलंबितं चलातीवत्तथास्प
ष्टपदाक्षरं चिन्ते पर्वहितास्त्रस्तु कष्टयिपात्विनं एकं कृत्वा जपं विप्रविनिवेशम् अथागवत् योगिनीतंत्रे अष्टोत्तरशतं वा
पि जप्यान्ते शिरसि स्थापयेत् त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम शिवं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा पुष्करं शिखि बीज
स्य स्मृत्वा स्मृत्वान्वितं भवेत् आकाश शशि संयुक्तं सिद्धं हृदय संयुतं एष पंचाक्षरो मंत्रो मालायाः परिकीर्तितः ग्रहणोत्था
पने चैव पूजने विनियोजयेत् पुष्करं हकारः शिखि रेफः स्मृत ईकारः आकाशशशिभ्यां विंदु चंद्राभ्यां युतं सिद्धं स्वरूपं
हृदयं नमः फेत्कारिणीतंत्रे यथाशक्ति जपं कृत्वा प्राणायामत्रयं चरेत् नारदपंचरात्रे जपं तत् कुर्वीत यथा शक्त्या सुता
दिकं निवेदयेद् हि भोस्त्वां वाक् मम समन्वितं ॐ श्रीगौरीकान्त विश्वात्मन् मंत्रमूर्ते जनार्दन गृहाण मे जपं नाथ मम दीनस्य शा
श्वत इत्युक्त्वार्घ्यादिकं पुष्पं कृत्वा दक्षिणपाणिना अग्रतो निक्षिपेद्धिला मूलमंत्रेण नारद मंत्रात्मा भगवान् विष्णुश्चि शक्ति
दिदो भवेत शिवादावाहेमाम शुभं मानसो यां शुचा याम्याक्षुव्यादिकं तु जपं मूलस्याष्टशतं जप्त्वा तत्ततं विलंबितं
गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे देव त्वत्प्रसादात् त्वयि स्थिते भोगीश्लोकं पठित्वा तु दद्यात् तत्तेन शंभ
वे मूलमंत्रार्घ्यतोयेन वरहस्तेन निवेदयेत् नारदपंचरात्रे संपूज्याथ जपं कुर्यात् याचेदिष्टप्रहरद्वयं तदूर्ध्वं पूर्ववत् स्नात्वा वि
शेषेणा विधानवित् मासावसानमा विलंबकम् कुर्यात् द्वरोदितं कृत्वाग्निहोमसर्पय्यं ततस्तु जपमारभेत् यावद्दिनावसानं

पु

मुं

१६ तद्भूयः स्नात्वा ततो द्विजः उपास्य पूर्ववत्सन्ध्यां देवं संपूजयेत्पुनः विसृज्य भोजनं कुर्यात्ततस्तेनार्ककोदये संध्यामुपास्य देवेशं पूर्व
वत्पूजयेदिति संक्षेपः अथातो वर्ज्यावर्ज्यानि त्रैलोक्यसंमोहनतंत्रे भिक्षाशी वा हविष्याशी शाकमूलफलाशनः पयोव्रती
वा नियतो जपेदेकाग्रमानसः भिक्षान्नरूपमाह कुंभसंभवः वैदिकाचारयुक्तानां शुचीनां श्रीमतां सतां सत्कुलस्थानजातानां
भिक्षाशी वा यजमानामिति नारदः चरुमूलफलक्षीरदधिभिक्षान्नसक्तवः एतत्सप्तविधं प्रोक्तं पवित्रं व्रतभोजनं कपिलः
यावी यवान्नशाकं च पयो भैक्ष्यं हविष्यकं पूर्वं पूर्वं प्रशस्तं स्यादशनं मंत्रसाधने हविरुक्तं कुंभसंभवेन सितैकविय हैमन्तमुम्म
न्नं पयः संस्कृतं अपक्वान्नं वद्धं तत्पक्वान्नमपि नाल्पहतं तच्च पयः दधिक्षीरघृतं गव्यमेतत्वं गुडवर्जितं तिलाश्चैवातिमुद्गाः कंदः वोसु
कवर्जितः नालिकेरफलं चैव कदली लवली तथा आम्रमामलकं चैव पनसं च हरीतकी व्रतान्तरप्रशस्तं च हविष्यमन्य
तेवुधैः अवैस्नवमलभ्यं वाप्यप्रशस्तं व्रतान्तरे मन्यन्ते तीव्रावुः शातातपः हैमंतिकं सिता स्विन्नं शालिमुद्गास्तिलायवाः
कलायकंगुनीवारा वास्तुकं हिलमोचिके षष्टिका कालशाकं च मूलकं केमुकेतरत् कंदं सैंधवसामुद्रे गव्ये च दधिसर्पिषी
पयो ऽनुद्धृतसारं च पनसाम्रहरीतकी पिप्पली जीरकं चैव नागरंगतिंतिली कदली लवली धात्रीफलान्यगुडमैक्ष
वं अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते मूलकं हविरपि वस्त्रवान्नानिषिद्धं तदुक्तं विश्वयामले यत्र मांसं तथा मधु तां
प्यां वृंताकमूलके निवेदयेन्नैव तत्र हरेरैकांतिकी रतिरिति अथ वर्ज्यानि तत्र कुंभसंभवः लवणं च पलं चैव क्षारं सौद्र
सांतरं माषमसूरमसूरराजान्कोद्रवाञ्छाकानपि तांबूलं वामिति संक्षेपः मुद्गाः सिताः उत्तरतंत्रे स्विन्नं च लवणं मांसं कटं
ष्टनं कांस्यभोजनं माषाढकीमसूरांश्च कोद्रवाञ्छाकानपि तांबूलं च द्विर्भुक्तं चन्द्रः स्त्रीसंगं ततो ब्रह्मयामले निश्चेया
त्साहधैर्यं च तत्त्वज्ञानस्य दर्शनात् अल्पाशनादसंगाच्च षड्भिर्मंत्रः प्रसिध्यति प्रयासाद्बहुभक्ष्याच्च प्रजल्पान्नियमाग्रहात्
नीचसंगाच्च लौल्याच्च षड्भिर्मंत्रो न सिध्यति अशक्तिनमनाश्चैव पाशितः शक्तिमयत्वतः देवीमंत्रमयं साक्षाद्ध्यायेदात्मानमा

वर्जयेदिति

—२७५

२७५

शाला अग्निपुराणे उक्ताः तिलमुद्गा इतेशै म्यं सर्षपगोधूमकोद्रवौ। धान्यकं देवधान्यञ्च शमीधान्यन्तथैव च। स्विन्नधान्यं तथा परंच मूलं क्षारगणाः स्मृताः गोधूमानां तु तत्रैव प्रतिप्रसवः व्रीहिषष्टिकमुद्गाश्च कलायः सतिलं यवः श्यामाकाश्चैव नीवाराः गोधूमाद्या व्रते हिताः शमीधान्यं माषादि

आरनालं काञ्जिकं नद्युक्तं आरनालन्तु गोधूमैरामैः स्याल्लिल
षीकृतैः ॥ पक्वैर्वा हृतन्यैनैलन्तु सौवीरस्सधृशं गुरौः

हरा

त्वमि मेनान्यत्र शिवोन्यत्र शक्तिरन्यत्र माहृतः । न सिद्ध्यन्ति वरारोहे कल्पकोटिशतैरपि ॥ पर्युषं चारनालं च कोद्रवान्नं मसूरि
कं कांस्यपात्रे चैतैलं च मंत्रवीर्य्यक्षयणोषट् । वीर्य्यविज्ञानयोर्हन्ता ज्ञानहन्ता च पर्युषः । तस्मात्सर्वप्रयत्नेन मंत्री पर्युषितं त्य
जेत् । आरनालं चान्यमग्नं मंत्री दृष्ट्वा परित्यजेत् । फललोपो भवेन्नूनं मंत्रवीर्य्यं हरेद्ध्रुवं ॥ तेन कारणभावेन मंत्री तत्तान्स
वर्ज्जयेत् । पिन्नलं मसूरदं न्यूतं तद्रूपान्यं च कोद्रवं ॥ कोद्रवान्नं परित्याज्यं सर्वदा जपकर्मणि । मसूरीमान हंत्री च परित्या
ज्या च सर्वथा । कांस्यपात्रमशुद्धं च न च्छेमं विस्मृता पुरा । मंत्रवीर्य्यं हरन्त्याशु पद्मापि स्यान्महेश्वरः ॥ तस्मात्सर्वप्रयत्नेन कां
स्यं त्याज्यं तु साधकैः । तिलतैलं मंत्रपूतं पावनं देवदुर्ल्लभं ॥ मर्द्दयित्वा प्रयत्नेन स्नानं कार्य्यं हि सर्वदा । वर्ज्जयेज्जपवेलायां
भोज्यं चैव सदा बुधैः । न भोक्तव्यं न भोक्तव्यं मंत्रिणा तत्कदाचनेति ॥ अथ भोजनपर्य्यायः । तत्र कुंभसंभवः । उपस्तीर्य्याभि
घार्य्यैतत्संस्कृत्य प्राणणादिभिः । पावयेद्वैदिकैर्मंत्रैः पुनर्मूलेन मंत्रवित् ॥ वैदिकैः प्राणणादिभिः पावयेदिति संबंधः
मूलेन मंत्रयेदिति शेषः ॥ अथ सोमशम्भुः । हृदा संभोजयेन्मंत्री मूलेनाचमयेज्जलैः । हृदा हृदयमंत्रेण जलं चाभिमंत्रितं पिबेदिति
पलाशपत्रेण मध्यवर्ज्जितेन तु कृतपात्रावल्यामेव भुंजीतेति वदंति कांस्यभाजननिषेधार्थं नियमः इति तत्त्वे ॥ अथ शयनं विजय
मालिनीतंत्रे । अथः शयानः शुद्धात्मा जितक्रोधो जितेंद्रियः । नारदपंचरात्रे । भुक्त्वा पायीत शयने सुशुद्धे च स्वपीनले । अर्द्ध
रात्रे समुत्थाय यथा दोषो न भवेद्द्विजः । आचम्य देवं संस्मृत्य शीघ्रं संस्मृत्य पूर्ववत् । जपं कुर्याद्यथाशक्ति अर्प्पयेत्तत्तथैश्वरीति
न यावै शंपायनः । शयनं कुशशय्यायां विन्यसेत्सुचिकस्तु पृथक् । न द्वासः तालयेन्नित्यमन्यथा विघ्नमावहेदिति वायवीसंहि
तायां । अहन्तामखराणां स्त्रीणां सदर्भशायने शुचिः । मंत्रिते च शिवं ध्यायन् मा विशरस्का निशि स्वपेत् । शिवमिश्रुपलताणां मंत्रि
ते स्वप्नमंत्रेण । कपिलपंचरात्रे । गुरुपादार्चनं कृत्वा उपवासी जितेंद्रियः । दर्भशय्यागतो रात्रौ दृष्ट्वा स्वप्नं निवेदयेत् । योगिनी

१६ तंत्रे यज्ञाग्रेनोहृदमन्दृष्टे निदेवमावृन्यमंत्रान्प्रयतस्त्रिरेतान ल॰॰ कमकरदितागपार्श्वशायी स्वमं पदीक्षितयेष्यापदेशे मंत्रानिति
बहुवचनेन सकलसूत्रं गृह्यते तथा भगवन्देवदेवमा स्फलमरूपवादन उग्रानिष्टं समाचक्ष्व मम सत्त्वमस्य शासत एवं स्वमक्त
२७६ प्रास्त्रीणोति नमः प्रयतमानसः निशाते पशुपतिः स्वमं शुभं वायविवाशुभ पिंगलामते नारोहिंदिपदंयमूलयाणयेक्षिठर्दशिनः
स्वप्नमानयमंत्रोयं शंभुनापाविकीर्तितः नमो नृमयत्रिनेत्राय पिंगलाय महात्मने वामाय विश्वरूपाय स्वप्नाधिपतये नमः
स्वप्ने कथय मे तथ्यं सर्वकार्येषु सर्वतः क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वरः मंत्रं तंत्रप्रकाशे ॐ हर सकललोकावि
स्वप्नेप्रभव विश्ववे विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः स्वप्नमानवमंत्रोयं कथितो नारदादिभिः अथ शुभसूचकस्वप्नाः मत्रेया
गिनीतंत्रे: त्रिविधं दर्शनं तत्र यथार्थमयथार्थकं अप्रावकं यत्र स्वप्नांतास्वप्नानां दिर्शनं यथार्थं तद्याथार्थ्यं स्वप्नानां वि
कारजं अयावकं मानसं च यथार्थफलमुच्यते एषां स्वरूपमाहये दितिदर्शनं देवादीनां विकारजं पित्रादीनां मानसं मनोविका
रजं आगमसिद्धये आद्ये वर्षे वत्सरार्द्धे द्वितीये यामे पाके वर्षपादात्तृतीये मासे पाकः शर्वरी तुर्य्ययामे सद्यः पाको या विसर्गेषु
दृष्टः आद्ये यामे दृष्टस्वप्नस्य वर्षमात्रे पाकः फलं एवमग्रेपि विसर्गे निशांते तथा ज्वरयमामध्यमास्यादृष्टे तु तमोनविघ्नेत उ
तमो यस्मात्सा सिद्धिकृत्तमे स्वमे उत्पथ नानेवादृतत्रैव स्वमे पशुपति वेदे अविशिष्टं सर्वेनामुत्र गुरुं प्रमादस्तु स्वनिर्मलं चंद्रम
एडलं गंगां गां भारतीं भानुं लिंगिनिलिंगमेश्वरं प्रसन्नं तत्र जानीयात्सिद्धिं स्वप्नदर्शने प्रसन्नं निजेष्टदेवं अत एवसिद्धिम
पि नारदपंचरात्रे दितिलाभः तत्र जाह्नितरंगं चाग्निं पूजनं होमं प्रज्वलितं वह्निं संग्रामविजयमत्तया हंसकोकमयूराणांग
व्याघ्रोहृत्तामेवच कोकस्पृक्रवाकः कपिलपंचरात्रे कन्यां छत्रं रथं दीपं प्रासादं कमलं नदीं कुंजरं वृषभं मालां समुद्रं फलितं द्रुमं
पर्वतं च हृदयमेष्यमा मांसं सुरामन्नं एवमादीनि सर्वाणि दृष्ट्वा सिद्धिमवाप्नुयात् श्रुतिरपि यदाकर्मसुकाम्येषु स्त्रियं स्वप्ने

नि जे

द्व र्म

चि

द्रुतरो

ऋपश्यति समृद्धिं तत्र जानीयात्तस्मिन्स्वप्नदर्शने भैरवीतन्त्रे नदीसमुद्रतरणमाकाशगमनं तथा भास्करोदयनं चैव प्रज्वलनं हुता
शनं ग्रहनक्षत्रताराणां चन्द्रमण्डलदर्शने नक्षत्राणपश्चिन्यारोहेति तारास्त्वन्यानीति हर्म्यस्यारोहणं चैव प्रासादशिखरस्यापि वा नागा
श्वद्वृषभेन्द्राणां नरकशैलाग्ररोहणं विमानगमनं चैव सिद्धमन्त्रस्पर्शनं लाभः सिद्धेतरैश्वर्यदेवीनां चैव दर्शनं एवमादीनि स्व
दृष्ट्वा नरः सिद्धिमवाप्नुयात् स्वप्ने तु मदिरापानमाममांसस्य भक्षणं क्रिमिविष्ठानुलेपं च रुधिरेणाभिषेचनं भोजनं दधि
भक्तसम्मिश्रं तु वस्त्रानुलेपनं सिंहासनं रथयानं ध्वजं राज्याभिषेचनं रत्नान्याभरणादीनि स्वप्ने दृष्ट्वा प्रसीदति नारदपंचरा
त्रे गरुडे वो द्विजः कन्या गोगजाश्वाश्च केसरी दृष्ट्वांगशोभामैश्वर्यं वन्तंत्री वाद्यं वीणावादनं ताम्बूलभक्षणं चैव तत्त्वादर्श्यमभिवंदनं
सिद्धान्नमाममांसं च मद्यस्त्रीमदिरासवाः छत्रं यानं सितं वस्त्रं तथान्यश्वेतचंदनं माल्यमुक्ताफलेहारः पूर्णाः समुद्रितः
शशी प्रवालकिरणाः स्वेष्यानिश्रगाथमहोदधिः प्रफुल्लपादपाः शाली गोरोचना कुंकुमं मधुः लाजाः सिद्धार्थका वीजनवभां ङं
णां च पायसं उपपन्नाप्यथा चाश्वागजयश्चीवरसंगता मनःप्रीतिकराश्चान्ये लोके शास्त्रे पदं गताः सर्वे स्वप्नाः शुभाः प्रोक्ताः सि
द्धिमोतफलप्रदाः अथाशुभसूचकाः नारदः अतोन्यविपरीतास्तु मनसः खेददाश्च ये गर्हिता लोकविद्विष्टाः स्वप्नास्ते ह्यशु
भावहाः अतउक्तं शुभसूचकात् कपिलपंचरात्रे चाण्डालं कलभकाकं गर्तं स्वप्नममंगलं तैलाभ्यक्तं नरं तत्र शुष्कवृक्षं स
कंटकं प्रासादमतलं दृष्ट्वा नरो रोगमवाप्नुयात् कलभं वा लगजं तत्र प्रायश्चित्तमाह कपिलः दृष्ट्वाङः समकं चैव द्विहो
मात्सिद्धिमवाप्नुयात् तथा पिंगलामते शुभेऽशुभे भवेत्स्वप्नं कुर्यादशुभशान्तं अस्येणानि क्रमाद्विद्यानिति तथा नारदपंच
रात्रे दुःस्वप्ने समाचरेद्धोमं दंतकाष्ठादितं मुने केवलेनाथवाज्येन सिद्धमंत्रेणाशान्तये दंतकाष्ठप्रकरणे तावदाह स्वयमेव शा
नेसदृशं सम्यक्षवा यथाशत्काथवा द्विजः अत्र संघटितेनैस्वानाम्नासाहस्त्रिते नव दोषान्तक्षिन्त्स्वीपवपदेनामावसानं गं स्र

६८

शंखा चरां गनोः

दोषनिदानानां

१६ नसिद्धमंत्रयोर्विकल्पः एवं दोषनिर्दोषा अथ स्वप्ननिवेदनं तत्रैव शिष्यस्तु चिरार्चनात् स्वप्ने दृष्ट्वा गुरुं नमेत् प्रणम्य शिरसा दृष्टस्व
प्नं स्वप्नं निवेदयेत् स्वप्नमेवापि समस्तं वा स्वात्मसाम्यमिति स्थितिः अकस्माद्यदि जायेत नाम्यातं मंत्रगुरोर्विना मंत्रप्रसादजनितं लिंगं च न
२७७ गुरोर्विना प्रकाशनीयं विप्रेंद्र कस्यचित्सिद्धिमिच्छता प्रकाशयति यो मोहाद्दोषास्तस्य भवन्ति ते निकटस्था प्रलापात्समसिद्धयो
यान्ति दूरतः आविर्भवंति दुःखानि शोकाश्च विविधा अपि वक्तव्यं एकल्प्य चित्तप्रसादो मनसस्तुष्टिरल्पाशिता स्वप्नदर्शनं गुरुदेवतं न
था भैरवीतंत्रे ज्योतिः यथा तिसर्वत्र शरीरे वा प्रकाशप्रकृ निजं शरीरं समग्रमा देवतामयमेव हि नारदपंचरात्रे मंत्राराधनस
मस्य प्रथमं वत्सरत्रयं जायते बहुविघ्नानि नियतं तस्य नारद नोद्वेगं साधको याति कर्मणा मनसा यदि तृतीयवत्सरादूर्ध्वं
ज्ञानरूपं महीमतः प्रार्थयंतेन्तरायेण नार्थिता अपि मानिनः प्रसादः क्रियते तेन तस्य मोहरणाकारणं प्रज्वलंतं च पश्यंति तेजसा
विभवेन च प्रतन्स्मरतिशार्दूलनिर्घोषं वक्त्रमतमाः नवमाद्वत्सरादूर्ध्वं स्वयं पश्यंति मंत्रराट् नानारूपाणि हृदये मंत्र
सिद्धिमयानिवै अन्यानंदप्रदामासेषु प्रत्यहं पिबति तथा जउधीमत्तानां विप्रेंद्राणामसि प्रहर्षितः दत्तानुक्रोशितिर्यग्
घ्राणेनेत्रं च नरिल्लतः तानावमधुरं वाद्यं नानागीतसमन्वितं आजिघ्रति तदा गंधान्नूकर्णस्य रमद्गनाभिजानन् उत्पन्नं तेन च
णा वापि पश्यत्यात्मानमात्मना चंद्रार्कं किरणाकीर्णं तदामालोकयेन्नभः राजतो बहुबन्धनाशो पश्यत्युपाच तदा द्विजः
निर्भरं स्वदंशो दोषेभ तरामाकर्षयत्यपि तारकाणि विचित्राणि योगिनो नभसि ध्यतान् पश्यंतु स्थानं तदा मंत्रप्र
तीसदा तदा किलिकिलारावं हर्षवर्धनं तथा तदा मेघारवं पश्चात्पणाद्रेतिनीदिने राज्ञौ चा दिवमालोकसद्रूप्य
तारामीतति वलनपरिक्रमा चेतनज्जस्तामा भास्करोपमः पूर्णेंदुसदृशः कोन्या गगने विहगोपमः रमेनयुक्तः आच्छन्न
गांभीर्याणास्त्वेवनच सत्यापाशने नाक्रमाणां बहुनापि न बाधीयते विष्णुत्वं तथाल्पत्वं भवेन्निद्राजयस्तथा तपध्यानगतो

मंत्रीनैवेदमधिगच्छति विनाभोजनयानाभ्यां पतमामामादिकं मनुते इत्येवमादिभिः श्रीहर्षमहाविस्मयकारिभिः प्रवृत्तेः संप्रवेवाहवं
प्रसन्नो मंत्रराडिति तथा वोपायन सिद्धेस्तत्रीणि विज्ञानि दाताभोक्ता प्रयाचकः दाताभोक्ताथ याचक इत्यर्थः प्रपंचसारे तनो
स्यप्रत्ययसेवं ज्ञायते जपको मंत्रं अपि सिद्धिं न लिप्सदीप्तं निलमिमं ग्रहं भवेत अर्कक्षाभस्तित्रमासेनैव तिनलितज्ञासंनतनं किं करी
स्याद्योगात स्वयं तिरस्मात्तु तमथ पनयान्याकुलनन्समीपं देवानित्यं नमो मैथ विरूपनिफाणिनोनेव हृत्स्थे तिष्ठत्राः पेत्राये त्राणि
मित्राणि त्वदात व विपदि परं यामविलाः सम्भूयात एवंकृतेपि तसिद्धतिचेत् तदा दहयंत्रपेवाश्वरस्वरंगाकृष्यात् तदुक्तं फेत्कारि
णीतंत्रे कर्मणा प्रबलेनैव प्रतिबंधो विरोधिना यदि सिद्धिं न लभते हि सिद्धिं वा पुनराचरेदिति अथ होमपर्याया विचार्यते तत्र वाय
वीयसंहितायां अथाग्निकार्यं च स्यामि कुंडे वा स्थंडिले पि वा वेद्यां वा प्रयोजसे पात्रे मृन्मये वा नवे शुभे तानाणिवितिंत्यं नैमित्ति
कं होमं स्थंडिले वा समाचरेत गोमयेनोपलिप्तायां भूमौ चस्थलं रूपकं हस्तमात्रं तत्तकेद्यद्वालुकाभिः सुशोभनं अंगुला
त्युपयं संयुक्तं चतुरस्रं समंततः क्रियासारे सर्वेषु दिक्षु प्राक्प्रच्छः प्रागुदक्प्रवणो पि वा उदक्प्रच्छः प्रदेशो वा स्थंडिलस्य स्थ
लेसतेन प्रवः प्रवणः तथा कपिलः स्थंडिले वालुकाभिर्वा रक्तमृद्भूतजेनापि वा तथा वशिष्ठः हस्तमात्रं स्थंडिलं वासं ति मे दो
हकर्मणि अत्र संहितेमे इत्यभिधानात सहस्रादि संख्यो होमः स्थंडिले न कर्तव्य इति केचित् तत्र होमं समारभेत्कुंडे स्थंडि
ले वा प्रयत्नितं अग्निप्राणायनं कृत्वा या चार्यः सर्ववेदवित् तिलहोमं व्याहृतिभिरष्टोत्तरसहस्रकं अमितिवायुपुराणवचनात्
कुंडे वा स्थंडिले वा तत्र होमो विधीयते अथ तेहोमसंख्या च तत्र गुणानजपः काम्यैः तत्रियैः षड्गुणः वैश्यैरष्टगुणः होमकर्म
णि शक्तानां त्रयाणां जपसाम्यता होमकर्मण्यशक्तानां समस्मिन्निति अत्रैव वचनात् तदावेदशक्तो विप्राणां द्विगुणः
क्षत्रियाणां त्रिगुणः वैश्यानां चतुर्गुणः होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः इतरेषां तु वर्णानां त्रिगुणादि विधीयते इ

२२८

278

१६ तिगौतमवचनात् तत्राप्यशक्तो होमसंख्याचतुर्गुणो जपः कार्यः होमाशक्तो जपं कुर्यात् होमसंख्याचतुर्गुणं इति वशिष्ठवचनात् ए
तदपि विप्रमात्रपरं क्षत्रियवैश्ययोः भागवत् षड्गुणाष्टगुणो जपो भवति प्रागुक्तवचनात् तत्राप्यशक्तो होमसंख्याद्विगुणो जपो वा
कार्यः यद्यदंगं विहीयेत तत्तत्संख्याद्विगुणो जपः कर्तव्यः संगसिद्ध्यर्थं तदशक्तेन भक्तितः इति कुंभसंभववचनात् तदशक्तेन पुर
श्चरणसंख्याचतुर्गुणो दिक्पालांशकेन एतदपि विप्रमात्रपरं क्षत्रियवैश्ययोस्त्रिगुणचतुर्गुणो जपो भवति प्रागुक्तगौतमव
चनादेव द्विजभक्तेन तत्स्वस्त्रीणां तु चतुर्गुणो पदेदशगुणो जपो भवति द्विगुणपदे तत्पंचगुणो जप इति द्विजभक्तस्वस्त्रीणां तु पंचवर्णा
माश्रितायः स्वकुलस्मार्तदृष्टिविहितजपपरवेति तदुक्तम् तंत्रे द्विजानां होमविधिं हृदयः प्रोक्तः स्त्रीभिर्जपः तथाश्रितामय
वोक्तः एवं पंचवर्णाश्रितः तत्स्त्रीणां विहितं जपं कुर्याद्भक्तिपरायण इति गौतमीयात् होमाभावे द्विजातीनां तु जपः प्रोक्तः
पुरातनः तत्स्वस्त्रीवाचतत्स्त्रीस्वस्त्रीणां च जप एव हीति अतः स्त्रीशूद्रैर्होमानधिकारात् जप एव कार्यः उत्तरतंत्रे ततो होमदशा
शेन जले संपूज्य देवतां तर्पयामीति मंत्रेण तेनाकांक्षिसिद्धिं तर्पयेत् वैशंपायनः तर्पणास्य दशांशेन तन्मांतमंत्रमुच्चरन् अभि
षिंचेत्स्वमूर्द्धानं जले कुंभादिमुद्रया उत्तरतंत्रे तद्दशांशेन भोजयेद्विप्रान् सदाचारान् दशांशतः नानाविधैर्भक्ष्यभोज्यैर्लेह्यचोष्यैस्त
थैव च लक्ष्येतरैः सर्वथा भोजयेद्विप्रान् कृतसांगत्वसिद्धये विप्राराधनमात्रेण व्यंगं सांगतमाप्नुयात् एकमंगं विहीयेत तेन
नेष्टमवाप्नुयात् अंगहीनं भवेद्यद्यत् कर्म नेष्टार्थसाधकं न्यूनातिरिक्तकर्माणि न फलंति मनोरथान् तपश्चरणानां यानि सम्मता
नि भवंति च तत् अतो यत्नेन विद्वद्भ्यो भोजनं चाल्वकर्मसु यानि यान्यपि कर्माणि दीयते द्विजभोजने निष्फलानि तानि सर्वाणि जा
न्यधरणानि च तत् गुरुं संतोषयेत्सम्यग्हिरण्यवस्त्रादिभिः गुरौ तुष्टे हि मंत्रसिद्धिर्नि मंत्रिणः इत्यपुरश्चरणानंतरं प्रसन्नो देवता
भवेत् श्रीकुलार्णवे यद्वाच्छ्याम्यहं मंत्रं जप्तुं नापि फलेन वा परैर्हितं वा मात्या वा सज्जपेद्यथ तर्पिकृत प्रसन्न केलि वितानं

त्रानालिकाश्र्जपंनिये ब्रह्महत्यासमं मंतेषां पातकं परिकीर्तितं अनेककोटिमंत्राणां चित्तव्याकुलकारणं मंत्रं गुरुमुखाल्लब्ध्वा समेवं
स्यात्सर्वसिद्धिदं अथ प्रयोगस्तत्र जपमाला मातृ द्विविधा मातृकाक्षरमयी मणिमयी चेति तत्र मणयः स्फाटिकपुत्रजीवशंखविद्रुमर
त्नमुक्ताफलपद्मबीजस्वर्णरजतकुशग्रंथिरुद्राक्षादयस्तत्र विशेषाः अक्षसंख्या तु मातृकाराजसतामसभेदेनाष्टोत्तरशतं वा
पंचाशत्सप्तविंशतिश्चेति अस्तमालायाः संस्कारकालः तत्र विष्णोर्द्वादशी पूर्वाह्णः शक्तेरष्टमी नवमी चतुर्दशी रात्रिः गणेशस्य
चतुर्थी मध्याह्नः शिवस्य त्रयोदशी दिवा सूर्यस्य सप्तमी पूर्वाह्णः इति अथ मालायाः सूत्राणि विष्णोः पट्टसूत्रं कार्पाससूत्रं चेन्द्रा
लगुणीकृतं सप्तसमानवर्णायोषित्कृतं त्रिगुणीकृतं कुर्यात् अन्येषु सूत्रेषु यथायोग्यमेव कार्यमिति अथ संस्कारः तत्र प्रमाणात्क
माणिक्यमात्रयोगात् सूत्रे गोमयत्र ग्रपदचिह्नं कुशजलालकं पंचगव्यं संपाद्य शक्तिं स्थितिविके पूर्वदिने कृतैकभक्तः साधकः प्रातः स्ना
तनित्यकृतः सूत्रमणीन् पुष्पगंधवर्जितचगव्येन जलेन च प्रक्षाल्य नवसु पिप्पलदलेषु पद्माकारं चितेषु सूत्रं मणींश्च संस्थाप्य तेषु
प्रणवं भुवनेश्वरीबीजं मातृकाक्षराणि च सूत्रे प्रतिबीजं बीजेषु च विन्यस्य मणीन् सूत्रं च गंधादिभिः संपूज्य प्रणवादिना नित्यहोम
विधिनाग्निं संस्थाप्य यथाशक्ति सघृततिलैः केवलघृतैर्वा सद्यादिपंचमंत्रैर्हुत्वा होमावशेषं पंचगव्याद्विधाय तत्र रुद्राक्षपुत्र
जीवपद्माक्षान्यान्वितन्मालां संयोज्य तत्र पंचगव्ये संमन्त्र्य मणीनामित्यारोप्य एकैकमणिमध्ये गुरूक्तविधिना ब्रह्मग्रंथिं विधाय
गोपुच्छाकारेण ग्रथयित्वा ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः इति मंत्रेण
पंचगव्येन शीतलजलेन च प्रक्षाल्य ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणा
य नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः इति मंत्रेणाष्टगंधेन कुंकु
मरक्तकुंकुमैर्विलिप्य ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः अनेनागुरुकर्पूर

तत्र स्मारानुसारेणार्यं मुद्राक्रमः ज्ञानार्णवे गौतमीतन्त्रा
कौलवन्त्यः क्रमः

दे

१६ घार्क्षेत्रागुरुमूलमधुचंदनचूर्णैर्हैपयित्वा ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् इति गंधचंदनकस्तूरीकुंकु
मकर्पूरैर्लेपयेत् ततः ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् इति
२२५ इति बीजं ध्यात्वा शतमभिमंत्रयेत् ततस्तत्र पूर्वोक्तवक्त्रभेदेन पञ्चरुद्रांस्तस्यां तावतानामावाहनस्थापनसन्निधापनसन्निरो
धनसम्मुखीकरणसकलीकरणावगुण्ठनामृतीकरणपरमीकरणानि तत्तन्मुद्रया विधाय पञ्चगुणैः पंचभिर्मंत्रैः प्रतिबीजं पंचो
279 पचारैः संपूज्य देवतां इष्टदेवतां वक्त्रजपयित्वा संस्कृतमालया जपं कुर्यादिति जपमालासंस्कारविधिः इयं प्रतिष्ठितमालया ज
पं कुर्वीत यदा तत्सूत्रं जीर्णमिति ज्ञात्वा तदेव दृढसूत्रं ग्रथयित्वा तत्पापविष्टमंत्रमष्टोत्तरशतं प्रायश्चित्तार्थं जपित्वा पश्चात्तया
मालया यथापूर्वं जपं कुर्यात् अथ प्रतिष्ठाप्रकारस्तु रुद्राक्षस्यैव नान्येषां अथैषां पद्माक्षादीनां तु प्रतिष्ठाविधिः प्रदर्श्यते
तत्र ग्रथितां मालां कुत्रचित्पात्रे संस्थाप्य तस्यां गोमूत्रगोमयविस्तुशिवडुगाः पृथक् पृथक् गावाद्यं संपूज्य ह्रौं मंत्रेण पंचगव्येन
तिः क्षिप्य पुनः स्नानमाड हृन्मन्त्रेणाथ त्रेध्य पिप्पलपत्रेष्वधूपवासिते पंचामृतेनेति क्षिप्य पुनस्तां मन्त्रहृन्मन्त्रेण शीतलजलेन
क्षिप्य प्रक्षाल्य चंदनागरुकस्तूरीकर्पूरकुंकुमसौगंधिकैर्विलिप्य तन्मालां ह्रौमिति मंत्रमष्टोत्तरशतं जपित्वा नवग्रहात्मकशादि
कालां च संपूज्य सद्भूतैस्तिलैर्यथाशक्ति इष्टमंत्रेणाहुत्वा गुरवे यथाशक्ति कांचनं दत्वा दक्षिणां दत्वा ब्राह्मणांश्च मिष्टान्नादिभिस्तोष
येदिति अथवा सूत्रे मणींश्च पंचगव्यादिना त्रयं संस्थाप्य चतुर्थदिने सप्त हृन्मन्त्रेण प्रक्षाल्य हृन्मंत्रेण ग्रथयित्वा स्थापयेत् ले
इष्टदेवतापूजामण्डलं विधाय तत्रेष्टदेवतां संपूज्य मूलमंत्रमष्टोत्तरशतं जप्त्वा इष्टदेवताकल्पोक्तपुरश्चरणविधानमद्व्येण हुते
न वा यथाशक्ति हुत्वा मण्डलमध्ये मालां संस्थाप्य तस्यामस्त्रमंत्रषडंगमंत्रैः स्वविन्यस्येष्टदेवतारूपां तां विचिन्त्य वक्ष्यमाणवि
धिना सर्वभूतबलिं दत्वा तस्यामिष्टदेवतां संपूज्याचार्याय दक्षिणादिभिः परितोष्य ब्राह्मणांश्च भोजनादिभिस्तोषयेदिति इयं प्रति

ष्टितमालयानावामंत्रंजपेत् अथप्रारंभणकालेविहितानि तत्रमनःसंहरणशौचमनमंत्रार्थचिंतनाव्यग्रतानिर्वेदश्राद्ध
तपोत्साहक्रोधत्यागस्ववर्णाश्रमधर्मानुष्ठानपरितुष्टनैंद्रियंतिग्रहब्रह्मचर्यगुरुनतिकेवलामलकस्नानमंत्राभिमंत्रित
लेगाभिषेकत्रिषवणाद्विसवनमथ्थकौमसकृद्धास्नानदेवर्षिपितृविष्णुदेवतातर्पणमधुपत्ररहितपलाशपत्रवैचित्रपत्राव
ल्यारात्रौमितभोजनंगोविप्रबालादिषुकृपाचेति अथतत्कालनिषिद्धानि अप्रियापस्वभाषणकरंजविभीतकार्कस्नुहिरक्ष्मा
क्रमणप्रतिग्रहस्त्रीशूद्रपतितनास्तिकोच्छिष्टसंभाषणस्नानतर्पणाद्यननुष्ठानबहुवस्त्रैकवस्त्रमलिनधारणकाम्यकर्मा
संकल्पितस्ववर्णाश्रमाविहितकर्मावरणकांस्यभोजनासत्यभाषणात्मपूजनकौटिल्यतैलाभ्यंगमधुसमागमोष्णजलस्नानोन्म
र्दनगीतवाद्यादिश्रवणान्तदर्शनाष्टविधमैथुनतत्कथालापनदुष्कर्माख्यानस्पर्शप्राणिहिंसाकंचुकोष्णीषधारणकरा
प्रावरणकेशमोक्षणशिरःप्रावरणचिताक्रोधमत्सरगमनेनारंभशयनेनास्यानामनंथकारामंगलस्नानपादुकाधारणा
पानशय्यादिरोहणपादप्रसारणोत्कटासनदंतजृंभादिक्काविकल्पमनस्काशनप्रौढपादनग्नकृशयाहित्यादीनि अथा
सनानि तत्रव्याघ्रचर्ममृगाजिनवेत्रनिर्मितकंबलकुशकटरक्तपट्टवस्त्रात्मकानि विहितानि अथनिषिद्धासनानि वंशार
चितदारुमयपाषाणतृणवस्त्रपल्लवेष्टिकानिर्मितानिकेवलभूतलंचेति अथप्रारंभणारंभएवदिनकृत्यं तत्रप्रातः
स्नात्वानित्यक्रियांनिर्वर्त्यब्राह्मणान्भोजनादिभिस्तोषयित्वास्वगुरुमपिवस्त्राभरणवनयान्यादिभिःसंतोष्यतपस्यानेत्रि
कोणंत्रिचक्ररसमणालेदंक्षेत्रपालायनमःक्षेत्रपालइहागच्छागच्छेति क्षेत्रपालमावाह्याक्रमंत्रेणक्षेत्रपालंगंधादिभिःसंप
ज्यतन्मध्येत्रिकोणमण्डलमाधारस्यांत्रमंजनोदकपूर्णंवलिपात्रंनिधायपंचोपचारैर्विडौषधप्रचुरुभंजयभंजयनर्त्तय २ वि
द्रव २ महाभैरवक्षेत्रपालवलिंगृह्ण२ गृह्ण स्वाहा इतिमंत्रेणवलिंदत्वाप्रवसेत् अथजपारंभदिनकृत्यं तत्रशुभमासि

१९

२८.

वेदतारागनुक्षत्रे तिथिवारनक्षत्रादिशोधिते सद्दिवसे प्रातः स्नात्वा गुरुर्विप्राज्ञामादाय ब्राह्मणैः स्वस्तिवाचनं कारयित्वा कुशहस्तः ॐ
सूर्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपा पवनो दिक्पतिर्भूमिराकाशं खेचरामराः ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्
निधिं इति पठित्वा ताम्रपात्रे कुशांस्तिलाक्षतजलान्यादायोदङ्मुखः ॐ अद्यामुके मासि अमुकराशिगते सवितरि अमुकपक्षे अ
मुकतिथौ भरतवर्षाख्ये भूप्रदेशे विशेषतोऽत्रामुकशर्मा क्षत्रियश्चेदमुकवर्मा वैश्यश्चेदमुकगुप्तः शूद्रश्चेदमुकदासः अमुक
मन्त्रसिद्धिकामोऽमुकमन्त्रस्यायुतसंख्याजपात्मकं पुरश्चरणं करिष्ये अथारभ्यैतावद्भिर्दिनैः करिष्ये इति वा संकल्पं विधाय गुरु
गणपतिदुर्गामातॄर्नत्वा पूजां समाप्य जपमारभेत तत्र मूलमन्त्रेण प्राणायामत्रयं कृत्वा मूलमन्त्रस्य ऋष्यादिकरषडङ्गन्यासा
न्विन्यस्य हृदि देवं ध्यायन् जपमालां वामहस्तके च चिन्त्यात्र वा संस्थाप्यार्घोदकेन मूलमन्त्रेण संप्रोक्ष्य ॐ मां माले महामाये
सर्वशक्तिस्वरूपिणि चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव इति गंधपुष्पाक्षतैर्मालां संपूज्य ॐ अविघ्नं कुरु मे माले त्व
मिति मन्त्रेण दक्षिणहस्तेन मालामादाय स्वशिरसि श्रीगुरुं कण्ठेऽपानवर्णं मूलमन्त्रं हृदये स्वेष्टदेवतां गुरुपादयोः स्वात्मानं
ध्यात्वा स्वमनः स्वाज्ञाचक्रे गुरुदेवतामन्त्रात्मनामैक्यं विभाव्य कण्ठस्थविशुद्धिचक्रे चतुष्पमेकीभूतं सुषुम्णामार्गेणानीय त
त्र देवं ध्यात्वा मूलमन्त्रेण हृदयस्थानादनवक्रमानीय तत्रापि देवतां ध्यायन् हृदयसमीपे मालामानीय दक्षहस्तस्य मध्य
मांगुलिमध्यपर्वणि संस्थाप्यैकचित्तोऽभ्युन्नतग्रीवोन्नतगात्रः कायकम्पमीलनरहितः घटघटादिशब्दमकुर्वन् मन्त्रार्थगतचित्तोऽभ्यु
ग्रीवोन्नतगात्रः मालायाः प्रतिबीजं मन्त्रमुच्चरन् पूर्वबीजजपसमयेऽपरबीजमस्पृशन् प्रणवोच्चारणपूर्वकं मन्त्रमारभ्य प्रातः
कालान्मध्यंदिनावधि देशाद्युपद्रवसंभावनायां त्रियामसमापनीयं वा सार्धप्रहरत्रयावधि जपित्वा सर्वशेषाहुत्यन्ते पुनः प्रण
वमुच्चार्य जपं समाप्यैतं माले सर्वदेवानां प्रीतिदा शुभदा मम शिवं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा इति मन्त्रेण मालां स्वशि

इति निधाय पुनः प्राणायामत्रयमृष्यादिकरषडंगन्यासान्विधायार्घोदकेन प्रागुक्तमंत्रेण जपं समर्प्य प्रागुक्तमालापूजनमंत्रेण मालां
संपूज्य पदृहस्थिराप्येत् अत्र प्रणवोच्चारणं त्रैवर्णिकानामेव शूद्रादीनां तु ओंकारस्थाने नमः प्रणवेन न ग्राह्य इति ततो मध्या
ह्नस्नानादिकं विधाय पुनः पूजां विस्तरतः कृत्वा प्रतिदिनहोमपक्षे तत्पदशांशं कल्पोक्तद्रव्यैर्विधिना संस्कृतेऽग्नौ हुत्वा होमद
शांशतर्पणं तद्दशांशमार्जनं मार्जनदशांशं ब्राह्मणभोजनं प्रत्यहं कुर्यात् प्रतिलक्षहोमपक्षे पक्षकल्पोक्तसंख्याकज
पसमाप्तौ तद्दशांशहोमादिकं कृत्वाग्निमलन्तपमारभेत् कल्पोक्तसंख्याजपसमाप्तौ तद्धोमपक्षे कल्पोक्तसंख्यजपसमा
प्तौ पश्चात्तद्दशांशहोमादिकं कुर्यादिति एतत्त्रयेऽप्यशक्तः पुनः कार्यं होमपर्याप्त्याय प्रागेव दीनाप्रकरे प्रोक्तः होमाशक्तौ
जपश्च कार्यः तत्र ब्राह्मणः पुरश्चरणसंख्याचतुर्गुणः कार्यः क्षत्रियैः षड्गुणो वैश्यैरष्टगुणः अशक्तौ ब्राह्मणैः पुरश्चरणसं
ख्याद्विगुणो जपः कार्यः क्षत्रियैस्त्रिगुणो वैश्यैश्चतुर्गुणः इति तत्राप्यशक्तौ होमसंख्याचतुर्गुणो जपः कार्यः एतद्विप्रपरं
क्षत्रियवैश्ययोः प्रागवत् षड्गुणोऽष्टगुणो जपो भवति तत्राप्यशक्तौ होमसंख्याद्विगुणो जपो वा कार्य इति एतदपि विप्रमात्रप
रं क्षत्रियवैश्ययोस्तु त्रिगुणश्चतुर्गुणो जपो भवति द्विजभक्तेन शूद्राणां दशगुणो जपो भवति चतुर्गुणद्विगुणपक्षे तु पंच
गुणो जप इति द्विजभक्तशूद्राणां तु एवं त्रैवर्णिकाश्रितायः शूद्रः तद्गुणविहितजप एव द्विजस्त्रीणामपि तथैवेति स्त्रीशूद्राणां
होमानधिकाराज्जप एव विहित इति इत्थं होमं विधाय पंचरत्नागरुकर्पूरवासितैर्जलैर्होमसंख्यादशांशतः प्रागुक्तविधिना
जले देवं ध्यात्वा संपूज्य संतर्प्य स्वात्मानं देवरूपं ध्यायन् कुंभमुद्रया मूलमंत्रेणात्मानमभिषिंचामि नम इति तर्पणसंख्या
दशांशतः स्वमूर्द्धन्यभिषिंचेत् अभिषेकसंख्यादशांशसंख्याकानिष्टदेवताभक्तान्ब्राह्मणान्स्वानंतर्निमंत्र्य आहूय पाद्यार्घ्यादिना सं
पयित्वा वस्त्रगंधादिभिरलंकृत्य षड्रसैर्नानारसैर्भक्ष्यैर्भोज्यैः इष्टदेवताबुद्ध्या भोजयित्वा तांबूलदक्षिणाभिः परितोष्य वि

१६ स्नेते दितिमत्पदंलं तांतेवासमलसंख्यासमनोवाभक्तिरेवंकुर्यादिति ततस्तत्रकृतेमध्याह्नस्नानांतरं वैश्वदेवादिकमाह्नि

कं विधाय विष्णुदेवमंत्र मध्यान्हकीर्तनश्रवणादिना दिनशेषं नीत्वा सायंतनस्नानं विधाय देवं संपूज्य भुंजीत तत्रभो

२८१ ज्यानि भैक्ष्यगुल्कैकविधाखिन्नहैमंतिकनीवारषष्टिकाकंगुणीयवाः मुद्गास्त्रवहूशी: पादाभ्यामतलोल्पावहतागुडवर्तितनैमे

तवंकृस्नानि लमस्तकलाधाके सकवर्जितकदविशेषनाविकेलकदलीफलनवलीयनसाम्रामलकार्द्रकहरीतकीवास्तूकका

लशाकविल्लमोचकार्सेंधवसामुद्रेलवणोगहूत सारगोगव्यानि पिप्पलीजीरकनारिंगतिंतिणीमूलकानि अथवर्ज्यानि

गुडकृत्रिमलवणसारलवणाखिन्नपर्युषितनिम्नहूकीटादिदूषितकांजिककटनन विल्वकरंजलशुनमृणालकोद्रवम

द्रकतैलपकमाषमसूरचणकगोधूमदेवधान्यादीनि अतिभोजनं दिवाभोजनंच अथभोजनपर्यायः तत्र विष्णुदेवनाम

स्मरन्तन्नमध्यपत्ररहितपलाशपत्रैः कल्पितपत्रावल्यांसंस्थाप्यवैदिकमंत्रैः संस्कृत्य मूलमंत्रेणप्रोक्षितंद्वयं मूलमंत्रे

णसप्तवारमभिमंत्र्य हितमितं द्वमंत्रेणाश्नीयात् मूलमंत्रेण द्वात्रिंशद्वारमभिमंत्रितंजलंच पिबेत् अथशयनं तत्रकु

दि प्तानिर्मितायांशय्यायां प्रक्षालितांघ्रिः प्रक्षालितवस्त्रमात्रीयशय्यां मूलमंत्रेण सप्तवारमभिमंत्र्य यज्जाग्रद

तिसूक्तस्य शिवसंकल्प ऋषिस्त्रिष्टुप्छंदः मनोदेवता सूक्तजपे विनियोगः ॐ यज्जाग्रतोदूरमुदैति दैवं तदु सुप्तस्य त

दैवेति दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु १ येनकर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथे

षुधीराः यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु २ यत्प्रज्ञानमुतचेतोधृतिश्च यज्ज्योतिरन्तरमृतं प्रजा

सु यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ३ येनेदंभूतंभुवनंभविष्यत्परिगृहीतममृतेन सर्व

म् येनयज्ञस्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु ४ यस्मिन्नृचः साम यजूंषि यस्मिन्प्रतिष्ठिता रथनाभावि

वारा यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ५ सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेभीशुभिर्वाजिन इव
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु ६ इति मंत्रान्स्तुतिः पठित्वा भगवन्देवदेवेश शूलभृद्वृषवाहन इष्टानिष्टे समाच
क्ष्व मम सुप्तस्य शाश्वत ॐ हिलि हिलि शूलपाणये स्वाहा नमोजाय त्रिनेत्राय पिंगलाय महात्मने वामाय विश्वरूपाय स्वप्नाधिपतये
नमः स्वप्ने कथय मे तत्त्वं सर्वकार्येष्वशेषतः क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर ॐ नमः सकललोकाय विस्लवे प्रभविल्ल
वे विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः इति मंत्राश्च सकृत्पठित्वा प्राक्शिरा दक्षिणपार्श्वशायी स्वप्नं परीक्षेत तत्र स्वप्नान्तःप्र
थमे प्रहरे दृष्टस्य स्वप्नस्य वर्षेण फलं द्वितीये षण्मासिकं तृतीये मासत्रयेण चतुर्थे मासेन तन्निश्चितं सद्यः फलं ज्ञेयमिति अथासि
द्धिसूचकस्वप्नाः प्रसादस्वभावे विष्णुदेवतागुरुहृतिर्मलचंद्रसूर्यगोकुलगंगागोमतीसरस्वतीसमुद्राः शिवलिंगानां दर्शनं भूमिलाभः
कै समुद्र नरणाग्रह जपहोमवह्निपूजनं हंसचक्रवाकमयूरसारसदर्शनं रथारोहणं कन्याछत्ररथदीपप्रासादगजवृषभमा
ल्यसमुद्रसर्पकुलहृदपर्वतपवित्रामंमांसतरंगसुरासवस्त्रीदर्शनं नदीतरणं काशागमनं ग्रहनक्षत्रदर्शनं हर्म्यप्रासादशि
खरगजाश्ववृषभतरुपर्वतशिखरारोहणं विमानगमनलाभः देवीदर्शनानि मदिरापानं मांसभक्षणं पुरीषानुलेपनं रक्ता
भिषेकरत्नाभरणादिदर्शनानि अथाशुभसूचकानि चाण्डालकलभकाकसर्पगर्दभमंगलद्रव्यतैलाभ्यक्तनरनग्नमुण्डकुब
दर्कटकनरुतलरहितप्रासाददर्शने रोगदं तत्र प्रायश्चित्तं नृसिंहमंत्रं पठित्वा दुःस्वप्नदोषान्निहितं पुनर्नृसिंहमंत्रं पठि
अष्टोत्तरसहस्रवारः त्वा स्वाहा इत्यष्टोत्तरशतं हुतैर्जुहुयात् अथवा पंचमे वा स्वमंत्रेणाव होमः कार्यः नृसिंहमंत्रश्चैकादशः स च श्रौं इति
अस्वप्नमंत्रस्तु खोपास्व मूलविद्यायाः अथ स्वप्ननिवेदनं तत्र गुरुचरणारविंदयुगलं प्रणम्य पुष्पदत्तः स्वप्नं तस्मै निवेद
येत गुरोरप्यत्र न प्रकाशयेत अथ सिद्धिचिह्नानि चित्तप्रसादोगमनात्तु खोप्यास्यमूलविद्यायाः अथ स्वप्ननिवेदनं त

रक्तसमुद्रः
रुधिरसमुद्रः

दत्रौं

त्रगुरुचरणारविंदयुगलं प्रणम्य पुष्पहस्तः स्वमंत्रं तस्मै निवेदयेत् गुरोरन्यत्र न प्रकाशयेत् अथ सिद्धिविज्ञानं चित्तप्रसादो
मनस्तुष्टिः स्वल्पाशनं निद्राजयः जपे प्रीतिः दर्शनाकस्मात् इति हर्षोत्तरितेषु अंतर्देहमिश्राहूमध्ये वाद्यनानागीतश्रवणं कर्पूरादिसुगंधिपरि
मलाघ्राणं चंद्रार्ककिरणाकाशालोकनानि एवं कृते यदि न सिद्ध्यति चेत् द्वित्रिर्वा पुनः पुनः कुर्यात् अथ मंत्रसिद्धेरन्यः पर्यायः तत्र
कुलप्रकाशतंत्रे अथवान्यप्रकारेण पुरश्चरणमुच्यते ग्रहणेऽर्कस्य चेंदोर्वा शुचिः पूर्वमुपोषितः नद्यां समुद्रगामिन्यां नाभिमात्रे
स्थितः स्पर्शादिमुक्तिपर्यंतं जपेन्मंत्रं समाहितः तावत्कालं जपित्वा ततो होमादिकं चरेत् अयमर्थः तत्र सूर्यग्रहणे
पूर्वदिनमुपोषितः चंद्रग्रहणे तद्दिन एवोपोषितो ग्रहणं दृष्ट्वा स्नानं विधायाद्यामुके मासि अमुकराशिगते सूर्ये अमुकपक्षे अ
मुकतिथौ अमुकतीर्थे सूर्यग्रहणे चंद्रग्रहणे वा अमुकगोत्रो मुकशर्मेत्यादि अमुकमंत्रसिद्धिकामः मुकग्रहणस्पर्शसमय
मारभ्य विमुक्तिपर्यंतममुकमंत्रजपमहं करिष्ये इति संकल्प्य कृत्वा विमुक्तिपर्यंतं जपेत् ग्रहणकालीनजपदशांशहोम
करिष्ये इति होमसंकल्पं होमाद्यं प्रागुक्तवज्जपः कार्यः अपरस्तु मंत्रसिद्धिपर्यायः तत्रैव कुंभसंभवः कृष्णाष्टमीसमा
रभ्य यावत्कृष्णचतुर्दशि देवस्यालये जपेन्मंत्रमयुतानां चतुष्टयं दशांशं होमयेत्तस्य स्वार्थमभिषेचयेत् ततः सिद्धो भ
वेन्मंत्र इति अयमर्थः तत्राद्येत्यादि अमुकमंत्रसिद्धिकामः कृष्णाष्टमीमारभ्य तच्चतुर्दशीपर्यंतं तन्ममुकमंत्रस्यायुतच
तुष्टयजपं तद्दशांशहोमादिसहितं पुरश्चरणं जपमहं करिष्यामि इति संकल्प्य विधायायुतचतुष्टयजपं समाप्य विभज्य चतुर्द
शांतरसमसंख्याधिकसहस्रपंचकं जपित्वा तद्दशांशहोमादिकं कुर्यात् इति अथ प्रकारांतु कालांतरे मंत्री [illegible] जपेन्मंत्रं
मातृकाक्षरसंपुटं अनुलोमविलोमेन मंत्रसिद्धिः प्रजायते त्रिपञ्चाशदक्षरसंयुक्तमातृकाक्षरसंपुटं क्रमोत्क्रमामा
तृकाख्यामासान्सिद्धो भवेन्मनुः मातृकाजपमात्रेण मंत्राणां कोटिकोटयः सिद्धास्युर्नवसंदेहो यस्मात्सर्वं तदुद्भवमिति

न् दर्पणं चामरं छत्रं तालवृंतं च पादुके यथायथं तत्संस्थाप्य संस्कुर्याद्द्रव्याणि चात्मवान् उत्तरतंत्रे पुष्पनैवेद्यगंधादिद्रव्यं फडि
ति मंत्रकैः नाराचमुद्रया दृष्ट्या समयाच विलोकयेत् यदात्मनाप्यविज्ञातं समस्तद्रव्यादिभूषणं अस्पृश्यस्पर्शनेनापि यद्वान्याया
जितं च वा तथा निर्माल्यसंस्पृष्टं कीटाद्यैर्दूषितं च यत् तत्सर्वं नाशमायाति नैवेद्याद्यवलोकनात् ततो रमिति मंत्रेण शिखं।
डीयस्य संस्पृशेत् मलमूत्रभक्षोवापि निष्क्रमात्सर्वदः पतंगकेशकीटादिद्रव्यास्थ्याद्यसंहते वसामज्जादिसंभूते
यत्ताद्दग्ध्रपयोजने अज्ञानतः पतत्सर्वे दोषः स्पर्शादि न दृश्यति नारसिंहेन मंत्रेण देवतीर्थेन संस्पृशेत् पानीयं चदरस्याद्यौ

स्वगृह्ये च यानकः वामेन पाणिना धृत्वा वामपार्श्वस्थितेन तदा पात्रमाधारमंत्रेण संस्कुर्वन्संस्पृशेज्जले यदस्नानादयेयादिसंस
श्रिरिहसंगता यद्यस्मद्रूषणं यायेनैघेवास्नानतो भवेत् जलाशयपावस्पर्शाज्जनस्नाना च संगते दूषणानि विविनश्यंति तानि वैदे
वपूजने नृसिंहमंत्रपका वरः सततम्पुकरणो हेयः आधारमंत्रकस संज्ञायतरं विद्वेंद्वे हाईपरियोजितमितिस्वयमुक्तः संज्ञायत।
रेनामायत्नारंमिमर्घ्यः उत्तरेवे कृतांजलिपुटो भूत्वा वामदक्षिणपार्श्वयोः नरस्यागुरुं गणेशानं गुरून् इष्टदेवतां स्तगंधपुष्पा
णिपादाय चंदना कोलिमंत्रवित् मर्दयित्वा करौ सम्यक् कस्तरभीकुमसाधकः वामहस्ते समादाय निर्वृन्ध्याय यतनस्मनः वस्त्र
मारोनमंत्रेण वैशाम्याहरनस्पजेत् सजेमाराचमुद्रया हिपेत्तुतनः पृष्ठमंत्रीनाराचमुद्रयेति नैयानरवचनात् कालिकापुराणे
ऊस्रमंविस्रमंत्रेण स्वांगुलग्रेण साधकः विमर्दनार्घ्यं गृह्णीयात्करणोधनकर्मणि निर्मुंछ्यारोमवीजेन निजप्राणेन नक्तनः या।
साटेनपरिमार्गो दिशिणे शम्या विशेषतः एवं कृते न करयोर्विशुद्धिरतुला भवेत् अंगुल्याणि शुद्धानि पुष्पाणां ग्रहणाद्दे
त् तलहस्तं समर्दनान्विशुद्धमनिजायते निर्मुञ्छनात्माणि [illegible] ग्राणनासाग्रमनमे नीर्याभिः समायांति नासिकाग्रं करेस्पृक्ति
उपांत्यासाग्निवंदेरणा रंजितः स्वमसंयुतः रुद्रांतोपरि संस्पृष्टो मंत्रोयं वैस्रवः स्मृतः ज्ञातादिर्वी सदेवांतवर्णेना पिवसंदृतः पंचभु
तृशिखा विंदुयुक्त पासादउथते उपांत्यो हकारः ध्यदकारस्योपांत्यत्वेन मातृकायाः पंचाशदक्षरत्वेन द्वितीयसकारस्याग्रह।
णात्वात् अग्नी रेफः वेदः सकारः स्वनोविंदुः समुद्रान्तपेकारः एतेनैभेरबाबागभवबीजमुक्तं यांतारिर्हकारः वासुदेव औकारः
पंचभृशिखा ईवेदः विंदुरनुस्वारः एतेन पासादवीजं सिद्धं रोमबीजे रोमग्रमीति मंत्रः प्रयोगे वहृपते नृसिंहकल्पे कररुद्धिं स।
मासाच ऊर्ध्वं नालस्यंतनः ऊं ह्रौं हूं फूल मंत्रेण दिग्बंधमपि [illegible] तेन संजनितेनतेजो रक्षां कुर्यात्समंततः अस्त्रमंत्रेणेति
करशुध्यादिषुविषु संबंधः पाणिविशोधयेदस्त्रमंत्रेण मंत्रवित्तमः इति दक्षिणामूर्तिकल्पवचनात् अस्त्रमेव स्फुटनन्त्रे [illegible] मनःत

वि
धा १८
३४०
340

तके वलं फट्कारः अस्त्रापफट्प्रोक्ताभ्रामयेद्दक्षिणांकरमिति ॐ भंसंभववचनात् अत्र पञ्चपञ्चमास्त्रादिपदेनाभिख्यातेन यत्नतदेग
भूतास्त्रादिमंत्राकृत्याः तत्र फट्कारमंत्रेऽकवचनात् नचैवं पार्श्वपार्श्वतु तेदशादेवसहृदयाणनोपादानप्रसंगमेवदानप्रसंगः
निराकांक्षत्वात् नचमंत्रोद्धारेऽतिप्रसंगः अंगमंत्रयाहृकाभावात् मंत्रोद्धारानन्तरमेवांगमंत्रोद्धारात् क्वचिदस्त्रपदेनकवित्फ
षडेनोद्धाराचेतिदिग्बंधस्वरूपमुक्तं प्रयोगसारे आच्छाद्यदिक्ततर्जन्याज्येष्ठाग्रसवलितायदिति उत्तरतंत्रे प्राकारचिंतयेवके
कुन्तालेनसमुद्रयः स्वमुद्रयाग्निप्राकारमुद्रया सालमेवस्थाने सनत्कुमारेगोपालकल्पे स्वात्मासनेनोपविश्यप्राणायामं
विधायैवे भूतशुद्धिंततः कृत्वान्यासंकुर्यादनेनरे न्यासेमातृकायाः उत्तरतंत्रे भूतशुद्धिंततः कुर्यात्प्राणायामपुरःसरं
पादतोजानुपर्यन्तंचतुरस्रंसवज्रकं लंयुतंपीतवर्णंचभुवः स्थानंप्रचिंतयेत् जान्वोरानाभिवृत्ताईनिभंपद्मेनलांछितं।
शुक्लवीजंस्ववीजेनयुक्तंध्यायेदयोस्थले नाभितः कंठपर्यन्तं त्रिकोणंरक्तवर्णकं स्वस्तिकाभंस्ववीजेनयुक्तंवन्हेस्तुमंडलं
षट्कोणंविंदुभिः षड्भिर्युक्तंवीजेनचिंतयेत् भ्रूमध्यात् ब्रह्मरंध्रांतंवर्तुलंध्वजलांछितं धूम्रवर्णंस्ववीजेनयुक्तंध्यायेन्नभस्य
लं इतिध्यात्वातुभूतानिस्वकीयेदेशकोत्तमः धर्मकंदसमुद्भूतं ज्ञाननालंसुशोभनं ऐश्वर्याष्टदलंचैवपरंवैराग्यकर्णिकं
स्त्रीयहृत्कमलंध्यायेत्प्राणेनप्रकाशितं क्लिन्नानलकर्णिकासंस्थंप्रदीपकलिकानिभं सुषुम्नावर्त्मनात्मानंपरमात्मनियो
जयेत् योगयुक्तेनविधिनासोहंमंत्रेणसाधकः तेनैवसर्वतत्वानिविलीनानिविचिंतयेत् ततः शुष्कंतिभयप्रेमिसादिग्रागेवो
क्तं ततः संशोषयेद्देहं पूरकादिक्रमेणवै विधायप्राणसंरोधंवायुवीजेनवायुना वह्निवीजेनतेनैवसंदहेत्सकलांतनुं भ।
स्मतद्वामनमार्गेणनिर्गतंचिंतयेत्सुधीः ततोवमितिवीजेनप्लावयेत्सकलांतनुं संजातंसकलेदेहेदेवतोपासनक्षमे आ।
त्मलीनानितत्वानिस्वस्थानेप्रापयेत्ततः आत्मानंहृदयांभोजमानयेत्परमात्मनः हंसमंत्रेणविधिवत्तेजोरूपंकलेवरं देव

नारायणेऽयोऽहमस्मि इति भावयेत् इति अत्र केचित्संयोज्य जीवमथ सुषुम्णामध्यनाडीमार्गेण पुष्कराणि विभिद्य शिवे सम्मेल्ये
हंसेन देहमसौ रुद्धयोगमेवेति योगिनीतंत्रवचनात् सोऽहंमंत्रेणात्मानमायांतं नादांते सिद्धिभाविता ध्यात्वैवं ब्रह्मरंध्राच्च हृदि जी
वकलां न्यसेदिति वशिष्ठसंहितावचनाच्च हंसमंत्रेणात्मनो वस्थापनं सोऽहंमंत्रेण पुनरानयनं वदेति यथागुरूपदेशमत्रैवैवेय
मिति अत्र वायुवीजादिनेत्यंतः षष्ठ्यादिसंख्यामाहुः तत्र प्रमाणं चिंत्यं वस्तुतस्तु तत्तत्क्रमे भावनावधि रेचनयो वायुवी
जादीनां षट्तुकं कामायनीसंहितायां ततोऽमृतात्मकं देहं वायुवीजेन वायुना वायुमतोत्सं शोषयित्वा नाशं दहनयान्येन दि
ति तथा योगिनीतंत्रे दहेत्रेवह्निवीजेन पापदेहमिति भावयेत् ऊँभसंभवः भूतशुद्धिविहीनेन कृतास्तज्जाभिचारवत् वि
परीतफलदाः सर्वे तस्मात्तत्पूर्वं यथेति अतएवेयमावश्यकीति केचित्तु श्रीमच्छंकराचार्यचरणैर्योगप्रकरणे योऽकल्पिता।
शिपरमिति वदेति तत्र प्रमवायश्रवणात् श्रीकुलार्णवे आत्मस्थानमत्रेण स्वदेहशुद्धिपंचमी यावन्न कुरुते देवतावदे।
वाच्चैनेनहि सत्तानभूतसंशुद्धिप्राणायामादिभिः प्रिये षडंगादिविन्यासैर्देहशुद्धिरितीरितेति उत्तरतंत्रे भूतशुद्धिवि।
धायेत्तनीवेस्थाप्य परमं तु प्राणप्रतिष्ठाविधानेन भागेवोक्ते त्रैलोक्यमोहनतंत्रे प्राणायामेन ततः कृत्वा मातृकान्यासमा
चरेदिति प्राणायामलक्षणं तु आगेवाभिहितं अतः परं सोपानमंत्रस्य ऋष्यादिकरषडंगन्यासान्कृत्वा योगपीठन्यासं कुर्यात्।
तु तत्र ऋष्यादिपदार्थानां न्यासासंभवात् तावत्कपदानामेव कार्यः तथा दक्षिणामूर्तिसंहितायां ऋषिस्तु दक्षिणामूर्तिरद्रे।
शिरस्मिन्न्यसेत् पंक्तिश्छंदस्तु विज्ञेयं मुखे विन्यसेत्पार्वतीति देवता हृदये बाला विन्यसेत्परमेश्वरीति न्यासप्रकारस्तु योगिनीतंत्रे
ऋष्यादीन्विन्यसेद्देवि चतुर्थीहृदयान्वितानिति ऋषये नमः छंदसे नमः इत्यादि प्रपंचसारे ऋषिश्छन्दो देवतादिः स्वरसोवर्णाध्यक्षे।
दोनरन्वा इत्सना यत्न स्यात् क्रियावर्गेन व्याप्तयामसदैव हृदि प्रतिष्ठामंत्रदेवताद्याः ऋष्यादिपदार्थास्तु उत्तरतंत्रे ऋषिवर्णादिलक्षणं।

वि
या १९

२४१

न्यर्थो यातः सा सार्थकलया सिवर्णादिक्लविन्नानमनन्तस्याप्यकं वसः अनयोरूपसंपन्नो स्वविर्गुरूमितीरितः व्हेदीनिधानं
दिक्षार्थं ब्रादिधानन्थर्थको भवेत् क्लेदोवक्ति मनोवर्णान् हृद्योनिखाप्रदानतः श्रीरार्थकारदादीनि संपन्नेदेवतापदे साधका
यनमेभावेयदानीनिजगर्धेन इति तन्त्रार्णवे षडंगन्यासमाचरेत् हृदयं च शिरो देविशिखा च कवचं ततः नेत्रमस्त्रं न्यसेत्तु उ
तेन मः स्वाहा क्रमेणतु वषट्हूंवौषट्नेत्रफडेभिः सदृशिन्यसेत् प्रपंचसारे हृदयशिरसोः शिखायां कवचाख्याहेषुसद्व
तयोमि नन्याच वषट्हूंवौषट्फरेभिरंगविधिः नमानमः पदेन आहृत्यास्वाहाकारेण शमस्याया हृदयायनमः प्रोक्तं शि
रसे वक्ति वलभा शिखायै वडिन्नकं वचायहूमीरितं नेत्रायवौषडित्युक्तं अस्त्रायफडितीरितं अयं षडंगन्यासः करन्यासश्चैवका
कार्यः आदौ कृत्वा करन्यासं षडंगेषु ततो न्यसेत् इति नेत्रोक्तवचनात् अत्र केचित्करन्यासेऽङ्गुष्ठाभ्यां नमः तर्जनीभ्यां नमः।
त्यादिन्यासान्वदंति न च प्रमाणं चिंत्यं वस्तुतः तन्त्रार्णवादिनानाजंत्रदर्शनात्मन्त्रान्न्यसेदिति मितिभाति यथाशारदातिल
के अंगुष्ठादिस्वंगुलीषु न्यसेदंगैः सजातिभिः अंगुलितलयोर्न्यसेति सजातिभिर्नमः स्वाहेत्यादिसहितैः अंगैस्तन्मन्त्रोक्तैः ते
न हृदयाय नमः शिरसे स्वाहेत्यादिभिः इत्यर्थः जातिलक्षणं तु कारणागमे नमः स्वाहा वषट्हूं च वौषट्फट्कारपंचक जातिष
ड्मिदं प्रोक्तं हृदयाद्यंगसंगतमिति नारदपंचरात्रेपि अंगुष्ठाग्रादीनि योजयेत् कनिष्ठाद्यासु चततो हृदयादिक्रमेणन्विति ह
दयादिक्रमेण हृदयायनमः शिरसे स्वाहेत्यादिक्रमेणेत्यर्थः योगिनीतंत्रे उच्चरेन्मन्त्रं सर्वसारं विदुसमन्वितं स्वद्यायहृदयाये
ति नमोप्युक्तं कनीयसि ईकारं प्रणवादेवि विंदुविंबसमायुतं स्वद्यायनतोवाक्यं शिरसे नदनेतरे स्वाहाप्युक्तं प्रविन्यसेत्तर्जन्या
नामिकांगुलौ ऊकारं प्रणवादेविन्नर्जन्यानामिकांगुलौ ऊकारं प्रणवादेवि विंदुलांछितमस्तकं श्रीवत्सायततो वाक्यं शिखायै
वततः परं वषडंतं प्रविन्यसेन्मध्यमांगुलौ मात्राद्वादशकानां तु षष्ठं द्रुपाशाघसंयुताः कवचाय हुमित्येनं तन्मध्यमे न्यसेन्मध्यनाम।

विमसेनल।
याः अकारादिविसर्गान्तेयोजयेन्मूलवाक्यं अथवा चैषांमध्ये चोपलक्षणान्तरंतरं फट्कारसमायुक्तं ॥
योरिति मर्वरुकः १८ इति श्रीविद्यार्णवे अष्टादशश्वासः १८ नारदपंचरात्रे मंत्राभिमृष्टयोः पाण्योः पल्लवेगानि विन्यसेत् सू
लादिषु अथषडंगन्यासे व्यापकत्वेन नारद ग्रंथेत्राचारेन्यासं मन्त्रांगुलिसमाश्रयं अंगुष्ठविषयन्यासं तर्जन्या शिरसे वहिः षडंगमंत्राणां वा
सनानु प्रथमंतेचतुर्हिगंमंचहृन्मंते नत्वा प्रणम्य उक्तो हि हृदाशोक्रियते पुना नमस्क्रियाचतुर्हिगमाशु चैवंस्यः शिरोमंते स्वा
हयावनतः स्वस्वविषयाहरणंमंते ततः शिरेणनाशम्यक्तौक्तौचैव विषयाहति शिखामध्ये वषट् चैवं शिरोयामंतन्मंतः प्रोक्त
कवचस्याद्वहृदोनमुनेकवचंपदं हुंमंत्रः कवचेनास्यमहस्यान्यस्येतेततः शरीरंमंत्रिणासंवृतंहि हि स्वदर्शने वौषट्वाच्येनचक्र
शिरेनस्यान्नमहः स्मरते नेत्रयस्यहेपवावांनन्मंत्रस्यखेनार्थकः फट्कारेण लेनचानिष्टमाशिष्यपरिपालयेत गोनमीये इत्यभा
नोहृदयान्मानेहृदयेस्याविदात्मनः क्रियतेनमस्कारेनतत्मंत्रेणततः परं सर्वत्ताद्विगुणोपेतंसंविद्रूपेचिदात्मनि क्रियतेविषया
ः शिरोमंत्रेणधीमतः हविरोपविद्यामनयनाभावनाहठः क्रियतेनिजदेहस्य शिखामंत्रेणसादरं मंत्रात्मकस्यदेहस्यमंत्र
वाच्येनतेजसा सर्वतोवर्ममंत्रेणक्रियतेनमसंवृति पदत्वानिपरेत्वानेसंविद्रूपेपरात्मनि हृदयादिमयंतेनः स्यादेननेत्रसंज्ञकं
अध्यात्मिकादिरूपंयत्साधकस्यविनाशयेत् अविद्यामस्त्रजातंनतंपरंधामसमीरितं इति अत्रकेचित्षडंगन्यासेननेत्रत्रयायवौ
षडिति प्रयोगंवदन्ति तत्रप्रमाणंचिंत्यं वस्तुतस्तुहृदयशिरःशिखाकवचास्त्रैःसहवक्तुंषड्भिः इतिमंत्रंचसारवचनात्
हृदयंचशिरोदेविशिखाचाकवचंततः नेत्रमंत्रंमन्सेनतुजभितित्वानांविवचनाच्चमध्येकवचंन्यसेत्दर्शनात् नेत्रायेतिनवं अ
त्रएवंपवित्रमन्त्रलाद्वकमलंगोपनंकिमर्थं केवलःशंकरंध्यानेनमन्त्रकंपश्चिमामार्गे अजितंवामृतानाथारसंस्थितप्रोद्धरेततः
धेयोकेवलंदत्वानेत्रायअस्त्रंपटः अत्रपवपवित्रमन्त्रलाछकमले) नदर्नेवौषडिमकंनेत्रमंत्रोप्ययंस्मरतः इतिनारदपंचरात्रेस्य

ऽप्युक्तः अथवा द्विनेत्रदेवतापक्षे नेत्राभ्यामित्यादि पठेत् तत्प्रदेशे पार्वति । प्रपंचसारे संदीप्तितो मत्तमिमं प्रतिजन्मसिध्वन्नुष्ठ्योति
जेनवपुषैव स्वयोगपीठं अंसोरुयुग्मपदमाननाभिमूलपार्श्वहृदये विहितगात्रसमस्तचलेच मध्येनंतादयोऽपि संज्ञानान्ते ।
तिकैर्यजेन्मंत्री पीठात्मं मंत्रपश्चिममिति आननवामपार्श्वनाभिमूलदक्षपार्श्वेरिति पद्मपादाचार्यः ईशानशिवः
आधाराद्यानायजेच्छक्तिः हृदयेंसे च दक्षिणे धर्मज्ञानं च सव्यांसे ऊरौ वामांसयोरपि वैराग्यसंगमैश्वर्यमिति अनंतादये रि
त्यादिपदेन पद्मसूर्यसोमवह्निसत्वरजस्तमआत्मांतरात्मपरमात्मज्ञानात्मज्ञानतत्वमायातत्वकलातत्वविद्यातत्वपरतत्वा ।
त्संग्रहणं उत्तरतंत्रे मूलाधारे तु मंडूकं हृदि कालाग्निसंज्ञकं स्वाधिष्ठाने यजाम्भोजे प्रकृतिं मूलपूर्विकां आधारशक्तिं हृदये ।
विन्यस्य साधको नमः कूर्मानंतौ वराहं च धरणीं च सुधार्णवौ रत्नद्वीपं च विन्यस्य तत्र स्वर्णमहीधरः तत्रैव नंदनोद्यानं तन्मध्ये
मणिमण्डपं कोटिसूर्यप्रभं हेमप्राकारपरिवेष्टितं रत्नमण्डपमध्यस्थां वेदिकां हेमनिर्मितां विन्यस्य तस्य मध्यस्थं रत्नसिंहा ।
सनं शुभं शरीरे स्वस्य धर्माद्यैः पीठकल्पमाचरेत् दक्षिणांसे न्यसेद्धर्मज्ञानं वामांसके न्यसेत् वामोरुमूले वैराग्यमैश्वर्यं द
क्षिणे न्यसेत् अवैवमेव वामपार्श्वे च ज्ञानं नाभिमंडले अवैराग्यं दक्षपार्श्वे चानैश्वर्यं न्यसेत्क्रमात् धर्मादीन्पीठपादांश्च ।
गात्राण्यन्यानि कल्पयेत् हृदयेनंतं न्यसेत्तस्मिन्मध्ये तत्कर्णिकोपरि अर्कं च केसरे सोमं पत्रे वह्निं ततो न्यसेत् तेषां कलास्तु
तत्तन्मण्डले तत्र तत्रैव तत्तत्तन्मण्डलन्यासमथ पवेत्सर्वः वैष्णवे रुद्रे वकारार्थवाचकः न्यसेद्गुणत्रयं पश्चात्सत्वादिकमतः
परं आत्मांतरात्मपरमात्मविज्ञानात्मकान्न्यसेत् ज्ञानमायाकलाविद्यापरतत्वानि च क्रमात् पीठमंत्रं प्रविन्यस्येत्ततो देशिकः ।
सतमः देहात्मके ततः पीठे ध्यायेदिष्टां च देवतां अत्र पीठात्मपश्चिममिति पीठमंत्रमनंतरमिति पीठमंत्रं प्रविन्यसेदिति च प्रपं
चसारशारदातिलकादिग्रंथवचनैः पीठशक्तिन्यासो नास्तीति प्रतीयते अथ मूलमंत्रन्यासः तत्र श्रीरुद्रयामले प्राणायाममंत्र ।

यं कृत्वा मूलमन्त्रेण साधकः विन्यसेन्नरशिखं हे देवतानि यथाविधिः करांगन्यासमुख्योक्तन्याससान्मात्समाचरेत् ततश्च ।
स्योदितान्मन्त्रीतततो मुद्राः प्रदर्शयेत् नारदपंचरात्रे एवं न्यासं पुरा कृत्वा करयोर्विरहेततः मूलमन्त्रादि सर्वस्य न्यस्य मन्त्रगणं ।
स्पच यस्य मन्त्रस्य ये न्यासः कर्त्तव्या सिद्धिमिच्छता: ततो मन्त्र ३ष्टैर्वैः प्रोक्तं मातृकायाः सबिन्दुभिः विन्यसेन्मन्त्रवित्सम्यकृण्वात्वहं ।
हेनवर्त्मना षडङ्गयोगं करे न्यासोक्ततो मुद्राः प्रदर्शयेत् श्रीकुलार्णवे आगमोक्तेन मार्गेण न्यासान्विन्यकर्णोनयः देवताभा
वमाप्नोति मन्त्रसिद्धिः प्रजायते योन्यासकवचच्छन्नो मन्त्रं जपति तं प्रिये दृष्ट्वा विघ्नाः पलायंते सिंहं दृष्ट्वा यथा गजाः अकृत्वा
न्यासयानं यो मूढात्मा जपतेनयं विघ्नैः सबाध्यते नूनं व्याघ्रैर्मृगशिशुर्यथाः कालिकापुराणे न्यसानां प्रचुरत्वे हि फलानाम् ।
विभूतिना उक्तन्यासो न हित्वा स्वधिकं न समाचरेत् उत्तरतन्त्रे वाग्भवसहितीयेन कामराजेन भैरव मुद्राया बंधनं कार्यं मूल
मन्त्रेण दक्षिणे परित्यागतः मुद्राया स्वात्मबीजेन वाचरेत् प्रोतादिं च रविन्दुभ्यां षष्ठस्वरसमन्वितं नारा बीजमिति प्रोक्तमिति
प्रातादि र्हकारः अन्यत्रागमे तथा ध्यानं ऊर्ध्वान्ततो मन्त्रीतत्रत्कलोक्तवर्णना ध्यानयात्मेष्टदेवस्य वेदनं मनसामतं तदेव
द्विविधं प्रोक्तं सगुणं निर्गुणं तथा आत्मनो हृदयाम्भोजे कर्णिकाकेसरोज्वले प्रफुल्ले सोमसूर्याग्निमण्डलेन विराजिते ह्री
येष्टदेवताध्याये दागमावोधिता एवं यद्वेधनं तद्धि सगुणं ध्यानमुच्यते यज्जीवब्रह्मणोरैक्यं सोऽहंस्यादिति वेदनं तदेव नि
र्गुणं ध्यानमिति ब्रह्मविदो विदुः ध्यानेन तत्वालोक्य भवद्यते योगिनीतन्त्रे अथान्तर्यजनं वक्ष्ये यथावदवधारयः वामनाडी
समाकृष्य किंचिदाकुंचयेद्ध्रुवं अन्तर्यागमिदं देवि कथितं गुरुभाषितं फेत्कारिणीतन्त्रे आराध्य मनसा भक्त्या वाह्यपूजामथा
चरेत् गौतमीये पूजां च मानसीं कृत्वा ततो र्घस्थापनं चरेत् उत्तरतन्त्रे ध्यानात्मान्तर्यजेत्पीठन्यासमार्गेण मन्त्रवित् तस्मिन्पी ।
ठे स्थितामिष्टदेवतां मुक्तिविग्रहं ध्यानात्यजेत्संदर्भोक्तैर्मानसैर्भोजनादिभिः भोजनावसरे वान्तर्वैश्वदेवं समाचरेत् मूलाधारा

वि
या ९९

२४२

343

स्मरेत्क्षणं कुण्डल्यग्निसमुद्भवे आत्मानं तात्त्वपरमात्मानात्मकं तत्त्वरूपकं धर्माधर्महविर्ज्वलिते तत्र मूलमंत्रपुरःसरं अमुं जुहोमि
स्वाहेति प्रमेके जुहुयात्ततः अहंताः सत्त्वपैशून्यकामक्रोधादिकं हवि मनएव स्रुवः प्रोक्तः सुषुम्णा स्रुगुदीरिता
तदं तेन तन्मयो भूत्वा यथाशक्ति जपेन्मंत्रं तज्जपं सर्वं संपन्नं देवतायै समर्पयेत् जपनिवेदनमंत्रस्तु गुह्यातीति प्रागेवो
क्तः लक्षसागरे स्वयं जपं यथाशक्ति कृत्वा देव्यै समर्पयेत् गुरुं प्रणम्य विधिवत्पूजां च क्रमं समुपहरेत् सिद्धेश्वरीतंत्रे प्र।
णम्य श्रीगुरुं भक्त्या साधकः कुंकुमादिभिः स्वर्णादिरचिते पीठे पूजां च क्रमं समुपहरेत् संस्थाप्य पुरतो देव्या मेपीठे सुरेश्व
रि दद्यात्पुष्पांजलिं तत्र मूलमंत्रेण साधकः अत्र पूजा च क्रमविधिस्तु प्रागेव प्रदर्शितः अथ कादिमतारीत्या पूजायंत्रप्र।
तिष्ठाविधिः तत्र श्रीतंत्रराजे चक्रे देवां तथा शिष्ये प्रतिष्ठा त्रिविधोच्यते सा च तत्त्वविदा कार्या संप्रदायानुरोधिना चक्रे
पूजा चक्रे देवानां देवीमूर्तौ देवीस्वपलक्षणे तत्त्वविदा चेद्गृहस्थं धनाढ्यं महाष्टम्यादिपि च तत्त्वोदयकालतत्कुलविदा
अथवा आत्मज्ञानविदाः संप्रदायानुरोधिना गुरुपारंपर्यक्रमवेत्तत्त्वगुरुमण्डलपूजकत्वनित्यनिमित्तकोपासिति
रतत्वविशिष्टेनेत्यर्थः तथा स्थिरे शुभग्रहोपेतेनुकूले गुणशालिनि मुहूर्ते कारयेद्दिवा तत्पूर्णिमायां वा शुभे दिने स्थिरे।
स्थिरलग्ने दुष्टग्रहाक्रांतस्य निषेधत्वादाह शुभग्रहोपेते इति तथाप्येतादृशगुणविशिष्टस्याष्टमचतुर्थद्वादशस्थत्वे प्रतिकू।
लतादोषदुष्टत्वादाह अनुकूलेति तथापि निर्दुष्टमुहूर्तस्य आप्यवाह गुणशालिनीति तथा च स्व लग्ने केपि कगुणेत्यर्थः
मुहूर्ते कारयेद्दिवेति तथा तोयाद्यैर्दुग्धैः प्रथमं नालिकेराम्भसा ततः अभिषिच्याथ तत्तोयेन क्षालितं नातिशोषये आवाहयेच्च
तल्लग्ने चक्रे संस्थाप्य पूजयेत् निःश्वासं त्यक्त्वा कालोत्पवि यथाश्रय्यंताः क्रमात् स्पृशन्नुपेक्ष्य राग्रेण श्रीचक्रं पूजयेदपि एवं दि
नत्रयं कृत्वा ततो नित्यक्रमं भजेत् गंधपुष्पैर्नैवेद्यैः धूपैर्दीपैर्नैवेद्यतर्पणैः विराजं पूजयेद्देवी योगिनीयोगिभिः समं एवं देवी प्रति

ष्टार्थक्रमः सात्त्विकप्रकारस्करति लक्ष्मसागरे श्रीदीक्षेवेदादितैर्मन्त्रैः पुनारणमाचरेत् यावन्निर्मितवक्त्राणां मूर्त्तीनां च विशेष।
नः अस्यनारणप्रयोगस्तत्प्रयोगे वक्ष्यते अथ पात्रासादनं नमस्कारस्तत्प्रागेव प्रदर्शितः शारदातिलके आत्मानं यागवस्तु ति
मंडलं मोक्षयेद्गुरुः प्रोक्षणीपात्रतोयेन मन्त्रं नात्मानं पि क्रमात् श्रीकुलार्णवे पूजाद्रव्याणि संप्रोक्ष्य मूलास्त्राभ्यां विधानवित् द
र्शयेद्धेनुमुद्रां च वस्त्रशुद्धिः प्रकीर्तिताः रुद्रयामले अप्रोक्षितैर्नैवद्याद्याः प्रोक्षितैः समर्चयेत् शारदातिलके न्यासक्रमेणादे
हे स्वधर्मान्न्यसेत्ततः पुष्पाद्यैः पीठमन्त्रेण तस्मिन्नर्चेत् देवताः पंचकृत्वः पुनः कुर्यात् पुष्पाञ्जलिमन्त्रधीः उत्तमांगे हृदाधारे पादे
सर्वांगके क्रमात् विन्यसेद् गंधाद्यैरुपचारैः समर्चयेत् गुरूपदिष्टविधिना शोधयेच्चाप्ययेत् सर्वमेतन्मयूनीतः प्रोक्षण
द्भिः समाहिता धर्मादीनां स्वपलक्षणं तेन मण्डूकादिपीठमन्त्रेण योगपीठदेवता योगपीठन्यासस्थाने पूजयेत्। स्वयं शे
षं जपादिकं उत्तरतंत्रे मूलाधारगते कुण्डे पूर्वीके चतुरस्रके सर्वतत्त्वरूपा मंत्री धर्माधर्मादिकं हविः प्रकाशोदये अग्नौ वास्य
तेरेकाग्नौ मन्त्रिकार्येब्रवीमि निति विद्याग्निमंडले दण्डमूले कुंडलिरूपिणि ब्रह्मकुंडे कुंडे तु घण्टासूर्यमण्डलवर्त्तिनि अग्नौ स्वस्व
तरूपो विकल्पः वासनेधनसंदीप्ते पवमानसमीरणैः संधुक्षिते मन्त्रकुण्डे पादतलगते निरञ्जने तरे मूलविद्यां समुच्चार्य कुर्यात्तेन
मातृतो लतः मंत्ररूपं पठन् श्लोकं परं ग्रहण तरेद् यात् धर्माधर्म हवि दीप्ते आत्मा अग्नौ मनसा स्रुचा सुषुम्णावर्त्मना नित्यमक्ष
वृत्तीर्जुहोम्यहं स्वाहान्तेनाहुतिं दद्यात् ततो मूलेन विंशतिः मूलविद्यां समुच्चार्य श्लोकमन्त्रं पठन् प्रकाशामर्शहस्ताभ्यां मव
लेयोन्मनीस्रुचं धर्माधर्मकलास्नेहं पूर्णं वह्नौ जुहोम्यहं स्वाहान्तेनाहुतिं दत्वा प्राणायामनिरोधनः निरस्तनिखिलोपाधिमात्मानं।
चिन्मयं स्मरेत् ज्ञानार्णवे पुण्यपापे हविर्दिवि कृत्वा स्वेहविः प्रिये संकल्पविकल्पधर्माधर्मा द्वविः प्रिये हवनप्रकार
स्तत्प्रयोगे वक्ष्यते मंत्रतंत्रप्रकाशे अष्टोत्तरसहस्रं तत् कृत्वा न्यायागमादरात् जपेत् प्रतिदिनं मंत्रीति अन्तःदेहे यागः पूजाः उत्तर

वि
या ५५
२४४

344

तंत्रे आत्मरक्षां विधायेत्थं यथाशक्ति जपं चरेत् स्वेष्टदेवतयात्मानं भावयन् मनसा मानसः एतेनाष्टोत्तरसहस्रं तत्पाठक्रमं
तथा अर्घोदकेन संप्रोक्ष्य मूलमंत्रेण मंत्रवित् पूजाचक्रं ततस्तत्र पीठ पूजाचक्रं ततस्तत् समाचरेत् देवस्याग्रतः पू
जागृहं पंक्तेस्ततः पुरं महागणपतिः सव्योद्दक्षिणे चंदनादिभिः उत्तरतः उत्तरदिशि तेन देवस्य दक्षिणे ध्वजसमीपस्थमा
पतेः उत्तरत्र तथा वटुकेन । रुद्रयामले सर्वाधो मण्डूकाधारो रुद्रः कालानलो विधुः रक्तां करोतु या नित्यं मे मूलप्रकृति
स्तया ततश्चाधारशक्तिर्या मम रक्तां करोतु सा कूर्मस्तु सततं पायात् अनन्तो रक्षयेत्सदा तस्य मूर्ध्नि स्थितश्चैको वराहः
परिरक्षतु दंतेनस्य स्थिता पृथ्वी पातु नित्यं वसुंधरा समुद्रः सर्वदा पातु सुरत्नैरमृतैर्जलैः रत्नद्वीपश्च मे रक्तां करोतु ।
स्वर्णपर्वतः पातु मां नंदनोद्यानं रक्षतु कल्पपादपः अथ तले यासदा पातु विचित्रा रत्नभूमिका श्रीरत्नमंदिरं पातु सत
तं पातु वेदिका भैरवयामले रक्तवर्णं महाकायं मंडूकं प्रथमं यजेत् तत्कालाग्निरुद्रं च दशबाहुसमन्वितं पंचवक्त्रं
रक्तकृष्णवर्णं दत्तापराङ्गकं ततः हैं मूलप्रकृतिं वंध्रकाभां वराभयां उत्तरतंत्रे अथः पीठस्य रक्ताभामाशांकुश वराभया
न्वहस्तां ते देयं नीलसम्पकयनेद्ादाधारशक्तिकां तस्या उपरि संस्थस्य कूर्मः स्वर्णरुचिरर्द्धः सहस्रशिरसं तत्र शुक्लवर्णं
मलंकृतं नीलवस्त्रं महाकायमनंतं समर्चयेत् पीतांबरधरं तत्र नीलवर्णं सुभूषणं शंखचक्रगदापद्मधारिणं पोत्रि
णं यजेत् श्रीसप्रशुकदहस्तां वराभयवरांशुभां तद्द्वीपरि नीलाभां पातुपीताः समर्चयेत् रत्नद्वीपः नवरत्नमयद्वीपः
उक्तं श्रीतंत्रराजे नवरत्नमयं द्वीपं नवखंडविराजितं पृथ्वीं नीलं च वैडूर्यं विलोमेन नवरत्नमयानि खंडानि मार्ग्गितानि ।
शेषानीमर्थः तंत्रे कुरुकुलपटले पश्चिमं तु प्रागंतं संप्राप्य वर्तते नैनंदनस्तत्कल्पतान् रत्नमंदिरं नवरत्नमयं माणिक्यम
यं च स्वर्णप्राकारवेष्टितं विचित्रमंडपमिति उत्तरतंत्रवचनात् अमृताब्धौ मणिद्वीपे कल्पवृक्षवनोज्ज्वले स्वर्णप्राकारमं ।

वीजं स्मरेन्मातृकामण्डपमिति देवीयामलवचनाच्च वेदिका स्वर्णमयी विचित्रमेरुपं तत्र पूजयेत् स्वर्णवर्णकमित्युत्तर
तंत्रात् उत्तरतंत्रे रत्नसिंहासनं तत्र पूजयेन्मण्डलान्वितं मण्डलान्वितं तत्सूत्राचक्ररूपमण्डलसमन्वितमित्यर्थः तस्मा
द्वेषु यजेत्सम्यग्गणेशादिदिशां तानकं धर्मं वृषतनुं रक्तवर्णमादौ समर्चयेत् सिंहाकारं ततो ज्ञानं श्यामवर्णं समादिनः भूता
कारं च वैराग्यं पीतवर्णं जयेत्ततः कृष्णवर्णं गजाकारमैश्वर्यं संसाधु पूजयेत् अग्न्यादेशं समारभ्य चतुर्दिक्षु समर्चयेत् अध
र्मादींश्च पीठस्य विचित्रगात्रधियाद्युतः वामकेश्वरतंत्रे मध्ये मायां तथा विद्यां पूजयेन्नायकोत्तमः उत्तरतंत्रे तत्त्वाकारं ततो नं
तं पीठमध्ये समर्चयेत् तस्य मूर्ध्नि यजेन्मध्ये सर्वलक्षणसंयुतं आनंदमध्यं संविन्नालमनंतरं प्रकृत्यात्मकपत्राणि वि
कारात्मकं केसरान् तत्वरूपां कर्णिकां च मातृकावर्णविग्रहं लिंगपुराणे तस्य पूर्वदले साक्षादणिमामयमत्तरं लघि
मा दक्षिणे चैव महिमा पश्चिमे तथा प्राप्तिश्चैवोत्तरे पत्रे प्राकाम्यं पावकस्य तु ईशित्वं नैरृते पत्रे वशित्वं वायुगोचरे स
र्वत्रत्वं तथैशाने कर्णिका सोम उच्यते सोमस्याधस्तथा सूर्यस्तस्याधः पावकः स्वयं उत्तरतंत्रे पत्रकोशेषु पद्मस्य सत्वादी
न्क्रमतो यजेत् सत्वं सर्वात्मगुणात्मकाद्ये ह्यग्नीनां मण्डलानि च ब्रह्मविष्णुमहेशानांस्तथा द्वारीशान्यथाक्रमं सम्मोहनतंत्रे वि
धिरूपः सत्वगुणो रजः प्रकृतिरूपकं तमोगुणो मोहरूपः प्रोक्तास्त्रिगुणास्त्रयः वामकेश्वरतंत्रे ज्ञानतत्वात्मकं यजेत् का
लतत्वात्मकं चैव विद्यातत्वात्मकं तथा परतत्वात्मकं चैव क्रमेण परिपूजयेत् चतुर्दिक्षु च मध्ये चेति प्रपंचसारे मध्ये नं तप
ममस्मिंश्च सूर्यसोमवह्नीनां रवेर्कैर्विभक्तैः सत्वादींश्च त्रीन्गुणानात्मपुष्काल्याकिः किंजल्केषु मध्ये यजेच्च उत्तरतंत्रे केस
रेषु ततो मध्ये पूर्वादिषु यथाक्रमं ततस्तं शक्तिपीठस्य नवशक्तीः प्रपूजयेत् पीठमंत्रेण गंधाद्यैः पीठमध्ये ततो यजेत् सनत्कुमा
रः प्राणायष्टस्य पत्रेषु कर्णिकायां यजेन्मने चतुर्थ्या नमस्वाद्यैः स्वैः स्वैः वचनामभिः मध्ये पूर्ववजलिंगस्यामाद मंत्रेण मंत्रवित्

वि
या ११

२४५

यजेत्स्मात् दक्षिणेन पतनाः प्रदक्षिणेन पतनाः प्रदक्षिणं पूज्या इति मंत्रतंत्रप्रकाशवचनात् सर्वादिक्षु पश्चिमस्यैव श्रेष्ठत्वं
स्वराः षोडश दैवे षिङ्गमयुगमभेदतः दलाष्टकेषु संलेख्याप्य पश्चिमादि प्रदक्षिणमिति ज्ञानार्णवे यंत्रे वर्णविन्यासदर्शना
त् आवरणावीधां देवाग्रे प्राच्यमित्यात्मा ज्ञानमपि तत्प्रकल्पनात् दक्षिणे च नयागुरुम् इति संकर्षणवचनाच्च नारदपंचरा
त्रे गुरुवर्चायां मण्डले देवदेवस्य दक्षिणो मंडलोपरि गुरुं समर्चयेदिति अतएव देवस्य देवस्यानर इति पूर्वोक्तस्यापि प्रजा
त्वेया धर्मादिपूजायामप्येवमेव देवाग्रे कल्पितप्राच्यनुसारेणैवाग्नेयादि कल्पयेत् अतः भाविनि भक्तवदुपचारः आवाह
मंत्रेण सुनेदमनंतरं मावाहनोक्तेः मूलाकारमिति मूलादेव योनिः मूलोमीदेव योनयः इति कोशात् तत्स्वरूपं तत्र क्रुवे स्वय
राकुसान् खदंष्ट्रा सदंष्ट्रिकाः कंद्रीवेङ्गांगहस्ता सुराधसौ योररूपिणः मूलास्तथैव दीनास्या इति भक्तडामरोक्तस्व।
रूपा पीठशक्तयः पीठसंज्ञान् नमकल्पे व दृश्यते उक्तरंतं पीठशक्तीर्वाभ्यर्च्य केसरेषु च मध्यतः वरदाभयपाणिपः पीठं
पीठाणना यजेत् मूलमंत्रं समुच्चार्य षष्ठ्यंते देवनाम च मूर्तीं च कल्पयामीति मूर्तिमध्ये विनिक्षिपेत् पुनर्मूलं समुच्चार्य दे
वनाम च पूर्ववत् मूर्तिं च इज्जयामीति तो पुष्पेण समर्चयेत् पूजा मूर्तेः शिरः कुर्यात् कुसुमोपरि तेसदा पूजाकाले विना
तस्या नोपरि भ्रामयेत्करं अथेष्ट देवताप्रीत्यै यजेदायतनान्यपि आयतनानि भागेवोक्तानि भार्गवशिवलिंगप्रमाण
विधिरपि प्रदर्शितः अथाभीष्टदेवतायाः पूजांगत्वेन पार्थिवविधाने नारद उवाच धर्मार्थकाममोक्षाणां साधनं परमं हितं न
त्सर्वैकपशस्तनमसूयाः श्रोसितेनविभो सर्वपापक्षयकरं सर्वारिष्टनिवारणं सर्ववश्यकरं चैव वक्तोसर्वत्र सिद्धिदं ईश्वर उ।
वाच शृणु नारद वक्ष्यामि शिवपूजाविधानकं यस्यानुष्ठानमात्रेण कृतकृत्यो भवेन्नरः अकृत्वा पार्थिवं लिंगं योऽर्चयेद्देवं
प्रपूजयेत् वृथा भवति सा पूजा स्नानदानादिकं वृथा गृहीत्वा मृदं समीचीनां यत्नतः शोधयेद् विशेषतः लिंगाकारं ततः कुर्या

यथोक्तविधिनाप्रमान् पूजयेत्तु विधानेन पार्थिवं लिंगमुत्तमं अष्टाविंशं कारयेद्यत्नात् हस्तमात्रेण नामभिः स्वदादर
णसंयमनिष्ठाह्वानमेव च स्नपनं पूजनं चैव क्षमस्वेति विसर्जनं हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक् पशुपतिः
शिवश्चैव महादेव इति क्रमात् द्विवर्णं मेवं नस्पृजापिनिः फला पक्वजंबूफलाकारं सर्वकामप्रदं शिवं विवर्धयः।
करोत्येव दुःखनिपीडाकरं भवेत् ऊर्ध्वान्मालात्त्ववीजेन मूलमंत्रेण पूजनं चतुर्दशाक्षरोपेतो हकारो विंदुसंयुतः शि
वप्रसादजनकः शिव[illegible]प्रणवसंज्ञकः शर्वो भवश्च रुद्रश्चोग्रो भीम ईशानसंज्ञकः महादेवः पशुपतिर्मूर्तिभिश्चैवमष्ट।
जयेत् क्षितिरापोनलो वायुराकाशः सोमसूर्यकौ यजमानश्चेत्यष्टौ मूर्तयः परिकीर्तिताः नारदउवाच देवकेन
विधानेन कृतं ह्यं सर्वकामदः यस्मात्स्नानमात्रेण कृतेन कृत्यो भवेन्नरः ईश्वरउवाच मुने सर्वप्रयत्नेन पार्थिवं लिंगमुत्त
मं कर्तव्यं हितमभिनित्यकाममुद्दिश्य यत्नतः अष्टाविंशं पार्थिवं लिंगं हि विंशं स्थावरं मतं सर्वोक्तेन विधानेन पूज्यं लिंग
तपार्थिव संख्या पार्थिवलिंगानां यथाकामं निगद्यते विद्यार्थी लिंगसाहस्रं धनार्थी शतपंचकं पुत्रार्थी सार्द्धसाहस्रं।
कंतार्थी शतपंचकं मोक्षार्थी कोटिगुणितं भूकामस्य सहस्रकं दयार्थी त्रिसहस्रं वस्त्रार्थी द्विसहस्रकं सहस्रकामी।
त्रिसाहस्रं वस्त्रार्थी शतमष्टकं मारणार्थी सप्तशतं मारणार्थी शतार्धकं उच्चाटने पटश्चैव सहस्रं च यथोक्तितः स्तंभने।
तसहस्रेण जारणं शतपंचकं निगडान्मुक्तिकामस्तु सहस्रं सार्धमीरितं महाराजभये पंचशतं चोरादिसंकटे शत।
हयं तदा किन्या भयं पंचशतं तु वा दारिद्र्ये पंचसाहस्रमयुतं सर्वकामदं एकं पापहरं प्रोक्तं हि लिंगं चार्थसिद्धिदं त्रिलिं
सर्वकामानां कारणं परमेश्वरः उत्तरोत्तरमेवं स्यात्संख्याक्रमगणनावधिः येषां तेर लिंगानाममुतेन तु नाम महाराजभय
हरेत् सहस्राणि तथा पंच निगडान्मुक्तये ध्रुवं कारागृहादिमुक्त्यर्थमयुतं कारयेत्तु यः डाकिन्यादिभये सम्यक् सहस्रैका

य:करे

वि
या ११

२४९

346

येत ततः सहस्रं पंचपंचाशदष्टोत्तरं प्रकारयेत् लिंगानाम युतेनैव कन्यकां सततं लभेत् एवं लिंगार्चनेनैव मनसोप्रियमाप्नु-
यात् लक्षमेकं तु लिंगानां यः करोति नरो भुवि शिव एव भवेत्सोपि नात्र कार्या विचारणा अर्चा पार्थिवलिंगानां कोटियज्ञफ-
लप्रदा भुक्तिदा मुक्तिदा नित्यं तत्र कामार्थदा नृणां ब्रह्महत्यापरिहारार्थं सौवर्णं लिंगमर्चयेत् लवणेन च सौभाग्यं पार्थिवं
सार्वकामिकं अनेकगुणसंभूतं रौप्यं परिकीर्तितं ग्रामदं तिलपिष्टोत्थं तशोत्थं मारणे स्मृतं अन्नोत्थमन्नदं प्रोक्तं गुडोत्थं
प्रीतिवर्धनं गंधोत्थं भोगदं चैव शर्करोत्थं महासुखप्रदं यवपिष्टोद्भवं लिंगं वंशकामोर्चयेत्सुमान् तंदुलानां च पिष्टेन पुत्रवा-
त्सल्यमाप्नुयात् सर्वरोगविनाशाय गोमयोत्थं प्रपूजयेत् केशास्थिसंभवं लिंगं सर्वशत्रुविनाशनं आसुरं लवणोत्थं च स-
र्वलोकवशंकरं स्तंभने रजनीपिष्टसंभवं लिंगमुत्तमं तण्डुलोद्भवपिष्टानां लिंगं विद्याप्रदं स्मृतं दधिदुग्धोद्भवं लिंगं की[illegible]
लक्ष्मीसुखप्रदं धान्यदं धान्यजं लिंगं फलोत्थं फलदं भवेत् पुष्पार्च्यं सर्वभोगाय सुकाथारीफलोद्भवं नवनीतोद्भवं लिंगं।
कीर्तिसौभाग्यदायकं दूर्वागुडूचीसंभूतमपमृत्युनिवारणं इक्षुदंडोद्भवं लिंगं स्फुटमुच्चाटयेन्नरं इंद्रनीलमयं लिंगं वंशरूपो
षणकामकृत् स्फाटिकं वज्रसाम्मिलफलदं मुनिभिः स्मृतं पितॄणां मुक्तये पूज्ये लिंगं रजतसन्निभं हेमजं सप्तलोकसुप्रा-
प्तये पूजयेत्सुमान् पूजयेत्ताम्रजं लिंगं पुष्टिकामो हि मानवः कृषिकामस्तु सततं लिंगं पित्तलसंभवं कीर्तिकामोर्चये।
ल्लिंगं लैंगं लोहमयं सदा धारणार्थमेवं तन्नजमर्चयेद्विधिवत्सदा कर्पूरसंभूतं लिंगं शांतिकामोर्चयेत्सदा कस्तूरीसंभवं लिं-
गं गंधकामो हि पूजयेत् लिंगं गोरोचनीयं च रूपकामस्तु पूजयेत् कांतिकामस्तु सततं लिंगं कुंकुमकेसरं स्वेतागुरु।
समुद्भूतं महाबुद्धिविवर्द्धनं धारणीयं शक्तिदं लिंगं कृष्णागुरुसमुद्भवं घृतकर्दमसंभूतं लिंगं प्रीतिविवर्द्धनं गोधूमपिष्ट-
जं लिंगं गोकामो हि प्रपूजयेत् मुद्गपिष्टमयं लिंगं पूजयेत्कांतिमाप्नुयात् माषपिष्टमयं लिंगं नित्यमिष्टान्नसिद्धिदं चणा

कोमवपिष्टेन लिंगं प्रीतिविवर्द्धनं लिंगं व्रीहिमयं पूज्यं धान्यकामेन नित्यशः यवधान्यमयं लिंगं सर्वारिष्टनिवारणं यः करो
ति तिलैस्तैस्तैः स्तद्वीपे च महीयते यः कुर्सेष्व तिलैः सम्यक् लिंगं कृत्वार्चयेन्नरः कामेशस्य प्रियो नित्यं भवेत् स्त्रीणां हि मानवः
श्रीखंडेन मल्लिकापुष्पसंभवं लिंगमुत्तमं पूजयित्वा नरो भक्त्या प्राप्नोति महतीं कृषिं वर्षासु पूजयेद्भक्त्या लिंगं कनकपुष्पजं
ईप्सुवांछितं कलौ के सार्वभौमो भवति चात्मनः नीलोत्पलमयं लिंगं कृत्वा शारदमानवः पूजयेत् परमां सिद्धिं भक्त्या प्राप्नोति नित्यशः
हेमंते नीलेषु कुसुमे लिंगं कृत्वा मनोरमं भक्त्या चाभ्यर्च्य मतिमान् शिवेन सह मोदते शिशिरे सर्वपुष्पोत्थं लिंगमभ्यर्च्य मानवः
सर्वपापं विहायाथ याप्युब्रह्मणा सह मोदते येन केन प्रकारेण यस्य कस्यापि वस्तुना कृत्वा लिंगं समभ्यर्च्य राजायमसवाप्नुयात्
विना लिंगार्चनं यस्य कालो गच्छति नित्यशः महाहानिर्भवेत्तस्य सर्वस्मात् दुरात्मनः कृतसर्वाणि दानानि व्रतानि विविधानि च ।
तीर्थानि नियमा यज्ञा लिंगार्चनः कृतास्ततः कलौ लिंगार्चनं श्रेष्ठं यथा लोके प्रदृश्यते ततो ऽन्यन्नास्ति नास्तीति शास्त्राणामेव निश्चि
तं भुक्तिमुक्तिप्रदं लिंगं विविधापन्निवारणं पूजयित्वा नरो नित्यं शिवसायुज्यमाप्नुयात् लिंगानामपि सर्वेषां पार्थिवं लिंगमुत्त
मं कृत्वा संपूजयेद्विधिवत् सर्वान्कामानवाप्नुयात् पाषाणसंभवे लिंगं पूज्यं परया मुदा इहकामानवाप्नोति सदा चात्र न संश
यः पाषाणात्स्फाटिकं श्रेष्ठं स्फाटिकात्पद्मरागजं पद्मरागस्य कास्मीरं काश्मीरात्पुष्परागजं पुष्परागादिंद्रनीलं इंद्रनीलाच्च ।
गोमेदं ततो गारुत्मतं श्रेष्ठं तस्मान्माणिक्यसंभवं माणिक्याद्विद्रुमं श्रेष्ठं विद्रुमान्मौक्तिकं परं मौक्तिकाद्राजतं श्रेष्ठं सौवर्णं राज
तात्परं सौवर्णाद्धीरकं श्रेष्ठं हीरकात्पारदं परं पारदाद्बाणजं श्रेष्ठं तस्माच्छ्रेष्ठं न विद्यते नर्मदाजन्ममध्यस्थं बाणलिंगमिति स्मृतं स
र्वतीर्थानि यज्ञाश्च सांगदानव्रतानि च, संध्यायोगसिद्धादि बाणलिंगे च संस्थितं बाणासुरार्चितं लिंगं बाणलिंगं तदुच्यते प्रथ
मं विधिवद्भक्त्या शिवलोके महीयते बाणलिंगे नित्यमेकेन नवनिर्माल्यकल्पना सर्वबाणार्चनेनायं शक्त्या भक्त्या नवा मया

वि
घा ५५
२४८
347

बाणलिंगमयंभक्तेचेरकांतेहृदिस्थिते चांद्रायणशतंतेषां शंभुर्नैवेद्यभक्षणं ग्राह्याग्राह्यविभागोयं बाणलिंगेविधीयते नदर्षि
नतिलेविंदूग्रासेग्रामासादसंज्ञया: बाणेग्रारजनेरत्नेस्फाटिकेदेहेमनिर्मिते काश्मीरेवंद्रकांतेचलिंगस्यायंभुवेनदा सदासनि
हितोदेवः सन्यस्यमनसंशय: शिवनाभिसर्यलिंगनिर्माल्यपूजनमहात्मनि एतचसर्वलिंगेभ्याशाल्हेपूजाविधानके उक्तमेमया
मेनीवंत्रिविधंलिंगमीरितं चतुरंगुलमुत्कृष्टयरमंवैदिकयादिवं उक्तमेलिंगमाख्यातंमम निर्मितंचकोविधेः नदर्हमयामं।
प्रोक्तंतस्माईवायमस्सृते एवंलिंगंसमासाद्यश्रद्धाभक्तिसमन्वितः पूजयित्वालभेत्कामान्मनसावांछितान् शा।
स्त्राण्यालोड्यसर्वाणिनदृष्टीनरिभाषच पुरुषार्थप्रदंनत्वेनिश्चितंलिंगपूजनं सर्वेषांनिपातस्यकर्मजालेविशेषतः भ
क्त्यापरमयाविद्वान्लिंगमेवंप्रपूजयेत् लिंगार्चनेनार्चितंसर्वंजगत्स्थावरजंगमं संसारार्णवमग्नानांनान्यत्तारणसाधनं
मृत्ताननिमग्नाधानांविषयासक्तचेतसां स्त्रवानामप्यस्तिजगतोलिंगाराधनमंतरा ब्रह्मादयःसुराःसर्वेमुनयोयतयोतस्मा:
गंधर्वाप्सरसःसिद्धादैत्यारामवस्तथा पूजयित्वामहाभक्त्यालिंगंसर्वार्थसिद्धिदं अविरलेभिरेनूनंसर्वान्कामानस।
मीहितान् ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवाप्यनुलोमजः स्वतमाराधनंविलोनैकवर्त्मना वैदिकानांचसर्वेषांपूजावैदि।
कमार्गतः कर्तव्यानन्यमार्गेणचेत्याहभगवाञ्छिवः दधीचिगौतमादीनांशापसंवदग्धचेतसां ननायतेःस्ववर्त्मापिशावैदि.
कवर्त्मना वैदिकानांचसर्वेषांपूजावैदिकमार्गतः कर्तव्यानन्यमार्गेणचेत्याहभगवाञ्छिवः दधीचिगौतमादीनांशापतसं
दग्धचेतसां ननायतेःस्ववर्त्मापिशावैदिकवर्त्मनि योवैदिकमनादृत्यकर्मस्मार्तमथापि वा अन्यत्समाचरन्मर्त्योनसक
र्मफलंलभेत् नश्यापिपार्थिवेलिंगेहिप्रसिद्धिप्रदंभवेत् पार्थिवेनहिलिंगेनवहुसिद्धिमवाप्नुयात् कृतेरत्नमयंलिंगंत्रेता
यांहेमसंभवं द्वापरेपारदंश्रेष्ठं पार्थिवंतुकलौयुगे अष्टमूर्तिषुसर्वासुमूर्तिर्वैपार्थिवीपरा एवंपार्थिवलिंगेतुनिस्स

सन्निहितः शिवः यथा सर्वेषु देवेषु ज्येष्ठः श्रेष्ठो महेश्वरः तथा सर्वेषु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते यथा सर्वेषु वेदेषु प्र
णवश्च महान्स्मृतः तथैव पार्थिवं श्रेष्ठं मासाध्यं पूज्यमेव हि पार्थिवाराधने पुण्यं आयुर्धनविवर्धनं प्रमन्तं नष्टिदं स्त्रीदं
कार्यसाधनसिद्धिदं यथा सर्वोपचारेषु भक्तिश्रद्धासमन्वितः पूजयेत्पार्थिवं लिङ्गं शास्त्रोक्तविधिना नरः पञ्चसूत्रविभा
गं च पार्थिवे न विचारयेत् आकारमात्रं रचयेत्सर्वसिद्धिप्रदायकं द्विखण्डमत्र कुर्वीत तेनैव पूजाफलं लभेत् रत्नजं हेमजं
लिङ्गं पारदं स्फाटिकं तथा पार्थिवं पिष्टजं पौष्पं माषजं तु प्रकारयेत् अखण्डं तच्चरं लिङ्गं द्विखण्डमचरं स्मृतं खण्डाखण्ड।
विभागोयं चराचरतया स्मृतः वेदिका तु महाविष्णुर्लिङ्गं देवो महेश्वरः अतोपि स्थावरं लिङ्गं स्मृतं पूर्वे द्विखण्डता वेदि
का तु महादेवी गिरिजा शिववल्लभा पिण्डिका तु महेशानो ह्यनयोर्योगो द्विखण्डता द्विखण्डं स्थावरं लिङ्गं द्विखण्डं चरमेव च
ये कुर्वन्ति नरा मोहाच्छिन्नपूजाफलमाप्नुयुः तस्माच्छास्त्रोक्तविधिना अखण्डं चरसंज्ञकं द्विखण्डं स्थावरं लिङ्गं कर्तव्यं परया मु
दा अखण्डे तु चरे पूजा संपूर्णफलदा स्मृता द्विखण्डे स्थावरे पूजा संपूर्णफलदायिनी अथ वैदिकभावानां पार्थिवार्चा निग
द्यते वेदोक्तविधिना सम्यक् पूर्णफलसिद्धये सर्वोक्तविधिना स्नात्वा संध्यां कृत्वा यथाविधि ब्रह्मयज्ञं विधायादौ ततस्तर्प
णमेव च नैमित्तिकं सकलं कर्म विधायानन्तरं शुभमान् पूजयेत्सर्वथा भक्त्या पार्थिवं लिङ्गमुत्तमं नदीतीरे तडागे वा पर्वते कानने।
नेऽपि वा शिवालये शुचौ देशे पार्थिवार्चा विधीयते शुद्धप्रदेशसंभूतां मृदमाहृत्य यत्नतः विप्रे गौरा स्मृता शोणा बाहुजे वै
श्यजा तु पीता शूद्रे तु कृष्णा स्याद्यथा यथा भवेत् संग्राह्या मृत्तिका लिङ्गनिर्माणार्थं प्रयत्नतः अतीव सुविशोधितां
संस्थाप्य मृदं शुभेन मां संशोध्य वर्तनैः शुद्धैः पिण्डीकृत्य शनैः शनैः पश्चाल्लिङ्गं विधायाशु क्रमेणानेन भक्तिमान् प्रणवा
दिचतुर्थ्यन्तैः सर्वांके नामभिः क्रमात् कर्तव्या मन्त्रियाशनाभक्त्या परमया मुदा प्राणायामत्रयं कुर्यान्मूलमन्त्रेण देशि

विद्यार्तिव॰१९

२४८

348

कः मूलतश्चहिं विद्याया एवैवविन्यसेन्मातृकामयम् एवन्नस्तमयं न्यासमष्टत्रिंशत्कलात्मकं अन्ये दशविधमातृकान्यासं करत्राशक्तौ।
अन्तर्मातृकां बहिः साक्षीकं गादिमातृका। अष्टत्रिंशत्कलान्यासं स्तिन्यासचतुष्टयमावश्यकं तथा अर्घ्यादिपात्राराणां सा
यन्त्रं वपीठ शिवं यत्नेन। उपचारैः प्रयत्नेनशैवमुद्राः प्रदर्शयेत्। पुष्पाञ्जलित्रयं दत्वा प्राणायामत्रयं चरेत्। अस्यावेष्टविप्र
हृत्सस्राप्रासादमन्त्रं हरेत्। चिन्तारत्नेसमुद्भूतमध्ये वनेषी मन्त्रं तरे पंचाक्षरो महेशस्य मूलमन्त्रो न वाहरः औं ह्रौं ·· ह्रौं नमः
शिवाय इति न वाहरः वामदेवो ऋषिश्छन्दो गायत्रं वै निरुद्दिष्टे पार्थिवेश्वरनामादि चिन्तामणि रितीरिता। देवताकथिता बी
जं महाप्रासादसंज्ञकं। शक्तिस्तु भुवनेशानी नतिः कीलकमुच्यते विनियोगः समाख्यातः पुरुषार्थ चतुष्टये। चत्वारि बीजानु
न्याधिमविज्ञाय हृदिहृतं नैयवनिन्यस्तमायश्चिरमेव कि वल्लभा। त्रैदेरनादिवो न्यायशिवो ये वषडिन्यथ। स्वतन्त्रशक्तये प्रो।
क्ता कवचायहुमीरितं। अस्तुमशक्तये नेत्रत्रयाय वौषडुच्चरेत् अनन्तशक्तये प्रोक्ता अस्त्राय फडिति क्रमात् एवं षडङ्गं विन्य
स्य ध्यायेद्देवमतन्द्रितः कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारं सदा रमन्तं हृदयारविन्दे भवं भवानीसहितं नमामि
वन्दे महेशं सुरसिद्धसेवितं भक्तैः सदा पूजितपादपद्मं ब्रह्मेन्द्रविष्णुप्रमुखैश्च वन्दितं ध्यायेत्सदा कामदुघं प्रसन्नं ध्यायेन्नित्यं महेशं
रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नं पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृ
त्तिं वसानं विश्वाद्यं विश्ववीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रं एवं ध्यात्वा सदा मन्त्रं जपेन्नियतमानसः यथाशक्ति ततः कृत्वा प्राणा
यामषडङ्गकं। गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर इत्युच्चार्य जपं हस्ते दद्याद्देवस्य
चार्पयेत्। प्रदक्षिणनमस्कारैः परितोष्य मृडं प्रभुं प्रार्थयेत्सप्रयाभक्त्या देवदेवं जगद्गुरुं जय देव जगन्नाथ जय शाश्वत शंक

सा

गं

वंघं

र जय सर्वसुरा ध्यक्षजय सर्व सुरार्चित. जय सर्वगुणातीतजय सर्ववरप्रद। जय नित्य निराधारजय विश्वंभराव्यय. जय। विश्वैकवंद्येशजय नागेंद्रभूषण। जय गौरीपते शंभोजय चंद्रार्द्धशेखर। जय कोट्यर्कसंकाशजयानंतगुणालय. जय रुद्रविरूपाक्षजयाचिंत्यनिरंजन. जय नाथ कृपासिंधोजय भक्तार्त्तिभंजन. जय दुस्तरसंसारसागरोत्तारणप्रभो. प्रसीद मे महादेव संसारार्त्तस्य खिद्यतः सर्वपापक्षयं कृत्वा रक्ष मां परमेश्वर महादारिद्र्यमग्नस्य महापापहतोजसः महाशोकनि विष्टस्य महारोगातुरस्य च ऋणभारपरीतस्य दह्यमानस्य कर्मभिः ग्रहैः प्रपीड्यमानस्य प्रसीद मम शंकर दीर्घमायुः सदा रोग्यं कोशवृद्धिर्बलोन्नतिः ममास्तु नित्यमानंदः प्रसादात्तव शंकर शत्रवः संक्षयं यांतु प्रसीदंतु च ग्रहाः नश्यंतु दस्यवो राष्ट्राज्जनाः संतु निरापदः दुर्भिक्षमारिसंतापाः शमं यांतु महीतले. सर्वशस्यसमृद्धिं च समानंदं सदा दिश। प्रदोषे वा पि रं जातेत्प्रार्थयेद्भक्तितन्मयः प्रसन्नो भीप्सितं देवो ददातिगिरिजापतिः एवं संप्रार्थयेत्तेजो वह्नेमासाष्टकाङ्कना समानीयस्वहृद येमहाप्राणं महारमहदृया. शिवलिंगं तु तन्यादौ संस्थाप्य विहरेत्सदा। अन्नमातृकाया पार्थिवेश्वरचिंतामणिमंत्रोवाजमध्यः काम दुघामंत्रोवा. कामदुघामंत्र. षड्वर्ग समुच्चार्य प्रसन्नेति पदं तथा। पारिजाताय चोच्चार्य वह्निजायां समुद्धरेत. षोडशार्णो महेशस्य मंत्रः कामदुघाह्वयः ॐ नमः शिवाय प्रसन्न पारिजाताय स्वाहा। एतस्यासध्यानादिकं मागवत. अथ वैदिकमार्गे णार्चनं वक्ष्ये शिवस्य वै. सद्योजातेति मंत्रेण मृत्तिकाग्रहणं भवेत. वामदेवेति मंत्रेण जलैः संप्रोक्ष्य यत्नतः अघोरेण तु मं त्रेण लिंगीकरणमुत्तमं तत्पुरुषायेति वाणं कुर्याद्विचक्षणः ईशानः इति मंत्रेण वेदीवाणं समाचरेत. पंचाक्षरेणमंत्रे ण उपचारैः समर्चयेत. भवाय भवनाशाय महादेवाय धीमहि. उग्राय चोग्रनाशाय शर्वाय शशिमौलिने एभिर्मंत्रैः स्नवाः स्नाकर्तव्या शुभमिच्छता. यः कृत्वा पार्थिवं लिंगं स्नजयेच्छुभवेदिकं रुद्रैर्वाब्वां ब्रीमात्रेनोरुद्रमाप्नुयात त्रिसं।

विद्याणि· १९

२४५

349

यं योऽर्चयेल्लिंगं कृत्वा भित्त्वा पार्थिवं · दशैकादशकं यावत्तस्य पुण्यफलं शृणु · अनेनैव स्वदेहेन रुद्रलोके भवेन्नरः · अथ
पारदलिंगस्य विधानं वक्ष्मि नारद · निराधारं च धनाशक्तौ प्रकारान्तरमुच्यते · विष्कत्रयं हेमपत्रं रसेन्द्रं नवनिष्ककं · अम्लेन
मर्दयेद्यामं तेन लिंगं तु कारयेत् · शोलायंत्रे मारनाले त्वीरं दिने पचेत् · तल्लिंगं पूजयेन्नित्यं सम्यग्भैरूपचारकैः · लिंग
कोटिसहस्रस्य यत्फलं सम्यगर्चनात् · तत्फलं कोटिगुणितं रसलिंगार्चनाद्भवेत् · ब्रह्महत्यासहस्राणि गोहत्यादिशतानि च ·
तत्क्षणाद्धि लयं यांति रसलिंगस्य दर्शनात् · स्पर्शनात्प्राप्यते मुक्तिरिति सत्यं शिवोदितं · वाग्भवं श्री अघोरेण मंत्रराजेन वार्चयेत्
अष्टादशभुजं भव्यं पंचवक्त्रं त्रिलोचनं · प्रेतारूढं नीलकंठं रसलिंगं विचिंतयेत् · तस्योत्संगे महादेवीमेकवक्त्रां चतुर्भुजां · अक्ष
मालांकुशौ दक्षे वामा पाशाभये शुभे · दधतीं तरुणे हेमाभां पीतवस्त्रां विभावयेत् · पाशाद्या श्रीकामराजशक्तिबीजरसांकुशाः
ये नमो हाटकेशानी वा जया विद्या रसांकुशी · अनया पूजयेद्देवीं गंधपुष्पाक्षतादिभिः · नैरिमंगिमहाकालान्कुमारान्सर्वदिक्षु सातः
पूजयेन्नाममंत्रैः · प्रणवादिनमोन्तकैः · सर्वान्कामानवाप्नोति पुत्रवान्धनवान्भवेत् · पराप्रासाददीक्षा च पारदेश्वरपूजनं · महि
म्नस्तु तिपाठश्च नाल्पस्य तपसः फलं · पराप्रासादमंत्रेण रसलिंगं समर्चयेत् · षण्मासाभ्यंतरे सौ वै सर्वसिद्धीश्वरो भवेदिति ह
यशीर्षपंचरात्रे आदिमूर्तिर्वासुदेवः संकर्षणमथासृजत् · प्रद्युम्नं चानिरुद्धं च स्वयमेवासृजत्प्रभुरिति · चतुर्मूर्तिः परः प्रो
क्तः पंके कोलियन्ते विधाः केशवादिप्रभेदेन मूर्तिर्द्वादशकं स्मृतं · पंकजं दक्षिणे दद्यात् शंखं तस्योपरि · वामोपरि गदा यस्य च
क्रं चाधो व्यवस्थितं · आदिमूर्तेः भेदोऽयं केशवेति प्रकीर्तितः · अथ तेनाम्भावेन कृते मेतन्नयत्रवैः · नारायणाख्या सा मूर्तिः
स्थापिता भुक्तिमुक्तिदा · सव्याधः पंकजं यस्य पाञ्चजन्यं तथोपरि · दक्षिणोर्ध्वे गदा यस्य चक्रं वाधो व्यवस्थितं · आदिमूर्तेः · भेदो
यं माधवेति प्रकीर्तितः · दक्षिणोर्ध्वस्थितं चक्रं गदा यस्योपरि स्थिता · वामोर्ध्वे संस्थितं पद्मं शंखं वाधो व्यवस्थितं · संकर्षणस्य भे

दोयं गोविंदेति प्रकीर्त्तितः दक्षिणोपरि पद्मं तु गदा वाधो व्यवस्थिते संकर्षणस्य भेदोयं विष्णुरित्यभिधीयते दक्षिणोपरि शंखं
च चक्रं चाधः प्रदर्शिते वामोर्द्ध्वे पंकजं यस्य गदा चाधो व्यवस्थिता मधुसूदननामायं भेदः संकर्षणस्य च दक्षिणोर्द्ध्वे गदा य-
स्य पंकजं चाप्यधः स्थिते वामोर्द्ध्वे संस्थितं चक्रमधः शंखं प्रदर्शिते ब्रह्मणो वामपादे दक्षिणे शेषपृष्ठके बलिबंधनसंसक्तं वा-
मनं चाप्यधः स्थिते वामोर्द्ध्वे कौमुदी यस्य पांचजन्यमधः स्थितं पद्मा पद्मकरा वामपार्श्वे यस्य व्यवस्थिता स्थितो वाप्युपविष्टो
वा सानुरागो विलासवान् प्रद्युम्नस्य तु भेदोयं श्रीधरेति प्रकीर्त्तितं दक्षिणोर्द्ध्वे महावक्रं कौमुदी तदधः स्थिता वामोर्द्ध्वे नलिनं य-
स्य तदधः शंखो विराजते हृषीकेश इति ज्ञेयः स्थापितः सर्वकामदः दक्षिणोर्द्ध्वे तु पुण्डरीकं पांचजन्यमधस्तथा वामोर्द्ध्वे संस्थितं च-
क्रं कौमोदी तदधः स्थिता पद्मनाभेति सा मूर्त्तिः स्थापिता मोक्षदायिनी दक्षिणोर्द्ध्वे पांचजन्यमधस्याद्वकुशेशयं सव्योर्द्ध्वे कौमु-
दी यस्य हेतिराजमधः स्थितं अनिरुद्धस्य भेदोयं दामोदर इति स्थितः एतेषां तु स्त्रियः कार्याः पद्मवीणाधराः शुभाः सिद्धार्थे सहि-
ता पांतु चतुर्विंशतिमूर्त्तयः उक्ताः वासुदेवो गदा शंखं चक्र पद्मं परो मतः पद्मं शंखं तथा चक्रं गदां वहति केशवः शंखं च चक्रं गदां
पद्मं धत्ते नारायणः सदा गदां चक्रं तथा शंखं पद्मं वदति माधवः चक्रं पद्मं तथा शंखं गदां च पुरुषोत्तमः पद्मं कौमोदकीं शंखं च-
क्रं धत्ते प्यधोक्षजः संकर्षणो गदा शंखं गदा चक्र धरः स्मृतः चक्रं गदां पद्मं शंखं गोविंदो धरते भुजैः गदां पद्मं तथा शंखं चक्रं
विष्णुर्बिभर्त्ति यः चक्रं शंखं तथा पद्मं गदां च मधुसूदनः गदां सरोजं चक्रं च शंखं धत्तेच्युतः सदा शंखं कौमोदकीं चक्रमुपेन्द्रः प-
द्मसंहृदेत् चक्रं शंखं गदां पद्मं परः प्रद्युम्न उच्यते पद्मं कौमोदकीं चक्रं शंखं धत्ते त्रिविक्रमः शंखं चक्रं गदां पद्मं वामनो वदे।
हते सदा पद्मं चक्रं गदां शंखं श्रीधरो वहते भुजैः चक्रं पद्मं गदां शंखं नरसिंहो बिभर्त्ति यः पद्मं सुदर्शनं शंखं गदां धत्ते जना-
र्दनः अनिरुद्धश्चक्रगदा शंखं पद्मं लसत्करः हृषीकेशो गदां चक्रं पद्मं शंखं च धारयेत् पद्मनाभो वहेच्छंखं पद्मं चक्रं गदां।

तथा पद्मं च चक्रं गदां शंखं वै धृतिदामोदरः स्मृताः शंखं च चक्रं च पद्मं च गदां च वदति यो हरिः शंखं कौमोदकीं पद्मं चक्रं क्रमेण विभर्त्ति यः
पद्माक्षमूर्त्तियोज्ञेयादक्षिणायः क्रमादिति एवमेता विष्णुमूर्त्तयः शिवलिंगं वा शूद्रैः पूजिताः ब्राह्मणादिभिर्नैव स्प्रष्टव्या न नमस्या
श्चपाङ्कः बृहन्नारदीये धर्मभगीरथसंवादे धर्मवाक्यानि प्रायश्चित्तविहीनानि पापानि शृणु भूपते सर्वपापानि यान्यत्र ता
नि तं सर्वभूपतेः समस्तपापतुल्यानि महानरकदानि च यः शूद्रेणार्च्चितं लिंगं नत्वा पापावेणउतां व्रजेत् सर्ववेदविदो वापि स
र्वशास्त्रविदोऽपि वा आभीरपूजितं लिंगं नत्वा नरकमश्नुते योषिद्भिः पूजितं लिंगं विष्णुं वापि नमेन्नृपः सकोटिकुलसंयुक्त
कल्पं रौरवं व्रजेत् यदा प्रतिष्ठितं लिंगं मंत्रविद्भिर्यथाविधि तदाप्रभृति शूद्रश्च योषितो वा न संस्पृशेत् स्त्रीणामनुपनीतानां
शूद्राणां च नरेश्वर स्थापने नाधिकारोऽस्ति विष्णोर्वा शंकरस्य च अर्च्चितं राजशार्दूल समेवापि न पूजयेत् यः शूद्रसंस्कृतं लिंगं
विष्णुं वापि नमेद्द्विजः इहैवास्ति तद्दुःखानि परत्रामुष्मिके किम् शूद्रो वानुपनीतो वा स्त्रियो वा पतितोऽपि वा केशवं शंकरं
वापि स्पृष्ट्वा नरकमश्नुते बौद्धालयं विशेद्यस्तु महापद्यपि वै द्विजः न तस्य निष्कृतिर्दृष्टा प्रायश्चित्तशतैरपि बौद्धाः पाष
ण्डिनः प्रोक्ताः यतो वेदनिंदकाः तस्माद्द्विज नेक्षेत यदि देवेषु भक्तिमान् यस्तु संतप्तशंखारिलिंगांकिततनुर्नरः संभाष्य
रौरवं याति यावदिंद्राश्चतुर्दश चक्रांकिततनुर्यत्र न तत्र दिवसं वसेत् यदि तिष्ठेन्महापापी सहस्रब्रह्महा भवेत् गंगास्ना
नरतो वापि ग्रस्तमेधरतोऽपि वा चक्रांकिततनुं दृष्ट्वा पश्येत्सूर्यं जपन्नरः जपेत्तपोरुषं सूक्तमन्यथा रौरवं व्रजेत् लिंगांकित
तनुं दृष्ट्वा पश्येत्सूर्यं नरेश्वरः जपेच्च शतरुद्रियमन्यथा रौरवं व्रजेत् ब्राह्मणास्तनुत्तैर्यास्ववदेवसमाश्रयाः सा चेत्स्यात्ता
पिता राजन्न किं वक्ष्यामि तदेव सः चक्रांकिततनुर्वापि राजन्लिंगांकितोऽपि वा नाधिकारी परिज्ञेयः श्रौतस्मार्त्तेषु कर्मसु
इति अथ शालग्रामलक्षणानि स्कांदे स्निग्धा कृष्णा पाण्डुरा च पीता नीला तथैव च रक्ता रूक्षा च वक्रा च महा...

लावलांछिता॰ कपिला कर्बुराभग्ना वक्रचक्रैकचक्रिका: बृहन्मुखी बृहच्चक्रा लग्नचक्राथवा पुनः बद्धचक्राथवा काचिद्भग्नचक्राप्य-
धोमुखी अथैतासां वर्णादिभेदेन गुणदोषौ तथैव च॰ स्निग्धा सिद्धिकरी मंत्रे कृष्णा कीर्तिं ददाति च॰ पाण्डुरा पापदमनी पीता पुत्रफ-
लप्रदा॰ नीला संदिशते लक्ष्मीं रक्ता रोगप्रदायिनी रू चोद्वेगदा नित्यं वक्रा दारिद्र्यदायिनी॰ स्थूला निहंति चैवायुर्निः फलात
थ्रलांछिताः कपिला कर्बुराभग्ना वक्रचक्रैकल॰ किका॰ बृहन्मुखी बृहच्चक्रा लग्नचक्राथवा पुनः संलग्नचक्राथवा पाषाणाग्रचक्रा-
प्यधोमुखी॰ पूजयेद्यः प्रमादेन दुःखमेव लभेत सः अग्निदग्धा तथा व्यालमुखी भग्ना विषमा बद्धचक्रिका॰ विकारा वर्णनाभिश्च
नारसिंही तथैव च॰ कपिला चप्रभावर्त्ती रेखावर्त्ती च या शिला: दुःखदा सा तु विज्ञेया सुखदा न कदाचन॰ स्निग्धा शुभा सा तथा शुक्ला
पीता वा समचक्रिका योगीमर्गीरनंताख्यो गंभीरा संपुटा तथा: सूक्ष्मा मूर्तिश्च समुखी पूजिता सिद्धिदायका: पाश्चीफलप्रमाणाया
करेणाभयसंपुटा पूजनीया प्रयत्नेन भक्त्या तां तां प्रपूजयेत्॰ पूजितफलमाप्नोति इहलोके परत्र च॰ दोषाश्चैते सकामानां विन विषयाः
अन्तकं श्रीभगवता स्कांदे॰ खंडितस्फुटिते भग्ने शालग्रामे न दोषभाक् इत्यादि यस्य या मूर्तिः स तां यत्नेन पूजयेत्॰ चक्रं वा केव-
लं तत्र पद्मेन सह संयुतः केवला वनमाला वा हरिलिंगास सहस्थितः मुख्या स्निग्धादयस्तत्र मुख्यो रक्तादयो मताः मुख्याभावे त-
न मुख्योऽपि पूज्यस्त्च्यते परैरिति अथैतासामेव लक्षणविशेषेण संज्ञाविशेषः ब्राह्मे श्रीभगवद्ब्रह्मसंवादे॰ निवसामि सदा ब्र-
ह्मन् शालग्रामाख्यवेश्मनि तत्र मूर्तिश्च चक्रांकभेदेन नामानि मे शृणु॰ द्वारदेशे समे चक्रे दृश्यते नांतरायके॰ वासुदेवः स विज्ञे-
यः शुक्लाभश्चातिशोभनः प्रद्युम्नः सूक्ष्मचक्रस्तु पीतदीप्तिस्तथैव च सुषिरं छिद्रबहुलं दीर्घाकारं तनर्भवेत् अनिरुद्धस्तु नी-
लाभो वर्तुलश्चातिशोभनः रेखा हृद्यं तु तद्द्वारि पृष्ठं पद्मेन लांछितं॰ सौभाग्यं केशवो दद्यात चक्रः कोणप्रवेशयः स्यामनाराय

विद्याप्रीव· १८
६
२५१
351

गोविंद्याम्नाभिचक्रंतथोन्नमं दीर्घरेखासमोपेतंदक्षिणेसुषिरंशुभः ऊर्ध्वंमुखंविजानीयाद्द्वारेचहरिरूपिणं कामदंमोक्षदंचैवच।
धीरैश्चविशेषतः (कपिलोनारसिंहस्तुशुभचक्रः सुशोभनः ब्रह्मचर्य्येधिकारोस्याइजनेतान्यथाभवेत् ब्रह्मचर्य्यगताश्चयोमा
वन्यथाविघ्नदोभवेत् कपिलः कपि) परमेष्ठीचशुक्लाभः पद्मचक्रसमन्वितः बिल्वाकृतिस्तथापृष्ठे सुषिरंचापिपुष्कले कृष्णवर्ण
स्तथाबिन्दुः स्थूलेचक्रेसुशोभने हारोपरित रेखाहयपतेमध्यदेशतः कपिलोनारसिंहस्तुशुभचक्रः सुशोभनः ब्रह्मचर्य्ये
धिकारोस्याइजनेतान्यथाभवेत् ब्रह्मचर्य्यगताश्चयोमाअन्यथाविघ्नदोभवेत् कपिलः कपिलोथः स्त्रिबिंदुः स्यात्कपिलः पंच।
बिंदुकः ब्रह्मचर्येणशस्यः स्यादन्यथासर्वविघ्नदः स्थूलेचक्रेहृदयंमध्येकुण्डलाकारमवर्त्तकं द्वारोपरितथारेखाश्यामाकाप्यासु।
शोभनाः स्फुटितेविषमेचक्रेनारसिंहंतुकापिलः सेव्यमुक्तिमाप्नोतिसंग्रामेविजयीभवेत् पाद्मे कार्त्तिकमाहात्म्ये यस्यदी
र्घस्तुवेशुभ्रेकपिलेलिंगतोऽर्चितः केसराकारिकारेखानारसिंहोमतः सम्यक् ब्राह्मे वाराहंशक्तिलिंगेचचक्रेचविषमेस्मृते ॥
इन्द्रनीलनिभंस्थूलंत्रिरेखालाञ्छितंस्थले पाद्मेच वराहाकृतिरूपंयन्मध्यचक्रेरेखासलक्षणः वाराहइतिसंप्रोक्त इति ब्राह्मे
दीर्घाकांचनवर्णाभाबिंदुत्रयविभूषिता मत्स्याख्यासाशिलाज्ञेयाभुक्तिमुक्तिफलप्रदा कूर्म्मस्तथोन्नतः श्रेष्ठवर्तुलः पशिरि
तः हरितवर्णमापन्नेकौस्तुभेनचचिह्नितः कूर्म्माकारचचक्रोकापिलाकूर्म्मः प्रकीर्त्तितः ब्राह्मे हयग्रीवांकुशाकाराश्रेखाः प
चभवंतिहि वंकुबिंदुसमाकीर्णाहयपतेनीलरूपकः पाद्मे हयग्रीवाययालेवारेखावायाशिलाभवेत् तथासोस्याहयग्री
वः इजितोज्ञानदोभवेत् अश्वाकृतिर्भवेद्यस्यसात्त्वमालः शिरस्तथा पद्माकृतिर्भवेद्वापिहयशीर्ष सौमतः वैकुंठंनीलव
र्णाभंचक्रमेकंतथाद्भुतं हारोपरितथारेखाइजाकाप्पीसुशोभना श्रीधरस्ततथादेवश्चिह्नितोवनमालया कदंबकुसु
माकारोरेखापंचकभूषितः वर्तुलस्यातिह्रस्वश्चवामनः परिकीर्त्तितः अतसीकुसुमप्रख्योबिंदुनापरिशोभितः अनंतः का

मातास्योभवेद्देवोऽङ्कुशोयः सात्वत्सद्युतिः वामपार्श्वेगदाचक्रेरेखैचैवतुदक्षिणे पार्श्वे चक्राकारोत्तोपंक्तिः सायज्ञेरेखोमयीभवेत् सस्तु।
दर्शितस्मेवंख्यातः पूजाफलप्रदः दामोदरस्तथास्थूलोमध्येचक्रंप्रतिष्ठितं दूर्वाभद्वारिसंकीर्णपीतोरेखोतथैवच उपेंद्रश्चवक्रेहृ
नातिदीर्घस्तुबिले · मध्येचरेखोलंचैकामासाचदामोदरः स्मृतः अमतत्रच · स्थूलोदामोदरोज्ञेयः सूक्ष्मरंध्रोभवेत्तुयः चक्रेचम
ध्यदेशस्थेपूजितः सन्मुखः सदा नानावर्णोऽप्यनंताख्योनागभोगेनचिह्नितः अनेकचक्रसंभिन्नः सर्वकामफलप्रदः अनंतश्च।
क्रोधवक्रमिश्रिकैरूपलक्षितः अनंतः सततंचिंत्येपोसर्वपूजाफलप्रदः विदितश्चद्विसर्वासुयस्योर्ध्वंहृश्यतेमुखं पुरुषोत्तमः
सविज्ञेयोभुक्तिमुक्तिफलप्रदः हृश्यतेपिवरेलिंगेशालग्रामसमुद्भवे · तस्ययोगेश्वरोनामब्रह्महत्यांव्यपोहति आर्द्धपद्म।
नाभार्द्धपंकजच्छत्रसंयुतं · तुलस्यापूजयेयन्नित्यंदारिद्र्यस्याश्वरोभवेत् · चंद्राकृतिर्हिरण्याख्योरश्मिजालेविनिर्दिशेत् सवर्ण
रेखावकूलस्फटिकद्युतिशोभितं पार्श्वे · वज्रकीटाङ्कवीरेखाः पद्मभूताश्चयत्नवैः शालग्रामशिलायासाविष्णुपंजरसंज्ञिताः।
नागवत्कुण्डलीभूतरेखापंक्तिःसघोषकः पद्माकारेणपंक्तीहेममध्येलेखावरेखिका · गरुडः सततंचिंत्येयस्यतत्राङ्कोजनार्दनः चतु।।
स्थूलसूक्ष्महारिवनमालांकितोदरः लक्ष्मीनारायणः श्रीमान्भुक्तिमुक्तिफलप्रदः महिचंद्राकृतिर्देवोहृषीकेशउदाहृतः नम
भ्रच्चीलभेनवगिविधयंश्वसमीहितान् वामपार्श्वेसमेचक्रेकृष्णवर्णःसबिंदुकः लक्ष्मीनृसिंहोविख्यातोभुक्तिमुक्तिफलप्रदः त्रि
विक्रमस्तथादेवःश्यामवर्णोमहाद्युतिः वामपार्श्वेतथाचक्रेरेखोचैवतुदक्षिणे प्रदक्षिणावर्तकृतवनमालाविभूषितः यासि
लाकृष्णसंज्ञासापनयात्सन्मुखेप्रदाः चतस्रोयस्यहृश्यंतेरेखापार्श्वेसमीपगाः हेचक्रेमध्यदेशेतुसाशिलातुचतुर्भुजेति एत
लक्षणोपेतास्तुशालग्रामशिलाःशुभाः याश्चतास्वपिसकलाः सस्ताः प्रशस्ततराः स्मृताः तथाचश्रीभगवद्ब्रह्मसंवादेतत्रैव
यथाययथाशिलासत्यामसत्यंतपंनयातितथा तस्मात्तांपूजयेन्नित्यंधर्मकामार्थसिद्धये · तत्राप्यामलकीतस्याःसत्याचातीवया।

विचारवि॰११९

३५२

352

भवेत् तस्मामेवसदाव्र· यासदवसाम्परे अथशालग्रामशिलायांहरिश्जनामाहात्म्यं पाद्मेमाघमाहात्म्ये· पूजयेद्धरिंचक्रे शालग्रा
मशिलोद्भवे· राजसूयसहस्रेणतेनेष्टंप्रतिवासरे· यदामनंतिवेदांताब्रह्मनिर्गुणमच्युतं तत्प्रसादोभवेन्नृणांशालग्रामशिलार्च
नात् बद्धेमिथ्यमानःप्रकाशते अपिपापसमाचाराः कर्मण्यनधिकारिणः शालग्रामार्चकावैश्यानैवयांतियमालये नतथाराज।
तेलक्ष्म्यांनतथास्वपुरेहरिः शालग्रामशिलाचक्रेयथासरमतेसदा· अग्निहोत्रेहुतंतेनदत्तापृथ्वीससागरा· येनार्चितोहरिश्चक्रे
शालग्रामशिलोद्भवे कामक्रोधप्रमदैर्लोभव्याप्तोयोत्रनराधमः सोपियातिहरेर्लोकंशालग्रामशिलार्चनात्· यःपूजयतिगोविं
दंशालग्रामेसदानरः आभूतसंप्लवंयावन्नसप्रच्यवतेभुवः विनातीर्थैर्विनादानैर्विनायज्ञैर्विनामतिः मुक्तिंयांतिनरावैश्यशा।
लग्रामशिलार्चनात् नरकंगर्भवासंचततीर्य्यक्कृमयोनिकं· नयातिवैश्यपापोपिशालग्रामेश्चुतार्चकः दीक्षाविधानमंत्रज्ञःचक्रे
योबलिमाहरेत्· सयातिवैष्णवंधामसत्यंसत्यंमयोदितं नैवेद्यैर्विविधैःपुष्पैर्धूपदीपविलेपनैः गीतवादित्रस्तोत्राद्यैःशालग्रा
मशिलार्चनं कुरुतेमानवोयस्तुकलौभक्तिपरायणः कल्पकोटिसहस्राणिरमतेसन्निधौहरेः लिंगैस्तुकोटिभिर्दृष्टैर्यत्फलंपू
जितैस्तुतैः शालग्रामशिलायास्तुएकेनापीदृतत्फलं· शालग्रामशिलारूपेयत्रतिष्ठतिकेशवः तत्रदेवासुरायक्षाभुवनानि।
चतुर्दशः शालग्रामशिलायांतुयःश्राद्धंकुरुतेनरः पितरस्तत्रतिष्ठंतितृप्ताःकल्पशतंदिवि· शालग्रामसमीपेतुक्रोशमा
त्रसमंततः कीटकोपिमृतोयातिवैकुंठभवनंतरः शालग्रामशिलाचक्रंयोदद्याद्दानमुत्तमं भूचक्रंतेनदत्तंस्यात्सशैलवन
कानन स्कांदेशिवस्कंदसंवादे शालग्रामशिलायांतुत्रैलोक्यंसचराचरं मयासहमहासेनलीनंतिष्ठतिसर्वदा दृष्टाप्र
णमितायेनस्नापिताप्रूजितातथाः यज्ञकोटिसमंपुण्यंगवांकोटिफलंलभेत् कामासक्तोपियोनित्यंभक्तिभावविवर्जि
तः शालग्रामशिलांपूत्रमंदृश्येवाच्युतोभवेत् शालग्रामशिलाबिंबेहत्याकोटिविनाशनं· स्मृतंसंकीर्तितंध्यातंपूजितंवनम।

१४

कृते शालग्रामशिलां दृष्ट्वा यांति पापान्यनेकशः सिंहं दृष्ट्वा यथा यांति वने मृगगणा भयात् मतः करोति मनुजः शालग्रा।
मशिलार्चने पापानि विलयं यांति तमः सूर्योदये यथा कामासक्तोऽथवा क्रुद्धः शालग्रामशिलार्चनैः भक्त्या वा यदि वा भक्त्या क-
लौ मुक्तिमवाप्नुयात् वैवस्वतभयं नास्ति तथा मरणजन्मनोः यः कथां कुरुते विष्णोः शालग्रामशिलाग्रतः गीतैर्वाद्यैः स्तवैः स्तोत्रैः
शालग्रामशिलार्चनं कुरुते मानवो यस्तु कलौ भक्तिपरायणः कल्पकोटिसहस्राणि रमते विष्णुसद्मनि शालग्रामे नमस्कारो।
भावेनापि नरैः कृतः भयं नैव करिष्यंति तद्भक्तायेनराभुवि मद्भक्तिबलदर्पिष्ठाः मत्प्रभुं न नमंति ये वासुदेवं न ते ज्ञेया मद्भ-
क्ताः पापिनो हि ते शालग्रामशिलायां तु सदात्र वसाम्यहं दत्तं देवेन तुष्टेन सख्यानेनाम भक्तितः पद्मकोटिसहस्रैस्तु पूजि-
तो मयि यत्फलं तत्फलं कोटिगुणितं शालग्रामशिलार्चिते पूजितो हि न तैर्मंत्रैर्न मित्रो हि न तैर्नरैः न कृतं समशिलाकेयैः शा।।
लग्रामशिलार्चनं शालग्रामशिलाग्रे तु यः करोति समर्चनं तेनार्चितो हि सततं युगानामेकसप्ततिः किमर्चितैर्लिंगशतैर्वि।।
ष्णुभक्तिविवर्जितैः शालग्रामशिलाबिंबं नार्चितं यदि पुत्रक अन्नं हि मम नैवेद्यं पत्रं पुष्पं फलं जलं शालग्रामशिलालग्नं सर्वं
याति पवित्रतां यो हि माहेश्वरो भूत्वा वैष्णवं लिंगमुत्तमं द्वेष्टि वै याति नरकं यावदिंद्राश्चतुर्दश सकृदभ्यर्चिते विष्णो शालग्रा।
मसमुद्भवे मुक्तिं प्रयांति मनुजा नूनं सांख्येन वर्जिता मल्लिंगैः कोटिभिर्दृष्टैर्यत्फलं पूजितैः स्तुतैः शालग्रामशिलायां तु एकेना
पि हि तद्भवेत् तस्माद्भक्ताश्च मद्भक्तैः प्रीत्यर्थं मम पुत्रक कर्तव्यं सततं पुत्र शालग्रामशिलार्चनं शालग्रामशिलारूपे यत्र तिष्ठ
ति केशवः तत्र देवाः सुरा यज्ञाः भुवनानि चतुर्दश शालग्रामशिलाग्रे तु सकृत्पिंडेन तर्पिताः वसंति पितरस्तस्य न सं।।
ख्या तत्र विद्यते प्रमाणमस्ति सर्वस्य सुकृतस्य हि पुत्रक फलं प्रमाणहीनं तु शालग्रामशिलार्चने यो ददाति शिलां विष्णोः
शालग्रामसमुद्भवां वि .. विष्णुभक्ताय तेनेष्टं बहुभिर्मखैः मानुष्ये दुर्लभे लोके शालग्रामशिला नरैः प्राप्यते न विना पुण्यैः

या॰ति॰ ५५

२५२

353

कलिकालेविशेषतः सपन्नः पुरुषोलोकेसफलंतस्यजीवितं शालग्रामशिलाशुद्धागृहेयस्यचपूजिताः सत्रियसेंद्रियग्रामेशा
लग्रामशिलार्चने यः कुर्य्यात्मानंवोभक्त्यासयातिपरमंपदं भक्त्यावायदिवाभक्त्यायः करोतिसपुण्यभाक् द्वेषेणापिचलोभेन
दंभेनकपटेनवा शालग्रामोद्भवंदेवंदृष्ट्वापापात्प्रमुच्यते अशुचिर्वादुराचारः सत्यशौचविवर्जितः शालग्रामशिलांस्पृ
ष्ट्वासद्यःपवशुचिर्भवेत् तिलप्रस्थशतंभक्त्यायोदद्यातिदिनेदिने तत्फलंसमवाप्नोतिशालग्रामशिलार्चने पत्रंपुष्पंफलंमूलं।
तोयंदूर्वाक्षताः सत जायतेमेरुणातुल्यंशालग्रामशिलार्पितं। विधिहीनोपियःकुर्य्यात्क्रियामंत्रविवर्जितः चक्रस्नानमवा
प्नोतिसम्यक्शास्त्रोदितंफलं नैवेवामत्र स्कंधेकृत्वातुयोज्ञानेवहतेशैलनायकं तेनोद्धृतंभवेत्सर्वंत्रैलोक्यंसचराचरं ब्रह्मह।
त्यादिकंपापंयत्किंचित्कुरुतेनरः तत्सर्वंनिर्दहत्याशुशालग्रामशिलार्चनं नष्टनंतंनमंत्राश्चनजपोनतवभावना नस्तुतिर्नोप।
स्कराश्चशालग्रामशिलार्चने शालग्रामशिलायत्रतत्तीर्थंयोजनत्रयं तत्रदानंचहोमश्चसर्वंकोटिगुणंभवेत् शालग्राम।
शिलायांतुयःश्राद्धंकुरुतेनरः पितरस्तस्यतिष्ठंतितृप्ताःकल्पशतंदिवि शालग्रामसमीपेतुक्रोशमात्रंसमंततः कीटकोपि
मृतोयातिवैकुंठभवनेनरः शालग्रामशिलाचक्रंयोदद्याद्दानमुत्तमं भूचक्रंतेनदत्तंस्यात्सशैलवनकाननं गरुडपुराणे
तिष्ठंतिनित्यंपितरोमनुष्यास्तीर्थानिगंगागयपुष्कराणि यत्राश्रमेधात्रपिपुण्यशैलाश्चक्रांकितायस्यवसंतिगेहे पाद्मे शा
लग्रामशिलायांतुयेनैरःपूजितोहरिः संशोध्यतेषांपापानिमुक्तयेवहितोभवेत् कार्तिकेमथुरायांतुसारूप्यंहरयतेहरिः शा
लग्रामशिलायांवैपितृवद्विप्रपूजितः कृष्णः समुद्धरेत्तस्यपितृंस्तेनात्मलोकतां बृहन्नारदीये शालग्रामशिलारूपीयत्र।
तिष्ठतिकेशवः नबाधंतेसुरास्तत्रभूतवेतालकादयः शालग्रामशिलायत्रतत्तीर्थंतत्तपोवनं शतेवापूजितेभक्त्यातदास्याद
धिकंफलं श्रूयतांसांवाद्भुतस्यफलविशेषः पाद्मे शालग्रामयुगाःपूज्याःयुगोपहितयंनहि अयुग्मानेवपूज्यंतेत्रयुग्मे।

५८

कपवहि शिलाद्वादश भो वैश्य शालग्रामसमुद्भवाः विधिवत्पूजिता येन तस्य पुण्यं वदामि ते कोटिद्वादशलिंगैस्तु पूजितैः स
र्णपंकजैः यत्स्याद्द्वादशकल्पैस्तु दिनेनैकेन तद्भवेत् यः पुनः पूजयेद्भक्त्या शालग्रामशिलाशतं तत्फलं नैव शक्नोमि वक्तुं कल्प
शतैरपि इत्याद्यास्तोवि॰ रः अत्र शालग्रामे विष्णोर्नावाहनं कार्यमिति वदंति तत्र प्रमाणं चिंत्यं वस्तुतस्तु स्कंदपुराणादिद
र्शितादावाहनमवश्यं कार्यमिति प्रतीयते यथा स्कंदपुराणे विप्रः पूर्वं निजे देहे स्वस्वमंत्रेण न्यस्य तु यः ततस्तु प्रतिमायां च शा।
लग्रामे विशेषतः क्रमेण च ततः पश्चात्कुर्यादावाहनादिकं आवाहयेच्च पुरतो ध्यानेनैव हि जोत्तम इति अत एवावाहनादुद्वास
नांतमभिधायोक्तं बौधायनेन शालग्रामे प्रतिमासु स्वयं वाप्यावाहनादि विसर्जनमिति त्रैलोक्यसंमोहनतंत्रे शालग्रामे॥
त्स्यपक्रम्य विसर्जनांता पूजोक्ता अत्र शालग्रामशिलायां तु प्रतिष्ठां नैव कारयेदिति प्रतिष्ठामात्रनिषेधादावाहनमावश्यकं विष्णो
रन्यदेवतानां वा विहितमिति आवाहनाद्यदि पुष्पांजलिमस्त्रोगमांश पूजयेदिति भागवते पि भगवता स्वयमभिधानात् आदि
पदेन मंत्रादयो गृह्यंते तथा मेरुतंत्रे पि शालग्रामशिलालक्ष्मौ विष्णोर्भेदाद्द्रसे प्रोक्ता अत्रैवावाहयेद्धरिं विसर्जयेत्तु पूजां
ते प्रतिष्ठां नात्र कारयेदिति आवाहनस्वरूपमुक्तं सिद्धांतशेखरे स्वतएव प्रशस्तास्मत्तस्य वाचनादिषु सादरं सम्मुखीभा
वस्तदावाहनमिष्यत इति तत्पर्यायमाह शारदातिलके मूलमंत्रं समुच्चार्य स्वसुषुम्णावर्त्मना सुधीः आनीयते जः स
स्यातात्मासिकारे निर्गते करस्थमातृकांभोजे चैतन्यपुष्पसंचये संयोज्य ब्रह्मरंध्रेण मंत्री वावाहयेत्सुधीः सुषुम्णा।
वर्त्मना रंध्रस्य प्रेरणाद्दक्षिणनासारंध्रनिर्गतमिति गरुडपुराणे आगच्छेति प्रयोगेण मूलमंत्रेण शंकर आवाहनं प्रकर्तव्यमिति
नृसिंहपुराणे आगच्छ नरसिंहेति तंत्रांतरे आवाहनं स्थापनं सन्निधापनमेव च सन्निरोधनमित्युक्तं संमुखीकरणं ततः अथा
वगुंठनं प्रोक्तं सकलीकरणं ततः अमृतीकरणं चैव परमीकरणं तथा विधाय स्वस्वमुद्राभिः प्राणस्थापनमाचरेत् स

कलीकरणस्वरूपं च सिद्धान्तशेखरे अविभिन्नस्वभावानां यदभिन्नप्रयोजनं अंगानामंगिनासार्द्धं सकलीकरणं विदं श्रीक्र
मार्णवे· पीठे देवं प्रतिष्ठाप्य सकलीकृत्य मंत्रवित्· मूलमंत्रेण दीपिन्यामालिन्याद्यौदकेन च· त्रिवारं प्रोक्षयेद्विद्वान्देवशुद्धि।
रियं प्रिये पंचशुद्धिं विधायेत्थं पश्चाद्यजनमारभेत्· साधकस्तत्फलादेविद्यामप्याति फलं भवेत् तथा· वाग्भवं वदयुग्मांते
वाग्वादिनि च वाग्भवं कामराजं ततः क्लिन्ने क्लेदिनि क्लेदयेति च महाक्षोभं कुरुयुगं कामराजमतः परं तार्तीयं मोक्षशब्दां
ते कुरुयुग्मं च देन्न ततः स्वात्मसादयमध्यांतेसमविंशाक्षिरक्षरैः दीपिनीमनुरित्युक्तः सर्वसिद्धिकरः प्रिये· चकारान्कुरुयुग्मांते
तार्तीयं तदनु परामासादबीजमित्यथः समविंशदक्षरः इत्युक्तेः वाग्भवकामराजतार्तीया बालाविद्यायाएव· सा तथैव ज्ञाते·
परामासादबीजं तदुपर· प्रयोगे स्वस्वैव मंत्रस्याने दृष्टव्ये तथा· सकलीकृत्य तत्प्राणास्तदीयानीन्द्रियाणि च· प्रतिष्ठाप्याञ्ज
येद्देवमस्य याति फलं भवेत् अत्र केचिदस्मिन्प्राणप्रतिष्ठां तु प्रतिमासृजनादृते· न कश्चिद्बुधः कुर्यात्क्रतान्मदमवाप्नुयात् इ
ति उक्तरतंत्रवचनात् प्राणप्रतिष्ठानकार्यमाहुः तन्न· तस्य वचनस्यावाहनादिरहितस्य स्थण्डिलादेः सृजनविषयत्वात् अत
एवोक्तं तत्रैव प्रतिमासृजनादृत इति· प्रतिमासृष्टिः तस्यां मंत्रमप्यापि तथा तात्· अन्यथा कथं सकलीकरणमिति ·उक्तं तं।
त्रे· मुद्राः प्रदर्शयेद्विधिवदुपचारात्मकल्पयेत मुद्रास्तत्र कल्पोक्ता स्तास्तथैव ज्ञेते कुलमूलावतारे· मुद्रं स्वरूपलाभाभ्यां।
देहद्वारेणात्मनः मासपर्यं प्रयत्नेन मुद्रास्ताः परिकीर्तिताः मोचयंति ग्रहादिभ्यो पापौघं द्रावयंति च· मोचनं द्रावणं यस्मा
न्मुद्रास्मात्सुवर्णितेति· मुद्राशब्दनिरुक्तिः· प्रपंचसारे आसनस्वागते चार्घ्याचमनीयके· मधुपर्कासनस्नानवस्त्रा।
त्राभरणानपि सुगंधसुमनोधूपदीपनैवेद्यचंदनं· प्रयोजयेदर्चनायामुपचारांस्तु षोडश· अर्घ्यपाद्याचमनेन मधुप
र्कावमानमपि गंधादयो निवेद्यांता इज्यापंचोपचारिका· सपर्यास्त्रिविधाप्रोक्तानासामेकतमाश्रयेत् अत्र पंचोपचारः।

जापहोमस्यार्घ्यादिस्थापनेनास्तिप्रयोजनाभावात् भैरवीतंत्रे एकैकस्यांततोमंत्रीप्रत्यामृतनिवेदयेत् तन्निवेदनप्रकारमाहरवा
रदपंचरात्रे प्राणांतेतेविपाकृतानाप्राणेयोमविभूषिते इदममिदमिदंपश्चात्पदंदद्यात्तदुच्चरेत् गृहाणचततः स्वाहामंत्रः पंचद
शार्णईरितः ... दीपचारेश्वपाद्यादिषु सदैवहि प्राणांतेतेविपाकृतानाप्राणेयोमविभूषिते इदममिदमिदंपश्चात्पदंदद्यात्त
दुच्चरेत् गृहाणचततः स्वाहामंत्रः पंचदशार्णईरितः हकारः व्योमबिंदुः अग्न्यंतस्तोयहकारोपरिस्थितनविंदोरिकारेणासदसंधिः क्रां
क्षः तदात्रभवति उच्चरेत्तत्र मूलेनैवासनंदद्यात्तेनस्वागतमीरयेत् ततोर्घ्यंमूर्ध्नि दद्याच्चस्वाहामंत्रेणमंत्रवित् पादांतेदे
वतायास्तुहृदापाद्यंप्रकल्पयेत् दद्यादाचमनंवक्त्रेदेवतायाःस्वधायुता स्वधामंत्रेणदद्याच्चमधुपर्कंमुखांबुजे अत्रार्घ्या
चमनीयमधुपर्कमुख्येषुषिमुद्रैर्नमः पदमेवस्वाहादिस्थानेप्रयोक्तव्यं प्रागुक्तयुक्तेः दद्याच्चस्वाहामंत्रेणमंत्रवित् पादाग्रेदेव
तायास्तुहृदापाद्यंप्रकल्पयेत् दद्यादाचमनंवक्त्रेदेवतायाःस्वधायुता स्वधामंत्रेण अत्र वैदिकामिश्रितोवापिविभाटी
तोविधीयते तांत्रिकोविप्रभक्तस्यशूद्रस्यापिप्रकीर्तितः इतिपद्मपुराणवचनाद्ब्राह्मणानांत्रियवैश्यानांशादिपंचदेवतानां
तत्रवैदिकमंत्रेणप्रथमंपूजाकृतानंतरंतांत्रिकमंत्रेणपूजाकार्या केवलतांत्रिकयजनंशूद्रविषयमादुक्तवचनात् कदा
चिदपितत्याज्योवेदमार्गोद्विजैःसदा वेदमुक्तानांविप्राणांदेवतंचापिदुर्लभं वेदःकंदंमुनीशाःस्कंधाणितुशाखाः कस्मि
श्चिंस्मभवेद्विप्रैर्यत्राम्नाकीर्तितानितः कलिनाश्रेविनाविप्रास्तंत्रयपथगामिनः कामलोभादिभिर्ग्रस्ताब्राह्मणत्वेनविद्रोरिताः ॥
म्लेच्छाम्नेवभविष्यंतिक्षीणाशुपशुरौरवे पतिष्यंतीतिविज्ञाय नैवैदिकमतत्यजेदिति तत्रवैदिकमंत्रास्तुगणानांत्वेतिगणप
तेः गौरीर्मिमायेतिभुवनेश्वर्यादिगौरीभेदानां यद्दागिरित्रिपुरारत्याः श्रीसूक्तंलक्ष्म्याः जातवेदसेसुनवामसोमितिदुर्गायाः विष्णोःपु
रुषसूक्तं रवेराकृष्णेनेति शिवस्यनमःशंभवेइति एवंकंयजामहेइतिवा गणानांत्वेतिगणस्यसदोगणपतिर्जगती गौरीमि।

वियालीव.१५

२५५

355

मायेतिजगतीदीपितमः आकुलेनेतिहिरण्यस्तपः सविताविहितः अथोपचाराः देवस्य वामभागे तद्यान्मूलेनवासनं योऽष्टदोह
मये वासं चाग्निकोणे यतेजनं षट्त्रिंशं वासनं प्रोक्तमिति उत्तरतंत्रे योऽष्टं पुष्पादिरचितं कुशास्तरादिसंयुतं प्रतिप्रीतिकरं देव्याः।
मसाध्यं तस्य भैरव यत्तदारु समुद्भूतमासनं वा व्रतेऽशुभे अन्यद्दारुमयं वापि दद्यादासनमुत्तमं सकीटकर्त्रीरयुतं दारुमा
रविवर्जितं चैत्यश्मशानसंभूतं वर्जयित्वा विभीतकं चैत्यः ग्रामप्रसिद्धिहेतुभूतो महान्वृक्षः दारुमयासने विशेषमाह हृद्याः।
मले शाण्डिल्यभद्रसारस्य चासनं हस्तमात्रकं समात्तलोच्छ्रितं दद्याद्धित्वा वा विचक्षणाः शाण्डिल्यो बिल्वः बिल्वे शाण्डिल्यशै।
लूषौ मालूरश्रीफलावपीत्यमरः भद्रसारश्चन्दनः भद्रश्रीर्मलयजो भद्रश्रीश्चन्दनोऽस्त्रियामित्यमरः विष्टरो दर्भमुष्टिः सप्तविं।
शतिदर्भाणां वेणप्रग्रन्थिविभूषितं विष्टरं सर्वयज्ञेषु लक्षणं परिकीर्तितमित्यमरात् यद्वा विष्टरमाह सप्तशब्दमात्रवाचि वि
ष्टरो दर्भमुष्टिः सप्तविंशतिदर्भाणां वेणप्रग्रन्थिविभूषितं विष्टरं सर्वयज्ञेषु लक्षणं परिकीर्तितमित्यमरात् पीठाद्यमासनमिति हि
कोशः उत्तरतंत्रे कौशजं वाल्कलं शारावमेतद्दुर्यं स्मृतं रोमजं कंबलं चैव वादरं च चतुष्टयं वस्त्रं कंबलं श्रेष्ठमासनं देव।
तुष्टये वाल्कमासं मासनं चतुष्टयमित्यर्थः वादरं कार्पासं वादरं चेदिति विश्वप्रकाशकोशात् तथा सिंहव्याघ्रतरक्षूणां।
छागस्य महिषस्य च गजानां च तुरंगाणां कृष्णसारस्य च मिताः रांकवं रोमजं श्रेष्ठं दानैव चेदनोद्भवं रांकवं रंकुनामा मृगः।
काश्मीरदेशे प्रसिद्धः तद्रोमजं पामरीति लोके प्रसिद्धाः कंबलविशेषः तथा यच्चासनं कुशमयं तदासनमनुत्तमं योग।
पीठस्य सहशामासनं कौशमुच्यते तथा सर्वेषां तैजसानां चाप्यासनं श्रेष्ठमुच्यते वर्जयित्वा लोहमयं कांस्यं सीसकमेव च ति
अतः पामर्घ्यदानं नचद्देवस्य शिरोहीनायैव शिरसि देयं नैवं पित्र्यं ग्रहणाद्व्याप्तिः विप्रकरे दानादिवाच्य तस्य पितॄणां।
शिरोहीनायैव नत्वदानादिति सोमशंभुः आगताय तथाचीयांस्तान्मासनगायच इज्जितागतकामाय दद्याद्दंषविच

(3

त्तणः आगते स्नानकाले च नैवेद्योपक्रमे तथा पाद्यस्यापि समुद्दिष्टं समयास्त्रिविधो बुधैः पाद्ये च मधुपर्के च स्नाने वस्त्रोपवीत।
योः भोजने चाचमं दद्यादिति । त्रूणयागे । सुगंधतैलैरभ्यङ्गं सुगंधामलकादिभिः उद्वर्त्तनं विधायाथ स्नपयित्वाथ वारिणा
गंधोदकैश्च मलेन यथाशक्त्याभिषेचयेत् । महाभिषेकं सर्वत्र शंखेनैव प्रकल्पयेत् । सर्वे मंत्रे प्रशस्तो ज्ञः शिवस्यापि च मर्मविना ।
अज्ञः शंखः अगस्त्यः स्नानं कुर्याद्यस्त्रकेन सुहृच्छंखोदकेन च । क्षीरदध्याज्यमधुभिः खण्डेन च तथा क्रमात् । नारिकेलोदकेना
पि तथा तालफलाम्बुना । गंधद्रव्यैश्च मधुभिस्तथा गंधोदकेन च । पेत्तवेत्तोदकेनापि सकर्पूरादिगंधिना । कदलीपनसाम्रा
म्यजलेनापि सुगंधिना । शतं सहस्रमयुतं शक्त्या वाप्यभिषेचयेत् । शंखे संपूज्यते नैव सक्कृष्णोणारघृतमं सकृष्णागुरुधूपे।
न धूपयेत्तदनंतरं ततः शुद्धजलेनैव स्नापयेत्तमनन्यधीः । अत्र शिवस्य शंखेन स्नपनं निषिद्धं । आणापबद्धशंखेन स्नपनं प्र।
शस्तं स्मृयते । स्कांदे । सुप्रतिष्ठितशंखस्य तीर्थैः पंचामृतैरपि । अभिषिच्य महादेवं रुद्रसूक्तैः समाहित इति । यामले । पीतं।
कौशेयवसनं विष्णोः प्रीतिप्रकीर्तितं रक्तं शाक्तस्य विघ्नांतो शिवस्य च सितं प्रियं मलहीनं तथाच्छिद्रहीनं कार्पासमेव च । म
त्रांतरे प्रकाशे । तैलादिदूषिताद्रोगः सच्छिद्राद्दारिद्यता भवेत् जीर्णाद्दारिद्रताकर्म मलिनात्कांतिहीनता कालिकापुराणे । नि
र्दिष्टं मलिनं जीर्णं छिन्नं गात्रावलंबितं । परकीयं चाखुदष्टं सूचीविद्धं तथा सितं उपकेशं सधौतं च श्लेष्मसृङ्गादिदूषितं प्र
दाने देवताभ्यश्च देवे पित्र्ये च कर्मणि । वर्जयेत्त्वोपयोग्यं च यत्नाद्वात्वप्रयोजने उत्तरतंत्रे यज्ञोपवीतं देवाय भूषणानि स
मर्पयेत् । तानि नानाविधानि स्युर्मुक्ताविद्रुमभेदतः हीरकप्रभेदतस्त्वापि विज्ञेयानि विचक्षणैः योगिनीतंत्रे । गंधपुष्पेत
पाद्यार्घ्यादीनि नैवेद्यसेवनं । यस्य यद्दीयते वस्त्रमलंकारादिकांचनं । तेषां देवतमुद्दिश्य कृत्वा प्रोक्षणाद्यनं । इतस्नम
लमंत्रेण प्रतिमां स्मातिवेदयेत् वरुणस्य च बीजेन तेषां प्रोक्षणमाचरेत् अत्रस्य देवता लक्ष्मीर्दयवापि प्रजापतिः स्व

विद्यार्णव॰ १५

॰ ३५६

356

णी वाग्निर्देवतं रजतं चंद्रदैवतं हीरकं वारुणं ज्ञेयं रसानां पृथिवी तथा जलस्य वरुणो देवः पेयानां वरुणस्तथा कुसुमस्य
रमा देवी परमान्नस्य चैव हि घृतप्रदीपके विष्णुस्तैलयोगे वनस्पतिः गंधद्रव्ये तथा धूपो धूपाज्यस्य चैवाग्निर्देवतं मधु वैवा।
रुणं ज्ञेयं दधि दुग्धे च वैश्वदेवं वानस्पत्यं तथा पुष्पं वैश्वदेवो गंधद्रव्यः स्मृतः मालायाश्च तथा पुष्पैः सर्वं वा विष्णुदैवतं स्रग्रज।
नपवद्देवतोच्चारः तेषां दैवतमुच्चार्य पूजयेच्च विचक्षणः इति स्वयमभिधानात् उक्तागस्त्यमूलमंत्रेण तथोत्सर्गो निवेदने।
इति स्वयमभिधानात् कालिकापुराणे चूर्णीकृतो वा घृष्टो वा दाहकर्षित एव च रसः संमर्दजो वापि प्राण्यंगोद्भव एव च
गंधः पंचविधः प्रोक्तो देवानां प्रीतिकारकः गंधचूर्णं गंधपत्रचूर्णं सुमनसस्तथा प्रशस्तं गंधयुक्तानां पत्रचूर्णानि यानि
च तानि गंधाढ्यानि स्युश्चूर्णोऽतः प्रथमः स्मृतः घृष्टो मलयजो गंधः सकलश्चनमेरुणा अगरुप्रभृतिश्चैव यस्य पंकः
प्रतीयते घृष्टेन घृष्टो गंधो यो द्वितीयः परिकीर्तितः शारदातिलके गंधश्चंदनकर्पूरकालागरुभिरीरितः देवदीर्घ।
गुरुब्रह्ममारसारान्नु चंदनात् श्रियादीनां च योद्गंधाग्दह्यते दारुजो रजः स दाहकर्षिभागंधस्तृतीयः परिकीर्तितः
सुगंधकरवीराद्यं सुगंधललितातथा सुगंधानां रसो यो सौ निष्पीड्य परिगृह्यते स संमर्दोद्भवो गंधः संमर्दजाद्वितीय
ते मृगनाभिसमुद्भूतस्वक्कोशोद्भव एव च गंधः प्राण्यंगजो ज्ञेयः सोददः स्वर्गोपमितो मंत्रतंत्रप्रकाशे पुष्पं पंचवि।
धं प्रोक्तं मुनिभिर्नारदादिभिः परापरोत्तरं चैव मध्यमं च तथाधमं सौवर्णं परमित्युक्तमपरं चित्रवस्तुजं वृक्षात्युत्तमं।
लतापुष्पमुत्तमं परिकीर्तितं अधमं पत्रतोयादि मध्यमं तु फलात्मकं उत्कृष्टं न क्रियायोग्यं सदा योग्यं परापरे पश्चय।
उत्कृष्टं देवेभ्यो दत्तं तारकं। तत्तु नः क्रियायोग्यं न भवतीत्यर्थः परापरे इति परं सौवर्णं अपरं रौप्यं ते च अनुत्कृष्टे सदा।
योग्ये भवतः देवता परिसदा यार्थीत्यर्थः तयोरेकतरमप्युत्कृष्टं यदि भवति तदा तत्तु नः क्रियायोग्यं देवपूजायोग्यं न भ।

९८

वतीमर्थः जानातीवे। पुष्पैः पर्युषितैर्देवि नार्चयेत्तण्डुलैरपि। निर्माल्यभूतैः कुसुमैर्महाकष्टैः परमेश्वरीति। निर्माल्यभूतैर्महाकष्टैरि-
तियावत्। अल्पकष्टैः पुण्यावशिष्टैः उत्तमपुष्पाण्युत्तरतन्त्रे। पुन्नागकुसुमाचलक्ष्मीपुष्पं रक्तचंपकं जः केतकीपुगलं जातीहृद्यं हृदया-
रिजं। पुष्पाणां दशकं श्रेष्ठं तन्त्रशास्त्रे परिकीर्तितं। रक्तनीलोत्पले शास्त्रे मल्लिकाकुन्ददंतथा। कुंदकल्हारकं चैव मन्दारं तगरं पुनः।
अन्यत्तु नैव किंशुकं रक्तं मंदारं नागचंपकं। अशोकं बिल्वपुष्पाणि पाटलानवमल्लिका। चंपकं कर्णिकारं च पारिजाततरुद्भवं। श-
तवर्गोद्भवं पुष्पं कोरंटकुसुमानि च। इत्यादीनि सुपुष्पाणि गंधवंति लसंति च। तन्त्रमन्त्रविधाने तु विहितानि समर्चयेत्। स्नाना-
निचाम्बुगानीव शीर्णानि तिस्नागतानि च। यानि पर्युषितानि स्युः क्रिमिभिर्भक्षितानि च। कोरकाणि च दुष्टानि समाघ्रातानि नार्चयेत्।
मेवं तन्त्रप्रकारो पत्रे तुलसी श्रेष्ठं बिल्वं रामनकं शुभं। मरुवो देवकल्हारिविष्णुक्रान्ता तथैव च। अपामार्गो यगांधारी पद्मी-
संतिका। नागवल्लीदलं हरीकुशापत्रं तथा मतं। पत्राणि वासितं ... धात्रीफलं तथा। ज्ञानमालायां। नाद्यं तेन रक्तं विष्णोर्दि-
स्येनतुलस्यागणेशे क्षिपं नहरेर्यायजेद्दुर्गां बिल्वपत्रैर्दिवाकरं। देवीनामर्कमंदारावादित्ये तगरं तथा। गणेशाय च स्पर्शाया रक्त-
पुष्पमतिप्रियं। शिवे कुंदं मदंती च पृथ्वि बेतकं केतके। जपारक्तोविसंप्येहे सिंहरे कुटकानि च। मालतीं पुष्पराक्ष हयारिर्विवर्-
जेत्। उग्रगंधमगंधं च केशकिम्यादिदूषितं। प्रपुष्पपात्रपाण्यंगवासोभिः कुत्सितात्मभिः। आनीतेनापि यत्कर्म भोः प्रमादाद्-
विदोषकृत्। कालिकालिस्तयातेनं विनापंकजचंपके। पुमैनेपश्येयत्ते भंपत्रैः पुष्पैः फलैरपि स्नानानीतैः पर्युषितै याचि-
तैः कुसुमवणिकैः स्वयंविकाशितैः पुष्पैः स्वयं च पतितैर्भुवि वर्जयेद्बह्वतीपुष्पं काचनारे कुरंटके। सर्वपुष्पैः सदाप्यविहिता।
विहितैरपि। कर्तव्या सर्वदेवानां भक्तिरेवात्र कारणं। अत्र स्नानानीतैः मध्याह्नस्नानोत्तरमाहृतैस्तैरित्यर्थः। प्रातरुत्थाना-
दिप्रातः कालीनकृत्यं तत्र प्रथमप्रहरकृत्यं प्रहरमुक्तानतः पुष्पफलादीनां भ्रस्यायार्चनमाचरेदिति द्वितीयप्रहरकृत्यं तेन नारद-

वि॰ यागीव
१९
३५८
357

पंचरात्रेऽप्याहरेणास्तोकनात् तथा पत्रैर्वा यदि वा पुष्पैः फलैर्नेष्टमधोमुखैः दुःखं तत्समवाप्नोति यथोन्मत्तं तथा प्रिये । चित्रपूजा
स्तम्बमेवास्तं न विदाहस्याहवर्णं । अधोमुखोत्पलैर्नेष्टं पुष्पाणि न निवेदयेत् लग्नपूजासु पुष्पमेकैकमर्पयेत् समुदायेन च ।
पूजा लक्षपूजायां न तत् । तथा पर्युषितदोषोऽस्ति जलजोत्पलचंपके । न तु स्यात् बकुले बिल्वे गंगाजले तथा । अत्र केचित्
उत्पलपदं दर्शनात् जलजपदेन कमलमात्रग्राह्यमिति वदंति । तत्र उत्पलस्य बिल्वपत्रे च जलजे च सर्वेषां पर्युषितदोषा
स्ति मालाकारगृहे च चेति । भविष्यपुराणवचनादिति । उत्तरतंत्रे । पारोपितं पुष्पं अविज्ञापचने यस्तु निष्फलं तस्य पू
जनं स्नानमालायां । फलेष्वामलकं श्रेष्ठं वादरं तिंतिडीफलं । दाडिमं मातुलिंगं च जंबीरं पनसोद्भवं । कदलीचूतसंभूतं श्रेष्ठं
जंबूफलं तथा । यजेदेतैः सदा विष्णुं पत्रैः पुष्पैः फलैरपि । बिल्वमिश्रपल्लवाणां दिवसे दिवसोत्फुल्लैः पुष्पैः पूजा तथा निशि ।
पुष्पाभावे प्रवालैर्वा कारयेच्च नकोरकैः । अतः परमावरणपूजा । तत्र पुष्पोपचारांते । उत्तरतंत्रे । मंत्रसंपुटितैर्वर्णैर्मातृकायाः
सबिंदुकैः क्रमेणांगषडुपाद्यैर्देवस्यांगे समर्चयेत् लयांगमर्चयेद्देहे देवस्य मनुवित्तमः ज्ञानार्णवेऽपि । लयांगमर्चयेद्देहे तस्मा
त्सद्यानेष्वमंत्रवित् शारदातिलके । इंद्रादिलोकपालांस्तु यजेदावरणमपि । केसरे अग्निकोणादिहृदयादीनि पूजयेत् नेत्रं ।
मध्ये दिक्ष्वस्त्रमुख्यास्तथा अंगदेवताः तुषारस्फटिकश्यामनीलकृष्णारुणत्विषः वरदाभयहारिण्यः प्रधानतनवस्त्रियः अं
गादीति विशेषानाभिधानात् लोकपालशब्देन तदस्त्राणामप्यादानं तत्राग्निकोणाद्धोमादिपदस्य क्रमयादिना दग्निराक्षसवा
युईशानकोणेष्वंगचतुष्टयं अर्चयेदिति वदंति । तत्र अग्नीशासुरवायव्यमध्ये दिक्ष्वंगपूजनमिति ज्ञानार्णवदक्षिणामूर्तिसं ।
हितावचनात् । हृदयं चाग्निदिग्भागे ईशाने च शिरो यजेत् । शिखां नैरृतिदिग्भागे वायव्ये कवचं तथा । अस्त्रं मंत्रं तथा दिक्षु
नेत्रं मध्ये प्रपूजयेदिति दक्षिणामूर्तिकल्पवचनात् वह्नौ हृदयमीशाने शिरो राक्षिचे शिखां । वायौ वर्म पुरो नेत्रं अस्त्रं दिक्षु च ।

नु ‥ यीतिकपिलपंचरात्रवचनात्· चव · पीतिदिव्यनात्· वनस्ति · मध्यैः इष्टाहृदयमाग्नेय्यामीशान्यां चशिरो यजेत्· नै
ऋत्यां चशिखां वायव्यां कवचं यजेत्· अग्न्यद्यैः पुरतो नेत्रमस्त्रं दिक्षु समर्चयेत्· इति सोमशंभुवचनात्· पूर्वयाम्यांतरेवि
स्रोहृदयं विनिवेशयेत्· शिरः पूर्वोत्तरे दयाच्छिखां पश्चिमदक्षिणे· पश्चिमोत्तरदिक्संस्थे कवचं विन्यसेद्गुरुः· अग्रतः केस
रोद्देशे नेत्रं विन्यस्य राट्तथैति भारद्वपंचरात्रवचनस्येति· अत्र· अथावरणशक्तीनां यास्तु· प्राचीं प्रकल्पयेत्· तदादिपरिवार
णां प्रादक्षिण्येन पूजनमिति नृसिंहकल्पवचनात्· यत्तु उभिमुखो देवो देवाभिमुखतो दश· प्राच्यादिहरितो सेया शक्त्या होमा
दिकर्मसिम्नत्तु नेत्रनात्· यत्रैव भास्वानुदयं प्रयाति प्राचीमिमां वेदविदो वदंति· मध्ये तु साधनेकश्च्येया प्राग्समदागमस्थैः सत
तविविंसतिभैरवीतंत्रवचनात्· देवाग्रं प्राचीं परिकल्प्य तदनुसारेणाग्नेयादिकं कल्पयित्वांगानि पूजयेत्· आवरणदेवता
श्चैवमेव प्रपूजयेदिति· महाकपिलपंचरात्रे· शिरः प्रभृतिमंत्रेषु पूज्यायां च नमो नमः· शिरोभिन्नेषु मंत्रेषु होमे स्वाहांततो भ।
वेदिति· आवरणदेवतानामन्यत्रेषु दृष्टयाः· मालिनीतंत्रे· स्वे स्वे स्थाने चाभिमुखान् पूजयेत्सोन्नत्याणादिभिः· अभिमुखान्दे
वस्य श्रीविद्यावरणशक्तीनां दक्षिणामूर्तिसंहितायां श्रीविद्यासमस्तुवीः स्वरेदितप्रभैः· तथा सिद्धेश्वरीतंत्रे· अथ चाप्यसम।
यश्चमान्वरणुः समरीचिभिः तत्र दुर्गोन्निजैर्द्व्योधातयाः समरीचिभिः· त्रराणियाणो देवीं ध्यानातनच्छ्रीरामएवतिकरेव।
हिः विनिःस्वस्थिरीभूते परिवारं विचिंतयेत्· अथावरणंग्रा यमूलमुच्चार्य मंत्रवित्· संपूज्य देवीं संबोध्य वदेन्मंत्रमिमं
ततः· अभीष्टसिद्धिं मे देहि शरणागतवत्सले· भक्त्या समर्पयेत्तुभ्यं प्रथमावरणार्चनं· इति पुष्पांजलिं दत्वा शरणमेदितिभक्तितः
प्रथमावरणमेवं तत्र तत्रावर्तासमर्पयेत्· इत्यमावरणसम्यगभ्यर्च्य मन्त्रवित्तमः· अंते यजेल्लोकपालांस्तेषामस्त्राणि।
वक्रमात्· इंद्रं सुराधिपं पीतं वज्रहस्तं सवाहनं· अग्निं तेजोधिपं रक्तं शक्तिहस्तं सभूषणं· यमं प्रेताधिपं कृष्णं दंडहस्तं

विद्यार्णव· १९

३५८

358

समर्चयेत् रक्षोधिपं निर्ऋतिं च खड्गहस्तं सधूम्रकं पाशं सुधूम्रांगं वरुणं यादसांपतिं । वायुं मारुताधिपं धूम्रं अंकुशाढ्यकरं यजे-
त् यक्षाधिपं कुबेरं च गदाहस्तं सितं यजेत् । विद्याधिपं शूलहस्तं स्फाटिकाभं शिवं यजेत् । नागाधिपमनन्तं च गौरं चक्रायुधं य-
जेत् । लोकाधिपं विधातारं रक्तं पद्मकरं यजेत् । सप्तवंतं तथा मेषमहिषं नरमृषभम् । मकरं मृगं हंसं च वृषं च विधिहंसकौ ।
इंद्रादिलोकपालानां वाहनानि विदुर्बुधाः । वज्रं पीतं सितां शक्तिं दण्डं कृष्णं समर्चयेत् । खड्गं श्यामं सकाशं पाशं विद्युतिभं
यजेत् अंकुशं रक्तवर्णं च शुक्लवर्णां गदां यजेत् । त्रिशूलं नीलवर्णं च यजेत्सम्यक् ततः परं । रथांगं कुन्दविद्राभं पद्मं रक्तं समर्चयेत् ।
लोकपालायुधान्येवं क्रमेण परिपूजयेत् । अत्र केचित् । स्वतेयजेल्लोकपालान् भूतपार्षदान्वितान् । हेतिजामायुधोपेता-
न् दिक्षु पूर्वादितः क्रमात् । इति शारदातिलकवचनात् यथास्थितपूर्वादिक्षु इंद्रादिपूजनमिति वदंति । तत्र । चतुरायतनदेवता-
स्थापनप्रकारेणोक्तमयुक्तः सर्वेषामावरणानां देवायतनस्यान्तर्भावात् लोकपालावरणस्याप्यावरणत्वाच्च । कल्पितप्राच्यनुसा-
रेणैव पूजनं युक्तमिति भाति विचारतः इति । एवं मूलमनुना व्यासांगायैः समर्पितिच । वाणायेनामदेव्या अस्त्रचन्द्यमुदीक्ष्य
च । नमस्कृत्य यजेद्रूपपुष्पाद्यैः सोपचारैः । ततो यजेद्धूपदीपनैवेद्यैः सुमनोहरैः । मधुपंचसारैः सगुग्गुल्वगरुश्रीरसैः ।
तान्यमधुचन्दनैः सारांगारविनिःसृतैर्मैमैरीनीचैः धूपयेत् । कुलम्लानतोरे मालेयमलयोद्भव जतुलाक्षाः नादेय ।।
ज्ञं च क्रुष्टं समं मिश्रं व्याप्रगुरुपूजनदाहिगुणितामरैकसंचूर्णिता षट्भागावरमाक्षिकं सद्भूषिताचाष्टभागावतिता धूपो ।
यं भुविश्रुतो करेणाकथितः श्रीसुंदरीवल्लभः । शैवागमे । धूपमाज्ञानमसेणमोक्षाम्भश्शुद्धहृदाणुता । अस्त्रेणेति जितायंदवा-
दयगुग्गुलं दहेत् । नारदपंचरात्रे । आवाहने धूपदीपनैवेद्ययोजने । निसमेवं प्रयुंजीत ततस्त्रामंत्रितामपि । चक्रारादि-
येपि । तथा पूजाकालं विना सत्रहितं तारस्या मचालमः । तानयाच विना पूजां कारयेत् सिद्धिलालसः । दयायात्रावसाने च ज ।

लै

सि

यद्यन्निपदं ततः मंत्रमातः पंचैव स्वादान्नरसमन्वितं । एकादशान्नतो मंत्रो यं दत्वा सर्वसिद्धिदः उद्धारः सुगमः कालिकापु
राणे । वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे । न धूपं वितरेज्जूमौ नासने न घटे तथा । यथा तथा धारयन्तं कुर्वन्तं विनिवेद।
येत् । मद्यो मत्स्यासमायुक्तान्धूपान्विनिवेदयेत् । न यक्षधूपं वितरेत्साधकाय कदाचन । यक्षधूपस्तु रालेति लोके प्रसिद्धः
विस्तुः धूपार्थे न जीवनातामिति । प्रपंचसारे । गोसर्पिषा वा तैलेन वर्माचलक्षुगर्भया । दीपितं स्वरभिस्त्रग्र्यं दीपमुच्चैः प्रदर्शी।
येत् । वाशाद्धेनोभयोरभिश्रणात्युक्तं न मिश्रीकुर्यात् स्याच्च दीपस्नेहान्तरादिकान् । कृत्वा मिश्रीकृते स्नेहे तामिस्नं नरके व्रजेत् इ
ति कालिकापुराणवचनात् । ज्ञानार्णवे । पारावतभ्रमाकारं दीपं नेत्रादि दर्शयेत् । दक्षिणे सर्पिषा दीपं तिलतैलेन वामतः सि
ता वर्त्तिं दक्षिणेतो रक्तावर्त्तिस्तु वामतः कालिकापुराणे वृक्षेषु दीपो दातव्यो न तु भूमौ कदाचन कुर्वन्तं पृथिवीतापं यो दी
पमुत्सृजेन्नरः सतामृतापं नरकं प्राप्नोत्येव न संशयः शतं समाः रुद्रयामले । नैव निर्वापयेद्दीपं साधकस्तु कदाचन यस्तु
निर्वापयेद्दीपं तस्य लक्ष्मीर्विनश्यति । कूष्माण्डेष्टदिकानारीदीपनिर्वापकः पुमान् । विधवा च दरिद्रश्च भवेत्सप्तसु जन्मसु ।
मंत्रतंत्रप्रकाशे । पायसं चामृतीयं च दत्वा नैवेद्यमर्पयेत् । सनत्कुमारकल्पे । हस्ते कृत्वा समभ्यर्च्य आपवावरणासंयुतं कद।
लीफलसंयुक्तं पायसं विनिवेदयेत् ज्ञानार्णवे शुद्धस्फटिकसंकाशं चन्द्ररश्मिसमप्रभं लसत्स्वर्णे पात्रे चारुम
हादेवि प्रिये । हिंगुजीरमरीचाढ्यैः .. रचितः शुभः वटकः कुंकुमाकारः पायसादिसमन्वितं दुग्धमावर्तितं सम्यक् कृशा।
करासारपूरितं । कपिलाघृतसंयुक्तं भृष्टं वड्वोमिमण्डकाः शर्कराफाणितानाश्चैव सर्पमुद्गोद्भवं तथा । नानाविधानि पेयानि
व्यंजनानि बहूनि च । उत्तरतन्त्रे । निधाय स्वर्णजे पात्रे साधारं तत्र मण्डले । संस्थाप्य चतुरस्रे च सेक्तुं पीढ्वा समागतः अस्त्रमं
त्रेण संप्रोक्ष्य च कवचेनावगुण्ठितं वायुबीजेन संशोष्य वह्निबीजेन संदहेत् स्प्लावनं करायेण सुधाबीजेन मंत्रवित् । अस्त्रतो

ततस्सर्वं मूलमंत्रेण तत्त्वतः स्वशास्त्रक्रमाभ्यां विधिवद्दत्वा चाभिमंत्रयेत् धेनुमुद्रां प्रदर्श्याथ गंधपुष्पैः समर्चयेत् देवमभ्यर्च्य कु
म्भीव पुष्पांजलिसितमथो हेमपात्रस्थितं दिव्यं परमान्नं सुसंस्कृतं पंचधा षड्रसोपेतं गृहाण मम सिद्धये त् मूलमंत्रं समुच्चा
र्य स्वाहान्तं जलमर्पयेत् कराभ्यां तत्समुद्धृत्य शुचिनी च सुधात्मकं निवेदयामि भवते सानुमाय जुषाण तत् सर्वं शुद्धा सुत
त्रा श्रौ नैवेद्यममृतस्तये प्राणा से तत्स्य थायानो व्यानोदान मथ ततः समानो ऽ प्युक्ताः सर्वे प्राणवायवाः हिंताः तकाः पंचमंत्राभ
वेतीहक्रमेण परिकीर्तिताः प्राणादीनां मुद्राः स्युर्ग्रहस्थाने नैवेद्यसंस्कार निवेदनप्रकारश्च प्रयोगे वक्ष्यते स्मृतिसमुच्चये
विष्णुर्वर्णिश्रुदानतं विष्णैवेद्याकभोजनं ब्रह्मादिकृतं पापं तत्क्षणाच्छुद्धजन्मनः श्राद्धकल्पे शुद्धे सामान्ने नैवेद्यं शाहा विष्णं
पिण्डं देयमितस्तुकं तेन देवतानैवेद्यमपि त्रैनैचद्देयतत्स्मात्पायादिति ज्ञानार्णवे संकल्प परमेशानस्य तिल होमविधिं चरे
त् संकल्प नैवेद्य उक्तं रत्नेच इत्यं तु संस्कृते वह्नौ देवमावाह्य मंत्रवित् सहस्रमूलमंत्रेणापंचविंशतिमाहुतीः हुत्वेदास्ये
नह विषाति स्वैर्वी पायसैः शुभैः तण्डुलैस्तिलमिश्रैर्वा मधुपुष्पकैः अंगावरणदेवानामेकैकमाहुतिं हुनेत् उद्वास्य वह्निं दे
वे च मज्जास्थानं वज्रे नः उपविश्यासने मंत्री दद्याच्च तत्र बलिं ततः ईशाने मण्डलं कृत्वा साधारं तत्र निक्षिपेत् अन्न व्यंजन
तोयाद्यं पात्रे पुष्पादि पूजिते धाताभूतानि संपूज्य ततस्तेभ्यो बलिं हरेत् भूतानां ध्यानं पीठपूजा प्रकारेण प्रोक्तं बलिमंत्रो
व स्तु सर्गप्रकारश्च प्रागेवोक्तः उद्वास्य पूजा च क्रमे देवं सात्मनि च निवेशयेति अग्निसंस्कार प्रागेवाभिहितः संक्षेपप्रकारोपि व
शिष्टः अग्न्याधानादिकं कर्म नित्य होमे न विद्यते रति नारदीये पुनराचमनं दद्यात् करोद्वर्तनमेव च पुनराचमनीयं स्वत
रापोशानं चुलुकासनं दूषदंतधावनादीन्युक्तानि प्रपंचसारे पुनर्निवेद्यमुद्धृत्य गोवत्सविश्वक्सेनाय च मुखवासादिकं दद्या॥
ति नारायणीये सकर्पूरं च तंबूलं दद्यान्मुखवासनं तथा समर्प्य मुकुटादीनि भूषणानि विचक्षणः आदर्शयेत्तथा दर्शक

सपेक्षुचचामरे' अगन्यः कर्पूरखण्डकलोत्मिश्रं नागवल्लीदलैर्युतं सुधाबिन्दुसमायुक्तं क्रमुकीफलमनोहरं' ताम्बूलं रसुना
थाय दत्त्वा कामानवाप्नुयात्' सुधाबिन्दुस्मृतिनीराजनमाह सोमशम्भुः' शिरस्यारोप्य देवस्य हवीज्ञनपवित्रकमिति' नीरा।
जनशब्देनारात्रिकमुच्यते' तन्त्रज्ञानार्णवे' आरात्रिकं ततः कुर्यात्सर्वकामार्थसिद्धये' सौवर्णे राजते कांस्ये लोकनेत्रम।
नोरमे कुङ्कुमेन लिखेन्मन्त्रं वसुपत्रं वरानने' दीपमेकं कर्णिकायां वसुपत्रेष्टदीपकान्' यवगोधूमरचितान् शक्तिराद्रु।
ग्धसंयुतान्' वलयावित शोभाभिः शोभितान्कृतशर्करान्' अभिमन्त्र्य ततो मन्त्री रत्नेश्वर्यास्ततः परं' मूलमन्त्रेण वा प्रच्छि।
ततश्चारात्रिकं चरेत्' तस्मात्रेन्तसमहत्त्वमस्तकान्ते पुनः पुनः नववारं महादेव्यास्ततो नीराजनं चरेत्' आरात्रिकं महादे।
व्याश्चक्रमुद्रां प्रदर्शयेत्' रत्नेश्वरीमन्त्रः मागेवोहृतः' कामायनीतन्त्रे' इत्थमारात्रिकं कृत्वा प्रणम्य परदेवतां' प्राणायामत्रयं
कृत्वा मूलमन्त्रेण साधकः न्यासं कृत्वा यथापूर्वं देवीं ध्यात्वा हृदम्बुजे' मूलमन्त्रं यथाशक्ति जपेत्तद्गतमानसः' श्रीकुलार्णवे'
ऋष्यादिमातृकावर्णैर्मूलमन्त्राक्षराणि च' क्रमोत्क्रमात्त्रिशः कृत्वा मन्त्रसिद्धिरितीरित' शारदातिलके' सहस्रं कुर्वतः सम्य।
ङ्मूलमन्त्रमनन्यधीः तज्जपं सर्वमप्येव देवतायै समर्पयेत्' नित्यहोमे कालान्तरमाह' दक्षिणामूर्तिः यथाशक्ति जपं।
कृत्वा नित्यहोमं समाचरेदिति शैवागमे' अष्टोत्तरसहस्रं तु तदर्द्धं विंशतिं तु वा' अष्टोत्तरशतं वापि जपं नित्यं समाहितः' ज
पो जपसमर्पणप्रकारस्तु प्रयोगे वक्ष्यते' इत्थं जपं समर्प्याथ पञ्चाङ्गानावनस्पर्वकं स्तुवीत स्तुतिभिः सम्यक्साधको मन्त्रि।
संयुतः' उत्तरतन्त्रे' पौराणिकैर्वैदिकैश्च मूलमन्त्रेण वै वरम्' प्रदक्षिणप्रणामश्च कुर्यात्तु सर्वसाधनं' ततः क्षमापयेन्मन्त्रैर्वेद्दि
मा लोमिहे ह्यपि' क्षमापनमन्त्राः प्रयोगे वक्ष्यन्ते' अत्र पौराणिकैर्वैदिकैरिति' त्रैवर्णिकपरं' मूलमन्त्रेणेति' शूद्रप' रस्तेय'
शूद्राणां पौराणिकस्तवपाठविधिं विधात्' यदुक्तं कालिकापुराणे योहाहाकामतः शूद्रः पुराणं संहितां स्मृतिं' पठन्न।

विद्यार्णव ८९

२५०

360

कमाप्नोति पितृभिः सह पापकृदिति । पंचरात्रागमोक्तत्रुष्ठवर्णोपि नाधिकारः यदुक्तं नारदपंचरात्रे । ब्राह्मणक्षत्रियविशां पंचरात्रं विधी।
यते । शूद्रादीनां न तच्छ्रोत्रपदवीमधिरोहतीति । तदुक्तं मत्स्यतन्त्रे । ब्राह्मणो वेदमन्त्राद्यैः क्षत्रियः संहितादिभिः पौराणिकाद्यैर्वैश्यस्तु
शूद्रस्तु प्राकृतादिभिः । मोहाल्लोभात्कामतः शूद्रः पुराणं संहितां स्मृतिं । पठन्नरकमाप्नोति पितृभिः सह पापकृत् । यः शूद्रो बुद्धिपूर्वं तु श्रु
णुयाच्छ्रावयेद्द्विजः वदेतौ हौडुः स्थितौ लोकःस्मिन्नवृन्ते च तारकौ । अधिकारसदाचारस्तु पनस्समदत्तोपि वा । शूद्रस्तु शृणुयाद्देस
निर्वंशाश्च निर्द्विनः अत्तानात्सेवकुतो वेदः श्राविते वा हि जन्मना । माज्ञापनमत्र यत्कृतानौ हौ शूद्रौ भविष्यत इति । शैवागमे । अधिपा
त्रे समुद्रमस्मलमुत्ताय्यमेत्रवित् । साधुवासाधुवा कर्म यद्यदाचरितं मया । तत्सर्वं भगवन् शंभो गृहाणाराधनं परं । इत्यर्घोदकमु
त्सृज्य । किंचिद्देवस्य दक्षिणकरे समर्प्य ये विहाय कृतमाराधनं शिवं । श्रीकुलार्णवे । कृतार्चनादिकं सर्वं समंचोदः पुरः स्मरेः इत:
रवीदिमनुना देवतायै समर्पयेत् इतः पूर्वमितिमंत्रः प्रागेव दर्शितः समलकुमारः उद्वासयेत्ततो देवं परिवारगणैः सह । अपंच
सारे । स्कंवेति चण्डपरिवेष्टितमौलिसेवं सहासयेत्तन्नरस्य हृदयांबुजेस्व - - - रश्मिरूपा महेशस्य शक्तितायाश्चदेवताः
श्रीशिवांगे विलीनास्ताः संतत्सर्वाः शुभावहाः इति पुष्पांजलिं दत्वा प्रणम्य परिभावयेत् । देवस्यांगे विलीनं तत् हीपमहृद्दमशो।
षतः तेजोरूपं शिवं ध्यात्वा वाहमस्वेति पुनः पुनः त्वमाध्यारोपयेत्स्वीयहृद्दंभोजमहेश्वरं । गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वर । य
त्र ब्रह्मादयो देवा न विदुः परमं पदं । विसर्जनेन मंत्रेण ततः पुरक - - - ना । ध्यायंस्तु मंत्रेणानेन नमाज्यं स्थापयेद्धृदि । तिष्ठति
पूर्वस्थाने स्वस्थाने परमेश्वर । यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठंति मद्धृदि । संहारमुद्रां बद्ध्वा च तेजोरूपां महेश्वरीं । विभाव्य पुष्पेणोद्धृत्य
वहन्नासाहृता शिवे । प्रवेशपहाद्दर्शातस्य सहस्रारसरोरुहे । विश्राम्यमध्यनाडया तामानीय हृदयांबुजे । संस्थाप्य सम्यक्संपू।
ज्यस्वात्मानं तन्मयं स्मरेत् । इति ईशपारमेश्वरवचनात् । कुलकल्लावतारे । पश्चात्मां मण्डले ऊर्ध्वीहृत्य पद्मविवर्जिते । विस

ज्ञेनार्घनिर्माल्यधारणाः पूजनायवै। निःक्षिप्य तस्मिन्निर्माल्यं। मंत्रविसर्ज्जनार्थं निर्माल्यं मंत्रेणोत समर्च्चयेत्। चाण्डेश्वरि महा
देवि निर्माल्यै स्नुदनादिभिः। लेह्यचोष्यान्नपानादिनिर्माल्यं हव्यविलेपनं। निर्माल्यभोजिने तुभ्यं ददामि श्रीशिवाज्ञया। इति नैवे
द्यशेषं मदन्नानन्नाविसर्ज्जयेत्। गणेश्वरपरामर्षिर्म्माल्यं वोदशायनिर्माल्यमीशानां मण्डलेनसत्। सम्मोहनं पञ्चरात्रे। विष्व
क्सेनाय निर्माल्यं नैवेद्यं च निवेदयेत्। शैवागमे। पूर्वोत्तरदिग्भागे तस्मात्चण्डेशं मण्डले चयेत्। देवदेवस्य निर्माल्यं पूजयेत चण्ड
शैवे। वामदेवतन्त्रे तेजश्चण्डांशस्तु निर्माल्यभोक्ता देवि शिवात्मकः। तस्मै समर्प्पयेन्नित्यं नानिषेधाक्रमेण तत्। उत्तरतन्त्रे। त
तो भास्करबीजेन सहितो नामनाममंततः। मन्त्रेण भास्करायार्घ्यमच्छिद्रार्थं निवेदयेत्। ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे।
जगत्सवित्रे शुचये सवित्रे कर्मदायिने। ततः कृताञ्जलिर्भूत्वा पवित्रामंत्रमीरितं पठंश्च मनसा वाग्भिरच्छिद्रमवधारयेत्। ॐ यच्छ
छिद्रं तपच्छिद्रं यच्छिद्रं पूजने मम। सर्वं तदच्छिद्रमस्तु भास्करस्य प्रसादतः। भास्करबीजं प्रणवरमन्त्रः समंत्रस्तत्र करणो वा तु यः
विजयमालिनीतन्त्रे। प्रथितो येन देवेशि गंधशक्तावशोषितं आलोड्य किंचिन्मूलेन मंत्रयेत् हृद्यथा शिवे। मोक्षयेत्तेन तोयेन स्ना
नं मूलमंत्रतः। निर्माल्यं मस्तके धार्य्यं मूलमंत्रेण मंत्रिणा। माध्यपादोदकं देवि नैवेद्यं विभजेत्प्रिये। तत्र केभ्यः स्वयं भुक्त्वात
न्मयो विहरेत्सदावै। ननु शिवादिप्रसादस्वीकारनिषेधवचनविरोधः। तस्याशुचिपरत्वात्। स्कंदपुराणे। तन्निर्माल्यस्वीकारस्योक्त
त्वात्। यथा। ब्रह्महापि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत्। तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते। स्नापयित्वा विधानेन यो
लिंगस्नपनोदकं त्रिः पिबेत्त्रिविधं पापं तस्येहापि प्रणश्यति। लिंगस्नपनवारिभिर्यः कुर्य्यान्मूर्ध्नि सेचनं गंगास्नानफलं तस्य।
जायते त्र विपाप्मतः। तथा। निर्माल्यं देवि यो भक्त्या शिरसा धारयिष्यति। अशुचिर्भिन्नमर्यादो नरः पापसमन्वितः नरके पतते
घोरे तिर्यग्योनौ प्रजायते इति। इति कपिलपुराणे। फलं पुष्पं च ताम्बूलं अन्नपानादिकं च यत्। अदत्त्वा तन्महादेवे समीक्ष

धार्मिक ॥१९

२६१

361

एकदा च न पश्येद्वा पर्वताग्रे वा सभायां सपिशाचकः तथा तस्यै निवेद्यैव समर्थ्यमुपकल्पयेत् भविष्यपुराणे· विस्नुरुद्रान्तरं।
यथा स्त्रीगौर्य्योरंतरं तथा· गंगागौर्य्योरंतरं च यो ब्रूते मूढधीः क्रमः रौरवादिषु घोरेषु नरकेष्वपतत्यधः भविष्यपुराणे यथा
शिवस्तथा विस्नुर्यथा विस्नुस्तथा ह्युमा उमा यथा तथा गंगा चैव न रूपेन भिद्यते· विस्नुरुद्रान्तरे यत्क· भविष्योत्तरे यो ब्रह्मा स
हरिः प्रोक्तो यो हरिः स महेश्वरः महेश्वरः स्मृतः सूर्यः सूर्यः पावक उच्यते· पावकः कार्त्तिकेयोसौ कार्त्तिकेयो विनायकः गौरी·
लक्ष्मीस्तु सावित्री शक्तिभेदाः प्रकीर्त्तिताः देवदेवीं समुद्दिश्य यः करोति व्रतं नरः न भेदस्तत्र मंतव्यः शिवशक्तिमयं जगत् प
द्मपुराणे· सौराश्च शैवगाणेशा वैष्णवाः शक्तियाजकाः मामेव ते प्रपद्यन्ते वर्षापः सागरं यथा· एकोहं पंचधा जातः क्रीडया
नामभिः किल देवदत्तो यथा कश्चित् पुत्राद्याह्वाननामभिरिति विस्नुवचनं गीतासु अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च· प्रभुः
फलदाता· विस्नुपुराणे यजन्मज्ञान्यजत्येनं जपत्येनं जपल्पयः ब्रूस्तथान्यं दिन· तं सर्वभूतो यतो हरिः इत्यं सर्वत्र सर्वा
रूपेण श्रीविष्णोरेव क्रीडितत्वात्केष्टदेवताप्रसादस्वीकारे न दोषश्च हरेरिति भाति· विचारकारणमिति· अत्र दत्तानादित्यनेन न।
नैवेद्येवन्यनेन च किंचिदेयं किंचिद्भोक्तव्यमिति वा यदेयं तदभोक्तव्यमिति वा विधीयते तत्र केचिद्धि निर्णयं विनियोगा।
दोषादत्तापहारप्रसंगाच्च इत्येवं पत्रः प्रायीय इति वदंति वस्तुतः· किंचिदग्रेभागादिवस्तुभावात्कर्मान्तराणुक्तेर्निवेदन।
भोजनयोरेककर्मकत्वाच्छ्रुतिसंवादात्तत्रदेशितत्वाद्योत्तरपत्रपवत्रेयानितिष्कृतिः तस्माद्धिंहांसो विस्नुयद्दत्तं भवत्यं तु रि।
ति· नारदपंचरात्रे· यत्किंचित्तीयमश्नीयात्सुरो विसृत्तिं नेदितं· वि· वीत्कायमनसा मूत्रसाष्टशतं जपेत् इति· प्रायश्चित्त।
मधुक्तमिति· विप्रेति नारदसंबोधनं नित्यस्नानपासंतेपप्रकारः प्रयोगे वक्ष्यते· अथ नित्यस्नानायामपि या वत्या वश्यकी
क्रियास्तामाह· प्रपंचसारे· अथ पुनराचम्य गुरुः भागवद्धो विश्रोपविष्टः सन्· प्राणायामं सलिपिन्यासं कृत्वा म्य सेत्रह ष्या

१६

दीनिति। अत एव प्राणायाममात्रकाभ्याससङ्ख्यादिकं गन्धासानभिध्यायोक्तं तेनैव जपारम्भे मन्त्रं नो तु प्राणायामं प्रकल्पने।
ति। इयं प्राणायामादिक्रिया प्रकर्षेण प्रकल्प्यते। समर्थ्यते। अधिकार्यते। प्रकल्पना। अधिकारमेयाहतासामान्यासर्वेषु
'णी अससाधारणा। तेनैतैरेव सर्वेषां ह्रस्वाधिकारः अत एवैतेषामकरणे निंदा श्रूयते। यथा अगस्त्यसंहितायां प्राणाया
मैर्विना यत्कृतं कर्म निरर्थकं अतो यत्नेन कर्तव्याः प्राणायामाः शुभार्थिभिरिति दक्षिणामूर्त्तिकल्पे। जपाद्यं सर्वमन्त्रा
णां विन्यासेन लिपिर्विना। कृतं तन्निःफलं विद्यात्तस्मादादौ लिपिं न्यसेदिति। कपिलपञ्चरात्रे। ऋषिच्छन्दोदेवतानां विन्या
सेन विना यदा। जप्यते साधितोऽप्येष मन्त्रस्तुच्छफलं भवेत्। गौतमीये। ध्यानं जपार्चना होमाः सिद्धमन्त्रकृता अपि। अन्
विन्यासविध्युरात्तदास्यन्ति फलं न हि। अत एव विहितानुष्ठाने दोषमाह। याज्ञवल्क्यः। विधिहीनं तु यत्कर्म करोत्यविधिना नरः।
फलान्न किंचिदाप्नोति क्लेशमात्रं हि तस्य तत्। उत्तरतन्त्रे। प्रवासे पथि दुर्गे वा व्याध्याताऽशौचे जलेऽपि वा। कारागारनिबद्धो वा
मायावेशगतोऽपि वा। मनोभये समुत्पन्ने सिंहव्याघ्रभयाकुले। परचक्रागमे चैव कुर्यान्मानसपूजनं। मनसा हृदयस्थं।
न्ध्यानाद्यो यागस्वरूपकं तेनैव पृथिवीमध्ये पूजां तत्र समाचरेत्। मैवं प्रसाधनं स्नानादं तथा वन्दकमेव। अमन्त्रं सर्वमनसा।
ध्यानात्कुर्यात्पूजनं। यथा पुष्पादिभिः पूजा वहिर्देशे विधीयते। तथा हृद्यपि कर्तव्याः सर्वा अपि तत्परैः। जलं च वहु।
णादौ। मायावेशगतः गृहीतान्नपानव्रतः। अमन्त्रं सर्वमिति मैवं प्रसाधने तथा वन्द्यतिरिक्तमित्यर्थः। मन्त्रासीनो म
नसा संभवात्। मैत्रे। यः शौचनिरतो विप्रः सर्वमेवं तदाहतः। इति भागुरिकृतमन्त्रयलिखितग्रासात्पूजाणावचनात्। ना
रदपञ्चरात्रे। वाक्यान्मुह्यन्नीदारम्भप्रागंशोविप्रवासरान्। जपध्यानार्चनास्तोत्रैः कायवाङ्मनसा युतैः। अभिगच्छेज्जगद्यो
नितत्त्वाभिगमनं स्मृतं। ततः पुष्पफलादीनां अन्यायार्चनमाचरेत्। भगवद्यागनिष्पत्तिकारणं सहसंपदं। ततो योगेनया

ल:

यार्णव॰ ९५

३६२

362

गेन पूजयेत्परमेश्वरं साधकः प्रहरे विप्र इज्याकालो हि सम्मतः अर्धरात्रे चिंतनं व्याख्यातं ततः पादसमन्विताः स्वाध्यायकाले
न हि ह्विकालो न प्रनिसत्तम· दिनावसाने संप्राप्ते पूजां कृत्वा समभ्यसेत्· योगो निशावसाने च विश्रामे रतं कृते· विप्रेति
नारदसंबोधनं· आदिपदेन समिदाद्याहरणं· समित्पुष्पकुशादीनां स काल समुदाहृत इति वचनात्· अंगेन यागेने।
ति स्वयमेव विवृणोति· मध्याह्ने नदभाव पूजा वपश्च नावया· चिंतयेत्तत्र यागांगं तत्प्रसमस्ये च पूजनं मध्याह्नेत्यने।
नमध्यप·· उक्तः पशुसंदेशं विस्मुधर्मान्तरे· सायुधार्मिकपशूंश्चैव तेषां मांसं निवेदयेत् महिषाद्यं बीजपात्रं द्वि।
तो न सदैवतः पशुः कलौ न कर्तव्यः इत्याह भगवान् भृगुः इति दक्षिणापथ मध्याह्न पूजानंतरं सति संभवे कार्यं।
तथा नत्र सारसंहितायां· आतरी सोति कौचैव वज्रा सीरो च्छकी तथा· साधनाभाविनी चैति पंच याभियतेषुनः यदि लैयन यस्य
तो व्याधिरात्मनि दृश्यते तदा पूजां न कर्तुं व्याप्यमर्हे ले प्रति माहुश्च· तस्मात् तेदंतकाष्ठवाकुष्यादि होमसमप्यापिवा· इविमपद्मल
मा लोकात् प्रति मामथवा पुनः मूलमंत्र सकृज्जप्त्वा पुष्पं साङ्गं तत्र दुलिपेत ग्रंथेव्याधिभिरत्युग्रैः क्रांतश्चैवापरा सकैः तदेवाहि
ति संप्राप्य पुनः पूर्ववदाचरेत्· संप्राप्य जपहोमादिकं कार्यं यस्त्रकोगवशात्मोहवशाद्दोषमुपागतः जयेन क्षालनीय।
स्यादाने न हूतनेन च· ध्यानेनापि मुनिश्रेष्ठ तत्ताराकमिव लाब लमिति· नारदपंचरात्रवचनात्· तथा· अथ स्तनकिनः ए
जां वदास्यागमबोधिना· स्नाता नित्यं च निर्वत्यमानस्याक्रिपयातवे· बाह्यपूजाक्रमेणो वध्यानयोगेन पूजयेत्· यदि का।
मी नवक्त्रामीति संपूर्ववदाचरेत्· ज्ञासितो वसते पूजां षष्टो वागमबोधिता लब्धवा यदि वालब्धमर्घ्यपात्रादि साधनं· पूजोद
के न कर्तव्या तत्र दोषो न विद्यते· तदा संपूजयेद्देवं भावनाकुसुमादिभिः दीपीधकोऽपवल्लासिपूजामागमबोधिता· मृविको
वालवृद्धाशुद्धवीयाश्यइतिभाविता· रत्नमाद्युपप्रथमीदिचत्रक्षमुरगोत्तुजं मूलमूर्तिः षडंगानि तेषां पूजाविधीयते· अमेषा

११८

मपि सर्वेषां प्रोक्ता संक्षेपकर्मणि । सर्वेषामेव वर्णानां अत्र लाभे भावनैव हि । निर्मलेनोदकेनाथ पूरितेयाद्दूनारदः तथा पुन।
स्त्रियाः पूजा उत्तमा मध्यमाधमा । पञ्चधा वृत्तिरध्याया पूजा चाधमसंज्ञिका । विदिताखिलवेदार्थैर्ब्रह्मविद्भिरकल्मषैः क्रि
यमाणा तु या पूजा सात्विकी सा विमुक्तिदा । राजर्षिभिस्तपोनिष्ठैर्भगवन्नवेदिभिः । या पूजा क्रियते सम्यग्राजसी सा त्रिवर्गदा
स्त्रीबालवृद्धमूर्खाद्यैर्भक्तैरस्तु दमानसैः । या पूजा क्रियते नित्यं तामसी सा प्रकीर्तिता । इतरत्र तन्त्रे । आराधनासमर्थश्चेद्दद्याद्
द्रव्यं न साधनं । योऽदानं नैव शक्नोति कुर्याद्दीक्षान्दर्शनं । नैकं तु यस्य वित्तं तत्सोऽयोग्यो भवेन्नान्यथा । यस्तु भक्त्याश्रयेत्तन्नम
यं संपाद्य चाखिलं । साधनं चान्तिये हि ह्यात्समग्रफलं लभेत् । कुम्भसंभवः । स्वस्थः समर्थः कुर्वीत चोत्तमैरेव साधनैः । मध्य
मो मध्यमेनैव न्यूनैर्न्यूनैस्तपोधनः । आपन्नश्चेत्समर्थोऽपि न्यूनैरेव समाचरेत् । पूजाकर्मविशेषं स्वदेशकालानुसारतः । तथा
मेरुतन्त्रे । अग्रयस्तु तकितोऽनिर्संवेदिकं न तु स्मरतीति तं । कृतान्तोऽग्निकपूजादि संनसेवसमाचरेत् । इति । भविष्यपुराणे । विभ
वे सति यो मोहान्न कुर्याद्विधिविस्तरं । न तत्फलमवाप्नोति प्रलोभाक्रान्तमानसः । शिवयामले । विचापित्तवनमेकलिंग।
वृक्षोद्भवजलं मंगमचनरोपदेशो । अपिपिशाचगादिते विमुच्य शास्त्रं निजं गृहस्थवत्पूजनं मुमुक्षोः । अरण्ये स्वस्य कामान्तो।
सिद्ध्यर्थं पूजनं हितं निष्कामाणां मुमुक्षूणां गृहे शास्त्रसदाश्रितं मी । ॥ इति श्रीविद्यार्णवे प्रकोनविंशतितमः श्वासः ॥
अथ नित्यपूजाप्रयोगः । तत्र श्रीमान् साधको रजनीतुर्ययामे ध्यानात् हृन्नि लोगेन समुत्थाय स्वेष्टदेवतां स्मृत्वा वामपादे भु
वि विन्यस्योत्थाय गृहाद्बहिर्निर्गत्वा वयपके कृत्वा हस्तौ पादौ प्रक्षाल्य परिव्यवासः परित्यज्य धौतेवाससी परिधाय याचमदेव।
तायागमंदिरं समार्ज्य गोमयेनोपलिप्य वितानादिभिरलंकृत्य तत्र स्वासने उपविश्य पूजामन्त्रं निर्माल्यमपकृष्य मद्रास्त्रमे।
स्यात् प्राणायामादि त्रयषडादि मासं पूर्वकं पूर्वदिनपूजावशिष्टपत्रादिना । मूर्तिं विरभ्यर्च्य पायाचमनीयदत्वा देवायक १

विद्यार्णव·१५

३६३

363 नि:

रत्नकलशैर्दत्तथावनेकारयित्वास्र गंधजलैर्गंगादुग्धमधुरस्वच्छान्नादिदत्वा पुनराचमनीयं निवेद्य करस्पर्शोंकृत्वा यज्ञसूत्रमिति।
मलवस्त्रं दत्वा शिरसि स्थितसहस्रदलकमलकर्णिकायां श्रीगुरुं हंसेन नवरत्नाभरणभूषितं वराभयज्ञानमुद्राङ्कितकरकरं चंद्र।
कोटिनिभं सम्यक्समभ्येतं गंधानुलेपनं स्वेतमाल्यविभूषितं वामांगकृतया रक्तवस्त्रिया रक्तवस्त्राभरणगंधमाल्यविभूषित
या वामकरधृतलीलाकमलया देव्या दक्षिणभुजेनालिंगितं विनेत्रं शान्तमंतश्चित्तं विशिवरूपिणं ध्यात्वा तच्चरणारविंदयुग।
लं हृत्पीठस्थाय्यास्वदेहमभिषिक्तं संचिंत्य श्रीअमृतकानंदनाथश्रीपादुकां पूजयामीति तद्गुरुणा तत्कुलसंकेतनाम्ना
तदत्तेन श्रीगुरुभ्यो नमः इति मंत्रेण वा गंधाद्युपचारैर्मनसा वा संपूज्य आनंदमानंदकरं प्रसन्नं ज्ञानस्वरूपं निजभाववृक्तं
योगींद्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि इति प्रणम्य स्वहृदि लयं भावयेत् ततो मूलाधारादि ब्रह्मरंध्रांतर्द्य।
तत्सूर्यसहस्रप्रभं स्वशुभांतःतेजोदर्शनिभं मूलमंत्रं ध्यात्वा तत्तेजसा व्याप्तं स्वशरीरं संचिंत्य वज्रमाला विधिनामूलमंत्रे
ण प्राणायामत्रयं कृत्वा वक्ष्यमाणऋष्यादिकरषडंगन्यासान्विन्यस्य हृदयकमले वक्ष्यमाणरूपं देवं ध्यात्वा मानसैरुपचारैः
संपूज्य मूलमंत्रं यथाशक्ति जपित्वा जपं समर्प्य स्तुत्वा प्रणम्यैवं लोकं चैनममयादिदेवश्रीशंकर तच्चरणात्यैव प्रातः स
मुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये संसारयात्रामनुवर्तमानेनदास्तथा शंकरादेवदेव स्पर्धातिरस्कारकलिप्रमा।
दभयानि मां माभिभवंतु नाथ जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः त्वयेंद्रियाणामधिदेवतेन यथा नियुक्तो
स्मि तथा करोमि एतेषामर्थं न श्लोकाः गणेशाद्युपास्यके यथायोग्य सूक्ताः इति प्रार्थ्य समुद्रमेखले देवि पर्वतस्तनमंडले।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे इति भूमिं प्रार्थ्य वामसावसारेण तस्यां पादं निधाय येष्टदेवतानामादीन्यात्यायप
देपदे स्वमंत्रं स्मरन्ग्रामाद्बहिर्याम्यां नैरृत्यां वा दिशि शरक्षेपमतीत्य अहरंगनामसमार्गोक्तप्रकारेण ध्यात्वा दिनादीनुद्दा

स्का

१

ग्निरश्विंयमि॰ उरुस्वंदंतरयिर्नमेधंमजयाहजनसे॰ अग्निर्दात्राविराणोवीरेपेशान्न्राग्निरृषिंयः सहस्रान्नोति अग्निर्द्दिविहव्यमान
ज्ञानाग्नेर्थीमानिविभृताषुरुत्रा॰ अग्निस्तक्ष्येरुरवपोविहूयतेग्निंनरोयामः। निवाधितासः अग्निर्वयोंतरिक्षेपतंतोग्निः सहस्रा
परियातिगोनो॰ अग्निर्विशाईलतेहनुषियो॰ अग्निंमनुषोविज्ञाताः अग्निर्गांयवींपथ्यामृतस्याग्नेगीमतिश्रृतयानिषंतः अ
ग्नयेब्रह्मऋभवस्ततक्षुरग्निंमहामवोचामासुवृक्तिः अग्नेप्रावजरितारंयविष्ठाग्नेमहीद्रविणमाजयस्व॰ अथैतस्यप्रयोगः
ततः पश्चिमैः अथमंत्रप्रतिष्ठितयंत्रचक्रादिकमग्निशाहुरहितैः शाता कृत्वास्तुहुजलेरभिषिंच्यानेनैरग्निशाहुसहितैः शाता।
याहृत्वाभिषिंचेदिसम्यङ्मारणविधिः ततः [illegible]रिभिः शुद्धजलेनप्रक्षालनेयात मयचक्रस्यस्फटिकस्यजले
नैवक्षालनंकार्यमिति॰ अथकालीमतेचक्रप्रतिष्ठाविधिस्कंवामकेश्वरतंत्रे॰ भैरवउवाच॰ चक्रभेदंमहादेवतत्वसारात्म।
याकृते॰ इदानींश्रोतुमिच्छामिप्रतिष्ठाक्रमनि[..]यं॰ शंकरउवाच शृणुदेविमहाभोगजगत्कारिणिकौलिनि॰ तस्यो
द्यापनकर्मोणसर्वकार्याणिविनिर्णिये॰ स्नात्वासंकल्पयेन्मंत्रीगुरोरर्चनमारभेत् पंचगव्यंततः कृत्वाशिवमंत्रेणमंत्रितं तत्र
चक्रंक्षिपेन्मंत्रीप्रणवेनसमाकुलं तदुद्धृत्यततश्चक्रंस्थापयेत्ताम्रपात्रके॰ पंचामृतेनदुग्धेनशीतलेनजलेनच॰ चंदने।
नसुगंधेनकस्तूरीकुंकुमेनच॰ पयोदधिघृतक्षौद्रशर्करायैरनुक्रमात्॰ तोयपूर्पोतैरेः कुर्यात्पंचामृतविधिंबुधः हाट।
कैः कलशैर्देवीमष्टभिर्वारिपूरितैः कषायजलसंपन्नैः कारयेत्स्नानमुत्तमं॰ स्नानंसमाप्यतांदेवींस्थापयेत्स्वर्णपात्रके॰ पंच
राज्ञायविद्महेमहायंत्रायधीमहि॰ तन्नोयंत्रःप्रचोदयात्॰ स्पृष्ट्वायंत्रंकुशाग्रेणगायत्र्याचाभिमंत्रयेत्॰ अथैनरक्षांतदे।
विदेवताभावसिद्धये॰ आत्मशुद्धिंततः कृत्वाषडंगैर्देवतांयजेत्॰ तत्राचार्यमहादेवींजीवन्यासंचकारयेत्॰ उपचारैःषोडश
भिर्महामुद्रादिभिःसदा॰ फलतांबूलनैवेद्यैर्देवींतत्रसमर्चयेत्॰ पट्टसूत्रादिकंदद्यात्सालंकारमेवच॰ शुक्लांरचामरंघंटां

देवि

यथायोग्यं मेरुस्थाः सर्वमेतत्प्रयत्नेन दद्याद्दात्महितेरतः ततो जपेत्सहस्रं च सकलेप्सितसिद्धये बलिदानं ततः कृत्वा प्रणमे
च्चक्रराजकं अष्टोत्तरशतेनैव संपातान्यं विनिःक्षिपेत् होमकर्मण्यशक्तश्चेद् द्विगुणं जपमाचरेत् यंत्रमेवं समानीय।
स्वर्णाभूषणाद्यलंकृतं गुरवे दक्षिणां दद्यात्ततो देव्या विसर्जनं अथ प्रयोगः तत्र साधकः कृतनित्यक्रियः स्वस्तिवाचन
पूर्वसंकल्पं कुर्यात् अद्येहेत्यादि अमुकगोत्रोऽमुकदेवशर्मा अमुकदेवतायाः श्रुत्यादिमसुकयंत्रसंस्कारमहं करि॥
ष्ये इति संकल्प्य पंचगव्यमानीय होमिन्पष्टोत्तरशतमभिमंत्र्य इमिति यंत्रं तत्र निक्षिपेत् तस्मादुद्धृत्य पात्रांतरे स्थापयेत्
ततः शीतलजलचंदनकस्तूरिकुंकुमैः स्नापयित्वा पंचामृतेनाग्रे नद्धौं इति शोधयित्वा स्नापयेत् तत्र क्रमस्तु क्षीरेण स्नाप्य।
पुनः शुद्धजलैः स्नाप्य पूजयेत् एवं दधिघृतमधुशर्कराभिः ततोऽष्टभिः कलशैः कुंकुमरोचनाचंदनमिश्रितैः स्नापये
न्मूलमंत्रेण सर्वत्र ततो यंत्रं गृहीत्वा स्वकुशाग्रेण स्पृशन् यंत्रराजाय विद्महे महायंत्राय धीमहि तन्नो यंत्रः प्रचोदयात् इत्य।
ष्टोत्तरशतवारमभिमंत्र्य प्राणप्रतिष्ठां कुर्यात् ततस्तत्रेष्टदेवतामावाह्य षोडशोपचारैः संपूज्य षडंगेन पूजयेत् तत्र पह।
स्त्रादिकं दत्वा अष्टोत्तरसहस्रं जपेत् शक्त्या च बलिं दद्यात् ततोऽष्टोत्तरशतहोमं कृत्वा प्रत्याहुति संपातं कुर्यात् होमासा।
मर्थ्ये द्विगुणो जपः कार्यः ततो गुरवे स्वर्णालंकृतां गां दक्षिणां च दत्वा छिद्रावधारणं कुर्यात् इति इत्थं प्रतिष्ठितं यन्त्रं।
लिखितं चंदनादिमण्डिते पुरतः मोक्षपीठे संस्थाप्य तत्र मूलमंत्रेण पुष्पांजलिं दत्वा आवाहनादि पाद्यार्घ्याचमनं किंचि।
न्मात्रं तोयेन गृहीत्वा तेन जलेन स्वात्मानं ध्यायन् मूलमंत्रेण मूर्ध्नि हृदये गुह्ये पादयोः सर्वांगे च पंचपुष्पांजलीन् दत्वा धू
पदीपनैवेद्यान् शाम्भवं त्रिलाधारे चतुरस्रं कुण्डं संचिंतयेत् कुण्डस्थामात्मकं परमात्मवह्निं संचिंत्य मूलमंत्रमुच्चार्य विषमीथम।
हविर्दीप्ते आत्मात्मीयमनसा स्रुचा षड्गुणावर्त्तमातितमसा वृत्तीर्जुहोम्यहं पुण्यं जुहोमि स्वाहा इति मूलमात्रकं स्तोक . . . .

देवदत्त इत्यर्थः   देवतायाचामे

पापं जुहोमि स्वाहा। एवं पुण्यपापे हुत्वा कृत्स्नं संकल्पविकल्पौ धर्मं च ष्टयकं कृत्वा पुनर्मूलं प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनी ॥
नीसुचं धर्माधर्मकलास्नेहपूर्णं वह्नौ जुहोम्यहं स्वाहा। इति धर्माधर्मात्मकं सकलप्रपंचकं हुत्वा कृत्वा तेन कृत्वा निरस्तनिखिलो
पाधितया निरतिशयस्वानंदघनचिद्विलासात्मकं स्वात्मानं ध्यायन्प्राणायामसौ दिकरषडंगन्यासपूर्वकं मूलमंत्रमष्टोत्तर।
शतवारं जपित्वा जपं समर्प्य श्रीदेवीजलेन रत्नचक्रमध्यस्थचक्रस्योत्तरभागे गुरुभ्यो नमः। दक्षिणे गणपतये नमः। इति सं।
पूज्य रत्नचक्रस्याधस्तादतलादि सप्तपातालभावनया। ॐ मण्डूकाय नमः। पवकालाग्निरुद्राय नमः। मूलप्रकृत्यै आधार।
शक्त्यै नमः। अनंताय नमः। वाराहाय नमः। इति संपूज्य वराहदंष्ट्रोपरिस्थितायै नमः। तस्यास्सुधार्णवाय नमः। तस्मिन्नव
रत्नमयद्वीपाय नमः। तन्मध्ये स्वर्णपर्वताय नमः। तदुपरि नंदनोद्यानाय नमः। तदुपरि कल्पवृक्षेभ्यो नमः। तेषां मध्ये विचि।
त्ररत्नभूम्यै नमः। तन्मध्ये स्वर्णप्राकाराय नमः। तन्मध्ये रत्नमण्डपाय नमः। तस्यांतः स्वर्णवेदिकायै नमः। तदुपरि रत्नसिं।
हासनाय नमः। इति तत्तद्भावनया संपूज्य रत्नचक्राधारपीठे सिंहासनत्वेन परिकल्प्य तस्य चाग्नेयादिकोणचतुष्टये पाद।
चतुष्टये धर्माय नमः। ज्ञानाय नमः। वैराग्याय नमः। ऐश्वर्याय नमः। इति प्रादक्षिण्येन संपूज्य स्वाग्रादिपीठगात्रचतुष्टये
अधर्माय नमः। अज्ञानाय नमः। अवैराग्याय नमः। अनैश्वर्याय नमः। इति प्रादक्षिण्येन पूजयेत्। ततः सिंहासनस्य मध्ये मा
यायै नमः। विद्यायै नमः। इति मायाविद्ये पट्टसूत्रमयपट्टिकारूपेण लौकिकमंचवद्दीर्घमान रूपेण ग्रथिते स्थिते ध्यात्वा संपूज्य
तदुपरि अनंताय नमः। इति तल्पाकारमनंतं संपूज्य तस्य मूर्ध्नि पद्माय नमः। आनंदकंदाय नमः। संविन्नालाय नमः। तद्दलेषु।
प्रकृतिमयपत्रेभ्यो नमः। तत्केसरेषु विकृतिमयकेसरेभ्यो नमः। तत्कर्णिकायां पञ्चाशद्वर्णबीजाढ्यतत्त्वरूपायै कर्णिकायै।
नमः। केसरेषु अर्कमण्डलाय नमः। कर्णिकायां सोममण्डलाय नमः। पत्रेषु वह्निमण्डलाय नमः। तथैव ब्रह्मणा विसर्वे

मायातत्वात्मने

विद्यार्णव· २०

३६०

३२०

रुद्राय· नं ईश्वरसंप्रबोधात्मने मन्त्राय· रं प्रकृत्यात्मने हंसे· नं सोहमात्मने नमः· अं आत्मने· अं अंतरात्मने· पं परमात्मने· ह्रीं
ज्ञानात्मने· सिंहासनस्य स्वाग्रादि चतुर्दिक्षु क्रमशो चचानतत्वात्मने· कलातत्वात्मने· विद्यातत्वात्मने नमः परतत्वात्मने न
मः इति संपूज्य तत्केसरेषु ग्रावि प्रादक्षिण्यक्रमेण वामादि नवपीठशक्तीः पीठमंत्रेण समस्तं पीठं च संपूज्य तत्र मूल
मंत्रमुच्चार्य श्रीशिवादिमूर्तिं परिकल्प्य आमीति पीठमध्ये शिवलिंगादि तदभावे पुष्पादिकं वा निधाय ध्यानोक्तां मूर्तिं वि
भावयन् नमः इति कल्पितां मूर्तिं पूजयेत्· अथ पंचावरणतो चेत्सध्ये शिवपूजायां देवस्याग्नेयादिकोणचतुष्टये सृष्ट्यंगाणां प्र
दुर्गाविघ्नेशं स्थाप्य गणेशादिक्रमेणानंतकसूक्ष्मविधिनात्तत्रयं चैव नव्यसीवपूजापुरःसरं पुष्पचयं कृत्वा गंधाक्षतादीप
चारैः संपूज्य तत्र मंत्रं जपस्तोत्रपाठप्रणाममन्त्रमौपचारादिभिः परितोषयेत्· एवं बिल्वादिपूजायां प्रमाणोक्तप्रकारेण कोणेषु
देवता। संख्याप्रमाणोक्तप्रकारेणाग्नेयाद्यग्नि देवताः पूजयेत्· अथ पंचायतनपूजायामपि शम्भुपूजकया मध्ये प्राचीं दिशं।
परिकल्प्य तदनुसारेणाग्नेयादिकं कल्पयेदिति· ततः पुनर्मूलमंत्रेण प्राणायामत्रयं मूलमंत्रस्य षडंगादिकोष्ठं कृत्वा करांभ्यां पु।
ष्पांजलिमादाय पद्मासने बद्धा पूर्वोक्तमात्रकां भोजनेन ध्यानात्पद्मासनेनोपविष्टो ऋजुकायोऽन्तर्मुखो गुदमेढ्रयोरन्तरालस्थ
मूलाधारस्य मध्यस्य चतुर्दलपंकजदलेषु वियोनत्रिकोणस्थिताविषमष्टये सकेसरपीतवर्णां मूलाधारे विंदुस्तन्मध्ये
सोमसूर्याग्निमयाकर्षादि त्रिरेखात्रिकोणं विभाव्य तन्मध्ये सूर्यकोटिप्रतीकाशं चंद्रकोटिसुशीतलं जपाकुसुमप्रभं ज्योतिर्लि
गं ध्यात्वा तत्तु यदि चित्रूपां तदिन्नेकोटिप्रभां दीप्तां विसतंतुतनीयसीं प्रसुप्तभुजगीवसार्धत्रिवलयेन सर्वात्मयामितया स्थितां पर।
ब्रह्मविनाभूतां कुण्डलिनीं शक्तिं चिरं विभाव्य गुरूपदिष्टविधिना गुदाकुंचनपूर्वकं हंकारेण तां कुण्डलिनीं मुत्थाप्य सुषुम्णामार्गेव।
मेना मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाषट्चक्रभेदेन ब्रह्मरंध्रे नीत्वा तत्रस्थपरमात्मना बुद्ध्या परमात्मनि संयोज्य

शिवशक्त्यात्मकं तत्तेजो वहन्नासाधनातिः साध्यकरस्य पुष्पांजलौ संयोज्य मूलमंत्रमुच्चार्य श्रीशिवेहागच्छ गच्छेति चक्रमध्य।
स्थितमूर्त्तौ· शिवस्थितपुष्पांजलिमध्ये पेणतत्तेज आवाहनीमुद्रया समावाह्य तन्तद्धृदयं प्रेणोऽप्रविष्टं संचिंत्य श्रीशिवादिरूपेणोपवि।
णितिध्यानोक्तरूपं तद्ध्यायन् मूलमंत्रमुच्चार्य श्रीशिवेह तिष्ठेति स्थापनीमुद्रां प्रदर्श्य देवेश भक्तिसुलभ सर्वाभरणसंयुत· या
वत्त्वां पूजयिष्यामि तावदत्र स्थिरो भव· इति प्रार्थ्य पुनर्मूलमंत्रमुच्चार्य· श्रीशिवेह सन्निधेहीह सन्निधेहीति सन्निधापनमुद्रया।
सन्निधाप्य मूलमुच्चार्य श्रीशिवेह सन्निरुद्धो भवेह सन्निरुद्धो भव पुनर्मूलं श्रीशिवेह सन्मुखो भव· नितत्तन्मुद्रया विधा।
य पुनर्मूलं श्रीशिवेहावगुंठितो भवेहावगुंठितो भवेत्यवगुंठ्य देवस्य हृदयादिषडंगन्यासं स्थाने षडंगमंत्रानित्यस्य मूलमु
च्चार्य श्रीशिव सकलीकृतो भवेति सकलीकृत्य धेनुमुद्रां बध्वा देवस्य मूर्द्धन्यमृतवृष्टिं धारयन् मूलमुच्चार्य श्रीशिवामृतीकृतो।
भवामृतीकृतो भवेत्यमृतीकृत्य महामुद्रां बध्वा मूलमुच्चार्य श्रीशिव परमीकृतो भव परमीकृतो भवेति देवस्य मूर्द्धि परमामृतं वृ।
ष्टिं ध्यात्वा मूलमंत्रं ततः ऐं देव देवा वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरु कुरु क्लीं सौः मोक्षं कुरु कुरु सौः ह्सौः
इति त्रीयनीमकारादिक्षकारांतां मातृकां चोच्चार्य पीठ्योदकेनेदं वित्रिः प्रोक्ष्य देवस्य हृदयं स्पृष्ट्वा न्यस्वीकृत प्राणप्रतिष्ठामंत्रे मम पद।
स्थाने श्रीशिवस्येति पदं प्रक्षिप्य प्राणप्रतिष्ठामंत्रं जपन्देवस्य प्राणप्रतिष्ठां विधाय मूलमंत्रमुच्चार्य श्रीशिवायनम इति त्रिः पु
ष्पांजलिं दत्वा लिंगयोनित्रिशूलाक्षमालावराभयमृगखट्वांगकपालडमरुकाख्या दशमुद्राः प्रत्येकं कामबीजेन विरच्य मूलमं
त्रेण प्रदर्श्य ॐ इति मुंच रिति प्रोक्त दशमुद्राः· प्रदर्श्य मूलमुच्चार्य श्रीशिव एतत्ते आसनं नमः इति वाह्ने चामे वाह्ये यो पुष्पैतेन सवा।
यथ्यासं मम वसासने देवस्य वामभागे विमर्शहृं हे हंस दमिदं गृहाण वोदेतिनिवेद्य मूलेन पद्ममुद्रां प्रदर्श्य पुनर्मूलमुच्चार्य श्रीशि।
वाय नम इति पुष्पांजलिं दत्वा पुनर्मूलमुच्चार्य श्रीशिव कुशलं तव स्वागतमिति कुशल स्वागतं कृत्वा कुशल स्वागत मम मुद्रां प्रदर्श्य।

पुनर्मूलमुच्चार्य श्रीशिवपर्षदेभ्यः स्वाहा इति पूर्ववत्स्थापितार्घ्यपात्रात्पुष्पाक्षतयवकुशाग्रतिलशालिपद्मदूर्वान्वितं जलं पात्रान्तरे।
गृहीत्वा देवस्य शिरसि दत्वा ॐ ह्रं ह्रं ह्रं ह्रं इदमर्घ्यं स्वाहा स्वाहेति निवेद्यार्घ्यमुद्रां प्रदर्श्य मूलमुच्चार्य श्रीशिवाय नमः इति पुष्पाञ्जलिं।
दत्वा पुनर्मूलमुच्चार्य श्रीशिवैतत्ते पाद्यं नमः इति पाद्यपात्रात् श्यामाकदूर्वाब्जविष्णुक्रान्तान्वितं जलं पात्रान्तरे गृहीत्वा देवस्य पादयो।
र्दत्वा ॐ ह्रं ह्रं ह्रं ह्रं इति मन्त्रेण भगवन्निवेद्य मुद्रां प्रदर्श्य मूलेन भगवत्पुष्पाञ्जलिं दद्यात् अत्र सर्वोपचारेषु प्रोक्तमन्त्रेण निवेदनं मूलमन्त्रेण
पुष्पाञ्जलिं च सर्वोपचारे कुर्यात् ततश्चाचमनीयपात्राज्जातीफललवङ्गकङ्कोलचूर्णयुतजलं पात्रान्तरे गृहीत्वा मूलमुच्चार्य
श्रीशिवैतत्ते आचमनीयं स्वधेति देवस्य मुखकमले दत्वा भगवन्निवेद्याचमनीयमुद्रां प्रदर्श्य पुष्पाञ्जलिं कृत्वा मधुपर्कपात्रं गृहीत्वा।
मूलमुच्चार्य श्रीशिवैष ते मधुपर्कः स्वधेति देवस्य मुखकमले दत्वा भगवन्निवेद्य मधुपर्कमुद्रां प्रदर्श्य पुष्पाञ्जलिं कृत्वा पुनराचमनी
यपात्रात्पात्रान्तरे जलं गृहीत्वा मूलमुच्चार्य श्रीशिवैतत्ते पुनराचमनीयं स्वधेति पुनराचमनीयं दत्वा भगवन्निवेद्याचमनीयमुद्रां
प्रदर्श्य पुष्पाञ्जलिं दत्वा रत्नपादुके उपनीय पादुकायुगमारुह्य भगवन् रत्ननिर्मिते स्नानमण्डपमायाहि स्नानार्थं शङ्कि दिग्गत।
मिति प्रार्थ्य पूर्वस्यां दिशि विरचितं स्नानमण्डपं नीत्वा भगवदासनं दत्वार्घ्यपाद्याचमनीयानि भगवन्निवेद्य सुगन्धतैलादिकमुपनी।
य श्रीशिवैतत्ते सुगन्धतैलाभ्यङ्गं सुगन्धामलकाद्युद्वर्तनादिकं च नमः इति सुगन्धतैलाभ्यङ्गं निधाय महाराजोपचारस्नानविधिना जलैरभि
षिञ्चेद्गङ्गादितीर्थोदाहृतजलपूरितकलशहस्ताभिर्देवकन्याभिरभिषिक्तं मत्वा भगवन्निवेद्य स्नानमुद्रां प्रदर्श्य मूलेन पुष्पाञ्जलिं द।
त्वा भगवदाचमनीयं दत्वा जलापकर्षणार्थं वस्त्रं दत्वाङ्गमोञ्छनं परिकल्प्य श्वेतदुकूलयुग्ममानीय वस्त्रमिति वरुणबीजेनाभिमन्त्र्य ज
लेनाभ्युक्ष्य मन्त्रेण बृहस्पतिर्देवताभ्यां वासोभ्यां नमः इति संपूज्य मूलमुच्चार्य श्रीशिवैतत्ते वाससी नमः इति वाससी परिधाप्य श्वेतत्रि
वेष्टवस्त्रमुद्रां प्रदर्श्य पुष्पाञ्जलिं दत्वा यज्ञोपवीतमुद्रां प्रदर्श्य भगवदाचमनीयं निवेद्य रत्नपादुके उपनीय पादुकायुगमारुह्य भ।

गवन्रत्ननिर्मितं॰ आगच्छ निर्मितं यावन्ममलंकारस्य मणितं इति दक्षिणादिशि तमलंकारमणिडं नीत्वा ततः सिंहासने उपवेशयना
नाविधालंकरणानि समुपनीय भगवन्नोस्मि नानादेवतेभ्यो मुकुटाद्याभरणेभ्यो नमः इति संश्रन्य मूलमन्त्राद्यैः श्रीशिवतन्त्रे मुकुटं न
मः पत्रे कुण्डले नमः इति नानाभरणानि तत्तन्नाम्ना समर्प्य निवेद्याभरणमुद्रां प्रदर्श्य पुष्पाञ्जलिं दत्त्वा पादुके उपानीय पादु।
के परिधाय शेषं पंचवायवः सरे॰ यागमण्डपमायाहि परिवारगणैः सह॰ इति मार्ग्य यानमण्डपं नीत्वा ततः आकुलित।
योगपीठे देवं समुपवेश्य छत्रचामरादिनानाविधोपकरणाग्रहस्तं सपरिवारदेवतागणं स्फुल्लिकिरणसमूहमिव देवशरी
राद्धिनिर्गत्य स्वस्वस्थाने समुपविष्टं विशेषाद्वुक्तौ प्रधानदेवता सहस्राकाराभरणाद्यादिशोभितं स्थिरीभूतं तत्परीत समुक्रमध्ये।
ध्यात्वा चंदनागुरुकर्पूरादिनानागंधमानीय भगवन्नाद्यगंधं देवसायगंधाय नमः इति संश्रन्य मूलमन्त्राद्यैः श्रीशिवेषतेगं
धो नमः इति दिव्यायगंधं समर्प्य शरीरे तेन नानाभिषेच्छीते वचनेवच॰ मयानिवेदितानां धाम्रतिमत्संविलिप्यतां॰ इति प्रश्रन्य मू।
लमन्त्राद्यैः श्रीशिवे मानिते पुष्पाणि वौषट्ः इति नानाविधानि सुगंधपुष्पाणि समर्प्य भगवन्निवेद्य पुष्पमुद्रां प्रदर्श्य देवं।
संश्रन्य देवहृदयादिषु षडंगन्यासस्थानेषु षडंगानि लयांगत्वेन संश्रन्य श्रीशिवपरिवारदेवतार्चनार्थमनुज्ञां देहीति देवं।
आप्य तन्त्रलोकावरणदेवताः पूजयेदिति॰ अस्य मे गणावरणदेवताः संश्रन्य तद्बाह्ये देवाग्राय पूर्वदिक्क्रमेण लोकेन्द्राय स्व
राधिपतये पीतवर्णाय वज्रहस्ताय ऐरावतवाहनाय नमः॰ रे अग्नये तेजोधिपतये रक्तवर्णाय शक्तिहस्ताय मेषवाहनाय नमः।
रे यमाय प्रेताधिपतये कृष्णवर्णाय दण्डहस्ताय महिषवाहनाय नमः॰ रे निर्ऋतये रक्षोधिपतये धूम्रवर्णाय खड्गहस्ताय प्रेत।
वाहनाय नमः॰ रे वरुणाय जलाधिपतये शुक्लवर्णाय पाशहस्ताय मकरवाहनाय नमः॰ रे वायवे प्राणाधिपतये कृष्णवर्णायांकु
शहस्ताय मृगवाहनाय नमः॰ रे कुबेराय यक्षाधिपतये मौक्तिकवर्णाय गदाहस्ताय नरवाहनाय नमः॰ रे ईशानाय विद्याधिपतये।

यात्रीव॰२० ३७२

रासनोभूत्वामूलाच्चक्रसमज्वलां सूर्यकोटिप्रतीकाशां भावयेच्चिरमात्मनः आपादतलपर्यन्तं प्रसृतं जीवमात्मनः सं
हृत्यक्रमयोगेन मूलाधारपदं नयेत् तत्रकुण्डलिनी शक्तिं संवर्त्तितलसन्निभां जीवंनिजंचेन्द्रियाणि ग्रसंतीं चिंतयेद्वि
या संप्राप्यकुंभकावस्थातडिज्वलनभासरं मूलादिनायतिर्दे विसाधिष्ठानपदंलभेत् तत्रस्थं वीजमखिलं ग्रसंतीं चिंतये

३०

इती॰ तडित्कोटिप्रतीकाशं तस्याइन्तीवसत्वरं मणिपूरपदं प्राप्य तत्र पूर्ववदाचरेत् तत्र छित्वा तदग्रं देवि पूर्ववद्योगमार्गवित् अनाहतं
नयेद्योगी तत्र पूर्ववदाचरेत् ततो विशुद्धावानीय कुण्डलीं पूर्ववच्चरेत् उन्नीय तस्माद्भ्रूमध्ये नीरन्ध्रीं रसेन सुनः यत्तत्तीरं महाशक्त्या
कोटिसूर्यसमप्रभं मनसा सह वागीशपाभित्वा ब्रह्मार्गलं क्षणात् परामृतमहाबोधो विश्रान्तिं तत्र कारयेत् तत्रस्थं परमं देवं
शिवं परमकारणं शक्त्या सह समायोज्य तयोरैक्यं विभावयेद्दिने॰ तानि सन्क्रान्तिकालं वंचयित्वा यदि जीवितुमिच्छेत्तदा वरारोहे
तथ्यादिन्यपि तत्रोक्तं तद्यथा यदि देवि तनुत्यक्तः कालं कालविभागवित् कालस्य यावद्बहुजन्मादिवस्तत्रस्थं वसेत् ब्रह्मद्वारार्ग
लस्याधो देहे काल प्रयोजनं तस्मान्मूर्ध्नि पदं देयं नहि काल प्रयोजनं यदा देव्यात्मनः कालमतिक्रान्तं प्रपश्यति यदा ब्रह्मार्गलं भि
त्वा शक्तिमूलपदं नयेत् शक्तिदेहप्रसूतं तत्स्वजीवेन्द्रियैः सह॰ तत्तत्कर्मणि संयोज्य स्वस्य देहः स्वयं व्रजेत् अनेन देवि योगे
न वंचयेत्कालमागतमिति॰ अत्रारोहावरोहाभ्यासयेव सर्वयोगगणस्तु सुषुम्नाख्यो योगस्त्विद्वह्व्यं संचात्र प्रकाशिनः अ
त्र पंचादलगामिनि चिन्ते पंचाशद्वर्णयोजायने तदुक्तमथ स्वविवेके॰ गुदलिंगान्तरे चक्रमाधारं तु चतुर्दलं परमः सहजस्त
द्वदानन्दो वीरपूर्वकः योगानंदश्च तस्यादीशानादिदले फलं स्वाधिष्ठानं लिंगमूले षट्पत्रं चक्रमस्य तु॰ पूर्वादिषुदलेष्वाहुः फ
लान्येतान्यनुक्रमात् प्रश्रयः क्रूरतावर्गनाशो मूर्छा ततः परं अवज्ञानं स्वविश्वासो जीवस्य चरतो ध्रुवं नाभौ दशदलं पद्मं मणिपूरक
संज्ञकं सुषुप्तिरत्र तस्यादौ तृष्णा पिशुनता पुनः लज्जा भयं घृणा मोहः कषायोऽथ विषादिता॰ हृदये नाहतं चक्रं दले द्वादशभिर्युतं
लौल्यं प्रणाशः कपटं वितर्कोऽप्यनुतापिता॰ आशाप्रकाशश्चिन्ता च समीहा समता ततः क्रमेण दंभो वैकल्यं विवेको
ऽहंकृतिस्तथा॰ फलान्येतानि पूर्वादिदलस्थस्यात्मनो विदुः कंठे स्थितं भारती स्थानं विशुद्धिः षोडशच्छदं तत्र प्रणव उद्गी
थो हुं फट् वषड्यथा स्वाहा नमोऽमृतं सप्तस्वराः षड्जादयो मताः इति पूर्वादिपत्रस्थफलान्या त्मनि षोडशानि॰ षोडशच्छ

विद्यार्ण॰ २१

४२९

429

देवत्यत्रविशेषउक्तः कृपानुमार्ज्जवंधैर्य्यंवैराग्यंपवर्धतेस्तथा· हास्यंरोमांचनित्योध्यानेनस्थिरतातथा· गांभीर्यमुद्यमंसत्वंचौदार्यं
कायनातथा· एतेसर्वाग्रपश्चेषुगुणाइति ततंपदार्थोपासोदृष्टव्योहिदलेषुतः अत्रवायोहृत्यापनेतुआधारस्वाधिष्ठानयोरंतरेस्थितकु
एडुतन्मूलेमनोदद्ध्यात् यत्रमनस्तत्रप्राणआयातिप्राणवायुयोगेनाग्निर्दीप्यते सचोर्ध्वज्वलनस्वभावः तस्मिंश्चज्वालितेवायुरू
र्ध्वंगच्छति· ततः षट्चक्रभेदोभवति स्वाधिष्ठानेलिंगचक्रेत्रिः प्रदक्षिणीकृत्यत्रिरावृत्यातत्रकुण्डलीति· अतएवचनादउन्मी
यते· तदुक्तंदीक्षापटले· तत्रवेधमयींदीक्षांवक्ष्येसंसारमोचनीं· ध्यायेच्छिष्यतनोमध्येमूलाधारेचतुर्द्दले त्रिकोणमध्येविम
लेतेजस्वरूपविच्छिन्ने· वलयत्रयसंयुक्तांतडित्कोटिसमप्रभां शिवशक्तिमयींदेवींचेतनामात्रविग्रहां सूक्ष्मात्सूक्ष्मतरांशक्तिं
भित्वाषट्चक्रमंजसा· गच्छंतींमध्यमार्गेणद्विव्यापरशिवावधि· वादिसांतदलस्याग्नेस्तद्रूपैकमेलासने इत्यादिकुण्ड
ल्यनुसारेणवायोरपिचोर्ध्वंगच्छतः त्रिः परिवृत्तिः मणिपूरकेनाभिचक्रेगत्वाप्राप्यनाहतेहृच्चक्रेतदप्यतिक्रम्यविशुद्धेकंठप्र
देशेप्राणंगत्वामूर्ध्निरुध्याआज्ञाचक्रेभ्रूमध्यवर्त्यनुध्यायतस्तथानादंध्यायतःकोटिशमाधारमारभ्यब्रह्मरंध्रपर्यंतंप्रतीयमानंतत
थोज्वलंसर्वोनादः ब्रह्मप्राणात्मापरमात्मैवेतितेप्राणाः षट्शताधिकैकविंशतिसहस्रसंख्याकाः प्रायेणोक्ताः ग्रंथांतरेषुतुषट्त्रि
रषट्शताधिकैकविंशतिसहस्रसंख्याकाः अत्रषट्सप्ताधिकाः २१६०४ इत्यंकतः अन्यत्रग्रंथेषु अशीतिः षट्शतंचैवसहस्रा
णित्रयोदशः लक्षंचैकंचनिश्वासाअहोरात्रप्रमाणतइतिसंख्याभेदउक्तः अंकतः ११३६८० भवंतितंशंतरेत्· उच्छ्वासेचैवनिश्वासे
हंसइत्यक्षरद्वयं तस्मात्प्राणःस्फुहंसाख्यआत्माकारेणसंस्थितः नाभेरुच्छ्वासनिःश्वासाहृदयाग्रेव्यवस्थिताइति· गुदेचायुमवष्टभ्यरुद्ध्वाआधारा
न्मूलाधारचक्राद्वायुप्राणात्मकमुत्थाप्यउर्ध्वमवष्टभ्यावष्टभतोपायोगयाज्ञवल्क्येनउक्तः दक्षिणेजरगुल्फेनसीवनींपीडयेदृढं अथवाद्वेणयोःसू
त्वासव्योपरिचदक्षिणः जंघोर्वोरंतरेयोगीनिक्षिप्यदृढंवधयेदृढं समग्रीवशिरःस्कंधःसमपृष्ठःसमोदरइत्यादिः॥ अथकादिमतोक्तस्यासकमोपेवसौते २१

२१

अथ कूर्मपुराणे ॥ श्रियं ददाति विपुलां पुष्टिं मेधां यशो बलं ॥ अर्चिता भगवत्पत्नी तस्माल्लक्ष्मीं समर्चयेत् ॥ सारसंग्रहे ॥ अथो वक्ष्ये रमामंत्राल
क्ष्मीसौभाग्यदाभृशं ॥ दुर्गायुद्धारणे शक्तास्त्रिवर्गफलदायकाः ॥ संवर्त्तो वामतः षष्ठं व्योमसप्तमसंयुतं ॥ तुरीयस्वरचंद्रार्द्धकलानामप्यधि
ष्ठितं ॥ एकाक्षरो रमामंत्रो मनोरथसुरद्रुमः ॥ संवर्त्तो लकारो वामतः षष्ठं एकारः व्योमसप्तमोपि तथैव तेन रेफः तद्युक्त तुरीयस्व
रः चंद्रार्द्धकला अर्द्धचंद्रः नादो बिंदुः तेन श्रीं बीजमुद्धृतं ॥ तथा भृगुरस्य मुनिः प्रोक्तः ॥ छंदश्चास्य निवृन्मतं ॥ देवता गदिता लक्ष्मीः श्री ।
गसोत्तफलप्रदाः ॥ हिमवन्नेत्रकर्णेन मनंतस्वरसंयुता ॥ मंत्रेणैव षडंगानि जातियुक्तानि कल्पयेत् ॥ सव्यनेत्रं ईकारः कर्णः ऊ कर्णिस्था
पि सव्यं तु समासात् एकादशस्वरः मनुस्वरएकादशस्वरः अंत्यो विसर्गः एतेन श्रां श्रीं श्रूं श्रैं श्रौं श्रः इति षडंगमंत्रा उक्ताः ॥ पद्मारूढा न
वकनककलशपद्मयुग्माभयेष्टप्रोद्यद्धस्ता हिमगिरिनिभैर्वेष्टिदंसंवेष्टिरिभेंद्रैः ॥ हस्तोत्क्षिप्तामृतभृतघटैः सिच्यमानांगयष्टिर्भूयाद्धृतो
रुचिरमुकुटसद्मौमवस्त्रा त्रिनेत्रा ॥ दत्तायुष्टुर्योरायेतरायायः स्पयोरस्ये इत्यायुधध्यानं ॥ चतुर्भुजां स्वर्णाभां समपद्मेष्टकरद्वयं ॥ दक्षि
णाभयहस्तां तां वामहस्ते वरप्रदामिति नारायणीयवचनात् हिमगिरिनिभैरिभैश्रीत्यष्टकं मुख्याश्राश्रोभइति ॥ दक्षिणामूर्तिवच
नात् ॥ दक्षिणामूर्तिसंहितायां ॥ अष्टपत्रं लिखेत्पद्मं वह्निभूविंवमालिखेत् ॥ मध्ये बीजं विनिर्दिश्य नवशक्तीः समर्चयेत् ॥ सारसंग्रहे ॥
अष्टपत्रांबुजं हृद्यं कर्णिकाकेसरोज्वलं ॥ चतुर्द्वारसमायुक्तं चतुरस्रत्रयावृतमिति पूजाचक्रमुद्धृतं ॥ सारसंग्रहे ॥ धर्मादिकल्पिते पीठे
नवशक्तिसमन्विते ॥ स्नानाद्यावरणं यावत्पूजयेत्साधकोत्तमः ॥ दक्षिणामूर्तिसंहितायां ॥ विभूतिरुन्नति कांतिर्हृष्टिः कीर्तिश्च सन्नतिः ॥ व्युष्टि
रुत्कृष्टिर् ऋद्धिश्च नव शक्तीः प्रपूजयेत् ॥ वसेत्सिंहासनं पूज्यसर्वशक्तिमयं प्रिये ॥ शारदातिलके ॥ बीजाद्यमासनं दद्यान्मूर्तिं मूलेन क
ल्पयेत् ॥ तेन बीजानंतरं सर्वशक्तिकमलासनाय नमः इति पाठमंत्रो ज्ञेयः ॥ तदुक्तं ॥ सर्वशक्तिपदं प्रोक्ता ङेंतं च कमलासनं ॥ नमः स्यादासनं

वि॰ २२
ण॰ व॰
४३०
930

पूज्यान्तज्ञहीजादिकं शिवे इति पद्मपादाचार्योक्तं श्रीं श्रीदेव्यासनाय नमः श्रीं श्रीदेवीमूर्तये नमः इत्यादि सनत्कुमारः संकल्प्यांभोरुहं पु
ष्पं कर्णिकायां यजेल्लिख्य सारसंग्रहे तस्मिन्पीठे समावाह्य देवीं गंधादिभिर्यजेत् पुरोगाभिः समाभ्यो वासुदेवादिमूर्तिभिः द्वे द्वे विधियुगेना
न्यावलाकायाभिनीरितः लोके ये स्मरमालिका पंकजद्वयहस्तास्ता मुक्ताहारसमाप्रभा अनेन विधिना मंत्रमेतं भजेत यः वसु
वसुं कुलीलक्ष्मी समासीत्यचिराद्ध्रुवं अत्र वासुदेवादिपद्मनिध्यंते द्वितीयावरणं मूर्तिभिर्भवन्ति कर्णिकायुगेरपरे त्वाचार्योक्ताः मन्त्रः आ
ग्नेयादिपत्रेषु गुग्गुलमस्तु कुरंटकं दमकं सलिलमित्येति नारायणीयवचनं तन्त्रान्तरे हि कर अथ प्रयोगः तत्र प्रातः कृत्यादियोगपीठन्या
सांते मूलेन प्राणायामत्रयं कृत्वा शिरसि भृगुऋषये नमः मुखे निवृच्छन्दसे नमः हृदि श्रियै देवतायै नमः गुह्ये शं बीजाय नमः पादयो
शक्तये नाभौ कीलकाय नमः इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा श्रां हृदयाय नमः श्रीं शिरसे स्वाहा श्रूं शिखायै वषट् श्रैं कव
चाय हुं श्रौं नेत्रत्रयाय वौषट् श्रः अस्त्राय फट् इति षडंगमन्त्रानङ्गुष्ठादितलांतकरयोर्हृदयादिषडंगेष्वपि विन्यस्य ध्यानमानस
पूजां च कृत्वा हीरयुक्तवर्तुलत्रयावृताष्टदलद्वय—श्रीपीठं निर्माय प्राग्वत् स्वरतो निधायार्घ्यस्थापनादि परतत्वार्चांते ॐ विभूत्यै नमः
ॐ उन्नत्यै नमः कान्त्यै नमः सृष्ट्यै नमः कीर्त्यै संनत्यै व्युष्ट्यै उत्कृष्ट्यै मध्ये ऋद्ध्यै नमः इति वामादि प्रादक्षिण्येन पीठशक्तीः संपू
ज्य श्रीं सर्वशक्तिकमलासनाय नमः इति समग्रपीठं संपूज्यावाहनाद्यंगपूजांते तराष्टदलेष्वग्न्यादिचतुर्दलेषु ॐ वासुदेवाय संकर्ष
णाय प्रद्युम्नाय अनिरुद्धाय इति संपूज्याग्नेयादिविदिक्षु दमकाय सलिलाय गुग्गुलवे कुरंटकाय इति संपूज्य देवीदक्षिणदलाग्रे ॐ
शंखनिधये वामदलाग्रे पद्मनिधये इति संपूज्य द्वितीयाष्टदले ॐ बलाकायै विमलायै कमलायै वनमालायै विभीषिकायै मालि
कायै शंकर्यै वसुमालिकायै इति संपूज्य लोकपालाद्यादि सर्वं समापयेदिति तथा जपेद्भास्करलक्षं च तत्सहस्रं हुनेत्ततः पद्मैर्हि।

स्वादुसंयुक्तैस्तिलैर्वा श्रीफलैरथ त्रिभिर्वा मधुराक्तैश्च जुहुयाद्धि जितेन्द्रियः तर्पणादि ततः कुर्याद्विजाद्यान्तं समन्त्रधीः भास्करलक्षं
द्वादशलक्षं तत्सहस्रमितं ऋक्षैः दशांशो होमः बिल्वैः समिद्भिरित्याचार्यचरणाः त्रिभिरिति एकैकेन सहस्रचतुष्टयं न तु
मिलितैः तेषां तु द्रव्यान्तरत्वेन त्रिभिर्होमासंभवादिति तदुक्तं भट्टचरणैः नैवं व्रीह्यादिभिरिष्टस्य वैतन्वयथाश्रुतैः मिश्रै
रिष्येत चेदिति मिश्रणं विध्यदर्शनादिति चेन्नहि त्रिमधुराक्तं विरुद्धमिति चेत न सर्वं त्रिमधुरोपेतं होमद्रव्यमुदाहृतम् इ
ति वचनात्तद्योगस्य पुरोडाशावदानानामुपस्तरणाभिघारणयोगवद् विरुद्धत्वादिति ततः सिद्धिमन्त्रमेत्री साधयेत्त्रि
जवाञ्छितं वत्सोऽजदद्मेयपयस्मितिहृतनक्षत्रगतेष्ठिधं सम्यक्त्वमतुमेनं च जपेल्लक्षत्रयावधि सो विरेणो वकालेन दासिद्धामु
च्यते नरः मधुसूदनगेहस्य बिल्वाधउपविश्य च त्रिलक्षं जपेन्मन्त्री वा मे यान्वाञ्छितं पदं अधिकं वत्सरसंख्यातं लभते ना
त्र संशयः अशोके धाचिते वृक्षे सहस्रैस्तण्डुलैरुत्तैत् मन्त्री त्रिभुवनं सर्वं वशयत्येव नान्यथा खादिरैः शाकलैः सम्यगधि
ते गैरोयथाविधि तण्डुलैः त्रिस्वादुयुक्तैः जुहुयान्मन्त्रवित्तमः तेन राजकुलं वश्यं यनदादर्थी वान्नवेत् अर्कावृक्षे कृतेन्मन्त्रा
न्सम्बद्धैः शालितण्डुलैः निभृतं राजलक्ष्मीं वाज्जयुद्धोलभेद्ध्रुवं त्रिस्वादुयुक्तैर्नलिनैर्लक्षमेकं हुनेत्सुधीः अलक्ष्मी सहितो म
हालक्ष्मीमाप्नोति निश्चितां धनधान्यादिसंपन्नो तोषयेत्त्रीचसाधकं करुणार्द्रमना यास्य कुलेन स्यन्न संचति व्राह्मणः स्वगृ
हे बिल्वं समारोप्य च वर्जयेत् श्रीसूक्तं वत्सयत्नेष सहस्रैर्जुहुयात्ततः त्रिःस्वादुयुक्तैः कुसुमैः फलैः प्राप्य समिद्भिः स्कन्धभेदे
त्सस्नरस्त्वमूले स्वापिसंकुलेत् बिल्वमिश्रदविषाशीसाएलानाक्कयंरमा प्रमत्ता च भवेत्तस्य कथमस्त्रीः कुले भवेत्
श्रीयन्त्रमाद्यं कर्णिकायां साध्यनामगर्भतारं विलिख्य च एवापि तत्र तच्चः पादं चतस्रं चापि तद्दले अष्टपत्रे रूपमिति दिक्ष

वि० २२
शिव०
४३१

431

वेंद्रादिचाष्टिषु पादालेख्याविनोवाह्यादलषोडशकेक्रमात् आलिख्येत्सोऽपादलेतंसोमाद्यस्यवाहुच त्रीण्युत्तराणिमर्थेमेद्वि
तीयेसप्तसप्तच तृतीयेचचतुर्वर्णास्तुरीयेपंचपंचमे षष्ठेषट्चतस्रोवर्णान्सप्तमेष्टमे प्रजापतेनचोवर्णाश्चतस्रोनवमेदले दश
मेचदलेवर्णान्पंचचैकादशेपिच द्वादशेचतस्रोवर्णान्दलेचापित्रयोदशे षोडशेचापिषट्वर्णान्विलिख्येचदलेवहिः आवे
ष्ट्यलिप्याश्रीवीजंविलिखेद्वपराशिषु पुत्रंकांचकस्मैतत्धनधान्यधरासुतैः गोगजाश्वादिमहिषसस्यभूषादिसंकुले
लक्ष्मीसम्भावदेहस्यांशुत्रयोत्रादिगामिनां अस्यार्थः तत्रचतुर्दलकर्णिकामध्येससाध्यंप्रणवंविलिख्यतद्दलेषुएवापित्रेतत्वपा
दचतुष्टयंस्वाग्नादिपादलिप्येनप्रतिदलमेकंपादंविलिख्यतद्वहिः षोडशदलंकमलंकृत्वातद्दलेषुतत्सोमादिऋग्द्वयस्यप्रथमद
लेत्रीण्युत्तराणिद्वितीयेसप्ततृतीयेसप्तचतुर्थेचत्वारिपंचमेपंचषष्ठेषट्सप्तमेचत्वारिअष्टमेप्रजापतेनत्वादृतच नवमे
चत्वारिदशमेपंचएकादशेषट्द्वादशेचत्वारित्रयोदशेपिचत्वारिचतुर्दशेपंचपंचदशेचत्वारिषोडशेषट्दलेरेवंतिविभज्य।
विलिख्येतद्वहिर्दलमष्टविधायतयोरंतरालवीथ्यामकारादिककारांतान्मातृकार्णान्सविंदुकान्वेष्टनरूपेणलिख्येतद्वहि
श्चतुरस्त्रंकृत्वातत्कोणेषुश्रीवीजंलिखेत् एतद्यंत्रमुक्तफलदं ऋक्कांचमंत्रऋग्वेदे एवेपित्रेविश्वेदेवायवृष्णेयज्ञैर्विधेम
नसाहविर्भिः वृहस्पतेसुप्रजावीरवंतोवयंस्यामपतयोरयीणाम् पवेंद्राग्नीआम्यः इंद्राग्नीत्रिष्टुप्· पवेंद्रानापपिवंसोमस्य
नस्यविश्वस्यसंभ्यंसंजयतंधनानि तन्नोमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीउतद्यौः त्वंसोमप्रचिकितोमनीषात्वंर
जिष्ठमनुनेषिपंथा तवप्रणीतीपितरोनइंदो देवेषुरत्नमभजंतधीराः ४ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरि
तावभूव यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणाम् ५ इतिप्रजापतये इतिहिरण्यगर्भऋषिकोदेवतात्रिष्टु

पक्षेदः श्रीयंत्रसारे मध्येतासारं माश्रयुक्तं श्रियं कोणेषु षट्स्वपि अष्टपत्रेकेसरेष्वक्षरद्वंद्वक्रमेण च यालक्ष्मीनृतश्चैव वर्णांश्च स्वर
स्वराग्रेवहिः अथकाईचहृल्लिख्यसंवेष्ट्याक्रुगरह्नाश्रिषु श्रियं समालिखेद्यंत्रस्याधितं पत्रसंमादिरे धनैर्धान्यैश्च विभवैरन्यैश्चाप्यगवा
दिभिः आप्स्यंति सततं नत्रैवसमते रमा अस्यार्थः अष्टदलपद्मोदरे षट्कोणं कृत्वा तन्मध्ये मसाध्यं प्रणवं विलिख्य षट्कोणे
षु श्रीवीजं विलिख्याष्टदलकेसरेषु द्वंद्वशः स्वरान्नालिख्याष्टदलेषु यालक्ष्मीरित्थं च वर्णांश्चक्षुरे विलिख्य वहिर्दिक्त्रयांतरालद्वये
तर्गतांतराले श्रीसूक्तेन वतमाणाश्चद्वायेगोद्वायैकं वामं संवेष्ट्य तद्वहिर्गतांतराले कादि तांत वर्णैरावेष्ट्य तद्वहिश्चतुरस्रं कृत्वा तत्
कोणेषु श्रीं वीजं लिखेदेतद्यंत्रमुक्तफलदं यालक्ष्मीसिंधुसंभवा भूतिर्धेनुपुत्रवस्तः पद्माविष्णावमर्दैवीसदानोजुषतां एव
इति ऋक तथा· संप्रायं विंदुसहितं द्वितीयं भुवनेश्वरी तृतीयं चरमावीजं चतुर्थकामराजकं समुद्रवर्णो धर्मार्थकाममोक्षफ
लोमतः सप्राय्यप्विंदुयुतं तेनपंश्चमयतप्रसिद्धं तथा ऋषिर्भृगुनिवृत्सर्वं मनुष्टपछंदईरितं देवताकमलाप्रोक्ता सर्वसंप
त्करीशुभा एवं मंत्रवदेवाप्यषडंगानि प्रकल्पयेत् माणिक्याभा हरिणीविनिभैः कुंजरेंद्रैश्चतुर्भिर्न्यस्ताग्रेयघन्यमणिमय
घटांभोभिसिच्यमाना अंभोजस्थावरसितवित्र्यहेद्वकाभोनिहस्ता लक्ष्मीपापादमरनिकरैः सेवितांगश्रव्युजासा आयुर्ध्या घ्य
नेप्रमवत् एवं दिनेश्माघाठयजेहवीचएवंवत् अर्कलतंजपेन्मंत्रीनियताघीवसंद्रनेत् ततःसहस्रसरोजैस्थरत्नैः
त्रिस्वाद्रुसंयुतैः एवं तु कृश्चयोगां श्चकुर्यान्मंत्रीयथाविधिः साधकोमंत्रवर्यस्य निधिभिः सेव्यते स्वयं प्रयोगः सुगमः त
थाकामिकार्यं चमकालाप्तंतः स्वरविभूषितः वर्गादि स्वेऽमवृत्नावरुणोहीथंयुक्भृगुः अत्रिपकध्यांतपवनसप्ताद्य
द्विष्ठावधिः दशाक्षरोनिगादितो मंत्र प्रोक्तफलप्रदः कामिकायचमंनेकालेमः अन्महरोविसर्गः नेनमः वर्णादिः कःतेडं

वि॰ ण॰ ११
व॰
४३२
432

माऽवला· लवरुणो· वदीर्घयुक् वा भृगुः स· अस्त्रयुक् फि मांतेन पवन· य मध्याद्य पे तेनन्ते· द्विठः स्वाहा तथा·
ऋष्याद्याः दृल्समविराट् कमलाः समुदीरिताः देवीचपद्मिनी विष्णुपत्नीचवरदामता· वृषांता कमलावाभिडे· नमोंताभि
रूक्तवत् पंचांगानि मनोरस्य यातिषु क्रान्ति कल्पयेत् कारदाया· नमोंताप्रणवादिकाः श्यंगमंत्रा उदिताः तडित्सुजा
माकमलयुगदानाभयकराशरीरोद्यद्रामा भुवनविवरं भासयति या· मरोनस्याकांचीमणिमुकुटमंजीररुचिराश्रि
ये भूयाल्लक्ष्मीः कुचकलशभाराननतनुः आयुधध्यानप्रागवत् रमापीठे पुराप्रोक्ते पुजेल्लक्ष्मीं यथाविधि आदावंगानि त
तद्वाह्येवलाकाद्यष्टशक्तयः तद्वाह्येलोकपाला स्युनदस्त्राणिततोवहिः एवमभ्यर्चयेल्लक्ष्मीं भवेन्मातातङ्नाधिपः अथ
प्रयोगः प्रागवरसेग पीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि दला यऋषये नमः मुखे विराट्छंदसे हृदि श्रीक
मलाग्रै देवतायै इति विन्यस्य प्रागवद्विनियोग मुक्त्वा मूलमंत्रे करयोर्व्यापय्य ॐ रैत्यै हृदयाय· ॐ पद्मिन्यै विष्णुपत्न्यै· व
रदायै कमलरूपायै इति पंचांगमंत्रान् गुष्ठादिकनिष्ठांतकरयोर्विन्यस्य नेत्रवर्ज श्रीहृदयादि पंचांगेष्वपि विन्यस्य ध्यानाद्यगम
जांते प्रागवदष्टदले वलाकाद्यष्टशक्तिः संपूज्यैद्राद्यचींहि सर्वं प्रागवत्समापयेदिति तथा पंकिलतंजपेन्मंत्रेद्रवि—पीनिते
द्रियः तदर्णशः मरक्षित्रे त्रिस्वायुक्ते ईनेत्रधाः नद्यांसमुद्रगामिन्यां कंठदघ्ने जले स्थितः लक्षत्रयंजपेन्मंत्री भवेदर्थाधिपो
नरः तंद्यावर्त्तप्रसूनैस्तुजुहुयाङ्कुनराकये रमासंपूज्य साहस्त्रं तावद्धैल्वैर्मधुप्लुतैः फलैर्ऽनेत्योर्णमासां पंचम्यां चसितावु
जैः स्वक्रवारेष्वनवृध्वैर्मासं योजयान्महधीः संवत्सराद्धनं पूर्णं लभतेनात्रसंशयः किंवहूक्तेन भजते मनुमेनं जितेंद्रियः स
वांछितार्थान्लभते वसुधात्मसमृद्धियुक् तथा वाक्शक्तिः श्रीकामतः ऐमाश्रिमध्यांतसर्गयुक् पंचतीयचवगादितृतीयके

२

ना

वलप्लुतः लोहितोग्नियुतो वामश्रुतियुक् भृगुरीरितः तुर्यवर्णादि पवनसद्याद्या हृदयावधि द्वादशार्णो महालक्ष्मीमंत्रः प्रोक्त(ः)
स्तु सूरिभिः प्रणवाद्योयमेतस्मात्सर्वसिद्धिकरो मनुः वाक् वाग्बीजं शक्तिः भुवनेश्वरीबीजं कामास्तद्बीजं ल· ह· स· स्वरूपं· अग्नि
रेफः सद्यांत· औ· सर्गो· विसर्गो· एभिः पिण्डितं ह्सौः चतुर्थीयं· वर्गादि· तृतीयं· ग· केवल· प्लुतः तकारस्वररहितः लो
हितः प· अग्नियुक्· तेन प्र· वामश्रुतियुक् भृगुः तेनस्तु तुर्यवर्णादि· त पवनं· य सद्याद्य· ऐं· तेनत्ये· हृदयं· नमः प्रणवा
द्य· स्तु त्रयोदशाक्षरः अथ्या· अष्टाद्या ब्रह्मगायत्री महालक्ष्म्याः प्रकीर्तिताः संयोज्य मंत्रपाणीन प्रणवाद्यं हृदंतकं अंगुलीषु
क्रमान्मंत्री विन्यसेद्बीजपंचकं मंत्रपो विन्यसेन्मंत्री विन्यसेद् हृदिधात्वषु· पंचबीजैः पंचमंत्र शिष्टैः षडंगकल्पयेत्· चतुर्थ्यंते लीन
मुवैर्युक्तं वापि षडंगकं· तानेष्वैर्यशक्तिबलेवीर्यतेजस्सु षट्क्रमात् एवं न्यस्तमनुर्मंत्री चिंतयेदिष्टदेवतां आदौ स्मरेत्समुद्रा
नसर्वत्र प्रतिशोभितं· वंजुलैर्नागरंगैश्च खर्जूरसालैः श्रीद्रुमैरपि तालैस्तमालैर्हिंतालैः शालैश्च बकुलैरपि कर्कंधुबंधुजीवैश्च पं
चकैरुपशोभितं मंदारोलितकर्पूरकदलीदलमण्डितं अशोकपाटलानागकोविदारमनोरमं मल्लिकायूथिकाकुंदयतीस्वगंधिकं
द्राक्षावलीनागवल्लीमाधवीदेवदारुभिः नमेरुभिर्लवंगैश्च बकुलैस्तिलकैस्तथा शोभितं कर्णिकारैश्च चंदनै रक्तचंदनैः वंजुलैर्मा
तुलुंगैश्च दाडिमीलकुचैः शुभैः नालिकेरैश्च खर्जूरैः पूगैः कुरबकैर्वृतं मालतीकेतकीजातीवासंतीमल्लिकावृतं नंद्यावर्तैर्हिमंतकैः
सर्वर्तुकुसुमोज्वलं अमंदैः पिचुमंदैश्च मंदारैरुपशोभितं विशिष्टैः पनसैरुच्चैः शाखोटैः कुटजैर्गणैः अवेगपवनस्पृष्टसुमनोगंधमे
जले महासरस्तस्य मध्ये स्मरेन्मंत्री मनोरमं भ्रमद्भ्रमरमालाभिरलंकृतचतुर्दिशं केकिकेकारवाकीर्णं लिलसणमारससमावृतं वरटाहंस
संचारचक्रवाकाण्डकोज्वलं फुल्लैः सरसिजैरम्यैः कल्हारैः कैरवैरपि नीलेंदीवरसंदोहैश्च सुगंधिकुसुमैर्वृतं सर्वर्तुशोभिकल्पद्रुवन
मण्डितमत्युज्वलं फलितं तत्र तन्मध्ये मण्डपं रत्नकुट्टिमं सम्यग्दर्कमंदोहकिरणद्युतिभास्वरं हिमरश्मिकरव्रातसिक्तामृतसशीतलं

433

प्रोल्लसज्ज्वालितस्वर्णप्राकारसमन्वितोदरं नानारत्नोपरचितं चतुर्द्वारसमन्वितं नवरत्नमयप्रोद्यद्धाटकशोभितं अररं कपाटं नूत
नोद्यन्महारत्नैरचितोत्तुंगगोपुरं तप्तज्वालितहेमोद्यद्ध्वजसमूहकं वैडूर्यादिमहारत्नरचितस्तंभराजितं सप्तप्रस्वर्णरचितैः शुभे
विचित्रवसनोद्भूतैर्हतैर्वितानैरपि कांचनोर्वीमणिव्रातकुट्टिमालंकृतं शुभं घनसारागुरुस्वर्णकस्तूरीकुंकुमैरपि तमालैर्व्यजना
तैश्च सुगंधिभिर्धूपैतैरैः आमोदितं चतुर्द्वारिमण्डपं परिचिंतयेत् बालभास्करसंकांतिं पाशिणीवरमण्डितं मुक्ताहारोज्ज्वलोरस्मार
द्वाकल्पविभूषितां रत्नांभोजेषु विधाणांनूतनां पालिमंजरीं पद्महृद्यकौस्तुभेवरसज्जितां समरेरुहा विकसोत्पलसंरोविलोचनत्रय
संयुतां कर्णचूर्णपूरसंफलरत्नोत्पलपदद्वयां नितंबविचविलसद्वर्णनादाममंजुलां वलित्रयलसद्धेतुविमध्यदेशसुशोभितां गंभी
रारहृतस्वाभिह्नदमण्डलमण्डितां यत्तकर्दमसंलिप्तपीनोन्नतघनस्तनीं कुंभिकुंभोद्भवप्रोद्यन्मुक्तादामविराजितां दोमांतरा
संगवीतां पुष्पदामसुभूषितां ज्वालितस्वर्णावचितवैडूर्याप्यंगारोज्ज्वल कांचनोद्यत्प्रवरागमणिसंबद्धकंकणां नानाविधलसद्र
त्नमुद्रिकालंकृतांगुलीं कंबुकंठकलारावां स्वर्णग्रैवेयराजितां विचित्रतानालंकारालंकृतांगीं सुचिस्मितां उद्यदर्कप्रभास्वद्र
त्नताटंकशोभितां कर्णीकृतस्वर्णावद्धरत्नांकुशांशुभां प्रवालविलसत्कांतिरुचिराधरपल्लवां शोणरप्रोल्लसद्दन्तदशनावलि
शोभितां तिलांछनशरच्चंद्रकानाधिपसुभाननां पंचसायककोदण्डविलासादिकभ्रूयुगां विश्राणांनासिकाप्रोद्यत्तिलपुष्पोज्ज्वलो
द्यतां शोतांसुककलाकारस्फुविरालकराजितां घनसौगंध्यसंपन्नमृगनाभिविशेषकां मनाकुकुंचितसुस्निग्धनीलमंजुलमूर्ध
जां पारिजातादिकुसुमगंधवाहिसमूर्द्धजां तप्तहाटकसंवद्धनानारत्नोपशोभितां सौंदर्यभूमेरवधितेजसांजन्मभूमिका विलासल
क्ष्मीभवनमद्रालक्ष्मीविचिंतयेत् वामाधःकरमारभ्य दक्षाधःकरपर्यंतमायुधध्यानं पुरोमोक्तरमापीठे देवीसम्यक् प्रपूजयेत् द
शाहोतिनासतं च त्राणनामूर्तिकल्पनां दत्तभागेयजेदेव्याग्गणं पंचान्यतः स्नपया सुमनोजलिहस्तं च पुष्पधूपध्यानमर्थयेत् अंगानि

पूजयेदादौ यथास्थाने शुभं मंत्रवित् अष्टपत्रे त्विमाः पूज्याः उमा श्रीश्च सरस्वती दुर्गा धरणि गायत्री देव्युषा चेति शक्तयः नानालं
कारणा धारिण्यो भोजहस्तपाणयः अंकुशं मत्तालंकारार्थं च प्रोद्यतेज कुसुमार्यजे पूजनीये प्रयत्नेन कराभ्यां धृतचामरी निधी पूज्यौ
च वरुणे पश्चिमे छत्रधारिणौ परितश्च यजेद् द्वारणीय ग्रहानन्तवततोऽर्चयेत् वक्रदंतान् दिग्गजांश्च यजेद् दाणानसमंत्रवित् लोकपाला
लदस्त्राणि तन्नद्वाह्ये यजेत् सुधीः ऐरावतः पुण्डरीको वामनः कुमुदोंऽजनः पुष्पदंतः सार्वभौमः सुप्रतीकश्च तेक्रमात् अथ
प्रयोगः तत्र प्रातः स्नातः कृतादि योगपाठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्री छंदसे न
मः हृदि श्रीमहालक्ष्मी देवतायै नमः इति विन्यस्य प्राव द्विती योगमुक्ती स्वर्गेज्ञानाय हृदयाय नमः क्रीं ऐश्वर्याय शिरः श्रीं शक्त
ये नमः शिखायै क्लीं बलाय श्रौं वीर्याय नमः जगत्प्रसूत्यै नमः तेजसे अस्त्राय फट् इति षडंगमंत्रान् गुष्टादितलांत मूल
मंत्राभिमृष्टयोः करयोर्विन्यस्य हृदयादि षडंगेष्वपि न्यसेत् ततः सकेसरमष्टदलकमलं तद्बहिर्द्वादशदलकमलं तद्बहिर्नव
दलं कमलं तद्बहिश्चतुर्द्वारयुतं चतुरस्रं च यंत्रं इति पूजाचक्रं निर्माय प्रागवत्पुरतः संस्थाप्य ध्यानादि पुष्पोपचारांते कर्णिका
यां देव्याः दक्षिणे गणपतये वामे कामदेवाय इति संपूज्याष्टदले उमायै· श्रियै· सरस्वत्यै दुर्गायै· धरिण्यै· गायत्र्यै· देव्यै· उषा
यै· इति स्वाग्रादि प्रादक्षिण्येन संपूज्य देव्या दक्षिणे चरणसमीपे वामे वामसमीपे यमुनायै देवी दक्षिणे शंखनिधये वामे पद्म
निधये इति संपूज्य द्वादशदले मेषाय मिथुनाय कर्काय सिंहाय कन्यायै तुलायै वृश्चिकाय धनुषे मकराय· कुंभाय मीनाय
तद्बहिर्नवदले रवये सोमाय मंगलाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतुभ्यो नमः तद्बहिश्चतुरस्रकमलयो
रंतराले देव्यग्राद्यष्टदिक्षु ऐरावताय· पुण्डरीकाय वामनाय कुमुदाय अंजनाय पुष्पदंताय सार्वभौमाय सुप्रतीकाय· इति प्रा
दक्षिण्येन संपूज्य प्रागवद्वीथीद्वये दिगीशान् तदस्त्राणि च समभ्यर्च्य चतुष्पदीपादि दिशो संप्रागवत्सापये द्विति तथा नपद्मास्करेरलदं

वि॰ २२
र्णव॰
४३४
434

चैनियतात्मा पीयतव्रतः । तद्दशांशं प्रजुहुयाद्घृतैः क्षिप्ताज्यसंयुतैः पद्मैरमातुलफलैः प्रत्येकमयुतं जुहुनेन् वासितैः मधुविमिश्रैस्तोयैः त-
त्रेचूतैर्द्दशांशहोमं विधाय तद्दशांशेन तर्पणादिति निर्वर्त्य पश्चादयुतद्वयहोममयुतद्वयं तर्पणं च विदध्यात् इत्यन्यमेत्रेभ्यो विषं-
तथा॰ एवं सिद्धमनुर्मंत्री गुरुभक्तो दृढव्रतः कुर्यात्काम्यानि कर्माणि स्वाभीष्टानि च मंत्रवित् आत्माच्युताभिर्दूर्वाभिर्नायुःका-
मो हुतेन्नरः सहस्रं दशरात्रं च समिद्भिर्हव्यवाहने शताह्वाभिर्गुडूचीभिर्यायेऽल्लरसहस्रकं शताह्वाभिः दूर्वाभिः समाहृत्य यास्त्री-
वेवत्सराणां शतं सुधीः दीर्घायुश्च भवेत्ताभ्यः केसितिलैः प्रजुहुयाद्बुधः आरोग्यकामो जुहुयाद्दारम्भाकीं दिन सुधीः दशांशं प्रत्य-
हं सपिर्क्ताम समिद्धवान् समिद्धवानर्क्कोजान् कंठदघ्नेजलेस्थित्वा महालक्ष्मीमिति स्मरन् अष्टाधिकसहस्रं च प्रोद्दवाञ्जपेन्मनुं
सर्वांछितार्थं लभेत आरोग्यमपि साधकः अन्वहं जुहुयादष्टसहस्रं शालिभिर्ध्रुवं अष्टाधिकसहस्रमित्यर्थः सोऽविरात्लभते ल-
क्ष्मीमहतीं साधकोत्तमः रसालतापसूनैर्वा नवनीतसमुद्भवैः धेनत्राथि पक्वैराज्यस्रुतैर्वा जुहुयाद्बुधः प्रथमे दशाहमासो-
त्यविरात्साधके ध्रुवं मान्यते चैतया सर्वैर्जनैराभिर्नीलवाजैच नालिकेरजलोद्भुतैर्मरीचैर्जीरिकान्वितैः गुडयुक्तैर्घृतैः पक्वैः र-
पेर्जुहुयात्सुधीः संयतः प्रयतं चाष्टशतं पायसमंत्रद्विजः स एलाद्युक्फलं समाहान्येवेद्देवताम्स्था गुडमिश्रहविष्यमहो-
मादन्नसमृद्धिमान् अष्टोत्तरसहस्रं च जपात्स्नानादि संकुलेन संप्रलात्रक्रमेण मंत्री राजानं च वशमानयेत् जुहुयाद्दक्षिणाभोजनैर्वै-
प्रपास्वस्तेनैव धृपणः तीलोत्पलानां होमेन वशगाञ्छरणं भवाः वशयेत्प्रमदा विद्वान् मधुकतुलमैर्घृतैः नवकोष्ठात्मकसम-
कुमलालंकृवेत्सुधीः मध्यपत्रं बहिर्विकल्पयेच्च यथावज्ञानं वासितैस्तोयपुष्पकैः कर्षस्वर्णेन रचितं नवरत्नसमन्वितं क-
र्णिकामध्यविलसद्यंत्रपद्मं तु कारयेत् मध्यस्थकलशो रम्यं यथावत्प्रतिष्ठित्रिक्षिपेत् पंचरत्नानि सर्वेषु कलशेषु विनिःक्षिपेत्
पंचरत्नानि तु वज्रं मुक्ताफलं नीलं पद्मरागं तथैव च मरकतेन समायुक्तमिदं विद्धि रत्नादिरत्नपञ्चकं नाति तथा पद्मोशीर

काश्मीरचंद्रागुरुतमालकं जातीकंकोलसंयुक्तं संपिष्टेतानि भागशः कलशेषु च सर्वेषु यथाविधि विलोडयेत् सदाभद्रा च हर्वी च दे
वी श्रीचंद्रमधुव्रता अपामार्गस्य पर्णानि मुद्गाली वज्रवल्लीं च कु प्रियंगुर्ब्रीहिश्च सुकगोधूमतण्डुलात् शालि माषाश्च सलिलय
वान्यासि हिष्यानि निक्षिपेत् कदलीनारिकेलाम्राश्चाम्लीलकुचभूरुहा फलानि पञ्चवर्णकुलजातिसौगंधिकानि च पद्मिकाश्च पकाशो
कपुत्रागोत्थानि निक्षिपेत् पुष्पाणि केतकीनद्यावलक्ष्मीपल्लवानि च न्यग्रोधोदुम्बरप्लक्षवेत्यानि व्रलहू कं प्रतिष्ठवट
वक्त्राणि छादयेत्पल्लवैः शुभैः सात्तैः सफलैस्ताश्च वेष्टयेत्तौमवाससा तेषु मध्यस्थकलशे समावाह्य महेश्वरीं महाल
क्ष्मीं च दत्ताद्यैरुपचारैश्च संयजेत् शिष्टेषु परसुकुंभेषु सुमायाः क्रमतो यजेत् सुगंधैश्चंदनैः पुष्पैर्मनोज्ञैर्धूपदीपकैः भक्तभोज्य
निवेद्यैश्च यथाविधि यजेत्सुधीः सम्पूज्यैतान् घटान्मंत्री त्रिसहस्रं मनुं जपेत् ततः साध्यं समानीय संयतं स्थण्डिले शुभे सुपीठे
तं निवेश्यासनं तस्मिं साध्येन योजयेत् मनोहरैरलंकारैर्विविधैर्वसनैरपि आदरात्तमलंकृत्य हारकैः सुमनोहरैः सुवासिनीभि
र्योषाभिश्चरितानां द्विजन्मनां सहस्रैर्वचनैः सर्ववाद्यानां निनदैः सह वेदघोषेण च महलैश्चैव सुशोभने तेषु मध्यस्थितं कुंभे
समुद्धृत्य गुरुः स्वयं मूलमंत्रं जपन्सिंचेत् साध्यशीर्षे ततोपरैः कलशैः एवं वासिक्ता हस्तेन्यस्त शिरोशिरः संस्पृशं वेदगदितं
आशिषं च प्रयछति कल्याणमस्तु च सदा संपदश्च निराकुलाः प्रसीदतु महालक्ष्मीः सला रेवता श्रपि रतं त्वां सर्वदेवविजयोस्तु
सुखी भव इत्युक्ताशिषः पश्चाद्दासमीपस्थाप्य च आचांतः प्रणमेत्स साधकः यथाविधि गुरुं शिष्यः नानाविधैश्च वसनैः नाना
लंकरणैरपि धनैर्धान्यैरत्नैर्गोभिर्महिषीभिश्च दासकैः दासीभिर्हैव ताभुध्या गुरुं संतोषयेत्सुधीः नानाविधैर्भक्ष्यभोज्यैर्लेह्य
चोष्यैस्तथेतरैः दीनांधकृपणैः सार्धं भोजयेच्च द्विजन्मनः ततः स्वमंदिरे कुर्यात् उत्सवं बंधुभिः सह मदत्रिकोकरस्यं च ततः स्नानं च रस

वि० २२
णि व०
४२५
435

यं कृतार्थं मन्यते सम्यगात्मानं तान्यथात्रापि राजा शत्रून्विजयते भिषिक्तस्त्वयथाविधिः राजपुत्रश्च राजेन्द्र विरादाप्नुयात्पदं वंध्याभिषिक्ता रमणी च चिराद्वांछितं पदं महामतिं च लभते नेनात्र कार्याविचारणा महाभयेषु भूतादिनिमित्तोत्थभयेषु च कृत्याद्रोहादिदोषे च प्रकुर्यादभिषेचनं अभिषेकेण सुता च नृणां भवति निश्चितं सर्वसंपच्च सौभाग्यं सर्वाश्च यशामस्त्र ष्या सर्वोपद्रवहारणं चैव सर्वसौख्यानि निश्चितं पटीरः चंदनः उशीरः बालकं काश्मीरं कुंकुमकेसरं चंद्रः कर्पूर तमालके पत्रकं जातीफल कोलः इति प्रसिद्धं भागशः समभागेन सहाभद्रा मुस्ता देवी सहदेवी श्रीअपराजिता मधुव्रता भृंगराजः मुशली तालमूली वज्री वल्लरी इंद्रवारुणी प्रियंगुनी श्री बिल्व धात्री आमलकी लकुच बडहरः इति प्रसिद्धः वकुलः बेलसरीति प्रसिद्धः प्लक्षः पाकडिति प्रसिद्धः चैत्यो ग्रामप्रसिद्धिहेतुभूतो महावृक्षः अश्वत्थः पंचगव्यं मधुपर्कैः आह्वा तृणपात्रैः तथा श्रीमायाकामयुक्तं प्रणवगतमथो साध्यमालिख्य मध्ये किंजल्के स्मरबीजत्रितयमपि लिखेद्गसशाख्या क्तौ पत्रे मंत्रार्णान्षोडशारं स्वरलसिततले कादियुक्तं यत्रमूलं हल्लोयत्कोणभूमीगृहयुगलवषट्प्रांतमूर्णावृतं स्यात् यत्रमेतन्मलललत्माः प्रोक्तं सपत्नैरपरं सर्वसौभाग्यदं चापि सर्वदुःखविमोचनं आपत्त्रिवारणं प्रोक्तं किं बहूक्तेन सर्वदं अस्यार्थः द्वादशदलं पद्मं विरच्य तत्कर्णिकायां प्रणवं विलिख्य तस्योदरे श्रीमायाकामबीजानि प्रतिकेसरमेकैकमिति बीजत्रयुस्या हृत्स्याच्च सर्वांशतिकेसरेष्वपि विलिख्य द्वादशपत्रेषु मूलमंत्रस्य वर्णानेकैकेन विलिख्य तद्बहिः षोडशदलं पद्मं कृत्वा तत्केसरकैकामिथुकारादिमकारांतान् वर्णान्द्वात्रिंशतः द्वंद्वशो विलिख्य तद्यंत्रेषु षोडशस्वरान्विलिख्य तद्बहिः स्वरस्वद्वयेन अष्टकोणं कृत्वा तत्कोणेषु प्रतिकोणं कृत्वा तत्कोणे हल्लो विलिख्य वषडंत यात्ववितानाविद्य यावेष्टयेत् अत्र तवितानाविद्यावेष्टनेन अष्ट

कोणे हृदि दितत्रयं कृत्वा तयोरंतरालवीथ्यां यथोक्तयातरितविद्ययावेष्टयेदिति संप्रदायः एतद्यंत्रमुक्तफलदं तथा· तारश्रीशक्तिलक्ष्मी
कसूर्ष्माः शिवयुताधराः चतुराननसूर्यौ च दीर्घयुक्तः पुरंदरः उपांतः शिवयुक् वायुर्लोहितोग्नियुतो भृगुः चतुर्थस्वरयुक् पांतः पुनरेत
त्त्रयं वदेत् वीजत्रयं महालक्ष्मी हृदंतो गदितो मनुः सर्वदोषमहालक्ष्म्या मंत्रराजः प्रकीर्तितः तारः प्रणवः श्रीवीजं शक्तिर्भुवनेशीः
लक्ष्मीश्रीवीजं कसूरूप सूर्ष्मामकारः धरा ल· शिव एतेन लं चतुराननः क सूर्यो मं· दीर्घयुक्तः पुरंदरः तेन ला· उपांत्यो ल शिव ए
वायुय· तेन ये लोहितयः अग्नियुतः रेफयुतः तेन प्र भृगुः स· चतुर्थस्वरः ई तेन सी पांतः द· पुनरेतत्त्रयं प्रसीदेति वीजत्रयं श्रीशक्ति
लक्ष्मीवाग्निमहालक्ष्मीस्वरूपं हृदंतो नमोंतः अत्र कोवित् लक्ष्मी पाद्य स चतुर्थ्यंतत्वेनेच्छेति महालक्ष्मीरस्तेवी इ इति तथा च प्रपंचसारे·
महालक्ष्मी हृदिं दिरामंत्र इति दक्षिणामूर्तिसंहितायां दक्षप्रजापतिश्चास्य ऋषिश्छंदश्च पंक्तिरेव च गायत्री देवता लक्ष्मीरिति सारसंग्रहे त्रि
त्रिवीजयुक्तिर्मंत्रवर्णैः षडंगानीरितं त्रिषष्टिनवशक्तिवैदेश्च तत्वो देवी विचिंतयेत् ११ पंच अग्नि ३ वेद ४ सिंदूरारुणकांतिः सरसिजव
सतिश्चारुहलावण्यभूमिर्हेमाभैरत्नपात्रं सरसिजयुगले दधाना प्रसवंती तामभिश्चाभिवीतामणिमयमुक्ताहारसत्कुंडलाद्याकांवी
प्रोद्यत्त्रितं गदक्षितभुजा श्रेयसे वोस्तु लक्ष्मीः वामाधः करभ्यदक्षिणाद्यः करपर्यंत मायुधध्याने दत्ताधस्तदारभ्य वा पूर्वोदिते
यजेत्पीठे चतस्मा ऐनवर्त्मिना ५ शंगानि यजेत्पश्चात्पृथ्वीधरादीन् ततः सुधीः श्रीधरश्च हृषीकेशो वैकुंठो विश्वरूपकः वासुदेवाद
यश्चान्ये चत्वारः समुदीरिताः भारत्यादिनत्वसा भारती पार्वती तथा चांद्री शची वसंमोक्तादमकाद्यांजयेत् ज्ञान् यजेद्वाणान्महाल
क्ष्मी अनुरागादिकान्बहिः अनुरागो विसंवादो विजयो वल्लभो मदः हर्षो वलश्च तेजश्च यजेल्लोके शानबहिः तदा युधानि तद्बाह्ये
पूजयेच्छंदनादिभिः एवं संपूजयेल्लक्ष्मीं योमंत्री विधिनामुना तत्र नित्यं महालक्ष्मीर्वर्द्धते न जहाति तं अथ प्रयोगः तत्र प्रातः कृत्वा
दियोगपाठन्यासांते मूलमंत्रेण प्राणायाम त्रयं कृत्वा शिरसि दक्षप्रजापतये ऋषये नमः मुखे गायत्रीछंदसे· हृदये श्री महालक्ष्मी दे

वनायै: इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा यों तों मों तं भयेनमः हृदयाय नमः यों तों मों भये स्वाहा शिरसे । यों तों मों तं भये वषट् शिखायै ।
यों तों मों भये हुं कवचाय श्रियै नेत्रत्रयाय वषट् श्रीं नमः अस्त्राय फट् इति षडंगमंत्रान्प्राग्वत्कृत्वा हृदयादिषु च विन्यस्य शेषं महालक्ष्मी
वत्सर्वं कुर्यात् तथा नित्यं द्वादशसाहस्रं सप्रणवं मंत्रं जपेत् तेन सिद्धो भवेन्मंत्रः साधकस्य न संशयः अत्र होमो नोक्तः तथापि पूर्वोक्त
मंत्रहोम दशांशेन जपदशांशतो होमः कार्य इति संप्रदायिकाः तथा लक्ष्मीसुवर्णाब्जकरां ध्यात्वा मंत्रमिमं जपेत् अष्टोत्तरसहस्रं च कमला
भैर्वाह्निता श्रियं जपेन्नष्टाणं तव पूर्वेतिलकावशयेद्भव मासत्रयं तथा जप्त्वा ग्रामे मंत्री समाप्नुयात् तथा पद्मप्रभे पदं पद्मसुंदरी तिपदं
वदेत् पद्मेषु तिनबद्धं चतुर्दशाभिवेदनैः मंत्रो द्वात्रिंशगमः पदैस्तु त्रिभिः सर्वाणि पंचांगादि तन्मत्रैः जपपूजादिकं सर्वमस्य पूर्ववं
दाचरेत् पूर्ववदेकाक्षरो पूर्ववत् इयं सिद्धा महाविद्या भक्तानां कल्पवल्लिका एतेन पुरश्चरणमपि तत्रोक्तमेव अथ पंचमीलक्ष्मीमंत्रः
सर्ववत्समाणांत्रिपुरामंत्रपवयजनविधिश्च तत्रोक्तमेव तेयं श्रीदत्तिणामूर्त्तिसंहितायां अथ वक्ष्ये महादेवि सर्वसाम्राज्यदेवतां
यस्या आराधनाद्विष्णुः शंभुर्लक्ष्मीपतिः स्वयं चंद्रः समदनं त्वेशोवह्निवीर्यान्त्रिमाश्रितः बिंदुकूटेश्वरीयुक्तो विद्येयं वेदवाविप्रिये श्रीवी
जं संपुटं कुर्यात्सर्वसाम्राज्यदायिनी चंद्रः सममदनं ककारस्तालकाराद् ईशो हकारः वह्निरेफः दीर्घातीईकारः बिंदुशब्देन नादो
गृह्यते जनकजन्ययोस्तयोरभेदात् नारविंदोर्भेन कजन्यत्वं तन्त्रराजतिलके व्यासी छक्ति स्थाना दोनादा द्विड समुद्भवमिति अकू
रेश्वरी बिंदु एतेन मायो हृता तथा ऋषिर्ह्रीमित्यस्याः छंदो गायत्री वास्य संमता देवता मोहिनी लक्ष्मी सर्वसाम्राज्यदायिनी कूटं समालि
ख्यातं शक्तिः श्रीबीजमुच्यते षड्भिः कूटस्वरैर्भित्वा षडंगानि प्रविन्यसेत् अतसीपुष्पसंकाशं रत्नभूषणभूषितां शंखचक्रगदापद्मशा
र्ङ्गबाणधरी करैः षड्भिः कराभ्यां देवेशि वरदाभयशोभितां ध्यायेदितिशेषः वामाधूर्द्धयो शाखेतराद्यधस्य योरपे इतराद्यधस्य योर्मि
तरेइत्यापुरश्चध्यानं तथा यंत्रोद्धारमथ वक्ष्ये प्रिये त्रिकोणं चाष्टपत्रं च भूबिंबं च तथा लिखेत् चतुर्द्वारोपशोभाढ्यं यंत्रमेतत्समालिखेत्

अस्मिन्समावाप्य देवीं पूजयेदुपचारकैः पूर्ववत्परमेशानि षडंगावरणं यजेत् गायत्रीं चैव सावित्रीं सरस्वत्यग्रकागतः क्रमेण पूजये
न्मंत्री ब्राह्म्याद्याश्च स्वरैः पृथक् अष्टपत्रेषु भूबिंबे चैकोन्वारेण पूजयेत् अष्टादशमहाकोटियोगिनीभ्यो नमो लिखेत् अनेन मनुना
पश्चाद्दिग्द्वारी पूजयेत्ततः पुनर्देवीं समभ्यर्च्य गंधपुष्पाक्षतादिभिः वटुकक्षेत्रपालेभ्यो योगिनीभ्यो बलिं हरेत् अत्र वटुकक्षेत्र
पालेभ्य इति वक्ष्यवचनं गणेशपूजापि ग्रहणार्थं तेन वटुकक्षेत्रपालगणेशेभ्य इत्यर्थः अथ प्रयोगः तत्र प्रातःकृत्यादि योगपी
ठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि हरये ऋषये नमः मुखे गायत्रीछंदसे नमः हृदये श्रीसर्वसाम्राज्यलक्ष्म्यै देवतायै नमः
गुह्ये सकलक्लींबीजाय नमः पादयोः श्रीशक्तये नमः इति विन्यस्य मम इत्यादि प्राग्वद्विनियोगमुक्त्वा श्लां हृदयाय नमः श्लीं शिर
से स्वाहा श्लूं शिखायै वषट् श्लैं कवचाय हुं श्लौं नेत्रत्रयाय वौषट् श्लः अस्त्राय फट् इति षडंगमंत्रैः प्राग्वत्करषडंगन्यासं
कृत्वा ध्यात्वा यावत्पूजांतं प्राग्वल्लक्ष्मीपीठमभ्यर्च्यावाहनादि षोडशोपचारांते प्राग्वदंगानि संपूज्य त्रिकोणाग्रादि प्रादक्षि
णेन ॐ गायत्र्यै नमः ॐ सावित्र्यै नमः ॐ सरस्वत्यै नमः इति संपूज्य अष्टदलेषु प्राग्वत् ब्राह्म्याद्याः संपूज्य चतुरस्रे अष्टादशको
टिमहायोगिनीभ्यो नमः इति देवीं परितः संपूज्य लोकेशार्चादि प्राग्वत्समापयेदिति तथा एवमष्टभुजां ध्यात्वा त्रिपलेस्वप्रज
येत्तद्धीः तद्दशांशेन पद्मैर्लक्ष्मीनेत्राभ्यां जुहुयाज्जितेंद्रियः सविधिवदिति विधिवदित्यनेन तर्पणादिब्राह्मणभोजनांतं क
र्तव्यमित्युक्तं तथा सारसंग्रहे हृदयं पद्मतनयायास्तु ध्यंतोरमासुतुः समार्गणादित साध्यषडंगान्यमुनेव हि नमः हृत्पद्मत
नये शिरः नमः शिखा पद्मतनये कवचं नमो नेत्रं पद्मतनये अस्त्रं ध्यानपूजाकृतार्चादि पूर्ववत्प्रोक्तकीर्तितं पूर्ववद्देकात
रोगवत् तथा इमा मंत्रेषु योऽभक्तः श्रीसूक्तं सज्जपेत्सुधीः विधानं चत्वेतस्य सम्यक् पंचदशाकस्पृहि हिरण्यवर्णामित्यस्या ऋ
षो लक्ष्मीके निमितः छंदांसि पूर्वसमाख्यातमन्याः स्तुतयः क्रमात् आनंदः कर्दम श्रीश्चिक्लीतश्रीपुत्राः प्रसीमताः तां म आवह

विद्या २२
ए॰
४३७
437

जाताश्वपूर्वामित्यत्र योर्मतः छंदोनुष्टुप्चक्रकां सोस्मितामस्या बृहतीमतं चंद्रां प्रभासादित्यवर्णे अनयो त्रिष्टुब्वीरितं उपैतुमां क्षुत्पिपा
सां गंधद्वारां इत्येतिच मनसः कर्दमेनाद्यः सृजंत्याद्रीं च सप्तमी आर्द्रां पुष्करिणीमासामष्टमीं च प्रकीर्तितं छंदोनुष्टुप्तथा तामम आ
वहाध्मस्याः प्रकीर्तितं प्रस्तारपंक्तिं सर्वासां देवते श्रीविभावसू मूर्हात्तिकर्णिनामसा च गलदो हस्तनाभिषु गुह्यपादमूरुयुग्जानुजं
घायत्स्वन्यसेद्बुधः हिरण्मयी च चंद्रा च तृतीया रजतस्रजा हिरण्याख्यास्वजात्यन्या हिरण्या च तथापरा हिरण्यवर्णा चैताभिः कुर्याद्ंगा
निषट्क्रमात् एताभिस्तु तर्थीनमोंताभिः एताभिर्ई॰ नमोंताभिरंगकल्पनमीरितमिति मंत्रतंत्रप्रकाशवचनात् संकोचेरजं पुंज
वर्णकेरक्तैविशिष्टाभीतीकमलयुगलं धारयंतीमनोज्ञा सम्यक्शोणाम्बरनलिनेसंस्थिता चारुभूषाभूषाढ्या त्रिभुवनजननी श्रीरियं
रत्नमौलिः एकान्तरोक्तवदायुधध्यानं यजेद्देवीं पुराप्रोक्तो पाठे आदाय मंत्रवित् यजेदंगानि पद्माद्यालोकपालाः सहेतयः आग
हनस्नादर्घ्यपाद्याचमानि च मधुपर्काभिषेकौ च वस्त्रालंकारचंदनं पुष्पधूपं दीपभोज्ये प्रोद्वासनमथापि च एतानि मंत्रविक्र
र्याहृक्कां च दशकेन हि पद्माद्यापद्मवर्णान्यापद्मस्थाद्रात्रीयकां तर्पयंतीसत्नमामान्यलंतो सप्तमीमता स्वर्णप्रकारसंस्तेय
मष्टमीसमुदाहृता अथ प्रयोगः प्राग्वद्योगपीठन्यासांते मण्डवेन श्रीबीजेन वा प्राणायामत्रयं कृत्वा शिरसि आनंदकर्दम चिक्ली
तश्रीपुत्रेभ्यो ऋषिभ्यो नमः मुखे अनुष्टुब्बृहती त्रिष्टुप् अनुष्टुप् प्रस्तारपंक्तिभ्यो छंदोभ्यो नमः हृदि श्रीविभावसुभ्यां देवताभ्यां
नमः इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा हिरण्मय्यै नमः हृदयाय नमः चंद्रायै नमः शिरसे स्वाहा रजतस्रजायै नमः शिखायै वषट्
हिरण्यस्रजायै कवचाय॰ हिरण्यायै नमः नेत्रत्रयाय वौषट् हिरण्यवर्णायै अस्त्राय फट् इति षडंगमंत्रानंगुष्ठादितलांतेकर
योर्हृदादिषडंगेष्वपि विन्यस्य शिरसि हिरण्यवर्णामित्यादि नमः नेत्रयोः तां म आवहेति कर्णयोः अश्वपूर्वामिति नासायां कांसो
स्मितामिति मुखे॰ चंद्रामिति गले आदित्यवर्णे इति बाह्वोः उपैतु मामिति हृदि क्षुत्पिपासेति नाभौ गंधद्वारामिति गुह्ये मनसः इति गुदे कर्द

घन्तरक्षि

मेनेति ऋग्भिः आपइतिजाम्बो आर्द्रामितिजंपयोः आर्द्रामिति पादयोः तामम इत्यादि एवमेताऋचः प्रणमादिनमोन्ता विन्यस्य ध्यान
मासनपूजां तंचतुर्द्वारयुतचतुरस्रत्रयावृत्तं अष्टदलकमलपूजाचक्रं निर्माय प्राग्वत्पुरतो निधाय यथास्थापनादिपीठार्चनान्ते
ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजां चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मम आवह इत्यृचा प्राग्वदावाहनीमुद्रया वा साप्रावाहना
दि परमीकारणं तत्तन्मुद्रया विधाय तां म आवह जातवेदो लक्ष्मीमनपगामिनीं यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहं २
श्रीरेतत्ते आसनं नमः अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीं श्रियं देवीमुपह्वये श्रीर्मा देवी जुषतां ३ श्रीरेवतेर्घ्यः
स्वाहा कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीं पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियं ४ श्रीरेतत्पाद्यं न
मः चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् तां पद्मनेमिं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि ५ श्री
रेषते आचमनीयं स्वधा ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः तस्य फलानि तपसा नुदन्तु मायान्तरा
याश्च बाह्या अलक्ष्मीः श्रीरेषते मधुपर्कः स्वधा ततः पुनराचमनीयं ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह प्रादुर्भूतोस्मि राष्ट्रे
स्मिन् कीर्तिमृद्धिं ददातु मे श्रीरेतत्ते स्नानं नमः ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहं अभूतिमसमृद्धिं च सर्वां निर्णुद
मे गृहात् ८ श्रीरेते ते वाससी नमः ततः पुनराचमनीयं ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ईश्वरीं सर्वभूतानां
तामिहोपह्वये श्रियम् ९ श्रीरेतानि ते भूषणानि नमः ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि पशूनां रूपमन्नस्य मयि श्री
श्रयतां यशः १० श्रीरेषते गन्धो नमः ॐ कर्दमेन प्रजा भूता मयि सम्भव कर्दम श्रियं वासय मे कुले मातरं पद्ममालिनीं ११ श्री
रेतानि ते पुष्पाणि वौषट् इति पुष्पाणि तानुपचाराननुपचर्य पूर्ववदङ्गानि संपूज्य अष्टदलेष्वाग्नेयादिप्रादक्षिण्येन ॐ पद्मासनायै नमः ॐ पद्म
वर्णायै नमः ॐ पद्मस्थायै नमः ॐ आर्द्रायै नमः ॐ तर्पयन्त्यै ॐ तृप्तायै ॐ ज्वलन्त्यै ॐ स्वर्णप्राकारायै इति संपूज्य प्राग्वल्लोकपा

विद्या २२
लिप्ति

४२८

438

लाञ्छनताय्यथानित्यंसंपूज्यः ॐआपःसृजन्तुस्निग्धानिचिक्लीतवसमेगृहे निचदेवींमातरंश्रियंवासयमेकुले १२ श्रीरेषतेधूपोनमः ॐ
आर्द्रांपुष्करिणींयष्टिंसुवर्णांहेममालिनीं चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह १३ श्रीरेषतेदीपोयंनमः ॐआर्द्रांपुष्करिणींपु
ष्टिंपिंगलांपद्ममालिनीं चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह १४ श्रीरेतन्नैवेद्यंनमः ततःपुनराचमनादिकंदत्वातांबूलादि
सर्वंप्राक्तनप्रकारेणक्रमप्रकारेणकृत्वा तांमआवहजातवेदोलक्ष्मीमनपगामिनीं यस्यांहिरण्यंप्रभूतंगावोदास्योश्वान्विंदेयंपुरु
षानहं १५ श्रीःक्षमस्वेतिविसृज्यशेषंभगवत्कृत्वासमापयेदिति अत्रसर्वेषूपचारेषुभगवत्सूक्तप्रकारेणक्रमप्रकारेणयत्रयत्र
त्कर्तव्यंतत्रतत्रतत्सर्वंकुर्यात् तथा प्रारभ्यशुक्लप्रतिपदंयावदेकादशीभवेत् तावद्द्वादशसाहस्रंजपेत्त्रिस्थलमानसः ब्रह्मच
र्यरतःशुद्धवस्त्रहृतादिकःहविषी पद्मैस्त्रिमधुरोपेतैर्घृताक्तैर्नयपयोभसा श्रीःसमिद्भिः सर्पिषाचप्रत्येकंत्रिशतंहुनेत् द्वादशं
द्वादशेचाथविप्रांस्तेनचभोजयेत् तेनसिद्धोभवेन्मंत्रोनात्रकार्याविचारणा अथद्वादशसाहस्रजपानंतरंसूक्तेनसंप्रदायः एकाद
शभिर्दिनैः सूक्तस्यद्वादशसाहस्रावृत्तेरसंभवात्प्राकाल्याच्च तदानेकादशभिर्दिनैरष्टशतावृत्तिः सूक्तस्यकार्या तत्राष्टदिनपर्य
न्तंप्रत्यहंत्रिसहस्रावृत्तिः सूक्तस्यकार्याअनंतरंदिनत्रयेद्वासप्तत्यावृत्तिः प्रत्यहंकार्यातेनद्वादशसाहस्रंजपोभवतीति
श्रीःसमिद्भिःबिल्वसमिद्भिः तथा कर्दमंदारकुमुदमालतीपद्मकेतने नंद्यावर्तोद्भवजाती कह्लारंचंपकंतथा रक्तोत्पलादिपुष्पा
णिलक्ष्म्याःप्रीतिप्रियाणिहि स्नानकालेचैतैःसूक्तैरभिषिंचेत्त्रिभिःसुधीः अभ्यर्च्याष्टोत्तरशतंजपेत्पद्मभृगुवासरे चत्वारिंशद्दिनस्य
स्मिन्महालक्ष्मीरचंचला तरीयपश्चाद्वन्ध्यायाहृतेनैकादशाहुतिः एवंकुर्वतएवास्यषण्मासात्स्यान्महेंदिरा प्रयातनर्थ्याणंते
चसंतर्प्याशनंक्रयस्त्रियः प्रणवाद्याःसुदंताश्चश्रीर्लक्ष्मीवरदायकाः विष्णुपत्नीचवसुदाहिरण्यापतःस्वर्णमालिन्यपि
पराचेतस्त्रजाःसुवर्णप्रकारापद्मवासिनी पद्महस्ताप्रियेशस्यालंकारासूर्यिकापरा चंद्राबिल्वप्रियेस्वर्य्यासुक्तिश्चापिप्रभुक्तिपुक्

विभूतिर्वृद्धिः समृद्धिस्तु तुष्टिः पुष्टिर्धनाध्यक्षा धनेश्वरीच श्रद्धास्यात् योगिनी भोगदा मता धात्री विधात्री द्वात्रिंशल्लक्ष्मयः समुदीरिताः द्वा
त्रिंशद्भिस्तु पूजांते मंत्री मंत्रैर्वलिं हरेत् मंत्रैर्नाममंत्रैः श्रीरेषा ते वलिर्नमः इत्यादिभिः श्रीमंत्रजापिनां केचिदुच्यते नियमाविह नैला
भ्यंतस्तु नाश्नीयात्र मन्त्री नायेन संविशेत् अभ्युचिर्नस्वपेत्क्वापि ह्यभ्यासादशुचिर्भवेत् लवणं तिलसंभूतं नाश्नीयात्केवलं सुधीः
लिपेद्रात्रौ वक्रेणो नानृतं प्रवदेत्क्वचित् कदाचित्कालिनो न स्यान्नैव देवने कालिविहस्था श्रीफलोद्भवसस्येण न मूर्ध्नि च धारयेत्
नथा च निर्मलाचारः शुक्लः शुद्धमना भवेत् शुद्धमाल्यानुलेपश्च शुद्धाभरणभूषितः श्वेतवस्त्रपरीधानः शुद्धदेहस्वलंकृत उ
त्कृष्टगंधानुलेपः शुद्धदंतश्च सत्त्ववान् विल्वभक्तश्च विमलरम्यशय्यो भवेत्सुधीः निंदितान्वयसंभूतां दुष्टां च कुलदूषितां दुष्टयोनि
मतिदुष्टां च रोगग्रस्तां निषेवितां अन्यासक्तामपण्यां च कृशांगीं स्तहृमंत्रु अतिह्रस्वां सदीर्घां च विरूपां भोगलोलुपां अन्यपूरुष
लोलां च काकाकलीणजयोषितां रजस्वलामेकवारां योषितं न स्पृशेदपि ध्यानस्तु विस्मितो वाक्षी मधुरालापवान्भवेत् दयार्द्रचित्तश्चा
चार्यदेवातिथ्यचनारतः गुरुविप्रपूजाभिरतः पुण्यशीलो दृढव्रतः नित्यस्नायी पश्चिमामुखोपीपीठवान्भवेत् वर्णाश्र
मतरः स्वीयदारतश्चोभ्यभाषणे एतादृशोऽस्तु नियमैर्युक्तो लक्ष्मीं लभेत सः नारायणीये नाज्ञिर्वैष्णक्रमेणाब्धं तद्वीजं न च भक्ष
येत् तस्मात्कालिष्टो न छिंद्याद्विल्वं भूमौ पायीनस्पृशः लवणामलके वर्ज्ये नागादित्यतिथौ क्रमात् नागादित्यतिथिः पंचमी सप्तम्यां
पंचम्यां च स्वपेत्स्त्रीचर्यां प्रत्यङ्मुखोपाने वितस्तैर्नमार्जयेद्दंतान्नद्विसंख्यप्रणामेत्सतान् प्रातर्भस्मा तिलास्तैच धार्या लक्ष्मीं च भ
तयेत् धारयेन्मूर्ध्नि नभुष्पमुत्तरे मधुपात्रभुक् पायसं विल्ववीजं च भक्षयेच्छुक्लपर्वणि शुक्लपर्वणिमायां पारदातिलके प्राया
तमुहूर्तेण्याया [illegible] तरुण्या सह नान्यथा मलिनो न भवेज्जातु कान्तिता न्त्रेन भक्षयेत् द्रोणपंकजविल्वानि पद्मा
जातं न लंघयेत् सहदेवी सिद्धवल्ली श्रीदेवी विल्ववल्लभां कमलां महूत्पवालं च धारयेन्मूर्ध्नि सर्वदा श्रीदेवी श्रीलता विल्ववल्ले

विद्या ५२
वि०
४३९
439

अथ राजिता कन्याकुमारी प्रयोगसारे धान्यगोगुरुहन्ता ज्ञानरागांननस्यैवेदुपतिनाथवृत्तवंशां नोनतारापरशिरानवनग्रोनार्द्रपाणि
शरणः श्रियमिच्छेत् यंत्रसारे श्रीबीजसाध्यसंयुक्तं कर्णिकायां विलिख्य च वस्वादिपत्रसंख्यापत्रेष्वपि यथाक्रमं श्रीसूक्तस्या
र्धर्द्धमृचामालिख्य तद्बहिः यः शुचिः प्रयतो भूत्वेत्यृचा मातृकयापि च संवेष्ट्य च धराविवृकोणेषु श्रियमालिखेत् श्रीसूक्तयंत्रमेत
द्धारयेद्यो यथाविधिः पुत्रारोग्यवराधान्यधनगोशस्यशालिनी लक्ष्मीनिवकुलालक्ष्मीर्नीवेत्स शरदां शतं इदमेवतास्य यदेविलि
ख्य तस्य चलितसंपातं संस्थाप्यांगणभूमौ लक्ष्मीमावाह्य साधु संपूज्य भूयः परिवारयुतां बलिं हरेत् भूतबलिसमीकृतं यस्मिन्नेव
क्रियते वर्द्धते तत्र संपदे नित्यपुत्रैर्दीर्घैर्विभवैर्भूमे सुधान्येषु नागेशेषेस्तरंगैर्वृषभैर्गोभिः सुसंख्याहीनैः रमयंती गेहे स्थितिरीहरत्याभूत
संप्लववलक्ष्मीः अस्मार्थः अष्टदलकमलं कृत्वा तत्कर्णिकायां श्रीबीजसाध्यसहितं विलिख्याष्टदलेषु हिरण्यवर्णामित्यारभ्य तामि
त्यारभ्य तामिहोपह्वये श्रियमित्यंतमृचामर्द्धमर्द्धमालिख्य तद्बहिर्दशकमलं कृत्वा तद्दलेषु स्वाहादि प्रादक्षिण्येन चंद्राभासामि
त्यारभ्य मयि श्रीः श्रीयतां यश ३ त्यंतमृचामर्द्धमर्द्धमालिख्य तद्बहिर्हृत्त्रयं कृत्वाभ्यंतरवीथ्यायः शुचिः प्रयतो भूत्वाजुहुयादाज्यम
न्वहं श्रियः पंचदशर्चं च श्रीकामः सततं जपेत् इत्यृचा संवेष्ट्य वहिर्वायव्यां मातृकया संवेष्ट्य तद्बहिश्चतुरस्रे विलिख्य तत्कोणेषु श्री
बीजमालिखेत् एतद्यंत्रस्य फलं भवति अथाश्विननवरात्रे वेदोक्तप्रकारेण महालक्ष्मीपूजनं वर्तते तत्र ब्राह्मे मुहूर्ते उत्थाय
श्रीगुरुस्मरणं कुण्डलिनीध्यानाजपासंकल्पशौचदंतधावनस्नानमंत्रस्नानतिलकधारणवैदिकसंध्यामंत्रसंध्यासूर्यार्घ्यं च दं
त्वा देवर्षिपितृतर्पणं निर्विधाय स्वासने समुपविश्य भूतशुद्धिदीपनाथवंदनविघ्नोत्सारणशुद्धिदिग्बंधनाग्निप्राकारत्रयं शांति
पाठं भूतशुद्धिं प्राणप्रतिष्ठां मातृकान्यासादि योगपीठन्यासांतं विधाय मूलेन प्राणायामत्रयं कृत्वा गणपतिकुलदेवताब्राह्मणा
दीन्नमस्कृत्य ॐ सुमुखश्चैकदंतश्च कपिलो गजकर्णकः लंबोदरश्च विकटो विघ्ननाशो विनायकः धूम्रकेतुर्गणाध्यक्षो भालचंद्रो ग

जानना द्वादशैतानि नामानि यः पठेच्छृणुयादपि विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा संग्रामे संकटे चैव विघ्नस्तस्य न जायते
शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरैरपि सर्वविघ्न
छिदे तस्मै गणाधिपतये नमः यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम अनन्याश्चिन्तयन्
तो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं स्मृते सकलकल्याणभाजनं यत्र जायते पुरुषस्तमजं नित्यं व
जामि शरणं हरिं सर्वदारंभकार्येषु नास्ति तेषाममंगलं येषां हृदिस्थो भगवान् मंगलायतनो हरिः तदेव लग्नं सुदिनं तदेव ता
राबलं तदेव विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि इति मंगलं कृत्वाऽद्य आश्विने मासि चैत्रे वा अमुकगोत्रोत्पन्नोऽमुक
देवशर्मा श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीतिपूर्वकं दुरितनिवारणक्षेमस्थैर्यायुरारोग्यैश्वर्याभिवृद्धिकामः प्रति
पदारभ्य नवमीपर्यन्तं इष्टदेवतास्वरूपिण्याः श्रीमहालक्ष्म्याः षोडशोपचारैः पूजनं करिष्ये श्रीसूक्तचण्डीपाठं तदङ्गशान्तिहोमा
श्च करिष्ये इति संकल्प्य निर्विघ्नार्थं गणपतिपूजनं करिष्ये ततः रक्ताक्षतादिभिरष्टदलं पीठे विरच्य तत्र ॐ भूर्भुवः स्वः महागण
पतये सिद्धिसहित सवाहन सायुध सपरिवार इहागच्छ हे हेरंब त्वमेह्येहि अंबिकात्र्यंबकात्मज सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपि
तः नागास्य नागहार त्वं गणराज चतुर्भुज भूषितः स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः आवाहये त्वां पूजार्थं रक्षार्थं च मम क्र
तोः इहागत्य गृहाण त्वं पूजा कर्मं चरस्व मे आवाहितं गणेशानं पूजाद्रव्यैः प्रपूजयेत् ॐ गणानां त्वा गणपतिं हवामहे
प्रियाणां त्वा प्रियपतिं हवामहे निधीनां त्वा निधिपतिं हवामहे वसो मम आहमजानि गर्भधमा त्वमजासि गर्भधम् ॐ
गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद साद
इति मंत्रेण आसनं स्वागतं पाद्यमर्घ्यमाचमनीयं मधुपर्कं पुनराचमनीयं स्नानं वसनं आभरणानि गंधं पुष्पं धूपं दीपं नैवेद्य

विद्या॰ २२
जैव॰
४४०
440

तांबूलप्रदक्षिणानमस्कारान्समर्प्य हस्तद्वयेन नारिकेलादिकं अर्घ्यपात्रस्थं सपुष्पं गृहीत्वोत्थाय प्रार्थयेत् रक्तरक्तगणाध्यक्षरक्त
त्रैलोक्यरक्षकभक्तानामभयंकर्त्ता त्राता भवार्णवात् द्वैमातुर कृपासिंधो षाण्मातुराग्रज प्रभो वरद त्वं वरं देहि वांछिता
र्थद अनेन फलदानेन फलदोस्तु सदा मम इति फलं दत्त्वा प्रार्थयेत् विघ्नेश्वराय वरदाय सुरप्रियाय लंबोदराय सकलाय ज
द्धिताय नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथाय नमो नमस्ते भक्तार्त्तिनाशनपराय गणेश्वराय सर्वेश्वरा
य शुभदाय सुरेश्वराय विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते
नमः विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे भक्तिप्रियाय देवाय नमस्तुभ्यं विनायक इति नमस्कृत्य त्वं विघ्नशत्रुदलनेति
च सुंदरेति भक्तप्रियेति सुखदेति फलप्रदेति विद्याप्रदेत्यघहरेति च ये स्तुवंति तेभ्यो गणेश वरदो भव नित्यमेव इति सम्यक्
प्रार्थ्य ऋत्विक्वरणं कृत्वा यवान्यापयित्वा तन्मध्ये कलशस्थापनं कुर्यात् तद्यथा ॐ महीद्यौः पृथिवी च न इमं यज्ञं मिमिक्षता
म् पिपृतान्नो भरीमभिः इति भूमिं स्पृष्ट्वा ॐ स्योना पृथिवि नो भवानृक्षरा निवेशिनी यच्छा नः शर्म सप्रथाः इति भूमिं प्रार्थ्य मृत्तिकां ह
रमेयां इति मृत्तिकां क्षिप्त्वा ॐ ओषधयः समवदंत सोमेन सह राज्ञा यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि यवान्क्षिप्त्वा ॐ
आजिघ्र कलशं मह्या त्वा विशन्त्विंदवः पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः इति तत्र कलशं
निधाय ॐ वरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋत
सदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद इति जलेन पूरयित्वा ॐ स्योना पृथिवि नो भवानृक्षरा निवेशिनी
यच्छा नः शर्म सप्रथाः इति पंचमृत्तिकान्क्षिप्य ॐ ओषधयः समवदन् इति यवान्क्षिप्य ॐ काण्डात्काण्डात्प्ररोहंती परुषः परुष
स्परि एवा नो दूर्वे प्रतनु सहस्रेण शतेन च इति दूर्वान्निक्षिप्य ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिः कृता गोभाज इत्किला

सध्यं यक्ष्मनवद्यपूरुषम् इति पंचपल्लवान्विनिधाय ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्तानो मुंच
न्त्वंहसः इति फलं ॐ यतिर्वाजपतिः कविरग्निर्हव्यान्यक्रमीत् दधद्रत्नानि दाशुषे इति पंचरत्नानि ॐ हिरण्यगर्भः समव
र्त्ततान्ने भूतस्य जातः पतिरेक आसीत् सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम इति हिरण्यं ॐ युवा सुवासाः
परिवीत आगात् स उश्रेयान्भवति जायमानः तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः इति रक्तवस्त्रेण सूत्रेण वा वे
ष्ट्य ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं इति गंधं ॐ पूर्णादर्वि परापत सु
पूर्णा पुनरापत वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो इति उपरिधान्यपूर्णपात्रं वितनु पश्चिनारिकेलफलं संस्था
प्य ॐ तत्वायामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः अहेडमानो वरुणेह बोध्युरुशंस मान आयुः प्रमोषीः
इति मंत्रेण वरुणावाहनं कृत्वानेनैव मंत्रेण षोडशोपचारैः पूजयेत् ततः ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे तेन स
त्येन मे देव तीर्थं देहि दिवाकर इति क्रोमित्यंकुशमुद्रया रविमण्डलात्तीर्थान्यावाह्य गंगे च यमुने चैव गोदावरि सरस्वती नर्म
दे सिंधु कावेरी जलेऽस्मिन्संनिधिं कुरु ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः आयांतु लक्ष्मीपूजार्थं दुरितक्षयकारकाः
इत्यावाह्य चंदनाक्षतपुष्पमाल्यादिभिः कलशमलंकृत्य ॐ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः मूले तत्र स्थितो ब्र
ह्मा मध्ये मातृगणाः स्थिताः कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा ऋग्वेदो यजुर्वेदः सामवेदो ह्यथर्वणः अंगैश्च सहिताः स
र्वे कलशं तु समाश्रिताः इति कलशमभिमंत्र्य देवदानवसंवादे मथ्यमाने महोदधौ उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं त्व
त्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः त्वयि तिष्ठंति सर्वेपि यतः कामफलप्रदाः त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव सान्नि

ध्यं कुरु मे देव प्रसन्नो भव सर्वदा इति प्रार्थ्य इत्थं कलशस्थापनं विधाय मूलमंत्रेण प्राणायामत्रयं कृत्वा ॐ अस्य श्री श्रीसूक्तस्यर्षि
रसि आनंदकर्दमचिक्लीतश्रीपुत्रेभ्यो ऋषिभ्यो नमः हृदि श्रीविभावसुरग्निर्देवताभ्यां नमः मुखे अनुष्टुब्बृहती त्रिष्टुबनु
ष्टुप्प्रस्तारपंक्तिभ्यो छंदोभ्यो नमः इति विन्यस्य मम सकुटुंबस्य तेजस्वैश्वर्यायुरारोग्यैश्वर्याभिवृद्धये विनियोगः इति कृतांजलि
रुक्त्वा ॐ हिरण्यायै नमः हृदयाय नमः ॐ चंद्रायै नमः शिरसे स्वाहा ॐ रजतस्रजायै नमः शिखायै वषट् ॐ हिरण्यस्रजायै
नमः कवचाय हुं ॐ हिरण्यायै नमः नेत्रत्रयाय वौषट् ॐ हिरण्यवर्णायै नमः अस्त्राय फट् इति षडंगमंत्रान् गुष्ठादितलां.
तं करयोः हृदयादिषडंगेषु विन्यसेत् शिरसि हिरण्यवर्णां नेत्रयोः तामआवह कर्णयोः स्रग्रूपिणीं नासिकायां कांसोस्मितां
मुखे चंद्रां गले आदित्यवर्णां बाह्वोः उपैतु मां हृदि क्षुत्पिपासां नाभौ गंधद्वारां गुह्ये मनसः कामं गुदे कर्दमेन ऊर्वोः आ
पस्रजंतु जान्वोः आर्द्रां॰ जंघयोः आर्द्रां पादयोः तामआवह इति विन्यस्य श्रां श्रीं श्रूं श्रैं श्रौं श्रः इत्यपि षडंगानि विन्यस्य प्राङ्मुखो
रीत्या स्वहृत्कमले देवीं ध्यायेत् अरुणकमलसंस्थानद्रजःपुंजवर्णां करकमलधृतेष्टाभीतियुग्मांबुजा च मणिमुकुटविचि
त्रालंकृताकल्पजालैर्भवतु भुवनमाता संततं श्रीयै नमः इति ध्यात्वा मानसोपचारेण—ध्यार्घ्यादिस्थापनांते ॐ क्लीं हंसः सोहं स्वा
हा मंत्रेणात्मपूजां विधाय पीठपूजामारभेत् ॐ मण्डूकाय नमः एवं कालाग्निरुद्राय नमः मूलप्रकृत्यै आधारशक्त्यै कूर्माय
अनंताय वाराहाय पृथिव्यै॰ सुधासमुद्राय श्वेतद्वीपाय स्वर्णपर्वताय नंदनोद्यानाय कल्पवृक्षवनाय स्वर्णप्राकाराय क
रुणातोयपरिखाय स्वर्णमण्डपाय पूर्वद्वारे श्रियै इंद्राय ब्रह्मणे॰ सत्त्वाय ऋग्वेदाय आत्मने कलातत्त्वाय अंबिकायै इंद्रा
ण्यै वेदमात्रे शैलपुत्र्यै॰ ब्रह्मचारिण्यै चण्डाय स्कंदमात्रे कात्यायन्यै॰ कालरात्र्यै॰ गौर्यै॰ ततो दक्षिणद्वारे द्वारश्रियै॰ यमाय
पूर्णतायै सिद्धायै तमायै विष्णवे यजुर्वेदाय रजसे विद्यातत्त्वाय जगन्मात्रे मायायै शिवायै शांत्यै प्रभायै॰ क्लींकारायै क्लींकार

ये मायाशक्त्यै बीजायै अंतरात्मने दण्डधाराय ततः पश्चिमद्वारे द्वारश्रियै वरुणाय रुद्राय सामवेदायनमस्ते आदित्या
वाहन्यै· पंगवाधुधायै हंसवाहिन्यै जगज्जीवायै जगद्धीशायै षोडशकलायै एणांकनयनाय चित्रिण्यै चित्रमालायै वि
त्रायै चामुण्डायै ततउत्तरद्वारश्रियै कपालधारिण्यै भक्तवत्सलायै हूंकारायै ह्रांकारायै विमलरूपायै ईशानाय पार्व
त्यै ब्रह्मणे अथर्वणवेदायै धात्रे ज्योत्स्नायै कल्याण्यै शर्वाण्यै चन्द्रकलायै चंद्रवदनायै विभूत्यै परमविभूत्यै भस्मधारिण्यै
पावनायै· गंगायै भागीरथ्यै गोदावर्य्यै प्रवरायै· प्रवणायै क्रांकारायै क्रौंकारायै· क्रौंकारायै सर्वबीजात्मने बीजप्रवाहिन्यै म
ध्ये रत्नवेदिकायै रत्नसिंहासनाय धर्माय ज्ञानाय· वैराग्याय· ऐश्वर्याय· अधर्माय· अज्ञानाय· अवैराग्याय· अनैश्वर्याय·
श्वेतछत्राय विद्युत्यै मायाशक्त्यै· आनंदकंदाय· संविन्नालाय प्रकृतिमायपत्रेभ्यो विकारमयकेसरेभ्यो पंचाशद्वर्णबीजा
ढ्यसर्वतत्वरूपायै कर्णिकायै अं अर्कमण्डलाय मं वह्निमण्डलाय सं सोममण्डलाय रंरजसे तंतमसे श्रीआत्मने· अं
अंतरात्मने· पंपरमात्मने क्रौंज्ञानात्मने आत्मतत्वाय मायातत्वाय विद्यातत्वाय कलातत्वाय· परतत्वायनमः इतिसं
पूज्यकेसरेषु पूर्वादिष्टदिक्षु मध्येच ओंविभूत्यै· कांत्यै हृष्ट्यै कीर्त्यै सन्नत्यै· पुष्ट्यै उत्कृष्ट्यै मत्यै· ऋद्ध्यै· इतिसंपूज्य ओं
श्रींसर्वशक्तिकमलासनायनमः इतिसमः इतिसमस्तपीठंसंपूज्यमूलमंत्रमुच्चार्य श्रीलक्ष्मीमूर्तिं परिकल्प्य यामिनमः इतिक
ल्पेन परिमूर्तिं परिकल्प्य चतुर्मुखक्रांल्लौडुगांदेवीव्यवस्थिता स्यायामि महादेवी सर्वतोभयप्रदायिनी इतिसंस्था
प्य· स्वहृत्कमले मार्गवध्यात्वा देव्यास्तेजोदीपादीयांतरमिव वहन्नासापुटाधना पुष्पांजलावानीय पद्मे हृदिदेवदेवेशि परिवा
रसमन्विते यावत्त्वांपूजयिष्यामितावत्त्वंचेहस्थावह महाप्रयत्नेनतस्यैकारणानंदविग्रहे सर्वभूतहितेमातरेह्येहिपरमेश्वरि
इत्यावाह्यावाहनादिदशमुद्राः प्रदर्श्य ध्यायेत् लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरंगधामेश्वरीं दासीभूतसमस्तदेवनिकरांलोकैक।

वि॰ या॰ २२
व॰
४४२
442

दीपांकुरां श्रीमन्नंदकदातनत्रविभवश्रेलिहगंगाथर्वात्रैलोक्यकाङ्क्षिविनोसत्यग्निजां वंदे सुकुंदप्रियां इति ध्यात्वा मूलमंत्रे
णादीपिन्यामालिन्यार्घ्येकेनच त्रिवारं प्रोक्षयित्वा प्राणप्रतिष्ठां जलिं गृहीत्वा ॐ ड्गौ कात्यायनी देवि शांभवी शंकरप्रिये
मयाभक्त्याकृतां पूजां गृहाण त्वं सुरेश्वरि हिरण्यवर्णां जातवेदसे नमो देव्यै श्रीमहालक्ष्म्यै नमः आवाहनं समर्पयामि॰
इति दद्यात् तप्तकांचनवर्णाभां मुक्तामणिविराजितां अमलंकमलं दिव्यमासनं प्रतिगृह्यतां तां म आवह जातवेदसे
नमो देव्यै महापरस्वत्यै नमः श्रीरेतत्ते स्वागतं नमः ॐ गंगादितीर्थसंभूतं गंधपुष्पाक्षतैर्युतं पाद्यं ददाम्यहं त्वम्भं नमस्ते कमला
लये अश्वपूर्वां जातवेदसे नमो देव्यै॰ श्रीरेतत्ते पाद्यं नमः अष्टगंधसमायुक्तं स्वर्णपात्रे प्रपूरितं अर्घ्यं ददाम्यहं तुभ्यं प्रसीद
त्वं सुरेश्वरि कांसोस्मितां जातवेदसे नमो देव्यै लोकमात्रे नमः श्रीरेषते॰ र्घ्यः स्वाहा सर्वलोकस्य यामातानायामातालोकपाविनि
ददाम्याचमनं तस्यै महालक्ष्म्यै प्रयत्नतः चंद्रप्रभासां जातवेदसे॰ नमो देव्यै॰ वरदायै नमः श्रीरिमते आचमनीयं स्वधा॰ कपि
लादधिकुंदेंदुधवलं मधुसंयुतं स्वर्णपात्रस्थितं देवि मधुपर्कं गृहाण मे॰ आदित्यवर्णे॰ जातवेदसे नमो देव्यै भक्तप्रियायै न
मः श्रीरेषते मधुपर्कः स्वधा कर्पूरवासितं वारिनिर्मलं शुद्धहेतवे गृहाण परमेश्वरि पुनराचमनीकं॰ आदित्यवर्णे॰ जात
वेदसे नमो देव्यै भक्तप्रियायै नमः श्रीरेतत्ते आचमनीयं नमः पद्मपादुकमादेवि स्नानार्थं त्वां नमाम्यहं॰ स्नानशाटीगृही
त्वा तु स्नानाय समागता सुगंधितैलगव्यादि पंचामृतजलादिकं सुगंधिस्नात्वा चूर्णाश्चनयोद्वर्तनकादिकं नानातीर्था
द्भवं तोयं स्नानीयं च गृहाण मे आदित्यवर्णे जातवेदसे॰ नमो देव्यै भक्ताभिप्रियायै नमः श्रीरेतत्ते स्नानीयं नमः आपो हि ष्ठे
तिमलापकर्मणे नमः पयोदधिघृतं चैव शर्करामधुसंयुतं पंचामृतं मया नीतं गृहाण परमेश्वरि आदित्यवर्णे जातवेदसे
भद्रायै नमः श्रीरेतत्ते पंचामृतस्नानं पुरुषसूक्तेन शुद्धोदकेन स्नानं जातवेदसे इति पुनराचमनीयं दिव्यांबरनवं श्वेतं तोमे

वान्तिमनोहरं त्रैलोक्यजननी देवि द्वितीयमानं गृहाण मे उपेतम् जातवेदसे नमो देव्यै श्रीलक्ष्म्यै नमः एतत्ते वस्त्रयुग्मं नमः एहि दे
विविभूषार्थं नेपथ्यागारमुत्तमं विभूषासनमास्थाय तथादर्शं विलोकय च केशप्रसाधनं कृत्वा भूषणान्यंगमाकुरु रत्नकंक
ण वैडूर्यमुक्ताहारादिकानि च सुप्रसन्ने सदा लक्ष्मी भूषणानि गृहाण मे त्वयि यथा जातवेदसे नमो देव्यै हिरण्यायै नमः
श्रीरेतानि ते भूषणानि नमः एहि देवि विचित्रं स्थानं सिंहासनमनुत्तमं पूजावक्रं समास्थाय गंधं देव्यङ्गमाकुरु चंदनागरुकर्पूरकुं
कुमाद्यैः समन्वितं कस्तूरीरोचनायुतं गंधं देवि गृहाण मे गंधद्वारां जातवेदसे नमो देव्यै महादेव्यै श्रीरेष ते गंधो नमः मुक्त
मुक्ताफलाभिरलैरक्षतैः शशिसन्निभैः सर्वाधिपे महालक्ष्मीर्योतयामि सहभक्तितः जातवेदसे नमो देव्यै देव्यै नमः श्रीरेतास्ते
अक्षताः हरिद्रां च सदा नीलां देवि कल्याणदायिनि सौभाग्यवर्द्धनार्थं त्वं गृहाण हरिवल्लभे जातवेदसे नमो देव्यै हरिप्रियायै नमः
श्रीरेतत्ते हरिद्रां नमः कुंकुमं शोभनं दिव्यं सर्वदा मंगलप्रदं मयानीतं महादेवि तुभ्यं दास्यामि सुन्दरि जातवेदसे नमो देव्यै मंगला
यै नमः श्रीरेतत्ते कुंकुमं नमः सिंदूरं शुभदं नित्यं महाशक्तिप्रदं सदा प्रयच्छामि महादेवि सर्वसौभाग्यदायिनि जातवेदसे नमो दे
व्यै महादेव्यै नमः श्रीरेतत्ते सिंदूरं नमः मालतीमल्लिकादीनि नवानि कुसुमानि च पक्वान्यथ प्रयच्छामि पुष्पाणि प्रतिगृह्यतां म
नसः कामममाकूतिं जातवेदसे नमो देव्यै पद्मनाभायै नमः श्रीरेतानि पुष्पाणि वै सिंदूरं नमः रक्तैः श्वेतैस्तु पीतैः पुष्पैर्मल्लिकादि
विचित्रितैः पुष्पमालां प्रयच्छामि प्रसीद त्वं सुरेश्वरि जातवेदसे नमो देव्यै श्रीरेषा ते पुष्पमाला नमः सुगंधशीतलं शुभ्रं नाना
गंधसमन्वितं प्रीत्यर्थं तव देवेशि सचूर्णं प्रतिगृह्यतां जातवेदसे नमो देव्यै सुभगायै नमः एतत्ते परिमलं नमः अथाङ्गपूजा ॐ
चंचलायै नमः पादौ पूजयामि एवं चंचलायै गुल्फौ कान्त्यै जानुनी मंगलायै जंघे भद्रकाल्यै ऊरू कमलिन्यै कटिं शिवायै नाभि
तमायै उदरं गौर्यै हृदयं सिंहवाहिन्यै स्तनद्वयं स्कंदमात्रे भुजद्वयं कंबुकंठायै कंठं सरस्वत्यै मुखं वेदवासिन्यै नासिकां स्वर्णक

विद्या॰ ११
व॰
४४२

443

एडलायै· कर्णद्वयं· चण्डिकायै नेत्रद्वयं· ललाटं· कुमार्यै शिरः सर्वरूपायै· सर्वांगं पूजयामि इति संपूज्याष्टोत्तरशतनामभिः
पूजयेत् ॐ अस्य श्रीमहालक्ष्म्या अष्टोत्तरशतनाममंत्रस्य ब्रह्मा ऋषिरनुष्टुप्छंदः श्रीमहालक्ष्मी देवता श्रीमहालक्ष्मी प्रीत्यर्थं श्री
महालक्ष्म्या अष्टोत्तरशतनामभिः पूजयिष्ये ततः श्रीबीजषट्केन षडंगन्यासं कृत्वा लक्ष्मीतीरसमुद्भूतेत्यावाह्य ध्यात्वा इमैर्नामभिः पू
जयेत् तद्यथा ॐ महालक्ष्म्यै नमः महाकाल्यै नमः महासरस्वत्यै नमः महाकन्यायै नमः महागौर्यै नमः महादेव्यै नमः भ
क्तानुग्रहकारिण्यै नमः स्वप्रकाशात्मरूपिण्यै नमः महामायायै नमः माहेश्वर्यै नमः वागीश्वर्यै नमः जगद्धात्र्यै नमः कालरा
त्र्यै नमः त्रिलोचनायै नमः भद्रकाल्यै नमः कपालिन्यै नमः महाघोर्यै नमः त्रिलोकात्मिकायै सिद्धलक्ष्म्यै क्रियालक्ष्म्यै २·
लोकसर्गप्रदायिन्यै· अरूपायै स्वरूपायै विश्वरूपिण्यै· पंचभूतात्मिकायैः देवमात्रे सुरेश्वर्यै दारिद्र्यध्वंसिन्यै वीणापुस्तक वेण्यै·
धारिण्यै सर्वधात्र्यै· ३· ब्रह्मात्मिकायै अष्टांगरूपिण्यै· नवदुर्गाकायै· अष्टभैरव्यै· गंगायै शारदायै· सर्वशास्त्रधारिण्यै·
समुद्रवसनायै· ब्रह्माण्डमणिमेखलायै ४· अवस्थात्रयनिर्मुक्तायै· गुणत्रयविवर्जितायै· योगध्यानैकसंन्यासिन्यै· योगध्यानैकप
कपरायणायै· देवत्रयविशोभकायै· वेदांतज्ञानरूपिण्यै पद्मावत्यै· विशालाक्ष्यै नागयज्ञोपवीतिन्यै· सूर्यचंद्राग्निभासायै ५· अ
हनतत्त्वरूपिण्यै· वेदिकायै· वेदरूपिण्यै· गिरिसंभवायै कैवल्यदायै· विष्णुवलायै सूर्यमंडलसंस्थितायै· सोममण्डलम
ध्यस्थायै· वायुमण्डलसंस्थितायै ६· वह्निमण्डलसंस्थितायै शक्तिमण्डलसंस्थितायै चक्रिकायै चक्रमध्यस्थितायै चक्रमा
र्गप्रदायिन्यै सर्वसिद्धांतमार्गप्रदायिन्यै षड्वर्गवर्जितायै· सत्यतादिप्रमाहृतायै विद्यामूर्त्यै· त्रैलोक्यमोहिन्यै ७· विद्यायै चर्म ८
दायै रक्तायै ब्रह्मस्थापितरूपायै· कैवल्यज्ञानगोचरायै· करुणायै· वरुणायै मधुकैटभमर्दिन्यै अचिन्त्यलक्षणायै· गोप्र
सदाभक्तायनाशिन्यै महारमायै· परमेश्वर्यै· स्वसिद्धलक्ष्म्यै महाकालिंद्यै· सद्योजातायै· वामदेव्यै· अघोरायै तत्पुरुषायै·

ईशानक्रूपिण्यै ९। पकालरुद्दैव्यै। योगिन्यै। योगध्यानपराक्रमायै श्रीसिद्धलक्ष्म्यैश्रियै। कमलायायै। पद्मायै नलिनपुत्रमक
(?)पुत्राये शैलपुत्र्यै १०। ब्रह्मचारिण्यै। चान्द्रघंटायै। कूष्माण्डायै स्कंदमात्रे कात्यायन्यै कालरात्र्यै महागौर्य्यै। सिद्धिदा
ॐ सर्वात्मिकायैनमः १८ अष्टोत्तरशतनामभिः संपूज्य। ततो कार्णिकायां श्रां हृदयायनमः श्रीं शिरसे स्वाहा सूं शिखायै
वौषट् श्रैं कवचायनमः श्रौं नेत्रत्रयायनमः श्रः अस्त्रायफट् ततो ष्टदलेषु पूर्वादि ॐ पद्मासनायैनमः ॐ पद्मवर्णायैनमः
पद्मस्थायै ॐ आर्द्रायै ॐ तर्पयंत्यै ॐ तर्पयंत्यैः ॐ तमायै ॐ ज्वलिन्यै ॐ स्वर्णप्राकारायै ततो दलाग्रेषु ब्रह्म्यै माहेश्वरी
कौमार्य्यै विष्णव्यै वाराह्यै इंद्राण्यै चामुण्डायै महालक्ष्म्यै ततो भूपुरे लं इंद्रायसायुधायसवाहनायसपरिचारायसशक्ति
कायनमः एवं रंअग्नयेनमः रं यमाय षं निर्ऋतये वं वरुणाय यं वायवे सं कुवेराय हौं ईशानाय आं ब्रह्मणे ह्रीं अनंताय।
तद्वद्दिग्वज्राय शं शक्तये दं दण्डाय खं खड्गाय पं पाशाय। कौं अंकुशाय गं गदायै शूं शूलाय पं पद्माय चं चक्रायनमः इति
संपूज्य। देव्यै पुष्पांजलिं दत्वा धूपं दशांगंगुलधूपं चंदनागरसंयुतं भक्तयादत्तमयादेवि प्रसीदत्वं महेश्वरि कर्दमेन प्रजाभू
ता जातवेदसे नमोदेव्यै भद्रकाल्यै श्रीरेषतेधूपोनमः दीपं। कर्पूरवर्तिसंयुक्तं गोघृतेन समन्वितं दीपं गृहाण देवेशि महाल
क्ष्मि नमोस्तुते आपस्रजंत। जातवेदसे नमो देव्यै श्रीमहालक्ष्मैनमः श्रीरेषतेदीपोनमः नैवेद्य नैवेद्यं गृहतां देवि भक्ष्यभोज्यस
मन्वितं षड्रसैरन्वितं दिव्यं घृतेन परिपूरितं आर्द्रां जातवेदसे नमोदेव्यै पूर्णमालिन्यै श्रीरेतत्ते नैवेद्यं स्वधा। मध्ये पानीयं उत्तरापो
शनं पुनराचमनीयं कर्पूरचंदनोन्मिश्रं दिव्यगंधसमन्वितं करोद्वर्तनकं नित्यं गृहाण परमेश्वरि जातवेदसे नमोदेव्यै महा
लक्ष्म्यै श्रीरेतत्ते करोद्वर्तनंनमः तांबूलं पूगीफलैः सकर्पूरैर्नागवलीदलैर्युतं कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यतां आर्द्रां।
जातवेदसे नमोदेव्यै। पिंगलायै। श्रीरेतत्ते तांबूलंनमः जातवेदसे। नमोदेव्यै। देव्यैनमः श्रीरेतत्ते सुवर्णपुष्पं फलं इदं फलंम

विया॰ २२
व॰
४४४

444

याहेविश्वस्यापितेपुरुतरजस्तव तेनमेमफलावाप्तिर्भवेजन्मनि जातवेदसे नमो देव्यै ह्रीं हां ऐं श्रीरेतत्तेफलं नीराजनं तव सूर्याग्नितारा
निविद्युदग्निर्ममैव हि नीराजनं मया दत्तं गृहाण परमेश्वरि तामम आवह जातवेदसे नमो देव्यै पद्मनाभिवासिन्यै श्रीरेतत्तेनी
राजनं गौरिस्मिमाय जातवेदसे प्राणोदेवी समस्त श्रीसूक्तं पठित्वा नमो देव्यै महाकाल्यै नमः महालक्ष्म्यै नमः महास
रस्वत्यै नमः श्रीरेतत्तेमंत्रपुष्पं सर्वस्वरूपे जातवेदसे नमो देव्यै महाकाल्यै नम श्रीरेतानि ते प्रदक्षिणानि सर्वतः पाणि
पादंते· यः शुचिः प्रयतः इत्यादि समस्तं नमस्ते त्वं सदा देव्यै नमस्ते त्वं हरिप्रिये नमस्ते त्वं जगद्धात्रि नमस्ते शिववल्ल
भे जातवेदसे नमो देव्यै· महामायायै नमः श्रीरेतानि वंदनानि नमः पद्मप्रिये या सा पद्मासनस्था· या मा या मधुकैट
भप्रणाशनी या माहिषोन्मूलिनी या धूम्राक्षि चण्डमुण्डमथनी या रक्तबीजाशनी शक्तिः शुंभनिशुंभदैत्यदमनी या सि
द्धलक्ष्मीपरा सा देवी नवकोटिशक्तिसहिता मां पातु विश्वेश्वरी जातवेदसे नमो देव्यै· श्रीरेषा ते प्रार्थना ततः श्रीसूक्तं च पुनः
पाठ लक्ष्मीहृदयादिकं पठित्वा ग्रहस्थादि नाम जपं समर्पयेदिति लक्ष्मीहृदयादिकं पठित्वा हिनापं समर्पयेदिति पूजा अथ लक्ष्मी
हृदयं अस्य श्रीलक्ष्मीहृदयस्तोत्रस्य श्रीभार्गव ऋषये नमः मुखे त्रिष्टुबादिछंदोभ्यो नमः हृदये श्रीमहालक्ष्मीदेवता
यै नमः इति विन्यस्य मम अलक्ष्मीपरिहारपूर्वक दीर्घायुष्यैश्वर्यमहदैश्वर्य फलकाम्यर्थे लक्ष्मीहृदयपाठे विनियोगः
इति कृतांजलिर्वदेत् ततः श्रां श्रीं श्रूं श्रैं श्रौं श्रः इति मंत्रैः षडंगन्यासं विधाय ध्यायेत् ध्यानं हस्तद्वयेन कमले धारयंतीत
लीलया· हारनूपुरसंयुक्तां लक्ष्मीं देवीं तु चिंतयेत् वंदे लक्ष्मीं परशिवमयीं शुद्धजांबूनदाभां तेजोरूपां कनकवसनां सर्वभू
षोज्वलांगीं बीजापूरं कनककलशं हेमपद्मे दधानामाद्यां शक्तिं सकलजननीं विष्णुवामांकसंस्था २ श्रीमत्सौभाग्यजननीं
स्तौमि लक्ष्मीं सनातनीं सर्वकामफलावाप्तिसाधनैकसुखावहां ३ नमामि नित्यं देवेशि त्वया प्रेरितमानसः त्वदाज्ञां शिरसा।

धृत्वा भजामि परमेश्वरीं ४ समस्तसंपत्सुखदां महाश्रियं समस्तकल्याणकरीं महाश्रियं समस्तसौभाग्यकरीं महाश्रियं भजाम्यहं ज्ञा
नकरीं महाश्रियं ५ विज्ञानसंपत्सुखदां सनातनीं विचित्रा वाग्भूतिकरीं मनोहरां अनंतसंभोगसुखप्रदायिनीं नमाम्यहं भूतिक
रीं हरिप्रियां ६ समस्तभूतांतरसंस्थिता त्वं समस्तभूतेश्वरि विश्वरूपे तन्नास्ति यत्त्वद्व्यतिरिक्तवस्तु त्वत्पादपद्मं प्रणमाम्यहं
श्रियं ७ दारिद्र्यदुःखौघतमोपहंत्री त्वत्पादपद्मं मयि सन्निधत्स्व दीनार्तिविच्छेदनहेतुभूतैः कृपाकटाक्षैरभिषिंच मां श्रिये ८
अंब प्रसीद करुणासुधयार्द्रदृष्ट्या मां त्वत्कृपाद्रविणगेहमिमं कुरुष्व· आलोकय प्रणतहृद्गतशोकहंत्री त्वत्पादपद्मयुगलं
प्रणमाम्यहं श्रिय ९ श्रां त्वै नमोस्तु शरणागतरक्षणायै कां त्वै नमोस्तु कमनीयगुणाश्रयायै ह्रीं त्वै नमोस्तु कमनीयगु
णाश्रयायै धां त्वै नमोस्तु धनधान्यसमृद्धिकायै १० शां त्वै नमोस्तु शशिशेखरसंस्थितायै रं त्वै नमोस्तु रजनीकरसोदरायै
भं त्वै नमोस्तु भवसागरतारकायै मं त्वै नमोस्तु भवसूदनवल्लभायै ११ लं त्वै नमोस्तु शुभलक्षणलक्षितायै सिं त्वै नमोस्तु शि
वसंयुतपूजितायै धृं त्वै नमोस्त्वमितदुर्गतिभंजनायै गं त्वै नमोस्तु वरसद्गतिदायिकायै १२ दें त्वै नमोस्तु दिविदेवगणार्चितायै
भूं त्वै नमोस्तु भुवनार्तिविनाशनायै दां त्वै नमोस्तु धरणीधरवल्लभायै पुं त्वै नमोस्तु पुरुषोत्तमवल्लभायै १३ सतीव्रतादिच्छ
विद्रुः सर्वदे त्वै नमोस्तु ते सर्वभयापहंत्र्यै· श्रीविष्णुवक्षःस्थलसंस्थितायै नमो नमः सर्वविभूतिकायै १४ जयतु जयतु जयतु लक्ष्मी
लक्षणालंकृतांगी जयतु जयतु पद्मा पद्मसद्माभिवंद्या जयतु जयतु विद्या विष्णुवामांकसंस्था जयतु जयतु सम्यक् सर्वसंपत्करि
श्रि १५ जयतु जयतु रम्या रत्नगर्भांतरस्था जयतु जयतु शुद्धा शुद्धजांबूनदाभा जयतु जयतु कांतिः कांतिमद्भासितांगी ज
यतु जयतु शांता शीघ्रमायाहि सौम्ये १७ यस्याः कलायाः कमलोद्भवाद्या रुद्राश्च शक्रप्रमुखाश्च देवाः जीवंति सर्वेपि सश

विद्या॰ २२
व॰
४४५
445

८=४

कृपयत्नेप्रभुत्वमापुः परमायुषस्ते १८ लिलेखविनिर्दिलेविधिर्ममलिपिंविसृज्यांतरंत्वयाविलिखितव्यमेतदितितत्फलमापये
तंदंततरहस्फुटंकमलावासिनिश्रीरिमांममर्पयसमुद्रिकांसकलभाग्यसमूचिकां १९ तदिदंतिमिरंभालेस्फुटंकमलवासि
नि श्रियंसमुद्रजांदेहिसर्वभाग्यसमूचिकां २० कलयातेयथादेविजीवंतिसचराचराः तथामेपतकेरेखालक्ष्मिसर्वदासंप्रसीद
मे २१ यथाविष्णुर्ध्रुवेनित्यंस्वकलांसंन्यवेशयत् तथैवस्वकलांलक्ष्मीमयिसम्यक्समर्पय २२ यथाश्रीव्यप्रदेदेविभक्ता
नामभयप्रदे अवलोकुकृपयत्नेनकमलासन्यवेशयता २३ मुद्रासांमज्ञालेपरमंपलक्ष्मीःस्फुटकलासहवैकुंठश्रीनिवसत
कलभेनयोः वसेत्सत्येलोकेममवच्चंसिलक्ष्मीवेदकलाश्रियं श्वेतद्वीपेनिवसतकलामेस्वकरयोः २४ तावत्तिष्ठंममांगेषुती
राब्धौश्रीकलावसेत् सूर्यचंद्रमसौयावद्यावल्लक्ष्मीपतिःश्रिया २५ सर्वमंगलसंपूर्णासर्वैश्वर्यसमन्विता आद्यादिश्री
र्महालक्ष्मीत्वत्कलामयितिष्ठतु २६ अज्ञानतिमिरंहंतुंशुद्धज्ञानप्रकाशिका सर्वैश्वर्यप्रदामेस्तुत्वत्कलामयिसंस्थिता २७
अलक्ष्मीहरतुक्षिप्रंतमःसूर्यप्रभायथा वितनोतुममश्रेयस्त्वत्कलामयिसंस्थिता २८ ऐश्वर्यमंगलोत्पत्तिस्त्वत्कलायां
निधीयते अहंतस्मात्कृतार्थोस्मिपात्रमस्मिस्थितेस्तव २९ भवदावेशभाग्यार्होभाग्यवानस्मिभार्गवि त्वत्प्रसादात्पवित्रो
हंलोकमातर्नमोस्तुते ३० पुनासिमांत्वत्कलयैवयस्माद्दतःसमागच्छममाग्रतस्त्वं परंपदंश्रीर्भवसुप्रसन्नामय्यच्युतेन
प्रविशादिलक्ष्मि ३१ श्रीवैकुंठस्थितेलक्ष्मिसमागच्छममाग्रतः नारायणेनसहमांकृपादृष्ट्यावलोकय ३२ सत्यलोकस्थिते
लक्ष्मित्वंममागच्छसन्निधिं वासुदेवेनसहिताप्रसीदवरदाभव ३३ श्वेतद्वीपस्थितेलक्ष्मिशीघ्रमागच्छसुव्रते विष्णुनासहिते
देविजगन्मातःप्रसीदमे ३४ क्षीरांबुधिस्थितेलक्ष्मिसमागच्छसमाधवे त्वत्कृपादृष्टिसुधयासततंमांविलोकय ३५ रत्नग

र्भे स्थिते लक्ष्मि परिपूर्णे हिरण्मयि समागच्छ समागच्छ स्थित्वा सु पुरतो मम ३६ स्थिरा भव महालक्ष्मि निश्चला भव निर्मले प्रसन्न
कमले देवि प्रसन्नहृदया भव ३७ श्रीधरे श्रीमहाभूते त्वदन्तःस्थं महानिधिं श्रीघ्रमुद्धृत्य पुरतः प्रदर्शय समर्पय ३८ वसुंधरे
श्रीवसुधे वसुदोग्ध्रि कृपामयि त्वत्कुक्षिगतसर्वस्वं शीघ्रं मे सम्प्रदर्शय ३९ विष्णुप्रिये रत्नगर्भे समस्तफलदे शिवे त्वद्गर्भगत
तद्धेमादीन् सम्प्रदर्शय दर्शय ४० रसातलगते लक्ष्मि शीघ्रमागच्छ मे पुरः न जाने परमं रूपं मातर्मे सम्प्रदर्शय ४१ आविर्भव
मनोवेगाच्छीघ्रमागच्छ मे पुरः मा वत्स भैरिहेत्युक्त्वा कामं गौरिव रक्ष माम् ४२ देवि शीघ्रं समागच्छ धरणीगर्भसंस्थिते मात
स्त्वद्भृत्यभृत्योऽहं मृगये त्वां कुतूहलात् ४३ उत्तिष्ठ जागृहि त्वं मे समुत्तिष्ठ सुजागृहि अक्षयान् हेमकलशान् सुवर्णेन सुपूरितान्
निक्षेपान्मे समाकृष्य समुद्धृत्य ममाग्रतः समुन्नतानना भूत्वा समुद्धेहि धरान्तरात् ४५ मत्सन्निधिं समागच्छ मदाहितकृपा
रसा प्रसीद श्रेयसां दोग्ध्रि लक्ष्मि मे नयनायत ४६ अत्रोपविश पद्मे लक्ष्मि त्वं स्थिरा भव हिरण्मयि सुस्थिरा भव सम्प्रीत्या प्रसन्ना वर
दा भव ४७ आनीतांस्तु त्वया देवि निधीन्मे सम्प्रदर्शय अद्य क्षणेन सहसा दत्त्वा संरक्ष मां सदा ४८ मयि तिष्ठ तथा नित्यं यथे
न्द्रादिषु तिष्ठसि अभयं कुरु मे देवि महालक्ष्मि नमोऽस्तु ते ४९ समागच्छ महालक्ष्मि धौतपादाम्बुजे स्थिते प्रसीद पुरतः स्थि
त्वा प्रणतं मां विलोकय ५० लक्ष्मीर्भगवती भासि यत्र यत्र हिरण्मयि तत्र तत्र स्थिता त्वं मे तव रूपं प्रदर्शय ५१ क्रीडसि त्
वं वसुधापरिपूर्णे कृपामयि मम मूर्ध्नि ते हस्तमवलम्बितमर्पय ५२ फलद्भाग्योदये लक्ष्मि समस्तपुरवासिनि प्रसीद मे
महालक्ष्मि परिपूर्णमनोरथे ५३ अयोध्यादिषु सर्वेषु नगरेषु समास्थिते वैभवैर्विविधैर्युक्ता समागच्छ बलान्विता ५४
समागच्छ समागच्छ ममाग्रे भव सुस्थिरा करुणारसनिष्यन्दनेत्रद्वयविलासिनि ५५ सन्निधत्स्व महालक्ष्मि त्वत्पाणिं म
म मस्तके करुणासुधया मां त्वमभिषिच्यास्थिरं कुरु ५६ सर्वराजगृहे लक्ष्मि समागच्छ बलान्विता स्थित्वा तु पुरतो

मेत्वत्प्रसादेनाभयंकुरु ५७ सादरं मस्तके हस्तं मम त्वं कृपयार्पय सदा सर्वगृहे लक्ष्मि त्वत्कृतास्मयि तिष्ठतु ५८ आद्यादि श्रीमहा
लक्ष्मि विष्णुवामाङ्कसंस्थिते प्रत्यक्षं कुरु मे रूपं रक्ष मां शरणागतं ५९ प्रसीद मे महालक्ष्मि सुप्रसीद महाशिवे अचला भव सम्प्री
त्या सुस्थिरा भव मद्गृहे ६० यावत्तिष्ठन्ति देवाश्च यावत्त्वन्नाम तिष्ठति यावद्विष्णुश्च यावत्त्वं तावत्कुरु कृपां मयि ६१ चान्द्री कला यथा
शुक्ले वर्द्धते सा दिने दिने तथा दया ते मय्येव वर्द्धतामभिवर्द्धतात् ६२ यथा वैकुण्ठनगरे यथा वै क्षीरसागरे तथा मद्भवने नित्यं स्थिरं
श्रीविष्णुना सह ६३ योगिनां हृदये नित्यं यथा तिष्ठति विष्णुना तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह ६४ नारायणस्य हृदये भ
वती यथास्ते नारायणोपि तव हृत्कमले यथास्ते नारायणस्त्वमपि नित्यमुभौ तथैव तौ तिष्ठतां हृदि ममापि दयावती श्री ६५
विज्ञानवृद्धिं हृदये कुरु श्रीः सौभाग्यवृद्धिं कुरु मे गृहे श्रीः दयासुवृष्टिं कुरुतां मयि श्रीः सुवर्णवृद्धिं कुरु मे करे श्रीः ६६ न मां त्यजेथाः
श्रितकल्पवल्लि सद्भक्तिचिन्तामणिकामधेनो विश्वस्य मातर्भव सुप्रसन्ना गृहे कलत्रेषु च पुत्रवर्गे ६७ आद्यादिमाये त्वमजा
ण्डबीजं त्वमेव साकारनिराकृतिस्त्वं त्वया धृताश्चाब्जभवाण्डसङ्घाश्चित्रं चरित्रं तव देवि विष्णोः ६८ ब्रह्मरुद्रादयो देवा वेदाश्चा
पि न शक्नुयुः महिमानं तव स्तोतुं मन्दोऽहं शक्नुयां कथं ६९ अम्ब त्वद्वत्सवाक्यानि सूक्तासूक्तानि यानि च तानि स्वीकुरु सर्वज्ञे दया
लुत्वेन सादरं ७० भवन्तीं शरणं गत्वा कृतार्थाः स्युः पुरातनाः इति संचिन्त्य मनसा त्वामहं शरणं व्रजे ७१ अनन्ता नित्यसुखिन
स्त्वद्भक्तास्त्वत्परायणाः इति वेदप्रमाणाद्धि देवि त्वां शरणं व्रजे नव प्रतिज्ञा मद्भक्ता न नश्यन्तीत्यपि क्वचित् इत्यतः संचिन्त्य सं
चिन्त्य प्राणान्संधारयाम्यहं ७३ त्वदधीनस्त्वहं मातस्त्वत्कृपा मयि विद्यते यावत्संपूर्णकामः स्यां तावद्देहि दयानिधे ७४ क्षण
मात्रं न शक्नोमि जीवितुं त्वत्कृपां विना न जीवन्तीह जलजा जलं त्यक्त्वा जलग्रहाः ७५ हिता हि पुत्रवात्सल्याज्जननी प्रस्नुत
स्तनी वत्सं त्वरितमागत्य संप्रीणयति वत्सला ७६ यदि स्यां तव पुत्रोऽहं मातस्त्वं यदि मामकी दयापयोधरस्तन्यसुधाभिरभिषि

षिं च मां ७७ मृगयेन गुणलेशोपि मयि दोषैकमंदिरे पांसूनां वृष्टिबिंदूनां दोषाणां च न मे मितिः ७८ पापिनामहमेकोग्रो
दयालूनां त्वमग्रणीः दयनीयो मदन्योस्ति तव कोत्र जगत्त्रये ७९ विधिनाहं न सृष्टश्चेन्न स्यात्तव दयालुता आमयो वा न सृष्टश्चे
दौषधस्य वृथोदयः ८० कृपा मदग्रजा किं तेऽहं किं वा तदग्रजः विचार्य देहि मे वित्तं तव वित्त दयार्थिने ८१ माता पिता त्वं गुरुः सं
हृतिः सौख्यमेव संजीवनहेतुभूता अन्यं न मन्ये जगदेकनाथे त्वमेव सर्वं मम देवि सत्यं ८२ आद्यादिलक्ष्मीर्भव सुप्रसन्ना विशुद्धवि
ज्ञानसुखैकदोग्ध्रि अज्ञानहंत्री त्रिगुणातिरिक्ता प्रज्ञाननेत्री भव सुप्रसन्नाः ८३ अशेषवाग्जाड्यमलापहारिणि नवंस्प
ष्टवाक्यदायिनि ममैहि जिह्वाग्रसुरंगनर्तकी भव प्रसन्ना वदने च मे श्री ८४ समस्तसंपत्सु विराजमाना समस्ततेजः
सु विराजमानाः विष्णुप्रिये त्वं भव दीप्यमाना वाग्देवता मे नयने प्रसन्ना ८५ भक्तानतानां सकलार्थदे त्वं प्रभव स्वलावण्य
दयास्वदोग्ध्रि स्ववर्णदे त्वं सुमुखी भव श्रीर्हिरण्मयी मे नयने प्रसन्ना ८६ सर्वार्थदा सर्वजगत्प्रसूतिः सर्वेश्वरी सर्वभयाप
हन्त्री सर्वोन्नतां त्वं सुमुखी भव श्रीर्हिरण्मयी मे नयने प्रसन्ना ८७ समस्तविघ्नौघविनाशकारिणि समस्तविघ्नौघहर
रणे विचक्षणा अनंतसौभाग्यसुखप्रदायिनी हिरण्मयी मे नयने प्रसन्ना ८८ देवि प्रसीद दयनीयतमाय मह्यं देवाधि
नाथभवदेवगणाधिवंद्ये मातस्तथैव भव सन्निहिता दृशोर्मे पत्या समं मम मुखे भव सुप्रसन्ना ८९ मा वत्स भैरभयदानक
रोपितस्ते मौलौ ममेति मयि दीनदयानुकंपे मातः समर्पय मुदा करुणाकटाक्षं मांगल्यबीजमिह मातरुतेममांतं ९० क
दात्रहृत्कामधुक् तव मनस्तु चिंतामणिः करः सुरतरुः सदा नवनिधिस्त्वमेवेंदिरे भवेत्तव दयारसो रसरसायनं त्वन्वहं मु
खं तव कलानिधिर्विविधवांछितार्थप्रदं ९१ यथा रसस्पर्शनतोयसोपि सुवर्णता स्यात्कमले तथैव कटाक्षसंस्पर्शनतो
जनानाममंगलानामपि मंगलत्वं ९२ देहीति नास्तीति वचः प्रवेशाद्भीतो रमे त्वां शरणं प्रपन्नः अतः सदास्मिन्नभयप्रदा त्वं

विद्या॰ २२
व॰
४५७
447

सदैव पत्न्या मम सन्निधेहि ९३ कल्पद्रुमेण मणिना सहिता सुरम्या श्रीस्ते कलामयि रसेन रसायनेन । आस्तां यतो मम च हृत्क-
करपाणिपादस्पृष्टाः सुवर्णवपुषः स्थिरजंगमाः स्युः ९४ आद्यादिविष्णोः स्थिरधर्मपत्नी त्वमेव पत्न्या मम सन्निधेहि
आद्यादिलक्ष्मी त्वदनुग्रहेण पदे पदे मे निधिदर्शनं स्यात् आद्यादिलक्ष्मीहृदयं पठेद्यः स राज्यलक्ष्मीमचलां तनोति महाद-
रिद्रोपि भवेद्धनाढ्यस्तदन्वये श्रीः स्थिरतां प्रयाति ९६ यस्य स्मरणमात्रेण तुष्टा स्याद्विष्णुवल्लभा तस्याभीष्टं ददात्याशु तं
पालयति पुत्रवत् ९७ इदं रहस्यं हृदयं सर्वकामफलप्रदं जपः पंचसहस्रं तु पुरश्चरणमुच्यते ९८ त्रिकालमेककालं वा न-
रो भक्तिसमन्वितः । यः पठेच्छृणुयाद्वापि स याति परमां श्रियं ९९ महालक्ष्मीं समुद्दिश्य निशि भार्गववासरे इदं श्री-
हृदयं जप्त्वा पंचवारं धनी भवेत् १०० अनेन हृदयेनान्नं गर्भिण्या अभिमंत्रितं ददाति तत्कुले पुत्रो जायते श्रीपतिः स्वयं १०१
नरेणाप्यथवा नार्या लक्ष्मीहृदयमंत्रिते जले पीते च तद्वंशे मंदभाग्यो न जायते १०२ य आश्विने मासि च शुक्लपक्षे रमो-
त्सवे सन्निहिते च भक्त्या पठेत्तथैकोत्तरवारवृद्ध्या लभेत्स सौवर्णमयीं च वृष्टिं १०३ य एकभक्त्योन्वहमेकवर्षं विशुद्धधीः सप्त-
तिवारजापी स मंदभाग्योपि रमाकटाक्षाद्भवेत्सहस्राक्षशताधिकश्रीः १०४ श्रीशांघ्रिभक्तिं हरिदासदास्यं प्रसन्नमं-
त्रार्थदृढैकनिष्ठां गुरोः स्मृतिं निर्मलबोधबुद्धिं प्रदेहि मे देहि परं पदं श्रि १०५ पृथ्वीपतित्वं पुरुषोत्तमत्वं विभूतिवासं वि-
विधार्थसिद्धिं संपूर्णसिद्धिं बहुवर्षभोगं प्रदेहि मे देहि पुनः पुनस्त्वं १०६ वादार्थसिद्धिं बहुलोकवश्यं वयः स्थिरत्वं लल-
नासुभोगं पौत्रादिलब्धिं सकलार्थसिद्धिं प्रदेहि मे भार्गवि जन्मजन्मनि १०७ सुवर्णवृद्धिं कुरु मे गृहे श्रि सुधान्यवृद्धिं कुरु
मे गृहे श्रि कल्याणवृद्धिं कुरु मे गृहे श्रि विभूतिवृद्धिं कुरु मे गृहे श्रि १०८ ध्यायेल्लक्ष्मीं प्रहसितमुखीं कोटिबालार्कभा-
सां विद्युद्वर्णां वरवरधरां भूषणाढ्यां सुशोभां बीजापूरं सरसिजयुगं बिभ्रतीं स्वर्णपात्रं भर्त्रा युक्तां मुहुरभयदां मह्यमप्यच्युत

रुडी

तेनयो रूपदुर्गानकारः तन्द्रामकारः
अनन्तो विसर्गः

पञ्चुतमश्री ९९ इति श्रीअथर्वणरहस्ये ललीहृदयस्तोत्रं संपूर्णं अथ मन्त्रसंग्रहे अथोच्यन्ते महामन्त्राः दुर्गायाः वांछिता
र्थदाः त्रिवर्गफलमोक्षाभिदायका विजयप्रदाः १ सद्यः सदर्णो ह्रल्लेखा सप्रति कृत्यादिनोद्युक् अत्रीधिकाविसर्गस्थिति
प्रतिष्ठस्त्रियासह २ धूम्रार्चिः स्यात्पं काण्ठस्तद्वानेतेष्ठवर्णिका दुर्गामन्त्रः समाख्यातो भजतां सर्वकामदः २ सद्यः ॐ
दण्डीमनुस्वारसंयुक्तः तेन प्रणवः ह्रल्लेखा भुवनेश्वरीबीजं धृतिरुकारः क्रादिनी दकारः रेफ उ अनुस्वारः तेन दुं अत्रिरीका
रः ईश्विका ऊकारः विसर्गयुक्तः तेन दुः स्मृतिर्गकारः प्रतिष्ठा आ तेन गा श्री ऐकारः धूम्रार्चिर्यकारः तस्य समज्ञ्यो नाहरिति रे
फः तेन वर्णसंश्लेषः समाधिः तेन दुर्गायै इति मंत्रो बोद्धव्यः ११ तथा मुनिः प्रोक्तो नारदाख्यो गायत्रं छन्द ईरितं दुर्गा च देव
ता प्रोक्ता दृष्टादृष्टफलप्रदा षट्दीर्घयुक्तपा[illegible]नैमंत्रपूर्वैर्गुणकैः जातियुक्तैः षडङ्गानि मनोरस्य प्रकल्पयेत् तेन ॐ ह्रीं
दुं दुर्गायै ह्रां हृदयाय नमः इत्यादि षडङ्गमन्त्रा ऊह्याः तदुक्तमाचार्यचरणैः तारो माया च दुर्गायै क्रमाद्यां तां गकल्पने
तिचकारः ऊँसमुस्थितो नीतिपर्यश्वार्यः तथा सिंहासनो मरकतद्युति सिंडचूडां शंखचक्रशरिकान्नले दधती पाशासे वाणा
त्रिनेत्रलसितां भवतुः त्वहं त्रीउर्मीनमामि मालिभूषणभूषितां गमे वा मायुधं यो साध्येन तायथस्ययोरस्ये इत्यायुधध्यानं तथा
अष्टपत्रां बुजनहं हं च तत्र स्वत्रयान्वृतं चतुर्द्वारसमायुक्तं कुंकुमादिभिरुद्धरेत् कुर्याच्च पीठपूजायां नवशक्ति समर्चनं ताश्च
प्रभासमाया [illegible] सजया ह्स्ना विशुद्धाप्यात् नंदिनी सप्रभा [illegible] या विजया सर्वसिद्धि स्थितिश्चनमी पकवह्निपारक्लीव हीनैर
[illegible] प्रपूजयेत् एकेति अ इ उ ऋ ऌ ऌॄ इति समस्वरशादी तैर्भिः आ ई ऊ ऐ ए ओ औ अं अः इति नवभिः स्वरैः सहितां नवशक्तयः
पूज्याः स्यरयर्थः तारो वज्रनखदंष्ट्रायुधाय च महापदं सिंहाय वर्मास्त्रनतिः प्रांतः सिंहासनं रीति तं आसनमंत्रेना नेनदद्यान्मूले
नकल्पयेत् वर्मकं अस्त्रं फट् नतिर्नमः मूर्त्तिमावाह्य तस्यां तां पूजयेच्चंदनादिभिः प्रथमावृत्तिरंगैः स्यात् जयादिभिः परापरा पाता

उ
दुर्गायाः स्य
पादा
भिः

जू
द्वा

दुं=५ ह्रीं

विद्या २२
व
४४८
448

दिकैरायुधैः स्वाचतुर्थीन्तादिभिः परा तदायुधैस्तु दुर्गायाः पूजनं समुदीरितं सजयाविजयाकीर्त्तिः प्रीतिः प्रभयासमीरिता
स्मृद्वा [stain] मेधाश्रुतिः स्वनामाद्यतत्पूर्वाः समभ्यर्च्याः अरिदरगदासिपाशांकुशशरधनूंष्यायुधानि गदितानि
इत्थं दुर्गामंत्रं यो भजते स नरः ईप्सितं लभते अथ प्रयोगः तत्र प्रातः कृत्यादि योगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वाशि
रसि नारदाय ऋषये नमः [stain] मुखे गायत्रीछंदसे नमः [stain] हृदये [stain] श्रीदुर्गायै देवतायै नमः इति विन्यस्य कृतांजलिर्ममस
र्वाभीष्टसिद्धये विनियोगः इत्युक्त्वा ॐ ह्रीं दुं दुर्गायै ह्रां हृदयाय नमः ॐ दुं दुर्गायै ह्रीं शिरसे स्वाहा इत्यादि षडंगमंत्रा
नंगुष्ठादितलांतं हृदयादि षडंगेषु विन्यस्य ध्यानादि मानसपूजांते स्वर्णादिपट्टे चंदनादिभिः त्रिवह्निविभागेनाष्टदल
कमलं कृत्वा तद्बहिस्त्रिवृत्तं भूपुरयुक्तचतुरस्रत्रयं कुर्यात् इति पूजाचक्रं निर्माय प्राग्वत्तत्पुरतः संस्थाप्य पाद्यस्थापनादि प
रतत्वान्तं विधाय अष्टदलकेसरेषु स्वाग्रादि [stain] प्रादक्षिण्येन ॐ प्रभायै नमः ईं मायायै नमः ऊं जयायै नमः ऐं सूक्ष्मायै
नमः ऐं विशुद्धायै नमः ॐ नंदिन्यै नमः ॐ सुप्रभायै नमः ॐ विजयायै नमः मध्ये च ॐ सर्वसिद्धयै इति संपूज्य ॐ वज्रनखद
दंष्ट्रायुधाय महासिंहाय हुं फट् नमः इति पीठमध्ये समभ्यर्च्यावाहनादि पुष्पोपचारांते प्राग्वदंगानि संपूज्याष्टदले
षु स्वाग्रादि प्रादक्षिण्येन ॐ जं जयायै नमः विं विजयायै नमः ॐ कीं कीर्त्यै प्रीं प्रीत्यै · प्रं प्रभायै श्रं श्रद्धायै · मेंमेधायै
स्रं स्रुतये · इति संपूज्य बाह्याष्टदलेषु ॐ शंखाय ॐ चक्राय ॐ गदायै खड्गाय पाशाय अंकुशाय · शरेभ्यो धनुषे ·
इति प्रादक्षिण्येन संपूज्य प्राग्वद्धोमादि बलिकपालादीनि समापयेदिति तथा जितेंद्रियो हविष्याशी वशी मूलं तं जपे
न्मन्त्रं तत्सहस्रं तिलैः स्वाद्वक्तोलोलितैः कीर्णैः पयोंबुसा · जुहुयाद्देधितेवक्तो तत्पदशांशादितनस्त्वेवेत् वसुलक्षं अष्टलक्षं स्या
त्तुमिमथः · एवं सिद्धमंत्री प्रयोगानाचरेत्सुधीः यथोक्तेन विधानेन नवकुंभान्मनोरमान् पंचरत्नसमायुक्तान्नववस्त्राने

ए

दुर्ग्याधयुतैर्भक्तैः

नं=३

भते

भुविम्प्रसेत् मंत्रीदुर्गायै यजेन्मध्येत्वन्यत्र चजयादिकाः । चंडनाद्यैः समभ्यर्च्य धूपदीपैस्तु मंत्रवित् अभिषिंचेत्प्रियं साध्यं राजा
नेवाशिशुं बुधः विजयश्रीसमायुक्तो राजा भवति नान्यथा । भूतापस्मारवेतालपिशाचाद्यैर्वियुज्यते वंध्यावलनं नात्र वि
नीतं प्राप्नुयात्सुमं अ्रामयान्मच्युतमर्त्यो दीर्घायुष्यसंशयः अनेनैव विधानेन तज्जनानामसंरंजनं एवं दुर्गामनुमर्त्यो योभ
जेद्विधिनामुना सदीर्घायुश्रुडरितानुजयेन्मविजितामयः पद्मेनारगतां शक्तिं समाध्यां तद्दलेषु च मंत्रवर्णान्विलिखेदष्टौ वि
ष्टुप मंत्रेण वेष्टयेत् मातृकार्णैर्वहिर्वीतं चतुरस्रेण वेष्टयेत् हौमांयंत्रमिदं प्रोक्तं सर्वसिद्धिकरं परं अपस्मारमहाभूतत्व
ड्ज्वरनिवारणं नृणां विजयदं स्त्रीणां पुत्रदं नात्र संशयः अस्याध्यं अष्टदलपद्मं कृत्वा तन्मध्ये तारेत स्वोदरेण क्लिवीजं तदु
दरे साध्यनाम च विलिख्य तद्दलेषु मंत्रवर्णानेकैकशो विलिख्य वहिर्दृत्तत्रयं कृत्वा तन्वीथ्यां जातवेदसे सुनवाम इति त्रिष्टुप
मंत्रेण संवेष्ट्य तद्बहिश्चतुरस्रं कुर्यात् एतद्यंत्रमुक्तफलदं भवति एवीक्त नवकुंभस्थापनमभिमंत्रेवयं त्रेस्तेयं नारायणीये ।
विंधहिमज्जाकालेग्निरत्रिनिष्ठो निठद्वयं मंत्रो महिषमर्दिन्याः प्रोक्तो वसुलतात्मकः विषमस्त्रिष्टुप् मज्जा । ष । कालाय । अग्नि । र । अ
त्रिनिष्ठो दकारस्य तेन दं तिस्वरूप । ठद्वयं स्वाहा मार्कण्डेयो मुनिश्छंदो गायत्री देवतास्य नोः सुरासुरनता देवी प्रोक्ता महिषम
र्दिनी [illegible]तिलके । महिषमर्दिनी हुंफट् । हृदयं परिकीर्तितं महिषशत्रो साधि हुंफट् शिरोंगं समुदीरितं महिषं द्वेषय हें ठ
हुंफट् इंतं शिखामत्रं महिषं हन युग्मं तेदेवी हुंफट् नवेत्रयं महिषांतसूदनि हुंफट् तेनशस्त्रमीरितं मंत्रैरेतैर्जातियुक्तैः पंचा
गानि प्रकल्पयेत् गारुडोपलसंनिभां मणिमौलिकुंडलमंडितां नौमि भालविलोचनां महिषोत्तमांगनिषेडुषीं शंखचक्र
णखेटवाणकार्मुकमूलकान् तर्जनीमपि विभ्रतीं निजबाहुभिः शशिशेखरां दक्षपार्श्वेयेन राघयथस्पायौ [illegible] नदाय्यधः

विद्या· २२
व·
४४९

449

मद्योरितरे रत्नायुधध्यानं ईशानन्शिवेनन्त ध्यायेत् श्यामांगीं महादुर्गां सर्वाभरणभूषितां जटामुकुटशोभाढ्यां स्फुरच्चंद्रकलान्वितां
पीतांवरधरां देवीं पीनोन्नतकुचद्वयां शंखचक्रकलमट्टहस्तां तस्याः खड्गखेटकौ बाणचापौ च तदधः सम्मूलात तर्ज्जनामधः तर्ज्जनीं तर्ज्ज
नीमुद्रां सामुद्रात्· तर्ज्जन्येकाकिनीन्दुह्रीशेषाः सत्रिमिता त्वधः शुद्धेयं तर्ज्जनी प्रोक्ता वक्त्रं श्रेष्ठा स्मृताभीतिदेति सारसंग्रहे प्रोक्ता
ततः पूर्वादिकेते पीठयजेन्महिषमर्द्दिनीं प्रथमावृत्तिर्लोकेशाद्दुर्गाद्याभिपराधरा ध्यानोक्तैरायुधैर्या चेलैकपालैः परेश्वता तदायुधैः
पंचमी स्यादेवं पूजा समीरिता दुर्गादवरवर्णिन्याद्या चार्ध्यकनकप्रभा कृतिकाद्युभयायाच महाकन्या सत्रूपिका दीर्घस्वराद्याः
क्रमतः पूजयेन्मंत्रविन्नमः दीर्घाद्याक्षौ वान्यरहितदीर्घस्वराद्याः नरायणाय पूर्वपटले प्रनन्तप्रचियोन्यादौ स्तत्कोन्यपटले प्राद्यैः
स्वरैः क्रमादिस्तुतं प्राईरूपपे ॐ प्रोप्रमितिस्वरैरितिटीकाया चैषा दिभिः होतेविति अथ प्रयोगः तत्र प्रागवद्योग पीठन्यासांते
मूलेन प्राणायामत्रयं कृत्वा शिरसि मार्कंडेयाय ऋषये नमः मुखे गायत्री छंदसे नमः हृदये श्रीमहिषमर्द्दिन्यै देवतायै नमः इति विन्य
स्य विनियोगः सत्कीर्त्यम महिषमर्द्दिनी हूं फट् हृदयाय नमः महिषशत्रौ पाथिनि हूं फट् शिरसे स्वाहा महिषं हेषय २ हूं फट् शिखायै महि
षहन्न २ देवि हूं फट् कवचाय· महिषसूदनि हूं फट् अस्त्राय इति पंचांगमंत्रान् मूलमंत्राभिमन्त्रय योः पाणियोरंगुष्ठादि कनिष्ठांतांगुलि
षु विन्यसेत् नेत्ररहितेषु हृदयादिपंचांगेषु विन्यस्य ध्यानमानसपूजां ते एवं मंत्रोक्त पूजा चक्रं निर्माय श्रीस्थापनाद्येग पूजांते मदष्ट
दलेषु स्वाग्रादिप्रादक्षिण्येन श्रीं दुर्गायै नमः ईं वरवर्णिन्यै नमः यं शंखाय रं चक्राय· लं खड्गाय वं खेटकाय शं वाणाय षं चा
णासनाय सं शूलाय हं तर्ज्जन्यै नमः इति संपूज्य दिशी प्राचीदिशोघं प्राग्वत्समापयेदिति तथा प्रजपेद्दुस्सलक्षं चतत्सहस्रं तिलैर्हुते
त् एवं सिद्धमनुर्मंत्री प्रयोगानाचरेत्ततः तिलहोमाद्वशीकारो नृणां स्त्रीणां भवेद्ध्रुवं ग्रामयान्त्यतेमत्स्यैः सद्यः सर्षपहोमतः पयसो
माज्ञयाराज्ञः संग्रामे विजयो भवेत् हविर्होमेन मर्त्यानां भोगप्राप्तिर्भवेद्ध्रुवं ब्रह्मवृक्षोत्थकुसुमैर्लभते पुष्टिमुत्तमां धान्यहोमेन धान्या

भिः काकदालक्षतेनच विद्वेषोजायतेलोकेप्रत्यंतेसक्षदोऽपिशत्रुर्गेच्छतिपंचत्वंससंममरिचहोमतः एवंयोभजतेवेवीदुर्गामर्दिनां स
नाशयेनसङ्ख्यभूतवेतालादीन्दर्शनादपि सारसंग्रहे वेदादिदुर्गासंबुद्धिर्द्वितीयंवह्निरेतगः टयंचमः सनयनः कृशानुगरुहिणीततः
पंचाक्षरोमन्त्रःप्रोक्तोभजतांसर्वसिद्धिदः वेदादिः प्रणवः दुर्गासंबुद्धिद्वितयंदुर्गेदुर्गेइतिवह्निरेफः अत्यगः तकारः टयंच
मः णकारः सनयनः ईकारःतेनणीकृशानुगरुहिणी स्वाहाकारः शारदातिलके तु तारोदुर्गायुगंरक्षमंत्यंठांतसलोचन
मित्युद्धृतं तत्रसलोचनमित्युद्धृतं तत्रसलोचनमितिपदमंत्यस्यठांतस्यचविशेषणमितिद्वयोरपीकारयोगोक्तः तट्टीका
कृता पतितार्थ्योननिकाकारेणतेनतणी केचिद्वदंतितत्रारम्भ तारंदुर्गेद्वयंवह्निरेतत्यंठांतमष्टकंशिव इतिनारायणी
यवचनात् वह्निभार्यास्वरः षष्ठःठान्तः प्रोक्तोग्निरेवच दुर्गेद्वितिमोंकारं दुर्गेतत्रेसहितमिति कालिकापुराणाच्च अत्रषष्ठ
स्वरःऋकारः समस्वरांगीकारात् कस्वदीर्घयोरेकत्वाभ्युपगमेनऋकारस्यषष्ठत्वात्तस्यविधिस्यपरंठतेनेवास्याचयेज्ञातकेव
लप्रातप्रतीतेरुक्तशारदातिलकस्यापिलाघवादेकस्यैवसलोचनेइति पदंविशेषणमित्यर्थः अत्रक्रमेणमंत्रोद्धारो
वोद्धव्यः तथा नारदोमुनिराख्यातोविराट्छंदउदाहृतं जयदुर्गादेवतास्याद्भुक्तिमुक्तिफलप्रदा नाराय्यैपंचभिमंत्रपदैःसर्वे
णांसमता जातियुक्तैरंगक्लृप्तिरितिनारायणीयशारदातिलकयोस्तु दुर्गेचहृदयंप्रोक्तं दुर्गेशिरइतीरितं दुर्गायैस्वाहाछिया
वशिभूतरक्षाणिकीर्तिते नारादिदुर्गेद्वितयं रक्षणिशिखाकीर्तितं दुर्गाशिर- कवचमैः इत्यतीनयनत्रययुक्तांसिंहगतांप्रणमेज्ज
यदुर्गांशक्तित्रिशूलंवामोर्द्धेदिवामाधःकरांतमास्यध्यानं इत्याधादितद्ध्यानंवा तथा दौर्गेपीठेयजेद्देवीमुक्तमार्गेणमंत्रवि
त् उक्तमार्गेणप्रथमाष्टांतरोक्तमार्गेण तथा प्रतपत्यंचलक्षंचतद्दर्शांशेनहोतैः तर्पणादिततः कुर्यात्ततः सिद्धोभवेन्मनुः त
तः सिद्धमन्त्रमंत्रीप्रयोगानाचरेत्सुधी इमंमनुंजपन्मूर्ध्नप्रविशेच्छत्रुसंगरे शत्रोश्चाणिभिहन्यात्रात्रकार्याविचारणा विवादेष्व

२२

विद्या० व० ४५०

450

वदाग्रे जप्ते विजयदो भवेत् अनया ह्याणि विद्यानि शस्त्राणि बहून्यपि स्तंभनानि च संग्रामे समुपस्थिते यदातिव सारसंग्रहे०
नारोद्धृत्यं ततो दुर्गाहृदयं रत्नानि चाहि ठः द्वादशार्णो मनुः प्रोक्तो मुन्याद्यं पूर्ववद्भवेत् व्यस्तेन मंत्रेणांगानि षट्क्रमात् ध्याने
पूजादिकं सर्वमस्य पूर्ववदाचरेत् ह्रिं ठः स्वाहा एवं वै दुर्गा शास्त्रवत् तथा प्रणवो हूं ह्रूं वतीज्वालामालिनि गच्छगगः शालो
हितो विहृत्तेच हि ठांतः परिकीर्तितः द्वाविंशत्यर्णको मंत्रः सर्वकामफलप्रदः ह्रूं त्रम लोहित० पः ह्रिं ठं स्वाहा अन्यानि
पदानि स्वरूपाणि त्रिचतुः पंचषड्वद्विमिलितैर्मंत्राणकैः क्रमात् पंचभागानि मंत्रास्य जातियुक्तानि कल्पयेत् अन्यच्छूलि
नि दुर्गा वत्सर्वमस्य प्रकीर्तितं शूलिनी दुर्गाविधिर्वक्ष्ये सारसंग्रहे अथ शूलिनी दुर्गायाः मंत्रं वक्ष्ये यथाविधि चतुर्तीयं स्वधायुक्तं धरा
सेनहृद्यं पुनः मरुत्पंचम वामकर्णेन्दु भूमिरन्तियुक् दीर्घो तृतीयस्वरयुक् तत्तृतीयश्च कर्णयुक् षष्ठयोमच वर्मास्त्र वह्निजायाव
सानकः अयं शूलिनि दुर्गायाः तिथिवर्णो मनुर्मतः चतुर्तीयं जस् धावत युक्तं तेन ज्व धरा० ल एतद्द्वयं ज्वलज्वल इति द्वयं म
रुत्पंचमण वामकर्णेन्दु० ऊतेन शू० भूमि ल अन्तिः ई तेन लि दीर्घोन० तृतीयस्वर० इ तेन नि तत्तृतीयः दकार्णः उ तेन दु ष्टग्र स्व
रूपं व्योम ह० वर्मं हुं अस्त्रं फट् वह्नियोषा स्वाहा तथा मुनिर्दीर्घतमाश्छंदः ककुबुक्तं च देवता शूलिन्याख्या महादुर्गा तद्ग्रह
ष्टविनाशिनी दुर्गास्याहृदयं शीर्षं वरदे विंध्यवासिनी शिखा वर्माऽसुरांते च महेंद्रमते ततो वदेत् युद्धप्रिये च दं पश्चात् त्रासय हयसा
मीरिता पंचांगमंत्राउद्दिष्टा एवं न्यस्ते च मंत्रिणः रक्ताक्षकुद्धदोर्दंडदोष्ट्रदोषघ्नमंगकर्मभवेद्ध्रुवं एवं न्यस्तशरीरो सौ ध्यायेद्दुर्गांसु
रैज्ञेता पंचांगमंत्रानाह० दुर्गास्याहृदयमित्यादि तेन शूलिनी दुर्गाश्रयः देवदत्रेववसिद्ध्यत्यादि तडुक्तं नारायणीये एवमादौ शू
लिनीति पंरतारादिकं वदेत् अवसानेन सर्वेषां देवसिद्धस्य पूजिते० नंदिनी रक्तपुष्पं च महायोगेश्वरीमपि वर्मास्त्रबीजे चाशूलिग्रह
रत्नाकराणि दिं पंचाणदाहृत्य न्यासान् ज्वरसंतीन्नविनश्यति तारादितं ज्वरप्रयोगे तथा नीलांभोधरकांति सिंहस्कंधास्थिता हाधिरूढा

दु

करै मूलं बाणमसिं सुरिं दरगदा चापमपाशान् सुभैः विभ्राणमसिखेटयुक्चनसहभिः कन्याभिराराहूतां नानाभूषणभूषितां
त्रिनयनां दुर्गां भजे मूलिनीं इति ध्यात्वा करमारभ्य वामाधः करपर्यंतं आयुधध्यानं दुर्गापीठपरशक्तिं ध्यात्वा देवीमपूजये
त् वक्ष्यमाणेन विधिना षडंगानि समपूजयेत् दुर्गास्याभिहितीयास्यापात्रपदेभ्यो परामताः चक्रदराभिगदापाशशरासनत्रिशि
खपाशकानि विदुः अथ प्रयोगः तत्र प्राग्वत्पीठन्यासांते मूलमंत्रेण प्राणायामत्रयं कृत्वा शिरसि दीर्घतमसे ऋषये न
मः मुखे ककुप्छंदसे नमः हृदि शूलिनीदुर्गायै नमः शूलिनि चर दुष्टदेव सिद्धखनपूजितेत्यादि शिरसे मूलिनी विंध्यवासिनी देवसिद्धेत्यादि
शिखायै वषट् मूलिन्यसुरमर्दिनी वसिद्धेत्यादि कवचाय हुं मूलिनी युद्धप्रिये त्रासय त्रदेव सिद्धे अस्त्र इति पंचांगमंत्रान् मूलम
त्राभिमृष्टयोः पाण्योरंगुष्ठादिकनिष्ठांतास्वंगुलीषु विन्यस्य हृदयादिषु नेत्ररहितेषु पंचांगेषु च विन्यस्य ध्यानादि पंचांग
पूजांते रष्टदलेषु स्थाग्रादि प्रादक्षिण्येन ॐ दुं दुर्गायै नमः पूर्ववरदायै नमः विंध्यवासिन्यै नमः असुरमर्दिन्यै नमः युद्ध
प्रियायै नमः देवसिद्धपूजितायै नमः नंदिन्यै महायोगेश्वर्यै इति संपूज्य द्वितीयाष्टदले शंखाद्यग्रादि प्रादक्षिण्येन ॐ चक्रा
य शंखाय खड्गाय गदायै बाणाय चापाय शूलाय पाशाय इति संपूज्य दिग्गी प्राच्यादिदिक्षु वज्राद्यस्त्रमायायेदिति तथा
वर्णलक्षजपेन्मंत्रं जप्त्वा तद्दशांशतः आज्येन आज्यद्रव्यविधानपूर्णाहुति स्रुवेतु आराध्य विप्रान्विधिवद्भक्त्याभ्यर्चयेत्ततः
पंचसिद्धमंत्रमंत्री प्रयोगान्निजवीन्वितान् विदधीत विधानेन पूर्वोक्तान्सर्वे मूलाद्याश्च पृथक् संयुक्ताश्च क्रमाद्यग्राः स्युः मूलि
नी तथा विचिंत्य प्रजपेन्मंत्रं यस्तत्पुष्पविधानतः तत्राविषयतत्पूर्वं वदेत्यश्राहिनपपति मंत्रावृत्त्यानदानीच भूतसं
घः पलायते स्वल्परोगिणोमध्ये मूलिनी स्वायुधैर्युतं जपतो विद्रवं त्यामपुग्रहाश्च वणाविग्रहा सर्पाश्च वृश्चिकाश्चस्य वज्र
पात्कक्करोद्रवं लूतिकादिककीटोत्थं विषं नाशयति क्षणात् निशितेमायकेहैं विमावाहेवच मूलिनी हीमंकरी पूजयित्वा

शु

वि॰या॰ २२
व॰
४५१

451

मन्त्रमेनं जपेत्सुधीः पत्राण्युत्थानि रक्तानि सेनानि सिद्ध्येत्कामभवेत् तिलयुक्तैः पञ्चविंशैर्वै विंशत्यामसुसंयुतैः । लतां प्रजप्य जुहुयाच्छत्रुनामया
विहितविग्रहः यमातिष्ठित्वमायातिनात्रकार्याविचारणा त्रिसप्ताहं कृतैस्तिलैरष्टसहस्रं प्रत्यहं हुनेत् पाकिरस्या प्रतिहता वत्सरा
त्यागभवेद्दले अष्टसहस्रसंख्यातेनस्तसहस्रमितयर्थं हुतेनाष्टपातं मंत्रीजप्यजुहुयाद्घृताप्लुतं लभेत् वत्सरात्प्राग्गृहं वेधाचमधुरत्रयसु
क्तयाः समग्राष्टोत्तरं जप्त्वाजुहुयाद्दीप्तितान्लभेत् छुरिकाखड्गनाराचसंजप्तामन्त्रनामुना संपातघृतचूतसिक्ताश्च संग्रामे हतुश
त्रयः अष्टोत्तरशतं मंत्री गुलिकां गोमयस्य च जप्त्वायात्सम दिच सैरिष्टोद्दृष्टोस्त आदरात् अस्पृष्टभूम्यन्तरिते गृहीत्वा गोमयं ।
शुभे त्रिसहस्रमितं जप्त्वं यस्या सौहृदा रिसंभवेत् तस्मसंस्तंभवेन्मद्भवेन्नैवा प्रसंशयः सेनामुखे निखातं च सेनास्तम्भंकरो
ऽलं ग्रामं वा नगरं गच्छन्संस्मरेद्दविकां सुधीः पानीयात्रकरीवैवप्रक्षेत्रां प्रजपेन्मनुं तत्पिबेत्वा प्रविष्टस्तं प्राप्नुयामिष्टभोजनं
सहस्राशु भूत्यवेर्गणसाधकोनात्रसंशयः अर्कोष्टलसमिद्भिस्तुत्रिमधक्तमभिरक्तवत् जुहुयाद्द्विसाहस्रया ~ रुहिप्यसाधकः
भवंत्येवहितेव पपात तथाप्यत्यसमिद्धैः प्रसन्नचेतास्तु तिलैः पूर्वकर्मणिवाहुवेत् दुर्गाकल्पेऽदितान्सर्वा प्रयोगान्साधयेत्सुधीः
यंत्रव्यतिरिक्तानिति तथा सारसंग्रहे अथातो वनदुर्गायाः प्रोच्यते मन्त्र उत्तमः धृतिस्तुकामिकाद्वंद्वंत्रिष्टियुक् षष्टांतकेः रमे
शुस्वरसंयुक्ता परा विसर्गयुता तियुक् प्रज्ञा जयान्तष्टि विंदुयुक्ताहंसस्तु वानयुक् लोहितो नेत्रसहितो मंत्रः षष्टाक्षरं वदेत् लिं
गास्य दर्णीच सप्तधाविषः पंक्तिस्तरीयसुयुक् प्रभाकालः श्रोत्रयुक्तः शूरः स्याद्द्वंद्वयुग्मपाशिः मरुत्सत्याहितणीसंध्यावामसंध्यास्यावि
दुमत् सूलाकातियुता मूर्धिहीर्दाकालेश्वरान्विताः विश्वमूर्तिप्रभावालः कार्तिकेयकहषव्यः वैकुंठाव स्तथासाकाक्षकांतीम
त्रुरयं मतः प्रवरो वनदुर्गायास्सप्तत्रिंशद्वर्णकः धृतिस्फकारः कामिकाहंद्वं तंकारश्चद्वंद्वं तन्त्रस्पियुक् रकारयुक्तं तेन त्रिवृष ष
ष्ठांतं ठकारः तेन ष इति माय रश्चस्वरयुक्ता तेन शूपरारेफः विसर्गयुता उकारयुक्ता तेन त्र अतियुक् प्रज्ञा रकारयुक्तः ष

कारः तेन षितया॰ काः तद्विः रिकारः विंदुरन्तुः स्वाः तेन किं हंसः स वाले व ते[illegible]स्व लोहित यनेत्रं॰ इ तेन॰ पि॰ मंत्र षष्ठात्तरं
षि क्लित्वाः भसेदंडीवस्त्रथा विंदुयुक्तो॰ यकारस्पिषं॰ म॰ पङ्क्ति विरोत्य॰ एतेनमे॰ प्रभास कालो मंस्रोत्र उ तेनः सुसूरायः स्वि
स्वेरूपं स्रहेंदुयुक् हरिः तेन ते मरुतः यः सुलक्ष्मिता दि संध्या प्राकाम स्वरूपं संध्या एका विंदुमत् तेन कां सूक्ष्मा कां
तियुक्ततेन पापरहिं स्तेः॰ दीर्घकाले॰ स्वरन्विता सकारएकायुक्तो नकारः तेन नो विश्वमूर्तिः नो प्रभाग॰ वालो॰ व कामि
मिकेयुक् लकामिकेयुक् लकार रकारयुक्तं तेनति हृषभः पाः वेकुंठो॰ म वसुधां यस्रूपं स्वकांती॰ हकाराकारी तेनह स्र
त्रवात मेवत्पत्राणिकीलकानि ईशानसंहिताया शुणवीजस्तमुह्रत्य उत्तिष्ठेति पदं तपः इत्यादि॰ एवमेषामहाविद्यानिः कीला
सर्वसिद्धिदा॰ शुणंतेशुवनेश्यानीडुर्गा वीजं नियोजयेत् वर्मणोते लकं वीजं सुक्तिा चांते विलोमतः एवं लकवीजततपयोजयेत्क्रोध
दारुणाः वीजत्रयं प्रणवमायाडुर्गा वीजानि विलोमतः डुर्गामायाप्रणवक्रमेण एता तावत्ताः आद्येवीजपंचकं॰ अनंतरं मंत्रः ते
दन्तु विलोमाति वीजमिति मंत्रसिद्धिः तथा आरण्यको मुनिः प्रोक्तम्यनुष्टुप् छंदः ईरितं वनडुर्गावतास्य सर्वशत्रुविद्याविनी अस्त
स्याष्टाष्टत्तवाणामिति मंत्राणां के पृथक् जातियुक्ताः षडंगानि मनोरस्यप्रकल्पयेत्॰ यादष्टसंख्यष्टके गुह्ये लिंगाधारोदरे सुव
पार्श्वयुग्मे हृदि कुच द्वंद्वे कंठोष्ठमधिसु करयो वेदनो नासा गण्डयुक्के णियुग्मके भ्रूमध्ये मूर्ध्नि मत्रो वर्णान्न्यसेद्यथाविधि
विद्युदामप्रभाभां कनकसरस्सिद्धेसंस्थितां मत्रिनेत्रां हस्ताभोजैर्वहन्तीमनिदरवरदाभीति संज्ञां क्रमेण स्वर्गांगायत्का तिचहस्ताश्रसि
कलितलसद्दलचूडां प्रसन्नां पार्श्वेणीयुतां मृगेंद्री हृदि वनवसतिं साधु दुर्गां स्मरेहं दत्ताद्वहं योराघे तराद्येय स्यथा योरस्ये इत्यापुथा
ध्यान इति ध्यात्वा महादेवी पूजयेद्भक्तितत्परः एवं दिते स्त्रुभेदोर्गे पठित्वा डुर्गा प्रपूजयेत् एवं मंगानि वृज्यानि तत्र आचार्या दिकायजेत्
चक्राद्यस्त्राणि मातृस्त्र लोके पातावुधानि वा आर्याडुर्गाभद्रा समभद्रकाल्यविकालेस्था वेदायागभास्यान्तेमंकर्षष्टमीमोका चक्रे

विद्या ३२
व॰
४५२
452

शंखासिखेटेषुधनूरुड् नृकारोटिका नदायुधा नीरितानि दुर्गा पूजयमीरिता कृत्क त्रिशूलं नृकरोटिः नृकपालं अथ प्रयोगः न त्वप्राग्वद्योगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि नारदाय ऋषये नमः मुखे अनुष्टुप् छंदसे नमः हृदि श्रीवनदुर्गायै देवतायै नमः इति विन्यस्य प्राग्वद्विनियोगमुत्कीर्त्य उत्तिष्ठ पुरुषि हृदयाय नमः किं स्वपिषि शिरसे स्वाहा भयं मे समुपस्थितं शि यदि शक्यमशक्यं वा कवचाय तन्मे भगवति ने- शमय स्वाहा अस्त्राय फट् इति षडंगमंत्रानंगुष्ठादि तलांत करयोर्हृदयादि षडंगेषु विन्यस्य दक्षपादांगुलिमूले ॐ नमः गुल्फे त्तिं नमः जानुनि ष्ठ ऊरुमूलेषु वामपादांगुलिमूले रु गुल्फे षिं नम जानुनि किं ऊरुमूले स्वं गुदे पिं नमः लिंगे षि मूलाधारे मं नमः उदरे यं दक्षपार्श्वे मे वामे स हृदि युं दक्षस्तने पं वामे स्थि कंठे तं दक्षकरांगुलिमूले यं मणिबंधे दिं कूर्परे शं वाहुमूले कं मुखे वं नं दक्षनासापुटे मे वामे मां दक्षगंडे ग वामे भ दक्षनेत्रे ति वामे पां दक्षकर्णे मं वामे यं भ्रूमध्ये स्वा शिरसि हां नमः इति विन्यस्य प्राग्वद्ध्यानमानसं स्वहृज्जांते अष्टदलत्रयात्मकं प्राग्वत्सूजाचक्रं निर्माय प्राग्वत्सूजाचक्रं निर्माय प्राग्वद्दुर्गां संपूज्यांते प्रथमे अष्टदले ॐ आर्यायै नमः एवं दुर्गायै नमः भद्रायै अंबिकायै क्षेमायै वेदगर्भायै क्षेमंकर्यै द्वितीयाष्टदले चक्राय शंखाय असये खेटकाय बाणाय चापाय शूलाय कपालाय तृतीयेष्टदले प्राग्वद्ब्राह्म्याद्याः संपूज्यादिंगीशान्दिक्षु सर्वं पूर्ववत्समापयेदिति नारायणीये वेदलक्षजपेन्मंत्रं तत्दशांशहोमेन तिलैः आज्याक्तैस्तिलतंडुलैर्वा दुर्गा संचिंत्य चानले तर्पणं मार्जनं कृत्वा ब्राह्मणाराधनं तथा धनधान्यादिभिः सम्यक् तोषयित्वा निजं गुरुं एवं सिद्धमनुं मंत्री वांछितार्थान्प्रसाधयेत् दुर्गाप्रयोगभेदेन विंध्यनिवासिनी प्रियेच दुर्गा महिषोत्तमांगीस्थिता च हेमाभतनुं वहंती सचक्रशंखासिसखेटबाणचापान्भुजैर्जित्निकां वहंती चक्रशंखकृपाणखेटकबाणधनुस्त्रिशूलवन् एकपाल सदृश सुशलकुंभकदेवकान् सत्कैरवलयसांमदांवरभि अिंडपालकणक्किकान् बिभ्रतीज्जलदद्युति महिषोत्तमांगनिषेदुषी पावकोल्लसि

नद्युतिंभीमसिंहंस्मिमागतां ध्यामलांकमलस्थितांनयनत्रयोल्लसितांशुभां व्याघ्रचर्मसदंष्ट्रकामहिवद्धकुंडलशोभितां चंद्र
शोभितप्रोषयंस्मरदाभवाभयनीतिदां प्रजपेत्मन्त्रमहंमंत्रीस्वरतायेशतंस्वच सहस्रंवाततःतेचप्रयोगात्कर्मसिद्धिः यथयडहि
एवमनुसहस्रंवायुतंजपेत् अविरालभतेतत्तदसाध्यमपिसाधकः प्रातःस्नायीन्यासपूर्वंस्मरन्देवीमनन्यधीः नित्यंसहस्रंप्रज
पेन्मंत्रंसाधकसत्तमः ब्रह्मचर्यग्रहोपंचदोषान्प्रणमयेत्सुधीः कृत्वेदारण्यकतिलैराजिकाभिश्चवाहनेन् अपामार्गसमिद्भि
र्वीनाशयेत्सकलामयान् अयस्कारादिकान्मंत्रीनाशकार्याविचारणा न्यग्रोधोत्थसमिद्भिश्चसमधुगाभिर्हुनेत्सुधीः अयुतं
सर्वसंपत्त्यैसर्वापन्मुक्तयेपिच ग्रहादिपीडांत्यैचतथाह्यभिचारादिपीडांतये अर्कवृत्तसमुत्थैस्तैर्जुहुयाच्चसमिद्वरैः अरण्यरविवा
चतद्वयप्रत्यहंसुधीः दशाहतोवांछितार्थसिद्धिर्भवतिनान्यथा अहंवासमरात्रंवाचेधैः शरसमुद्भवैः एकैकशाकलंमंत्रीहुतेवां
छितसिद्धये त्रिंशच्छरनसिताग्रोष्मनिधायजुहुयाद्बुधः कटुतैलैःसहस्रंवाप्यथुतंतदनंतरं संपातितैलेनशरा— न्समाप्य
यथाविधिः एवंवत्सजयेन्मंत्रंतच्छरान्यथभूपतिः मुद्राचारस्थुथीरस्थयन्वीसंयतमानसः गृहीतापरसेनायांमध्येगच्छेदभिः
क्षिपेत् सायावतिदिशःसर्वाःसंभ्रांताविकलातदा सद्यःगत्यपुनर्भूयोगुरुंध्यान्धैधनैरपि वस्त्रालंकारगोभिश्चवतोषयेज्जयदायिनं अष्टा
धिकशतेनाथसंजप्तंशवभस्मच निक्षिपेद्यस्यशिरसिसविद्विष्टोभवेज्जनैः देशाद्वपणंत्रंचैवकाकवद्भ्रमतेसदा कारस्करद्रुमो
त्थैस्सुपत्रैर्वीयुनिपातितैः सहस्रंजुहुयान्पादरजोभिसहवैरिणः उच्चाटोथभवेत्तस्यविषवृत्तसमुद्भवैः पुष्पैर्हुनेत्सचसेनासत्त
भयेद्बुधः तावद्भिस्तस्यपत्रैश्चमंत्रीसेतांनिवर्त्तयेत् विषवृत्तसमुद्भूताणकेः प्रतिकृतिंशुभां कृत्वाप्रतिष्ठितप्राणांखंडखंडकु
तैर्निशि कृष्णपक्षचतुर्दश्यांकाकोलूकवसायुतैः तद्धात्रैर्विपिनेहोमःकर्तव्योष्टसहस्रकं चतुर्दशीत्रयोदेवंनाशमेतिरिपुर्ध्रुवं
हकवायसयपक्षस्वसारक्तसंयुतैः होमाद्विपुत्तोपशमेतिह्यनतत्समिधस्तथा होमात्मतोरिपु— र्नेभवत्येवसहस्रतः वैरिणः प्रति।

विया॰
व
४५२
453
एदु॰

मंकृत्वा सम्यक्तस्या पितानिलं विषत्रिकटुकालिमाषसमयुग्मे जले दिये न प्रजपेच्छमनुं सयोज्वराक्रांतो भवेद्रिपुः इंगयाभिषे
कतः शांतिर्भवत्यस्य न संशयः प्रतिमा विषहृदोत्थानि निक्षिपेदुग्धवारिणा उन्मादस्मारियोगःज्यपूर्ववच्छांतिरीरितः सूर्यवि
वीतस्यक्रामूले मंत्रं निकाकुरां ध्यात्वायं तं प्रजप्याथ मारयेद्रिपुसंचयं असिखेटकरां कृष्णां कुर्द्धां सा वनवासिनी संस्मृता
मंत्रजापेन रूपामयेच्छत्रुसंचयं शरधन्वकरां सिंहस्थितां पावकसन्निभां कारस्करतलं समिध्यामयुतं ज्रुहुयात्सुधीः रोगिणः
करिणः सर्वजायंते ह्यचिरात्सदा विषहृतोत्थितैः पत्रैर्यो पानाप्रशांति च नहृतस्य मनोभिः स्नावुद्यात्ः कारिणां ध्रुवं राज्ञ
वृत्तिसमद्धिर्वा रोगान एवपतिदः तिनां विषहृत्प्रसूतेश्च त्रिमाधुक्तैस्तु मानवः वशीभवेत्तथा शीघ्रं पत्रैरानित्यशोभितैः त्रि
स्वादुयुक्तैः करिणो ह्यनिन्नाभवंति च अभ्यंगं पंचगव्येन लोकरत्नाकरः परः करिणां मनुजमोस्य प्रोक्तो मंत्रविद्रुत्तमैः सर्पि
स्तिलानित्यकृणराजिका पंचगव्यकैः हविस्तैलकेप्त्रेव प्रत्येकं च सहस्रतः जुहुयादिभसंघानां वृद्धिर्भवति नान्यथा म
ह्यांते विषवृतचाहित्वा निर्मिया पंचधा धिक्क्रमेणैव पंचाग्न्यायुधानि प्रकल्पयेत् सम्यक् शिल्पविदा शंखोनंदकसूत्र
शार्ङ्गकौ कौमोदकीति क्रमेण प्रोक्तमायुधपंचकं निक्षिप्य पंचगव्येन जपेन्मंत्रसहस्रकं तावच्चाज्येन जुहुयात्संपातेत
त्रपातयेत् भूयश्च पूर्वसंख्याकं जपं कुर्यात्ततश्च ततः विद्ध्याद्वदतान्यच्च पंचगव्यमपूरितान् मध्यायुधेश्च युधानि निक्षिपे
न्नत्रवर्द्धते धनधान्यसमृद्धिस्यात् रिपुचोरभवं नवा पशौ रूपवशीकुर्यान्नात्यत्रौ नात्यलेरपि ब्राह्मणान्कमुदे कृत्वा कृष्णौ रेवि
णमेवच भूद्रान्लवणहोमेन ग्रामजातिप्रसूतकैः चक्रशंखगदांभोजहस्तं संचिंतयेच्छुभं रविबिंबे मुकुंदं च मनुद्वयमस्त्रलि
गकं प्रजपेच्चाप्ययुक्तं श्रीभगवत्पदयोरथ सर्वसिद्धिकरः प्रोक्तः प्रकारो यस्तु मंत्रिभिः साध्यनामान्तरैः सम्यक् विदर्भितमंत्र
लिखेत् यत्रे तत्कुलालस्य करलग्नं मृगरसमृत् तयाकृतायां प्रतिमायां तस्यां च हृदि संन्यसेत् संस्थाप्य तामभिसुखितां समाहंस

जपेमन्त्रं संध्यात्रयेशरंचाष्टाधिकं वशगोभवेन्नृपः ॥ व्रीहीन्हुनेदष्टशतं प्रत्यहं हानस्त्राद्भवेत् व्राह्मिमानोपयोभिस्तृपयुमान्भवति ध्रुवं
घृतहोमान्मंत्रिणः स्यात्कांचनाभिमहीयसी दभाचस्तविलिह्निस्यादन्नैरन्नसमृद्धियुक् मधुहोमेनरत्नानांनिधिर्भवतिनान्यथा दू
र्वाहोमेनदीर्घायुर्मंत्रीभवतिनिश्चितं स्वेनगुंजासमानीयकुडवः प्रतिमासुभाः एतन्मंत्रस्रजमाविकरेष्ठहृत्तसैन्यकैस्वयं मंत्रीस
ग्रमः सन्नतेनासौवैरिणस्रमूः ज्वरादिकैर्महारोगैः पीडितानामानृणांचिरात् सेनाधिपतिस्तुत्वानांयरस्परविरोधतः एतत्सुपत्र
वैर्नानाविधैर्नाशं घर्यांतिच नारेषाक्रिसमाध्यांतिखित्वाभविदलेमध्यत पत्रमूलेमहीत्यारणीपुग्मदनमनुविलिखेद्दू क्रिणोमू
लवर्णेन अन्यप्रत्येववीतेवहिरष्टलिपिभिर्भूपुरेह्रदंसंस्थंदुर्गायायंत्रमेतद्युवतितनयदंसर्वरक्षाकरंस्यात् सर्ववश्यकरंन्नृणांस
वसौभाग्यपुष्टिदं राज्यलक्ष्मीविहीनानांभूयतोनांचराज्यदं आमयग्रस्तवृणांचरोगशांतिकरंपरं जपहोमाज्यसंपातसाधितं
यंत्रमुत्तमं प्रोक्तंचनवदुर्गायाः सर्वदुःनात्रसंशयः ॥ अस्याथ ॥ द्वादशदलपद्मंविरच्यतन्मध्येतारंतस्योदरेशक्तिंतदंतः साध्यनाम
वविलिख्यतत्केसरेषुसहिषमद्दिस्यष्ठात्तरमंत्रस्यत्रिशाहृत्तामतिकेसरंवर्णद्वयंवर्णद्वयमालिख्यमूलमंत्रस्यवर्णान्प्रतिदलंत्रिं
शच्छालिख्यंतिमात्तरं ॥ अंतिमदलेविलिख्यमायाद्वहिर्हृत्तद्वयंविरच्यतयोरंजरालवीथ्यांप्रत्यक्षरसविंदुकांविलिख्यतद्दहिस्तुतरस्य
हयंसंपुटरूपेणाष्टकोणेनवकोणेतवेष्टयेत् एतद्यंत्रमुक्तफलदंभवेत् नारायणीये अत्रिरत्रसमाख्यानतद्बीजंणिवसर्गवान्
अत्रिः द ॥ णिव ३ ॥ सर्गो विसर्गः तेन ॥ दुः तद्बीजं तस्यादुर्गायाः वीजं कश्यपऋषिर्गायत्रीछंदः श्रीदुर्गादेवताषट्दीर्घयुक्त
वीजेनषडंगानिवीजेनसविसर्गेणसर्वत्रअष्टकमलदलेहृदीश्वरामांत्रिनेत्रांम्मूलवाणचक्रशंखखेटधनुःकपालानिदक्षिणाधः
करक्रमेणधारयतींध्यायेत् लक्षंजपेद्दशांशंहोमः पूजादिकंवनदुर्गावज्ज्ञेयं अयंलक्षजयंहृतयुगपरः यत्कर्मधर्मनिलयंप्रव
दंतितत्त्वायत्तदिष्टमखिलंसकलंतथैव त्वंचेन्नार्यंइतिशर्मविचार्यचित्तेनित्यंत्वदीयचरणौशरणंमपद्ये १ पाथोधिनायत

त

जेभवत्या ४ यो धूम्रलोचन इति प्रार्थितः पृथिव्यां भस्मीबभूव स
रणे नवहुङ्कृतेन॥ सर्वासुरक्षयकरे गिरि=४

विया २२
व०
४५४
454

नयापतिरेषशेषशय्यैकलालितवपुः पुरुषः पुराणः त्वन्मोहपाशविवशो जगदं विकापिव्याघूर्णमाननयनं शयनं चकार २ त
त्कौतुकं जननियम्यजना दिन स्वकर्णप्रसूतमलजैर्मधुकैटभाख्यौ तस्यापि येन भवतः स्तनयोनिहन्तुं तन्माययाकवलि
तौ विलयं गतौ तौ ३ यन्माहिषं वपुरपूर्वबलोपपन्नं यच्चाकनायक पराक्रमजित्वरं च यल्लोक कण्टकजनन व्रनवद्धहार्दं
तल्लीलयैव दलितं गिरि ५ राजकन्ये मन्येस्मसमनुदहते कृत रोषहोमः ५ केषामपि त्रिदशनायकपूर्वकाणां दृ
ष्टं न ज्ञातमसुर भावं पि चण्डमुण्डौ तौ दुर्मदौ समपरिवारबलसमृद्धौ मानुष्यवापि कलि पात्य निती विपाणौ ६ दोष्णेन तेषाव
इति प्रार्थित प्रभावो देवो पिपतेः सदनं जगाम भूयोपि तस्य चरितान्प्रार्थयां चकार स्मात्वं प्रसीद शिवदूति वि जृम्भितेन ७ पित्र
नदे नदमवैरपिये नजेयः भिद्यातपत्ति ताडुधिरादपुणं भूमौ बभूवुरमिताः प्रति रक्तवीजास्ते पि त्वयैव गगने गालिताः समस्ताः
८ आश्चर्यमेतदतुलं यदभूमरारि त्रैलोक्यवैभवविलुठनहृष्टपाणि पारे निहत्य भुवि शुम्भनिशुम्भसंज्ञौ नीतौ त्वया जगति तावपि
नाकलोकं ९ त्वत्तेजसि प्रलयकालकृतानने स्मिन्सि प्रयान्तिभुवनानि ---- सद्यः तस्मिन्निपत्य शलभाइव राववह्नौ भस्मी
भवन्ति भवाति किमत्र १० तत्किं यमभ वती भवती नापसंवर्द्धनप्रणयिनी प्रणमज्जने ९ तत्किं गणभवतीभवतो वृता
यनिर्दायाम प्रणयिनी विनाशयितेषु ११ वप्मेकरेतदितरे च तत्थोपरिष्टाष्मात्रं स धारसयुतं वरमातुलिंगं खेटं गदां च दधती
भवतीभवानिध्यायं तियेरुणा निभां कृतिनस्तपव १२ यद्वारुणाज्यरमिदं परिमान वस्ते वीजं स्मरेद्वरदिनं दहनाधिरूढं मायांकि
तति लाकितं तरुणेन्दुविन्दुनादैरमन्दमिहराज्य मसौ भुनक्ति १३ आवाहनं जपनवर्णनमग्निहोत्रकर्माणि तवविसर्जनमन्त्रदे
वि मोहात्वमया कृतमिदं सकलापराधं मातः क्षमस्व वदेव हिरंतरस्य १४ अंतास्थिता खिलजंतषु मूलरूपविद्यात्मसेव दिसिवा
खिलविश्वरूपा काभूरिशाहरचनावचना कासारीनजनं जनन विमानवनिष्प्रपंचं १५ पतत्यदेवदनुदिनं दनुजांतकारि चण्डीचरि

दानव=
शस्त्रा=
हि
संवर्द्धन
न
न
निर्वापिता=६

रागा=६ धि=१ विलयं=७ जंतु=२

त्रमतलं भुवियस्त्रिकालं श्रीमान्सुखी सविजयी सुभगः कृती स्यान्मानी चिरं तनवपुः कविचक्रवर्ती ॥ ९ ॥ अथ नवार्णविधानोक्तम
हालक्ष्मीपूजा लिख्यते तत्र प्रातः कृत्वादिमातृकान्यासं तं विधाय मूलमंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मविष्णुरुद्रेभ्यो नमः
मुखे गायत्र्युष्णिगनुष्टुप्छन्दोभ्यो नमः हृदि श्रीमहाकालीमहालक्ष्मीमहासरस्वतीभ्यो देवताभ्यो नमः गुह्ये परमशिवलिंगाय बीजाय नमः
पादयोः कालीशिवहूतीमज्जायन्तीभ्यः शक्तिभ्यो नमः नाभौ क्लीं कीलकाय नमः इति विन्यस्य मम सर्वाभीष्टसिद्धये जपे विनि-
योगः इति कृतांजलिरुक्त्वा ॐ ऐं ह्रीं क्लीं हृदयाय नमः इत्यादि षडंगन्यासं विदध्यात् अत्रैकादशन्यासेषु मातृकान्यासः प्रथ
मः षडंगन्यासो द्वितीयः ततः ॐ ह्रीं ब्रह्माणी मे पूर्वे पातु २ महालक्ष्मी मे ऐशान्यां पातु २ व्योमेश्वरी मे ऊर्ध्वं पातु २ सप्तद्वी
पेश्वरी मे मध्ये पातु २ नागेश्वरी मे अधः पातु २ तत्तत्तृतीयो न्यासः ततः ॐ ह्रीं मम सर्वांगं नंदजा पातु नमः पूर्वे दक्षिणांगं र
क्तदंतिका २ पश्चिमांगं शाकंभरी २ वामांगं दुर्गा २ मूर्ध्नीह्यादांतं भीमा २ पादांतिमूर्ध्नांतं भ्रामरी २ इति चतुर्थो न्यासः पा
दादिनाभिपर्यंतं २ ब्रह्मा पातु नमः नाभेः कंठपर्यंतं २ विष्णुः पातु नमः कंठाद्ब्रह्मरंध्रांतं २ रुद्रः पातु नमः पादद्वये हं
सः पातु नमः २ नेत्रयोर्वृषभः पातु नमः सर्वांगे गजाननः पातु २ नमः ब्रह्मरंध्रे २ हरिः पातु नमः मध्यदेहे २ महालक्ष्म्यै
नमः मध्यदेहे २ मस्तके २ सरस्वत्यै नमः पादयोः २ महालक्ष्म्यै नमः करयोः २ सिंहाय नमः नेत्रयोः २ परमहंसाय नमः पा
दयोः २ महिषसहितप्रेताय नमः सर्वांगे २ महेशाय नमः पुनः सर्वांगे २ चण्डिकायै नमः इति षष्ठो न्यासः ब्रह्मरंध्रे ॐ ऐं नमः दक्षि
णकर्णे ॐ ह्रीं नमः ॐ वामकर्णे क्लीं नमः दक्षनेत्रे ॐ चां नमः वामनेत्रे ॐ मुं नमः दक्षनासायां ॐ डां नमः वामनासायां ॐ यें नमः
मुखे ॐ विं नमः लिंगे ॐ च्चें नमः इति सप्तमो न्यासः गुदे ऐं नमः लिंगे ॐ ह्रीं नमः मुखे ॐ क्लीं नमः वामनासायां ॐ चां नमः दक्षनासा
यां ॐ मुं नमः वामने ॐ नमः दक्षनेत्रे ॐ यें नमः वामकर्णे ॐ विं नमः दक्षकर्णे ॐ च्चें नमः इत्यष्टमो न्यासः सः सर्वांगे मूर्धादिपा

ह्रीं नं मूलमंत्रमुच्चार्य नमः एवं दक्षिणपार्श्वे पृष्ठभागे पुनर्वामपृष्ठे दक्षभागे पूर्वादिषु व्यापकत्वेन न्यसेत् इति नवमो न्यासः ततो मूल
मंत्रमुच्चार्य हृदयाय नमः इत्येवं षडंगन्यासं कुर्यात् इति दशमो न्यासः खड्गिनी शूलिनी घोरेत्येकं श्लोकं सकलवर्णान् ध्यात्वा सर्वा
गे व्यापकं शूलेन पाहि नो देवीत्यादि रक्तसर्वेन इत्यन्तं श्लोकचतुष्टयं बालार्कवर्णान् ध्यात्वा व्यापकं सर्वस्वरूपे सर्वेशे इत्यादि चाण्डि
के त्वां नता वयमित्यन्तं श्लोकपंचकं शुद्धस्फटिकसंकाशं ध्यायन् सर्वांगे व्यापकं न्यसेदिति इति एकादशो न्यासः अथ स्वहृदये वक्ष्यमा
णं पूजापीठं विभाव्य तन्मध्ये मूलमंत्रस्य बीजत्रयं ध्यात्वा मध्यबीजे श्रीमहालक्ष्मीं सर्वदेवशरीरेभ्यो याविर्भूतामितप्रभा विचित्रजव
नाविचित्रमाल्याम्बरविभूषणा चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी अष्टादशभुजा पूज्या सा सहस्रभुजा सती आयुधान्यत्र वक्ष्यं
ते दक्षिणाधः करक्रमात् अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा चक्रं त्रिशूलं परशुः शंखो घण्टा च पाशकः शक्तिर्दण्डश्चर्म चा
पः पानपात्रं कमण्डलुः अलंकृतभुजामेभिरायुधैः कमलासनां सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप पूजयेत्सर्वदेवानां च प्रभु
र्भवेत् इति महालक्ष्मीं ध्यात्वा प्रथमबीजेन महाकालीं ध्यायेत् दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा विशालया राजमाना त्रिंशल्लो
चनमालया स्फुरद्दशनदंष्ट्रा सा भीमरूपापि भूमिप रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रिया खड्गबाणगदाशूलचक्रपाशभुशुण्डि
भृत् परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ एषा सा वैष्णवी माया कालरात्रिर्दुरत्यया आराधिता वशीकुर्यात्पूजाकर्तुश्चराचरं इति
महाकालीं ध्यात्वा महालक्ष्म्या वामभागे सरस्वतीं तृतीयबीजे ध्यायेत् गौरीदेहात्समुद्भूता या सत्त्वैकगुणाश्रिता साक्षात्सरस्वती प्रोक्ता
शुम्भासुरनिबर्हिणी दधौ चाष्टभुजा बाणमुसले चक्रशूलभृत् शंखं च लाङ्गलं घण्टां कार्मुकं वसुधाधिप एषा संपूजिता भक्त्या सर्वज्ञ
त्वं प्रयच्छति इति महासरस्वतीं च ध्यात्वा वक्ष्यमाणपीठपूजापुरःसरं महालक्ष्म्यंगावरणानां मानसैरुपचारैः स्वमूलाधारे आत्मा
रिचतुष्टयरूपं चतुरस्रकुण्डे स्वाग्निसमुज्ज्वले ध्यात्वा मूलमंत्रमुच्चार्य अहंतां जुहोमि स्वाहा पुनर्मूलं असत्यं जुहोमि स्वाहा इत्येवं महत्तायै शू

न्यकामक्रोधलोभमोहमदमात्सर्याणि स्तभ्रुणा गन्धगृह्णन्मनः स्रुवेण पृथक्पृथक्जुहुत्वा निर्दग्धानिलवैरिणस्थिरचित्तो मूलमं
त्रं यथाशक्ति जपित्वा जपं समर्प्य वाह्यपूजामारभेत् तत्र स्वर्णादिपीठे कुमादिना षट्कोणं तद्बहिर्वृत्तं तल्लग्नं सकेसरमष्टदलं तद्ब
हिर्वृत्तं तद्बहिश्चतुरस्रं चतुर्द्वारयुक्तं चतुरस्रत्रयं रेखात्रयेति पूजाचक्रं निर्माय षट्कोणमध्ये वाग्भवमायाकामराजबीजत्रयं पंक्त्याका
रेण विलिख्य तदग्रादिषट्कोणेषु प्रादक्षिण्येन वचाकारादिबीजष विलिखेत् ततोऽर्घ्यादिपात्राण्यासाद्य पूजोपकरणानि संप्रो
क्ष्य ॐ ह्रीं हंसः सोऽहं स्वाहा इति मंत्रेण स्वशरीरं गंधादिभिरलंकृत्य स्वात्मानं देवीरूपं विभाव्य प्राग्वन्मूलाधारे चतुरस्रं कुण्डलिरू
पं अग्निं संचिन्त्य मूलं धर्माधर्महविर्दीप्ते आत्माग्नौ द विधास्रुवा सुषुम्णावर्त्मना नित्यमक्षवृत्तिर्जुहोम्यहं स्वाहा एवं पापं
जुहोमि स्वाहा एवं पुण्यपापं कृत्याकृत्यं संकल्पविकल्पं धर्मा कृत्वा पुनर्मूलमंत्रं प्रकाशामर्शहस्ताभ्यामवलंब्योन्मनी
स्रुचं धर्माधर्मकलास्नेहपूर्णं वह्नौ जुहोम्यहं अथ मंत्रहोमि स्वाहा इति पूर्णाहुतिं जुहुत्वा देवीरूपमात्मानं ध्यात्वा मूलमंत्र
यथाशक्ति जपित्वा समर्प्य पूजापीठमर्घ्योदकेनाभ्युक्ष्य षट्कोणे ॐ कारपीठाय नमः चतुरस्रे ॐ कामपीठाय नमः इ
ति संपूज्य पीठाद्बहिश्चतुर्दिक्षु ॐ गं गणेशाय नमः क्षं क्षेत्रपालाय नमः ॐ दुं दुर्गायै नमः ॐ वं वटुकाय नमः इति संपूज्या
ग्नेयादिकोणेषु ॐ जं जयायै नमः ॐ विं विजयायै नमः ॐ जं जयन्त्यै नमः ॐ अं अपराजितायै नमः पद्मनालमूले आं
आधारशक्त्यै नमः कुं कूर्माय नमः शं शेषाय नमः पृं पृथिव्यै नमः नां नालाय नमः पं पद्माय नमः ॐ इ
एणद्दहि तिं संपूज्याष्टदलकर्णिकायामष्टको ॐ वं विलमायायै नमः एं चेतनायै नमः बुं बुध्यै नमः ॐ निं निद्रायै नमः तं तन्द्रायै नमः इति
पंच शक्तीः संपूज्य दक्षिणदिक्षु ॐ छां छायायै नमः ॐ पां शान्त्यै नमः ॐ तं तन्मायायै नमः ॐ तां तारायै नमः ॐ जां जात्यै नमः इति शा
क्तिषट्कं संपूज्य पश्चिमदिक्षु ॐ शां शान्त्यै नमः ॐ अं अग्रहायै नमः कां कान्त्यै नमः लं लक्ष्म्यै नमः एं एष्टै नमः इति शक्तिषट्कं संपूज्य

विद्या· ११
व
४५६
456

इति शिरसि ॐ स्तनये ॐ दं दं पायै ॐ तं तं हृदये मां मात्रे भ्रूं भ्रूमध्ये इति शक्तिषडङ्गं संपूजयेदिति प्राक्तिलपञ्चत्रयोविंशतिदेवताः संपूज्य मध्य
बीजे मूलं श्रीमहालक्ष्म्यै मूर्त्तये नमः इति मूर्त्तिं संपूज्य कराभ्यां पुष्पाञ्जलिमादाय हृदयकमले यथोक्तनुपां श्रीगणवरां महा
लक्ष्मीं ध्यात्वा तन्मयो भूत्वा मायया मूलमंत्रेण वह्निजाग्निस्थं नीत्वा प्रवहन्नासारन्ध्रेण पुष्पाञ्जलौ संयोज्य मूलेन तत्तेजः समानीय
मध्ये ध्यायन्ती विमलसादुर्गां नाभिमध्ये व्यवस्थितां आवाहयेत्ततो दुर्गां संसारभयतारिणीं कल्याणजननीं सत्यां कामदां करुणाक
रां अनंतशक्तिसंपन्नां दुर्गां मायावाहयाम्यहं महापद्मवनान्तस्थे कारणानंदविग्रहे सर्वभूतहिते मातरेह्येहि परमेश्वरि इति पु
ष्पांजलिमुद्देपेणावाह्यावाहनादि नवमुद्राः प्रदर्श्य देवेशि भक्तिसुलभे सर्वावरणसंयुते यावत्त्वां पूजयिष्यामि तावत्त्वं सु
स्थिरा भव इति प्रार्थ्य ॐ दुर्गे देवि सुरेशानि ज्ञानमार्गप्रदायिके आसनं मम भूत्यर्थं गृहाण त्वं सुरेश्वरि आसनं स्वागतं कु
शलं पृच्छे महादेवि महेश्वरि सुस्वागतं त्वया भद्रे कृपया भक्तवत्सले स्वागतं जगज्जन्मे त्रिलोकेशि देवदानवभाजिते अ
र्घ्यं गृहाण त्वं देवि विश्वार्त्तिहारिणि अर्घ्यं कात्यायनि महादुर्गे चामुण्डे शंकरप्रिये पाद्यं गृहाण देवेशि भद्रकालि नमो
स्तु ते इति पाद्यं सर्वलोकस्य या माता या माता लोकपावनि दद्यामाचमनं तस्यै महालक्ष्म्यै प्रयत्नतः इत्याचमनीयं कपिला
दधिकुंदेंदुधवलं मधुसंयुतं स्वर्णपात्रास्थितं देवि मधुपर्कं गृहाण मे इति मधुपर्कं कर्पूरवासितं वारि निर्मलं शुद्धहेतुकं ग
हाण परमेशानि पुनराचमनीयकं इति पुनराचमनीयं स्नानं मूर्त्ति भद्रकालि दिव्यमूर्त्ते सुरेश्वरि स्नानं गृहाण देवेशि तीर्थोद
कविभूषितं इति स्नानं वस्त्रयुग्मं महादेवि यत्नसूत्रविनिर्मितं गृहाण सुभगे देवि पट्टकूलं सुरार्च्चितं इति वस्त्रं सुरासुरशि
रोरत्ननिघृष्टचरणांबुजे अलंकारान्गृहाण त्वं नानारत्नविभूषणान् इत्यलंकारः श्रीखण्डागरुकर्पूररोचनानाभिसंयुतं गृ
हाण गंधं देवि त्वं सर्वकामफलप्रदं इति गंधः नानापुष्पविचित्राढ्यं पुष्पमालासुशोभितां प्रयच्छामि महादेवि गृहाण त्वं सुरेश्वरि

इतिपुष्पाणि इतिपुष्पांतानुपचारानुपचर्य श्रीभगवति परिष्ठार्थं अत्र त्वं देहि इति प्रार्थ्य मध्ये प्रथमबीजे ॐ महासरस्वत्यै नमः
महालक्ष्म्या वामाग्रे ॐ महिषासुराय नमः दक्षाग्रे सिंहाय नमः इति संपूज्य षट्कोणाद्बहिः कर्णिकायामेव षडंगानि सं
पूज्य षट्कोणेषु पूर्वादि ॐ नंदजायै नमः ॐ रक्तदंतिकायै नमः ॐ शाकंभर्यै नमः ॐ दुर्गायै नमः ॐ भीमायै नमः ॐ भ्रामर्यै नमः
इति संपूज्य षट्कोणाद्बहिः कर्णिकायामेव षडंगानि संपूज्य अष्टदलेषु ब्राह्म्याद्यष्टमातृकाः संपूज्य चतुरस्रे प्रथमको(
ष्वादिवज्रादीन् संपूज्य मूले सांगायै सपरिवारायै श्रीमहालक्ष्म्यै नमः इति पुष्पांजलिं दद्यात् धूपं गुग्गुलघृतसंयुक्तमगर्वादिस
माहितं दशांगं गृहाण त्वं धूपं त्वं भद्रकालि नमोस्तु ते दीपं रक्तसूत्रलसद्वर्त्तिगोघृतेन च पूरितं दीपं गृहाण देवेशि नमस्ते लोक
सुंदरि नैवेद्यं दिव्यान्नं रससंयुक्तं नानाभक्ष्यैः सुसंस्कृतं चोष्यपेयसमायुक्तं मया दत्तं देवि गृहाण मे इति समर्प्य देवीं भुंजानां भावयन् मू
लं दशधा जपित्वा शुद्धोदकं देव्यै निवेद्य समाप्ते मूलेन पंचविंशत्याकृत्वा षडंगमंत्रैः षडाकृत्वो वरणदेवतानां प्रत्येकमेका
कृत्वा पूजास्थानमागत्य स्ववामाग्रे त्रिकोणमंडले तत्र जलपूरितं साधारं बलिपात्रं निधाय ॐ क्लीं सर्वविघ्नकृद्भ्यः सर्व
भूतेभ्यो हुं फट् सर्वभूतेभ्यः एष बलिर्नमः इति मंत्रेण बलिमुत्सृज्य देव्यै उत्तरापोशनादिकं दत्वा ततो गृहाण देवि तांबूलं कर्पूरेण
सुवासितं पूगीफलसमायुक्तं सचूर्णं मुखमंडनं तांबूलं नीराजनं मंगले कालिके दुर्गे महिषासुरसूदनि नीराजनं मया द
त्तं गृहाण सुरसुंदरि पुष्पांजलिं सर्वमंगलमांगल्ये शिवे सर्वार्थसाधके शरण्ये त्र्यंबके दुर्गे कात्यायनि नमोस्तु ते नमस्कारं मया
जन्मसहस्रेषु अर्जितं पापसंचयं तत्सर्वं नाशयत्विष्टं मदत्तिपदे पदे इति प्रदक्षिणा हिरण्यं सुपूजायाः संपूर्णार्थं तु दक्षिणा
दीयते मया तां गृहाण महेशानि पूजां मे सफलां कुरु प्रार्थना मां दह यत्रिमहामाये चामुंडे मुंडमालिनि यशो देहि धनं देहि तव म
किंचिद्देहि मीनेता मूलमंत्रं यथाशक्ति जपित्वा जपं समर्प्य सप्तशतीपाठं कुर्यात् तत्र अद्येत्यादि संकल्पं कुर्यात् मध्यमचरित्रस्य

विया॰ २२
व॰
४५८

457

ब्रह्मा ऋषिर्गायत्री छंदः महाकाली देवता रक्तदंतिका बीजं नंदा शक्तिः अग्निस्तत्वं प्रथमचरित्रजपे विनियोगः मध्यमचरित्रस्य वि
ष्णुरृषिः पंक्तिछंदः महालक्ष्मी देवता दुर्गा बीजं शाकंभरी शक्तिः वायुस्तत्वं मध्यमचरित्रजपे विनियोगः उत्तमचरित्रस्य रुद्र
रृषिरनुष्टुप्छंदः महासरस्वती देवता भ्रामरी बीजं भीमा शक्तिः सूर्यस्तत्वं उत्तमचरित्रजपे विनियोगः इति विन्यस्य पठेत्
पूजायंत्रस्य चतुरस्त्राद्बहिः प्राच्यां २ उड्याणपीठाय उड्डेश्वरनाथाय उड्डांबापादुकां पूजयामि आग्नेये मातृकापीठाय
मातृकाचक्रेश्वरनाथाय मातृकांबापादुकां दक्षिणे २ जालंधरपीठाय ज्वालामुखनाथाय वालांबापादुकां नैरृत्ये २
कोलापुरपीठाय कोलापुरेश्वरनाथाय कोलांबापादुकां पश्चिमे पूर्णगिरिपीठाय पूर्णेश्वरनाथाय पूर्णांबापादुकां वा
यव्ये २ चौहारपीठाय चौहारनाथाय चौहारांबापादुकां उत्तरे कोलगिरिपीठाय कोलागिरिपीठाय कोलागिरीश्वरनाथा
य कोलांबापादुकां ईशान्ये २ कामरूपपीठाय कामेश्वरनाथाय कामेश्वरीपादुकां मध्ये योगिनीपीठाय आग्नेयादिको
णेष्वर्चयेत् अग्निमुखाय नमः प्रेतवाहनाय नमः ज्वालामुखाय नमः धूम्राक्षाय नमः ततो मध्ये षट्कोणेषु गुरुभ्यो नमः
परमेष्ठीगुरुभ्यो नमः गणेशाय नमः हरये नमः ततो मध्ये देवीपृष्ठभागे महालक्ष्मीहृषीकेशाभ्यां नमः सरस्वतीविरंचि
भ्यां नमः दक्षिणे कालाय रुद्राय महासिंहाय व्यामेमृत्यवे मध्ये विजयाय गणाधाय महिषाय चण्डिकायै उत्तरे कालाय
दक्षिणे यमाय नमः इति संपूज्य योनिमुद्रां प्रदर्शयेत् अथ जातवेदसादिमंत्रा ब्राह्मे मुहूर्ते उ॒त्थाय पूर्वोक्तवक्तव्यानाज
पास्नानं संध्याभूतशुद्ध्यादिमातृकान्यासांतं विधाय मूलमंत्रेण प्राणायामत्रयं कृत्वा मंत्रन्यासान्कुर्यात् ॐ अस्य श्रीजातवे
दमहामंत्रस्य मरीचिः कश्यपो ऋषये नमः शिरसि त्रिष्टुप्छंदसे नमः मुखे जातवेदाग्निरूपिणी दुर्गा देवतायै नमः हृदि मम विनि
योगः जातवेदसे हृदयाय नमः सोमरातीयते शिरसे स्वाहा निदहाति वेदः शिखायै वषट् स नः पर्षदति कवचाय हुं दुर्गाणि विश्वा नावेव नेत्र

४५८

त्रयायवौषट् सिंधुं दुरितात्यग्निः अस्त्रायफट् एवमंगुलीन्यासः ॐ जांनमः दक्षांगुष्ठे ॐ तंनमः वामांगुष्ठे ॐ वेंनमः दक्षगुल्फे दंनमः
वामगुल्फे ॐ सेंनमः दक्षजंघायां ॐ सुंनमः वामजंघायां ॐ नेनमः दक्षजानुनि वांनमः वामजानुनि ॐ मंनमः दक्षोरौ ॐ नमः वामो
रौ ॐ नमः दक्षकट्यां ॐ रांनमः वामकट्यां तिंनमः ॐ गुनि यंनमः नाभौ ॐ तोंनमः हृदि निंनमः दक्षस्तने ॐ दंनमः वामस्त
ने ॐ तांनमः दक्षपार्श्वे ॐ तीनमः वामपार्श्वे ॐ नमः दक्षस्कंधे ॐ सेनमः वामस्कंधे ॐ नमः मध्ये ॐ येनमः दक्षबाहुमूले ॐ दं
नमः वामबाहुमूले ॐ षंनमः दक्षोपबाहौ ॐ दंनमः वामोपबाहौ ॐ तिंनमः दक्षप्रकूर्परे ॐ दुन्नमः वामप्रकूर्परे ॐ गांनमः द
क्षप्रकोष्ठे ॐ णींनमः वामप्रकोष्ठे ॐ विंनमः मेणिबंधे ॐ श्वांनमः वाममणिबंधादितलांते ॐ नांनमः मुखे ॐ वेंनमः दक्षना
सिकायां ॐ वेंनमः वामनासिकायां ॐ सिंनमः दक्षनेत्रे ॐ धुंनमः वामनेत्रे ॐ दुंनमः दक्षकर्णे ॐ रिंनमः वामकर्णे ॐ तांनमः
सहृयोः ॐ त्यंनमः मस्तके ॐ ग्निंनमः मूर्ध्नि इत्यक्षरन्यासः ततः शिखायां वेदसे ललाटे सुनवामकर्णयोः सोमंनासिकायांम
रातीयतः चक्षुषोः दृष्ट्योः निदंतेषु दहातिताल्वो वेदो जिह्वायां सोष्ठौवाचां नोवाह्वोः पुरुषस्तनयोः अतिहृदये दुर्गाणि
नाभौ विश्वाष्टष्ठे नावाअपाने इवहृषणयोः सिंधुं शिश्ने दुःकट्योः इतोर्वोः अतिजंघयोः अग्निः पादयोः अग्नीरत्नत इतिपदन्या
सेसृष्टिः ततः समग्रमंत्रेणव्यापकं विन्यस्य जातवेदसे पादयोः सुनवामअंगुलीषु सोमंजान्वोः अरातीयतः ऊर्वोः नियुषे दक्ष
तिकट्योः वेदोनाभौ संहृदयेनः पृष्ठे पर्षद्बाह्वोः अतिकंठे दुर्गाणिवक्त्रे विश्वाचक्षुषोः नावेवनासिकयोः सिंधुंकर्णयोः
दुरिताललाटे अतिमुकुटे अग्निः मूर्द्धनि पादयोः विलवेनमः हृदिब्रह्मणेनमः मूर्द्धनिपरमात्मनेनमः शिखायांसप्तर्षिभ्योनमः
नासिकायांसमवायुभ्योनमः चक्षुषोः शशिभास्कराभ्यांनमः श्रोत्रयोरश्विनीवेभ्योनमः जिह्वायांसरस्वत्येनमः वाच्यग्नयेनमः कं
ठेदेवेभ्योनमः हृदिवरुणायनमः उदरे हव्यवाहनायनमः कटौपृथिव्यैनमः कक्षांनवग्रहेभ्योनमः नाभौरत्नायनमः अहेजातवे

विद्या. २२
व.
४५८

458

दसेनमः शिखायामाज्यस्थाल्यैनमः शिरसि आज्यायनमः नेत्रयोः ज्योतिषेनमः कवचे वह्निषेनमः ३ यंतः शक्तिः ज्वलंतः प्रहर
ण वह्निगोधांगुलित्राणं यस्याः सिंहारथे युक्ताय स्याः व्याघ्रानुगामिनः तामिमां रुद्रसंयुक्तां दुर्गामावाहयाम्यहं आयातु दुर्गा
तूणः अभयं मे ददाना तो दुर्गा कुमारी ऋषिभिः सुपूजिता शरणमहं प्रपद्ये ॐ दुर्गायै नमः ॐ याम्यै नमः ॐ रौद्र्यै नमः ॐ आदि
त्यायै नमः ॐ कात्यायिन्यै नमः ॐ गौर्यै नमः ॐ धात्र्यै नमः ॐ शक्त्यै नमः ॐ सरस्वत्यै नमः इति नवशक्तियुक्तां शंखं खेटं
तथा बाणान् वामे चाभयदायिनी धनुश्चक्रं तथा पत्रं दक्षिणे सुवरप्रदं चक्रं खड्गं शरान् शूलं लोहहस्तेषु चतोमरं वलय
भिंदिपालं च दधाना चोत्तरे भुजे परिघं चांकुशं चैव धारयंती त्रिलोचना सिद्धं तिसर्वकार्याणि निश्चितं हि द्विजोत्तम आज्ये
दसं स्तुता देवी काश्यपेन प्रकीर्तिता जातवेदप्रभा देवी भुक्तिमुक्तिप्रदायिनी मेरुपर्वतकुंभा ---- व्याघ्रानुसारिणी सिं
हं चतमुखवाहिनी॰ अष्टादशभुजा शुक्लास्त्रा शुक्लवासिनी सर्वाभरणभूषितां जातवेदसे देवीं ध्यात्वा नानैरुपचारैः संपूज्य
तदेवदेवी स्वरूपं स्वात्मानि मित्वभेदसावना कृत्वा त्रातापडंगं कुर्यात् ॐ हर हर शिणि मालिनि मूलिनि दुष्टग्रहनिवारिणि भ्यां स्वा
हा हृदयाय नमः अग्नितेजोज्वालामालिनि शिरसे स्वाहा चंद्रतेजोज्वालामालिनि शिखायै वषट् ब्रह्मतेजोज्वालामालिनि कवचा
यहुं आदित्यतेजोज्वालामालिनि नेत्रत्रयाय वौषट् विष्णुतेजोज्वालामालिनि सर्वतेजोज्वालामालिनि ज्वलज्ज्वालामालिनि शूलि
निदुष्टग्रहनिवारिणि देवि दह जातवेदसं संभूति स्वाहा अस्त्राय फट् इति रक्षा षडंगं कृत्वा ॐ जातवेदसे सुनवाम सोमं सहराहैरे हिं
जगणैः पिशाचोरगराक्षसैः राज्ञो भये समुत्पन्ने अरातीयतो निदहाति वेदः राजद्वारे महाघोरे संग्रामे शत्रुसंकटे सर्वं रक्षति दुरितं
सनः सपर्षदति दुर्गाणि विश्वा मदृक्षमुभये समुत्पन्ने स्मरंति च सर्वं रक्षति दुर्गा नामेव सिंधुं दुरितात्यग्निः इति पठन् स्वात्मानं सम्प्रका
शचिदानंदतनुं देवतामयं ध्यात्वा मूलषडंगं कुर्यात् ॐ जातवेदसे सुनवाम हलाहलिनि ज्वलज्ज्वालामालिनि वह्निगोधांगुलीत्राणि नि

शिखायै वषट् मनः पर्षदति हलाहलिनि ज्वलज्ज्वालामालिनि वहद्गोधांगुलीत्राणिनि कवचाय हुं दुर्गाणि विश्वानावेव हलिनि
ज्वलज्ज्वालामालिनि वहद्गोधांगुलीत्राणि नेत्रत्रयाय वौषट् सिंधुं दुरितात्यग्निः हलिहलिनि ज्वलज्ज्वालामालिनि वहद्गोधांगु
लित्राणिनि अस्त्राय फट् इति षडंगं कृत्वा मंत्रेण सर्वांगं व्याप्य स्ववामभागे कलशस्थापनं कृत्वा स्वदक्षिणभागेण संस्थाप्य म
धेनु अर्घ्यादि पंचपात्राणि संस्थाप्य देवीसूक्तेन देवीमभिषेकं कृत्वा पीठपूजां कुर्यात् कालाग्निरुद्राय नमः मण्डूकाय नमः आ
धारशक्त्यै नमः कूर्माय नमः अनंताय नमः वराहाय नमः पृथिव्यै नमः पयमुपर्युपरि संपूज्य क्षीरसमुद्राय श्वेतद्वीपाय
नमः कल्पवृक्षाय नमः रत्नमण्डपाय नमः रत्नवेदिकायै नमः रत्नसिंहासनाय नमः आग्नेयादि धर्माय नमः ज्ञानाय नमः
वैराग्याय नमः ऐश्वर्याय नमः एते पादरूपिणः अधर्माय नमः अज्ञानाय नमः अवैराग्याय नमः अनैश्वर्याय नमः एते सिं
हासनगात्ररूपिणः इति धर्माय नमः ज्ञानाय नम वैराग्याय नमः ऐश्वर्याय नमः एते पादरूपिणः अधर्माय नमः संपूज्य त
दुपरि ह्रीं आदिमायायै नमः चिच्छक्त्यै नमः तदुपरि आनंदकंदाय नमः संविन्नालाय नमः प्रकृतिमयपत्रेभ्यो नमः विकारमय
केसरेभ्यो नमः पंचाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायै कर्णिकायै नमः तस्यां अं अर्कमण्डलाय नमः सं सोममण्डलाय नमः रं व
ह्निमण्डलाय नमः सं सत्त्वाय नमः रं रजसे नमः तं तमसे नमः आं आत्मने नमः अं अंतरात्मने नमः पं परमात्मने नमः ह्रीं ज्ञाना
त्मने नमः आत्मतत्त्वाय नमः मायातत्त्वाय नमः विद्यातत्त्वाय नमः कलातत्त्वाय नमः इति संपूज्य केसरेषु पूर्वाद्यष्टदिक्षु मध्ये
नवपीठशक्तीः प्रपूजयेत् ह्रीं जं जयायै नमः ह्रीं विं विजयायै नमः ह्रीं भद्रायै नमः ह्रीं भद्रकाल्यै नमः ह्रीं सुमुख्यै नमः ह्रीं सुसु
ख्यै नमः ह्रीं डुं डुर्गमुख्यै नमः ह्रीं व्यां व्याघ्रमुख्यै नमः ह्रीं सिं सिंहमुख्यै नमः मध्ये ह्रीं दुं दुर्गायै नमः इति संपूज्य ॐ वज्रनखदंष्ट्रा
युधाय महासिंहाय हुं फट् नमः इति पीठं संपूज्य तदुपरि मूलमंत्रेणोच्चरन् देवि यंत्रे संस्थाप्य आवाहनं कुर्यात् यस्याः सिंहार

विद्या॰ २२
व॰
४५९
459

ये युक्ताव्याघ्रायस्यानुगामिनः तामिमां हृदयसंपुटकां दुर्गामावाहयाम्यहं इत्यावाहनावाहिताभव आस्थापिताभव सन्निरोधि
ताभवा सन्निधापिताभव सन्निधायिताभव सम्मुखीकृताभव सकलीकृताभव परमीकृताभव अमृतीकृताभव इत्युच्चर
न्‌ तत्तन्मुद्राः प्रदर्शयेत्‌ ध्यानं सिंहस्थां शशिशेखरां मृगपतिस्कंधस्थितां भीषणां कन्याभिः करवालखेटविलसद्धस्ताभिरासे
वितां हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां स्मरेत्‌ इति ध्यात्वा मू
लमंत्रेणार्घ्यपाद्याचमनमधुपर्कादिषोडशोपचारपूजां कृत्वावरणमारभेत्‌ यथा आग्नेयकोणे जातवेदसे सुनवाम हृदया
यनमः ईशाने सोमममरातियतः शिरसे स्वाहा नैरृते निदहाति वेदः शिखायै वषट्‌ वायव्ये सनः पर्षदति दुर्गाणि इति कवचाय
हुं मध्ये दुर्गाणि विश्वानावेव नेत्रत्रयाय वौषट्‌ पूर्वादिचतुर्दिक्षु सिंधुं दुरितात्यग्निः अस्त्राय फट्‌ इति षडंगपूजा प्रथमावरणं
ततः अष्टदलेषु पूर्वादिप्रादक्षिण्येन जातवेदसे नमः सप्तजिह्वाय नमः हव्यवाहनाय नमः अश्वोदरजाय नमः वैश्वानराय
नमः कौमारतेजसे नमः विश्वमुखाय नमः देवमुखाय नमः इति द्वितीयावरणं ततः पत्राग्रेषु पूर्वादिचतुर्दिक्षु ॐ पृथिव्यात्म
नेनमः सलिलात्मने नमः अग्न्यात्मने नमः वाय्वात्मने नमः आग्नेयादिकोणेषु निवृत्त्यै नमः सुप्रतिष्ठायै नमः विद्यायै नमः
शांत्यै नमः इति तृतीयावरणं ततः पूर्वादिकोष्ठेषु प्रादक्षिण्येन देवतात्मिकाभिमुखीभ्यो स्त्रीदेवताभ्यो नमः ॐ जां जागरा
यै नमः ॐ तं तपन्यै नमः ॐ वें वेदगर्भायै नमः ॐ दें दहनरूपिण्यै नमः ॐ सें सेंदुखण्डायै नमः शब्दस्पर्शरूपरसगंधात्मिकाभि
मुखीभ्यस्तिर्यङ्मुखीभ्यः स्त्रीदेवताभ्यो नमः हं [illegible] नमः नं नमस्कारिण्यै नमः वां वागीश्वर्यै नमः मं मंदवाहिन्यै नमः सों सो
गरूपायै नमः षाड्गौशिकमयात्मिकाभिमुखीभ्यस्तिर्यङ्मुखीभ्यः क्लीबदेवताभ्यो नमः हं हंसमनोजवायै नमः मं मरुद्वेगायै नमः
रां राज्ञ्यै नमः नीं नीलप्रकोपायै नमः यं यशोवत्यै नमः तों तोयात्मिकायै नमः षड्‌मि— त्मिकाभिमुखीभ्यः कंठमुखीभ्यः क्लीवदेवता

भ्योनमः निं नित्यायैनमः दं दयावत्यैनमः हां हारिण्यैनमः तिं तिरस्क्रियायैनमः वं वेदमात्रेनमः दं दमनप्रियायैनमः सं सध्यात्वा
त्मिकाभिः शुवीभ्यस्तिर्यङ्गुवीभ्यः क्लीबदेवताभ्योनमः सं समाराध्यायैनमः नं नं रिन्यैनमः पं पराकौयैनमः रिं रिपुमर्दिन्यैनमः धं ध
न्यैनमः दं दाक्षिण्यैनमः तिं तिग्मायैनमः पंचभूतात्मिकाभिः शुवीभ्यस्तिर्यङ्गुवीभ्यः क्लीबदेवताभ्योनमः डुं डुर्गायैनमः गां गा
यत्र्यैनमः णिं णिश्वस्यायैनमः विं विपाल्यालैनमः ग्रां ग्रासैकहस्तायैनम कर्मेंद्रियात्मकऊर्ध्वस्थवीभ्योभिः शुवीभ्यस्त्रीदेवता
भ्योनमः नां नादिन्यैनमः वैं वैदनायैनमः वं वह्निगर्भायैनमः सिं सिंहवाहनक्ष्मायैनमः धुं धुर्यायैनमः ज्ञानेंद्रियात्मिकाभिः शु
वीभ्य ऊर्ध्वस्थवीभ्यस्त्रीदेवताभ्योनमः डं डिविषायैनमः रां रीं रक्षायैनमः तां तापहारिण्यैनमः नं न्यक्कदोषायैनमः निं निःसप
त्नायैनमः यताः प्रज्वलत्केशावदनाभीमदंष्ट्राभयापहाः ध्येया इति चतुर्थावरणं तद्बहिः पूर्वादि लं इंद्रायनमः रं अग्नयेनमः
मं यमायनमः क्षं निर्ऋतयेनमः वं वरुणायनमः यं वायवेनमः सं कुबेरायनमः हौं ईशानायनमः इति पंचमावरणं तद्बहिः वं
वज्रायुधायनमः शं शक्त्यायुधायनमः दं दण्डायुधायनमः खं खड्गायुधायनमः पं पाशायुधायनमः क्रों अंकुशायुधायन
मः गं गदायुधायनमः शूं शूलायुधायनमः इति षष्ठमावरणं एवंसंपूज्य नैवेद्यादिकं निवेद्य आरात्रिकं पुष्पांजलिं तं समर्प्य मू
लमंत्रेण प्राणायामत्रयं कृत्वा यथाशक्ति जपित्वा गुह्यातिमंत्रेण जपफलं समर्प्य पूर्वोक्तमंत्रैर्दिक्पालेभ्यः बलिं हरेत् एवंगा
यत्रीजपद्विगुणसहितचतुर्लक्षत्वारिंशत्सहस्राणि जपित्वा तिलपणषमचित्रमूलसमिद्भिर्हुडं वरद्लता म्यस्यसमिद्भिराज्याक्तैर्हवि
षान्नेन दशांशतः होतव्यं कृतपुरश्चरणोभवति ततोस्याग्नेयास्त्राधिकारी भवति तदुक्तं आग्नेयमभिधास्यामि मंत्रं सर्वार्थसा
धनं मरीचः कश्यपः प्रोक्तो मुनिरस्य महात्मनो त्रिष्टुपछंदो देवतात्रजातवेदाग्निरीरितः नवभिः सप्तभिः षड्भिः सप्तभिर्मुनिरष्टभिः
सप्ताभिर्मूलमंत्रार्णैः षडंगविधिरीरितः अंगुष्ठगुल्फजंघाजानुन्नोरुस्तम्भकेकंठयंधुनाभिहृदिस्तनयोः पार्श्वयोः पृष्ठतः स्कं।

विद्या॰ २२
व॰
४६०
460

धयोमध्येवाङ्गम्‌ लोपवाकुषु मकूर्ध्वरमकोष्ठेषु मणिबंधनलेष्वपि भुवनात्मातिकोष्ठेषु मस्तमन्तिष्कमूर्द्धसु क्रमेणाविन्यसेद्वर्णा
नेत्रीमंत्रसमुद्भवान्‌ शिरोललाटनयनकंठोष्ठरदनाकुधा स्कंधवाक्‌हृत्कुक्षिकटिगुह्योरुजानुषु॰ जंघयोः पादयोर्न्यसेत्त
दान्यसमनोःसुधीः विद्युद्दामसमप्रभांमृगपतिस्कंधस्थितांभीषणां कन्याभिः करवालखेटविलसद्धस्ताभिरासेवितां हस्तैश्च
क्रगदासिखेटविशिखांश्चापंगुणांतर्जनीं बिभ्राणामनलात्मिकांशशिधरांदुर्गांत्रिनेत्रांस्मरेत्‌ मंत्रवर्णसहस्राणि जपेन्मंत्रविशाल
धीः तदंतेतिलसिद्धार्थविद्रमूलैः समिद्वरैः क्षीरद्रुमाणामाज्येन हविषाचैवहूयमस्तुतैः चतुस्त्रिंशद्दाश्चचतुःशतसमन्विते चतुः
सहस्रंजुहुयाद्वर्तितेद्रव्यवाहने मंडलेसर्वतोभद्रेषट्कोणांकितकर्णिके विधिनावक्ष्यमाणेनपीठेदेवींप्रपूजयेत्‌ षडंगानि
यथापूर्वंकेसरेष्वर्चयेत्सुधीः ज्वालादिपादाष्टकोणत्रामूर्तेयोर्चीवह्निः पुनः जातवेदाः सप्तजिह्वाहव्यवाहनसंज्ञकाः अश्वोदरज
संज्ञोन्यः पुनर्वैश्वानराह्वयः कौमारतेजःस्याद्विश्वमुखोदेवमुखस्ततः ततोभूसलिलाग्नीनात्मज्ञात्मनमोवितान्‌ चतुर्दिक्षु समभ्य
र्च्यत्कोणेष्वनत्कलापुनः पूर्वादिदिक्षुसंपूज्याजातिर्णाजाणिजशक्तयः नागरानपनावेदगर्भादहनरूपिणी सेडाखण्डाकुभद्रत्रीन
भस्त्राविण्यनंतरं वागीश्वरामंदवाह्वासोमरूपामनोजवा सहृद्भगारात्रिसंज्ञातीव्रकोपापयशोवतो तोयात्मिकापुनर्नित्यादयावत्पापि
हारिणी तिरस्क्रियावेदमातातत्पराद्मनाप्रिया समाराध्यानंदिनीचपराकीरिपुमर्द्दिनी षष्ठीचरणिडनीतिस्माद्दुर्गागायत्र्यनंतरं णि
रवध्याविशालाक्षीभ्यासोहाहाचनादिनी वेदनावह्निगर्भाख्यासिंदवाहाख्ययातया धर्म्यांडविषयापश्चाद्धीरंसातापहारिणी त्यक्त
दोषानिःसपत्नाचत्वारिंशच्चतुर्युताः लोकपालास्ततोभ्यर्च्येद्वज्राद्यायुधसंयुतान्‌ इत्थंजपादिभिःसिद्धेमंत्रेस्मिन्साधकोत्तमः आ
ग्नेयास्त्राधिकारीस्यात्तद्विधानमिहोच्यते। अस्याग्नेयास्त्रमंत्रस्यमरीचिऋषिः कश्यपऋषिः त्रिष्टुप्छंदः उग्रकृत्यादेवतापापात्रत
पार्थेजपेविनियोगः प्रतिलोममंत्रेणकरशुद्धिंकृत्वाग्निस्यताविंडुंसिअस्त्रायफट्‌ ववेनाभ्यां विशिणांगाडुनेत्रत्रयायवौषट्‌ निदषरिपनः

कवचाय हुं दोर्वेति ह्रां दनि शिखायै वषट् नोपतिरामम स्रो फिर स्रे स्वाहा मवान स्वमेद वेतजा हृदयाय नमः इति षडङ्गं कृत्वा अ
तरन्यास पदन्यासान् प्रतिलोमेन कृत्वा गुरूपदिष्टमार्गेण ध्यात्वा प्रज्वलाग्निद्विगुणजपसहितं प्रतिलोममंत्रं चतुस्त्रात्वारिंशत्सहस्रं
त्र्यांकं जप्त्वा पंचगव्येन पक्वचरुणा दशांशहोमः कार्यः अस्त्राग्निद्विर्भवती तदुक्तं आग्नेयास्त्रमिति प्रोक्तं विलोमपरितो मन्त्रः पु
वौक्ता प्रवत्तुम्नायां मंत्रस्यास्य प्रकीर्तितः प्रतिलोमक्रमादस्य षडङ्गानि प्रकल्पयेत् वर्णान्यासपदन्यासान्विदध्यात्प्रतिलोमतः ध्या
नभेदात्त्रिजानाति गुर्वादेशात्तथान्यथा पूर्ववज्जपलक्षैः स्याज्जपः पास्त्वमालया पंचगव्यस्य पक्वेन चरुणा तत्स्याद्दिवसे अर्द्धं तद्दि
वं वाक्यर्थ्या वुद्धिकौलप्रतिलोमतः सर्वत्र देशिकः कुर्याज्ज्ञाय स्त्राद्विगुणं जयं क्रूरकर्माणि कुर्वीत प्रतिलोमविधानतः प्रयो
गकाले प्रजपेद्दृष्टपादान्विलोमतः एभिर्धितोजायते पश्चान्मन्त्रोयं विधिनामुना न्यादिपञ्चवादरः पादोत्रोयोत्र नेन्द्रियात्मकः धु
माद्योनः पंचवर्णाः स्मृतः पञ्चेन्द्रियात्मकः स्वाधस्तृतीयः पंचार्णाः पंचभूतमयः स्मृतः त्याद्यः समान्तरः पादस्तुतन्वर्थोधातुरू
पकः दः पूर्वः पंचमः पादः ऊर्मित्रूपः षडन्तरः नोवर्णादिः षडर्णोन्यः षट्कोणिकमयीमतः स्रोवर्णपंचवर्णोन्यः शाद्यादिषु पद
रितः सेवर्णाद्यष्टमोन्त्यः पंचार्णादवनादिकः एवं तत्वसमायोगात्पादलक्ष्मिरुदीरिताः तत्तत्पादादितो गोत्यच्चात्तावत्यो वर्णदेवताः
प्रधानमूर्तिप्रतिभा स्वस्ववर्णोदितप्रभाः प्रज्वलत्केशवदनाभीमदंष्ट्रभयापहाः देवताः इन्द्रियोत्पन्नाऊर्द्ध्वदृष्टय ईरिताः देवताभूत
पादोत्थास्तिर्यक्वक्त्राप्रकीर्तिताः धातुरूपान्तरोद्भूताऊभयाननशोभिताः ऊर्मिजाऊर्द्ध्ववदनाः कोशोत्थास्तिर्य्यगाननाः एताः
सर्वाः स्मृताः क्रोधाः इन्द्रियार्थोद्भवाः स्त्रियः अथस्तिर्यक्त्रकत्वोपेताः ईरिता वर्णदेवताः आभिस्तुल्याः स्मृताः सोमपराक्रमाग्नेनक
मणि आख्याः संख्याः समुत्पन्नाः देवताज्वलिताननाः याभिर्मन्त्रोदहेद्वैरान्पातित गिरिकाननं अस्त्रमनुष्यमतत्रेज्ञारभेतविच
तार्णः अस्त्रैस्त्रप्रमुञ्जीत देवतास्वरूपसंहरेत् एवं तत्रयंपश्चादरणपाडीडरोहिणी इमानि मातृकान्याङ्ने तन्त्राणीमनीषिणः ज्ञे।

विया·२२

४६१

461

ज्येष्ठाशतभिषामूलधनिष्ठाश्लेषकृत्तिकाः चित्रामघाविशाखाश्चस्ताराराक्षसदेवताः अश्विनीरेवतीपुष्यस्वातीहस्तः पुनर्वसुः अनु-
राधामृगशिरःश्रवणादेवतारकाः उपक्रमेत नन्दायां रिक्तासु च विसर्जयेत् भद्रायां संहरणं कुर्यात् जयायां स्तंभनमुत्तमं उपक्रमे भौमवा-
रे शनिवारे विसर्जनं प्रतिसंहरणं वारे शुक्रस्य शुक्रस्य वा भवेत् भानुना मोहनं संहारे कुर्यात् तत्तद्ग्रहे समुद्धः स्थिरेषु राशीष्वारम्भश्चरेषु
स्याद्विसर्जनं अस्त्रसंहरणं कुर्यात् उभयेषु विचक्षणः कृष्णपक्षे नलेवास्त्रं विसृजेच्च शिवात्मनः शुक्लपक्षे क्रमादस्त्रं पुनरात्मनि संह-
रेत् पश्चिमाभिमुखो भूत्वा कर्म सर्वत्र कारयेत् नक्षत्रतिथिवारलग्नकलान्याध्यात्वा कर्मसंयुतान् ततो मंत्रान् हरेयेतान् मंत्री मंत्राणि संख्ये-
या जुहुयाद्दधिनवक्षौमारये द्विषमात्मनः कृष्णाष्टमीसमारभ्य यावत्कृष्णचतुर्दशी धत्तूरविषवृक्षाख्यभूरुहोत्थान् समिद्वरान् रा-
जितैलेन संयुक्तान् एष्यकृष्णसहस्रकं जुहुयात् संयतो भूत्वा रिपुधर्मपुरं व्रजेत् समराजे प्रजुहुयात् सिद्धार्थस्नेहलोलितैः आर्द्र-
वस्त्रो वृष्टिकाले मरीचैर्मन्त्रनाम्ना निगृह्णीत ज्वरेणारिः प्रलयाग्निसमे मन्त्रः तालपत्रे समालिख्य तु मामयथाविधि आग्नेया-
स्त्रेण संवेष्ट्य कुण्डमध्ये निखातयेत् जुहुयान्मरिचैः कुण्डे ज्वराक्रान्तः सञ्जायते तदासयति पित्तोयेणातलेन शोभवेत् विषापा-
मार्गबीजानि मरीचीमथसंयुतं अश्मेन लवणे तोये निक्षिप्य वाधयेन्नतः ज्वरतप्तप्रतिकृतेर्हृदये वदने नासि किंचित्किंचित्क्षिपे-
तोयं दद्यात्कारस्करोत्थया आग्नेयपुच्छरं मंत्री सो विराजयतो भवेत् कथितेऽभ्युक्षिते शीतादम्भसा छत्रमयात्ततः नीलामेर्हे नसं-
लिप्ता शत्रोः प्रतिकृतिं निशि तापयेद्दधिते वक्षोमतिलोमं मन्त्रं जपेत् ज्वरेण वाध्यते सद्यो मासादस्य यातिर्भवेन्मः सामुद्रेसलिले
हिंगुविषं जीरकलोडितं क्वाथितेपु तलीसाध्यन तत्र नरु निर्मितां अधोवक्त्रां विनिक्षिप्य पश्चाद्विषतनूत्थया तानि विरलेदनं कुर्या-
जयेदस्त्रं विलोमतः सम्माहात्म्यरणं याति शत्रुर्ज्वरविमोहितः आदित्यरथनागेंद्रग्रस्तां चित्रतद्विषाहतं नग्नैतैलेन लिप्तांगं दग्ध-
सायुमरीचिभिः अधोमुखं निजरिपुं ध्यात्वा कथितवारिणा नष्येन्द्रानुमालोकाय शत्रुहृत्तस्त्रप्रियो भवेत् बिभ्रती सप्तपालं मूलं ध्यात्वा

दुर्गां प्रियंकरी कार्पासबीजे निंबस्य पत्रैर्महिषीघृतप्लुतैः हुत्वा विद्वेषयेच्छत्रून् अनेनाणेन देशिकः विश्वाणेन तर्जनीमूलं ध्यात्वा दु
र्गां प्रियंकरी महिषीघृतसंप्लुतैः पलवैर्विषवृक्षजैः हुत्वा रिपोः त्वणात्तेनामुत्पाटयति मंत्रवित् ध्यात्वा देवीं पुराप्रोक्तां चतुर्भि
र्मरिचान्वितैः ------- अजारुधिरसंयुक्तैश्च जुहुयाद्दिवसत्रयं रिपोरुच्चाटनं कुर्यात्तेनायमनात्र संशयः अग्निमूलकरां दुर्गां ज्व
लंतीं प्रलयाग्निवत् ध्यात्वा पाषंपतैलाक्तैर्बीजैर्धत्तूरसंभवैः हुत्वा विमोहयेच्छत्रून् नारीश्चैव विशेषतः कालांजननिभां दुर्गां मूलव
द्धरां स्मरेत् नलत्रवृत्तसंभूतैर्व्राणहस्तेह लोलितैः सुसिद्धैः मज्जहुयाद्ध्यात्वा मासेन वैरिणः सिंहारूढां प्रधावंतीं धावमानारिपुं प्रति पा
शांकुशकनिर्मुक्तां वह्निज्वाला समाकुलान् मुंचंतीं संस्मरेद्दुर्गां तर्पयेद्दुग्धवारिणा भानुबिंबं समालोक्य रिपोरुच्चाटनं भवेत् अति
दुर्गां मयीं मुष्टिगदाहस्तां विचिंतयेत् विषवृक्षसमायातां महिषीघृतसंप्लुतैः जुहुयान्निशि यो मंत्री तस्य विश्ववशं नयेत् शरच्च
न्द्रनिभां देवीं विगलत्परमामृतां पाशांकुशधरां ध्यात्वा सिंधुं दुर्गां समिद्वरैः चेतसैर्मधुरासिक्तैर्जुहुयाद्ध्रिसिद्धये कपालं त्रिशिखं बिभ्र
तीं करैः जपाकुसुमसंकाशामग्निदुर्गां विचिंतयेत् हुत्वा लवणपुत्तल्यां मधुरत्रययुक्तया आकर्षयेद्वांछितार्थान् मंत्रवित्रात्रसंश
यः अतिदुर्गेयमित्याद्याफडंता त्रिष्टुब्वीरिता ऋवर्णाग्ना चगणपाद्याणाणिदुर्गा समीरिता विषाद्याणपत्तरांता साविषदुर्गा समीरि
ता सिंधुध्यासावकारांता सिंधुदुर्गाभिधाजने [illegible] अग्न्यादिकामेनाम अग्निदुर्गां विदुर्बुधाः अंगणोस्युष्टिलं कृत्वा ह गंधिकु
सुमादिभिः देवीमभ्यर्चयेन्नित्यं प्रागुक्तेनैव वर्त्मना आहरेद्द्वात्रिंशद्बलं चरणान्यसिद्धये कुष्ठारोगग्रहद्रोहभूतादीन्नाशयेद्ध्रुवं
यथावदग्निमाराध्य गंधपुष्पैर्मनोहरैः स्थित्वा तस्याग्रतो मंत्री जपेन्मंत्रमनन्यधीः जपोयं सर्वसिद्धिस्यान्नात्र कार्या विचारणा ले
वणैर्मधुरासिक्तैर्जुहुयात्पश्चिमामुखः मंत्राणि सप्तयामंत्री रिपुमात्मवशं नयेत् पानीयतात्मसंयोधमद्रान्कुर्वीत तण्डुला
न् जपित्वा पंचगव्येषु संस्कृते हव्यवाहने चरुं पचेज्जापमंत्री मवतार्य पुनः सुधीः अर्चयित्वा विधानवधीर्देवीमग्नौ यथा पुरा जुहु

वि॰या॰ २२
व॰
४६२

462

याज्यरूपेणानेन साज्येनाष्टसहस्रकं पात्रे संपातितं कुर्यात् साध्यस्तत्र्या प्रायेत्नरः शिष्टं तन्निखनेद्द्वारि संपातं प्रांगणे नरे कृत्वा रोमा
विनश्यंति सहभूतग्रहासुरैः पैरुद्भ्यादिना कृत्वा पुनस्तानेव भक्षयेत् व्रीहिभिर्हविषा तीरैः पयोहुतसमिद्वरैः आज्येन मधुत्रयोये
तैरेतैरेकशतं पृथक् जुहुयात् संपदां भूमिसाधको भवति ध्रुवं भास्करे मेषराशिस्थे मंत्रज्ञे कृष्णे दिने नद्याः समुद्रगामिन्याः स्ना
त्वा मंत्री यथाविधि उद्धृत्याद्यां सिकतां संशोध्य परिशोधयेत् न्यस्येताः पंचगव्येषु संस्नाते हव्यवाहने भक्षयेत्तनुनासिद्धेद्र
व्याव्यस्त तत्कृत्या सिंहमेषधनुस्थे वै हस्तपत्ते समीतथा विशाखाकृत्तिकामूलहस्तोत्तरमघेष्वथ रोहिण्यां श्रवणे वारे संदेवा
कृतिदेवता विहायान्येषु कुर्वीत सिकतास्थापनं सुधीः गृहग्रामादिराष्ट्राणां रक्षार्थं सिकताः शुभाः मत्स्यादिकच्छपोन्माना
मध्यादिषु पदेष्विमा नवसु प्रक्षिपेज्जाले शुभं संयोजयेत् क्रमात् मध्यादिदेवीमस्त्राणि कपालांतानि देशिकः चक्रं शंखमसिं खे
टं वाणं चापं त्रिशूलकं कपालं सर्वमंत्रेण संपूज्यांते वलिं हरेत् नतत्र ग्रहराक्षसोनांलोकेशानां वलिं हरेत् विहिताग्रहरले
वर्द्धंते तत्र संपदः न तत्र ग्रहसंचारश्चौरभूतसरीसृपाः अशुनाविलयंयांति विधिनानात्र संशयः सिकतानां विमुह्यानां विकार
कुड्वं सुधीः पंचगव्यप्लुते पात्रे वल्कलेनाणनिर्मिते निक्षिप्य विधिना पत्रस्थापयेत्तत्र संपदः दिने दिने प्रवर्द्धंते कालवृष्ट्या
दिभिः सह महोत्पाता विनश्यंति कृत्वा द्रोदसमायहाः चर्म हृद्व्यात्मनो कुर्यात् स्थापनं विधिना पुनः गोमूत्रं प्रस्थमानं स्यात् गो
मयं भस्तदर्द्धकं आज्यात्तमष्टांशं क्षीरं गोमूत्रात्त्रिगुणं दधि गोमूत्रेण समं सर्पिः सर्वं वा सर्वमुच्यते गावः स्युः कपिला श्वेत
श्यामधूम्रारुणप्रभाः अभावे गद्दिताः सर्वाः सर्वं वा कपिलोद्भवं एकोनपंचाशत्कोष्ठे फलके व्रतशाखिनः विहाय कोणको
ष्ठानि षट्कनाव्ये जातवेदसं लिखित्वा मध्यकोष्ठादिष्वर्जयेत्तत्र देवता हुत्वा होमं ससंपातं निखनेत्तद्यथा पुरा दद्याद्वलिं यथापूर्व
मस्मद्वौक्षितं फलं मध्ये मायामष्टकोष्ठेषु पादान् होतॄन् कृत्वा मातृकार्णैः प्रवीतं भूविवस्यं सर्वभूतानामपनेरत्नायुः श्रीकीर्तिदं य

त्रमेतत् अग्नेयास्त्रस्य ज्ञानातिविसर्गादानकर्मणि दानकर्मणि · यः पुमान् ग्रहणाशिष्यस्तस्याधीनं जगत्त्रयं इति श्रीविद्यार्णवे द्वाविं
शतितमः श्वासः ॥ २२॥ अथ दीनास्त्रकृत्यास्त्रं वक्ष्ये शत्रुविमर्दनं अतिदुर्गमं तु प्राज्ञ दीनास्त्रमंत्रवित्तमः प्रतिलोममिमं मंत्रं कृत्वा ।
स्वं च प्रचक्षते दीनास्त्रस्य षडंगादीन् प्रतिलोमेन दिनाविदुः भानुबिम्बगतं शत्रुं मयोवक्त्रो विषाहतं मूलाङ्कहृतया ग्रस्तं कृशं ज्वालाभा
वयन्बुधीः मूलाधारेति पेत्स्यधः प्रस्फुरत्कालपावके दितत्रयाज्वराक्रान्तो रिपुर्यमपुरं प्रजेत् दीनास्त्र प्रति विद्धांगं स्वाधिष्ठानग
तं रिपुं पंचवायुसमिद्धे सौवह्निनादग्धविग्रहं ध्यायेन्मंत्रं जपेत्स्यधः समवेद्यमवल्लभः मणिपूरगतं शत्रुं मग्निनादीप्तविग्रहं दीनास्त्रं
जपेत्स्यधः सप्तसु ग्रस्तं तां व्रजेत् अनाहताहितः शत्रुर्निर्दग्धो मंत्रवह्निना · पाशेन बध्वा शीघ्रेणानीयते यमकिंकरैः विशुद्धस्था
नगो वैरी दीनबाणेन पीडितः अधोमुखं स्मरंती तीणि पराशः स्याद्धि मंत्रयात् आज्ञायां निहतं शत्रुं दद्दे दीनाग्निनाधिया पुत्रमित्रकलत्रादी
न्हित्वा मृत्युमुपाश्रयेत् नाभिमात्रोदके स्थित्वा ध्यायन्विवेदिने शिव वैरिणं दग्धसर्वांगं मंत्रमष्टोत्तरं शतं जपेत्सप्तदिनादर्वाग्यमलोकं स ग
च्छति आदित्यवारं समारभ्य सप्ताहं प्रजपेन्मनुं · सूर्योदयं समारभ्य यावदस्तमयो भवेत् सन्निपातज्वराविष्टो यमग्रस्तो भवेदरिः स्थित्वा ड
गान्तये मंत्री त्रिरात्रं वर्जिताशनः दीनबाणेन विद्धांगं वैरिणं प्रतिचिंतयेत् जपेन्मंत्रमिमं शत्रुर्ज्वरितो मरणं व्रजेत् स्पृष्ट्वा दुर्गां जपेन्मंत्रम
नन्यधीर्दिनं स्मरन् मूलप्रोतं निजरिपुं दीनास्त्रेणाभिदीपितं ज्वरेण महताविष्टो जायते सो यमातिथिः रविमण्डलगं शत्रुं दग्धं तीव्र विप
त्रयोः विषाग्निदग्धसर्वांगं ध्यायन्नुत्तस्त्रिवारिणा नर्ध्ये येहीनबाणेन स्यादसौ यमवल्लभः रवि बिम्बादागतया ज्वालया ग्रस्तविग्रहं
रिपुं ध्यात्वा जपेन्मंत्रं समंत्रीडत्रियमांतिके यद्ययुक्तार्कविंबस्थं विद्धं परमयेषु पारैः प्रतिपद्य निगंशात्रं तज्ज्ञेन्याभीमरूपया दंष्ट्राभ्या ।
सुवज्ञालेन अश्नेत यन्ती दिगंतरं शूलेन वैरिणां वक्षो दारयन्ती भयंकरी जपेद्दिनत्रयं मंत्री मारयेद्रिपुमात्मनः अस्त्रमंत्रकृतं न्यासः प्र
तयाग्निसमप्रभां रक्तवस्त्रधरां क्रुद्धां रक्तनेत्रत्रयान्वितां सिंहाधिरूढां धावंतीं रिपुं प्रति विकृताननां छिन्नशिरच्छित्वा तरणहोमस्थलंगतां ध्याना

विद्या० प
व०
४६२

463

दुर्गां जपेन्मंत्री दिनैर्वर्जिताशनः अनेनैव विधानेन रिपुर्मृत्युवशो भवेत् कर्माण्येतानि कुर्वीत दिवसेन न रात्रिषु ते त्रिकोणं न्यसाध्य
नामसाध्यतामसमन्वितान् अङ्गारकेन संलिख्य नृकारस्करसमिद्वरान् सहस्रं जुहुयाद्देवीं ध्यात्वा सवितृमण्डले प्रलयाग्नि
समां घोरां द्वात्रिंशद्भुजशोभितां उग्रदंष्ट्रां धवलदीप्तां नृत्यन्तीं शिवहस्तके महादंष्ट्रां महारौद्रां महाभीमां ज्वलत्केशीं नदन्मुखीं र
क्तां त्रिमांसवदनां घूर्णितोर्ध्वत्रिलोचनां अनेन विधिना शत्रुर्महाज्वरनिपीडितः विमुञ्चति निजं देहं पुत्रमित्रादिभिः सह ऊर्द्धमुखा
महोमंत्री लेखयित्वा भुजंगमे भानुविंवरातं दुर्गां सहस्रादित्यसन्निभां सहस्रपाणिचरणां सहस्राक्षिशिरोमुखीं सहस्रनागसिंहां ।
गीत्रासयन्तीं जगत्त्रयं ध्यायन्ननेन सर्पास्ये पूर्णयेद्दुस्तवारिणा संयतः कालपाशेन वैरी मुञ्चेत्स्वजीवितं मध्याह्ने कं पुत्तमसत्वा(?)
नेत्रंतीं नरसिंहवत् घोरसिंहसमासीनां महाभीषणदर्शनां मूलमंत्रेणाहितां ध्यायन् जपेन्मंत्रमनन्यधीः तर्पयेद्दुग्धतोयेन सर्वथैव
क्रोदिनत्रयं यमस्य भवने गच्छेदरातिर्नात्र संशयः कार्द्दमं प्रतिकृतिं प्रतिष्ठितसमीरणां उलूकोरके विनिक्षिप्य विषाग्नौ विधिना
ततः अर्केन्द्वनिलसंकाशं खड्गखेटकधारिणीं नयनत्रयनिर्गच्छद्विस्फुलिंगगणाकुलां सिंहस्थां सर्वभूषाढ्यां त्रैलोक्यभयकारि
णीं खड्गकृत्ताहितां ध्यायन्नजपेदयुतं मनुं विधानेन शत्रुर्नष्टो भवति मृत्युना प्रकल्प्य दुर्गायतने त्रिकोणं कुण्डमुत्तमं अत्र संज
निनैव कौमहिषीणकलाकृतां पुत्तलीमजरक्तां प्रतिष्ठितसमीरणां छित्वा छित्वा प्रजुहुयादजरक्ताविलानि ध्यात्वा दुर्गां प्र
नृत्यन्तीं महिषोरस्थलान्तरे मूलेन महिषस्यांगं भिंदन्तीं घोरदर्शनां अट्टहासैर्जनस्तोभ्यां भीषितां सुरसेवितां प्रलयानलसंकाशां
भ्रमन्नेत्रत्रयान्वितां संदष्टाधरसंभिन्नां रौद्रां भीषणाङ्कां तजां खड्गखेटकयुक्ताभिः कन्यकाभिः समावृतां अनेन विधिना शत्रुः प्रया
ति यममन्दिरं दिनानामेवं विधितं शत्रुनिग्रहकारणं कृत्याविचोदितां कुर्यात्प्रयोगान् मंत्रवित्तमः आपाण्डुकृत्तां देवीं कुण्डलीस
क्तिरूपिणीं सुषुम्णारंध्रमार्गेण यान्तीं व्योमस्थलेततः सुखेन शत्रुमादाय निहन्तुंस्मरेद्ग्रसति जलकालानले दीप्तां विचिंत्य प्रजपेन्म

त्तुं समाभिकीसरैः शत्रुर्मृत्युमाप्नोति मोहितः अंगारवारे चिताग्नौ शार्धपत्रे हलोद्धृतं सिद्धार्थं कुडवेन मंत्रं जुहुयात् तन्मात्रतः कृत्वा
स्वज्वालया दग्धो रिपुर्यमपुरं व्रजेत् चतुर्दश्यामर्द्धरात्रौ चितास्थीन्यष्ट साधकः श्मशानतैलविलिप्तानि चिताग्नौ जुहुयात्ततः अनेन वि
विधिना शत्रुर्मृत्युमेष्यति कालतः तथास्थिनिर्मितां शत्रोर्वणातैलपरिप्लुतां प्रतिमां स्थापयित्वा प्राणान् जुहुयात्त्रिशिखि साधकः छित्वा
छित्वा ज्वरकेन समाहान्म्रियते रिपुः श्मशानदारुकाष्ठैश्च ज्ञात्वा ज्ञानपुत्रं जपेत् विकिरेत्तास्तगंगादौ कृत्वा स्नात्वा काष्ठितं जले
न दीयपीतम चिरात्रिहंति सकलान् जनान् कृष्णांगारचतुर्दश्यां प्रजप्तैः प्रेतभस्मभिः मद्दिग्धाज्येन ललितैस्तलं पादरसाद्ये
या निर्माय पुत्तलिकां मेनोमयज्जनमसमीरणं चितिकाष्ठैर्थिते वह्नौ जुहुयाद्दह्यमानमसः चतुर्दश्यां त्र्यादर्वाक् शत्रुर्मृत्युप्रियो
भवेत् श्मशानभस्मसिद्धार्थं पंचगव्यैर्विलिप्य लिपेत् महिषं मस्मारन्द्रे वीकालाग्निसदृशप्रभां सा सेनावकस्थाभित्रो ज्वररोगविमो
हिताः आयुधानि परित्यज्य युद्धकाले पलायते गेहग्रामादिपुत्तलिं संकुर्यादुच्चाटनं ततः ततः समारवारे पुत्तलिकाउगावे श्मशानस्य पार्श्वकेराः
समसमादंष्ट्रदिग्वर्त्मगृहीत्वा प्रजपेत् स्वयं माहिषीपंचगव्येषु भर्जयेत्तां यथापुरा भूयो जप्त्वा विकिरेत्तस्य नामपुरेष्विमाः सदेशान् च्युति
तिप्रद्वेगयो मंत्रभवाग्निना ज्वलदंगां मर्कटिकां करकोशनिकात्रयं भौमवारस्य पुत्तलिके गृहीत्वा प्रजपेन्मंत्रं सार्धपुत्रकलत्राद्यैरुच्चा
टो जायते रिपोः एकैकं वा जपेन्मंत्री भ्रमणलालात्फलं लभेत् षड्विंशद्व्रणपुत्तल्यानि व्रणेदोदनायुतं स्वच्छान्तो प्रजपेद्रसं कृष्णाष्ट
म्यां निशार्द्धतः शत्रुनामसमायुक्तं श्मशाने निखनेदिमाः प्रणश्यति रिपुः पौत्रसकुटुंबः सबांधवः कपालपाकलात्मंत्री कृत्वा
स्वात्तरसंख्यकान् संस्थाप्य जपेन्मंत्रं प्राणस्थापनपूर्वकं कृष्णांगारचतुर्दश्यां श्मशाने विषवृक्षजे ज्वालयापादजरकाकाकृत्वा स्व
ज्वालयाहृतः रिपुर्यमपुरं गच्छेन्महाज्वरविमोहितः अजारक्तेन संपूर्णां कलशो निहितां पेतर्दं कपालेन पिधायैतं छादयेद्रक्तवाससा
पूजयेद्रक्तपुष्पाद्यैः सप्तवारमयुतं जपेत् भौमवारे निशामध्ये कारसमेधिते श्मशानवह्नौ जुहुयाद्गच्छेद्यमपुरं रिपुः साधन

विद्या० २२
व०
४६४

464

तत्रवृत्तेऽग्नौ कृत्वा कुंभं प्रपूरयेत् माहिषैः पंचगव्यैस्तं विशालं तत्र निक्षिपेत् जपपूजादिकं सर्वं यथापूर्वं समाचरेत् कारस्करभवे
वह्नौ कृत्वा खाण्डप्रपूरिते अमृतं व्रणतैलेन कृत्वा तेन च पुनः आमलकं समुद्धृत्य जपन्मंत्रमनन्यधीः जुहुयाद्विधितानेन त्रिदि
नैर्म्रियते रिपुः मांसं महिषीवत्समेकरात्रमुपोषितं पाययेन्महिषीमर्ध्यैः प्रस्थं मंत्रेणामंत्रितं कुशैर्वीमिद्ध सर्वांगं स्थापितं प्राण
मंजसा कारस्करैधिते वह्नौ व्रणतैलेन मंत्रवित् होमं कृत्वा घृतं वत्सं जुहुयाद्यतमानसः एकेन दिवसेनारिर्गच्छेद्यमपुरं स्फुवि त्रि
कोणकुण्डसहिते वह्नौ मंत्रेण दीपिते अर्चिते गंधपुष्पाद्यैर्युतं जुहुयात्क्रमात् राजभल्लातकतिलतैलसमन्वितं ततः प्रसूतिस
मयं प्रासां मां महिषीं स्थापितानलां पूजितां गंधपुष्पाद्यैः स्पर्शान्कृत्वैनतां जपेत् मस्तकाद्योनिपर्यंतं धियावत्समनुस्मरन् आकृ
च्छ्य हस्ते पतितं जुहुयादेधितेनले एवं कृते समुत्पन्नाकृत्यादीमाकृतापानात् भक्षयेच्च विराच्छत्रुमोक्षेणाग्निरहितं पुनरग्नौ
विशन्त्येषा कर्त्तारमथ कात्तिणी एवंविधानि कर्माणि यः कुर्यान्मंत्रवित्तमः स जपेदात्मरतार्थं मंत्रान्संस्तुं जपादिकन् अथ
लवणदुर्गामंत्राः एषां श्रीलवणदुर्गामंत्राणां अंगिरस ऋषये नमः शिरसि अनुष्टुप्छंदसे नमः मुखे श्रीराद्रिदुर्गाभद्रकाली
देवताभ्यो नमः हृदये क्रीं बीजाय नमो गुह्ये क्रौं शक्तये नमो जान्वोः ॐ कीलकाय नमः पादयोः मम सकलजनवश्यार्थं जपे विनि
योगः ॐ चिरिचिरिदिहवयाय नमः चण्डालिशिरसे स्वाहा महाचण्डालिशिखायै वषट् अमुकमेववशायफट् वशमानय नेत्रत्रया
यवौषट् स्वाहा अस्त्राय फट् एवमंगुलीन्यासः ॐ ॐ नमो मूर्ध्नि ॐ चिं नमो भाले ॐ टं नमो दक्षनेत्रे ॐ चिं नमो वामनेत्रे ठिं नमो
दक्षकर्णे ॐ चं नमो वामकर्णे ॐ डं नमो ॐ दक्षनासिकायां लिं नमो वामनासिकायां ॐ नमो मुखे ॐ ह्रां नमश्चिबुके ॐ नमः कंठे ॐ ड़ं
नमो हृदि ॐ लिं नमो दक्षस्तने ॐ अं नमो वामस्तने ॐ ग्रं नमः कुक्षौ ॐ कं नमो नाभौ ॐ सें नमो दक्षकट्यां ॐ वं नमो वामकट्यां ॐ
षं नमो मेढ्रे ॐ मां नमः पार्श्वयोः ॐ नं नमः ऊरुद्वये ॐ यं नमो जानुयुगे ॐ स्वां नमो जंघायुगे ॐ हां नमः पादद्वये इत्यक्षरन्यासः

ध्यानं नवकुंकुमसन्निभं त्रिनेत्रं हविराकल्पशातनमामि वह्निं स्रुचपाणिं वराभयानि वोभिर्दधतं रक्तसरोरुहे निषण्णे १ कलांबु
वाहद्युतिमिंदुवक्त्रां हारावलीपीनमियपयोधराढ्यां कपालपाशांकुशमूलहस्तां नीलांशुकां यामवतीं नमामि २ नीलांजनाभा
सरिशिखिमूलखड्गाग्रहस्तानरुणीं डचोडां भीमां त्रिनेत्रां जितशत्रुवर्गां दुर्गां भजे दुर्गतिभंगदात्रीं ३ टंकं कपालं डमरुं त्रिशूलं सं
बिभ्रती चंद्रकलावतंसा पिंगोर्ध्वकेशी जितभीमदंष्ट्रा भूयाद्विभूत्यै मम भद्रकाली ४ इतिध्यात्वाग्निकोणे चक्रे जपं सप्तलक्षमाज्ययुतं तत
द्दशांशतः हविषाज्यसिक्तेन जुहुयाद्विहितेनले एवं कृतपुरश्चर्यः प्रयोगेक्षमो भवेत् अग्निर्यामवती ध्येये वश्याकर्षणकर्म
णि स्मरेद्दुर्गां भद्रकालीं मंत्री मारणकर्मणि बालेंदुमूर्त्तिर्वो न्यायगुरुनमस्कार स्थान संध्या मातृकान्यासः पात्रासादनांतकर्मस
माप्य पीठमंडूकादिकमलांतं संपूज्य केसरेषु पूर्वादिषु दिक्षु मध्ये च पीठशक्तीः पूजयेत् भीषणी वक्त्रा रूपावती तारा दंष्ट्रा महो
त्कटा सारणी मोहनी कांता कमंडलुधरा परा इतिक्रमेण भीमे ऐं नमः एवं क्रमेण संपूज्य तत्कर्णिकायां ॐ ह्रीं आधारशक्ति
कमलासनाय नमः इति पीठमंत्रं विन्यस्य तदुपरि षट्कोणाष्टदलकमलभूपुरद्वयं यंत्रं विभाव्य मध्ये इष्टदेवतामावाह्य षोडशोप
चारैः पूजां कृत्वा षट्कोणेषु पूर्वादि ॐ विटि विटि हृदयाय नमः इति रीत्या षडंगानि संपूज्य अष्टदलेषु पूर्वादि मूलहस्ता विकेशी व
दारुणा लवणप्रिया परा कराला न्यस्तु शांता मसी चाष्टशक्तयः ॐ स्रुं मूलहस्तायै नमः इतिरीत्या संपूज्य केसरेषु पूर्वादि ॐ उक्त
द्रो विकटा तस्य मूलहस्तो महाबलः अग्निजिह्वश्चपरः कपाली तारणप्रियः ॐ उं उक्तटाय नमः इति रीत्या संपूज्य पत्राग्रेषु पूर्वादि
ॐ आं अं असितांगभैरवसहितब्राह्म्यै नमः ॐ इं ईं रुरुभैरवसहितमाहेश्वर्यै नमः ॐ उं ऊं चंडभैरवसहितकौमार्यै नमः ॐ ऋं ॠं क्रोधभैरवसहि
तवैष्णव्यै नमः ॐ लृं लॄं उन्मत्तभैरवसहितवाराह्यै नमः ॐ एं ऐं कपालभैरवसहितेंद्राण्यै नमः ॐ ओं औं भीषणभैरवसहितचामु
ण्डायै नमः ॐ अं अः संहारभैरवसहितमहालक्ष्म्यै नमः इति संपूज्य भूपुरे लोकपालान्संपूज्य वह्निवज्राद्यायुधानि संपूज्य इति ष
डावरणसहितमिष्टदेवतां संपूज्याष्टोत्तरसहस्रं जपित्वा गुह्याति मंत्रेणानेनो हृत्पंकले देव्या हस्ते समर्पयेत् दशसहस्रजपपुरश्चरणं

विद्या॰ ५२
व॰
४६५
465

ज्ञा

साज्येन हविषा दशांशेन होमः अथ लवणमंत्रस्य विधानमभिधीयते॰ अथर्वणाः कथिता पूर्वं लवणो भद्रकालिका लवणादि द्वि
तीयास्मा इह ह्याथर्वपरिकीर्तिताः संदग्धाथ्याचतर्थ्यास्याद्याते पूर्वादिपंचमी अंगिराख्यान ऋषिर्होत्र ह्रदुदाहृतः अंगिरोत्रिपुनर्दुर्गा
भद्रकाली च देवताः विदितमंत्रास्तैः कुर्यात्सडंगानि समाहितः पंचभिर्हृदयं प्रोक्तं त्रिभिर्वर्णैः शिरः स्मृतं पंचवर्णैः शिखा प्रोक्ता
कवचं करणान्तरैः पंचभिर्नेत्रमुदितं षड्गलेनास्त्रमीरितं तारश्चिदिहृद्यं यच्च अणालीनदनेनतरे मद्रत्यद्यायानां शूयादस्यकमेतत्ततः परं
वर्णामानयष्ठद्वंद्वं चितिमंत्र उदाहृतः चतुर्विंशात्यत्तरात्मा सर्वकामफलप्रदः नवकुंकुमसन्निभं त्रिनेत्रं हविराकल्पशान्तं नमामि वह्नि
सवर्णांक्षि वराभयातंकानि दोर्भिर्दधतं रक्तसरोरुहे निषण्णं १ कालांबुवाहद्युतिमिंडवक्त्रां हारावलीर्णोभिपयोधराढ्यां कपालपाशां
कुशशूलहस्तां नीलांशुकां यामवतीं नमामि २ नीलांजनाभामरिशंखशूलखट्वांगहस्तां नरशीर्णडित्तूडां भीमां त्रिनेत्रां जितशत्रुवर्गां
दुर्गां भजे दुर्गतिभंगदक्षां ३ टंककपालडमरुत्रिशूलं लसंबिभ्रती चंद्रकलावतंसा पिंगोर्ध्वकेशी जितभीमदंष्ट्रा भूयाद्विभूत्यै मम भ
द्रकाली ४ अर्कं चक्रं जपेत्सम्यगयुतं तत्दशांशतः हविषा हुत मिश्रेण च्चऋयाद्दीप्तेनले पेवं कृतपुरश्चर्याः प्रयोगे कुशलो भवे
त् अग्नियामवनीपेपेवश्याकर्षणाकर्मणोः स्मरेद्दुर्गां भद्रकालीं मंत्री मारणकर्मणि नाभिमात्रे सलिले स्थित्वा निशि जपे
न्मनुं अनेन वांछितः साध्यः किंकरो जायते चिरात् नाभिमात्रोदके स्थित्वा जपेन्मंत्रमिमं सुधीः अष्टोत्तरसहस्रं यस्तस्य सा
ध्यो वशो भवेत् अर्कं चक्रं जपेन्मंत्री कंठमात्रोदके स्थितः सप्तभिर्दिवसैर्भूपा द्वशायेद्विधिनामुना॰ विलिख्य तालपत्रे तं
साध्यनामविदर्भितं निक्षिप्य क्षीरसंमिश्रे जले तत्क्वाथयेन्निशि वश्यो भवति साध्योऽस्मिन्नात्र कार्या विचारणा तालपत्रे लि
खित्वैवं भद्रकालीगृहे खनेत् वश्याय सर्वजंतूनां प्रयोगोयमुदाहृतः ताम्रपत्रे समालिख्य मंत्रं साध्यविदर्भितं संतापनत्वादि
रेव क्षोमासाहृष्णे भवेन्नरः त्रिकोणकुण्डमावाह्य समाकर्णाक्षोक्तलवणं तस्मिन्होमं प्रकुर्वीत संस्कृते हव्यवाहने मध्यस्य
गव्यहृदयेन संशोध्य लवणान्सुधीः सहस्राणि ततस्त्रयास्समाहाहृशायेज्जनात् दधिमध्वाज्यसंमिश्रैः सैंधवैर्जुहुयात्ततः वश्ये

स्सकलान्वेशानविराजितमुपार्थिवान् विशुद्धलवणंप्रस्थं विभज्य पंचधा पृथक् एकैकया प्रजङ्घया हवाद्स्मादयात् यस्यनाम्ना
सवर्णेनोत्पादनेनैव तत्संप्रायः शुद्धं लवणमादाय जङ्घया मधुरान्वितं ऊनपंचाशदाकृत्या वर्णं नयति वांछितं नित्यशुद्धेन लोणेन कृ
त्वाषानूनवर्णं नयेत् मधुरत्रयसंयुक्तैर्लवणोत्साद्य चूर्णितैः जङ्घया द्वशयेच्चारीन राजरमणीनपि मंत्रकृत्सत्ततीपादिमजयेद्यावदष्टमी
पुत्तलीः पंच कुर्वीत सांगोपांगाः समाः शुभाः एकाशाध्यष्टुमेणास्मादन्यापिष्टमयीधुरा चक्रिदस्तमृदान्यास्मादस्यासिष्टमयीस्त्र
ता लवणंपीतसंभूतं चूर्णितं परघृणोधितं कुङ्कुंचपीतयेत्क्षीरदध्याज्यमधुभिः क्रमात् गुडाज्यमधिभिः सम्यक् मिश्रितेनामुनात
तः कुर्वीत पुत्तलीं सौम्यां सर्वावयवशोभितां प्राणमंत्रकृतं यंत्रमासां हृदि विनिक्षिपेत् आम्युप्राणान्प्रतिष्ठाप्य पूजयेत्कुसु
मादिभिः पश्चात्कृष्णाष्टमीरात्रौ याममात्रगते सति विधाय मातृकान्यासं मंत्रन्यासमनंतरं चिटिमंत्रसमुद्भूतान् चतुर्विंशतिसं
ख्यकान् तारायान्विन्यसेद्वर्णान् स्थानेषु समाहितः मूर्ध्नि भाले दृशोः श्रुत्योर्नासास्यचिबुकेषु च कंठे हृत्स्तनयुग्मेषु कुक्षौ ना
भौ कटिद्वये मेढ्रपायोः प्रविन्यस्य शिष्टवर्णांश्च तत्पुरः ऊरुद्वये जानुयुगे जंघायुग्मे पदद्वये एवं विन्यस्तसर्वांगो रक्तमाल्यानुलेप
नः रक्तवस्त्रधरः शुद्धः पुत्तलीं दारुणाकृतिं अधोमुखीं विनेत्कुण्डिवृतजामीसनादधः मन्मयीं प्रतिनापादेशे न्यसेत्तदात्मनः
मध्यछिद्रमयं योनिकुण्डसो हुं प्रलंबयेत् लवणेनकृतां पश्चात्पुत्तलीं संस्पृशन् जपेत् अष्टकं वकं यथान्यायमष्टोत्तरसहस्रकं से
हृत्यचिटिमंत्राणान्युतन्यस्तास्थाने न्यसेत् अंगुष्ठसंधिमदंजे चाजानूरुपायुषु लिंगदेशे तु नाभौ जठरे हृदयांबुजे स्तनद्वये कंठको
यांचिबुके वदने पुनः प्राणयोः कर्णयोर्युग्मे ललाटे मूर्ध्नि निक्रमात् तत्प्रतिमाप्रमाणं आयामः पादयोस्तस्याश्चाक साद्धतरंगुलं पा
दोनहृद्युगलाकुतिलवदेवांगुलोदरं अयुलद्वयमावक्राकंठदेशप्रमानकं शिरसो वर्तमाणं स्यात्सार्द्धहृदयमिहांगुलं इति द्वादशांगुल
प्रमाणप्रतिमेत्यर्थः आग्निमादाय संदीप्य साधन तत्र दारुभिः अभिमंत्र्यार्च्य मंत्रोक्तां देवतां रूप्यपात्रके कुर्यान्न राजपुष्पार्घ्यं दत्वार्चं

विद्या.२२
व.
४६६

466

प्रणमेत्सुधीः मंत्रैरेतैः प्रयोगादावंते संपूजनमानसः त्वमनेनाप्यमित्रघ्न निर्वाणायां हव्यवाहने हविषा मंत्रजप्तेन तृप्तो भव तथा सदः जा
तवेदाः सहदेवेन मात्तां नूनदभ्रम स्वाहायते विश्वमहत्पलवर्णादहशात्रुवत् २ ईशो पार्वतीं गिरिणा वीणीं ग्रस्त सुक्तं त्वया जगत् महादेवि
नमस्तुभ्यं वरदे कामराभव नमो मयि महादेवि महादेवसहव्रते त्रियामे पुरुषं दत्वा च प्रमानयेद्दवि मे ४ दुर्गे सर्गादिशुद्धिते दुर्गसं
रोधनाकुले चक्रशंखधरे देवि द्रुह शत्रुभयंकरि ५ नमस्ते दहशत्रूंमे वशमानय च गौरिके शाकंभरि महादेवि शरणागमे भवानये ६
भद्रकालि भवाभीष्टे भद्रसिद्धिप्रदायिनि मयत्वासे दहन दहन दहशोषय ताप्यय ७ मूलासि शक्ति वज्राद्ये रक्तास्योत्कृत्य मास्य
महादेवि महाकालि रक्तास्मान् त्राहि मालिके ८ साध्यं संस्थाप्य निर्मितपुत्तलीं समधानतः ऊकां च कंसमुद्धार्य जकूयादेधितेनले प्र
थमो दक्षिणः पादस्तकरस्तदनंतरं शिरस्तृतीयमाख्यातं वामहस्ततः परं ९ मध्यादहं पंचमं स्यादयोगः षष्ठ ईरितः सप्तमो वाम
भागस्थादेवभागक्रमस्ततः ११ मम समूहविभोगो वा प्रोक्तो बुधैर्यथाविधि ऊ विवमर्दयित्वा त्रिप्रणामेद्धाएड चतुर्नमः १२ यजमा
नो धनैर्धान्यैः प्रीणयेद्गुरुमात्मनः अनेन विधिना मंत्री वशयेद्धस्तयोः स्मरन् १३ किंपुनर्मनुजान्भूयान्मर्त्यान्वा रयोषितः
मारेण पूर्वसंप्रोक्तपुत्तलीकां च तद्वपुः निवेशयेद्यथापूर्वं साधकेंद्रो विधानवत् अपरां वत्समाणेन विधानेन प्रकल्पयेत् १५ का
हयारावनविट् तिलपूर्षणारामठैः व्रणकृत्रिवृसिद्धार्थ साध्यवामांघ्रिरेणभिः १६ माहिषामूत्रसंपिष्टैः पूर्वोक्तलवणान्वितैः वि
धायपुत्तलीं सम्यक्प्राणस्थापनमाचरेत् १७ जपपूजादिकं सर्वं कुर्यात्प्रागुक्तवर्त्मना ततः पूर्वोदितेकुण्डे रात्रौ प्रज्वलितेनले
दुर्गां वा भद्रकालीं वा समाराध्य यथाविधि धारयेन्निशितं शस्त्रं सम्यग्युक्तेन साधकः १९ वामपादं समारभ्य दक्षिणाप्रवसानकं
छित्वा छित्वा प्रजुहुयान्निराहारो जितेंद्रियः कृष्णाष्टमीं समारभ्य यावत्कृष्णचतुर्दशी अनेनैव विधानेन होमं कुर्याद्दिचतणः २१
त्रिसप्ताहप्रयोगेण मारयेद्रिपुमात्मनः अथ मंत्राः लवणं भसितीतोणस्त्वग्रोमिहृदयेतव लवणस्य पृथिवी माता तालवणस्य वरुणं

//

पिता॥ लवणो हूयमाने त्वकुतो निद्रा कुतो रतिः लवणं यच्चति पाच्चति लवणं छिंदति भिंदति अमुष्य दहगात्राणि दहमांसं दहत्व
चं दहत्वगास्थिमज्जानि अस्थिभ्यो मज्जिकां वह यदि वसति योजनशतेन दीनां वा शतांतरे ३ तं दग्ध्वानय मे शीघ्रमग्रे लवणतेज
सा नगरे लोहप्राकारे कुलसप्त्यकृतार्गले वशमायाति लवणमंत्रशक्तिपुरस्कृतः ४ यातेरात्रिः शल्यविद्धस्य मूलाग्रारोपि
तस्य च यातेरात्रिर्महारात्रिः मातेरात्रिर्महानिशा ५ एतेषु ऋगादिषु प्रणवान्तेयोज्य प्रणवपाशादि अहारादि चिटिमंत्रस्य समेत
ऋकं च चकं जपेत् अथवा सर्वेषु ऋगादिषु चिटिमंत्रादौ च आवरणदेवतादिषु च प्रणवपाशादि अहारादि चिटिमंत्र समेत ऋकं
चकं जपेत् अथवा सर्वेषु ऋगादि चिटिमंत्रादौ च आवरणदेवतादिषु च प्रणवपाशादि आहारे योजयेत् पिप्पलादमंत्रः अथ लव
णमंत्राः लवणाभक्षितिक्रोसि उग्रोसि हृदयं तव लवणस्य पृथिवीमाता लवणस्य जलं पिता लवणं दहति यच्चति लवणं छिंधि भिंद
ति लवणो हूयमाने त्वकुतो निद्रा कुतो रतिः अमुकस्य दहगात्राणि दहमांसं दहनलं दहत्वगास्थिमज्जानि अस्थिभ्यो मज्जिकां दहः
यदि वसति योजनशतेन दीनां च शतांतरे संदग्ध्वा च समे शीघ्रमग्रे लवणतेजसा यातेरात्रिर्महारात्रिर्महानिशा यारात्रिः शल्यविद्धस्य
मूलाग्रारोपितस्य च फौचिटि २ चण्डालि महाचण्डालि अमुकमेव षण्मानय स्वाहा इति लवणमंत्रः अस्यांगिरस ऋषिरनुष्टुप्छंदः अ
ग्निरात्रिर्दुर्गा भद्रकाली देवता मंत्रस्य हलो बीजानि स्वराः एकत्र यः लवणमसि लवणो हूयमाने दह त्वगस्थि संदग्ध्वा यातेरात्रिरित्येतैः
पंचमंत्रैः पंचांगानि अथवा चिटिमंत्रस्तैः पंचत्रिपंच चतुष्पंचद्विसोवाकैः क्रमात् षडंगानि ध्यानं अरुणोरुणपंकजसन्निहितः स
च शक्तिवराभयसत्करः अमितार्चिरजानगति विलसन्नयनत्रितयो वतनोदहनः १ नीलनतराभ्रककेशकलापा नीलनत्रनिवि
उत्तनभारा सांकुशपाशसशूलकपालाघासवतीभवतो वत्वनित्यं २ करकमलविराजच्चक्रपंखासिमूलापरिलसितकिरीटा
सातितानेकदेत्या त्रिनयनलसितांगी तिमिररश्मिप्रकाशा पवनसखविभांगी पातकात्यायनीनः ३ स्वरौद्रिस्मितदंष्ट्रिकात्रिन

यनोर्द्धकेशोल्वणाकपर्द्दमूलसद्रुमरुकाश्चिम्मूलोज्वला घनाघननिभाहणरुचिरकिंकिणीमालिकाभवद्धिभवसिद्धयेभवतु भद्रकाली
चिरं ४ अथतज्जपपुरश्चरणं अनेननियतस्त्रिसहस्रजपः पुरश्चरणं आज्यचरुणादशांशहोमः अष्टमीमारभ्य चतुर्दशीप
र्य्यंतंरात्रिषु प्रतिदिनंकुडुवपरिमितलवणचूर्णंमधुरत्रयोपेतेनरक्तोन्नतं ह्रिणंतंजुहुयात् एवंसप्तरात्रिहोमेनसाध्योदासवद्वश्ये
भवति प्रयोगकालेमंत्रस्यामुकपदस्थानेसाध्यनामनिहितम् जुहुयात्मजपेच्च साध्यनतत्रहृतास्तु कारस्करोयथा त्रीसाण्डडेवर
नरुः पुनः जंबूत्वादिरक्तसाख्योवंशपिप्पलसंज्ञकाः नागरोहिणीनामानौपलाशाललसंज्ञिकौ अंवष्टविल्वजंनाख्यविशाकत
महीरुहाः वकुलः शावरः संख्यावंजलः पनसार्क्ककौ शमीकदंवाम्रनिंबमधूकाश्चमाविन्नं अथान्नपूर्णेश्वरीमंत्राः सा ना
णीवे तारंचभुवनेशानिश्रीवीजंकामराजकं हृदंतेभगवत्यर्णान्माहेश्वरिपदंददेत् अन्नपूर्णेग्निजायांचविद्येयंविंशदक्षरीता
रे॰ प्रणव॰ भुवनेशानि॰ मायावीजं॰ हृन्नमः अग्निजाया स्वाहाकारः भगवत्यादिपदंस्वरूपं अत्रमाहेश्वर्यन्नपूर्णेतिपदयोः नसे
षिः विंशत्यक्षरात्मुक्तः तथा ऋषिर्ब्रह्मास्यमंत्रस्यानुष्टुप्छंदोभिधीयते अन्नपूर्णेश्वरीदेवीदेवतापरिकीर्तिता वीजंतुभुवने
शानि श्रीवीजंशक्तिरुच्यते कीलकंकामवीजंस्यात्षडंगानि ततःपरं दक्षिणामूर्तिः षट्दीर्घस्वरसंभिन्नाहृल्लेखाङ्करूपा
पार्वति एभिरंगानिविन्यस्य वर्णन्यासमथाचरेत् ब्रह्मरंध्रेचसीमंतेभालभ्रूमध्ययोर्नसि वक्त्रेकंठेचहृदयेकुक्षिनाभिषुलिंगके आधार
स्फिक्द्वयेचोरुद्वयेजानुद्वयेतथा पादयोर्देवदेवेशिनवद्वारेषुविन्यसेत् मूर्द्धादिगुदपर्यंतं पुनस्तेषुवरानने॰ गुदादिब्रह्मरंध्रांतं पुन
स्तेषुवरानने गुदादिब्रह्मरंध्रांतंपदानांनवकंन्यसेत् गुदः पर्यंतोदशमोयेषांब्रह्मरंध्रादिलिंगपर्यंतंनवपदानिविन्यस्य पुनर्गुदादिद
त्तेनजातानितान्येवपदानिन्यस्यमानीयानीतिब्रह्मरंध्राद्यहृदयमूलाधारेषुव्युत्क्रमात् चतुर्वीजानिविन्यस्यस्वरेषुन्यास्यविन्यसेत् गोलकंचत
तोदेवीविन्यसेद्विधिवत्प्रिये॰ गोलकंमूलेनव्यापकंन्यापकंन्यासंकुर्यात् देहस्यासिद्धयइति दक्षिणामूर्तिएकवाक्यात् स्वरेषुस्वरन्या

स्थाने षु· तप्तकांचनसंकाशां बालेंदुकृतशेखरां नवरत्नप्रभादीप्तमुकुटां कुंकुमारुणां चित्रवस्त्रपरीधानां शफरांतीं त्रिलोचनां स्तव
र्णकलशाकारपीनोन्नतघनस्तनीं नृत्यंतमीशानमनिशं हृष्टानंदमयीं परं सानंदमुखलोलाक्षीं मेखलाढ्यघनस्तनीं अन्नदानरतां नि
त्यं भूमिश्रीध्यानमस्तकां अन्नदानरतां नित्यं तेन वामहस्ते पात्रं दक्षिणहस्ते दर्वीधृतवतीति ज्ञेयं अथवा दक्षिणहस्ते देवीं ध्यायेत्स
वर्णजां दुग्धान्नभरितं पात्रं दिव्यरत्नविभूषितं वामहस्ते महेशानीति संहितोक्तेः ज्ञानार्णवे त्रिकोणं च वसुःपत्रं वसुपत्रं ततः
परं कलायत्रं च भूबिंबं सचतुर्द्वारमालिखेत् भूबिंबचतुरस्रत्रयात्मकं चतुरस्रत्रयं चक्रं कुर्यात् चतुर्द्वारोपशोभितमिति सम्मोहनपं
चराचरात् एतत्सर्वं देवतापरं ज्ञेयं सर्वेषामेवं विधातव्यं पूजाचक्रे षड्भूगृहमिति तत्त्वयमभिधानात् सिंहासनस्योपरितः पीठदेवीस
मर्चयेत् सिंहासने दक्षिणे तु कथिताः पीठनायकाः ताश्च पूजिताः पीठे वामाद्याः परमेश्वरि वामाद्याः शैवपीठप्रक्रमः अथ
वाः समभ्यर्च्य जयाद्यास्तु पीठशक्तीर्नवक्रमात् पीठं च पीठमंत्रेण हृल्लेखाद्याः प्रपूजयेत् इति सम्मोहनतंत्रवचनात् जयादि
नवशक्तीश्च पूजयेत् तदनंतरं इति सारसंग्रहवचनात् एवं क्रमभुवनेश्वरीपीठस्य जयादिनवप्रक्रमः तत्पीठमंत्रस्तु वाग्भाला
तथा एवं ध्यात्वा यजेद्देवीं षडंगावरणां यजेत् तारप्रासादबीजं च सदाशिवायततः परं सर्वतोदरीमहाविद्यासनपादे विपूजयेत्
गोक्षीरधामधवलं पंचवक्त्रं त्रिलोचनं प्रसन्नवदनं शांतं नीलकंठविराजितं कपर्दिनं स्फुरद्रत्नभूषणाभालसन्निभं नृत्यंतमी
स्थिरं देवं त्रिकालाग्रेश्वरेश्वरः ॐ नमः पदमाभाष्य ततो भगवते पदं ततो वराहरूपाय भूर्भुवःस्वः पतिस्तथा ॐ तत्स्वभूपतित्वं च
मे देहीति ददापय· वाक्शिवायांततो मंत्रो वराहस्य वरानने अनया विद्यया देवि वामकोणे प्रपूजयेत् ॐ नमः पदमाभाष्य ॐ तत्नाराय
णां लिखेत् नारायणं दत्तकोणे क्रमेणापरिपूजयेत् वामदक्षिणयोः पूज्ये भूश्रियौ परमेश्वरि एकेन मनुना देवी कथ्यामितवानघे· अ
नमोहृदयं चाप्यमे देसज्ञाधिपांतिके तयेमामात्रं संलिख्य प्रदापयेततः परं वाक्शिवायांतितो मंत्रः संपुटीकृत पूजयेत् लोमात्मकेनर

विया॰ १२
व॰
४६८
468

मयावामवामदक्षिणयोः क्रमात् ततश्चाष्टदले पूज्या पश्चिमेन तु नारेण परविद्यां च भुवनेशीं तदात्मना कमलां रमयाभद्रे कामेनसुभ
गां यजेत् वस्वयत्रे मदेशानिवाल्माद्याः पतिमादितः षोडशारे महेशानि चंद्रमण्डलरूपिणी कलाः षोडशसंपूज्याः पश्चिमादिक्र
मेण हि अमृतामानदापूषा तुष्टिस्तुष्टिः रतिस्तुष्टिः प्रीतिर्या क्रौंश्रश्रीश्चरूपधारा त्रिजेखो स्वादे मवती तथा छायाच पूर्णिमा नित्याअमा
वास्यात्तु षोडशी षोषवर्णाः संपूज्याश्च अत्र पूर्णा तु शक्तिका चतुरस्रे लोकपालान् क्रमेण परिपूजयेत् इति अथ प्रयोगः तत्र प्रातः
कृत्वा दियोगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे अनुष्टुप्छंदसे नमः हृदये श्रीअन्नपूर्णा
यै देवतायै नमः गुह्ये क्रौं बीजाय पादयोः श्रीं शक्तये नाभौ क्लीं कीलकाय इति विन्यस्य ममात्र समस्तह्वये जपे विनियोगः इति कृतांज
लिः कृत्वा क्रौं हृदयाय नमः क्रौं शिरसे स्वाहा हूं शिखायै वषट् क्रैं कवचाय हुं क्रौं नेत्रत्रयाय वौषट् क्रः अस्त्राय इति षडंगमंत्रान् अंगुष्ठादि
तलांतं करयोर्विन्यस्य हृदयादिषडंगेषु विन्यस्य शिरसि ॐ नमः सीमंते क्रौं नमः भाले श्रीं भ्रूमध्ये क्लीं नासाग्रे नः मुखे मो कंठे भ॰
हृदि गं उदरे वं दक्षपादे स्वा वामे हा॰ इति वर्णन्यासः ततो ब्रह्मरंध्रे ॐ नमः दक्षनेत्रे क्रौं वामनेत्रे श्रीं दक्षश्रोत्रे क्लीं॰ वश्रिति मो॰ द
क्षनासापुटे भगवती वामे माहेश्वरी मुखे अन्नपूर्णे लिंगे स्वाहा इति विन्यसेत् न्निवपदानि गुदलिंगमुखवामदक्षनासापुटे वामद
क्षिणश्रोत्रवामदक्षनेत्रेषु इति पदन्यासः ततो ब्रह्मरंध्रे ॐ नमः दक्षनेत्रे क्रौं वामे श्रीं दक्षश्रोत्रे क्लीं वामे नमो दक्षनासापुटे भग
वती वामे माहेश्वरी मुखे अन्नपूर्णे लिंगे स्वाहा इति विन्यसेत् तान्येव पदानि गुदलिंगमुखवामदक्षनासापुटे वामदक्षिणश्रोत्रवामदक्ष
नेत्रेषु इति पदन्यासः ततो ब्रह्मरंध्रे ॐ नमः मुखे क्रौं हृदये श्रीं मूलाधारे क्लीं इति विन्यस्य शिष्टषोडशाक्षरन्यासस्थानेषु न्यसेत् ततो
मूलेन व्यापकं कृत्वा ध्यानाद्यात्मपूजांते ह्यायुक्त भुवनेश्वरीपीठे समभ्यर्च्यावाहनादिपुष्पोपचारांते प्राग्वदंगानि संपूज्य त्रिकोणाग्रे
ॐ ह्रीं नमः शिवाय श्रीं शिवायनमः इति मंत्रेण नर्त्यंतं शिवं संपूज्य वामकोणे ॐ नमो भगवते वाराहरूपाय भूर्भुवः स्वपतये भूपतित्वं मे

देहि देहि दापय दापय स्वाहा वाराहाय नमः इति वराहं संपूज्य दक्षकोणे ॐ नमो नारायणाय नमः इति नारायणं संपूज्य त्रिकोणाभ्यन्तरे देव्या वामभा
गे ग्लौं अन्नमयं अन्नं मे देहि अन्नाधिपतये ममान्नं प्रदापय स्वाहा ग्लौं भूपये नमः दक्षिणे श्रीं अन्नमयं अन्नं मे देहि अन्नाधिपतये ममान्नं प्रदापय स्वा
हा श्रीं श्रियै नमः इति संपूज्य वसुदलेषु देव्या अग्रादि ॐ परविद्यायै ॐ ह्रीं भुवनेश्वर्यै नमः श्रीं कमलायै नमः क्लीं सुभगायै नमः त
तो ष्टदलेषु ब्राह्म्याद्याः संपूज्य षोडशदलेषु देव्यग्रात्प्रादक्षिण्येन अं अमृतायै अं पूर्णायै सोमानन्दायै अं भं पुष्ट्यै अं तुष्ट्यै अं प्रीत्यै अं · निर
त्यै अं मां क्रियै अं · हैं श्रियै · अं · स्वस्वधायै अं रिं रात्र्यै · अं ज्योत्स्नायै अं · नं हैमवत्यै अं · छं छायायै अं · णैं पूर्णिमायै अं स्नां नित्यायै अं ·
हां अमावास्यायै अं तद्बहिर्दिक्षु अस्त्रं प्राग्वदैन्द्रादीन् संपूज्य शेषं समापयेदिति · इति णमूर्त्तिः ततो जपेन्नियमोदयेन होम
येत् एवमुपायसमापन्ने भ्यां सिद्धिर्दा भवति श्रीवंसारसंग्रहे तथ्यणादितः कुर्यात्पूर्वोक्तविधिना सुधीः अन्नपूर्णेश्वरी देवी पूजि
तात्र स्वर्णादा अनया विधया जातः कुबेरो धननायकः अन्नपूर्णेश्वरी नाम सर्वसंपत्समृद्धिदा तथा वीजहीनेयमेव सा त्वोडश्या
णितथापरे मायादास्याद्यवारादयामत्ता समदया तदा मायानामादितो दद्यादशार्णिका मुन्याद्याः पूर्ववद्दिता माया याग क्रि
यामतः अर्चनां गन्धवस्त्राद्यैः साधयेत्सर्वनवस्ततः भगवति भवरोगात्पीडितं दुःखयोगात्सुतदुहितकलत्रोपद्रवेणानुयातं
विलसदमलदृष्ट्या वीक्ष्य विश्रान्तचित्तं सकलभुवनमातस्त्राहि मामों नमस्ते १ माहेश्वरी मामश्रितकल्पवल्ली महं भवो छेदकरी
भवानी क्षुधार्तदारात्तनयाद्युपेतस्त्वामन्नपूर्णे शरणं प्रपद्ये २ दारिद्र्यदावानलदह्यमानं पाह्यन्नपूर्णे गिरिराजकन्ये कृपांबु
धौ मज्जय मां त्वदीये [illegible] त्वत्पादपद्मार्पितचित्तवृत्तिं ३ इत्यन्नपूर्णास्तुतिवद्धमेतच्छ्लोकत्रयं यः पठतीह भक्त्या तस्मै ददात्यन्न
समृद्धिमंवा श्रियं च विद्यां च यशः सुमुक्तिं ४ अन्नप्रदात्वमंत्रस्य पूर्वोक्तस्योच्यते विधिः ऋषिर्ब्रह्मा समाख्यातं छंदस्त्वतिकृतिर्मतं
देवता भूश्रियेत्के धनधान्यप्रदेम्य भे वेदेषु षाणु निंद्ध द्वमितैर्मंत्राणां केण्यक पंचांगानि मनोः कल्प्या जातियुक्तानि मंत्रवित् तीराद्धो

२२

विद्या॰ व॰

४६९

469

रजतोद्भवप्रकानकह्रीपेसराच्छे सुभेकल्पद्रुमजशोभितेमणिमयेमाह्निनपस्थायतः आसीनेवसुधाश्रियेयोधनसमूहात्तंसृतांघो
ऊर्भकायमतिचिंतयेद्दिनमुखेधान्यात्रसंपत्तये॰ आवाह्यवेलवपीठेदेवींगंधादिभिर्यजेत् सुगंगानियजेद्वाह्येदिक्षुभूतानिसंय
जेत् आद्यानिवत्वारिपुनर्विदिक्षुपूजयेदिमा नियुज्यासुतस्तवलाकायाम्नतः परं इंद्रायस्तदस्त्राणिचैवंपूजासमीरिता
अथप्रयोगः तत्रप्रातःकृत्यादियोगपीठन्यासांते मूलविद्ययाप्राणायामत्रयंकृत्वाशिरसिब्रह्मणेऋषयेनमः मुखेपंक्तिछं
दसेनमः हृदयेभूश्रीभ्यांदेवताभ्यां इतिविन्यस्यममधनधान्यसमृद्धयेविनियोगः इतिकृतांजलिःकृत्वामूलमंत्रेणाभिमृष्टशोः पा
णयोरंगुष्ठयोः अन्नमहिह्यनयायनमः अन्नंमेदेहिशिरसेस्वाहा अन्नाधिपतयेशिखायैवषट् ममान्नंप्रदापयकवचायहुंस्वाहा अ
न्नायफट् इतिविन्यस्यहृदयादिषुयिनेत्रहीनेषुपंचांगेषुन्यसेत् ततोध्यानादिमानसपूजांतेचतुर्द्वारयुक्तचतुरस्रत्रयवेष्टित
मष्टदलकमलद्वयंपूजाचक्रंकृत्वाप्रागवत्संस्थाप्यसंपूज्यतत्रवक्ष्यमाणावैलवपीठंसंपूज्यतत्रवक्ष्यमाणावैलवपीठंसंपूज्यतत्र
भूश्रियैसमावाह्यामतादिषडध्योयवाराग्नेप्रागवदग्नानिसंपूज्यप्रथमाष्टदलस्यदिग्दले ॐ आकाशाय पवंवायवेनमः अग्नयेनमः ॐ
जयायैनमः इतिसंपूज्यविदिग्दलेषु ॐ निवृत्यै प्रतिष्ठायैः विद्यायै॰ शान्त्यै॰ इतिसंपूज्य॰ द्वितीयाष्टदलेष्वेकारलक्ष्मीप्रकरणोक्तवला
काद्याष्टशक्तीः संपूज्यप्रागवदिंद्रादिपूतामारामणोषसमापयेदिति तथा नियुतंप्रजपेत्तंत्रंतद्दशांशंचमंत्रवित् जुहुयादाज्यसंपृ
क्तेनान्नेनचयथाक्रम तर्पणादिततः कृत्वाविप्रान्संभोज्ययत्नतः गुरुंसंतोष्ययत्नेनमंत्रसिद्धिमवाप्नुयात् दिनादौप्रजपेन्मंत्रमष्टो
त्तरशतंसुधीः तेनयथान्यात्ररत्नौघसमृद्धोभवतिध्रुवं अथाम्नायरूपमंत्राः मारसंग्रहे योनिर्वियत्तनेत्रंचपरमेपदसुन्दरेत् अ
स्थिगंमेदउक्ताचरक्तस्पंदकद्विठावपि प्रणवायोदशार्णोयमस्याग्नरूपामनुर्मतः योनिः एकारः वियत् हकारः सनेत्रं इकारयु
क्तं तेन हि इति परमेस्वरूपं अस्थिशाकारः मेदोवकारः तेनस्वा इति रक्तः रेफः इदक ईकार॰ तेनः रि॰ इति द्विठः स्वाहाकारं तथा

स

ऋषिर्ब्रह्मा विराट् छंदो देवता परिकीर्त्तिता अश्वारूढा त्रिभिः पदैः प्रणवाद्यैर्ह्रीं रीरितैः षडंगानि मनोरस्य जातियुक्तानि कल्पयेत् अश्वा
रूढां नवशोणितयुतां भालनेत्रां चलद्दोःपाशपाणावह्निं मदनविवशां साध्यमाप्नानयंती दलेणेयत्कनकरचितां वेत्रयष्टिं दधानां वक्षू
काभ्यां मनसि कलये पीनवक्षोजनम्रां तेनराजेन्तः लोहितां स्रस्यां लोहितांवरभूषणां चतुर्भुजां त्रिनयनां प्रबद्धेन्दुवदनां वुजां
मलंददेन वामेन वर्मयष्टीसमुज्ज्वलां अश्वाभ्यां हेमपाशेन कंठे बध्यास्वसाध्यकं हेमवेत्राहतं बद्धकरयुग्मकृतांजलिं दासो
हमिति भाषंतं पातितं निजपादयोः स्मरनितिवत्तुभुजध्यानमुक्तं शक्तिपीठे यजेद्देवीं पुरोंगानि प्रपूजयेत् मातरिंद्रादि
कान्वाहैनदस्त्राणि ततो बहिः एजेयमस्याहृढायाः प्रोक्तासवीसमृद्धिदा अथ प्रयोगः तत्र प्रातः कृत्वादियोगपीठन्यासं
कालरात्रि महाधोते अमुकमाकृष्टोच्चाटय उच्चाटय छिंधि भिंधि भिंधि स्वाहा ह्रों कामादिकौं ४९ अर्धरात्रे जपेन्नंत्रं मम हस्त्रं यमव
ततो होमं शोधयेत्तद्दशांशं चादि दिनेदिने बलिं दद्यात्प्रयत्नेन तैलोत्कपुत्तं ततः नथास्त्रपिप्पलिपाकशाकं पिंडंच मूलकं मुद्गया
सहतेनैवमन्त्रुनामंत्रवितमः एवं यः कुरुते नित्यं समाह्वानाट्ययेध्रुवं प्रतिमादेवतानां वकाकथा मानवादिषु अथ विद्वेषणादे
विम्हणगोप्यागमाकृयं तालहत्तस्य फलकद्वयं मानीयतां नरः विषैरष्टभिरालिख्य हस्ताहित्रयेन साधकः लिखेन्नाम तयोः
साध्यैः पत्रमध्ये तकारयेत् ततस्तफलके एत्रेप्यतत्रकुत्रमैस्तथा मोदयेत्तेन मारेणाग्रणाविंशतिसंख्यया ततस्तस्पृशन्ज
पेन्मंत्रं सहस्रमथियामिनि क्रौं ग्लौं ह्रौं ततो भ्रौं वभगवतंतदण्डच धाविणमुकममुकं पीत्रं विदेषयदयं रोपयादितयं वैवा
भंनयाद्दितमंरमा मायाराज्ञेतततस्ताराय्यणाशाः कवचं पठेत् पंचाणदत्तरोमंत्रस्ताराद्दि द्वेषकारकः श्रौं ह्रीं ग्लौं ह्रौं भ्रौं भग
वतिवंदयाविणी अमुकममुकंपीत्रं विद्वेषय विद्वेषय रोपय रोपय भंजय भंजय श्रीं मायाराज्ञे श्रीं द्रं द्रं द्रं ५८ नमाफलकद्व

गंतव्यं धारज्ञापरस्परं खरसैरिभगंधवैश्चहरोमसमन्वया वल्मीकरंध्रे निर्लिप्तनाव तां खिजपेत्मतं समाहृत्य जायते वैरं नामल
सगणयोरपि श्मशानभस्माकं कर्मकथ्यामि सविस्तरं नमयोगं प्रकुर्वीत नवाम्लणस्योपरि स्थिते ब्राह्मणेन विनाम वैतालसं रिपु
वज्जगत् वहुलां पीठ कोपकृत्सर्वोपद्रवकारकः तस्योपरि प्रकुर्वीत मारणं कुलधर्मवित् प्रजपेदात्मणश्च तत्र संहृत्य मूलमंत्रकं
मूलपत्रे च तद्दर्भ भौमवारे विशेषतः गोमूत्राश्व श्मशाना श्राशिवागारे च ततः प्रयात् सद्मानीय पत्रेन श्मशानादौ विनिः
क्षिपेत् विड्गावर्क जाम्बाति शुष्कपर्णानीय देशिकः श्मशाने निजं नागारे मृतकंकेपोहिंगवराः नीलां वच्यरोगादौ शूल लीः
विपरीतके नष्टिश्च स्यालि विनाम साध्य स्यन्तमयन्ततः प्रणायं त्रैहृदि न्यस्य प्राक्प्रोक्तविधिना सुधीः माणादिस्थापतं कृत्वा
दर्पेन रक्तवाससा खराश्वमहिषाणां तु रुधिरेस्थापये त्वृतां तैलाभ्यक्तां ततो रक्तचंदनेन समर्चयेत् यन्त्रं रक्तसमेवीपिमारणोका
णनाततः जपं होमं च पूजां च कुर्यान्मारणविधानतः ओं ह्रां ह्रीं ह्रूं स्तलिकेस्थ्यामुकं शीघ्रं मंततनतः मारणाद्दिन पंचेव सर्वमेवीतेजंबिरु
हवेत् यन्त्रे रक्तसमेवीपि अयोविंशतिनवेणहस्तां होमं च कारयेत् ओं ह्रां ह्रीं ह्रूं स्तलिके षष्ठिदेवयतं शीघ्रं मारय मारय क्रों क्रों क्रों २२
वचा सर्षप मल्लातकी नेरुमनवीजकैः अष्टोत्तरशतं दत्वा श्मशानादौ विधानवित् प्रतिमायाः शिरच्छिन्नात् प्राणेऽपि म मृयेत्
ततश्च प्रतिमां दग्धा मारणस्यानमात्सुधीः एवं कृते त्रिसमाहाद्रिपुर्याति यमालयं भैरवाय बलिं दद्यान्मारणहांविधिना सुधीः मा
रणाय बलं मद्याद्यैर्वक्ष्ये इह मज्जायते सदसंजपादस्मिंश्चान्यैः प्रजपेत्मंत्रहंततः श्रामस्तां भवेद्यो वेत्ता साधकस्य प्रस्तुतिर्भवेत् रविकाल
रात्रिप्रकरणं प्रणवो भुवनेशी च कामराजमतः परं स्वगुसर्गी व हृदयं ईतां भगवतीपदं शारदायै च वा वक्रैः प्रियासम सर्वाणिकाः
ओं ह्रीं क्लीं सः नमो भगवति शारदायै ह्रीं स्वाहा १७ नास्य विघ्नो न वा शौचं न वा मंत्रविपर्ययः न क्लेशो न च वैरेषु संभवं न होमो नाविरं
ततः स्नानाद स्तनरूपो पंचेत्रामर्वार्थसिद्धिदः वर्णलक्षं पुरश्चर्या तत्र दैवामहेश्वरि गृहीत्वा हे समाख्यातमतोऽमृतेनकारयेत् जी

वहीनोयथादेवीसर्वकर्मसुनतमः पुरश्चरणहीनोपितथामंत्रःप्रकीर्तितः गृहेवनेश्मशानेवाशून्यागारेचतत्क्षणे साधकः
सिद्धयेकुर्यात्पुरश्चरणकाक्रिया जपाद्दशांशतोहोमस्तद्दशांशेनतर्पणं मार्जनंतद्दशांशेनतद्दशांशेनभोजनं पुरश्क्रियांमनोहृ
नामतोत्कीलनमाचरेत् मंत्रंसंजीवयेत्पश्चात्सिद्धिमूलंततोजपेत् संपुटंचपुनर्दद्यात्ततोमंत्रोपिसिद्धति आद्यवर्णंमहादेविद्
घात्मंत्रोचलेशिवे मंत्रादौदीयतेतीरमिदमुत्कीलनंभवेत् नामदद्यात्तथाद्यादौतारंदद्यात्तथाचले एषसंजीवनोनाममंत्रोमंत्र
स्यभामिनि ततोजपेन्मंत्रंसिद्धंसाधकःसर्वसिद्धये नामाद्यौदीयतेतीरं . . . . नामदद्यात्तथाद्यादौमायांजपेत्त
तः श्रीणिमायशुभसिद्धीनामीश्वरःसाधकोभवेत् यंत्रोद्धारंप्रवक्ष्यामिसर्वतंत्रेषुगोपितं सर्वसंमोहनंयंत्रंसर्वाशापरिपूरकं
विंदुगर्भंत्रिकोणंचतद्वहीरसकोणकं अष्टपत्रंघोरशारंभूपुरंविलिखेत्प्रिये लयंभामथवक्ष्यामितत्रपीठावरानने यंस
मभ्यर्च्यविधिवत्साधकोमुक्तिमाप्नुयात् गणेशोथभैरवश्चवरुणश्चकुबेरकः यनेद्वास्थाःसमाख्याताःदत्वाबलैनपूजयेत्
जयाचविजयाजृंभाशंवरीरक्तदंतिका शाकंभरीचचामुंडाशिवाचशिवदूतिका पीतलाक्षप्रभाप्यांतारतिःप्रीतिःस्थितिर्मतिः
इतिषोडशपत्रेषुपूज्याःषोडशदेवताः कपालोविकरालश्चसंहारोरुरुभैरवः महाकालोपिकालाग्निरुन्मत्तःसप्तभैरवः पूज्या
अष्टदलेदेविसप्तमेत्रैरष्टभैरवः शालिकाचतथाराज्ञीदेवीज्वालामुखीतथा कालिकात्रिपुरादेविछिन्नाविपरमेश्वरि यतोःष
ट्कोणमध्यस्थाःपूज्याःसाधकसत्तमैः भवानीवगलातारा:पूजनीयास्त्रिकोणकाः मूलेनशारदादेवींविंदौविद्यांसरस्वती
पूजयेद्भक्तिभावेनगंधपुष्पाक्षतादिभिः मूलमासंतथायंत्रंपाशंकलशमेवच अहमित्यापृथग्विंदौपूजयेत्साधकोत्तमः व
वामेपूजयेद्देविगुरुपंचकमादरात् सव्येथभैरवाग्रंपूजयेत्क्षमपालतथा ऊर्ध्वेदेत्रेष्वरांश्चैवयथावद्दर्शितेमया क्रोष्टव
कंहृपवक्त्रंततोजवक्रकंशिवे सिंहवक्त्रंमहादेविपूजयेत्सततरसके शिवंरुद्रंमहेशंभीमंभैरवंपरमेश्वरि विंदौसंपूजयेन्मंत्रील

वि॰ पा॰ २९

५८३

583

यांगमिदमुच्यते मंत्रस्यास्य महादेवि भैरवो ऋषिरीरितः छंदस्तु पुष्पसमाख्यातो देवता शारदा स्मृता मायाबीजं शक्तिरुक्ता किः स्वं
भं कीलकमुच्यते धर्मार्थकाममोक्षार्थे विनियोग इतिस्मृतः तारमायारमाबीजैः स्वरैः षड्दीर्घभागिभिः करन्यासं समाख्या
तो हृदयादिषडंगकं प्रथमं बीजत्रयेण कुर्याद्दिग्बंधनं सुधीः प्रथमप्रयोगः तत्रप्रातः कृतनित्यशौचादिकं विधाय स्ना २
नि शक्तिबीजेन दंतान् विशोध्य प्रणवेन मुखं प्रक्षाल्य ऐं ह्रीं मणिधरिणि वज्रिणि ह्रं शिखायां परिसरेद्रदरलरलं ठः ठः ठः फट् स्वा
हा इति मंत्रेण शिखां बध्वा मलस्नानं विधाय मंत्रस्नानार्थं सद्गुरुं नत्वा तीर्थं मंडलं परिकल्प्य प्रणवेन तीर्थान्यावाहयेत् शारदीव
दे मातर्मीनकालस्थे भूषिते पवित्रे परिपूते देवि यंत्रेस्मिंस्त्वं संनिधिं कुरु इत्यावाहनं कृत्वा ततः स्नानं विधाय ॐ शारदायै विद्महे
समस्तशक्त्यै धीमहि तन्नः सरस्वती प्रचोदयात् इति गायत्र्या सूर्यावंदनादि तर्पणांतं कर्म समाप्य यागगृहमागत्य योग
पीठस्यांसांते मूलेन प्राणायामत्रयं कृत्वा शिरसि भैरवाय ऋषये नमः मुखे त्रिष्टुप्छंदसे नमः हृदये श्रीशारदायै देवता
यै नमः गुह्ये ह्रीं बीजाय नमः पादयोः सौः शक्तये नमः नाभौ नमः कीलकाय नमः इति विन्यस्य मम चतुर्वर्गफलसिद्धये वि
नियोगः इति कृतांजलिः क्रां ह्रां ह्रीं इत्यादि षड्दीर्घयुक्तेन करषडंगन्यासं कुर्यात् ततो ऐं ह्रीं श्रीं कामपीठाय नमः हृ
दयाय नमः एवं क्रमेण जालंधर पूर्णगिरि उड्डियाण वाराणसी मोक्षशारदापीठानां षडंगन्यासं कुर्यादिति षडंगपीठं विधाय प्रागुक्तरी
त्या शारदामातृकां विन्यस्य आत्मविद्यागुरुशिवशक्ति शिवशक्तितत्त्वानि षडंगेषु न्यसेदिति तत्त्वषडंगं विधाय ॐ नमः शिरसि
एवं ह्रीं मुखे क्लीं हृदये सः नाभौ नं गुह्ये मों मेढ्रे भं गुदे गं कट्यां वं जान्वोः ये जंघयोः धां गुल्फयोः र पादयोः दां पार्श्वयोः पादयो
नं ये पादादिमूर्धांतं ह्रीं मूर्ध्नि शारदायै ह्रां नमः सर्वांगे एवं न्यासं विधाय श्रीगुरुं ध्यात्वा देवीं ध्यायेत् उद्यद्बालार्कबिंबद्युतिमनल
शिखाकोटितेजस्विनीतां भासच्चंद्राग्निनेत्रां विविधमणिशिलारश्मिभास्वत्किरीटां नानालंकारदीप्तां मामामदनविलासितां शारदे

वीरीकरूपां वंदे सिंहासनस्थाम् अट्टहासिनवदनांशाखेटभुजाभ्यां अरुणार्कनिभां त्रिलोचनां कमलमालकमूलधारिणीं क
लशखेटकपाशधरभुजां ह्रादिदीवीमतिशं भजामहे इति ध्यात्वा मानसोपचारैराराध्य सम्पुटं तत्पंचदलादिपीठे कुंकुमादिना
विंदुगर्भं त्रिकोणं विलिख्य तद्बहिः षट्कोणं तद्बहिरष्टदलं तद्बहिः षोडशदलं तद्बहिश्चतुर्द्वारं भूपुरं च तत्र रक्तकुसुमादिभि
रञ्जयांत्रं विरच्य पुरतः संस्थाप्याभ्यर्च्य विद्यादिस्थापनाया त्मरूपां तेभवने श्वरीपीठमभ्यर्च्य मूलेन मूर्तिं परिकल्प्यावा
हनादिपुष्पोपचारांते विंदावग्नीशासुरवायव्यमध्ये दिक्षु च षडंगानि संपूज्य वज्ररक्षे वायव्यादीशांतं गुरुपंक्तित्रयं
संपूज्य गणेशक्षेत्रपालवटुकयोगिनीः पूर्वादिदिक्षु पूजयेदिति प्रथमावरणं षोडशदले देव्यग्रादिप्रादक्षिण्येन जया विजया अ
गीः शांबरी रक्तदंतिका शाकंभरी चामुंडा शिवा शिवदूती शीतला सुप्रभा शांता रति प्रीति स्थिति मति इति द्वितीया
वरणं ततोष्टदले देव्यग्रादिप्रादक्षिण्येन कराल विकराल संहाररुरु महाकालभैरव कालाग्नि उन्मत्त ससमै इ
ति तृतीयावरणं ततः षट्कोणे धारिका रात्री ज्वालामुखी कालिका कालरात्रि त्रिपुरा सुमुखी इति चतुर्थावरणं
त्रिकोणे भवानी बगला तारा इति पंचमं विंदौ श्रीआनंदभैरवसमेतां महितायै शारदायै नमः इति समवारमभ्यर्च्य पुन
स्त्रिकोणे भवानी बगला ताराः पूजयेदिति षष्ठं मूलमासमपमकलशामृतान्पूजयेदिति सप्तमं एवं संपूज्य दीपदीपादे
नैवेद्यांतं दत्वा जपं जपं समर्प्य प्राग्वद्देवीं काभिरावलीनत्वस्थापार्तिकं सर्वं समापयेदिति पुरश्चरणं तु प्रागेवोक्तं तथा

प्रयोगानेव वक्ष्यामि साधकानां हिताय वै स्तंभनं मोहनं चैव मारणाकर्षणे ततः उच्चाटनं वशीकारं शांतिकं पौष्टिकं तथा उपचा
रं तथैतेषां स्मरणं वक्ष्यामि यथाविधि स्वोम्भातवेलायां गत्वा प्रेतगृहे शिवे भस्मना स्थानकं रोषकृत्वा साधकसत्तमः मूलं जप्त्वा सु
तं मंत्री होमं कुर्याच्चितानले दशांशं हुत पश्चात् पवमाषान्नमेधकैः गतिस्तंभं भवेच्छीघ्रं दशवारान्न संशयः वादिनां वस्
त्रस्तंभं कामिनां रेतसस्तथा चंद्रे मध्याह्नवेलायां स्नात्वा शून्यस्थले व्रजेत् मूलमंत्रं महादेवि जपेदयुतसंख्यया होमः स
र्षपैर्मधुसेवनमालतीकनकादिभिः तद्भस्मना वरेह्यालेतिलकं साधकोत्तमः तस्य दर्शनमात्रेण त्रिजगन्मोहमेष्यति भो
मे देवि रात्रौ समये गत्वा श्मशाने मंडले पद्मे नैकान्ते जपेन्मंत्रं मूलेनां जं च साधकः तदग्रे च जपेन्मंत्रं मालया युतसंख्यया व
लिं निवेदयेत्तत्र मंत्रेण रूपाजस्य मेधकैः सार्षपैश्च महाहुत्वा मंत्रं यावद्दशांशतः शौचं संभोजयेत्क्रोधं यावत्क्षोभं विष्यति क
र्मणा मनसा वाचा सत्यं सत्यं कुलेश्वरि शत्रुः कालसमानोपि सद्यो मेष्यति नान्यथा बुधे सायं समागत्य नदीतीरे च साधकः
स्नात्वा रहो जपेन्मंत्रं अयुतं दिव्यमालया होमो हुतशुक्लह्यादिद्रव्यपुष्पादिभिर्विधिः तेनैव सहसा क्षोभं भवेदाकर्षणं ध्रुवं
गुरो निशीथकाले तु गत्वा तत्र शवसन्निधिः चिन्तयामास समेदत्वा जपेदयुतसंख्यया होमो हुतेन मीनेन कपोतांशा समन्वितैः
कटुतैलेन काकालं पदैः कार्यो विधानतः कर्मणा मनसा वाचा विद्वेषं कारयेद्ध्रुवं शुक्रे वा सोमवारे तैलं गत्वा वटतले जपेत् मू
लं चायुतसंख्याकं साधको मंत्रसाधकः होमं कुर्यान्नरास्थिभिर्मधुगोधूममहर्षिकैः रक्तशालां वरे रक्तैः पीतपुष्पैर्महेश्वरि साध

कस्य न दादेवि त्रैलोक्यं वशमेष्यति ध्यानैर्यात्रिमखे देवि ग्रहे वा वनभूमिषु जपेन्मंत्रमयुतं देवि होमयेत्तु पिधामितां नारि
केलं च पार्थं च मीनकं कण्टकसंयुतं वह्निग्रहादियोगेन नामतिह्यहिभयस्य च मारीदुर्भिक्षभीतानां सद्यः शांतिर्भविष्यति
सर्ववादेषु सर्वत्र योषित्कं साधकस्य वेत् प्रभेद्दिग्भनतत्रैग्रहे जप्त्वायुतं मंत्रं होमास्तर्पिर्दधिक्षीरैर्वा यस्मायेप्सुक्षीयफलैः
खगांशाद्विमुतैः कार्यः साधकैः सर्वसाधकैः देवीनां देवतानां च महाग्रहैः प्रजायते सार्पिर्धिपवादिगोधूमपाकदुग्धादिभिः
शिवे होमो दशांशतः कार्यः साधकैः सर्वसिद्धये इतीदं साधनं देवि शारदाया मया स्मृतं गुह्यं गोप्यं न दातव्यं भक्तिहीनाय
पार्वति कुलेनापवशांतायगुरुभक्तिरताय च दद्यात्तस्योभवेत्सिद्धिरस्मत्रसिद्धिर्हाव्यतः शारदासाधनं दत्वं गोपनीयं वि
शेषतः सर्वदा गोपयेद्यत्नादित्याज्ञा पारमेश्वरी शारदोपासको देवि दरिद्रो न भवेत् क्वचित् सर्वत्र न समाप्नोति स संश
येन संशयः इति श्रीविद्यार्णवे षट्विंशतितमः श्वासः ॥ ३६ ॥ अथ वैरम्भवमंत्राः रुद्रमंत्रे अथ वैरम्भवमंत्राणां विधानमभिधी
यते त्रिषु लोकेषु विख्यातं मुनेन्द्रैणा सेवितं यमार्थकाममोक्षाभिप्रिनिदानं सर्वसंमतं षट्कर्मकरणश्रेष्ठं गोपनी
यं सदा बुधैः अज्ञानतिमिरध्वान्तं ज्ञानदीप्रिप्रदायकं वागैश्वर्यप्रदं सर्वपापविध्वंसकारकं अपमृत्युहरं पुंसां रोगदारि
द्र्यनाशनं दुःस्वप्नहरं तेजोनाशनं श्रीजयप्रदं भीकान्तारमार्गादौ भयनाशनकं परं नदीनदसमुद्रादौ तविध्वंसिष्टकारणं
नराश्वरथगोहस्तिपुत्रमित्रकलत्रकं तेजो यामप्रदं देवी ऐश्वर्यधैर्यप्रभाकरं स्फूर्तिकांतिकविताक्षिकं सौभाग्यदायकं

वि॰ या॰ २१ अस्तां स्कोऽस्मिंस्तोऽभिसिद्धिं प्रवर्त्तमानं वस्तु वा किमिदं तेन सर्वनानेन संशयः तेषु यथाप्रात्तरो मंत्रो यथावदभिधीयते या
योऽयं लाभ्यनात्रो देवः भुक्तिमुक्तिप्रदायकः प्रणवो दीर्घो विषं प्रयो दीर्घो वा नमनं तत्र युक् अर्धमंतोऽसमीरस्य सदीर्घ स्तादि रीरयुक्
अस्तादरो मंत्रः सोऽयं नारायणास्य समाह्वयः प्रणवः प्रणवः दीर्घी नकारः विषमकारः मय ओकारः ताभ्यामो इति दीर्घी नकारः आ
नन हंते आकारः ताभ्यां मः अग्नी रेफः अनंत आकारः तेन राः संमीरः यकारः सदीर्घ स्मादिः आकारयुक्तो नकारः तेन णा॰
ईरो यकारः ओं नमो नारायणाय मंत्रनिरुक्तिप्रजन्त्रैव प्रणवः परमात्मा तस्य वाचको कथ्यते ततः नकारस्य निषेधार्थो प्रम
र्थो मोऽपदं मतं नाज्ञलेशवाक्तियुक्तो योवायुर्णा धरामता अंते प्रणवार्थ्यक मात्रा देवं व्याप्य यानमीरितं यादित्तोसुनिरस्याणोः
साध्य नारायणाह्वयः ओं नं कं देवसा देवादिगाय मंत्रे देवतामतोः परमात्मा स्वहृदि प्राप्यं वांगानि ततोऽभ्यसेत् क्रुद्धोल्कप्रमहो
ल्क प्रवीरोल्क युल्कसंज्ञकः सहस्रोल्कश्च तथ्यं तैरभिर्मंत्रे लिखन्यसेत् इत्कमंगुष्ठपूर्वासु तर्जन्याद्यासु केचन कनिष्ठांता
सु संयोगे तु मैत्रीयस्यात्ततोऽभ्यसेत् चतुर्थ्यन्तैः स्वाहान्तैश्च क्रुद्धोल्कादिपदैर्वह्निजायांतैर्नीति संभवे वै पुनः तेरितिश्च लोकयसंमा॰
हननं तंत्रवचनात् प्रणवं विभक्तियुक्तानां भवेदं तेऽग्निवल्लभे निमंत्रं तंत्रप्रकाशवचनात् नारायणीये कनिष्ठादि मदं तानां॰
मंगुलीनां त्रिपर्वसु ज्येष्ठाग्राक्रमातावत् अष्टानष्टान्तरेऽभ्यसेत् प्रपंचसारे अष्टाद्वशेणाभ्यस्तेन कुर्यादष्टांगकं सधी सप्ता॰
क्षिप्तानि वा व मेने यासोऽष्टहस्केः तथा मंत्राणि तेन षट्के घन द्रवे हृष्टकेतनः दिव्यं यमन हमंत्रेण विहुर्ग्याम मंत्रवितमः

४२४
585

हृदये· ॐ नमः इत्यादि उदरे णां नमः पृष्ठे पं नमः इति प्रयोगाः केचित्तु ॐ हृदयाय नमः नं शिरसे इत्यादि न्यासं वदंति तन्नः श्रुत्यवग
तेर्जीव्यभावात् अपरे णां उदराय पं पृष्ठाय इति न्यासं वदंति तन्न स्थानानामधिकरणत्वेनैव वर्णानामेवं न्यासः स्यात् अ
न्यथा अं शिरसे नमः आं मुखवृत्ताय नमः इत्यादि न्यासापत्तेः अष्टात्रेणविंशत्पुटकेन तथा चेशानशिवः वर्णाविंशसमायुता
इति प्रपंचसारे अस्य मंत्रेण बहवो मंत्रवर्णास्ततो न्यसेत् अस्य चक्रं वह्निदिक्चक्रमंत्रेणेति शारदातिलकात् चक्रमंत्रो
ग्रैवस्तेनेदमेवं यथानंतरं हयशीर्षपंचरात्रे मूर्द्धाक्षिमुखवसनाभिगुह्यजानुपदेष्वथ स्थितिन्यासोयमुद्दिष्टः संहारश्चरणात्क्रि:
मूर्द्धांतः स्थितिरप्युक्तो नाभ्यादिहृदयांतकः उत्तरतंत्रे स्थाणोर्ध्वसमारोपमनुवर्णान्न्यसेत्सुधीः विन्यस्तमात्रे यैर्देहे भवेन्ना
रायणात्मकं आधारहृदयाननभुजपदमूलकनाभिषु प्रथमः गलनाभिषु नकुचद्वयपृष्ठकेष्वपरः शीर्षाननश्रवणनयनद्वयघ
्राणद्वयनासिकापुटेष्वन्यः बाहुद्वयपादद्वयसंधित्रितयप्रसितांगुलिषु ऐदिक्षमथाथवयापुष्करस्य षड्दरसोरुजंघास्य।
पदयोश्च तथान्योगणांशोर्ध्वविन्निषु न्यसेत् चक्राद्रुपृष्ठांश्रावगदा पद्मस्थानेषु विन्यसेद्वर्णान् ॥ तत्तत्तन्मुद्राश्चपूर्वकमयमा।
एवं दशन्यासः ॥ प्रपंचसारे ॥ विन्यस्तैर्यैर्भवेत्तन्मंत्रात्मं मंत्रवर्णात्मको हरिः ॥ अत्र पद्मपादाचार्याः मं
त्रीमंत्रवर्णात्मक इत्यत्रेन न्यासे मंत्रवर्णानां प्राणावष्टंभितत्वं प्रतिपर्यायव्यापकन्यासस्योक्त इति मंत्रतंत्रप्रकाशे।

ऋ=२

वि॰ २० विन्यसेद्वर्णमेकैकं विंदुं तेभ्य वेष्टितमिति उक्तं तंत्रे क्षितिसलिलानलपवनव्योमाहंकृति महत्प्रकृत्याकेषु क्रमग
न्तदिनैवेते क्रगतमंत्रार्णसंयुतैर्मंत्री॰ चरणांशुगुह्यहृदयवक्त्रकद्वयव्यापकेषु च विन्यसेत् संहारोयं गदितो विपरीतास्य
स्थितिरस्य निर्दिष्टा विपरीता प्रकृत्यादि॰ अनेन्यासे स्थली नियमस्तत्रैव तत्रांगुलीभिन्यासः स्यात्स्थितिरस्यैकैकमध्यमा॰
तर्जनीमध्यमाभ्यां तु च वृत्तिषोर्यासउच्यते अंगुष्ठानामिकाभ्यां तु संहारन्यासः प्रकीर्तितः सर्वीयानो च यादेवं पंचापि पर्वि
कीर्तिताः तथा विंदुनादः शक्तिशांतं तत्रूपमात्मकवतु षट्‌यम् न्यासेत्सर्वतंत्रोमंत्री देवताभावसिद्धये नारदीये द्वादशार्
तरमंत्रायाः अक्षीविसर्गवीजका॰ केशवाद्याथावसूर्वसूर्यांन्यस्यांतमौक्तिकाः सारसंग्रहे मूर्तिपंजरनामानं कुर्यान्मा
संतरं शुभं अहल्लेरव्हरद्रोदंयपुः पुष्टिमेवावहं अष्टवर्णस्यास्य मनो पूरणापार्ष्णिवर्णिकः स्मरणीयो मनुः सम्यक्संत्र
शास्त्रविशारदैः अष्टप्रकृतिरूपोयमष्टवर्णोमनुर्मतः तासां सा मचतुष्कस्य मेलनाद्धिथिवबुधैः उहितो मनुवर्णोयम
... ... क्रमात् अतः सनैवतद्दशापि विलयेस्वरपूर्विकात् द्वादशार्कयुतान्यस्येत् प्रोक्तान्द्वादशकेशवान् प्रोकार
न्केशवादि मातृकान्यासे अकारादिद्वादशस्वरेशानेन भालोकृतोदेदिगलेपार्श्वेशकगलेषु च दक्षिणेषु च वामेषु पृष्ठे
ककुदिवक्त्र मात् उहिपदेन मात्रिधान्त्राविभागोनलसतेल लाटनाभि हृदयकंठपार्श्वेशकंधरे पार्श्वांतवंशग्रीवापांपृष्ठे ककु

५८५

व

५८५

दिवक्रमात् इत्यगस्त्यवचनात् स्वायंभवेनारसिंहेच केशवं विन्यसेन्नार्दैमूर्द्धदेशोथविस्नुना नाभौनारायणंदेवंविस्नुतेन
संमन्वितं माधवं हृदि विन्यसेन्मन्मथेनसमन्वितं मन्मथांतेनसंयुक्तं गले गोविंदसंज्ञकं विस्नुं भूतस्वरेणाथ दक्षपार्श्वे
प्रविन्यसेत् तदंगे मात्तृतीयेन हृदनेमधुसूदनं विंदुताशिवयुक्तेनदक्षकर्णे त्रिविक्रमं वामनं श्रीधरंचैव हृषीकेशं।
सतःपरं वामेलेकारमौकारमौकारंविंदुनासह· विंदुनापद्मनाभंचपृष्ठदेशेतदंतयुक् अंत्यककुदिदामेनद्वादशां
गमितिस्मृतं द्वादशेमानिवीजानिनादविंदुयुतानिच· आदित्याद्वादशतथाद्वादशोदारसंयुताः विस्नुः अविस्न
तः अमन्मथरमन्मथांतई मूतस्वरः उमालक्ष्मीतिनईकारः तत्तृतीयः ऊशिवः यतदंतओकारांतः अं अत्यग्रः इति· आ
दित्यास्तु· अर्य्यमाचमित्रश्चवरुणोंशुर्भगस्तथाः विवस्वदिंद्रौपूषाचपर्जन्योदशमःस्मृतः त्वष्टाचविस्नुरित्येतेइतिकुं
भसंभवोक्ताः अंशुः अंशुमत्त्वात् अंशुश्चमंशुधाशिवादिति· विस्नुधर्मोत्तरवचनात् प्रपंचसारेद्वादशाक्षरमंत्रंतंमंत्रविन्मूर्द्धि
वित्यसेत् मूर्द्धिस्थितोवासुदेवस्तुव्याप्नोतिसकलांतनुं मंत्रविन्मूर्द्धि इत्यष्टाक्षरेणसार्द्धमित्यर्थः इतिपद्मपादाचार्य्याः मंत्रतंत्र
प्रकाशे· अष्टाक्षरेणसहितंविन्यसेद्द्वादशाक्षरमितिन्यासप्रकारसादटकमसंभवः इतिराममंत्रवर्णाशतितंत्रकरणे· प्रपंचसा
रे पुनस्तत्प्रतिपत्त्यर्थंकिरीटादिमनुंन्यसेत् किरीटकेयूरहारपदान्याभाष्यमंत्रवित् मकरांतेकुंडलंचशंखचक्रगदादिकं अंत्र
हस्तपदंप्रोक्तापीतांवरधरेतिच श्रीवत्सांकितमाभाष्यवक्षःस्थलमथोवदेत् श्रीभूमिसहितंस्वात्मज्योतिर्द्वयपदंवदेत् दीप्ति
हस्ताकारयेतिसहस्रादित्यतेजसे· हृदंतःप्रणवादिःस्यात्किरीटादिमनुस्त्वयं जपेत्सर्वदेहेस्पर्शन्निति ततःकिरीटमंत्रेणसर्वां
गेव्यापकंन्यसेदितिसंकर्षणवचनात् मंत्रेसर्वाणिपदानिसंवध्यंतानिज्ञेयानि मंत्रविदित्यनेनमकरांतेकुंडलमित्यलंकृतेपदा

वि·
या·व २७
५८६
586

भ्यांपदाभ्यां रक्तवित्तः इति पद्मपादाचार्य्याः मंत्रतंत्रप्रकाशे तारः किरीटकेयूरहारांते मकरं पदं कुण्डलालंकृतेत्यंते शंखचक्र
गदापदमिति सारसंग्रहे· अतः पूर्वं षडक्षरामितत्तन्यासमनंतरमे यस्तत्तन्यासमात्रेणात्तत्वासंप्रजायते· अवांतेमादिकान्वा
रगान्कान्क्षाहृदंतकान् परायेतिपदंतत्तन्नामांते शह्तत्वतः आत्मनेनमसापुक्तात्तत्वमन्त्रान्समङ्गेरेत् जीवप्राणौ सर्वतत्त्वो
न्यस्य डांहिततः परं अहंकारमनश्चैव हृद्येतानि प्रविन्यसेत् मुखकाननहृद्गुह्यपाददेशेषु ततः परं शब्दस्पर्शौ रूपरसगंधा
न्क्रमतोन्यसेत्· श्रोत्रत्वङ्नासिकाजिह्वा घ्राणेषु श्रोत्रपूर्वकान् खवाक्स्थानेषु यागादिकर्मेंद्रियगणंन्यसेत् मूर्द्धिवक्त्रे
हृदि शिवपादयोर्वियदादिकान् हृत्पुण्डरीकसंज्ञं दिहृदयेमण्डलानि च अर्कषोडशदिक्संख्यकलायुक्तानि चक्रमात्
सोमसूर्यकृशानूनां श्वेताकारेंदुवह्निभिः अथाकाशादिभूतानां न्यासस्थानेषु विन्यसेत् परायमेष्ठिनं चैव पुमासं विश्व।
संज्ञकं· निवृत्तिं सर्वनामानः षोपराबलवर्णकैः नारायणांतकावासुदेवाद्यान्विति योजयेत्तः परमेष्ठ्याभिः पश्चान्नृसिंहजपपूर्वकं
कोपतत्त्वं च मूर्द्धादिपादांतं व्यापयेत्ततः एवं विन्यस्य विधिवत्साक्षान्नारायणो भवेत् ज्वररोगाभिचाराद्याः पलायंते जितान्यथा भू
तप्रेतापिशाचाश्च तथैव ब्रह्मराक्षसाः कूष्माण्डाश्चैव डाकिन्यो नैव द्रष्टुमपि क्षमाः एवं न्यस्तशरीरो सौ स्मरेद्धि स्वमतन्यधीः
हस्तैश्चक्रदरौ गदाम्बरसिजे विभ्राणमर्कोज्ज्वलं कान्त्या श्रीधरणीविभूषितलसत्पार्श्वं किरीटान्वितं श्रीवत्सांकसकौस्तुभो
रुपदकं केयूरहारोज्ज्वलं राजत्कुण्डलमण्डितं हृदि भजेत्मीतांवरं शार्ङ्गिणं· वामाद्याधःकरयोराद्येनदाम्पूर्ईयोरन्येनइत्याप्रथ
ध्यानं· पंकजं दक्षिणे यस्य पांचजन्यं तथोपरि· वामाधस्तु गदा यस्य चक्रं वोर्द्ध्वं व्यवस्थितमिति केशवलक्षणमुक्त्वा अथ यद्वान्तर
भावेन कृतमेतत्तु यंत्रवै· नारायणात्मसाक्षात्पास्थापिता भुक्तिमुक्तिदा· इति हयशीर्षपंचरात्रवचनात् सव्यान्यपाणौ प्रथमे

तपमेविश्राणमञ्जेनदनंतरेण· आपेगदावामकरेयवकं विराजयंतं भुवनानि भासेति मंत्रप्रकाशवचनात् सव्यान्यारेणोदक्षिणोग्र
जशेख नत्याकृतास्याणि लमस्मि विनिक्षिप्यतिनामहनि कांसमुपविश्य पीठादिकं निजांगे प्रपूज्य गंधादिभिः स्वस्थइमनाः स
द्वादशाक्षरां तंमष्टजपविधिवत्किरीटमंत्रेण· कुर्यात्पुष्पांजलिमपि निजदेहे पंचशो— वाविशः सारसंग्रहे· नवशक्तिसमा
युक्ते पीठे देवं यजेत्ततः विमलोत्कर्षिणी च ज्ञाना स्याच्च क्रियाभिता योगा प्रह्वी तथा सत्या त्वीशानानुग्रहा मता· ता
रोहृत्नेनभगवत्पदं विश्नुचडे·ऽन्त· सर्वभूतात्मने शार्ङ्गं वदेद्धामुपदं ततः ङें·नदेवं च सर्वात्मसंयोगपदमुच्चरेत् योगपद्मपदं
प्रोक्ता पीठात्माडे·ऽन्तो नमः अयमासनमंत्रः स्यात्स्वेदयादमुनासनं· तारः प्रणवः हृत्नमः ङें·नभगवत्पदं· भगवते·
विष्णडे·ऽन्तं विष्णवे· सर्वं त्यादिपदं स्वरूपं· ङें·न देवं देवाय· सर्वात्मसंयोगस्वरूपं· योगपद्मास्वरूपं· पीठात्माडे·ऽन्तः पीठात्म
नेनमः स्वरूपं मूलेन मनुना मूर्तिं कल्पयेद्देवं सर्वयेत नारदपंचरात्रे: पीठपूजां विनिष्पाद्य गंधपुष्पादिभिः क्रमात् पश्चादावा
हयेद्देवं मंत्रेणानेन केशवं एह्येहि भगवान्देव लोकानुग्रहकारक· यज्ञभागं गृहाणेमं वासुदेव नमोऽस्तु ते· सारसंग्रहे· आवा
ह्य तत्र विधिवदुपचारैर्यथोदितैः कर्णिकायां यथास्थानं यजेदंगानि पूर्ववत् केसरेषु यजेत्पश्चात् मंत्रवर्णान्समाहितः वा
सुदेवादिकामूर्तीश्चतस्रो विधिपूर्वकं दिक्पत्रेषु समभ्यर्च्य तासां नामान्यहं निहि· वासुदेवस्तथा प्रोक्तः संकर्षणसमाह्वयः प्र
द्युम्नश्चानिरुद्धश्च पीतवस्त्रैरलंकृताः गौरहारिद्रकृष्णाभ्यशाक्रनीलनिभाः क्रमात् दरचक्रगदापद्मधारिणश्च चतुर्भुजाः
कोणपत्रस्थिताः पत्नीः शान्तिश्रीश्च सरस्वती रतिसंज्ञा भवेदन्याः पूज्याश्चैव यथाक्रमं· शुक्लस्वर्णपयःश्यामसंकाशाश्चारुभू
षिताः दलाग्रेषु ततः पूज्या यथावद्धरिहेतयः शंखं रक्तं दरं सुदगदा पीतां च पंकजं· स्वर्णाभं कौस्तुभं श्यामं कृष्णाभं मुसलं हल
ससिं स्वर्णाभ वनमालां च शुभ्राभां च क्रमाद्यजेत्· दिग्गताश्च ततो वासे पूज्या पत्रे यथाक्रमं ध्वजः कृष्णो वैनतेयो रक्ताभः शंखसं।

वि २७
या· व

त्रिधिः स्मृतः पद्मनिधी रक्तो विघ्नो रक्तस्तथार्यकः श्यामनिभा रक्ता विश्वक्सेनो निशानिशः आग्नेयादिदले ते संपूज्या विधिवत्क्रमात्
लोकपालांस्ततो वाऽसेवज्रादीन्यायुधान्यपि विष्णोः पूजाविधानं तु पूजावरणमीरितं महाकपिलपंचरात्रे· नारायणाय विद्महे
वासुदेवाय धीमहि तन्नो विष्णुः पुनस्तद्वदंते चैव प्रचोदयात् गायत्री वैष्णवी प्रोक्ता सर्वपापप्रशान्तिदा अंगानि प्रथमं मूर्तिशक्ति
यः केशवादिकाः लोकेशास्त्वहं यश्च पूज्याः सर्वसिद्धये वासुदेवादिकानादौ चक्रशांखद्वजादिकान् केशवाद्यान्द्वादशाथ श
क्रवज्रादिकान्यसेत् वासुदेवाद्भुजादींश्च लोकपालांस्तदायुधैः प्रोक्तविधिवत्तत्र आवाहरिमेकेन संयजेत् अत्रापि तत्तीयचतुर्थ

५८७
487

प्रकारयोरंगानि पूज्यो न्यैव· अथ प्रयोगः तत्र प्रातः कृत्यादि योगपीठन्यासांतेन मूलमंत्रेण प्राणायामत्रयं कृत्वा शिरसि मा।
ध्व नारायणाय ऋषये नमः मुखे दैव्यगायत्र्यै छंदसे नमः हृदये श्रीपरमात्मने देवतायै नमः इति विन्यस्य ममेष्टार्थे विनियोगः इति कृत्वां
जलिं कृत्वा मूलमंत्रेण करयोर्व्यापय्य ॐ उल्काय स्वाहा हृदयाय नमः महोल्काय शि· वीरोल्काय शि· द्युल्काय स्वा· कवचा· सह
स्रोल्काय स्वाहा· इति पंचांगमंत्रानंगुष्ठादि पंचांगुलीषु विन्यस्य दक्षकनिष्ठा मूलपर्वादितर्जन्यग्रपर्यंतेषु द्वादशस्थानेषु ॐ ॐ

ॐ नं ॐ नमः

ॐ नमः ॐ मों ॐ नमः ॐ नां ॐ नमः ॐ रां ॐ नमः ॐ णां ॐ नमः ॐ यं ॐ नमः पुनः ॐ ॐ ॐ नमः ॐ नं ॐ नमः ॐ मों
ॐ नमः ॐ रां ॐ नमः ॐ यं ॐ नमः ॐ णां ॐ नमः ॐ यं ॐ नमः इति विन्यस्य वामतर्जनीमूलादि पर्वारभ्य तत्कनिष्ठाग्रप
र्वांतेषु द्वादशस्थानेषु· ॐ रां ॐ· ॐ यं ॐ· ॐ णां ॐ· ॐ यं ॐ· पुनः ॐ ॐ ॐ नमः ॐ नं ॐ· ॐ मों ॐ ॐ नां ॐ· ॐ यं ॐ· ॐ
णां ॐ ॐ यं ॐ इति त्रिरावृत्त्या मूलमंत्रेणाष्टाक्षराणि विन्यस्य हृच्छिरः शिखाकवचास्त्रेषु प्रोक्तपंचांगानि विन्यस्य हृदये ॐ नमः
शिरसि नं नमः शिखायां मों नमः अस्त्रस्थाने रां नमः नेत्रयोः यं नमः कुक्षौ णां नमः पृष्ठे यं नमः इति विन्यस्य पंडीचक्रेणव भ्रामि
नमश्चक्राय स्वाहा· आग्नेयी चक्रेणव भ्रामिश्चक्राय स्वाहेत्यादि तत्तद्दिग्बंधनं दशदिग्बंधनं कृत्वा मूर्ध्नि ॐ ॐ नमः नेत्रयोः ॐ न

ओं मं ओं मुखे ओं सं ओं हृदि · ओं नां ओं नाभौ · ओं रां ओं गुह्ये ओं यं ओं जान्वोः ओं णं ओं मूर्द्धि ओं यं ओं इति महाशस्त्रं विन्यस्य नाभौः ओं ओं ओं नमः
गुह्ये · ओं नं ओं जान्वोः ओं मों ओं पादयोः ओं तां ओं पादयोः ओं नां ओं मूर्द्धि · ओं रां ओं नेत्रयोः ओं यं ओं मुखे · ओं णं ओं हृदि · ओं
यं ओं · इति स्थित्यादिन्यस्य मूलाधारे ओं ओं ओं नमः हृदि · ओं नं ओं मुखे · ओं मों ओं दक्षबाहुमूले · ओं नां ओं वामबाहुमूले ·
ओं यं ओं वामोरुमूले ओं णं ओं नाभौ · ओं नाभौ · ओं यं ओं ततो मूलेन व्यापकं कृत्वा कंठे ओं ओं नमः नाभौ ओं नं ओं हृदि · ॥
ओं मों ओं दक्षस्तने ओं नां ओं वामे ओं रां ओं दक्षपार्श्वे ओं यं ओं वामे ओं णं ओं पृष्ठे ओं यं ओं पुनर्व्यापकं एवमन्यान्यपि कुर्यात् मूर्द्धि
ओं ओं ओं नमः मुखे ओं नं ओं दक्षनेत्रे ओं मों ओं वामे · ओं नां ओं दक्षकर्णे · ओं रां ओं वामे · ओं णं ओं पृष्ठे · ओं यं ओं ओं णं ओं पृष्ठे · व्यापके ओं
यं ओं ततो व्यापकं दक्षबाहुमूले · ओं ओं ओं नमः बाहुमध्ये · ओं नं ओं मणिबंधे: ओं मों ओं मों ओं दक्षांगुष्ठांगुलीस्तवशिष्टान्यचतुर्ण्णां।
नेवं न्यसेत् वामबाहुमूले: ओं ओं ओं नमः बाहुमध्ये · ओं नं ओं मणिबंधे · ओं मों ओं वामांगुष्ठांगुली, दक्षिष्टान्यचतुर्ण्णां नेवं न्य
सेत् मूर्द्धि ओं ओं ओं नमः नेत्रयोः ओं नं ओं मुखे · ओं मों ओं हृदि · ओं सां ओं उदरे · ओं रां ओं ऊर्वोः ओं यं ओं जंघयोः ओं णं ओं पादयोः
ओं यं ओं गुल्फयोः ओं ओं ओं नमः अंसयोः ओं नं ओं ऊर्वोः ओं मों ओं जंघयोः ओं नां ओं पादयोः ओं रां ओं वामाधःकरे ओं यं ओं नमः वामो
र्ध्वकरे: ओं णं ओं दक्षोर्ध्वकरे · ओं यं ओं नमः इति विभूतिपंजरन्यासः ॥ १० पादयोः ओं नमः पराय पृथ्वीतत्त्वात्मने नमः लिंगे नं नमः पराय
जलतत्त्वात्मने नमः हृदि ओं मों नमः पराय तेजस्तत्त्वात्मने नमः मुखे पराय वायुप्रकृतितत्त्वात्मने नमः मूर्द्धि ओं रां नमः परायाका
शतत्त्वात्मने नमः हृदि यं नमः परायाहंकारतत्त्वात्मने नमः सर्वांगेषु णं नमः पराय महत्तत्त्वात्मने नमः यं नमः पराय प्रकृतितत्त्वात्मने न
मः इति संहृत्यान्यस्येयुः नमः पराय प्रकृतितत्त्वात्मने · णं नमः पराय महत्तत्त्वात्मने · हृदि यं नमः परायाहंकारतत्त्वात्मने · मूर्द्धि रां नमः
परायाकाशतत्त्वात्मने · मुखे नां नमः पराय वायुतत्त्वा · हृदि · मों नमः पराय तेजस्तत्त्वा · लिंगे नं नमः पराय जलतत्त्वा · पादयोः ओं नमः

नौ

परायपृथ्वीतत्वात्मने इति हृत्पादि न्यस्य· ततः सर्वांगे ओं आं विं इन्द्ररूपात्मने नमः ओं अं नादरूपायान्तरात्मने· ओं यं शक्तिरूपाय परमात्म
ने· ओं ह्रीं शान्तिरूपाय ज्ञानतत्त्वाय· इति विन्यस्य ललाटे ओं अं केशवाय धात्रे नमः उदरे ओं नारायणार्यम्णे· हृदि मों इं माधवाय मित्रा
य कंठे भं ईं गोविंदाय वरुणाय दक्षपार्श्वे गंडे विष्णवे अंशवे· असे ओं वं ? मधुसूदनाय भगाय· गलदक्षभागे तें ऐं त्रिविक्रमाय विव
स्वते· वामपार्श्वे वों ऐं वामनायेन्द्राय· वामांसे सं ओं श्रीधराय पूष्णे· गलवामभागे दें ओं हृषीकेशाय पर्जन्याय· पृष्ठे वां अं पद्मनाभाय त्व
ष्ट्रे· ककुदि यं अः दामोदराय विष्णवे· शिरसि ओं नमो नारायणाय ओं नमो भगवते वासुदेवाय नमः इति न्यसेदिति मूर्तिपञ्जरन्यासः
ततः किरीटकेयूरहारमकरकुण्डलजालालंकृतशंखचक्रगदा हस्तपीताम्बरधरश्रीवत्सालंकृतवक्षस्थलश्रीभूमिसहितात्मज्यो
तिर्दीप्यदीप्तिकराय सहस्रादित्यतेजसे नमः इति सर्वाभिव्यापकं न्यसेत् सर्वांगे ओं मं नमः परायजीवात्मने नमः ओं भं नमः पराय
प्राणतत्त्वात्मने नमः हृदि बं नमः परायबुद्धितत्त्वः ओं फं नमः परायाहंकारतत्त्व ओं पं नमः परायमनस्तत्त्व· मूर्ध्नि ओं नं नमः परायशब्दत·
मुखे धं नमः परायस्पर्शतत्त्वा· हृदि ओं दं नमः परायरूपत· गुह्ये· ओं थं नमः परायरसत· पादयोः ओं तं नमः परायगंधत· कर्णयोः ओं णं न
मः परायश्रोत्रत· मुखे ओं ञं सर्वांगे ओं टं नमः परायत्वक्त· पाणिपाः ओं ञं नमः चक्षुषोः ओं डं नमः परायनेत्रतत्त्वाय· जिह्वापां ढं नमः प
रायजिह्वातत्त्व घ्राणयोः ओं ठं नमः परायघ्राणतत्त्वाय मुखे ओं जं नमः परायवाक्त· पाणिपाः ओं झं नमः परायपाणिज· पादयोः ओं जं नमः
परायपादतत्त्वा· पायौ छं नमः परायपायुत· गुह्ये ओं चं नमः परायोपस्थत मूर्ध्नि ओं ङं नमः परायाकाशतत्त्वा· मुखे ओं घं नमः परायवायु
तत्त्वा· हृदि गं नमः परायतेजस्त· लिंगे खं नमः परायजलत· पादयोः कं नमः परायपृथिवीतं हृदि ओं षं नमः परायइन्दुमण्डरीकत· रात्रेव ओं हं न
मः परायसूर्यमण्डलतत्त्वा ओं सं नमः परायसोममण्डलत· ओं रं नमः परायवह्निमण्डलत मूर्ध्नि ओं षं नमः परायपरमेष्ठिने वासु
देवत· मुखे ओं यं नमः परायपुरुषायसंकर्षणात· हृदि· ओं वं नमः परायविश्वायप्रद्युम्नत· गुह्ये ओं वं नमः परायनिवृत्तये ऽनिरुद्धत·

पादयोः ॐ लं नमः पराय सर्वाय नारायणात् ॐ क्ष्रौं हुं नमः पराय कोपतत्वात्मने नृसिंहाय कोपतत्वात्मने नमः इति मूर्द्धादि पादान्तं व्या
पकत्वेन विन्यस्य श्रीनारायणात्मकं स्वात्मानं ध्यायेत् प्रागुक्तायुतकोटिदिवाकराभमित्यादि ध्यानविशेषस्तु वामे विचिन्त्या कम
लायताक्षीं हेमाब्जवर्णां कमलां च देवीं विभूतिकामेन नमः रत्नहाराम् प्रेमणा सृजन्तीं नयनेन हृष्टया तं च देवं स्वर्णाभं चिन्तयेद्रत्न।
भूषितं तेन यथान्यसवर्णानां प्रामयेयथरणीं स्मरेत् देवो हरिर्दलश्यामां दधानां शालिमंजरीं चिन्तयेद्भारतीं देवीं वीणापुस्तकधा
रिणीं दक्षिणे देवदेवस्य पूर्णचन्द्रनिभाननां क्षीराब्धिफेनपुंजाभे वसनाभ्यां वृतवामसौ भावयित्वा महितं विष्णुं ध्यायेद्देवं पराम
रं वेदवेदार्थसंवेदी जायते सर्ववित्तमः इति नारायणीयेत् प्रणवहृदयमध्यस्थो नमोन्तश्च सजीवकः विवीजो मोक्षकृन्मन्त्रो यथो
क्तप्रणवादिकः इति अथ ध्यानानन्तरं श्रीवत्सकौस्तुभवनमालामन्त्राः प्रदर्शयेत् ततो ध्यानायात्मपूजां कुर्यात् आत्मपूजा
यां विशेषस्तु स्वहृद्देवताहृपध्यानान्तोपि भूतिपंजरन्यासक्रमेण न्यासस्थानेषु न्यासमन्त्रेण गन्धपुष्पादिभिः संपूज्य किरीटमं
त्रेण पुष्पांजलिपंचकं त्रयं वा स्वदेहे दत्वा योगपीठदेवतापूजादि यथोक्तविधिना सर्वं कुर्यादिति ततो मण्डूकादि पृथिव्यन्ते
नीरसमुद्रश्वेतद्वीपं च संपूज्य तन्तोपानादि यत्नतत्पूजातः हृद्दलकेसरेषु सायादि मध्यान्तं मादन्तिएपन विमलायै उत्कर्षि
ण्यैः ज्ञानायै क्रियायै योगायै प्रह्व्यै सत्यायै ईशानायै अनुग्रहायै नमः इति संपूज्य ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदे
वाय सर्वात्मसंयोगयोगपीठात्मने नमः इति मन्त्रेण समस्तं पीठं संपूज्य मूलमुच्चार्य श्रीविष्णुमूर्तिं परिकल्पयामीति मध्ये मू
र्तिं परिकल्प्य पुनर्मूलमुच्चार्य श्रीविष्णुमूर्तये नमः इति संपूज्य चतुरायतनदेवता गणेशादिकाः समभ्यर्च्य प्रमाणोक्तावाहनमं
त्रेणावाहस्थापनादि प्राणस्थापनान्ते वै सव मुद्राः प्रदर्श्यासनादि पुष्पोपचारान्तेकर्माणि कार्याणि भागवत्यं चांगानि संपूज्याष्टदलके
सरेष्वेव सायादि मादन्तिएपन ॐ नमः नं नमः मों नमः नां नमः रां नमः यं नमः इति संपूज्याष्टदलेषु सायादि दिक्षु च चतुष्टये ॐ वासु

रां नमः पं नमः

वि॰या २७
व॰
५८९
589

देवाय॰ संकर्षणाय॰ प्रद्युम्नाय॰ अनिरुद्धाय॰ विदिग्दलेषु॰ शांत्यै श्रियै॰ सरस्वत्यै॰ रत्यै॰ ततो दलाग्रेषु स्वायाद्दिशादक्षिणेन॰ चक्राय
गदायै॰ पद्माय॰ कौस्तुभाय॰ मुसलाय खड्गाय॰ वनमालायै॰ ततश्चतुरस्रप्रथमरेखायादेवाग्रादिशादक्षिणेन चतुर्द्दिक्षु ध्वजा
य॰ गरुडाय॰ शंखनिधये॰ पद्मनिधये॰ विदिक्षु विघ्नाय॰ आर्याय॰ दुर्गायै॰ विष्वक्सेनाय॰ इति संपूज्य द्वितीयरेखायामिन्द्रादी
न्संपूज्य भूपादिकं सर्वं पूर्ववत्समापयेदिति॥ सारसंग्रहे॰ द्वात्रिंशल्लक्षमानेन पादोनेनार्द्धतोऽपि वा॰ तदर्द्धमथवा मंत्रीज
पेन्मंत्रमनन्यधीः॰ जुहुयात्तद्दशांशेन मत्रिमधुरैः सरोरुहैः॰ तर्पयेच्चंद्रकाश्मीरमृगनाभिसुवासितैः सलिलैः स्वाभिषेकांते
तर्पयेद्ब्राह्मणानपि॰ सुकुलीनसदाचारान्विष्णुभक्तान्नतद्विजः॰ अत्रेयं जपसंख्या कलियुगादिकृतत्रेतापरान्तेयाः॰ अन्यत्र तु
विकारलक्षं प्रजपेन्मंत्रमेनं समाहितः॰ तद्दशांशेन सरसिजैर्जुहुयान्मधुराप्लुतैः॰ पीठे संपूजयेद्देवं विमलादिसमन्वितेइति तथा एवं
सिद्धे मनौ मंत्री प्रयोगान्साधयेत्सुधीः॰ मायुधाष्टभुजं सौम्यं सर्वांगंधबलियुतिं॰ निर्विषीकरणे ध्यायेद्धिस्रगरुडवाहनं॰ एवमेवं
हरिंध्यायेद्रोगसंहारकर्मणि॰ दधिमध्वाज्यसंयुक्ताश्चत्वरयुलसम्मिताः॰ गुडूचीदयुतं हुताम्ऋत्युरेव निवर्त्तते शतैश्चरदिनेश्वत्थसंस्पृ
श्यगालेवपाणिना॰ जपेदष्टशतं स्पृष्ट्वा मृत्युर्तेनापमृत्युतः॰ पंचविंशतिसंजप्तमामंत्री गुडूचीपिवेद्यः॰ त्रिरसपानको भूत्वा स रोगी सो
नवान्भवेत॰ जमापुतेन कुंभाद्भिः सेचनं सर्वरोगनुत् भुंजानः सप्तजप्तमन्नं श्रीवृद्ध्याऽरोग्यवान्भवेत् चंद्रसूर्योपरागेन त्रिदिनं दिनमेव वा॰
उपोष्याष्टसहस्रं तु स्पृष्ट्वा ब्राह्मीघृतं जपेत् यः पिबेल्लभते मेधां कवित्वं वादितां च सः॰ बिल्वैर्घृतहोमेन सद्यो धनपतिर्भवेत् बिल्वैः॥
स्तत्फलैः पत्रैर्वा॰ पद्मं तंतु समं सूत्रमयुतेनाभिमंत्रितं॰ धारयेद्दक्षिणे हस्ते सर्वं तस्यात्सुरक्षितः॰ मंत्रवर्णध्यानमुक्तं महाकपिलपं
चरात्रे॰ ॐकारं तु सदाध्येयं ज्योतिर्माला समाकुलं नकारं मेघवर्णाभं मोकारं चिंतयेत्ततः॰ भिन्नांजनसमाकारं तृतीयं बीजं।
मुत्तमं नाकारं श्यामवर्णाभं सौम्यरूपं सुशोभनं राकारं जलवर्णाभं समाकं सं दीमन्ने जसं धूम्रवर्णं सदाध्येयं यकारं परमुत्तमं॥

अतोयस्य शरणाकारं रणकारं च विचिंतयेत् । यकारं तत्र तो ध्येयं पद्मरागसमप्रभमिति अर्थेउदेशे श्रीवीजादिजामयः मडमे श्रीबीजेन तु
तं युक्तं तत्कामेस्तन्मनाजपेदिति । कामनायामपि विशेषः नारसिंहमिवात्मानं देवं ध्यात्वातिभैरवं मंत्रेणस्मर्पयेत्च्छस्तेनाविजि
त्य निवर्तते । नारसिंहेन वीजेन मंत्रयोज्यः सदा जपेत् शतमष्टोत्तरं जप्त्वा वा मस्मना भिमंत्रितः पुनः पुनश्च यः सिंचेत्सर्पदष्टोपि जी
वति । गारुडेन समायुक्तं पे वार्णान्सदा जपेत् निर्विषीकरणे ध्यायेद्धिस्तु गरुडवाहनं अशोकफलके पत्नीं इंद्रमालिख्याशोकसं
हतो । अशोकपुष्पैराराध्य भगवन्तं नदप्यतः जुहुयात्तानि पुष्पाणि त्रिसंध्यं समरात्रकं सत्पत्नी जायते पत्नी वरमिष्टं प्रयच्छति ।
गाणपत्यसमायुक्तं जपेल्लक्षं तर्पयेत्ततः महागणपतिं देवं प्रत्यक्षमिव पश्यति भारतीबीजसंयुक्तं षण्मासान्तज्जपार्चनात्
साक्षात्सरस्वतीं देवीं प्रत्यक्षमिह पश्यति । योजयेत्प्रणवं सर्वमंत्रेष्वेवर्णिकः क्रमात् योषितश्च तथा शूद्रा जपेयुः प्रणवं विना । आद
वष्टाक्षरः स्यात्प्रणवः सार्वकामिकः आदावंते पदासंपुटानेनद्दिस्तदा भवेत् आदितः संहितां कुर्यादंते तत्स्तनसंहितामिति । कल्पा
र्त्थ यंत्रमुच्यते । अष्टपत्रं च षट्कोणं रविसंख्यदलाब्जं । दंतपत्रं च तद्वत्स्यात् अष्टं भूमिपुरं शुभं । सुसाध्यकर्णिकायां तु लिखेद्दाय्यस्वर
संधीः अष्टपत्रेषु मूलार्णान्पंचशः प्रश्रीकर्णे लिखेत् षट्कोणेचक्रमंत्रार्णान् सूर्यारे द्वादशार्णकं दंतपत्रे मंत्रराजं वष्टान्ते नहरिबीजकं
प्राणागौरीरपि संयुक्तं साक्षाहि लोश्च संदिद्र आवासमंत्रैरारोप्य स्ट्टेर्वधारयेदेवं वदन् सर्वदानसवृहं तेषनारोग्यार्थसंपदः सायुज्यं
सार्ष्टि सालोक्यसालोक्यंवाथ वांछितं इति । मारसंग्रहेपि । षट्कोणे प्रणवांतस्थं प्रणवं गंसाध्य लिखेन्मध्यतः षट्कोणेषु लिखे
न्नरहरे रान्नुष्टुभार्णान्ततः तद्बीजेन च वेष्टयेद्धाहिरिदं यंत्रं हि विलासादिदष्ट जाहोमसंसाधितं करस्थं नभूतादिरक्षाकरं । लक्ष्मीकी
र्तिविवर्द्धनं परमिदं मोक्षार्थिनामन्तिकं अस्यार्थः षट्कोणे कृत्वा तन्मध्ये प्रणवोदरे प्रणवं विलिख्य तन्मध्ये साध्यनामालिख्य
षट्कोणेषु स्वाद्यादिषाद दिशोपेन सुदर्शन षडक्षर मंत्रस्य केकमक्षरं प्रतिकोणं विलिख्य तद्वहिरष्टदलपद्मं कृत्वा तद्दलेषु नारा

यमाणाष्टाक्षरवर्णान्नालिख्य तद्दलाग्रेषु वक्ष्यमाणान्नृसिंहमंत्रस्य द्वात्रिंशद्वर्णानेकैकशः समालिख्य तद्बहिर्वृत्तद्वयं कृत्वा वृत्तयो।
रन्तराले स्वोपादिमादक्षिणेन मध्यस्यान्तरसम्प्रदयकक्षा भवति तथा निरंतरं नृसिंहबीजेन वेष्टयेदित्येन यंत्रमुक्तफलदं भव
ति। श्रीयंत्रसारे। षट्कोणकर्णिकामध्ये तारं साध्यसमन्वितं सुदर्शनषडर्णं च षट्सु कोणेषु संधिषु षडंगानि चतुःपत्रके
सरेषु क्रमेण च गोपालकचतुर्वर्णमंत्रस्यैकैकमक्षरं दलेषु द्वादशार्णस्य त्रीणि त्रीणि पत्रशाणि वः अष्टपत्रे केसरे यदष्टा
ष्टैकैकवर्णके। नृसिंहानुष्टुभो वर्णाश्चत्वारश्चत्वारस्ततः सुदर्शनेऽष्टपत्रकेसरे षोडशच्छदे। ऋचां पुरुषसूक्तस्य क्रमा
च्छाके बहिः मातृकार्णैः सहृज्जं भूपुराश्रिस्य तारकं यंत्रं पुरुषसूक्तस्य प्रज्ञायुः कीर्तिकान्तिदं सर्वपापहरं श्रीदं धर्मार्थसुखमोक्षदं।
हैयंगवीने प्रविलिख्य यंत्रं त्रिवारमेतत्प्रविजप्य सूक्तं प्रातः समयाह्निना विप्रद्वापुत्रमस्तुते सकलागमज्ञं योरेविषयोरन्तरेऽभि
वारेयोरेज्वरेयोरन्तरे च स्थले हैयंगवीने प्रविलिख्य यंत्रं त्रिवारमेतत्प्रविजप्य सूक्तं। प्रभक्षयेत्तत्स्वशमाय जप्त्वा अस्यार्थः षट्।
कोणं कृत्वा तत्कर्णिकामध्ये ससाध्यं प्रणवं विलिख्य तत्कोणेषु सुदर्शनषडक्षरमंत्रस्यैकैकमक्षरं स्वाहादिमादक्षिणेन विलि
ख्य तत्संधिषु सुदर्शनषडक्षरस्य षडंगमंत्रानालिख्य तद्बहिश्चतुर्दलकमलं कृत्वा तत्केसरेषु गोपालचतुरक्षरमंत्रस्यैकमक्षरं वि
लिख्य तत्पत्रेषु वासुदेवद्वादशाक्षरमंत्रस्य वर्णत्रयं प्रतिदलं विलिख्य तद्बहिरष्टदलकमलं कृत्वा तत्केसरेषु वक्ष्यमाणषोडशाक्षर
सुदर्शनमंत्रस्यैकैकमक्षरं विलिख्य तद्दलेषु पुरुषसूक्तस्यैकैकामृचं विलिख्य तद्बहिर्वृत्तत्रयं कृत्वा तदन्तराले वीथ्यां मातृकावर्णै
विलिख्य तद्बहिश्चतुरस्रं कृत्वा दन्यभेदेषु पाठभेददर्शनात् सहस्रशीर्षेति षोडशर्चस्य सूक्तस्य नारायण ऋषिः पञ्चदशानुष्टु
भस्त्रिष्टुबेका नारायण ऋषिः सारसंग्रहे। अष्टवर्णस्य मंत्रस्य वर्णाष्टक ऋषिः पृथक् मूर्तिभेदविभिन्नोऽसौ प्रोच्यते साधो
केऽष्टदः गोतमोऽथ भरद्वाजो विश्वामित्रात्रयस्तथा। जमदग्निर्वसिष्ठश्च कश्यपश्चात्रिरेव च। अगस्त्य इति विज्ञेया ऋषयोऽष्टौ

यथाक्रमं। गायत्र्युष्णिगनुष्टुप्च बृहती पंक्तिरेव च। त्रिष्टुप्च जगती चैव विराट्छंदांस्यनुक्रमात् अग्निभूवायुराकाशआदित्या
द्योर्विधुश्चभं तत्त्वातिसप्तलोकाः सदेवोगणसपरात्मकाः शुक्लं हिरण्मयं हैमं रक्तं कुंकुमसन्निभं पद्मकिंजल्कनीलाभं रक्तं
वर्णाष्टकं स्मृतं षष्ठाद्ययोरुदात्तः स्यात्स्वरितोन्यद्द्वितीययोः उत्तराः सुः स्वकशंखगदापद्मकराः क्रमात् यामूर्तिः पूज्यते पूर्वं
तस्याश्चान्याः प्रगण्यथ अंगता सद्विशिष्टे शेषयं यान्त्यंगतां पुनः वक्ष्यमाणाच्च तारस्य विधिनाप्यधिकाहुतिः इयमेवेतरस्तवे
वर्तमानप्रकारवत् सर्वार्चायां पूर्वमंगमूर्त्यष्टकमतौ विदुः लोकपालादिकं चान्यत्समानं सर्वपूजने। नारायणो वासुदेवा
दिशक्रयोर्व्यायनादिकाः तृतीयन्ते चरत्यादिपूजाशेषं च पूर्ववत् पंचमावृते श्रीभूर्मायासाद्यु मनोन्मनी। ह्रीश्रीरतिः
पुष्टिमोहन्यो माया च मयादिकाः योगाविकान्तथा पूज्याः षष्ठान्तरमवेत्यरिः शंखो गदा हलं शार्ङ्गं मुसलोसिः सपूलकः सप्त
मार्णभवे मतं नोवासुकिसल्लकस्तथा। मत्स्यादिभिः पंचमी स्यात्स्वष्टानंतादिभिर्मताः अन्यसर्ववदेवस्यात्तत्वमिन्द्राश्चकूर्मकः वरा
हश्च नृसिंहश्च कृष्णो रामत्रयं तथा कल्पः कल्कीत्वनंतात्मा बुद्धपर्वे च नामतः पूजाविधौ च पूर्वोक्ते यत्रोक्तं वो समेव तत् अष्टारा
णमंत्राणां विधानमुपम्पगीरितं एतेन योजयेन्मंत्री भक्त्या परमया हरिं सर्वान्चिंतार्थान्लभतेन्यथात्वादेव साधकः अष्टादशस्या
ष्टवर्णस्त्वेतानामष्टमूर्त्तिता। विधानमादौ। अष्टवर्णस्येति। हरिः शरवः नमोर्णयोर्मूर्त्योः पूर्ववदायुधध्यानं अन्यासां तु दशाथः कर
मारभ्य प्रादक्षिण्येन दक्षोर्ध्वकरपर्यंतं चक्रशंखगदापद्मानि ध्येयानि। साम्मूर्तिरिति। यामूर्तिः प्राधान्येनार्च्ययितुरिष्टा सामयेप्य
ज्याः ईशानकोणे तु पुनः प्रधानमूर्तिरेव पूज्या। अवशिष्टे शस्यं यान्त्यंगतां पुनरित्युक्तेः अत्र द्वितीयमूर्तिपूजायां तत्र प्रथ
मागाहृतिर्द्वितीयाष्टमूर्तिभिः तृतीया सप्तशक्तिकेर्वासुदेवादिभिरात्मादिभिः शान्त्यादिभिश्चतुर्थी शक्रादिभिः पंचमी तद

वि· य २७
व·

५९१

591

रैत्रे: षष्ठी। नारणमूर्त्पर्वायांत्तृतीयावामदेवादिभि:सशांत्यादिभिर्ह्रजादिभिश्चतुर्थी· नाम्नारजेविधानेरत्यादिभिस्तृतीया: राणीविधौश्चा।
त्यादिभिस्तृतीया· तत्रमायामहामायायोगमायेतिशक्तित्रयनामत्रेयं· यार्णविधौत्तृतीयाशंखादिभि:णकारविधौत्तृतीया:
नंतादिभि:यकारमूर्तिपूजायांमुखमांगाहत्ति: द्वितीयावामदेवादिभि:शांत्यादिभिश्चतृतीया·केशवाद्यैस्तुरीया:ह्रजादिभि:पंच
मी·मत्स्यादिभिर्लोकेशै: षष्ठी·तरस्त्रै:सप्तमीति· रुद्रयामले· महादेवउवाच मंत्रोद्धारंप्रवक्ष्यामिलक्ष्मीनारायणस्यते·
श्रेष्ठसिद्धिप्रदंसद्य:साधकानांमुखावहं· तारंपरांवदहरिंतंपुरांलक्ष्मींततोभिधा: लक्ष्मीनारायणायेतिविश्वमंत्रेमनु:स्मृ
त: तारंप्रणव: परांह्रीं·हरितंस्तो: पराह्रींलक्ष्मी·श्रीं· लक्ष्मीनारायणायस्वरूपं ओंह्रींस्तोह्रींश्रींलक्ष्मीनारायणाय तथा·
नास्यविघ्नोनवादोषोनभीतिर्नविपर्यय: साक्षान्मोक्षप्रदोमंत्र:सर्वार्थफलदायक: वर्णलक्षंपुरश्चर्य्यांविनायुवाक्षिदोष
भाक् जीवहीनोयथादेहीसर्वकर्मसुनक्षम: पुरश्चरणहीनोपिनमंत्र:फलदायक: वटेरण्येश्मशानेचशून्यागारेचतु:पथे·
अर्द्धरात्रेचमध्याह्नेपुरश्चरणमाचरेत् वर्णलक्षंपुरश्चर्य्यांतदर्द्धवामहेश्वरि एकलक्षावधिंकुर्य्यान्न्यूनंनकदाचन· अथ
मंत्ररहस्येन साधकस्यकरेणवा· तत:स्वयंचरेद्भक्तिपुरश्चर्य्यांविधानत: जपाद्दशांशतोहोमस्तद्दशांशेनतर्पणं मार्ज्ज
नंतद्दशांशेनतद्दशांशेनभोजनं विनाद्दशांशहोमेनतत्फलमवाप्नुयात् पंचरत्नेश्वरीविद्यालक्ष्मीनारायणस्यहि·
जपेल्लक्षंपंचभि: सार्द्धपुरश्चर्य्याफलंलभेत् मंत्रस्यास्यमहादेविवर्णितोब्रह्मऋषि:शिव: त्रिष्टुप्छंद:समाख्यातंदेवतापि
समीरित: लक्ष्मीनारायणोदेविबीजंलक्ष्मीरुदाहृता· शक्ति:परातथातारंकीलकंसमुदाहृतं भोगापवर्गसिद्ध्यर्थेवि
नियोग: प्रकीर्त्तित: ध्यानमस्यप्रवक्ष्यामिलक्ष्मीनारायणस्यते· येनैवध्यानमात्रेणलक्ष्मीसिद्धिमवाप्स्यति· स्वर्णाद्रिव

दंनंपीताम्बरसंकमलासवंलक्ष्म्याश्रितंचतुर्वाहुंलक्ष्मीनारायणंभजे तारमाभूतिबीजेश्च षट्दीर्घैस्तैर्महेश्वरि॰ न्यासं
कुर्य्यात्षडंगादिकरन्यासादिपूर्वकं॰ यंत्रोद्धारंप्रवक्ष्यामिसर्वाशासिद्धिदंपरं सर्वसंमोहनंयंत्रंवांछितैकप्रदायकं विंदुत्रि
कोणवस्वस्त्रंवृत्ताष्टदलमंगणेन षोडशारंचवृत्तंचभूगेहेनोपशोभितं लक्ष्मीनारायणस्येतच्छ्रीचक्रंपरमार्थदं ल
यांगदेविवक्ष्यामिभोगमोक्षप्रदायकं वेदागमरहस्याद्यष्टगाकादिफलप्रदं वज्रशक्तिंदण्डखड्गपाशायष्टिध्वजास्ततः
शूलंसञ्ज्ञाःशिवेचैतेवासद्वारेषुसर्वदा इंद्राग्नियममासाद्वरुणानिलवित्तमाः सेश्वराःसाधकैःसज्ज्याब्रह्मानंता
दयस्तथा केशवंमाधवंकृष्णंगोविंदंमधुसूदनं गदाधरंशंखधरंचक्रपाणिंचतुर्भुजं पद्मायुधंकैटभारिंश्रीधरंदंहृज
नार्दनं वैकुंठंवामनंचैव जपेद्गरुडध्वजं षोडशारेषुदेवेशिवामावर्तेनसाधकः तत्राष्टयेन्महादेविमंत्रीगुरुचतुष्टयं श्र
मतांगेहस्तकेनंवंशषाणिंचपूजयेत् वृत्तत्रयेषुदेवेशिसाधकोगंधपुष्पकैः संहाररुरुकंचण्डभूतंशंकालभैरवं कपालं
भीषणंचैवतथाश्मशानभैरवं पूजयेत्साधकःसिद्धेवसुपत्रेमहेश्वरि विश्वंचवासुदेवंचदेवीदामोदरंतथा नरसिंहंचदेवे
शिदेविसंकर्षणंतथा त्रिविक्रमंचातिरुद्रंविष्वक्सेनंचसाधकः लक्ष्मीशक्तिंचकेदेविपूजयेद्हिडुमण्डले॰ गंधाक्षतप्र
सूनाद्यैर्गुरुमाल्यविभूषणैः अथप्रयोगः तत्रप्रातःकृत्यादिस्नानांतंकर्मसमाप्य ॐह्रींलक्ष्मीनारायणायविद्महेस्तोः
परब्रह्मणेधीमहि॰ ह्रींश्रींतन्नःपरमात्माप्रचोदयात् इतिगायत्र्यासंध्यावंधनंविधायततोयागगृहप्रवेशादियोगपीठन्या
सांतंकृत्वामूलेनप्राणायामत्रयंकृत्वाशिरसिसदाशिवायऋषयेनमः मुखेत्रिष्टुप्छंदसेनमः हृदयेश्रीलक्ष्मीनारायणदेव
तायैनमः गुह्येश्रींवीजायनमः पादयोः ह्रींशक्तयेनमःपादयोः ह्रींशक्तयेनमः सर्वांगेश्रींकीलकायनमः इतिऋष्या
दिकंयथास्थानममचतुर्वर्गफलसिद्धयेविनियोगः इतिकृतांजलिकृत्वा ॐह्रांहृदयायनमः श्रींह्रींशिरसेस्वाहा॰ ॥

वि॰य २७
व॰
५९२
592

—ह्रूं शिखायै वषट् ऐं ह्रैं कवचाय हुं ओं ह्रौं नेत्रत्रयाय वौषट् अः ह्रः अस्त्राय फट् इति षडंगमंत्रानंगुष्ठादिकरतलांतं करयोर्वि
न्यस्य हृदयादि षडंगे—पि न्यसेत् ततः करशुद्धिरूप षडंगं न्यसेत् यथा ओं कामरूपपीठाय नमः अंगुष्ठहृदयोः ह्रीं जालंधरपीठाय
नमः तर्जनीशिरसोः स्त्रौं पूर्णगिरिपीठाय नमः मध्यमाशिखयोः क्रीं वाराणसीपीठाय नमः अनामिकाकवचयोः॥
ह्रीं अवंतीपीठाय नमः करतलकरपृष्ठास्त्रयोः इति विन्यस्य अं आं र वामपादांगुल्यंगल्ह दक्षपादादिगुल्फांतं कं ५ गु
ल्फादिवामपादमूलांतं गुल्फादिदक्षपादमूलांतं टं ५ नाभ्यादिवामबाहुमूलांतं तं ५ नाभ्यादिदक्षबाहुमूलांतं पं ५ क
क्षास्कंधांतं स्कंधादिकर्णांतं यां ६ शिरसः पादपर्यंतं इति विर्व्यापकं ततो मातृकाषडंगं विन्यस्य मातृकास्थानेषु विंदुयुक्तां मा
तृकां विन्यस्य अं आं अं इत्यादि क्षांतं न्यसेत् अं ओं अं ओं इति वक्षांतं विन्यस्य अं ह्रीं अं इति क्षांतं ह्रीं अं ह्रीं इति वक्षांतं अं श्रीं अं ५
श्रीं अं श्रीं ५१ इति मातृकास्थानेषु षोढान्यासं विधाय मूलेन त्रिधाव्यापकन्यासं विधाय ध्यानादि मानसपूजांते अर्घ्या
दिस्थापनाद्यात्मपूजां विधाय मण्डूकादिपीठमसम्यर्च्य मूलेन मूर्तिं परिकल्प्यावाहनादि पुष्पांतोपचारैर्देवान्नामादाय।
परिवारदेवताः पूजयेत् मध्ये त्रिकोणकोणे—ह्रः महालक्ष्मीश्रीपादुकां पूजयामि॰ एवं म॰ महाराजलक्ष्मी॰ श्री॰
इति स्वाग्रादि प्रादक्षिण्येन पूजयेदिति प्रथमावरणं॰ ततस्त्रिकोणाग्रेषु ओं ह्रीं स्त्रौं गं गंगाश्रीपादुकां पूजयामि ३ यय
मुनाश्री ३ सं सरस्वतीश्री॰ इति द्वितीयावरणं ततोंतरालचक्रे ३ शंखश्री ३ चक्रश्री ३ गदाश्री ३ पद्मश्री ३ इति तृतीया॰
वरणं॰ ततोष्टकोणेषु ३ लक्ष्मीश्री ३ लक्ष्मीवासुदेवश्री ३ लक्ष्मीदामोदरश्री ३ लक्ष्मीनरसिंहश्री ३ लक्ष्मीसंकर्षणश्री ३
लक्ष्मीत्रिविक्रमश्री॰ ३ लक्ष्मीअनिरुद्धश्री॰ ३ लक्ष्मीविष्वक्सेनश्री ३ इति चतुर्थावरणं ततोष्टदलेषु ३ संहारभैरवश्री ३
चण्डभैरवश्री ३ भूतेशभैरवश्री॰ ३ कपालभैरवश्री ३ भीषणभैरवश्री॰ ३ स्मशानभैरवश्री ३ इति पंचमावरणं ततो

दलाग्रेषु ३ अनन्तनागश्री·३ हंसकेतुश्री ३ वशयागिणश्री·३ श्रीपतिश्री·श्रीगुरुश्री ३·परमगुरुश्री ३ परापरगुरुश्री ३ परमेष्ठिगुरु·
इति षष्ठावरणं ततः षोडशदलेषु ३ केशवश्री·३ माधवश्री·३ हंसश्री ३ एवं गोविंद ३ मधुसूदन·गदाधर·शंखधर·चक्रपाणि
चतुर्भुजः पद्मायुधः कैटभारि·घोरदंष्ट्र·जनार्दन·वैकुंठ·वामन·गरुडध्वज·इति सप्तमावरणं ततस्तु रसे लोकपालैरष्टमं तद्बहिस्त
दायुधैर्नवमं· इति नवमावरणं पूजां कृत्वा मूलेन सांगायं पादिना पुष्पांजलित्रयं दत्वा धूपदीपादिकं सर्वं भागवतमापयेदिति· अस्य पुरश्च
रणं प्रागेवोक्तं तथा प्रयोगान्तश पार्वति· वक्ष्येयेन भवेत्सिद्धिर्मंत्रस्याविशेषतः स्तंभने मोहने चैव मारणाकर्षणे तथा· वशीकारं तथो
च्चाटं शांतिकं पौष्टिकं तथा· एतेषां साधनं वक्ष्ये प्रयोगानां महेश्वरि एषां साधनमात्रेण मंत्रसिद्धिः प्रजायते· देवो स्नात्वा महादेवि ग
त्वाश्वत्थतरोस्तले· जपेदयुतमीशानि हुते तत्र दशांशतः घृतमत्स्याण्डयुक्तैः पुष्पैरानंदमिश्रितैः स्तंभनं जायते सद्यो वादिवाताक्रीमा
यसां चंद्रे द्रे रात्रवेलायां गत्वाश्मशानं गाढकं मथीः दिक्षेण बध्वा सनेशोध्यप्राणयाममं विधाय च· जपेन्मूलहंसं ध्यात्वा हृलादेवि दक्षिणावृतः
घृततारारपुन्नागकरंजकुसुमानि चाः तर्प्पयित्वा दशांशेन मार्जयित्वा महेश्वरि तद्भस्मना च रेखा ले तिलकं साधकोत्तमः त्रै
लोक्यं सहसा देवि मोहयेत्प्यनिततन्मुखे· भौमे गत्वा श्मशानं च जपेदयुतसंख्यया· हुते दशांशतो देवि सर्प्पिगोभुमुपाय
सैः दूर्वापत्रसमायुक्तैर्मृत्युश्चत्रियते तत्क्षणात् बुधे गत्वाटवीहरे अश्वत्थं तजते शिवे अयुतं मूलमंत्रं बहूनेत्सर्प्पिर्जयाक
णः दूर्वापूजासपमालपत्राणि कुसुमानि च· रंभायिपुरतत्लसमयः प्रादुर्भविष्यति गुरौ गत्वा नदीतीरे जपेत्तत्र दशांशतः
हुनेदाज्येन मधुना शाटीवृंदकरोटकां तद्भस्मना साधितेन त्रैलोक्यं वशमेष्यति· शुक्रे शोकतरुं गत्वा जपेदयुतसंख्यया· हुने
त्सर्प्पिषिनागपुष्पं शालिहुर्णंतु षाकुलिं तर्प्पयेदासवाज्येन तत्र सेर्भूत्वा दशांशतः राज्ञोः शंभुसमानस्य भवेदुच्चाटनं ध्रुवं शनौ
गत्वा नदीतीरं जपेदयुतसंख्यया· होमो दशांशतः कार्यो घृतपायसकुंकुमैः सारनारंजबुफलैः शांतिकं जायते त्व

वि॰ या॰ २७
व॰
५९३
593

ॐ

गात् स्वर्भर्देसुभवावेवागनेपवनम् एतं जपदेयुतमीशानिरुभेदाज्येनपंकजैः सोत्पलं सकणं सान्ना सहायुहि
प्रजापते॰ एतद्दस्वंपरमंतत्वभक्त्यामयोदितं॰ लक्ष्मीनारायणस्येदं सर्वस्वं परमार्थदं नदातथ्यमभक्तेभ्यो दुष्टेभ्यो वीरवं
दिते॰ महाचीनपदस्थेभ्यो भोगदं मोत्तदे शिवे कलेगोप्यं गुप्ततमं तत्वं गुह्याद्गुह्यतमं शिवे आनंदकरणं गोप्यं गोपती
यं स्वयोनिवत् सारसंग्रहे॰ अथवक्ष्ये द्वादशार्णमंत्रं सर्वार्थसिद्धिदं सर्वापन्निवारणं परं भुक्तिमुक्तिप्रदायकं ध्रुवं नमः
पदं ब्रूयात् तच्च भगवत्पदं वासुदेवपदं नद्द्वादशार्णमनुर्मतः ध्रुवः प्रणवः नमः स्वरूपं॰ ॐ॰ तं भगवत्पदं॰ भगवते तद्द्वा
सुदेवाय ॐ नमो भगवते वासुदेवाय॰ तथा॰ मुनिः प्रजापतिः प्रोक्तो गायत्री छंद ईरितं देवता स्याद्वासुदेवपक
ह्वांघ्रिशराणिकैः समलेन च पंचांगमिति अंत्रपश्चनारः शराः पंचतथा॰ द्वादशांगततोन्यसेत् हृदादिनेत्रजठरपृष्ठवा
हूरुजानुश॰ सपादेषु मनोर्णैर्नमोंतैः साधकोत्तमः अत्रासानंतरनेत्रन्यासः पंचपादाचार्योक्तः प्रकुर्वन्त्यात
वासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणब्रह्मविष्णुनृसिंहवराहाणां द्वादशांगेयोगमाह॰ उक्तं च विलयामले॰
आदौ तु पुरुषः सत्यानंतौ पश्चात्सहेश्वरि॰ वासुदेवादयोनारायणो ब्रह्मा ततः परं नृसिंहवराहा द्वादशांगेक्र
मान्यसेत् तथा॰ मंत्रसंपुटलिप्यर्णैर्यथास्थानं न्यसेत्ततः त्रिंशत्तारप्रपुटितं मूलेन व्यापकं न्यसेत् मंत्रार्णैस्त्रि
विधन्यासं न्यसेन्मंत्री समाहितः भालदृक्कर्णदृक्कर्णहृज्जठरनाभिषु लिंगजानुत्रिषु न्यासस्त्वमं त्रिभिः हृत्नादिका
ताव्रधी संस्थितिन्यासप्रवर्तते पादादारभ्य शीर्षांतं न्यासं संहारमूचिरे एवंक्रमायत्तीतास्याद्विलोमेनोच्यतेस्य सो॰
सर्वाश्रमयुतानां च स्थित्यंतो गृहमेधिनां॰ संहाराद्यो निगदितो मंत्रशास्त्रविशारदैः संहृतेर्दोषसंहारः सृष्टेश्च
शुभसंश्रयः स्थिते श्च शांतिर्विन्यस्यतस्मात्कार्यस्त्रिधाबुधैः व्यापकत्वेन मंत्रार्णान्न्यसेन्नो सुधीः कभालदृग्वक्र

सत्याच्यु
विष्णु
च्यु
धिके
क = ४
प्रोक्तः हृद्धि = ४

ग्मे=१ दां दृ=

कंठदोर्युग्महृदयेषुच॰ कुक्षौलिंगेपादयुग्ममूलेनव्यापकंन्यसेत् ततन्यासंप्रविन्यस्यविन्यसेन्मूर्तिपंजरं॰ ततानिद्वादशारणि
नित्र॰ जीवभागाधिपश्चितेहृत्पमेसूर्यमण्डलंचन्द्रमण्डलमग्नेश्चमण्डलंसकलान्वितं॰ वासुदेवादयस्त्रेतितं।
तानिद्वादशावदन् इतिहयशीर्षपंचरात्रोक्तानि॰ अत्रतत्वानांन्यासस्थानानिप्राशुक्तानितन्न्यासप्रकरणेयस्य
तत्वस्ययत्स्थानमुक्तंतत्रतत्रेनतत्वंन्यसेत॰ एतेषांद्वादशतत्वानांमंत्रदंतगंतत्वादेवात्रपृथक्न्यान्यासस्थानानिनो
क्तानीति॥ सारसंग्रहेततःसमाहितोभूत्वावासुदेवंहृदिस्मरेत् मध्येदुग्धाब्धेर्द्वीपेदिव्यपोषानिषेविते॰ तत्रसंवित्य।
विपिनमतिविलक्षितेनिषेविते तन्मध्येकल्पवृक्षंचदिव्यमूर्तंदर्शनंतत्स्याधस्तात्तत्रमंचेकमलेविमलप्रभे शरत्पुण्ड
विलसत्प्रभापटलराजितं तत्रसंचिंतयेद्देवंवासुदेवंस्मितानने॰ कुंदेन्दाभंगदाचक्रपद्मशंखलसत्करे चंद्रायुतलस
त्कान्त्यामोहयंतंजगत्त्रयं केयूरांगदसंराजत्कुण्डलरत्नभूषणं श्रीवत्सांकलसद्वत्समकुटंकौस्तुभांवितं अरविंददलाताम
सुरम्या म्ररम्यायतलोचनं कुण्डलशोभसद्गण्डसंपीनवाससं ग्रैवेयहारसंशोभिकंबुकंठसुकंकणं॰ विशालवक्षसंराजत्स
फुल्लवनमालकं सनकादिमुनीन्द्रैश्चतत्वनिर्णयकांक्षया निषेवितंदित्युद्दितिजातर्कैर्धर्वसंवद्येः सिद्धविद्याधराद्यै। गं
श्चसेवितंचमनोरमैः वामोर्ध्वादितदधःकरान्तमायुधध्यानं वासुदेवंतुकुर्वीतवक्तर्वाहुसरेश्वरम दक्षिणोपरिचक्रंच
पद्मंचाधिःप्रकल्पयेत् वामोपरिगदाकार्याशंखंचाथःसुशोभन इतिहयशीर्षपंचरात्रवचनात् तथा एवंध्यात्वावासुदे
वंस्वभावेनजगत्प्रभुं सर्वादिनेयजेत्पीठेदेवमावाससंत्रवित् मूर्तिमूलेनसंकल्प्यगंधाद्यैस्तत्रपूजयेत् सर्वमंगानि
संपूज्यवासुदेवादिशक्तयः दिग्विदिक्षुचसंपूज्यास्ततोद्वादशमूर्तयः क्रियाद्याःसमभ्यर्च्यालोकेशाद्याः पृथक्

मण्डलं ति

वि॰ या॰ २७
व॰
५९४

594

सहेति॰ अथ प्रयोगः तत्र प्रातः कृत्यादियोगः पीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि प्रजापतये ऋषये नमः मु
खे गायत्रीछंदसे नमः हृदये श्रीवासुदेवदेवतायै नमः इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृतांजलि
कृत्वा मूलेन करयोर्व्यापकं कृत्वा॰ ॐ हृदयाय नमः नमः शिरसे स्वाहा भगवते शिखा वासुदेवाय कवचं नमो भगव
ते वासुदेवाय अस्त्रं इति पंचांगमंत्रान् अंगुष्ठादिकनिष्ठांतं करयोर्विन्यस्य नेत्रवर्ज्यात् हृदाय सांतं च विन्यस्य हृदये ॐ पुरु
षाय नमः शिरसि नं सत्याय॰ शिखायां मों अच्युताय॰ कवचस्थाने भं वासुदेवाय॰ अस्त्रस्थाने गं संकर्षणाय॰ नेत्रयोः
वं प्रद्युम्नाय॰ उरसि तें अनिरुद्धाय॰ पृष्ठे वां नारायणाय॰ बाह्वोः सुं ब्रह्मणे॰ ऊरौ दें विष्णवे॰ जान्वोः वां नृसिंहाय॰ पादयोः
यं वराहाय॰ ततः शिरसि॰ ॐ नमो भगवते वासुदेवाय पुनर्विलोमसमं नमः यं वं १२ आ॰ १ नमः इत्यादि मूलमंत्र पुटिता
मातृकान्यासस्थानेषु विन्यस्य प्रणवपुटितेन मूलमंत्रेण स्वदेहे त्रिर्व्यापकं कृत्वा पादयोः ॐ नमः जान्वोः नं नमः लि
गे मों नमः नाभौ भं॰ उदरे गं हृदये वं बाह्वोः तें कंठे वां मुखे सुं॰ दृशोः दें॰ भाले वा॰ शिरसि यं इति संहारेण विन्यस्य शिरसि
ॐ नमः भाले॰ नं नमः दृशोः मों नमः मुखे भं नमः कंठे गं नमः बाह्वोः वं नमः हृदये तें नमः उदरे वां नमः नाभौ सुं नमः
लिंगे दें नमः जान्वोः वा॰ पादयोः यं नमः इति सृष्टिन्यासः हृदि ॐ नमः उ मं नाभौ मों॰ लिंगे भं॰ जान्वोः गं॰ पाद
योः वं॰ बाह्वोः तें॰ कंठे वां॰ मुखे सुं॰ दृशोः दें भाले वा॰ शिरसि यं नमः इति स्थितिन्यासः सर्वगृहस्थैः कर्तव्यः यतिभि
स्तु सृष्टिस्थितिसंहारक्रमेण कार्यः वर्णिभिस्तु स्थितिसंहारक्रमेण न्यसेत् इति॰ एते वर्णाः प्रणवपूरिताः न्यसे
या इति केचित् ततः पुनर्मंत्रवर्णान् हृद्भालनेत्रवक्त्रकंठबाहुहृदयजठरलिंगपाददृये षु द्वादशस्थानेषु आम्बहि

न्यस्य पुनर्मूलमंत्रेण व्यापकं कृत्वा सर्वांगेषु ॐ नमः परायजीवनवात्मनेनमः हृदये ॐ नमः परायबुद्धितत्वात्मनेनमः
ॐ नमः सनत्कु॰ ॐ नमः इत्यनंतनमहाद्वादशकलात्मसूर्य्यमण्डलतत्वा॰ ॐ नमः षोडशकलान्वितचंद्रमण्डलतत्वा
त्मनेनमः दशकलान्वितवह्निमण्डलतत्व॰ शिरसिॐ नमः वासुदेवतत्वा॰ मूर्द्धिॐ नमः संकर्षणतत्वा॰ हृदि ॐ नमः
प्रद्युम्नत॰ गुह्येॐ नमः परायानिरुद्धतत्वायनमः इति द्वादशतत्वानि विन्यस्य भगवन्मूर्तियंत्रं त्यासं विधाय ध्याना
दिषु व्यापचारांतेंगानि संपूज्याष्टदलेषु भगवद्वासुदेवादिमूर्तिशक्तीः संपूज्य तद्बहिर्द्वादशदलेषु ॐ केशवायनमः
एवं नारायणाय॰ माधवाय॰ गोविंदाय॰ विष्णवे॰ मधुसूदनाय॰ त्रिविक्रमाय॰ वामनाय॰ श्रीधराय॰ हृषीकेशाय॰ प
द्मनाभाय॰ दामोदराय॰ देवाद्यादिशादतिरेपनसंपूज्यपद्धायावादिसर्वोभगवन्तमापयेदिति॰ तथा॰ एवं संपूज्य विधिवद्ध।
ग्निलक्ष्ममनुं जपेत् वर्णलक्षं द्वादशलक्षं तत्सहस्रं चैकलक्षं जुहुयान्मधुराप्लुतैः तिलैः शुद्धैरथ श्रुतिकेविदाज्यपरि।
प्लुतैः तर्पणादिततः कुर्य्याद्यथोक्तं विधिना सुधीः एवं सिद्धमनुर्मंत्री वांछितार्थान्प्रसाधयेत् स्वनेजद्रुमसंभूतसमि
द्भिः पापमुक्तये यथोक्ताभिः प्रजुहुयात्साधको र्कसहस्रकं सततं जुड्स्त्रीरहस्त्रः साज्यैतद्विधा चैव जुहुयात्वित्त शुद्धये
पायसेनतिलैः शुद्धैः समिदाज्यैः पुष्पैर्नैवेद्यः शालीभिस्रान्वहं संत्री सोभीष्टफलभाग्भवेत् अष्टोत्तलभतेमुक्तिः नियतात्मा
नुसंशयः द्वादशाक्षरमंत्रस्य विधानं परिकीर्तितं॰ अथेवतः साधकानांभुक्तिमुक्तिप्रदायकं मारसंग्रहे॰ मायाद्वयं रमाद्वं
द्वलक्ष्मीपदमथोवदेत् वासुदेवं चतुर्थ्यंतं वासुदेवायेति ध्रुवादिकः प्रणवाद्यः मनुसंख्यात्तरः चतुर्दशाक्षरः ॐ
ह्रौं ह्रीं श्रीं श्रीं वासुदेवायनमः तथा॰ ऋषिः प्रजापतिश्छंदो गायत्री देवता मनोः मनोर्लक्ष्मीवासुदेवो देवदानववंदितः

वि॰ घा॰२७
व॰
५९५
595

४

हृन्मेयानततोह्यभ्यां पंचभिर्हिं जयेनवा॰ पंचांगानि मनोर्वर्णैः प्रणवाद्यैः प्रकल्पयेत् उद्यन्मोदामिनीसकभासायरकचिरंभूषणैर्भूषिता
गंपकीभूतवपुः श्रीकमलनयनयोस्सम्भगाश्लेषलोभात् लक्ष्मीदिश्यपान्मुदावोलिलिविनम्मरसिजेंदर्पणं रत्नकुंभं सं
विभ्रद्धस्तपद्मैः सरसिरुहगदाशंखचक्राक्रयाति॰ वामभागस्थैः करैद्दृह्यादिभिर्लिखितादीनि॰ दक्षैस्मैः सरसिरुहादी
निचत्वारिध्येयादीनि॰ पुरोदितेयजेत्पीठे द्वादशार्णान्तरवर्त्मना॰ अथ प्रयोगः तत्र प्रातः कृत्यादियोगपीठन्यासान्तेमू
लेनप्राणायामत्रयं कृत्वा॰ शिरसि प्रजापतये ऋषये नमः मुखे गायत्री छंदसे नमः हृदि श्रीलक्ष्मीवासुदेवाय
देवतायैनमः इति विन्यस्य मम सर्वेष्टसिद्धये विनियोगः इति कृतांजलिकृत्वा॰ ॐ ह्रीं ह्रीं हृदयायनमः ॐ श्रीं श्रीं शि
रसे स्वाहा ॐ लक्ष्मी शिखायै वषट्॰ ॐ श्रीं वासुदेवाय कवचाय हुं॰ श्रीं नमः अस्त्राय फट् इति पंचांगमंत्रान्मूलाभि
मृष्टयोः पाण्योरंगुलीषु विन्यस्य नेत्ररहितेषु हृदादिषु च विन्यस्य यथोक्तरूपं ध्यात्वा मानसैः पूजादि सर्वं द्वादशार्णवत्
कुर्यात् इति सारसंग्रहे॰ वेदादिमायया युक्तो दौ वीजं शंकरं वदेत्॰ ङे॰ न्तं नारायणं प्रोक्त्वा दन्तदौ वदेत्ततः हृल्लेखा प्रणवान्तश्च
मंत्रोहरिहरात्मकः सर्वसंपत्प्रदो नित्यं षोडशार्णवराविनः वेदादि प्रणवो माया भुवनेश्वरी वीजं॰ हौं स्वरूपं॰ शंकरस्वरूपं ङे॰
न्तं नारायणं॰ नारायणाय हृदन्त नमः हृल्लेखा भुवनेश्वरी वीजं श्रीं ह्रीं हौं शंकरनारायणाय नमः हौं ह्रीं श्रीं॰ तथा ऋषि
नारायणश्छंदोऽनुष्टुबुदाहृतं देवतास्याद्धरिहरः सर्वाभीष्टप्रदायकः षट्दीर्घयुग्मायया चषडंगानि प्रकल्पयेत्
शूलं चक्रं पांचजन्यमभीतिं दधतं करैः स्वस्वरूपा[illegible] नीलार्द्धदेहं हरिहरं भजे॰ दक्षोर्द्धादितदर्द्धान्तमाप्रथध्यानं देवं
प्रपूजयेत्पीठे सर्वशक्तिके नवशक्तिके॰ सर्वसंगानि संपूज्यशक्तीरेताः प्रपूजयेत्॰ लक्ष्मीनारायणी भूश्च धरा सांदे

ध्वे

विकान्तथा चैयंच कान्तया गौरीगंगाधर्माऽष्टमीतथा लोकेशान्तहृदिस्थः ज्यावज्रादीन्यायुधान्यपि पूर्वं सम्यक्प्रकारेण पूजितेऽभी
ष्टमाप्नुयात् अथ प्रयोगः तत्र प्रातः कृत्यादि योगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि नारायणाय ऋषये नमः
मुखे अनुष्टुप् छंदसे नमः हृदये श्रीहरिहराय देवतायै नमः इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृतांजलिः कृत्वा
ओं ह्रां हृदयाय नमः ह्रीं शिरसे स्वाहा ह्रूं शिखायै वषट् ह्रैं कवचाय ह्रौं नेत्रत्रयाय ह्रः अस्त्राय इति षडंगमंत्रान् अंगुष्ठादितलांतं।
करयोर्विन्यस्य ध्यानान्तरं गन्धाष्टजातैः ष्टदलेषु लक्ष्म्यै नारायण्यै भूम्यै पुष्ट्यै ध्रुवकायै त्रियंबकायै गौर्यै गंगाधर्म्यै च
